(i) The corroboration on the strength of the Vedic compoumd एहिमायासः (RV I, iii .9) is taken as a model in the classical language.

(ii) On the strength of convention of poets as e.g. माभैः प्रदानोचित ·· etc. which falls under Pāṇini 2, 1.72.

The word गणेय (III .40) is a hard nut to crack for other commentators, Mallinātha and Nārāyaṇa simply explain it by including it in the uṇādi. But CP gives full procedure.

At times Kātantra's grammar is quoted and called as Kālāpaka and Kaumāra also.

The difference of suffixes of Pāṇini and Kātyāyana is given nicely under X, 89 for the word निगाद्यम् that yat of Pāṇini is kyap of Kātyāyana

---

12. Cp. अत एव कविना····पाणिनिव्याकरणस्य सूत्रार्थो व्यञ्जितः ।
13. Cp. Raghu. 11, 14 : कौशिकाद्विदितशापया ।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

and ṇyat of Pāṇini is ḍvyan of Kātyāyana.

For the term ṇic of Pāṇini, Kātantra, uses in, so CP writes inanta for ṇijanta and an-inanta for a-ṇijanta[14].

Nirukta :

He quotes Nirukta several times. He refers to Yāska as Niruktakāra (V, 39), Yāskācārya (VII, 39) and even Yāskācārya (XIII, 25).

Jyautiṣa :

Some astrological facts are stated distinctly.

(i) Under XI, 79, CP says that on New-moon day (amāvāsyā) the moon unites with the Sun and is separated on the first day of the month[15].

(ii). Under XII, 94, The view that Rāhu is a non-entity according to astronomy, and that it is only a shadow of the earth on the moon, is given[16].

(iii) Under XV, 41, the duradharā-yoga[17] of astrology is explained. This yoga concurs when in a horoscope, the moon in the first house is flanked by saumya planets (like Jupiter and Venus on both the sides.)

The norms of Sāmudrika-śāstra are referred to under I, 18, IX, 43 etc.

---

14. Cp. (i) Canto VI, 78 : मयेत्यनिनन्तस्य कर्ता इनन्ते सति ।
(ii) Canto VII, 8 : अनिनन्तकर्तुरस्मच्छब्दवाच्यस्य इनन्ते सति ।

15. Cp. अमावास्यायां श्रीसूर्यमिलितश्चन्द्रः प्रतिपदि मण्डलाद्बहिर्निःसरति ।

16. Cp. ज्योतिःशास्त्रे गणितग्रन्थे राहुरयं न भवति किन्तु भूगोलस्य छाया इयं चन्द्रे इत्युक्तम् ।

17. Cp. यत्र लग्ने जन्मकाले चन्द्र उभयतः सौम्यग्रहयुक्तो भवति, स दुरधरा नाम योगो ज्योतिःशास्त्रे प्रसिद्धः ।
"....a conjunction of the planets Jupiter and Venus with the moon regarded as highly auspicious for births ... When there are two planets, excepting the Sun, in the 12th and the 2nd place respectively from the moon, the yoga is called duradharā." Handiqui K. K. : p. 591-592.

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

The Science of omens is referred to under X, 91.

The notes of birds like Kapiñjala etc. represent good omens[18]. The throbbing of the right hand and right eye are also good omens.

Smṛti-literature :

Under XVII, 51 CP refers to the Sukhonmukhā commentary alongwith the mention of the welknown Smṛti-commentators, such as Viśvarūpa (who is mentioned by Vijñāneśvara in the beginning of his commentary Mitākṣarā), Govindarāja (commentator on Manusmṛti) and Harisvāmī (a bhāṣya-kāra on Śatapatna-brāhmaṇa, whose title was Sarvavidyā-nidhāna-kavīndrācārya-sarasvatī).

Manusmṛti :

2.74 C.	under III, 75.
3.76.	under IV, 75.
1.90.	under V, 10.
3.78.	under VI, 97.
3.105. and 3.101.	under VIII, 20.
8.92.	under IX, 129.
MBh. 3, 52.4.	under V, 76.
वैन्यं पृथुं हैहय	under V, 134.
3, 301.2.	under 1, 3.
12, 171.12.	under IX, 85.
Gītā 8.6.	under IX, 147.
Yājñavalkya-smṛti :	
ācārādhyāya 215.	under II, 12.
77.	under IV, 80.
200.	under V, 17.
107.	under VIII, 20.
vyavahārādhyāya 101.	under II, 27.
33-39.	under VII, 33.

Philosophical doctorines :

Nyāya-Vaiśeṣika :

CP quotes from the Nyāya-sūtras, Vaiśeṣika-sūtras, Nyāya-sāra, and Nyāyakandalī.

---

18. Cp. Canto X, 91 : शकुनानां पक्षिणां....शकुनशब्देन सामान्यतः शकुनशास्त्रोक्ताः शकुना निर्दिश्यन्ते ।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

The following sūtras are quoted with full discussion.

Nyā. Sū.	1, 2.1	under VIII, 41.
	1, 1.1	under X, 82.
Vai. Sū.	5, 2.3	under V, 215.
	1, 1.6	under XI, 45.

Nyāyakandalīkāra's passage on the 9 entities is quoted under XXII, 35 and Nyāyasāra of Bhā-sarvajña (P. 1 Line 2-8) is quoted under V, 18.

The atomic theory of creation is discussed under III, 125 and referred to under XI, 26.

While commenting upon VI. 51, CP mentions different schools of philosophy in the following order :

Sāṅkhya, Bauddha, Śūnyavāda, Naiyāyika and Bhāṭṭa Mīmāṁsakas, Vedāntins and Prābhākara-mīmāṁsakas and declares that the present verse indicates the theory of Validity as propounded by the Prābhākara school[19].

Under VI, 102 in connection with the concept of God (Īśvara), he gives parallel theories of Naiyāyikas and Vedāntins.

The theory of causation is discussed under I, 12; III, 123; VIII, 50; IX, 58; X, 115 etc.

Sāṅkhya-Yoga :

The Sāṅkhya theory of mokṣa is given under XVII, 73.

Pūrvamīmāṁsā :

The titles earned by CP throw light on his practical knowledge of the ritual of śrauta sacrifices. However he is also profound scholar in the theoratical doctorines of this school.

He has thorough knowledge of the Jaiminīya-sūtras, their adhikaraṇas and the doctrines of the Bhāṭṭa and the Prābhākara schools.

Following topics are discussed by CP :

---

19. Cp. Canto VI, 51 : अयं श्लोक : प्राभाकराभिप्रायेण कविना कृत: ।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

Offerings and the deity as the 2 forms of the ritual	under V, 39
Corroboration of Smṛti	under XVI, 60
3 types of arthavāda	under V, 39
Compound injunctions	under XVII, 59-60
Vedas being a-pauruṣeya	under XI, 62.

Uttaramīmāṁsā :

CP is also an erudite mīmāṁsaka. Thus, many a times, he refers to the theory of blending of knowledge and Action. But under VII, 46, he elaborates the absolute monism estabalishing the knowledge alone as the means of salvation and thereby, he supports the theory by the scriptual passage (Chā. Up. 6, 14.2).

The jīvanmukta state of a Yogin is stated under V, 8.

The 2 meanings of the word prajñā-cakṣu i.e. a blind and a Yogin are given under XII, 106.

Kāmaśāstra :

In the colophon of the canto XVI, CP says that he has studied the Kāmaśāstra of Vātsyāyana with the bhāṣya[20]. And hence under several verses he shows his thorough and extensive study of this branch.

The following topics are main :

64 arts enumerated	under VII, 107; X, 35
Types of embraces etc.	under XVI, 63
Close-postures	under III, 124

For the spṛṣṭaka type of embrace he quotes Rati-rahasya (6, 1) under VI, 35.

Under VII, 91, he clearly explains the simile of vulva (varāṅga) with the leaf of the Pippala tree; and under XVI, 15, the term viparīta-surata is explained in a short statement by saying that in the viparīta-surata, a woman is in an upper position.

Tantraśāstra :

Apart from his being a dīkṣita in Tantra, CP seems to be conversant

---

20. Cp. श्रीवात्स्यायनभाष्यदर्शितनयैः....etc.

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

with the Tāntrika concepts.

Thus under V/127, he refers to the 3 days viz. aṣṭamī (8th), navami (9th) and caturdaśī (14th), as the days related to the Goddess and remarks further that on these days, they i.e. the ladies do not grind the flour (Skt piṣṭa=peṣaṇa, Pkt. pīṭha-dalana) or do not knead (Skt. piṣṭa-bandhana, Pkt. pīṭha-bandhana) it, because the vernacular word for the flour is pīṭha and the same word is used for the seat of the Goddess[21]. (In Marāthi even today, the word pīṭha is used in the sense of kneaded flour).

The Goddess Sarasvatī is also known as the Goddess Tripurā (parameśvarī) or as Bālā. Thus he explains the word bālā[22] as bālā parameśvarī, under X, 74.

CP's scholarship in extracting the **Cintāmaṇi-mantra** is revealed in XIV, 88 and under the same, he explains the verse by giving 2 alternative mantras[23] in the way that deserves a traditional Tāntrika.

Nāṭyaśāstra :

According to CP, Nala is a śṛṅgāra-pradhāna-nāyaka, as he is a dhīra-lalita (brave but sportive and reckless) hero as per types of a hero in the Nāṭyaśāstra.

Under I, 30, he gives threefold division of heroines as mugdhā, madhyā and prauḍhā.

Under VIII, 64, the vyabhicāri-bhāvas are mentioned which are at the root of the Vipralambha-śṛṅgāra.

Similarly, CP mentions the sthāyi-bhāvas such as : rati etc., vyabhicāri-bhāvas such as : nirveda etc. and sāttvika-bhāvas such as : stambha etc. under XI, 63.

Following topics are discussed :

---

21. Cp. तथाऽष्टमीनवमीचतुर्दशीषु देवीतिथिषु पिष्टस्य पेषणबन्धादि न कुर्वन्ति। तत्र हि अपभ्रंशभाषया पीठदलनं पीठबन्धनमित्यादिव्यवहारः। पीठस्य च देवी-सम्बन्धत्वम्।

22. Cp. Nc. X, 74 : मध्येसभं साऽवतार बाला।

23. Vide : Appendix—2.

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

Ten stages of a love-lorn person	under III, 103-114
Rasadoṣa	under XVI, 38
Sūtradhāra[24] and Vidūṣaka[25] (defined)	under IX, 118

Alaṅkāraśāstra :

CP quotes from the Kāvyādarśa of Daṇḍī, Kāvyālaṅkāra-sūtra of Vāmana, Kāvyālaṅkāra of Rudraṭa with the commentary of Pratīhārendurāja, Rājānaka Ruyyaka (Rucaka) and Kāvyaprakāśa of Mammaṭa etc. etc. This shows the wide range of works on Rhetorics mastered by him.

Following topics deserve attention :

Propriety of usage (Kā. da I, 95)	under VII, 32; XXII, 25 etc.
Strength of pronouns (Vā. 5, 1.11)	under IV, 40
Nyūnatve guṇaḥ supported by Amaru (40)	under I, 142
Garbhitatva (Kp VII, 320)	under VIII, 92
Bindu-cyutaka, a Citrakāvya	under IX, 104
3 powers of a word (Kp II, 3)	under X, 97; 116 etc.
Atiśayokti (figure of speech)	under III, 40
Sāmānya (Rudraṭa 9, 22)	under XVI, 28
Definition of an Alaṅkāra (quoting Pratīhārendurāja 2, 32)	under XVI, 28
Samasta-vastu-viṣaya-mālā-rūpaka	under I, 75
Definition of Rūpaka	under III, 22
Ceṣṭā and Sannidhi (as the cause of particular recognition)	under XVI, 72; 76

24. Cp. अथ च सूत्रधारो नाटकाचार्यो भवति ।

25. Cp. तथा द्विजानां राजा प्रधानो ब्राह्मणः विदूषको नाम नायकस्य मित्रं भवति ।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

Miscellaneous :

CP refers to several analogies (nyāya) like :

(i) Kākākṣi-nyāya under X, 29

(ii) Ardha-jaratīya-nyāya under XVII, 59; 60

Some of the general maxims like :

(i) Saṁyogā viprayogāntāḥ (MBh) under V, 131

(ii) Aniṣṭa-śaṅkīni bandhu-hṛdayāṇi[26] under VI, 107

The work called Bhogāvalī (eulogy of kings) by the Bards (māgadha) is also stated under X, 105.

At many places, he quotes the works of poets like Kālidāsa, Bhāravi, Māgha, Murāri etc.

---

26. Cp. अतिस्नेहः पापशङ्की Act IV, 19.9; and notes thereof by Karmarkar R.D. on Abhijñānaśākuntalam.

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

CHAPTER—4

Agreement and disagreement of CP with Vidyādhara, Mallinātha and Nārāyaṇa.

In this chapter, an attempt is made to compare certain points of agreement and disagreement of CP with other 3 important commentators on the Nc, and to bring out the excellence of CP.

Under I, 134, the word sa-citra-vailakṣya-kṛpam is explained almost similarly by all the four with a few changes :

citra =(V) हंसस्तथा वदतीत्याश्चर्यम् ।
(CP) मनुष्यवाक्त्वाच्चित्रम् ।
(M) पक्षिकथनाच्चित्रम् ।
(N) पक्षिणो मनुष्यवाक्त्वाद् हेमपक्षत्वाद्वा चित्रमाश्चर्यम् ।

All of them have justified the word by saying that because it is the speech of a bird in a human manner, the king is astonished. Only Nārāyaṇa gives optional meaning which has a fault called distant construe (dūrānvaya) of the word golden wings (hema-pakṣa) from I, 130[1].

Many a time, wherever there is an opportunity, CP clearly explains the intention of the poet by giving a syllogism, while others offer simple explanations. Thus, Lord Śiva having 3 eyes (tri-nayanatva) (IV, 130) is explained with a syllogism as under :
अत्रानुमानं प्रमाणमाह—लोकस्त्रिनेत्रो भवेत् ।

कामस्याऽक्षिगतत्वात् ।
यस्य यस्य कामोऽक्षिगतः स स त्रिनेत्रः ।
यथा महादेवः ।
तथा चाऽयं कामोक्षिगतः ।

CP prefixes the honorific word śrī to the names of the gods etc., while others give only a synonym. Thus,

Mṛḍa (III, 32)=(V) & (M) Bhava, (CP) Śrī-Mahādeva (N) Hara.

---

1. Cp. Nc. समीक्ष्य पक्षान्मम हेमजन्मनः ।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

Śikhī (IX, 75) is not given due justice by Vidyādhara, Mallinātha or Nārāyaṇa. Only CP explains it in details as one of the 5 brothers viz.

Vaiśvānara, Gṛhapati, Yaviṣṭha, Pāvaka and Saucīka.

The word Śikhī refers to the last one i.e. Saucīka and to corroborate this meaning, CP quotes the relevant passages from Ṛgvedānukramaṇi and Bṛhaddevatā, with full mythology of the disappearance of Saucīka fire. This is not irrelevant to the context, because the poet refers to it with the words विधिस्तु वैदिक: and CP seems to do better justice to the poet.

The siglum ānanda of the poet is brought out, first of all by CP, Vidyādhara is silent over this. Mallinātha corroborates the word with the dictum of Mahābhāṣya मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि etc. and Nārāyaṇa clearly points out that सर्वसर्गसमाप्तिश्लोकेषु आनन्दपदप्रयोगात् आनन्दाङ्कमिदं काव्यम् ।

Thus Nārāyaṇa reiterates the statement of CP.

The exactness is also an outstanding feature of CP.

The words like cikitsā (V, 85), anīkṣā (VI, 43) etc. are explained by him with exact connotation i.e. cikitsā is the medical treatment (auṣadhopacāra), Vidyādhara explains it as only treatment (upacāra), Mallinātha is silent, while Nārāyaṇa explains is as a remedy (pratikriyā).

Similarly the word anīkṣā (VI, 43) is explained by CP as non-observance (anīkṣaṇam) as well as non-seeing (anavalokanam). Vidyādhara gives both the words but not as phrases or synonyms. Mallinātha calls it anirīkṣā, while Nārāyaṇa explains it as anavalokanam.

In case of neuter forms wherever there is a possibility of confusion regarding the subject and the object, the singular forms of Nominative and the Accusative cases (are being similarl), CP adds the word कर्तृ, कर्म etc. in places like I, 19; II, 27 etc.

The word bandha (III, 124) is explained by CP as the particular love-posture (karaṇa) such as Paṅkajāsana, Veṇudārita etc. as described by Vātsyāyana and others in their works on Erotics. All other 3 commentators explain it without such reference, though Nārāyaṇa differs here and explains it as love-posture like Uttāna (or Uttānaka).

Some peculiar grammatical forms of words are not explained properly by Vidyādhara, Mallinātha, and Nārāyṇa, e.g. the word gaṇeya (III, 40) is explained fully by CP giving detailed grammatical steps of its formation. Vidyādhara is silent because he does not want to make his

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

commentary an arena of scholarship. Mallinātha and Nārāyaṇa simply explain it with words : eya is the auṇādika-suffix[2].

Under X, 34, the word anyonya-bhāṣā is explained by V and CP as the Prakrit language of the different states such as : गौड-द्रविड-मलयज-महाराष्ट्र-गूर्जर-मालवादि-लोकानां परस्परप्राकृत. etc V omits Gūrjara, while M and N do not mention the name of any state.

The mythology of Sarasvatī (XI, 64) being a consort[3] of Lord Viṣṇu is given in the āgama. V and N are silent and do not comment on it. But CP[4] and M[5] make the point clear.

Thus CP is more precise in giving appropriate meanings and thereby does better justice to the poem.

In the beginning of each canto the introductory remark given by CP relates the preceding canto with the canto on hand. V and M are silent on this point, while N gives only a single sentence to introduce the canto on hand. CP gives lengthy introductory remarks to introduce the canto on hand properly.

The word naiṣṭhika (XVII, 113) is explained by CP in a traditional way with the etymological meaning as "one who leads his entire life i.e. stays till death with the teacher" and quotes Yājñavalkya-smṛti (2, 49) to support his explanation.

Here M explains it as यावज्जीवं ब्रह्मचर्येण अवतिष्ठमानम् and N explains it as गुरुकुलनिवासिनम् and quotes the same verse of Yājñavalkya-smṛti.

In case of the readings, CP does not accept any reading which is not grammatically correct nor correct as per the context. He remarks that the particular reading is not correct or requires proper consideration.[6]

---

2. Vide : Chapter 3, sect. Vyākaraṇa.

3. Cp. Nc देवी पवित्रितचतुर्भुजवामभागा ।

4. Cp. आगमे हि सरस्वती श्रीकृष्णस्य शक्तिरूपतया पत्नीत्वेन श्रूयते ।

5. M. लक्ष्मीसरस्वत्यौ हि देवस्य दक्षिणवामपार्श्ववर्तिन्यौ इत्यागमः ।

6. Vide : Chapter 2 : fns 71-73.

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

The reading bhajata[7] (XI, 24) and kṣurakṣuṇṇāsu[8] (XII, 66) are not correct ones, eventhough V accept bhajata and not tyajata. N accepts both under XI, 24 mentioning tyajata for bhajata. M accepts both the readings.

Under X, 18, V and CP accept the reading vṛṇoti, but not bhajeta which is accepted by M and N.

The verse X, 33[9] has alternative stanza which is given by CP as इति पाठान्तरश्लोकः । V is silent. M comments this verse and N again accepts this second verse as the another verse.

The reading navaloka (XII, 62) is accepted by CP and M, while N accepts varaloka. At the same time, under XVI, 75 CP's reading is nyadhuṣṭamām and he gives another reading vyadhuṣṭmām, which is accepted by V and M.

As far as the discussions on various topics and explanations in various ways are concerned, CP is unique, because Vidyādhara gives importance to the literary aspect in his commentary. Mallinātha[10] thinks himself satisfied by quoting various lexicons. While Nārāyaṇa makes the poem an arena of hair-spliting and far-fetched explanations.

Wherever CP records variant readings, Nārāyaṇa accepts CP's variant reading as the main reading. Many of his explanations are borrowed verbatim by him from the commentary of CP. It seems that CP's commentary was accessible to Nārāyaṇa. He owes much to CP.

"Cāṇḍūpaṇḍita seems to have realised that Naiṣadha was essentially a learned poem, and must be approached with the full equipment of the traditional learning."[11]

---

7. Cp. भजतेति पुस्तकान्तरपाठोऽशुद्धः ।

8. Cp. क्षुरक्षुण्णासु अयमेव पाठः श्रेयान् । तथापि सुधीभिर्विचार्यः ।

9. Cf. Nc. : अस्वेदगात्राश्चलचामरोघै-

रमीलनेत्राः प्रतिवस्तुचित्रैः ।

अम्लानमाला विपुलातपत्रैः-

र्देवा नृदेवाश्च भिदां न भेजुः ॥

10. Handiqui K.K. : "The commentary of Mallinātha is particularly rich in lexicographical quotations." intro. p. xxxv.

11. Handiqui K.K. : intro. p. xxxviii.

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

CHAPTER—5

Conclusion :

Contribution of CP to the commentarial literature.

So far, the salient features of the style and scholarship of CP are discussed and the attempt was made to show how CP's commentary surpasses other 3 wellknown commentaries written by Vidyādhara, Mallinātha and Nārāyaṇa.

The Sāhitya-vidyādharī, as the title shows, brings out the literary beauties of the poem in a simple and lucid style. Thus the purpose of Vidyādhara seems to make a difficult poem intelligible to the readers by high-lighting it especially from the literary point of view.

The title Jīvātu of Mallinātha's commentary is really significant as it restores (the poem) to life. Mallinātha's effors, to infuse life into the poem, which is otherwise "a hard nut to crack."

Nārāyaṇa's commentary called Naiṣadha-prakāśa is intended to throw light on the poem, as its title suggests. Among the printed commentaries his is the one, which is most popular and pedantic. But the discussion in the previous chapter shows how Nārāyaṇa is indebted to CP.

Nārāyaṇa follows the khaṇḍānvaya style of Vidyādhara and CP, and not daṇḍānvaya style of Mallinātha.

CP is the first commentator to mark the pedantic nature of the poem made wantonly difficult by Śrīharṣa himself.[1] CP was therefore, thoroughly disappointed by the commentary of Vidyādhara, whose commentary he might have perhaps learnt from Munideva.[2] However he does not run down Vidyādhara but shrewdly suggest his displeasure towards Vidyādhara by saying that the depth of Śrīharṣa's Muse has been not

---

1. Cp. Nc. XXII, 152 : ग्रन्थग्रथिरिह क्वचित्क्वचिदपि न्यासि प्रयत्नान्मया प्राज्ञंमन्यमना हठेन पठिति माऽस्मिन् खलः खेलतु ।

2. Cp. Canto XXII, colo. 1 : बुद्ध्वा श्रीमुनिदेवसंज्ञविबुधात् काव्यं नवं नैषधम् ।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

properly dived into.[3] He, therefore, undertakes the work of giving proper justice to the pedantic poem by writing an equally pedantic and scholarly commentary.[4] Thus CP is the first scholar who has made the Naiṣadha an arena to exhibit one's scholarship. It is perhaps after his commentary that the Naiṣadha might have been extolled as नैषधं विद्वदौषधम्.

In other words it was CP who contributed a lot to bring out this scholarly aspect of the poem to light.

"The standard commentary on the Naiṣadha is the Prakāśa of Nārāyaṇa, at any rate, it is the most popular."[5]

A comparision of CP's commentary with that of Nārāyaṇa who is so far considered as an ideal commentator in giving hair-spliting explanations to bring out scholarly traits of the poem will show to what extent he has borrowed from CP. In other words Nārāyaṇa's indebtedness to CP will be clear and the true credit of an ideal commentator on an abstruse poem would now be given to CP.

Thus, it is CP who has for the first time brought to light the fact that the Naiṣadha is a repository of traditional Sanskrit learning by writing a commentary which is also equally repository of traditional Sanskrit scholarship. His commentary is therefore a unique and most valuable contribution of which Gujarat will be proud for ever.

Though dvitīyā (second one) chronogically, it is a–dvitīyā[6] (unparalleled) among the commentaries on Naiṣadha.

---

3. Cp. Canto I, intro. 2 : टीकां यद्यपि सोपपत्तिरचनां विद्याधरो निर्ममे ।
श्रीहर्षस्य तथापि न त्यजति सा गम्भीरतां भारती ।

4. Cp. Ibid : पारावारमपारमम्बु किमिह स्याज्जानुमात्रं क्वचित् ।। 2 ।।

5. Handiqui K K. intro. p. xxxvi.

6. नैषधीयमहाकाव्य-नैकटीकासु 'दीपिका' ।
द्वितीयाऽप्यद्वितीयेयं चाण्डूपाण्डित्यदीपिका ।।

A verse composed by Dr. A. N. Jani.

CC-0. RORI. Digitized by Muthulakshmi Research Academy

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

यदीयचिन्तामणिमन्त्रचिन्तया
जहर्ष हर्षः परिरभ्य लिप्सितम् ।
अखर्वगर्वं सुममर्द गर्विणां
सरस्वती सा तनुतात् कृपेङ्गितम् ॥

—खण्डनखण्डखाद्य-शारदाव्याख्याकारः श्रीशंकरचैतन्य भारती ।

नैषधीयमहाकाव्य-नैकटीकासु 'दीपिका' ।
द्वितीयाऽप्यद्वितीयेयं चाण्डूपाण्डित्यदीपिका ॥

—अरुणोदय-जानिनः ।

क्व जोधपूरं क्व वटोदरं च
क्वाऽऽदिः क्व चाऽन्तोऽस्य नु पूर्णतायाम् ।
स्थानस्य कालस्य च दूरतेयं
मुद्रातिदोषेषु न दोषनेत्री ॥

—जयदेव-जानिनः ।

卐 卐 卐 卐 卐

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

CONTENTS

Preface		
Abbreviations		III
Part I —		
Section I —	Detailed account of the manuscripts.	VI
Section II:—		
Chapter 1.		
	a. Information about the poet Śrīharṣa.	XIV
	b. Life and date of cāṇḍūpaṇḍita (CP).	XVI
	c. Social customs and political conditions as reflected in the commentary.	XX
Chapter 2.	Style of CP.	XXII
Chapter 3.	Erudition of CP.	XXIIII
Chapter 4.	Agreement and disagreement of CP with Vidyādhara, Mallinātha and Nārāyaṇa.	XXXXIV
Chapter 5.	Conclusion : Contributlon of CP to the commentarial lit-rature.	XXXXVIII
Part II —	Text with commentary.	1–659

Appendices:—

1. A note on the surname Khāroḍa. 661–662
2. A note on the cintāmaṇi-mantra (XIV, 88). 663
3. Index of authors quoted. 664–665
4. Index of works quoted. 666–667
5. A note on the titles of CP. 668
6. Bibliography. 669–671
7. Index of verses (cantos 1-11). 672-720

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

चाण्डूपण्डितविरचिता

नैषधीयचरितटीका

नैषधदीपिका

प्रथमः सर्गः

(1 B) ॐ नमो गणेशाय ।[1]

सम्यक्साधूपकरणकलावारलाकेलियोग्ये[2]
सद्विस्तारे विलसति सतां निर्मले[3] मानसे यः ।
स[4] श्रेयस्ते दिशतु स [द]स[त्] क्षीरनीरान्तरज्ञो
ब्रह्मानन्दी सुगतिरचनाराजहंसो विवेकः ॥१॥[5]

टीकां यद्यपि सोपपत्तिरचनां विद्याधरो निर्ममे
श्रीहर्षस्य तथापि न त्यजति सा गंभीरतां भारती ।
दिक्कूलंकषतां गतैर्जलधरैरुद्गृह्यमाणं मुहुः
पारा[6]वारमपारमम्बु किमिह स्याज्जानुमात्रं क्वचित् ॥ २ ॥

तस्माद्वागधिदेवतां तदनु च श्रीवैद्यनाथं गुरुं
नत्वा भक्तिपुरःसरं कविवरः सम्राट् स्थपत्यग्निचित्[7] ।
चाण्डूपण्डितसंज्ञितो निजधिया टीकां व्यलीकां कवेः
श्रीहर्षस्य कृतौ विशेषमधिकं वक्तुं विधत्ते क्वचित् ॥ ३ ॥

प्रथमं तावत् कविर्विजिगीषुकथायां[8] स्वपितुः[9] परिभावुक[10]मुदयनं[11] प्रत्यमर्षणतया कटाक्षयन्[12] तद्ग्रन्थग्रन्थीनुद्ग्रथयितुं[13] खण्डनं प्रारिप्सुश्चतुर्विधपुरुषार्थैरभि[मा]नमवचीयमान[म्][14] अवधार्य[15] मानसमेकतानतामानिनाय ।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

तथा च श्रीवाराणस्यां मुक्तिक्षेत्रेऽनुभूतपरब्रह्मस्वरूपो[16] गङ्गादर्शनादिना धर्मकर्ममध्यासीनः दृष्टिपुरःस्थितस्वायत्त[17]मेरुशिखरतुल्य[18] सौवर्ण[19]निष्कराशिदर्शनेन वशीकृतार्थपुरुषार्थः[20] षोडशवर्षाभिर्नवयौवनवतीभि[21]रपूर्वलावण्यसम्पत्तिभिः प्रमदाभिः[22] स्नानोद्वर्तनभोजनाद्युपचारचतुराभिः परिचर्यमाणतया किङ्करीकृतकामपुरुषार्थः ।

एवं चतुर्भिरपि पुरुषार्थैरनाक्षिप्तहृदयतया ग्रन्थं निर्माय तद्ग्रन्थान्[23] खण्डनयुक्तिभिः[24] खण्डशः खण्डितवान् । तत्र च कर्कशतर्कोदर्कत्वात् शृङ्गारादिरसप्रधानानामपरितोषं संभाव्य तदावर्जनाय रसप्रधानं काव्यमिदं चकार ।

ततश्च शास्त्रारम्भे निर्विघ्नेन ग्रन्थसमाप्तये श्रोतृणां मङ्गलाचरणाय शिष्टाचार[25]परिपालनायाऽधिकृताभीष्टादि[26]देवताभ्यो नमस्कारः प्रतिपाद्यः । स च न कृतः । यतो नलस्य पुण्यश्लोकत्वात् तत्संकीर्तनादघौघविघट्टनात् कुतो विघ्ननिघ्नता ? । तथा[27] पृथुसहस्रार्जुनभरतनल-(2 a) प्रभृतीनां स्मरणं परममङ्गलहेतुः, अतो मङ्गलाचरणमप्यस्ति । तथा च शिष्टा[28]चारो[29]ऽपि नलदमयन्तीकीर्तनं[30] कलिनाशनमिति[31] । अतो ग्रन्थकारः प्रथमं[32] नलमेव वर्णयन् मङ्गलाचरणमारचयति ।[33]—

निपीय यस्य क्षितिरक्षिणः[1] कथास्तथाद्रियन्ते न बुधाः सुधामपि ।
नलः सितच्छत्रितकीर्तिमण्डलः स राशिरासीन्महसां महोज्ज्वलः ।। १ ।।

निपीयेति[2] । स नलो नाम राजा आसीत् । किंविशिष्टः ? । महसां प्रतापानां राशिः । तथा महान् उज्ज्वलश्च कान्त्या । अथवा महैरुत्सवैरुज्ज्वलः । एतदेव मङ्गलसूचनम् । किंभूतः ? । सितच्छत्रितं कीर्तिमण्डलं येन स तथा । [निष्ठा][3] । एतेन कीर्तिप्रतापकमनीयतानां[4] निधानम् । यस्य कथा उपाख्यानानि[5] निपीय । पीङ्[6] (1216) पानेऽस्य प्रयोगः । बुधा विद्वांसः सुधामपि अमृतं सूक्तं वा तथा[7] तेन प्रकारेण न आद्रियन्ते । किं भूतस्य ? क्षितेः पृथिव्याः रक्षिणः पालयितुः । अथ च बुधा देवा अमृतं नाद्रियन्ते, तत्कथा-श्रवणात् । एतेन चक्रवर्तित्वं मण्डले सूचितम् । अथवा महसां राशिरिव श्री[8]सूर्य इव आसीत् ।[9] महैरुत्सवैर्वा उज्ज्वलः । उज्ज्वलः शृङ्गारःप्रधानो, धीरललितनायकत्वात् नलस्य । अथ वा यस्य कथा[10] निपीय क्षितिरक्षिणो नृपास्तथा सुधां पृथिवीमपि नाद्रियन्ते ।। १ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

रसैः कथा यस्य सुधावधीरणी नलः स भूजानिरभूद् गुणाद्भुतः ।
सुवर्णदण्डैकसितातपत्रितज्वलत्प्रतापावलिकीर्तिमण्डलः ।। २ ।।

रसैः[1] कथेति । स नलः भूजानिः[2] । जायाया निङ् (पा. VI.iv १३४) इति सूत्रम्[3] । भूभर्ता अभूत् । किंभूतः ? गुणैरद्भुतः[4] । यस्य कथा रसैः शृङ्गारादिभिः कृत्वा सुधाया अवधीरणी[5] तिरस्कर्त्री । किंभूतः ?। सुवर्णदण्डश्च एकः[6] सितातपत्रं च ते कृते संजाते[7] वा सुवर्ण-दण्डैकसितातपत्रिते, ज्वलन्ती प्रतापावलिः कीर्तिमण्डलं[8] च[9] स तथा । प्रतापः सुवर्णदण्ड[:] जातः । कीर्तिरेकच्छत्रं संजाता । निष्ठा ।[10] अथवा[11] अथ[12] विशेषकथनार्थं पुनरपि तमेवार्थं स्फुटयति श्लेषेण । यस्य कथा रसैरुपलक्षिता स नलोऽभूत् । किंभूतः ?। सुधावधीः[13] सुष्ठु रुचिरं धावतीति[14] सुधावा शोभनदर्शिनी[15] धीर्बुद्धिर्यस्य । एतेन मन्त्र-शक्तिमान् । [रणी] रणोत्साहवान् । एतेन उत्साहशक्तिः[16] । अत एव (2b) भूजानिः । एतेन प्रभुशक्ति[द्योति]ता, चक्रवर्तित्वात् ।। २ ।।

पवित्रमत्रातनुते जगद्युगे स्मृता रसक्षालनयेव तत्कथा ।
कथं न सा मद्गिरमाविलामपि स्वसेविनीमेव पवित्रयिष्यति ।। ३ ।।

पवित्रमत्रेति[1] । तस्य नलस्य[2] कथा अत्र युगे कलौ स्मृता सती जगत् पवित्रम् आतनुते । उत्प्रेक्षते[3]-रसैः या क्षालना तया इव । अथ च रसेन उदकेन क्षालितं पवित्रं भवति । सा कथा आविलामपि मद्गिरं[4] कथं न पवित्रयिष्यति ?। किंभूताम् ?। स्वसेविनीमेव । स्वम् आत्मानं कथारूपमेव सेवत इत्येवंशीलामेव । अभीक्ष्णं सेवत इति वा, तां सेवि-नीम्[5] । तथा च "दमयन्त्या नलस्य च । कीर्तनं कलिनाशनम्" (वन. ७९/११) इत्युक्तत्वात् ।। ३ ।।

अधीतिबोधाचरणप्रचारणैर्दशाश्चतस्रः प्रणयन्नुपाधिभिः[1] ।
चतुर्दशत्वं कृतवान् कुतः स्वयं न वेद्मि विद्यासु चतुर्दशस्वयम् ।। ४ ।।

अधीतिबोधेति[2] । अहम् इति न वेद्मि । यत् अयं नलश्चतुर्दशसु[2] विद्यासु विषये चतुर्दशत्वम् औपाधिकं कुतः कारणात्[4] कृतवान् स्वयम् । किं[5] कुर्वन् ?। अधीतिश्चाध्ययनं,[6] बोधो वेदार्थज्ञानम्,[7] आचरणम् अग्निहोत्रादिकरणं, प्रचारणम् अध्यापनम्,[8] एभिरुपाधिभिः विद्यानां

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

चतस्रो दशा अवस्था:[9] प्रणयन्। चतस्रो दशा यासां ताश्चतुर्दशा: तासां भावस्तत्वम्।।

अयमर्थ:। यत्र स्वाभाविकं जातिमत्त्वं न भवति[10] तत्रौपाधिकं[11] तत्त्वं कर्तव्यं, यथा दण्डित्वकुण्डलित्वादीनाम् आकाशत्वादीनाम्। तत्र दण्डोपाधियोगात्[12] कुण्डलोपाधियोगात् [घटाकाश-पटाकाशमठाकाशाद्युपाधि-][13] सम्बन्धात्। भावे त्व-प्रत्यय:। चतुर्दशलक्षणायां संस्थायां[14] चतुर्दशत्वं नाम जाति: स्वाभाविकी अस्ति। तत: कथं चतसृभिर्दशाभिरुपाधिभिश्चतुर्दशत्वं कृतवान् तन्न जाने इत्यर्थ:[15] ।। ४ ।।

अमुष्य विद्या रसनाग्रनर्तकी त्रयीव नीताङ्गगुणेन विस्तरम्।
अगाहताष्टादशतां[1] जिगीषया नवद्वयद्वीपपृथग्जयश्रियाम्[2] ।। ५ ।।

अमुष्य विद्येति[3]। अमुष्य नलस्य विद्या अष्टादशताम् अगाहत[4]। चत्वारो[5] वेदा:, षड् वेदाङ्गानि, पुराणं[6], न्याय: मीमांसा धर्मशास्त्रं तथा नाट्यवेदो धनुर्वेदो नीतिशास्त्राणि आयुर्वेदश्चेत्यष्टादश विद्या:। किंभूता: ?।[7] रसनाया अग्रे नर्त्तकी स्फुरद्रूपा। कया ?। नवद्वयसंस्थानाम् अष्टादशद्वीपानां पृथक् पृथक्[या] जयश्रियस्तासां जिगीषया। अष्टादश[10] विद्याभिरष्टादशद्वीपानि जितानि। जम्बूद्वीपं[11] नवखण्डं भारतं, खण्डं[12] च नव[13] ।।

का इ(3a)व ?। त्रयीव। यथा वेदत्रयी षण्णामङ्गानां[14] गुणेन विस्तरं[15] नीता गुणिता सती अष्टादशतां गाहते। तथा अमुष्य रसवती[16] विद्या अङ्गानां[17] पाकविशेषाणां गुणेनाष्टादशतां आप्नोति। सापि जिह्वाग्रे नृत्यति, स्वादुत्वात्। तथा[18] अक्षहृदयविद्या अङ्गानां द्विकादीनां गुणेनाऽष्टादशधा। तथा हि चतुरङ्गद्यूते द्विकत्रिकचतुष्कपञ्चका[19] एतैर्मिलितैश्चतुर्दश भवन्ति। तथा वोडीयकचतुष्टयेनाऽष्टादशसंख्या[20] ।। ५ ।।

दिगीशवृन्दांशविभूतिरीशिता दिशां स कामप्रसरावरोधिनीम्।
बभार शास्त्राणि दृशं द्वयाधिकां निजत्रिनेत्रावतरत्वबोधिकाम् ।। ६ ।।

दिगीशवृन्देति[1]। स नल: शास्त्राण्येव द्वयाधिकां[2] तृतीयां दृशं बभार। किं भूताम् ?। निजस्याऽऽत्मन: त्रिनेत्रावतरत्व श्रीमहादेवावतरत्वस्य[4] बोधिकाम्। यस्त्रिनेत्र: स श्रीरुद्र:। किंभूतो नल: ?।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

दिगीशवृन्दानां अंशेभ्यो विभूतिरुत्पत्तिर्यस्य, दिक्पालांशत्वात् । तथा दिशामीशिता[6] ईश्वरः । किंभूतां शास्त्रदृशम् ? । कामप्रसर[7]स्याऽवरोधिनीं[8] निषेद्ध्रीम् । अथ च त्रिनेत्रोऽपि । दिक्पालवृन्दमध्ये अंशेन[9] विभूतिर्यस्य, इन्द्रादीनां मध्ये ईशानो[10] दिक्पालः[11] । सोऽपि दिश ईशान्या ईशिता । अथ वा आदिशन्तीत्यादिश उपदेष्टारस्तेषामीश्वरः । तस्य[दृ]क् कन्दर्पप्रसरं रुद्धवती[12] ।। ६ ।।

पदैश्चतुर्भिः सुकृते स्थिरीकृते कृतेऽमुना के न तपः प्रपेदिरे ।
भुवं यदेकाङ्घ्रिकनिष्ठया स्पृशन्दधावधर्मोऽपि कृशस्तपस्विताम् ।। ७ ।।

पदैश्चतुर्भिरिति[1] । कृते कृतयुगे के पुरुषास्तपो न प्रपेदिरे ?। क्व सति ?। अमुना नलेन चतुर्भिः पदैः सुकृते स्थिरीकृते सति । तथा च मनुः-चतुष्पात् सकलो धर्मः सत्यं चैव कृते युगे (I. 8 ab) । यत् यस्मात् अधर्मोऽपि तपस्वितां दधौ । किं कुर्वन् ?। एकस्याऽङ्घ्रेश्चरणस्य कनिष्ठिकया स्पृशन्[2] । अथ च वराकताम् अधर्मो दधौ ।[3] करुणाप्रतिपादने तपस्वी च । कृतयुगे अधर्मस्य वार्त्तामात्रेण स्पर्शः[4] । कृशो[5] दुर्बलः[6] ।। ७ ।।

यदस्य यात्रासु बलोद्धतं रजः स्फुरत्प्रतापानलधूममञ्जिम ।
तदेव गत्वा पतितं सुधाम्बुधौ दधाति पङ्कीभवदङ्कतां विधौ ।। ८ ।।

यदस्य[1] यात्रास्विति । अस्य नलस्य यात्रासु यद् बलैरुद्धतं[2] रजोऽभूत् । किंभूतम् ?। स्फुरन् यः प्रतापानलः तस्य यो धूमस्तद्वन् मञ्जिमा[3] चारुत्वं यस्य तत्तथा । (3 b) तदेव रजः गत्वा विधौ चन्द्रे पतितं सत् अङ्कतां दधाति । किं[4] कुर्वत् ?। पङ्कीभवत् । किंविशिष्टे[5] ?। सुधाम्बुधौ अमृतसमुद्रे[6] ।। ८ ।।

स्फुरद्धनुर्निःस्वनतद्घनाशुगप्रगल्भवृष्टिव्ययितस्य सङ्गरे ।
निजस्य तेजःशिखिनः परःशता वितेनुरिङ्गालमिवायशः[1] परे ।। ९ ।।

स्फुरद्धनुरिति[2] । परे शत्रवः अयशो वितेनुः । किंभूताः ?। शतेभ्यः परेभ्यः परे परःशताः[3] । परः शतादि (सि. है. श.-III.i. 75) रिति सुट्[4] । उत्प्रेक्षते निजस्य तेजःशिखिनः प्रतापस्य[5] इङ्गालमिव अङ्गारमिव[6] । किंभूतस्य[7] ? स्फुरन्[8] धनुषो निःस्वनो यस्य स तथा, एवंविधश्चासौ स च नलश्च स एव घनो मेघस्तस्याऽऽशुगानां बाणानां[9] प्रगल्भतया वृष्ट्या

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

व्यचितस्य शमितस्य । अग्नेस्तोयेन शान्तस्याऽङ्गारः कृष्णवर्णो भवति । अकीर्तिश्च कृष्णा । मेघेऽपि धनुर्भवति, निःस्वनश्च[10] । आशुगेन वायुना सह वृष्टिश्च[11] ।। ९ ।।

अनल्पदग्धारिपुरानलोज्ज्वलैर्निजप्रतापैर्वलयं ज्वलद्भुवः ।
प्रदक्षिणीकृत्य जयाय सृष्टया रराज नीराजनया स राजघः ।। १० ।।

अनल्पदग्धेति[1] । स राजा नलः निजप्रतापैः सृष्टया नीराजनया आरात्रिकविधानेन रराज । किं कृत्वा[2] ? भुवो वलयं प्रदक्षिणीकृत्य[3] । किमर्थम् ? जयाय । किंभूतैः ? अनल्पानि दग्धानि यान्यरीणां पुराणि तेषाम् अनलैः करणैः तद्वद् वा[4] उज्ज्वलैः बहुलीभूतैः । किंभूतं [वलयम्] ? ज्वलत् । तैरेव । किंभूतः ? राज्ञो हन्तीति राजघः । अथवा[5] निजप्रतापैः ज्वलद्भूमण्डलं प्रदक्षिणीकृत्य यात्रायां कृतया[6] नीराजनया रराज । अथवा निर्गतान् राज्ञः करोती[7] [ति तथा] नीराजयति तया । अन्येषां राज्ञाम् अभावकरणेन[8] रराज[9] । यतो राजघः[10] ।। १० ।।

निवारितास्तेन महीतलेऽखिले निरीतिभावं गमितेऽतिवृष्टयः ।
न तत्यजुर्नूनमनन्यविश्रमाः प्रतीपभूपालमृगीदृशां दृशः ।। ११ ।।

निवारिता[1] इति । अतिवृष्टयस्तेन नलेन अखिले महीतले निवारिताः सत्यो[2] नूनं प्रतीपानां विपक्ष[भूतानां] भूपालानां मृगीदृशां स्त्रीणां दृशो नतत्यजुः । किंभूते ? निरीतिभावम् ईतिरहिततां[3] गमिते[4] । किंभूताः ? न अन्यत्र [न्यः] विश्रमो यासां तास्तथा । विश्रम इति णिज्वद्भावाभावो[5] महाकवीनां प्रायः संमतः । तथा च माघः-विश्रमार्थमुपगूढमि (शिशु 10/88 a) ति । [विपक्षवनि]ता[6] निरन्तरं रुदन्तीत्यर्थः । "अतिवृष्टिरनावृष्टिर्मूषिकाः[7] शलभाः शुकाः । स्वचक्रं परचक्रं वा[8] सप्तैता ईतयः स्मृताः" ।। ११ ।।

सितांशुवर्णैर्वयति स्म तद्गुणैर्महासिवेम्नः सहकृत्वरी बहुम् ।
दिशाङ्गणस्याऽऽवरणं रणाङ्गणे यशः परं तद्भटचातुरीतुरी ।। १२ ।।

सितांशुवर्णैरिति[2] । तस्य नलस्य भटानां या [चातुरी[3]] चतुरता
(4a) सैव तुरी [illegible][1] । रणाङ्गणे यश एव पटस्तं वयति स्म ।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

कैः ? [तद्गुणैः] तस्य राज्ञो गुणैः[5] शौर्यादिभिः। किंभूतैः ? सितांशुश्चन्द्रः तत्सवर्णैः। किंभूता तुरी ? महान् असिरेव वेमा वयनकाष्ठं[6] तस्य सहकृत्वरी[7] सहकारिणी[8]। बनो[9] र च (पा. IV. 1.7) इति ङीप् प्रत्ययः, रत्वं च। बहुं निबिडम्। तथा दिशाङ्गणस्य आवरणम् आच्छादकम्। अन्योऽपि पटस्तुरीवेमप्रभृतिभिः[10] काष्ठैरसम[11]वायिकारणैर्गुणैः समवायिकारणैः [तथा सितानाम् अंशूनां तन्त्ववयवानां वर्णैः[12] क्रियते। सोऽपि अङ्गणे [अङ्गनानां] स्त्रीणाम्[13] आवरकः[14]। श्वेतैरंशुभिरारब्धास्तन्तवः[15] श्वेतास्तैरारब्धः पटोऽपि श्वेतः[16]। कारणतन्तुगतं[17] रूपंकार्ये पटे रूपम् आरभते, असमवायिकारणत्वेन[18] ।। १२ ।।

प्रतीपभूपैरिव किं ततो भिया विरुद्धधर्मैरपि भेत्तृतोज्झिता।
अमित्रजिन्मित्रजिदोजसा स यद्विचारदृक् चारदृगप्यवर्तत ।। १३ ।।

प्रतीपभूपैरिति[1]। अयमेव[2] वस्तुनोर्भेदो[3] भेदहेतुर्वा यद्विरुद्धधर्माध्यासः कारणभेदश्च। किं ततो नलात् भिया परस्परं[4] विरुद्धैरपि धर्मैः भेत्तृता भेदकारिता उज्झिता[5]। कैरिव ? प्रतीपैः प्रतिपक्षैर्भूपैरिव। यथा तैर्भयेन भेदकता त्यक्ता, किन्त्वभे[दे]नैव सेवन्ते। यत् स नलः[6] अमित्रजित् मित्रजिच्च ओजसा अवर्त्तत। यच्च विचारदृक् चारदृगप्यवर्तत। [न मित्रं जयति। अथ च अमित्रः शत्रुः। मित्रं जयतीति मित्रजित्।] अथ च मित्रमादित्यं जयति।[7] चारलक्षणा दृक् यस्य। अथ च विचारे विवे[के]दृक् यस्य। अमित्रजित्त्वं मित्रजित्त्वं च। विचारदृक्त्वं चारदृक्त्वं च। विरुद्धा अपि धर्मास्तस्मिन्[8] वर्त्तन्ते अभेदेन[9] ।। १३ ।।

तदोजसस्तद्यशसः स्थिताविमौ वृथेति चित्ते कुरुते यदा यदा।
तनोति भानोः परिवेषकैतवात्तदा विधिः कुण्डलतां विधोरपि ।। १४ ।।

तदोजस[1] इति। यदा यदा विधिर्ब्रह्मा इति चित्ते कुरुते चिन्तयति। इतीति[2] किम् ? यत् तस्य नलस्य ओजसः प्रतापस्य स्थितौ सत्यां तस्य यशसश्च[3] स्थितौ सत्यां इमौ सूर्याचन्द्रमसौ वृथा[4] मृषा। प्रतापेन यशसा च सूर्यचन्द्रयोः कार्यस्य कृतत्वात्। तदा विधिर्भानोर्विधोरपि परिवेषकैतवात् कुण्डलतां तनोति। यत्र[5] किल अधिकं भवति, ततो[6] रेखया कुण्डलीक्रियते[7] ।। १४ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

अयं दरिद्रो भवितेति वैधसीं लिपिं ललाटेऽर्थिजनस्य जाग्रतीम् ।
मृषा न चक्रेऽल्पितकल्पपादपः प्रणीय दारिद्र्यदरिद्रतां नृपः ।। १५ ।।

अयं दरिद्र[1] इति । स नृपः अर्थिजनस्य ललाटे जाग्रतीम् इति वेधसः (4 b) सम्बन्धिनीं लिपिम् अक्षरपङ्क्तिं मृषा न चक्रे । इतीति[2] किम् ? अयमर्थी दरिद्रो भविता । किंकृत्वा ? दरिद्रस्य[3] [भावः] दारिद्र्यं दारिद्र्येण दरिद्रो यः स तस्य भावस्तत्तां प्रणीय । यतोऽल्पितः कल्पपादपः[6] कल्पवृक्षो[7] येन स तथा ।[8] अत एव दारिद्र्यस्याऽभावो जात इत्यर्थः[9] ।। १५ ।।

विभज्य मेरुर्न यदर्थिसात्कृतो न सिन्धुरुत्सर्गजलव्ययैर्मरुः ।
अमानि तत्तेन निजायशोयुगं द्विफालबद्धाश्चिकुराशिरःस्थितम् ।। १६ ।।

विभज्य[1] मेरुरिति । तेन राज्ञा द्वाभ्यां फालाभ्यां बद्धाश्चिकुराः केशाः शिरसि स्थितं तत् निजम् अयशोयुगम् अकीर्तिद्वयममानि । यत् 'मया मेरुः पर्वतो विभज्य खण्डीकृत्य अर्थिसात् न कृतः' इदमेकमयशः । यच्च 'मया सिन्धुः समुद्रः उत्सर्गजलस्य संकल्पोदकस्य व्ययैर्मरुर्न कृतः, निर्जलश्च न कृतः । द्वितीयमिदमयशः[2] । सीमन्तबद्धाः केशा एवाऽकीर्तिः, कृष्णवर्णत्वात्[3] ।। १६ ।।

अजस्रमभ्या[1]शमुपेयुषा समं मुदैव देवः कविना बुधेन च ।
दधौ पटीयान् समयं नयन्नयं दिनेश्वरश्रीरुदयं दिने दिने ।। १७ ।।

अजस्रमभ्या[2]शमिति । अयं देवो नलः दिने दिने उदयं दधौ । किं कुर्वन् ? कविना काव्यकर्त्रा बुधेन विदुषा च समं समयं नयन् । किंविशिष्टेन ? अजस्रम् अभ्याशं समीपम् उपेयुषा । किंविशिष्टः ? दिनेश्वरः श्री[3]सूर्यस्तद्वत् श्री[4]स्तेजो लक्ष्मीर्यस्य[स] तथा । पटीयान् समर्थः । श्रीसूर्योऽपि प्रतिदिनं पटुः सन् कविना शुक्रेण बुधेन च ग्रहेण समं कालं नयति । मुदैव । सूर्यश्च[5] आशामभि अभ्याशम् उप[6] समीपं गच्छता ग्रहद्वयेन समम्[7] ।। १७ ।।

अधोविधानात् कमलप्रवालयोः शिरःसुदानादखिलक्षमाभुजाम् ।
पुरेदमूर्ध्वं भवतीति वेधसा पदं किमस्याऽङ्कितमूर्ध्वरेखया ।। १८ ।।

अधोविधानादिति[1] । किं वेधसा अस्य नलस्य पदम् इति कारणात् ऊर्ध्वरेखया [ङ्कितम्[2]] । इतीति[3] किम् ? इदं पुरा पश्चात् ऊर्ध्वं

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

भविता[4] भविष्यति, उपरिर्वातित्वात् । कस्मात् ? कमलस्य [प्रवालस्य] पल्लवस्य च अधोविधानात् अधः[5]करणात् । तथा अखिलानां क्षमा[6]-भुजां राज्ञां शिरःसु दानात्[7] मस्तकेषु दानात् । अतः सर्वोपरि वर्तित्वाच्चरणे सामुद्रिकलक्षणम् ऊर्ध्वरेखा[8] ।। १८ ।।

जगज्जयं तेन च कोशमक्षयं प्रणीतवान् शैशवशेषवानयम् ।
सखा रतीशस्य ऋतुर्यथा वनं वपुस्तथालिङ्गदथास्य यौवनम् ।। १९ ।।

जगज्जयमिति[1] । अयं नलः शै(५a)शवस्य शेषं विद्यते[2] यस्य स तथा[3] एवंविधः सन् यौवन-प्रवेशे[4] जगतः पृथिव्या जयं प्रणीतवान् । तेन जयेन [च] अक्षयं कोशं[5] द्रव्यं कृतवान् । अथ अस्य यौवनं कर्तृ वपुः कर्म[6] तथा आलिङ्गत्[7] यथा रतीशस्य सखा मित्रं य ऋतुः वसन्तः स वनम् आश्लिष्यति[8] ।। १९ ।।

अधारि पद्मेषु तदङ्घ्रिणा घृणा क्व तच्छयच्छायलवोऽपि पल्लवे ।
तदास्यदास्येऽपि गतोधिकारितां न शारदः पार्वणशर्वरीश्वरः ।। २० ।।

अधारि[1] पद्मेष्विति । तस्य नलस्य अङ्घ्रिणा चरणेन पद्मेषु घृणा जुगुप्सा अधारि[2] । ततः पल्लवे तस्य शयो हस्तः तस्य छाया शोभा तस्या लवोऽपि लेशोऽपि क्वाऽस्ति । तथा तस्य[3] आस्यस्य दास्येऽपि शारदः शरत्कालीनः पार्वणः[4] पूर्णः शर्वरीश्वरश्चन्द्रः[5] अधिकारितां न गतः ।[6] दासत्वयोग्योपि नेत्यर्थः । अथवा[7] पदश्चरणस्य मा लक्ष्मीर्येषु तानि पद्मानि तेषु । यदा अङ्घ्रिः शरीरस्य निकृष्टोवयवः घृणां कुरुते, तदा[8] पदो लवे लेशमात्रे तस्य हस्तस्य प्रधानशरीरावयवस्य[9] छायाया[10] लवोऽपि कृतः । बिभाषा सेनासुराच्छायाशालानिशाना (पा० II, iv २५) मिति छायान्तस्तत्पुरुषो वा नपुंसकलिङ्गो[11] भवति[12] । परिकर-प्रतीपी ।। २० ।।

किमस्य लोम्नाङ्कपटेन कोटिभिर्विधिर्न लेखाभिरजीगणद्गुणान् ।
न रोमकूपौघमिषाज्जगत्कृता कृताश्च किं दूषणशून्यबिन्दवः ।। २१ ।।

किमस्येत्यादि[1] । [किम्] अस्य नलस्य लोम्नां[2] कपटेन व्याजेन कोटिभिर्लेखाभिर्विधिर्ब्रह्मा गुणान् न अजीगणत् । अपि तु[3] लोमव्याजेन वेधसा गुणानां[4] रेखाः कृताः । किं जगत्कृता ब्रह्मणा[5] रोमकूपौघमिषात्

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

दूषणस्य[6] शून्यबिन्दवः [न कृताश्च ।] दोषाभावप्रतिपादकाः कोटिभिरुपलक्षिताः । [शरीरमध्ये] अस्मिन् प्रदेशे दूषणं नास्तीत्येवं[7] शून्यबिन्दवः[8] । रोमकूपमिषेण[9] शून्यबिन्दवः । रोमकूपोघमिषेण विधिः कृतवान् ।। २१ ।।

अमुष्य दोर्भ्यामरिदुर्गलुण्टने ध्रुवंगृहीतार्गलदीर्घपीनता ।
उरः श्रिया तत्र च गोपुरस्फुरत्कपाटदुर्धर्षतिरःप्रसारिता ।। २२ ।।

अमुष्य[1] दोर्भ्यामित्यादि । अमुष्य नलस्य दोर्भ्यां बाहुभ्याम् अरीणां दुर्गस्य लुण्टने क्रियमाणे ध्रुवम् अर्गलस्य दीर्घता पीनता च गृहीता । दुर्गाणां भङ्गे लोकाः स्वं स्वमभिमतं[2] मुष्णन्ति । तथाऽस्य उरः[3]-श्रिया शोभया च[4] तत्रैव दुर्गलुण्टने गोपुरे प्रतोल्यां स्फुरतोः कपाटयोः[5] दुर्धर्षता तिरः प्रसारिता[6] । सा गृहीता । (५b) हृदयम् अनाकलनीयं विशालं[7] च[8] ।। २२ ।।

स्वकेलिलेशस्मितनिन्दितेन्दुनो निजांशदृक्तर्जितपद्मसम्पदः ।
अतद्द्वयीजित्वरसुन्दरान्तरे न तन्मुखस्य प्रतिमा चराचरे ।। २३ ।।

स्वकेलिलेशेत्यादि[1] । तन्मुखस्य प्रतिमा चराचरे विश्वे नास्ति । किं भूतस्य ?। स्वकेलेर्निजक्रीडाया [लेशे][3] अपथपं यत् स्मितम् अथवा स्वम्[4] आत्मीयं केल्या क्रीडया यत् लेशरूपं स्मितं तेन निन्दित इन्दुर्येन तस्य तथा । पुनः किं भूतस्य ?। निजमुखैकदेशभूता[5] अंशरूपा या दृक् दृष्टिस्तया तर्जिता भर्त्सिता[6] पद्मसंपत् येन तस्य[7] तथा । मुखस्योपमानं किल[8] चन्द्रः[9] पद्मं च, तदुभयं यस्यैकदेशेन जितम्[10] । किं भूते विश्वे ?। न तस्य [द्वयस्य][11] चन्द्रपद्मरूपस्य उभयस्य जित्वरं सुन्दरान्तरं रमणीयपदार्थान्तरं यत्र तस्मिन् तथा । तदुभयं मुक्त्वाऽन्यः पदार्थो रम्यो नास्ति यो मुखेनोपमीयते[12] ।। २३ ।।

सरोरुहं तस्य दृशैव तर्जितं जिताः स्मितेनैव विधोरपि श्रियः ।।
कुतः परं भव्यमहो महीयसी तदाननस्योपमितौ दरिद्रता ।। २४ ।।

[सर[1] इति । अहो तस्य नलस्याऽऽननस्य उपमितौ महीयसी[2] महती दरिद्रता । यतः सरोरुहं तस्य दृशा एव तर्जितम् । तथा विधोरपि श्रियः शोभाः स्मितेनैव जिताः[3] । एतस्मादुभयात्[4] परम् अन्यत् विश्वे भव्यं रम्यं वस्तु कुतः[5] । नास्तीत्यर्थः । यदुपमा[6] क्रियते[7]] ।। २४ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

स्ववालभारस्य तदुत्तमाङ्गजैः समञ्चमर्येव तुलाभिलाषिणः ।
अनागसे शंसति बालचापलं पुनः पुनः पुच्छविलोलनच्छलात् ।। २५ ।।

स्ववालभारेति[1] । चमरी[2] एव स्वकीयस्य वालभारस्य[3] केशसमूहस्य वालचापलं वालत्वाच्चपलत्वं शंसति । न तु बुद्धिपूर्वकम् । किमर्थम् ?। अनागसे अपराधभावाय । कस्मात् ?। पुनः पुनः पुच्छस्य विलोलनं चालनं तस्य छलात् व्याजात् । किं विशिष्टस्य ? तस्य उत्तमाङ्गजैः केशैः समं तुलां[4] साम्यम् अभिलषतीत्येवंशीलस्य । अथ च वालानां केशानां चपलत्वम् । यो हि निकृष्टः सन् उत्तमैः[5] अङ्गजैः पुत्रैः सह[6] साम्यं कुरुते । स अपराधी भवति । परं बालस्याऽपराधो न गणनीयः[7] ।। २५ ।।

महीभृतस्तस्य च मन्मथश्रिया निजस्य चित्तस्य च तं प्रतीच्छया ।
द्विधा नृपे तत्र जगत्त्रयीभुवां नतभ्रुवां मन्मथविभ्रमोऽभवत् ।। २६ ।।

महीभृत[1] इति । तत्र तस्मिन्नृपे जगत्त्रय्यां भुवाम्[2] उत्पन्नानां नतभ्रुवां कामिनीनां द्विधा मन्मथस्य विभ्रमो भ्रान्तिर्विलासश्च[3] अभवत् । कया ?। तस्य [महीभृतो] नलस्य मन्मथश्रिया[4] । कामोऽयमिति भ्रान्तिर्जाता[5] । तथा निजस्य चित्तस्य तं नलं[6] प्रति इच्छया च[7] तासां कामविलासः कटाक्षादिर्जातः ।। २६ ।।

निमीलनभ्रंशजुषा दृशा भृशं निपीय तं यस्त्रिदशीभिरर्जितः ।
अमूस्तमभ्यासभरं विवृण्वते निमेषनिस्वैरधुनाऽपि[1] लोचनैः ।। २७ ।।

निमीलनेति[2] । अमूः देवाङ्गना अधुनाऽपि लोचनैः [तम्] अभ्यासस्य[3] भरं विवृण्वते प्रकटयन्ति । किं भूतैः ?। निमेषनिःस्वैः निमेषदरिद्रैः । योऽभ्यासस्त्रिदशीभिर्देवाङ्गनाभिः[4] तं नलं [भृशं] दृशा निपीय अर्जितः । किं विशिष्टया दृशा ?। निमीलनस्य[5] निमेषस्य भ्रंशम् अभावं जुषते तया तथा । तासां निमेषतया नलविलोकने[6] तादृशोऽभ्यासोऽभूत् यथा अद्यापि निमेषो नाऽस्ति[7] ।। २७ ।।

अदस्तदाकर्षि फलाढ्यजीवितं[1] दृशोर्द्वयं नस्तदवीक्षि चाफलम् ।
इति स्म चक्षुःश्रवसां प्रिया नले स्तुवन्ति निन्दन्ति हृदा तदात्मनः ।। २८ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

अदस्तदाकर्षीति[1]। चक्षुः श्रवसां नागानां प्रिया[ः] पातालाङ्गना नले नलविषये हृदा मनसा आत्मनः[3] तत् लोचनद्वयम् इति प्रकारेण स्तुवन्ति स्म निन्दन्ति स्म च। (६a) इतीति[4] किम्?। नोऽस्माकं अदः दृशोर्द्वयं फलाढ्यं[5] सफलं जीवितं यस्य तत्तथा। किं भूतम्?। [तं] नलम् आकर्षयन्तीत्येवंशीलम्। सर्पा हि चक्षुषा शृण्वन्तीति श्रुतिः[6]। तथा नोऽस्माकं दृशोर्द्वयम् अफलं निष्फलं च इति निन्दन्ति [स्म]। यतस्तस्य नलस्य अवीक्षि अनालोकितमिति[7] निन्दा पाताले स्थिता[8]। चक्षुभ्यां नलगुणान् शृण्वन्ति, न तु तं पश्यन्ति[9] ।। २८ ।।

विलोकयन्तीभिरजस्रभावनाबलादमुं नेत्रनिमीलनेष्वपि ।
अलम्भि मर्त्याभिरमुष्य दर्शने न विघ्नलेशोऽपि निमेषनिर्मितः ।। २९ ।।

विलोकयन्तीभिरिति[1]। मर्त्याभिरङ्गनाभिः[2] अमुष्य[3] नलस्य दर्शने निमेषेण निर्मितः कृतो विघ्नस्य[4] लेशोऽपि न अलम्भि। किं कुर्वन्तीभिः?। अजस्रं निरन्तरं भावनाबलात् [ध्यानबलात्] नेत्रनिमीलनेष्वपि निमेष-कालेष्वपि अमुं नलं विलोकयन्तीभिः। [इत्थं] स्वर्गपातालमर्त्याङ्ग-नानां[5] त्रिभिः श्लोकैर्मन्मथविभ्रमो द्विधा[6] बभूव[7] ।। २९ ।।

न का निशि स्वप्नगतं ददर्श तं जगाद गोत्रस्खलिते च का न तम् ।
तदात्मताध्यातधवा रते च का चकार वा न स्वमनोभवोद्भवम् ।। ३० ।।

न का[1] निशीति। का स्त्री सुवासिनी[2] [निशि रात्रौ] तं नलं[3] नृपं[स्वप्नगतं] स्वप्नमध्ये न ददर्श। अपि तु सर्वा अपि। एतेन मुग्धा कथिता[4]। तथा का कामिनी तं नलं गोत्रस्खलिते च नामव्यत्यये[च] न जगाद। इति मध्या[4] कथिता[4]। तथा का नायिका[5] च सुरते स्वस्याऽऽत्मनो मनोभवस्य कामस्योद्भवं न चकार[6]। किं भूता?। तदात्मतया नल[7]-[स्व]रूपेण ध्यातो धवः स्वभर्ता यया सा[8] तथा। वा वाक्यालङ्कारे। अयं मम भर्ता न भवति, किन्तु नल एवाऽयमिति [प्रौढा।[9]] त्रिविधा[10] नायिकाः[11] कथिताः[12] ।। ३० ।।

श्रियाऽस्य योग्याऽहमिति स्वमीक्षितुं करे तमालोक्य सुरूपया धृतः ।
विहाय भैमीमपदर्पया कया न दर्पणः श्वासमलीमसः कृतः ।। ३१ ।।

श्रियाऽस्य[1] योग्येति। कया नायिकया[2] [दर्पणः] आदर्शः श्वास-मलीमसो न कृतः।[3] अपि तु कृत एव। किं कृत्वा?। भैमीं दमयन्तीं

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

विहाय त्यक्त्वा । अपगतो दर्पो गर्वो यस्याः[4] तया तथा । [किं भूतया?।] सुरूपया अपि । किं भूतः ?। तं नलम् आलोक्य करे धृतः । किं कर्तुम्?। इति प्रकारेण स्वम् आत्मानम् ईक्षितुम् । इतीति[6] किम् ?। अस्य (६८) नलस्याऽहं योग्या । कया ?। श्रिया शोभया । अयमर्थः- तया दर्पणे आत्मानम् अयोग्यं दृष्टवा दर्पणो निःश्वासेनोपहतः । दमयन्त्या तु आत्मानं[7] योग्यं मत्वा अहं नलस्य कान्ता उचिता इति कृत्वा निश्वासो न[8] मुक्तः । अथ च या दर्पणं न गृह्णात सा कथं गतदर्पा भवति, इति[9] विरोधाभासः[10] ।। ३१ ।।

यथोह्यमानः खलु भोगभोजिना प्रसह्य वैरोचनिपुत्रपत्तनम् ।
विदर्भजाया मदनस्तथा मनोनलावरुद्धं वयसैव वेशितः ।। ३२ ।।

यथोह्यमान[1] इति । मदनस्तथा विदर्भजाया मनश्चित्तं वयसा एव तारुण्येनैव वेशितः प्रवेशितः । किं भूतं मनः?। नलेन राज्ञा अवरुद्धम् । पूर्वं चित्ते नलोऽस्ति, पश्चात् कामः प्रविष्टः । किं भूतः ? ऊह्यमानः यौवनचिह्नैर्वितर्क्यमाणः । किं भूतेन वयसा ?। भोगान् विषयान्[2] भुङ्क्ते इत्येवंशीलेन । प्रसह्य[3] बलात् । किं यथा ?। वैरोचनिर्बलि-स्तस्य[4] पुत्रो [बाणस्तस्य] पत्तनं नगरं[5] यथा मदनः प्रद्युम्नो अनलेन वह्निना अवरुद्धं परिक्षिप्तं बाणासुर[पुरं] वयसा पक्षिणा गरुडेन[6] ऊह्यमानः सन्[7] प्रवेशितः । किं भूतेन[8] ? भोगान् सर्पदेहान् भुङ्क्ते तेन तथा । पूर्वं उषाहरणप्रस्तावे अनिरुद्धे प्रद्युम्नपुत्रे बाणासुरेण बद्धे सति गरुडमारुह्य बलदेवश्रीवासुदेवप्रद्युम्ना[9] वैश्वानरेण परितो दीप्रेण दुःप्रवेशमपि पुरं प्रविश्य तमसुरं छिन्नभुजसहस्रं पुराणान्तरेषु छिन्नभुज-पञ्चशतं श्रीमहादेवानुरोधेन[10] जीवन्तं मुक्त्वा अनिरुद्धम् उषां स्नुषां चानीतवन्तः इत्यागमः[11] ।। ३२ ।।

नृपेनुरूपे निजरूपसम्पदां दिदेश तस्मिन् बहुशः श्रुतिं गते ।
विशिष्य सा भीमनरेन्द्रनन्दनी मनोभवाज्ञैकवशंवदं मनः ।। ३३ ।।

नृपेऽनुरूपे[1] इति । सा भीमनरेन्द्रनन्दनी[2] दमयन्ती तस्मिन्नृपे नले निजरूपसम्पदाम् अनुरूपे विशिष्य विशेषं कृत्वा मनः दिदेश ।[3] किं भूते[4] ?। बहुशः श्रुतिं[5] कर्णपथं गते[6] । किं भूतम् ?। मनोभवस्य[7] कामस्य आज्ञायाः[8] एकं वशंवदं कामपरतन्त्रम्[9] ।। ३३ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

उपासनामेत्य पितुः स्म रज्यते दिने दिने सावसरेषु बन्दिनाम् ।
पठत्सु तेषु प्रतिभूपतीनलं विनिद्ररोमाजनि शृण्वती नलम् ।। ३४ ।।

उपासनामिति[1] । सा[2] पितुः उपासनां सेवाम् एत्य आगत्य दिने दिने बन्दिनाम् अवसरेषु रज्यते स्म । तस्मिन् प्रस्तावे[3] सानुरागाऽभूत्[4] । यतस्तेषु बन्दिषु भीमसमीपे प्रतिभूपतीन् अन्य (७a) नृपान् पठत्सु [सत्सु] नलं शृण्वती सती[5] विनिद्ररोमा अजनि । नलविरुदावलीपठनसमये रोमाञ्च्यते स्म[6] ।। ३४ ।।

कथानुषङ्गेषु मिथः सखीमुखात्तृणेऽपि तन्व्या नलनामनि श्रुते ।
द्रुतं विधूयाऽन्यदभूयताऽनया मुदा तदाकर्णनसज्जकर्णया ।। ३५ ।।

कथानुषङ्गेष्विति[1] । अनया तन्व्या मिथः कथाया[2] अनुषङ्गेषु प्रसक्तौ सत्यां सखीनां मुखात् नलनामनि[3] तृणेपि श्रुते सति द्रुतं झटिति अन्यत्सर्वं विधूय परित्यज्य मुदा तस्य नल [शब्द][4] वाच्यतृणस्यापि आकर्णनार्थं सज्जकर्णयाऽभूयत । किं वाच्यं पुनर्यन्नलनृपवर्णनाकर्णनायां[5] सज्जकर्णता ?। नलशब्देन तृणमप्युच्यते[6] ।। ३५ ।।

स्मरात्परासोरनिमेषलोचनाद्बिभेमि तद्भिन्नमुदाहरेति सा ।
जनेन यूनः स्तुवता तदास्पदे निदर्शनं नैषधमभ्यषेचयत् ।। ३६ ।।

स्मरात्परासोरिति[1] । सा यूनस्तरुणान् पुरुषान् स्तुवता जनेन केनापि तस्य कामस्याऽऽस्पदे[2] स्थाने नैषधं[3] नलं निदर्शनं दृष्टान्तम् उपमानभूतम् अभ्यषेचयत्[4] । यो जनः कश्चित्[5] सुन्दरं तरुणं स्तुवन्[6] कामं दृष्टान्तं ददाति । तस्य पार्श्वात् केनापि मिषेण नलमुपमानं दापयति । कथम् ?। इति मिषेण । इतीति[7] किम् ?। अहं स्मराद् बिभेमि । यतः परासोः मृतात् तथा अनिमेषलोचनात् । यस्य किल मृतस्य लोचने अनिमीलिते भवतः तस्माद् भयं भवति । अथ च अनिमेष-लोचनात् देवात् । देवा हि[8] अनिमेषाः । तत् तस्मात् त्वं[9] भिन्नं कामादन्यमुदाहर[10] उदाहरणं वद । इति छलेन तस्मादन्यः सुन्दरो जगति नल एवाऽस्ति । ततः स जनः स्वयमेव नलमुपमानं दत्ते । जनेन, अनिनन्ते कर्तरि तृतीया । जनो नैषधमभिषिञ्चति । सा[11] जनेन नलम् अभिषेचयति[12] ।। ३६ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

**नलस्य पृष्टा निषधागता गुणान् मिषेण दूतद्विजबन्दिचारणाः ।
निपीय तत्कीर्तिकथामथानया चिराय तस्थे विमनायमानया ।। ३७ ।।**

नलस्य पृष्टा[1] इति । अनया निषधदेशादागता दूताः द्विजाश्च[2] बन्दिनश्चारणाश्च मिषेण[3] नलस्य गुणान् पृष्टाः । दुहादेर्गौणकर्मे (under पा० I. iv. 51)ति वचनात् चारणा इति गौणं कर्म उक्तम् । गुणानिति प्रधानेन उक्तम् ।[4] अथाऽनया तस्य नलस्य कीर्तेः कथां निपीय चिराय विमनायमानया तस्थे, उन्मनीबभूव[5] ।। ३७ ।।

**प्रियं प्रियां च त्रिजगज्जयिश्रियौ लिखाऽधिलीलागृहभित्ति कावपि ।
इति स्म सा कारुवरेण लेखितं नलस्य च स्वस्य च सख्यमीक्षते ।। ३८ ।।**

[प्रियं प्रियां[1] चेति । सा इति कारुवरेण चित्रकर[2]-मुख्येन लेखितं नलस्य च[3] स्वस्यात्मनश्च सख्यं सादृश्यमीक्षते स्म । इतीति[4] किम् ?। हे चित्रकर[5] ! त्वं कञ्चित् प्रियं काञ्चित् प्रियां च[6] लीलागृहस्य [क्रीडावेश्मनोः] भित्तिमधिकृत्य लिख । किं भूतौ प्रियौ ?।[7] त्रिजगज्जयिनी श्रीर्ययोस्तौ[7] तथा अतिरमणीयौ । ततो जगति अन्ययो[8]र्मनोहरयोरनयोश्चित्रकरः[9] अभणितोऽपि नलं दमयन्तीं च लिखितवान् । ततश्च चित्रे[10] आत्मनो नले[11] साम्यं विलोकयति [स्म] । कारुवरेणेति अनिनन्तस्य लिखेर्धातोः कर्तरि अनुक्ते तृतीया[12] ।। ३८ ।।]

**मनोरथेन स्वपतीकृतं नलं निशि क्व सा न स्वपती स्म पश्यति ।
अदृष्टमप्यर्थमदृष्टवैभवात् करोति सुप्तिर्जनदर्शनातिथिम् ।। ३९ ।।**

[मनोरथेनेति[1] । सा [क्व][2] निशि स्वपती शयाना सती नलं न पश्यति स्म । अपि तु सर्वस्यां[3] रात्रौ सर्वत्र च स्वप्ने नलं ददर्श । किं भूतम् ?। मनोरथेन स्वपतीकृतं भर्तृत्वे [न] कृतम् । च्विप्रत्ययः । यतः सुप्तिः स्वप्नः अदृष्टमपि [अर्थं[4]] पदार्थं जनस्य दर्शनातिथिं करोति । कुतः ?। अदृष्टस्य सुकृतदुष्कृतस्वरूपस्य वैभवात् प्रभावात्[5] ।। ३९ ।।

**निमीलितादक्षियुगाच्च निद्रया हृदोऽपि बाह्येन्द्रियमौनमुद्रितात् ।
अदर्शि संगोप्य कदाप्यवीक्षितो रहस्यमस्याः स महन्महीपतिः ।। ४० ।।**

निमीलितादिति[1] । निद्रया अस्या दमयन्त्याः स महीपतिः महत् रहस्यम् अदर्शि । किं कृत्वा ?। अक्षियुगात् संगोप्य[2] । किं भूतात् ?।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

निमीलितात् निद्रावशात् ।[3] चक्षुषैव रूपज्ञानं तथापि चक्षुषोपलभ्य। तर्हि मनसा ज्ञातो भविष्यतीत्याशङ्क्याह–हृदोऽपि मानसादपि[4] संगोप्य। कथं भूतात् ?। बाह्येन्द्रियाणां चक्षुःश्रोत्रादिकानां मौनेन[5] निमीलनेन मुद्रितात्। किं भूतः ?। कदापि अवीक्षितः। रहस्यं किल पूर्वं [म] परिचितं भवति सर्वेभ्य[श्च] गोप्यते। इन्द्रियाणि मनसो द्वाराणि, तानि यदा पिहितानि भवन्ति तदान्तःकरणं किमपि न जानाति। तर्हि कथं दृष्टः ?। तत्रोच्यते[6]—यथा जाग्रदवस्थायामदृष्टवशात् [आत्मा] सुखदुःखभोगं[7] भुङ्क्ते, तथा स्वप्नावस्थायामपि पूर्वकर्मवशात् आत्मा नाडीभिर्निर्गत्य तत्र[8] देशे नवं[9] देहं निर्माय पूर्वशरीरं तत्रैव देशे प्राणवायुना रक्षन् स्वाप्नान् [भोगान्[10]] भुक्त्वा पुनरपि पूर्वशरीरे प्रविशति। तथा च[11] स्वप्नविषये शातपथी श्रुतिः—'प्राणेन रक्षन्नवरं[12] कुलायं बहिष्कुलायादमृतश्चरित्वा[13]। स ईयते अमृतो यत्र कामं हिरण्मयः पौरुष[14] एक[15] हंसः ।। [इति] (बृ. उ. IV. iii. 12)[16] ।। ४० ।।

अहो अहोभिर्महिमा हिमागमेऽप्यतिप्रपेदे प्रति तां स्मरार्दिताम्।
तपर्तुपूर्तावपि मेदसां भरा विभावरीभिर्बिभरांबभूविरे ।। ४१ ।।

अहो[1] अहोभिरिति। अहो [इति] आश्चर्ये। अहोभि (8a) र्दिवसैः तां स्मरार्दितां प्रति[2] हिमागमेऽपि महिमा [अति]प्रपेदे। दिनानि विरहिणां किल हेमन्ते ऋतावपि महान्ति भवन्ति। तत्र किल दक्षिणायनत्वात्[3] लघुता। किं च तां विरहिणीं प्रति विभावरीभिः[4] निशाभिः तपस्य ग्रीष्म[स्य]ऋतोः पूर्तावपि[5] पूरणेऽपि[6] मेदसां भराः बिभरांबभूविरे[7]। लक्षणया[8] रात्रयो महत्यो जाताः गुरुतरा बभूवु-[रित्यर्थः]। तत्र किल रात्रयो[9] लघ्व्यो भवन्ति। अ[थ च स्त्रीणां यदा][10] ऋतोः पूर्तिर्भवति रजस्वलात्वं भवति,[11] तदा मेदो न भवति। तदा रजोनिःसरणेन[12] क्षामत्वं भवति[13]। याश्च विभावर्यो विभातकरणस्वभावास्तासां[14] कथं स्थूलत्वं गुरुत्वं, विभा[ता][15] एव[16] दृश्यन्ते[17]। परं[18] तदा तां प्रति सर्वं विपरीतम्[19] ।। ४१ ।।

स्वकान्तिकीर्तिव्रजमौक्तिकस्रजः श्रयन्तमन्तर्घटनागुणश्रियम्।
कदाचिदस्या युवधैर्यलोपिनं नलोऽपि लोकादशृणोद् गुणोत्करम् ।। ४२ ।।

स्वकान्तिकीर्तीति[1]। नलोऽपि कदाचित् लोकात् अस्या गुणोत्करम्[2] अशृणोत् श्रुतवान्[3]। किं भूतम् ?। यूनां धैर्यं लुम्पतीत्येवं शीलम्[4]।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

किं कुर्वन्तम् ?। स्वस्या दमयन्तीसम्बन्धिन्याः कान्तेः[5] [कमनीयतायाः कीर्तिः प्रसिद्धिस्तस्या व्रजः समूह एव मौक्तिकस्रक् हारस्तस्याः[6] अन्तर्घटनार्थं गुणस्य तन्तुदोरकस्य श्रियं शोभां श्रयन्तम् । अथ च तेन गुणोत्करेण] कमनीयता नलहृदये नृपचेतसि[7] घटिता योजिता[8] । अथवा स्वकीया नलसम्बन्धिनी[9] कान्तिकीर्तिव्रज एव मौक्तिकस्रक् तस्या घटनार्थं गुणरूपो गुणोत्करः । नलकान्तिकीर्तेर्दमयन्तीगुणोत्करस्य[11] च सम्बन्धयोग्यत्वमित्यर्थः[12] ॥ ४२ ॥

तमेव लब्ध्वाऽवसरं ततः स्मरः शरीरशोभाजयजातमत्सरः ।
अमोघशक्त्या निजयेव मूर्तया तया विनिर्जेतुमियेष नैषधम् ॥ ४३ ॥

तमेव[1] लब्ध्वेति । ततः स्मरस्तमेवाऽवसरं लब्ध्वा तया[2] दमयन्त्या नैषधं विनिर्जेतुमियेष । किं भूतया ?। उत्प्रेक्षते[3]-निजया[4] मूर्तया अमोघशक्त्या इव । किं भूतः ?।[5] शरीरशोभाजयेन[6] जातमत्सर[7] उत्पन्नक्रोधः ।[8] उत्प्रेक्षालङ्कारः ॥ ४३ ॥

अकारि तेन श्रवणातिथिर्गुणः क्षमाभुजा भीमनृपात्मजालयः ।
तदुच्चधैर्यव्ययसंहितेषुणा स्मरेण च स्वात्मशरासनाश्रयः ॥ ४४ ॥

[अकारि[1] तेनेति । तेन क्षमाभुजा भीमनृपात्मजा आलयो यस्य स तथा गुणः श्रवणातिथिरकारि । तथा स्मरेण कन्दर्पेण च स्वात्मनः शरासनं बाणासनमाश्रयो यस्य गुणस्य स गुणो मौर्वी श्रवणातिथिः कर्णान्ताकृष्टोऽकारि । किं विशिष्टेन ?। तस्य नलस्य उच्चं धैर्यं तस्य व्ययार्थं विनाशार्थं संहित इषुर्येन(तेन[2]) तथा[3]] ॥ ४४ ॥

अमुष्य वीरस्य जयाय साहसी तदा खलु ज्यां विशिखैः सनाथयन् ।
निमज्जयामास यशांसि संशये स्मरस्त्रिलोकीविजयार्जितान्यपि ॥ ४५ ॥

[अमुष्य[1] वीरस्येति । स्मरः त्रिलोकीविजयेन अर्जितान्यपि यशांसि संशये निमज्जयामास । किं कुर्वन् ?। तदा (खलु[2]) अमुष्य वीरस्य जयाय ज्यां मौर्वीं विशिखैः सनाथयन् । यतः (साहसी[3]) साहसयुक्तः । यो[4] नलं विजेतुमिच्छति[5] [तस्य] । अहं[6] जेष्यामि किं वा न[7] इति संशयः[8] ॥ ४५ ॥]

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

अनेन भैमीं घटयिष्यतस्तथा विधेरवन्ध्येच्छतया व्यलासि तत् ।
अभेदि तत्तादृगनङ्गमार्गणैर्यदस्य पौष्पैरपि[1] धैर्यकञ्चुकम् ।। ४६ ।।

अनेन[2] भैमी[मि]ति । अनेन नलेन तथा तेन[3] प्रकारेण घटयिष्यतो[4] विधेर्ब्रह्मणः अवन्ध्या इच्छा यस्य स तथा, तस्य भावस्तत्ता तया । तत् व्यलासि । यत् अस्य नलस्य धैर्यमेव कञ्चुकं[5] पोष्पैरपि अनङ्गमार्गणैः[6] [तत्] प्रसिद्धं तादृग्गुणोपेतं[7] च दुर्भेदमप्यभेदि । इयं वेधसः सफलेच्छता[8] यत् शरीरहीनस्यापि[9] कामस्य पुष्पमयैरपि शरै[10] धैर्यसन्नाहो भिन्नः[11] ।। ४६ ।।

किमन्यदद्यापि यदस्त्रतापितः पितामहो वारिजमाश्रयत्यहो ।
स्मरं तनुच्छायतया तमात्मनः शशाक शङ्के स न लङ्घितुं नलः ।। ४७ ।।

किमन्यदद्येति[1] । किमन्यत् उच्यते[2] । अद्यापि यस्य कामस्याऽस्त्रैस्तापितः पितामहो ब्रह्मा वारिजमाश्रयति[3] । [अहो आश्चर्ये । अहं शङ्के—स नलः तं स्मरं लङ्घितुं न शशाक । कया ?। आत्मनः तनोः शरीरस्य छाय[4][त]या नलशरीरसादृश्येनाऽथ च[5] स्वशरीरस्य छायां न कोऽपि[6] लङ्घितुं शक्नोति । तथा[7] स्मरः नलात् तनुच्छायः[8] अल्पशोभः । विभाषा सेनासुराच्छायाशाला निशानामि (पा. II. iv. 25)ति विभाषया छायान्तस्तत्पुरुषो नपुंसकलिङ्गः[9]] ।। ४७ ।।

उरोभुवा कुम्भयुगेन जृम्भितं नवोपहारेण वयःकृतेन किम् ।
त्रपासरिद्दुर्गमपि प्रतीर्य सा नलस्य तन्वी हृदयं विवेश यत् ।। ४८ ।।

[उरोभुवेति[1] । किं तत् उरसो भुवा हृदयोत्पन्नेन] कुम्भयुग्मेन जृम्भितं विलसितम्[2] । किं भूतेन ?। वयः कृतेन नवोपहारेण [इति कर्मधारयः । अथवा नव उपहार आगमनं यस्य तेन तथा ।] अथ च[3] नवो नूतन[4] उप समीपे हारो यस्य[5] । [तथा च वयसा तारुण्येनैव कुम्भकारेण कृतेन समीपहारेणेति[6] पदं कुचौ लक्षयति । यत् सा तन्वी कृशाऽपि नलस्य हृदयं विवेश । किं कृत्वा ?। त्रपा एव सरित् स एव जलदुर्गस्तमपि प्रतीर्य । दृढकुम्भद्वयेन हि नदी तीर्यते[7]] ।। ४८ ।।

अपह्नुवानस्य जनाय यन्निजामधीरतामस्य कृतं मनोभुवा ।
अबोधि तज्जागरदुःखसाक्षिणी निशा च शय्या च शशाङ्ककोमला ।।४९।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

अपह्नुवानस्येत्यादि[1]। अस्य नलस्य जनाय निजाम् अधीरताम्[2] अपह्नुवानस्य [यत्] मनोभुवा [कामेन[3] कृतं तत् निशा च शय्या च अबोधि जानाति स्म। किं भूता ?। जागरस्य दुःखं[4] तत्साक्षिणी। किं भूता ?। शशाङ्केन कोमला मनोज्ञा। शय्या शशाङ्कवत्कोमला। दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्यामि (पा. III. i. 61)ति चिण्-प्रत्ययः[5]] ॥ ४९ ॥

स्मरोपतप्तोऽपि भृशं न स प्रभुर्विदर्भराजं तनुजामयाचत।
त्यजन्त्यसूञ्शर्म च मानिनो वरं त्यजन्ति न त्वेकमयाचितव्रतम् ॥ ५० ॥

स्मरोपतप्तोऽपीति[1]। भृशं[2] स प्रभुर्नलः स्मरेणोपतप्तोऽपि विदर्भराजं[3] तनुजां[4] न अयाचत। तनयामिति पाठान्तरम्। मानिनः पुरुषा वरम् असून् शर्म च त्यजन्ति। तु पुनः एकमयाचितव्रतं न त्यजन्ति[5] ॥ ५० ॥

मृषाविषादाभिनयादयं क्वचिज्जुगोप निःश्वाससतिं वियोगजाम्।
विलेपनस्याधिकचन्द्रभागताविभावनाच्चापललाप पाण्डुताम् ॥ ५१ ॥

मृषाविषादेति[1]। अयं नलः क्वचिद् वियोगजां[2] तां निःश्वाससतिं जुगोप। [कस्मात् ?।] मृषा अविद्यमानस्याऽपि विषादस्याऽभिनयात्[3]। अयं निःश्वासोऽस्माकम् अन्यस्मात्कारणाज्जातः,[4] न तु वियोगात्। तथा शरीरे विरहजातामपि पाण्डुतां च अपललाप। कस्मात् ?। विलेपनस्याऽधिकोऽयं चन्द्रस्य कर्पूरस्य भागस्तस्य भावस्तत्ता तस्या विभावनात् ज्ञापनात्।[6] श्रीखण्डमध्येऽङ्गरागे कर्पूराधिक्यात्[7]। पाण्डुत्व-मिति लोकमध्ये[8] प्रकटनात्[9] ॥ ५१ ॥

शशाक निह्नोतुमये न तत्प्रियामयं बभाषे यदलीकवीक्षिताम्।
समाज एवालपितासु वैणिकैर्मुमूर्च्छ यत्पञ्चममूर्च्छनासु च ॥ ५२ ॥

शशाक[1] निह्नोतुमिति। यद[यम[2]]लीकेन भ्रान्त्या[3] वीक्षितां प्रियाम् अये इति सम्बोध्य बभाषे। तत्सभामध्ये निह्नोतुं न शशाक। पूर्ववाक्य एवायेपदं वा[4] सम्बोधनम्।[5] तथा समाजे सभायामेव यत् पञ्चमरागस्य मूर्च्छनासु स्वरसारणासु[6] च[7] मुमूर्च्छ[8] मोहं प्राप। तच्च अपलपितुं न शशाक। किं भूतासु ?। वैणिकैः वीणावादनशिल्पिभिः

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

आलपितासु प्रारब्धासु । तत्र[9] किमपि प्रत्यक्षे उत्तरं न शक्य[ते] कर्तुम् ।। ५२ ।।

अवाप सापत्रपतां स भूपतिर्जितेन्द्रियाणां धुरि कीर्तितस्थितिः ।
असंवरे शम्बरवैरिविक्रमे क्रमेण तत्र स्फुटतामुपेयुषि ।। ५३ ।।

अवापेति[1] । स भूपतिस्तत्र तस्मिन् शम्बरवैरिणः कामस्य विक्रमे क्रमेण[2] स्फुटताम् उपेयुषि सति सापत्रपतां सलज्जताम् अवाप । किं भूते ?। असंवरे संवरितुमशक्ये । किं भूतः ?। जितेन्द्रियाणां मध्ये धुरि प्रथमं कीर्तिता स्थितिर्यस्य स तथा । उपेयिवाननाश्वाननूचानश्च (पा. III. ii. 109) इति क्वसुः[3] ।। ५३ ।।

अलं नलं रोद्धुममी[1] किलाऽभवन् गुणा विवेकप्रभवा न चापलम् ।
स्मरः स रत्यामनिरुद्धमेव यत् सृजत्ययं सर्गनिसर्ग ईदृशः ।। ५४ ।।

अलं[2] नलमिति । [किलेति[3] संभावने ।] [अमी[4]] विवेकप्रमुखा गुणा नलमिदं चापलं रोद्धुमलं समर्था न अभवन्[5] । तस्य[6] चापलं न [नि]वारितवन्तः । यतः (9b) कारणात् स स्मरः रत्यां सत्यां पुरुषम् अनिरुद्धमेव[7] चपलमेव सृजति । अयमीदृशः सर्गस्य निसर्गः स्वभावः । सृष्टिस्वभावः । अथ च स्मरः प्रद्युम्नः[8] रत्यां [पत्न्यां] स्वजायायाम्[9] अनिरुद्धनामानं पुत्रं[10] सृजतीति सृष्टिप्रकरणे पुराणेषु स्वभाव इत्यर्थः । [दुहियाचिरुधि (काशिका under पा, I. iv. 54) इति द्विकर्मकः][11] ।। ५४ ।।

अनङ्गचिह्नं स विना शशाक नो यदासितुं संसदि यत्नवानपि ।
क्षणं तदारामविहारकैतवान्निषेवितुं देशमियेष नैषधः ।। ५५ ।।

अनङ्गचिह्नमिति[1] । यदा स नैषधो[2] नलः अनङ्गस्य चिह्नं[3] विना क्षणमपि आसितुं[4] स्थातुं न शशाक । [अपीत्युभ] यत्र सम्बध्यते । संसदि[5] यत्नवानपि आसितुं न शशाक । तदा आरामविहारकैतवात्[6] उपवनक्रीडाव्याजात्[7] कञ्चिदेव एकान्तं[8] देशं निषेवितुम् इयेष वाञ्छितवान्[9] ।। ५५ ।।

अथ श्रिया भर्त्सितमत्स्यलाञ्छनः समं वयस्यैः स्वरहस्यवेदिभिः ।
पुरोपकण्ठं स वनं किलेक्षिता दिदेश यानाय निदेशकारिणः ।। ५६ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

अथ श्रियेति[1]। अथ स नलः निदेशकारिणः भृत्यान् यानाय अश्वानयनाय दिदेश। किल पुरस्य उपकण्ठं वनम् ईक्षिता [द्रष्टु]-कामः। तृन्प्रत्ययस्य निष्ठादित्वात् षष्ठ्यभावः।[2] किं भूतः ?। श्रिया शोभया भर्त्सितो मत्स्यलाञ्छनः कामो येन स तथा। कैः समम् ?। एवं रहस्यं[3] विदन्तीत्येवंशीलैः[4] वयस्यैः समम्[5] ॥ ५६ ॥

अमी ततस्तस्य विभूषितं सितं जवेऽपि मानेऽपि च पौरुषाधिकम् ।
उपाहरन्नश्वमजस्रचञ्चलैः खुराञ्चलैः क्षोभितमन्दुरोदरम् ॥ ५७ ॥

अमी[1] तत इति। ततोऽनन्तरम् अमी भृत्याः तस्य नलस्याऽश्व-मुपाहरत्। किं भूतम्[2] ?। अजस्रं चञ्चलैः खुराणाम्[4] अञ्चलैः[5] शफाग्रैः तैः क्षोभितं क्षोदितं मन्दुरा[या] वाजिशालाया उदरं मध्यं येन तं[6] तथा। किं भूतम् ? विशेषेण भूषितम्। तथा सितं शुभ्रम् [तथा] जवे वेगेऽपि पौरुषात् पराक्रमादधिकम्[7]। किं च माने प्रमाणेऽपि पौरुषात् पुरुषप्रमाणादधिकम् उच्चैस्तरम्[8] ॥ ५७ ॥

अथान्तरेणावटुगामिनाध्वना निशीथिनीनाथमहःसहोदरैः ।
निगालगाद्देवमणेरिवोत्थितैर्विराजितं केसरकेशरश्मिभिः ॥ ५८ ॥

अथान्तरेणेति[1]। स सिन्धुज (I. 64) मिति[2]। अथाऽनन्तरं स क्षितिपाकशासनः[3] तं[4] हयम् आरुरोह। किं भूतम् ?। उच्चैःश्रवसः श्रियं शोभां हरन्तम्[5]। किं भूतम् ?। [सिन्धुजं] सिन्धुदेशोद्भवम्। तथा शीतमहसश्चन्द्रस्य[6] सहोदरं सदृशम्। किं भूतो राजा ?। जिता अखिलाः क्ष्माभृतो[7] राजानो[8] येन स[9] तथा। अनल्पे[10] दीर्घे लोचने यस्य स तथा। इन्द्रोऽप्युच्चैःश्रवसमारोहति। सिन्धौ समुद्रे [च[11]] जातं, चन्द्रस्य सोदरम्। जिता अखिलाः क्ष्माभृतः पर्वता येन। अनल्पानि बहूनि लोचनानि यस्य स तथा ॥

किं भूतम् ?। केसरस्य स्कन्धस्य ये केशा[12] एव रश्मयस्तैर्विरा-जितम्[13]। उत्प्रेक्षते[14]—[निगाले कण्ठप्रदेशे गतान् स्थितान् देवमणेः कण्ठावर्तविशेषात् उत्थितैरिव]। निगालस्तु गलोद्देशे[15] (अमर II. 47)। आवर्तो[16] यो निगाले स्याद् देवमणिः सर्वकामदः सोऽसौ। [केनोत्थितैः[17] ?। आन्तरेण मध्यवर्तिना[18]] अध्वना मार्गेण। किं भूतेन[19] ?। अवटुगामिना। [अवटुः कृकाटिका तत्र गच्छतीत्येवंशीलेन।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

कण्ठात् यो मार्गः अश्वस्य ग्रीवामध्यप्रदेशेन भूत्वा स्कन्धप्रदेशे गच्छति, तेनाऽध्वना स्वरश्मयः किम् उपरिगताः ? किं भूतैः ?। निशीथिनीनाथस्य चन्द्रस्य महसां सहोदरैः श्वेतैः । मणेश्च रश्मय उत्तिष्ठन्ति][20] ॥ ५८ ॥

अजस्रभूमीतटकुट्टनोद्गतैरुपास्यमानं चरणेषु रेणुभिः ।
रयप्रकर्षाध्ययनार्थमागतैर्जनस्य चेतोभिरिवाणिमाङ्कितैः ॥ ५९ ॥

अजस्रभूमीति[1] । किं भूतमश्वम्[2] ?। चरणेषु रेणुभिरुपास्यमानम् । किं भूतैः[3] ?। अजस्रमनवरतं[4] भूमीतटस्य कुट्टनाद्[5] उक्षतैः[6] । [उत्प्रेक्षते] जनस्य लोकस्य[7] चेतो[8]भिरिव ।[9] किं भूतैः ?। अणिम्ना[10] अणुपरिमाणेन अङ्कितैः । [अणुपरिमाणं मनः ।] किं[11] भूतैः ?। रयप्रकर्षस्याऽध्ययनार्थम्[12] आगतैः । [मनो[13] हि वेगवद् भवति, परम् अश्वस्य वेगप्रकर्षं शिक्षितुं तदपि चरणोपास्ति किल कुरुते, गुरुशुश्रूषार्थम् ।][14] ॥ ५९ ॥

चलाचलप्रोथतया महीभृते स्ववेगदर्पानिव वक्तुमुत्सुकम् ।
अलं गिरा वेद किलायमाशयं स्वयं हयस्येति च मौनमास्थितम् ॥ ६० ॥

[चलाचलेति[1] । किं[2] भूतम् ?।[3] महीभृते नलाय स्वस्य वेगस्य दर्पान् प्रकर्षान् वक्तुम् उत्सुकमिव । कया ?। चलाचलः प्रोथो नासिका[4] यस्य स तथा तस्य भावस्तत्ता तया । यो हि किञ्चिद् वदति तस्याधरौ[5] स्फुरतः[6] । किं भूतम् ?। किल उत्प्रेक्षायाम्[7] । पुनरपि मौनं च[8] आस्थितम् आश्रितम् । कथम् ?। इति कारणात्[9] । गिरा वाण्या अलं पूर्यताम् । अयं नलः किल स्वयं[10] हयस्य आशयं वेद । अश्वहृदयमन्त्रज्ञत्वात् । तस्माद् वचनेन पूर्यतामिति गृहीतं मौनम्[11]] ॥ ६० ॥

महारथस्याऽध्वनि चक्रवर्तिनः परानपेक्षोद्वहनाद्यशः सितम् ।
रदावदातांशुमिषादनीदृशां हसन्तमन्तर्बलमर्वतां रवेः ॥ ६१ ॥

महारथस्येति[1] । किं कुर्वन्तम् ?। रवेः श्रीसूर्यस्य अर्वतामश्वानां [बलमन्तर्मध्ये हसन्तम् । कस्मात् ?। रदानां दन्तानाम् अवदाताः शुद्धा ये अंशवः किरणाः तेषां मिषात् । किं भूतानामश्वानाम् ?।] अनीदृशां न ईदृशां[2] नलस्याऽश्वाद्विलक्षणानाम्, अत एवोपहासः । किं भूतम् ?।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

यशोवत् सितं श्वेतम् । तेन वा श्वेतम् । कुतोऽनीदृशाम् ?। महारथस्य नलस्य चक्रवर्तिनः अध्वनि परेषामन्येषाम् अनपेक्षया उद्वहनात् । श्री-सूर्यस्याश्वाः[3] किल महारथस्य अध्वनि ध्वनिरहिते चक्रे वर्तते इत्येवंशीलस्य परापेक्षया उद्वहनं कुर्वन्ति । न त्वेकाकिनः । अत एव वैलक्षण्यं तेषाम्[4] ।। ६१ ।।

सितत्विषश्चञ्चलतामुपेयुषो मिषेण पुच्छस्य च केसरस्य च ।
स्फुटां चलच्चामरयुग्मचिह्नैरनिह्नुवानं निजवाजिराजताम् ।। ६२ ।।

सितत्विष[1] इति । किं कुर्वाणम्[2] ?। निजां वाजिराजताम्[3] अनिह्नुवानम् । किं[4] भूताम् ?। चलत् यत् चामरयुग्मं तस्य चिह्नैः[5]-लक्षणैः स्फुटां प्रकटाम्[6] । किंवत्[7] चामरयुग्ममित्याह[8]-केन[9] ?। पुच्छस्य [च[10]] केसरस्य च मिषेण । किं भूतस्य ?। सितत्विषः श्वेतस्य, तथा चञ्चलताम् उपेयुषः गतवन्तः[11] । पुच्छं च[12] केसरश्च चञ्चलम् । चामराण्यपि[13] राज्ञः समीपे चाल्यन्ते । अतश्च अश्वानां मध्ये राजाऽयं नलस्याऽश्वः[14] ।। ६२ ।।

अपि द्विजिह्वाभ्यवहारपौरुषे मुखानुषक्तायतवल्गुवल्गया ।
उपेयिवांसं प्रतिमल्लतां रयस्मये जितस्य प्रसभं गरुत्मतः ।। ६३ ।।

अपि[1] द्विजिह्वेति ।[2] अश्वम् आरुरोह । किं भूतम् ?। गरुत्मतो गरुडस्य द्विजिह्वानां सर्पाणां योऽभ्यवहारो भक्षणं तत्र यत् पौरुषं पराक्रमस्तत्रापि प्रतिमल्लतां उपेयिवांसम् । कया ?। मुखेऽनुषक्ता या[3] आयता दीर्घा वल्गुप्रधाना वल्गा रश्मिः कविका तया । सर्पभक्षणे सादृश्येन[4] स्पर्द्धमानम् । किं भूतस्य गरुडस्य[5] ?। रयस्य वेगस्य स्मये गर्वे प्रसभं बलात् सर्वप्रत्यक्षं जितस्य अग्रे[6] एकवारं वेगे[न] जितः । इदानीं सर्पभक्षणपौरुषमपि ममास्तीति दर्शयन्तम्[7] ।। ६३ ।।

स सिन्धुजं शीतमहःसहोदरं हरन्तमुच्चैःश्रवसः श्रियं हयम् ।
जिताखिलक्ष्माभृदनल्पलोचनस्तमारुरोह क्षितिपाकशासनः ।। ६४ ।।

स[1] सिन्धुजमिति । कुलकम् ।। ६४ ।।

चलन्नलंकृत्य महारयं हयं स्ववाहवाहोचितवेषपेशलः ।
प्रमोदनिष्पन्दतराक्षिपक्ष्मभिर्व्यलोकि लोकैर्नगरालयैर्नलः ।। ६५ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

चलन्नलमिति[1] । स नलः महार्यं हयम् अलङ्कृत्य चलन्नगरालयैर्लोकैर्व्यलोकि । किं भूतः ?। [स्व[2]]वाहेन अश्वेन यो वाहः गमनं तस्य उचितो यो[3] वेष[3] तेन पेशलः । किं भूतैः ?। प्रमोदेन निष्पन्दतराणि अक्ष्णां पक्ष्माणि[4] येषां तैस्तथा[5] ।। ६५ ।।

क्षणादथैष क्षणदापतिप्रभः प्रभञ्जनाध्येयजवेन वाजिना ।
सहैव ताभिर्जनदृष्टिवृष्टिभिर्बहिः पुरोऽभूत् पुरुहूतपौरुषः ।। ६६ ।।

क्षणादथेति[1] । स नलः[2] अथ वाजिना अश्वेन[3] ताभिर्जनानां दृष्टिवृष्टिभिः सहैव पुरो नगराद् बहिरभूत् । किं भूतः ?। पुरुहूतवत् पौरुषं यस्य स तथा । कि भूतः ?। क्षणदापतेश्चन्द्रस्येव प्रभा यस्य स तथा । किं भूतेन ? प्रभञ्जनेन वायुना अध्येयो जवो यस्य वाजिनः तेन तथा । वायुरश्वस्य वेगं पठतीत्येवेत्यर्थः[4] । यः किल सर्वस्य [वेगेन[5]] भङ्गं कुरुते सोऽपि पठति[6] ।। ६६ ।।

निजा मयूखा इव तीक्ष्णदीधितिं स्फुटारविन्दाङ्कितपाणिपङ्कजम् ।
तमश्ववारा जवनाश्वयायिनं प्रकाशरूपा मनुजेशमन्वयुः ।। ६७ ।।

निजा मयूखा[1] इवेति ।[2] अश्ववाराः तं जवनाश्व[3]यायिनं[4] मनुजेशं नलम् अन्वयुः । किं भूताः ?। प्रकाशं रूपं येषां ते तथा । किं भूतम् ?। स्फुटं[5] प्रकटं अरविन्दाङ्किते[6] पाणि [पङ्कजे] यस्य स तं तथा । कमलाङ्किता करतलरेखा[7] यस्य[8] [स तथा] । के इव[9] ?। [निजा] मयूखा[10] यथा तीक्ष्णदीधितिं श्रीसूर्यमनुगच्छन्ति, तेऽति प्रकाशरूपाः प्रकाशस्वभावाः[11] । सूर्योपि जवनैरश्वैर्याति । सोऽपि मनुकुले [जाता-]नामीशः । तथा विकसितारविन्दाभ्यामङ्किते पाणिपङ्कजे यस्य ।[12] करद्वयेऽपि[13] कमलद्वयमस्ति[14] ।। ६७ ।।

ततः प्रतीच्छ प्रसरेति भाषिणी परस्परोल्लासितशल्यपल्लवे[1] ।
मृषा मृधं सादिबले कुतूहलात् नलस्य नासीरगते वितेनतुः ।। ६८ ।।

ततः[2] प्रतीच्छेति । ततो नलस्य नासीरेऽग्रे गते सादिनां बले सैन्यद्वयं[3] कुतूहलात् मृषा असत्यतया अलीकं[4] मृधं युद्धं वितेनतुः । किं कुर्वती ?। इति भाषिणी । इतीति[5] किम् ?। भो[6] सादिन् ! प्रतीच्छ आगच्छद्दलं[7] प्रतिगृहाण । प्रसर प्रसरं कुरु । पुनः किं भूते बले ?।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

परस्परम् उल्लासिता उद्यता: शल्यानां भल्लानां पल्लवा: प्रान्ता याभ्यां ते तथा[8] ।। ६८ ।।

प्रयातुमस्माकमियं कियत्पदं धरा तदम्भोधिरपि स्थलायताम् ।
इतीव वाहैर्निजवेगदर्पितैः पयोधिरोधक्षममुद्धतं रजः ।। ६९ ।।

प्रयातुमिति[1] । वाहैरश्वैर्निजेन आत्मीयेन[2] वेगेन[3] दर्पितैः उद्धतैः[4] सद्भिः पयोधेः[5] समुद्रस्य रोधः पूरणं तस्य क्षमं रजः रेणुरुद्धतम् । उत्प्रेक्षते-इति कारणादिव । अस्माकमश्वानां प्रयातुमियं धरा पृथिवी[6] कियत्पदं चलिता[7] द्वित्राणि[8] पदानि[9] प्रभविष्यति । तत्कारणात् अम्भोधिरपि खुरोद्धतेन रजसा पूरितः स्थलम् इव आचरतु[10] । इवादिलोपे क्यङ्[11] । लुप्तोपमा ।। ६९ ।।

हरेर्यदक्रामि पदैककेन खं पदैश्चतुर्भिः क्रमणेऽपि तस्य नः ।
त्रपा हरीणामिति नम्रिताननैर्न्यवर्ति तैरर्धनभःकृतक्रमैः ।। ७० ।।

हरेर्यदिति[1] । तैरश्वरर्धे नभसि कृतक्रमैः कृतोत्प्लवनैः[2] सद्भिः पुनरपि न्यवर्ति । उत्प्रेक्ष (११b)ते-इति कारणात् नम्रितम् आननं येषां[3] तैस्तथा ।[4] इतीति किम् ? यत् खम् आकाशं हरेः श्रीकृष्णस्य पदं च तत् एककं च तेन पदैककेन अक्रामि । त्रिविक्रमक्रमणावसरे क्रान्तम् । तस्य खस्य शून्यस्य नभसः नोऽस्माकमपि[5] हरीणां सतां बहूनां तथा[6] चतुर्भिरपि पदैः क्रमणे अतीव त्रपा लज्जा । वयमपि हरयः सोऽपि हरिः । अतो निवृत्ताः[7] ।। ७० ।।

चमूचरास्तस्य नृपस्य सादिनो जिनोक्तिषु श्राद्धतयेव सैन्धवाः ।
विहारदेशं तमवाप्य मण्डलीमकारयन् भूरितुरङ्गमानपि ।। ७१ ।।

चमूचरा[1] इति । तस्य नृपस्य सादिनो अश्ववारा ये चमूचराः सैनिकास्ते[2] [तं] विहारदेशम् अवाप्य[3] भूरीनपि[4] तुरङ्गमान् मण्डलीम्[5] अकारयन्[6] वाह्यालीं[7] कारितवन्तः । के इव ? सैन्धवा इव । यथा[8] सिन्धुदेशोद्भवा[9] लोका जिनस्य उक्तिषु श्राद्धतया श्रद्धालुतया[10] विहारदेशं जिनालयं प्राप्य[11] सर्वानपि मण्डलीं कारयन्ति । मण्डलिसम्बन्धेन[12] गायन्तो भ्रमन्ति[13] । श्रद्धा विद्यते यस्येति प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः[14] इति (पा. v. ii. 101) णप्रत्ययः[15] ।। ७१ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

द्विषद्भिरेवास्य विलङ्घिता दिशो यशोभिरेवाब्धिरकारि गोष्पदम् ।
इतीव धारामवधीर्य मण्डलीक्रियाश्रियामण्डि तुरङ्गमैः स्थली ।। ७२ ।।

द्विषद्भिरेवेति[1] । तुरङ्गमैः धारां[2] दीर्घगमनप्रवाहम् अवधीर्य विहाय मण्डलीक्रियायाः श्रिया शोभया स्थली पृथ्वी अमण्डि अलङ्कृता । कथम् ?। इति[3] कारणादिव । यतोऽस्य नलस्य द्विषद्भिरेव भयेन[4] दिशो विलङ्घिताः । अथ[5] अब्धिः समुद्रो यशोभिरेव गोष्पदमकारि । वयं चेद्धारावाहिकयाऽऽगच्छामः[6] तदा क्षणेन दिगन्ते वा गच्छामः समुद्रान्ते वा । तदुभयमपि पूर्वंरुद्धम्[7] । ततः स्थानाभावात् [क्व] गच्छाम इत्यर्थः । गोष्पदं सेवितासेवितप्रमाणेष्वि[8] (पा. VI. i. 145)ति सुट्[9] ।। ७२ ।।

अचीकरच्चारु हयेन या भ्रमीर्निजातपत्रस्य तलस्थले नलः ।
मरुत्किमद्यापि न तासु शिक्षते वितत्य वात्यामयचक्रचङ्क्रमान् ।। ७३ ।।

अकारयदिति[1] । नलः निजस्य आतपत्रस्य छत्रस्यैव तलस्य[2] स्थले चारु यथा भवत्येवं हयेनाऽश्वपार्श्वात्[3] या भ्रमीर्मण्डलीर्वाह्यालीरकारयत् । अतिसंकीर्णगतित्वात् कवि[4] रुत्प्रेक्षते-किमद्यापि[5] मरुद्वायुस्तासु भ्रमीषु न शिक्षते । जिज्ञासायां[6] शिक्षतेरात्मनेपदम् । तथा च क्रीडोऽनुसंपरिभ्यश्चे (पा. I. iii. 21)ति सूत्रे काशिकायां[7] वक्तव्यान्तरान्तर्गतं शिक्षेर्जिज्ञासायामिति व (12a) क्तव्यमुक्तम् । तत्रोदाहरणद्वयम् विद्यासु शिक्षते [धनुषि शिक्षते] । केचित्तु ताः सुशिक्षत इति पाठं व्याचक्षते । ता भ्रमीर्न सुष्ठु शिक्षते । [न[8] शोभनमभ्य]स्यति । शिक्षतेस्तदाप्यात्मनेपदं[9] प्राप्नोत्येव, तथापि कवेराकूतं चिन्त्यम् । किं कृत्वा ? वात्यामयान् चक्रवत् चङ्क्रमान् [चक्रभ्रमान्] वितत्य ।[10] किल वात्यावर्तं[11] कुर्वन् वायुरपि शिक्षते । जिज्ञासते,[12] परं न जानाति । हयेनेति[13] अणिजन्तस्य[14] धातोरनुक्तत्वात्[15] कर्तरि तृतीया[16] ।। ७३ ।।

विवेश गत्वा स विलासकाननं ततः क्षणात्क्षोणिपतिर्धृतीच्छया ।
प्रवालरागच्छुरितं सुषुप्सया हरिर्घनच्छायमिवार्णसां निधिम् ।। ७४ ।।

विवेशेति[1] । स नलः विलासकाननं गत्वा क्षणात्त[तः] विवेश । क्षोण्याः पतिः । कया ?। धृतेः सन्तोषस्य इच्छया[2] । किं भूतम् ? प्रवालानां पल्लवानां रागेण छुरितम् । तथा घना निबिडा छाया यस्य

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

तत्तथा । क इव ?। हरिरिव । यथा [हरिः[3]] श्रीकृष्णः अर्णसां निधिं सुषुप्सया शयनेच्छया विशति । सोऽपि प्रवालमणीनां[4] रागेण व्याप्तः घनो मेघस्तत्सदृशच्छायश्च, श्यामत्वात्[5] ।। ७४ ।।

वनान्तपर्यन्तमुपेत्य सस्पृहं क्रमेण तस्मिन्नवतीर्णदृक्पथे ।
न्यवर्त्ति दृष्टिप्रकरैः पुरौकसामनुव्रजद्बन्धुसमाजबन्धुभिः ।। ७५ ।।

वनान्तपर्यन्तमिति[1] । पुरौकसां नगरनिवासिनां दृष्टिप्रकरैः तस्मिन्नले क्रमेणाऽवतीर्णोऽतिक्रान्तो दृक्पथो दृष्टेः पन्था येन[2] तथाविधे दूरीभूते सति[3] न्यवर्ति[4] । किं कृत्वा[5] ? सस्पृहं वनान्तस्य पर्यन्तम् उपेत्य[6] एत्य । वनान्तो वनैकदेशः । समस्तवस्तुविषयं मालारूपकमुच्यते । यद्वा (का. सा. I. 13) इत्यत्र[7] वनान्तदेवतावेण्यः[8] पान्थस्त्रीकालशृङ्खलाः । मारप्रवीरासिलता भृङ्गमालाश्चकासिरे ।। (Ibid. p. 13) इति प्रकारान्तरेण समस्तवस्तुविषयोदाहरणे एकस्मिन् रूप्ये[9] बहूनां रूपाणां समुच्चयेन आक्षिप्तमिति भट्टेन्दुराजेन स्वालङ्कारे व्याख्यातम् ।। किं भूतैः ? अनुव्रजन्तो[10] ये बन्धवः स्वजनास्तेषां समाजस्य बन्धुभिः सदृशैस्तेऽपि[11] निवृत्ताः । अनुव्रज्य दृष्टयोऽपि विलोकलोकानां [च]लिता इत्यर्थः ।। ७५ ।।

ततः प्रसूने च फले च मञ्जुले स संमुखस्थाङ्गुलिना जनाधिपः ।
निवेद्यमानं वनपालपाणिना व्यलोकयत् काननकामनीयकम् ।। ७६ ।।

ततः प्रसूने च फले चेति । ततः स जनाधिपः वनपालस्य पाणिना उद्यानपालकहस्तेन निवेद्यमानं काननस्य कामनीयकं सौन्दर्यं व्यलोकयत् । किं भूतेन पाणिना ? मञ्जुले प्रधाने प्रसूने[3] पुष्पे च फले च संमुखस्था अङ्गुलिर्यस्य तेन तथा । यद्रमणीयं भवति तदङ्गुल्या दर्श्यते ।[4] 'स्वामिन्' इदं पुष्पम् (12b) अवधार्यताम् । इदं फलं[5] च रुचिरम्[6] ।। ७६ ।।

फलानि पुष्पाणि च पल्लवे करे वयोतिपातोद्धतवातवेपिते[1] ।
स्थितैः समादाय महर्षिवार्द्धकाद् वने तदातिथ्यमशिक्षि शाखिभिः ।।७७।।

फलानीति[2] । तस्मिन् वने[3] [4]शाखिभिर्वृक्षैः तस्य नलस्य आतिथ्यं महर्षीणां[5] वार्द्धकात्[6] [वृद्धसमूहादशिक्षि[7] । वृद्धसङ्घे तु वार्द्धकम् (अमर II. VI. 40) । गोत्रोक्षोष्ट्रे (पा. IV. ii. 39)त्यादिना वृद्धा-

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

च्चेति वक्तव्याद् वुञ्। मनोन्यादित्वाद् भावात् कर्मणोरपि। यथा वार्द्धके मुनिवृत्तीनामि(रघु. I. 4)ति। अथवा महर्षीणां वार्द्धकात्] वृद्धत्वात् सकाशात् अशिक्षि।[8] वृद्धा महर्षयस्तत्र तपस्यन्ति। किं भूतैः? पल्लवे एव करे हस्ते नलातिथ्यार्थं[9] फलानि पुष्पाणि च समादाय स्थितैः। पल्लवोपरि फलं[10] पुष्पं च भवति। किं[11] भूते? वयसां पक्षिणां अतिपातेन अतिक्रमेण उद्धृत उद्गतो यो वातस्तेन वेपिते पल्लवे। महर्षयोऽपि हस्ते फलं पुष्पं चातिथिं[12] प्रतिगृह्णन्ति। सोऽपि हस्तो वयसो वार्द्धकस्याऽतिपातेनाऽतिक्रमेणोद्गतेन वातेन वेपितो भवति[13] ।। ७७ ।।

विनिद्रपत्रालिगतालिकैतवान्मृगाङ्कचूडामणिवर्जनार्जितम् ।
दधानमाशासु चरिष्णु दुर्यशः स कौतुकी तत्र ददर्श केतकम् ।। ७८ ।।

विनिद्रपत्रेति[1]। स कौतुकी नलस्तत्र वने केतकं ददर्श। उत्प्रेक्षते विनिद्राणां विकसितानां पत्राणाम् आलिषु पङ्क्तिषु गता उपविष्टा ये अलयो भ्रमरास्तेषां कैतवात् [व्याजात्] दुर्यशोऽकीर्तिं दधानम्। किं भूतम्? मृगाङ्कचूडामणिना श्रीमहादेवेन यद् वर्जनं [कृतं] तेनार्जितम्[2]। आशासु दिक्षु चरिष्णु गमनशीलम्[3]। [ईश्वरेण केतकीकुसुमं वर्जितमिति सर्वत्र प्रसिद्धिः]। अपह्नुतिः[4] ।। ७८ ।।

वियोगभाजां हृदि कण्टकैः कटुर्निधीयसे कर्णिशरः स्मरेण यत् ।
ततो दुराकर्षतया तदन्तकृद्विगीयसे मन्मथदेहदाहिना ।। ७९ ।।

वियोगभाजामिति[1]। तृतीयश्लोके (I. 81)सम्बन्धः। तेन नलेन इति क्रुधा क्रोधेन[2] केतकीकुसुमम् आक्रुश्यत शप्तम्। हे केतक! त्वं स्मरेण यत् यस्मात् कारणात् वियोगभाजां हृदि कर्णिशरो निधीयसे। पक्षद्वययुक्तो बाणः कर्णी। यतः कण्टकैः कटुस्तीक्ष्णः। ततो मन्मथ-देहदाहिना महेश्वरेण विगीयसे निन्द्यसे। किं भूतस्त्वम्? दुराकर्षतया[3] दुःखेन आकृष्यमाणतया तेषां विरहिणाम् अन्तकृत्। कर्णिशरः किल प्रविशति परं न निर्गच्छति, ततो[4] म्रियते[5] ।। ७९ ।।

त्वदग्रसूचीसचिवेन कामिनोर्मनोभवः सीव्यति दुर्यशःपटौ ।
स्फुटं च पत्रैः करपत्रमूर्तिभिर्वियोगिहृद्दारुणि दारुणायसे ।। ८० ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

त्वदग्रसूचीति[1]। मनोभवस्तवाऽग्रमेव सूची तया सचिवेन सहायेन कामिनोर्द्वयोरपि विरहिणोर्मारणलक्षणं[2] यद्[3] दुर्यशस्तदेव पटस्तौ सीव्यति। निजाच्छादनार्थम्। हे केतक! त्वं च[4] स्वयं स्फुटं पत्रैर्दलैः करपत्रमूर्तिभिः क्रकचसदृशैः वियोगिनो हृदेव दारु काष्ठं तत्र दारुण इवाऽऽचरसि[5] ॥ ८० ॥

धनुर्मधुस्विन्नकरोऽपि भीमजापरं परागैस्तव धूलिहस्तयन्।
प्रसूनधन्वा शरसात्करोति मामिति क्रुधाऽऽक्रुश्यत तेन केतकम् ॥ ८१ ॥

धनुर्मधुस्विन्नेति। तथा तव परागैर्धूलिहस्तं कुर्वन् प्रसूनधन्वा कामः मां भीमजापरं सन्तं शरसात्करोति बाणाधीनं कुरुते। किंभूतः? धनुषः पुष्पस्य मधुना स्विन्नकरोऽपि। यदा किल हस्तः स्विद्यति तदा धूल्या संमृज्यते। इत्थमनिन्द्यत[2] ॥ ८१ ॥

विदर्भसुभ्रूस्तनतुङ्गताप्तये घटानिवापश्यदलं तपस्यतः।
फलानि धूमस्य धयानधोमुखान् स दाडिमे दोहदधूपिनि द्रुमे ॥ ८२ ॥

विदर्भेति[1]। स नलः दाडिमे द्रुमे फलानि अपश्यत्। किंभूते? दोहदस्य धूपो विद्यते यत्र तस्मिंस्तथा। यदा धूपो दोहदे दीयते तदा दाडिमी फलति। उत्प्रेक्षते-घटानिव। किंभूतान्? अलं तपस्यतः। किमर्थम्? विदर्भसुभ्रूर्भैमी तस्याः स्तनयोस्तुङ्गताया आप्तये। किंभूतान्? धूमस्य धयान् धूमपान् तथा अधोमुखान्। तापसो ह्यधोमुखो[2] धूमपानेन तपः कुरुते। पाघ्राध्माधेट्दृशः[शः] (पा. III, i. 37) इति[3] शप्रत्ययः[4] ॥ ८२ ॥

वियोगिनीमैक्षत दाडिमीमसौ प्रियस्मृतेः स्पष्टमुदीतकण्टकाम्।
फलस्तनस्थानविदीर्णरागिहृद्विशच्छुकास्यस्मरकिंशुकाशुगाम् ॥ ८३ ॥

वियोगिनीमिति[1]। असौ वियोगिनीं दाडिमीम् ऐक्षत। विः पक्षी तेन युक्ताम्। उत्प्रेक्षते-अथ[2] च विरहिणीं स्पष्टं प्रियस्य स्मृतेः स्मरणात् उदीताः कण्टकाः यस्यां तां तथा। विरहिणी हि रोमाञ्चिता भवति, भर्तृस्मरणात्[3]। किंभूताम्? फलान्येव स्तनास्तेषां स्थाने विदीर्णं स्फुटितं रागयुक्तं यत् हृत् तत्र विशन्ति शुकानामास्यानि मुखान्येव स्मरस्य किंशुकाशुगाः[4] किंशुकपुष्पबाणा यस्याः सा तां तथा। दाडिमं

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

रक्तं स्फुटितं च शुकैर्भक्ष्यते[5]। वियोगिन्याश्च हृदयं कामबाणैर्विस्फोट्यते[6]। स्तनस्थानं[7] रागि च भवति[8] ।। ८३ ।।

स्मरार्द्धचन्द्रेषुनिभे क्रशीयसां स्फुटं पलाशेऽध्वजुषां पलाशनात् ।
स वृन्तमालोकत खण्डमन्वितं वियोगिहृत्खण्डिनि कालखण्डजम् ।। ८४ ।।

स्मरार्द्धचन्द्रेति[1]। स पलाशकुसुमे वृन्तं कालखण्डजं खण्डम् अन्वितं सम्बद्धम् आलोकत अमन्यत। किं भूते ? स्मरस्य अर्द्धचन्द्रनामा यः इषुस्तन्निभे। स्फुटमुत्प्रेक्षते। अध्वजुषां क्रशीयसाम् अतिकृशपान्थानां[2] पलस्य मांसस्य अशनात् भक्षणात् यकृत इव[3] लग्नम्। किं भूते[4] ? वियोगिनां हृदयस्य खण्डिनि। बाणे हि मांसं लगति[5] ।। ८४ ।।

नवा लता गन्धवहेन चुम्बिता करम्बिताङ्गी मकरन्दशीकरैः ।
दृशा नृपेण स्मितशोभिकुड्मला दरादराभ्यां दरकम्पिनी पपे ।। ८५ ।।

नवा लता[1] इति। गन्धवहेन वायुना चुम्बिता नवा लता वल्ली नृपेण दृशा पपे। किं भूता ? मकरन्दशीकरैः करम्बिताङ्गी मिश्रिताङ्गी तथा स्मितेन शोभिनः[2] कुड्मलाः यस्याः। उद्भिन्नमुकुलाः[3]। काभ्यां पपे ? दरेण भयेण विरहितत्वात्। तथा आदरेण च तस्यास्तदवस्थत्वात्[4]। किं भूता ? दरम् ईषत्कम्पो यस्याः सा तथा।[5] अथ च या किल नवा तरुणी केनापि गन्धवहेन परिमलयुक्तेन पुरुषेण चुम्ब्यते। सा स्वेदजलैर्मिश्रिता भवति। सस्मिता च भवति[6]। तामन्ये आदरेण भयेन च पश्यन्ति[7] ।। ८५ ।।

विचिन्वतीः पान्थपतङ्गहिंसनैरपुण्यकर्माण्यलिकज्जलच्छलात् ।
व्यलोकयच्चम्पककोरकावलीः स शम्बरारेर्बलिदीपिका इव ।। ८६ ।।

विचिन्वतीरिति[1]। स नलः चम्पकानां कोरकावलीः शम्बरारेः कामस्य बलेः पूजोपहारस्य दीपिका इव व्यलोकयत्। किं कुर्वती ? पान्था एव पतङ्गाः शलभास्तेषां हिंसनैरपुण्यकर्माणि पापानि विशेषेण[2] चिन्वतीः। कस्मात् ? अलय एव कज्जलानि तेषां छलात् व्याजात्। चम्पकानि दृष्ट्वा विरहिणो म्रियन्ते। शम्बरारिः किल मायावान्[3] तस्य दीपिका[4] प्रभृतिकं पूजोपहारं भवति[5] ।। ८६ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

अमन्यताऽसौ कुसुमेषु गर्भगं परागमन्धंकरणं वियोगिनाम् ।
स्मरेण मुक्तेषु पुरा पुरारये तदङ्गभस्मेव शरेषु सङ्गतम् ।। ८७ ।।

अमन्यतेति[1] । [असौ] नलः कुसुमेषु गर्भगं मध्यगतं[2] परागम् एवंविधम् अमन्यत । किं भूतम् ? वियोगिनाम् अन्धंकरणम् । आढ्य-सुभगस्थूलपलितनग्नान्धप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन् (पा. III. ii. 56) इति ख्युन्प्रत्ययः । उत्प्रेक्षते—पुरा पूर्वं पुरारये श्रीमहादेवाय [स्मरेण[3]] मुक्तेषु शरेषु[4] सङ्गतं तस्य महेश्वरस्य अङ्गसम्बन्धि भस्म इव[5] ।। ८७ ।।

पिकाद्वने शृण्वति भृङ्गहुङ्कृतैर्दशामुदञ्चत्करुणे वियोगिनाम् ।
अनास्थया सूनकरप्रसारिणीं ददर्श दूनः स्थलपद्मिनीं नलः ।। ८८ ।।

पिकाद्वने[इ]ति[1] । नलः[2] स्थलपद्मिनीं ददर्श । दूनः सन् । किं भूताम् ? अनास्थया अनित्यत्वेन सूनानि पुष्पाणि एव करास्तान् प्रसारयतीत्येवंशीलाम्[3] । क्व सति ? वने[4] कानने पिकात् कोकिलात् सकाशात् वियोगिनां दशां दुरवस्थां शृण्वति सति[5] । कैः ? भृङ्गाणां हुङ्कृतैः । किं भूते वने ? उदञ्चत्करुणो[6] जम्बीरो यत्र । यथा कस्माच्चित् कथकात्[7] कश्चिद्दूनः सन् दुष्कृताम्[8] अवस्थां शृणोति हुङ्कारं च ददाति । उत्पन्नदयश्च[9] भवति । ततश्च ईदृशोऽयं संसारोऽसार[10] इत्यनास्थया तस्य पुरः श्रोता हस्तं प्रसारयति[11] ।। ८८ ।।

रसालसालः समदृश्यताऽमुना स्फुरद्द्विरेफारवरोषहुङ्कृतिः ।
समीरलोलैर्मुकुलैर्वियोगिने जनाय दित्सन्निव तर्जनाभियम् ।। ८९ ।।

रसालसाल[1] इति । अमुना रसाल आम्रः[2] सालो वृक्षः समदृश्यत । किं भूतः ? स्फुरन्तो ये द्विरेफा[नामांरवा][3]स्त एव [रोषहुङ्कृतिः रोष]हुङ्कारो यस्य । उत्प्रेक्षते-समीरेण[4] लोलैर्मुकुलैः वियोगिने जनाय तर्जनया निर्भर्त्सनया[5] भियं दित्सन्निव[6] ।। ८९ ।।

दिने दिने त्वं तनुरेधि रेऽधिकं पुनः पुनर्मूर्च्छ च तापमृच्छ च ।
इतीव पान्थं शपतः पिकान् द्विजान् सखेदमैक्षिष्ट स लोहितेक्षणान् ।।९०।।

दिने दिने[1] इति । स पिकान् द्विजान् पक्षिणः सखेदम् ऐक्षिष्ट । किं भूतात् ? लोहितेक्षणान् । कोकिला हि स्वभावाद् रक्तेक्षणा[2]

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

भवन्ति। उत्प्रेक्षते-इतीव पान्थं पथिकं शपतः। इतीति[3] किम्? रे[4] पथिक! त्वं दिने दिने[5] तनुः कृश एधि भव। अधिकं [तथा] पुनः पुनः मूर्च्छ च। तथा तापमृच्छ[6] प्राप्नुहि च[7]। द्विजो ब्राह्मणो रोषरक्ताक्षः[8] कश्चित्[9] शपति[10] ॥ ९० ॥

अलिस्रजा कुड्मलमुच्चशेखरं निपीय चाम्पेयमधीरया धिया।
स धूमकेतुं विपदे वियोगिनामुदीतमातङ्कितवानशङ्कत ॥ ९१ ॥

अलिस्रजेति[1]। स नलः चाम्पेयं[2] चम्पकसम्बन्धि कुड्मलं निपीय धूमकेतुम् उदीतम् अशङ्कत। किमर्थमुदीतम्? वियोगिनां विपदे। किं भूतः? आतङ्कितवान् चकितः। कया निपीय? अधीरया कातरया धिया[3] बुद्ध्या। किं भूतं चाम्पेयम्? अलीनां स्रजा उच्चः शेखरो मुकुटो यत्र[4] तत्तथा। [धूमकेतुरपि तारकास्थाने पीतो भवति। पुच्छं कृष्णवर्णं च भवति][5] ॥ ९१ ॥

गलत्परागं भ्रमिभङ्गिभिः पतत्प्रसक्तभृङ्गावलि नागकेसरम्।
स मारनाराचनिघर्षणस्खलज्ज्वलत्कणं शाणमिव व्यलोकयत् ॥ ९२ ॥

[गलत्परागमिति[1]। स नलः नागकेसरं हेमपुष्पं शाणमिव व्यलोकयत्। किं भूतम्? गलत्परागं[2] यत्र तत्तथा]। भ्रमीणां भङ्गिभिर्विच्छित्तिभिः पूर्वं पतन्ती पुनरपि प्रसक्ता भृङ्गानाम् आवलिर्यत्र तत्तथा। किं भूतं शाणम्? मारस्य कामस्य (14a) नाराचनिघर्षणेन स्खलन्तः पतन्तः ज्वलन्तः कणाः स्फुलिङ्गा यस्मात्तथा। यदा[3] भ्रमरश्रेणिः पुष्पे लगति, तदा वायुवशाद्भ्रमन्तो नागकेसरात् यः परागः पतति स एव स्फुलिङ्गः, भ्रमरा एव नाराचाः, कृष्णवर्णत्वात्। शाणोऽपि यदा लोहं लगति[4] तदा ज्वलत्कणा उच्छलन्ति[5] ॥ ९२ ॥

तदङ्गमुद्दिश्य सुगन्धि पातुकाः शिलीमुखालीः कुसुमाद्गुणस्पृशः।
स्वचापदुर्निर्गतमार्गणभ्रमात् स्मरः स्वनन्तीरवलोक्य लज्जितः ॥ ९३ ॥

तदङ्गमुद्दिश्येति[1]। स्मरः कन्दर्पः शिलीमुखानां भ्रमराणाम् आलीः श्रेणीः स्वनन्तीरवलोक्य[2] लज्जितः। कस्मात्? स्वकीयात् चापात् दुष्टं यथा भवति एवं निर्गता ये मार्गणा बाणास्तेषां[3] भ्रमात् भ्रान्तिज्ञानात्[4]। किं विशिष्टा आलीः? कुसुमात् [पुष्पात्] तस्य नलस्याऽङ्गमुद्दिश्य पातुकाः पतनशीलाः। लषपतपदे (पा. III. ii.

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

154)त्यादिना उक्तम् । किं विशिष्टमङ्गम् ? सुगन्धि । किं विशिष्टात् कुसुमात् ? गुणं सौरभं स्पृशतीति[5] तस्मात्तथा । कामस्य शिलीमुखा बाणा अपि कुसुमात् धनुषः[6] सुगन्धि तदङ्गमुद्दिश्य पतन्ति । धनुरपि मौर्वीगुणं[7] स्पृशति । तेन दुर्योधनक्षिप्ता बाणाः शब्दं कुर्वन्ति[8] ।। ९३ ।।

मरुल्ललत्पल्लवकण्टकैः क्षतं समुच्चरच्चन्दनसारसौरभम् ।
स वारनारीकुचसंचितोपमं ददर्श मालूरफलं पचेलिमम् ।। ९४ ।।

मरुल्लदिति[1] । स नलः पचेलिमं पक्वं मालूरस्य बिल्वस्य[2] फलं ददर्श । कर्मकर्तरि केलिमर [उपसंख्यानम्] (वा. 647) । किं भूतम् ? मरुता वायुना ललन्तो विलसन्तो ये पल्लवास्तेषां कण्टकैः क्षतम् । विल्वे हि कण्टका भवन्ति । तथा समुच्चरत् उद्गच्छत् चन्दनवत् सारं[3] सौरभं यत्र तत्तथा । किं भूतम् ? वारनारीणां[4] कुचैः संचिता उपमा यस्य[5] तत्तथा । वाराङ्गनाकुचसदृशम् । तेऽपि विलसतां पल्लवानां विटानां[6] कण्टकैर्नखैः क्षता भवन्ति । तथा[7] चन्दनसुरभयः[8] ।। ९४ ।।

युवद्वयीचित्तनिमज्जनोचितप्रसूनशून्येतरगर्भगह्वरम् ।
स्मरेषुधीकृत्य धिया भियान्धया स पाटलायाः स्तबकं प्रकम्पितः ।। ९५ ।।

युवद्वयीति[1] । स नलः पाटलायाः स्तबकं भिया भयेनान्धया धिया बुद्धया स्मरस्य इषुधीकृत्य तूणं मत्त्वा प्रकम्पितः । [किं भूतम् ?] यूनोर्या द्वयी स्त्रीपुंसौ तयोश्चित्ते[2] वेध्ये[3] निमज्जनोचितानि यानि प्रसूनानि[4] तैः शून्येतरोऽशून्यो यो गर्भः मध्यं तेन गह्वरं गहनम् ।। ९५ ।।

मुनिद्रुमः कोरकितः सितद्युतिर्वनेऽमुनाऽमन्यत सिंहिकासुतः ।
तमिस्रपक्षत्रुटिकूटभक्षितं कलाकलापं किल वैधवं वमन् ।। ९६ ।।

मुनिद्रुम[1] इति । अमुना नलेन [वने] मुनिद्रुमः अगस्तिवृक्षः सिंहिकासुतो राहुरमन्यत । किं भूतः ? कोरकितः[2] कुड्मलीभूतः[3] सितद्युतिर्नीलवर्णः[5] । किल उत्प्रेक्षते-वैधवं विधुसम्बन्धिनं कलानां कलापं समूहं वमन्[6] । किं (14b) भूतम् ? तमिस्रपक्षे अन्धकारपक्षे या कला त्रुटिस्तस्याः कूटेन व्याजेन भक्षितम् । अथवा तमिस्रपक्षस्य त्रुटिः[7]

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

प्रान्तोऽमावास्या तस्यां कूटेन समूहेन सर्वात्मना भक्षितं कलाकलापं वमन्[8] ।। ६६ ।।

पुरो हठाक्षिप्ततुषारपाण्डुरच्छदा वृतेर्वीरुधि बद्धविभ्रमाः ।
मिलन्निमीलं ससृजुर्विलोकिता नभस्वतस्तं कुसुमेषु केलयः ।। ६७ ।।

पुरो[1] हठेति । नभस्वतो वायोः कुसुमेषु [विषये] केलयस्तं[2] मिलन्ती[3] निमीला यस्य तं तथाविधं ससृजुः[4] । विरहित्वात्[5] चक्षुर्मीलनम्[6] । किं भूताः ? विलोकिताः[7] । पुनः कथंभूताः ? पुरोऽग्रे हठेन आक्षिप्ताः तुषारवत् पाण्डु[राः] छदाः याभिः तास्तथा । तथा वृतेः कण्टकाद्यावरणस्य[8] वीरुधि वल्यां बद्धविभ्रमाः[9] । वृतौ आरुढासु[10] वीरुत्सु सविलासाः छदावृतेरिति[11] वायुविशेषणं वा । आक्षिप्ता छदा एव आवृतिरावरणं वस्त्रं येन[12] । अथ च कुसुमेषोः कामस्य क्रीडा ।। ६७ ।।

गता यदुत्सङ्गतले विशालतां द्रुमाः शिरोभिः फलगौरवेण ताम् ।
कथं न धात्रीमतिमात्रनामितैः स वन्दमानानभिनन्दति स्म तान् ।। ६८ ।।

गता[1] यदिति । स नलः तान् द्रुमान्[2] फलगौरवेण अतिमात्रं नामितैः शिरोभिः शिखरैः[3] तां धात्रीं पृथ्वीं[4] वन्दमानान् कथं [न] अभिनन्दति स्म । यस्या उत्सङ्गतले विशालतां गता वृक्षाः । वेः शालच्छङ्कटचौ (पा. V. ii. 28) इति शालच् । अथ च धात्री [उप-] माता[5] तां सर्वोऽपि नामितैर्मस्तकैर्वन्दते[6] । तदुत्सङ्गे च[7] वर्द्धते[8] ।।६८ ।।

नृपाय तस्मै हिमितं वनानिलैः सुधीकृतं पुष्परसैरहर्महः ।
विनिर्मितं केतकरेणुभिः सितं वियोगिनेऽदत्त न कौमुदीमुदः ।। ६९ ।।

नृपाय[1] तस्मै इति । अह्नो दिनस्य महस्तेजः तदेव कौमुदी इति रूपकम् । तस्मै मुदो न अदत्त । केचिदेवं व्याचक्षते ।।

तस्मै नृपाय कौमुदीसम्बन्धिनो मुदः हर्षात् [न] अदत्त । किं भूतम् ? वनानिलैः[हिमितं[2]] हिमरूपकृतं, तथा पुष्पाणां रसैर्मकरन्दैः सुधारूपं कृतमपि । केतकानां रेणुभिः सितं शुभ्रं विनिर्मितमपि । कौमुद्यपि श्वेताऽमृता[3] शीता च भवति । किं भूताय ? वियोगिने । विरहित्वात् दिवसतेजः कौमुदी तस्य हर्षं न चकार[4] ।। ६९ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

अयोगभाजोऽपि नृपस्य पश्यता तदेव साक्षादमृतांशुमाननम् ।
पिकेन रोषारुणचक्षुषा मुहुः कुहूरुताहूयत चन्द्रवैरिणी ।। १०० ।।

अयोगभाज[1] इति । पिकेन कोकिलेन रोषारुण चक्षुषा सता उत इत्युत्प्रेक्ष[ते][2]-कुहूः अमावास्या मुहुः[3] आहूयत[4] । यतः[5] चन्द्रस्य वैरिणी । किं कुर्वता ? नृपस्य नलस्य[6] अयोगभाजोऽपि विरहिणोऽपि तदेवाऽऽननं साक्षात् अमृतांशुं चन्द्रं[7] पश्यता[8] । पिको[9] हि ध्वनिना वियोगिनं म्लानं[10] कुरुते । स्वभावादारक्ताक्षश्च[11] कुहूशब्दं च विधत्ते[12] । नल-मुखम् अम्लानं वीक्ष्य[13] कोप[14] इव चटितः । चन्द्रोऽपि क्रुद्धो[15] (15a) न दृश्यते[16] ।। १०० ।।

अशोकमर्थान्वितनामताशयागतांशरण्यं गृहशोचिनोऽध्वगान् ।
अमन्यतावन्तमिवैष पल्लवैः प्रतीष्टकामज्वलदस्त्रजालकम् ।। १०१ ।।

अशोकमिति[1] । एष नलो गृहशोचिनोऽध्वगान् पान्थान्[2] अवन्तं रक्षन्तमिव अमन्यत[3] अशोकम् । किं भूतान् ? गृहाभावेऽशोकं गतान् । यतः शरण्यं शरणहितम्[4] । कया ? अर्थान्वितं सार्थकं नाम यस्य तस्य भावस्तत्ता तस्या आशया । न विद्यते शोको यत्र स अशोकः तत्र गता-नामस्माकं गृहशोको नास्ति । किं भूतम् ? पल्लवैः प्रतीष्टानि पतदा-धृतानि कामस्य ज्वलन्ति अस्त्राणां जालकानि येन तं तथा । पल्लवाः किल रक्ता भवन्ति[5] ।। १०१ ।।

विलासवापीतटवीचिवादनात् पिकालिगीतेः शिखिलास्यलाघवात् ।
वनेऽपि तौर्यत्रिकमारराध तं क्व भोगमाप्नोति न भाग्यभाग्जनः ।।१०२।।

विलासवापीति[1] । तौर्यत्रिकं गीतवाद्यनृत्यादि[2] कर्तृ वनेऽपि तं नलम् आरराध । कस्मात् ? विलासवापीनां तटेषु वीचीनां वादनात् । इति वाद्यम् । तथा पिकानाम् अलीनां[3] च गीतेः सकाशात् । इति गीतम् । तथा शिखिनां मयूराणां लास्यस्य नृत्यस्य लाघवात् । इति नृत्यम् । युक्तं चैतत् । यतः भाग्यभाग्जनः क्व भोगं न आप्नोति[4] ।। १०२ ।।

तदर्थमध्याप्य जनेन तद्वने शुका विमुक्ताः पटवस्तमस्तुवन् ।
स्वरामृतेनोपजगुश्च सारिकास्तथैव तत्पौरुषगायनीकृताः[1] ।। १०३ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

तदर्थमिति[2]। जनेन तस्य नलस्याऽर्थेऽध्याप्य तस्य वने विमुक्ताः पटवः शुकाः तं नलम् अस्तुवन्। तथैव सारिकाश्च तं स्वरामृतेन उपजगुश्च। किं भूताः[3]? तस्य नलस्य पौरुषस्य गायनीकृताः[4] ।। १०३ ।।

इतीष्टगन्धाढ्यमटन्नसौ वनं पिकोपगीतोऽपि शुकस्तुतोऽपि ।
अविन्दतामोदभरं बहिश्चरं विदर्भसुभ्रूविरहेण नान्तरम् ।। १०४ ।।

इतीष्टगन्धेति[1]। असौ नलः इतीष्टगन्धेन[2] आढ्यं समृद्धं[3] वनम् अटन् सन् पिकैरुपगीतोऽपि शुकैः स्तुतोऽपि च बहिश्चरम्[4] आमोदभरं परिमलम् अविन्दत। परम्[5] आन्तरं मानसम् आमोदभरं हर्षं[6] न अविन्दत। केन[7]? विदर्भसूभ्रूविरहेण[8] ।। १०४ ।।

करेण मीनं निजकेतनं दधद् द्रुमालवालाम्बु निवेशशङ्कया ।
व्यतर्कि सर्वर्तु घने वने[1] मधुं स मित्रमत्रानुसरन्निव स्मरः ।। १०५ ।।

करेण[2] मीनमिति। लोकैः स नलः अत्र वने स्मर इव व्यतर्कि। किं कुर्वन्? मधुं वसन्तं मित्रम् अनुसरन्। किं भूते? सर्वैर्ऋतुभिर्घने[3]। किं कुर्वन्? करेण मीनं निजकेतनं ध्वजं दधत्। कया? द्रुमाणाम् आलवालेषु यद् अम्बु[4] तत्र[5] निवेशः प्रवेशः तस्य[6] शङ्कया। हस्ते किल रेखारूपो मीनोऽस्ति[7]। नलस्य राजलक्षणम्[8] ।। १०५ ।।

लताबलालास्यकलागुरुस्तरुप्रसूनगन्धोत्करपश्यतोहरः ।
असेवतामुं मधुगन्धवारिणि प्रणीतलीलाप्लवनो वनानिलः ।। १०६ ।।

लताबलेति[1]। वनानिलः अमुं नलम् असेवत[2]। किं भूतः? लता एव अबलास्तासां लास्यकला नृत्यकला तत्र गुरुः। एतेन मन्दत्वम्। तथा तरूणां प्रसूनानि पुष्पाणि तेषां गन्धोत्करस्य पश्यतोहरश्चौरः। एतेन सुरभिः। तथा मधु मकरन्द एव गन्धवारि तत्र प्रणीतं[3] लीलाप्लवनं स्नानं येन स तथा। एतेन शीतः[4] ।। १०६ ।।

अथ स्वमादाय भयेन मन्थनाच्चिरत्नरत्नाधिकमुच्चितं चिरात् ।
निलीय तस्मिन्निवसन्नपांपतिर्वने तडागो ददृशेऽवनीभुजा ।। १०७ ।।

अथ[1] स्वमिति। अथ अवनीभुजा तस्मिन् वने निलीय अन्तर्द्धानं कृत्वा नि(15b)वसन्। इव सन् इति द्वे वा पदे। तडाग एवाऽपांपतिः समुद्रो ददृशे। केन? मन्थनात्[2] भयेन। किं कृत्वा वसन्? चिरत्नानि

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

जीर्णानि यानि रत्नानि[3] तेभ्योऽधिकं चिराद् उच्चितं [संचितं]स्वं द्रव्यं रत्नजातम्[4] आदाय । यस्य किलाधिकं[5] द्रव्यं भवति[6] स भयेन तद्गृहीत्वा-ऽन्तर्द्धाय क्वाऽपि निर्भयप्रदेशे वसति[7] ।। १०७ ।।

पयोनिलीनाभ्रमुकामुकावलीरदाननन्तोरगपुच्छसच्छवीन् ।
जलार्द्धरुद्धस्य तटान्तभूभिदो मृणालजालस्य मिषाद्बभार यः ।। १०८ ।।

पयोनिलीनेति[1] । यस्तडाग एव पयोधिः पयसि निलीना येऽभ्रमु-कामुका ऐरावणास्तेषां या आवली श्रेणिस्तस्या रदान् दन्तान्[2] बभार । कस्मात् ? मृणालर्जालस्य मिषात् । किं भूतस्य ? जले[3] अर्द्धे[4] रुद्धस्य । तथा तटान्तस्य भुवं भिनन्तीति[5] तस्य तथा । किं भूतान् रदान् ? अनन्तोरगस्य पुच्छं[6] तस्य सच्छवीन्[7] श्वेतान् । मृणालं न[8] भवति, किन्तु एते ऐरावणानां बहूनां किमु[9] दन्ताः । तेऽपि तटा[न्त-] भुवं भिन्दन्ति[10] ।। १०८ ।।

तटान्तविश्रान्ततुरङ्गमच्छटास्फुटानुबिम्बोदयचुम्बनेन यः ।
बभौ चलद्वीचिकशान्तशातनैः सहस्रमुच्चैःश्रवसामिव श्रयन् ।। १०९ ।।

तटान्तेति[1] । यस्तडागोदधिस्तटान्ते विश्रान्ता बद्धा ये तुरङ्गमा-स्तेषां छटा[2] श्रेणिस्तस्याः स्फुटेन[3] अनुबिम्बोदयस्य चुम्बनेन उच्चैःश्रवसां सहस्रं श्रयन्निव बभौ । किं भूतम् ? वीचय एव कशान्तः तटप्रान्तः[4] तस्य शातनैः प्रहारैः [चलत् चं] चलम्[5] । नलस्य[6] तुरगप्रतिबिम्बैः उच्चैः श्रवसो बहवः[7] सन्तीव[8] ।। १०९ ।।

सिताम्बुजानां निवहस्य यच्छलाद् बभावलिश्यामलितोदरश्रियाम् ।
तमःसमच्छायकलङ्कसंकुलं कुलं सुधांशोर्बहुलं वहन् बहु ।। ११० ।।

सिताम्बुजानामिति[1] । यस्तडागः[2] समुद्रो बभौ । सिताम्बुजानां [कुमुदानां[3]] निवहस्य छलात् सुधांशोश्चन्द्रस्य बहुलं घनं बहु कुलं[4] वहन्निव । किं भूतानाम् ? अलिभिः श्यामलिता उदरस्य मध्यस्य श्रीर्येषां तेषां[5] तथा । किं भूतं कुलम् ? तमसा समच्छायो यः कलङ्क-स्तेन संकुलम् । भ्रमरा एव कलङ्काः । समुद्रे हि एक ऐरावणः, एक[6] उच्चैःश्रवा, एकश्चन्द्रः । अत्र बहवः[7] ।। ११० ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

रथाङ्गभाजा कमलानुषङ्गिणा शिलीमुखस्तोमसखेन शार्ङ्गिणा ।
सरोजिनीस्तम्बकदम्बकैतवान्मृणालशेषाहिभुवान्वयायि यः ।। १११ ।।

रथाङ्गभाजेति[1] । यस्तडाग एवाम्भोधिः[2] सरोजिन्याः यः स्तम्बस्तस्य कदम्बः समूहस्तस्य कैतवात् शार्ङ्गिणा श्रीवासुदेवेनाऽन्वयायि अनुगतः । तदपि श्यामं श्रीकृष्णोऽपि श्यामः । किं भूतम्[3] ? रथाङ्गं चक्रवाकं भजते[4], देवोऽपि चक्रमायुधं[5], तथा कमलानामनुषङ्गो विद्यते यत्र तेन[6] तथा । पक्षे, कमलाया लक्ष्म्याः । शिलीमुखानां भ्रमराणां स्तोमः समूहस्तत्सखेन । पक्षे, बाणानाम्[7] । किं भूते[न] ? मृणालान्येव धवलत्वात् शेषाहिस्तद्भुवा[8] तदुत्पन्नेन । पक्षे[9], शेषाहि[खे]भूः शयनस्थानं यस्य[10] ।। १११ ।।

तरङ्गिणीरङ्कजुषः स्ववल्लभास्तरङ्गलेखा बिभरांबभूव यः ।
दरोद्गतैः कोकनदौघकोरकैर्धृतप्रवालाङ्कुरसंचयश्च यः ।। ११२ ।।

तरङ्गिणीरिति[1] । यः[2] समुद्रस्तरङ्गलेखा एव तरङ्गिणीर्नदीर्बिभरांबभू(16a)व । किं भूताः ? स्वस्य वल्लभाः प्रियाः[3] । अतश्च[4] अङ्कजुषः । किं च यश्च[5] तडागाम्बुधिर्दर[6] ईषदुद्गतैः कोकनदानां[7] रक्तोत्पलौघानां कोरकैर्धृताः प्रवालाङ्कुरमणीनां संचया येन स तथा[8] ।। ११२ ।।

महीयसः पङ्कजमण्डलस्य यश्छलेन गौरस्य च मेचकस्य च ।
नलेन मेने सलिले निलीनयोस्त्विषं विमुञ्चन्विधुकालकूटयोः ।। ११३ ।।

महीयस[1] इति । यस्तडागः नलेन सलिले निलीनयोः अन्तर्हितयोः विधुश्चन्द्रः कालकूटं च तयोस्त्विषं कान्ति विमुञ्चन्निव मेने । केन ? महीयसो महतो गौरस्य धवलस्य[च][2] पङ्कजमण्डलस्य कमलौघस्य छलेन । तथा मेचकस्य कृष्णस्य पङ्कजमण्डलस्य नीलोत्पलौघस्य[2] च व्याजेन । एकं विधुरपरं कालकूटम्[3] ।। ११३ ।।

चलीकृता यत्र तरङ्गरिङ्गणैरबालशैवाललतापरम्पराः ।
ध्रुवं दधुर्वाडवहव्यवाडवस्थितिप्ररोहत्तमधूमभूमताम् ।। ११४ ।।

चलीकृता[1] इति । यत्राऽम्बुधौ अबालाः[2] कठिना याः शैवाललतास्तासां[3] परम्परा[4] ध्रुवं वाडवहव्यवाड् वडवानलस्तस्याऽ[व]स्थितया

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

प्ररोहत्तमो धूमभूमा[5] यासु तास्तथोक्ताः, तासां भावः प्ररोहत्तमधूमभूमतां दधुः। शैवाल एव धूमः। यत्र धूमस्तत्र वह्निरित्यनुमानम्। किं भूताः? तरङ्गाणां रिङ्गणैश्चालनैः चलीकृताः शैवाललताः[6] ।।११४।।

प्रकाममादित्यमवाप्य कण्टकैः करम्बितामोदभरं विवृण्वती।
धृतस्फुटश्रीगृहविग्रहा दिवा सरोजिनी यत्प्रभवाऽप्सरायिता ।। ११५ ।।

प्रकाममिति[1]। यस्मात्तडागाब्धेः प्रभवा सरोजिनी अप्सरायिता अप्सरस[2] इवाचरिता। दिवा दिवसे धृतं स्फुटं श्रीगृहं कमलं तस्य विग्रहः[3] शरीरं यया[4] सा तथा। किं भूता[5]? प्रकामम् आदित्यम् अवाप्य[6] आमोदभरं विवृण्वती। किं भूता? कण्टकै करम्बिता[7]। अप्सरसोऽपि प्रकामं सकामम् आदित्यं देवम् अवाप्य कण्टकैः रोमाञ्चैः करम्बिताः[7]। तथा[8] दिवा स्वर्गेण धृतः स्फुटः[9] श्रीगृहं[10] शोभागृहं[11] विग्रहो देहो[12] यासाम्[13] ।। ११५ ।।

यदम्बुपूरप्रतिबिम्बितायतिर्मरुत्तरङ्गैस्तरलस्तटद्रुमः।
निमज्ज्य मैनाकमहीभृतः सतस्ततान पक्षान् ध्रुवतः सपक्षताम् ।।११६।।

यदम्बुपूरेति[1]। तटद्रुमः[2] मैनाकमहीभृतः सपक्षतां सादृश्यं ततान। किं भूतः[3]? यस्य तडागस्य अम्बुपूरे प्रतिबिम्बिता आयतिर्यस्य स तथा। किं भूतः?। मरुतां तरङ्गैस्तरलश्चञ्चलः। किं भूतस्य मैनाकमहीभृतः पक्षान् धुवतः। तथा निमज्ज्य सतः विद्यमानस्य। द्रुमे एव प्रतिबिम्बितो मैनाक इव यत्र[4] ।। ११६ ।।

पयोधिलक्ष्मीमुषि केलिपल्वले रिरंसुहंसीकलनादसादरम्।
स तत्र चित्रं विचरन्तमन्तिके हिरण्मयं हंसमबोधि नैषधः ।। ११७ ।।

पयोधिलक्ष्मीति[1]। स नैषधः तत्र[2] केलिपल्वले हिरण्मयं हंसमबोधि[3] दृष्टवान्। किं भूते? पयोधेः लक्ष्मीं मुष्णाति[4] यः तस्मिन् तथा। किं भूतम्? अन्तिके विचरन्तम्[5]। तथा चित्रम् आश्चर्यकरम्।[6] तथा रिरं(16b)सुः रन्तुमिच्छन्ती या हंसी तस्याः कले मधुरे नादे सादरं साभिलाषम्। यथा कश्चित् योगी दुरवगाहत्वात् समुद्रप्राये पल्वले [शरीरे][8] हंसं[9] परमात्मानं बुध्यति पश्यति। तमपि अन्तिके

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

चित्रं विचरन्तं हिरण्मयं, तेजोमयत्वात् । तदुक्तं—सर्वं एव सुवर्णं इति । अथवा नानावर्णधारित्वात् कदाचित्[10] हिरण्यवर्णं[11] कदाचित् रक्तशुक्लादि: । कथं भूतम् ? रिरंसुर्हंसी[12] शक्ति: तस्या: कलनादे सादरम् । यदुक्तं—शान्ता शक्तिस्तदा नादं सृजत्यभ्यागतेन्दुना इति । श्लेष: । दीपजने (पा. III. i. 61) त्यादिना चिण्[13] ।। ११७ ।।

प्रियासु बालासु रतक्षमासु च द्विपत्रितं पल्लवितं च बिभ्रतम् ।
स्मरार्जितं रागमहीरुहाङ्कुरं मिषेण चञ्च्वोश्चरणद्वयस्य च ।। ११८ ।।

प्रियास्विति[1] । स हंसम् अबुद्ध । किं भूतम् ? चञ्च्वोर्मिषेण तथा चरणद्वयस्य च[2] मिषेण स्मरेण अर्जितं रागोऽनुराग[3] एव महीरुहस्तस्याङ्कुरं बिभ्रतम्[4] । किं भूतं रागाङ्कुरम् ? बालासु प्रियासु हंसीषु चञ्चुपुटद्वयमिषात् द्विपत्रितम् । तथा चरणद्वयाङ्गुलिमिषात् रतक्षमासु प्रियासु पल्लवितं च[5] ।। ११८ ।।

महीमहेन्द्रस्तमवेक्ष्य स क्षणं शकुन्तमेकान्तमनोविनोदिनम् ।
प्रियावियोगाद्विधुरोऽपि निर्भरं कुतूहलाक्रान्तमना मनागभूत् ।। ११९ ।।

महीमहेन्द्र[1] इति । स महीमहेन्द्रस्तं शकुन्तं पक्षिणम् एकान्तं नियमेन मनसो विनोदिनमवेक्ष्य कुतूहलाक्रान्तमना मनागभूत्[2] । किं भूत: ? निर्भरमत्यन्तं प्रियावियोगाद् विधुरोऽपि[3] ।। ११९ ।।

अवश्यभव्येष्वनवग्रहग्रहा यया दिशा धावति वेधस: स्पृहा ।
तृणेन वात्येव तयाऽनुगम्यते जनस्य चित्तेन भृशावशात्मना ।। १२० ।।

अवश्येति[1] । अवश्यभव्येषु पदार्थेषु विषये यया दिशा वेधसो ब्रह्मण: स्पृहा धावति । किं भूता ? अवग्रहीतुमशक्यो ग्रहो निर्बन्धो यस्या:-साऽनवग्रहग्रहा । जनस्य[2] चित्तेन तया दिशा सा स्पृहा अनुगम्यते । भृशमवशात्मना परतन्त्रेण । यथा यया दिशा वात्या वातमण्डली धावति तया दिशा अवशात्मना तृणेन[3] अनुगम्यते । दमयन्तीनलयो: संयोजनाय धातुरिच्छास्ति । ततश्च हेमहंसदर्शनं, तत्र च[4] तस्य निद्रा, ततश्च नलेन धृतस्य हंसस्य वाक्याद्दमयन्तीलाभ: । अतो हंसचित्तं निद्रया वेधस: स्पृहामनुजगामेत्यर्थ:[5] ।। १२० ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

अथाऽवलम्ब्य क्षणमेकपादिकां तदा निदद्रावुपपल्वलं खगः ।
स तिर्यगावर्जितकन्धरः शिरः पिधाय पक्षेण रतिक्लमालसः ।। १२१ ।।

अथाऽव[1]लम्ब्येति । अथ स खगो हंसस्तदा उपपल्वलं सरसः[2] समीपे एकपादिकामवलम्ब्य एकेन पादेन जातिस्वभावात् स्थित्वा निदद्रौ । किंभूतः ? । तिर्यगावर्जिता नम्रिता कन्धरा येन स तथा । किंकृत्वा ?। शिरो मस्तकं पक्षेण पिधाय । तथा रतक्ल[3]मेन अलसो मन्दः[4] ।। १२१ ।।

सनालमात्माननिर्जितप्रभं ह्रिया नतं काञ्चनमम्बुजन्म किम् ।
अबुद्ध तं विद्रुमदण्डमण्डितं स पीतमम्भः प्रभुचामरं नु किम् ।। १२२ ।।

सनालमिति[1] । स नलस्तं हंसम् इति अबुद्ध । यत् इदं किं सनालं नालयुक्तं काञ्चनम् अम्बुजन्म कमलम् । किं भूतम् ? आत्मन आननेन निर्जिता प्रभा यस्य तत्तथा । अत एव ह्रिया नतम् । एकचरण एव नालः । शिरसः पक्षाच्छादित्वात् नतत्वम्[2] । अथवा किम् इदं पीतवर्णम् अम्भःप्रभोर्वरुणस्य चामरं च इति अबुद्ध । किंभूतं चामरम् ? विद्रुमस्य प्रवालस्य दण्डेन मण्डितम् । चरण[3] रक्तत्वात् ।। १२२ ।।

कृतावरोहस्य हयादुपानहौ ततः पदे रेजतुरस्य बिभ्रती ।
तयोः प्रवालैर्वनयोस्तथाम्बुजैर्नियोद्धुकामे किमु बद्धवर्मणी ।। १२३ ।।

कृतावरोहस्येति[1] । अस्य नलस्य हयात् कृतावरोहस्य अवतीर्णस्य उपानहौ बिभ्रती [सती] पदे चरणौ रेजतुः[2] । ततोऽनन्तरम् । उत्प्रेक्षते—तयोर्द्वयोरपि वनयोः काननस्य जलस्य च उभयोरपि प्रवालैः पल्लवैः सह तथा[3] अम्बुजैश्च सह नियोद्धुकामे सती, एते पदे बद्धवर्मणी इव[4] । एकस्य वनस्य प्रवालैः[5], अपरस्य कमलैः सह । [6]पदयोश्च[7] एतदुभयमुपमानम्[8] ।। १२३ ।।

विधाय मूर्तिं कपटेन वामनीं स्वयं बलिध्वंसिविडम्बिनीमयम् ।
उपेतपार्श्वश्चरणेन मौनिना नृपः पतङ्गं तमधत्त पाणिना ।। १२४ ।।

विधाय[1]मूर्तिमिति । सोऽयं नृपः कपटेन वामनीं कुब्जां मूर्तिं विधाय स्वयं तं पतङ्गं हंसं पाणिना अधत्त । किंभूताम् ? बलेर्दानवेन्द्रस्य विध्वंसी श्रीत्रिविक्रमस्तस्य विडम्बिनीमनुकारिणीम् । अथ च बलिनां

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

ध्वंसिनो ये पुरुषास्तदनुकारिणीम् । किंभूतः ? मौनिना मौनयुक्तेन चरणेन गमनेन[2] शनैः शनैरुपेतं प्राप्तं पार्श्वं समीपं येन स तथा । श्रीत्रिविक्रमोऽपि[3] पतङ्गं श्रीसूर्यं पाणिना दधौ । चरणेन पादेन विष्णुक्रमेण आकाशे मौनिना निःशब्देन समीपगः कपटेन श्रीवामनमूर्तिं विधाय [3]बले विध्वंसकारिणीम् । त्रिविक्रमस्य भूर्भुवःस्वर्लोकत्रय[5]—व्यापकत्वात्[6] ।। १२४ ।।

तदात्तमात्मानमवेत्य संभ्रमात् पुनः पुनः प्रायसदुत्प्लवाय सः ।
गतो विरुत्योड्डयने निराशतां करौ निरोद्धुर्दशति स्म केवलम् ।। १२५ ।।

तदात्तमिति[1] । स हंसः प्रथमं तेन नलेन आत्तं गृहीतम् आत्मानमवेत्य (17b) मत्वा संभ्रमात् आदरात् उत्प्लवाय उड्डयनाय पुनः पुनः प्रायसत् प्रयासं चक्रे । तदनु केवलं[2] निरोद्धुर्नलस्य करौ दशति स्म । किंभूतः ? विरुत्य आक्रन्दं कृत्वा उड्डयने निराशतां गतः[3] ।। १२५ ।।

ससम्भ्रमोत्पातिपतत्कुलाकुलं सरः प्रपद्योत्कतयानुकम्प्रताम् ।
तमूर्मिलोलैः पतगग्रहान्नृपं न्यवारयद्वारिरुहैः करैरिव ।। १२६ ।।

ससम्भ्रमेति[1] । तत्सरः कर्तृ तं नृपं[2] पतगस्य हंसस्य ग्रहात् न्यवारयत् । कैः ? ऊर्मिभिर्लोलैः वारिरुहैः । उत्प्रेक्षते—करैरिव[3] । किं कृत्वा ? उद्गतं कं पानीयं यस्य तद् उत्कम् । उत्कस्य भाव उत्कता, तया अनुकम्प्रतां संकम्पत्वं प्रपद्य[4] । किं भूतम् ? ससम्भ्रमं यथा भवति एवम्[5] उत्पाति उत्पतनशीलं यत् पततां पक्षिणां कुलं तेनाकुलम् । अथ उत्कतया उत्कण्ठितत्वेन[6] अनुकम्प्रतां दयालुत्वं प्राप्य, ससम्भ्रमं कोलाहलपूर्वं[7] चलैः[8] करैरकृत्यकारी निषिध्यते[9] । अत्रोपमासमासोक्ती । ।। १२६ ।।

पतत्रिणा तद्रुचिरेण वञ्चितं श्रियः प्रयान्त्याः प्रविहाय पल्वलम् ।
चलत्पदाम्भोरुहनूपुरोपमा चुकूज कूले कलहंसमण्डली ।। १२७ ।।

पतत्रिणेति[1] । कूले तटे कलहंसानां[2] मण्डली चुकूज । किंभूता ? [त] त् पल्वलं प्रविहाय[3] प्रयान्त्याः श्रियो लक्ष्म्याः चलतः पदाम्भोरुहस्य यन्नूपुरं तस्य उपमा यस्याः सा तथा । उत्प्रेक्षते[4]-लक्ष्म्या नूपुरध्वनिरिव । कथं लक्ष्मीः सरस्त्यजतीत्याह[5]-किंभूतं सरः ? रुचि(18a)रेण पतत्रिणा वञ्चितं रहितम् । अत्रा[6]ऽनुप्रास[7] उपमा समासोक्तिश्च ।। १२७ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

न वासयोग्या वसुधेयमीदृशस्त्वमङ्ग यस्याः पतिरुज्झितस्थितिः ।
इति प्रहाय क्षितिमाश्रिता नभः खगास्तमाचुक्रुशुरारवैः खलु ।। १२८ ।।

न वासयोग्येति[1] । खलु इति मन्ये । खगाः जल[2]पक्षिणः आरवैस्तं नलम् आचुक्रुशुरिव ।[3] किंभूताः ? इति कारणात् क्षितिं प्रहाय नभ आश्रिताः । जातिस्वभावात् । इतीति[4] किम् ? अङ्ग इति सम्बोधने । इयं वसुधा न वासयोग्या यस्याः त्वमीदृशः उज्झिता स्थिति[5]-मर्यादा येन [स] तथाविधः पतिः पालयिता ।[6] उत्प्रेक्षालङ्कारः ।। १२८ ।।

न जातरूपच्छदजातरूपता द्विजस्य दृष्टेयमिति स्तुवन्मुहुः[1] ।
अवादि तेनाथ स मानसौकसा जनाधिनाथः करपञ्जरस्पृशा ।। १२९ ।।

न जातरूपेति[2] । अथ तेन[3] मानसौकसा हंसेन स जनाधिनाथः[4] अवादि । किंभूतेन ? करपञ्जरं[5] स्पृशतीति तेन तथा । किं कुर्वन् ? इति मुहुः स्तुवन् । इतीति[6] किम् ? द्विजस्य पक्षिणो जातरूपस्य सुवर्णस्य छदैः पक्षैः जातं रूपं यस्य स तथा तस्य भावस्तत्ता । इयं क्वापि न दृष्टा[7] ।। १२९ ।।

धिगस्तु तृष्णातरलं भवन्मनः समीक्ष्य पक्षान्मम हेमजन्मनः ।
तवार्णवस्येव तुषारशीकरैर्भवेदमीभिः कमलोदयः कियान् ।। १३० ।।

धिगस्तु[1] इति । हे राजन् । भवतो मनः मम हेमजन्मनः पक्षान् समीक्ष्य तृष्णातरलं धिगस्तु निन्द्यमस्तु । यतस्तवाऽमीभिः सौवर्णपक्षैः कियान् कमलाया उदयो भवेत् । यथार्णवस्य तुषारस्य[2] नीहारस्य शीकरैर्बिन्दुभिः[3] कियान्[4] कमलस्य पानीयस्य[5] उदयो [6]वृद्धिर्भवेत्[7] । अपि[8] तु न कोऽपीत्यर्थः ।[9] उपमालङ्कारः ।। १३० ।।

न केवलं प्राणिवधो वधो मम त्वदीक्षणाद्विश्वसितान्तरात्मनः ।
विगर्हितं धर्मधनैर्निबर्हणं विशिष्य विश्वासजुषां द्विषामपि ।। १३१ ।।

न[1] केवलमिति । हे नल ! मम[2] वधः [न] केवलं प्राणिमात्रवधः, किन्तु विश्वस्तवधः । किं[3] भूतस्य ? त्वदीक्षणात् विश्वसितः अन्तरात्मा यस्य तस्य[4] तथा । यतो धर्मधनैः स्मृतिकारैर्विश्वासजुषां द्विषामपि शत्रूणामपि निबर्हणं[5] हिंसनं विशिष्य विशेषेण[6] विगर्हितं निन्दितम् । गुरुप्रायश्चित्तप्रतिपादनात्[7] । अत्र विदग्धानुप्रासः । काव्यलिङ्गमलङ्कारः ।। १३१ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

पदे पदे सन्ति भटा रणोद्भटा न तेषु हिंसारस एष पूर्यते ।
धिगीदृशं ते नृपते ! कुविक्रमं कृपाश्रये यः कृपणे पतत्रिणि ।। १३२ ।।

पदे[1] पदे इति । रणेषु उद्भटा उत्कटा भ(18b)टा योधाः पदे पदे स्थाने स्थाने सन्ति तेषु विषये[3] एष हिंसारसो न पूर्यते ? हे नृपते ! ते तव ईदृशं कुविक्रमं धिक्, यः कृपाया दयाया आश्रये कृपणे दीने पतत्रिणि[4] विक्रमः[5] ।। १३२ ।।

फलेन मूलेन च वारिभूरुहां मुनेरिवेत्थं मम यस्य वृत्तयः ।
त्वयाद्य तस्मिन्नपि दण्डधारिणा कथं न पत्या धरणी हृणीयते ।। १३३ ।।

फलेनेति[1] । यस्य मम मुनेरिव वारिभूरुहां कमलिनीप्रभृतीनां फलेन मूलेन च[2] इत्थं ईदृक्प्रकारेण वृत्तयः जीविकाः तस्मिन्नपि मयि दण्डधारिणा हिंसापरेण त्वया पत्या [अद्य[3]] धरणी[4] पृथ्वी कथं न हृणीयते, न लज्जते, आत्मानं न[5] जुगुप्सते[6] ।। १३३ ।।

इतीदृशैस्तं विरचय्य वाङ्मयैः सचित्रवैलक्ष्यकृपं नृपं खगः ।
दयासमुद्रे स तदाशयेऽतिथीचकार कारुण्यरसापगा गिरः ।। १३४ ।।

इतीदृशैरिति[1] । स खगो हंसः दयासमुद्रे तस्य नलस्याऽऽशये हृदये गिरो वाणीः अतिथीचकार[2] । किंभूताः ? कारुण्यरसस्य आपगा नदीः । किं कृत्वा ? तं नृपं सह चित्रेणाश्चर्येण वैलक्ष्येण कृपया[3] च वर्त्तते यस्तथाविधं विरचय्य । कैः ? इति प्रकारेण ईदृशैः पूर्वोक्तैर्वाङ्-मयैर्वाग्विलासैः । मनुष्यवाक्त्वात् चित्रम् । निन्दितत्वात् । दैन्योक्तेश्च कृपा । आपगाश्च समुद्रस्याऽतिथीभवन्ति[4] ।। १३४ ।।

मदेकपुत्रा जननी जरातुरा नवप्रसूतिर्वरटा तपस्विनी ।
गतिस्तयोरेष जनस्तमर्दयन्नहो विधे ! त्वां करुणा रुणद्धि न ।। १३५ ।।

मदेकेति[1] । मम जननी माता जरया आतुरा वृद्धा । तथाऽहम् एकपुत्रो यस्याः सा तथा । मम वरटा हंसी भार्या तपस्विनी अनुकम्प्या नवप्रसूतिर्वर्तते[3] । तयोरुभयोरपि मातृभार्ययोरेष मल्लक्षणो जनः अहमेव गतिः शरणं तं माम् एवंविधम् अर्दयन् पीडयन् हे विधे ! हे देव ! त्वां करुणा दया न रुणद्धि । वर्त्तमाने[4] शतृङाप्रथमैकाधि करणामन्त्रितयो (का°IV.iv.२) रित्यामन्त्रिते शतृङ् प्रत्ययः । तथा[5]

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

अप्रथमा समानाधिकरणे इति [प्र] तिषिद्धोऽपि, सम्बोधने च (पा° II. iii. 47) ति सूत्रेण अर्हयन्निति [6]शतृप्रत्ययः[7] ।। १३५ ।।

मुहूर्तमात्रं भवनिन्दया दयासखाः सखायः स्रवदश्रवो मम ।
निवृत्तिमेष्यन्ति परं दुरुत्तरस्त्वयैव मातः ! सुतशोकसागरः ।। १३६ ।।

मुहूर्तमात्रमिति[1] । हे मातः ! परं के (19a)वलं सुतस्य शोकसागरः त्वयैव दुरुत्तरः उत्तरितुमशक्यः[2] । यतो मम सखायः निवृत्तिमेष्यन्ति स्वस्थाने यास्यन्ति । किंभूताः ? मुहूर्तमात्रं भवस्य संसारस्य निन्दया उपलक्षिताः संसारो असार इत्यादिकया । तथा दयासखाः[3] मयि दयापराः । तथा स्रवन्ति अश्रूणि येषां ते [तथा स्र]वदश्रवः[4] रोदनपराः[5] ।। १३६ ।।

मदर्थसन्देशमृणालमन्थरः प्रियः कियद्दूर इति त्वयोदिते ।
विलोकयन्त्या रुदतोऽथ पक्षिणः प्रिये ! स कीदृग् भविता तव क्षणः
।। १३७ ।।

मदर्थेति[1] । हे प्रिये ! स तव क्षणः कालः कीदृक् भविता दारुणो भविष्यति । किंभूतायास्तव ? त्वया इति उदिते [पृष्टे] सति अथाऽनन्तरं[2] सर्वान् पक्षिणो रुदतो विलोकयन्त्याः सत्याः । इतीति[3] किम् ? मम प्रियो भर्ता कियति दूरे आगच्छति[4] । किंभूतः ? मदर्थं[5] सन्देशो अर्पणं येषां मृणालानां तैः मृणालै[6]र्मन्थरः भारेण मन्दगतिः[7] । ।। १३७ ।।

कथं विधातर्मयि पाणिपङ्कजात्तव प्रियाशैत्यमृदुत्वशिल्पिनः ।
वियोक्ष्यसे वल्लभयेति निर्गता लिपिर्ललाटंतपनिष्ठुराक्षरा ।। १३८ ।।

कथं[1] विधातरिति । हे विधातः । हे[2] विधे । तव पाणिपङ्कजात् शीतलात् कोमलात् [मयि[3]] मम विषये इति ईदृशी लिपिरक्षरमाला कथं निर्गता[4] । किंभूता[5] ? ललाटंतपानि[6] निष्ठुराण्यक्षराणि यस्याः[7] सा तथा । [8]इतीति किम् ? हे हंस ! त्वं स्वकीयया वल्लभया वियोक्ष्यसे वियोगम्[9] अवाप्स्यसि ।[10] किंभूतात्पाणेः ? मत्प्रियायाः[11] शैत्यस्य शीतत्वस्य[12] मृदुत्वस्य च शिल्पिनः स्रष्टुः । यादृग्गुणं कारणं तादृग्गुणं किल[13] कार्यं भवति । शीतात्[14] कोमलाच्च[15] हस्तात् कथं तापकारिणी कठोरा लिपिरुत्पन्ना[16] ।। १३८ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

अयि ! स्वयूथ्यैरशनिक्षतोपमं ममाद्य वृत्तान्तमिमं बतो[1]दिता ।
मुखानि लोलाक्षि ! दिशामसंशयं दशापि शून्यानि विलोकयिष्यसि ।। १३९ ।।

अयि स्व[2] [यू] थ्यैरिति । (19b) अयि प्रिये ! हे लोलाक्षि[3] ! बत खेदे । त्वं स्वयूथ्यैर्मम यूथसहचरैः पक्षिभिः[4] मम इमं मरणलक्षणं वृत्तान्तं वार्ताम् उदिता [उक्ता] सती असंशयं दशापि दिशां[5] मुखानि शून्यानि विलोकयिष्यसि । किंभूतम् ? अशनिक्षतस्य वज्रप्रहारस्य उपमा यस्य तं तथा । अनुप्रासः[6] ।। १३९ ।।

ममैव शोकेन विदीर्णवक्षसा त्वयापि[1] चित्राङ्गि विपद्यते यदि ।
तदस्मि दैवेन हतोऽपि हा[2] इतः स्फुटं यतस्ते शिशवः परासवः ।। १४० ।।

ममैवेति[3] । हे चित्राङ्गि[4] ! त्वयापि यदि ममैव[5] शोकेन विपद्यते विपत्तिः[6] प्राप्यते । किंभूतया ! विदीर्णं स्फुटितं वक्षो यस्याः तया तथा[7] । तत् ततो हा इति खेदे । अहं हतोऽपि दैवेन पुनरपि हतः । यतस्ते मम शिशवो बालपुत्राः[8] स्फुटं परासवः मृता एव तव[9] मरणे सति[10] ।। १४० ।।

तवापि हा हा विरहात् क्षुधाकुलाः कुलायकूलेषु विलुठ्य तेषु ते ।
चिरेण लब्धा बहुभिर्मनोरथैर्गताः क्षणेनाऽस्फुटितेक्षणा मम ।। १४१ ।।

तवापीति[1] । हा हा इति खेदे । हे[2] प्रिये ! मम ते बालकास्तवापि विरहात् क्षणेन गता गमिष्यन्ति । विनष्टा इत्यर्थः । भविष्यत्कालस्यापि अतीतविवक्षा, बुद्धौ मरणस्य विवक्षितत्वात् । किं कृत्वा ? तेषु कुलायकूलेषु विलुठ्य नीडतरेषु[3] लुठित्वा । किंभूता ? क्षुधा आकुलाः । तथा जातमात्रत्वात् अस्फुटितानि अनुद्घटितानि ईक्षणानि[4] लोचनानि येषां ते तथा । किंभूताः ? चिरेण बहुभिर्मनोरथैः लब्धाः । कार्य-कारणयोः[5] पौर्वापर्यविपर्ययादतिशयोक्तिरलङ्कारः ।। १४१ ।।

सुताः ! कमाहूय चिराय चुङ्कृतैर्विधाय कम्प्राणि मुखानि कम्प्रति ।
कथासु शिष्यध्वमिति प्रमील्य स स्रुतस्य सेकाद् बुबुधे नृपाश्रुणः ।। १४२ ।।

सुताः[1] कमिति[2] । हे सुताः ! यूयं[3] चिराय चुङ्कृतैः चुङ्कारैः कम् आहूय आकार्य भक्ष्यं प्रार्थयिष्यथ[4] इति शेषः । अर्द्धोक्ते (20a)

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

एव गद्गद्कण्ठत्वात् । तथा[5] हे सुताः । कं प्रति कम्प्राणि[6] प्रसारितानि मुखानि विधाय नीडमुखात् संमुखा[7] धाविष्यथ इति वाक्यशेषः अर्द्धोक्ते[8] एव सन्नकण्ठत्वात् । अत्र न्यूने[9] पदं गुणः । यथा[10]—
गाढालिङ्गनवामनीकृतकुचप्रोद्भूतरोमोद्गमा सान्द्रस्नेहरसातिरेकविगलच्छ्रीमन्नितम्बाम्बरा[11] । मा मा मा नद माति मामलमिति क्षामाक्षरोल्लापिनी सुप्ता किं नु मृता नु[12] किं मनसि मे लीना विलीना नु किम् ।। (अमरु॰40) अत्र स्पृश कदर्थय[13] इत्यर्थे न्यूनत्वे गुणः ।

द्वितीयवारं तस्मात्[14] पितृमातृविरहात् कथासु वार्तासु शिष्यध्वं कथाशेषा भविष्यथ इत्युक्त्वा प्रमील्य प्रकृष्टं[15] मीलनं मोहं प्राप्य स[16] हंसः तत्क्षणमेव बुबुधे प्रबोधं प्राप । कस्मात् ? स्रुतस्य नयनतो गलितस्य नृपाश्रुणः नलबाष्पस्य सेकात्[17] सेचनात् । हंसस्य[18] कृपणवचनेन दयालोर्नलस्य अश्रुपातेन[19] मोहापगमेनेत्यर्थः[20] ।। १४२ ।।

इत्थममुं विलपन्तममुञ्चद्दीनदयालुतयाऽवनिपालः ।
रूपमदर्शि धृतोऽसि यदर्थं गच्छ यथेच्छमथेत्यभिधाय ।। १४३ ।।

इत्थमिति[1] । अवनिपालो नलः इत्थं विलपन्तममुं हं—[सममु]ञ्चत् । कया ? दीनेषु दयालुतया । किं कृत्वा ? [इ]त्यभिधाय । इतीति[2] किम् ? हे हंस ! मया यदर्थं त्वं धृतोऽसि तत् रूपमदर्शि दृष्टम् । [अथ] त्वं यथेच्छं गच्छ[3] ।। १४३ ।।

आनन्दजाश्रुभिरनुस्रियमाणमार्गान्
प्राक्शोकनिर्गमितनेत्रपयःप्रवाहान् ।
चक्रे स चक्रनिभचङ्क्रमणच्छलेन
नीराजनां जनयतां निजबान्धवानाम् ।। १४४ ।।

आनन्देति[1] । स हंसः निजबान्धवानां प्राक् पूर्वं शोकेन निर्गमितान् नेत्रपयसाम् अश्रूणां प्रवाहान् आनन्दजैरश्रुभिः[2] अनुस्रियमाणमार्गान् अनुगम्यमा[ना]न् चक्रे । प्रथमं धृतत्वात्[3] शोकाश्रूणां[4] तदनु विमुक्तत्वात्[5] हर्षाश्रूणाम्[6] । किं कुर्वतां बा(20b)न्धवानाम् ? चक्रनिभं यच्चङ्क्रमणं परिमण्डलभ्रमणं तस्य छलेन नीराजनाम् आरात्रिकविधिं जनयताम् । पक्षिणः सर्वेऽपि मुक्त[स्व]जातीयस्य परितो[7] भ्रमन्ति । ततः उत्प्रेक्षा[8] । आनन्दाङ्कता[9] । अत्रानुप्रासापह्नुतिजातीनां सङ्करः ।। १४४ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
तच्चिन्तामणिमन्त्रचिन्तनफले श्रृङ्गारभङ्ग्या महा-
काव्ये चारुणि वैरसेनिचरिते[1] सर्गोऽयमादिर्गतः ।। १४५ ।।

श्रीहर्षमिति[2] । यं[3] श्रीहर्षं नाम सुतं श्रीहीरनामा पिता मामल्लदेवी च माता सुषुवे । किंभूतःपिता ? कविराजानां राजिः श्रेणि[4] सैव मुकुटः तत्राऽलङ्कारार्थं हीरः माणिक्यभूतः[5] । किंभूतं पुत्रम् ? जित इन्द्रियाणां चयो येन । तस्य श्रीहर्षस्य चिन्तामणिमन्त्रस्य चिन्तनं यत् तस्य फले महाकाव्ये श्रृङ्गारभङ्ग्या चारुणि वैरसेने[6]र्नलस्य चरिते आनन्दाङ्केऽय-मादिः प्रथमः सर्गो[गतः][7] ।। १४५ ।।

श्रीमानालिगपण्डितः स्वसमयाविर्भूतसर्वाश्रम-
श्चाण्डूपण्डितसंज्ञितं प्रसुषुवे श्रीगौरिदेवी च यम् ।
तेन[1] क्षारवटा[2]वटङ्क[3]महिते जातेन गोत्रे सतां
टीका नैषधवर्णने विरचिता सर्गे[4] शुभा त्वादिजे ।। १ ।।

किमपि मुकुटरत्नं नागरश्रोत्रियाणां
प्रतिनिधिरिव तेजः सद्मनः पद्मयोनेः ।
विधुरुपशमसिन्धो[5] रालिगो नाम धीमा-
निह समजनि पत्नी गौरिदेवीति[6] चास्य ।। २ ।।[7]

कृत्वेव चन्दनविलेपनहीनभांसि
यैर्निर्मितानि दिगुपान्तमहीनभांसि ।
एतद्यशांसि सुरमानवमानितानि
को न स्तुते नवसुधाऽनवमानितानि ।। ३ ।।

तदात्मजस्ताल्हणनामधेयो विशारदः शारदचन्दकीर्तिः ।
महाक्रतौ ज्योतिषि कर्मकाण्डं क्रमाच्चतुःसंस्थतया प्रयोक्ता ।। ४ ।।

सम्राट्स्थपत्यग्निचिदग्रजन्माऽ—ग्रगण्यचाण्डूविदुषोऽनुजन्मा ।
त्रैविद्यवृद्धार्चितसर्वदेवबुधाग्रजन्मा महनीयजन्मा ।। ५ ।।

श्रीवैद्यनाथाभिधसूक्तदेवी—पदप्रसादोपचितप्रसादैः[8] ।
पदैरुदाराकृतिभिः[9] प्रक्लृप्तां क्वचित् क्वचिच्छोधयति स्म टीकाम् ।। ६ ।।

इति[10] नैषधदीपिकायां [हंसगमनो नाम] प्रथमः सर्गः ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

टिप्पण

सर्ग–१

1 P1 ॐ नमो विनायकाय। P2 श्रीसर्वज्ञाय नमः।; P1 further वाग्देवता पटुतरां धियमादधातु धातुः सुता भगवती स्ववपुर्मयूखैः। शेषाहिकुन्दशरदिन्दुकलामरालपीयूषहारहरहासमहः सगर्तैः (र्भैः)॥ 2 P2 °चारकालेति° 3 P1 मानसे निर्मले 4 P2 सद्वाचस्ते 5 P1 no. 12 6 P1 पारवार° 7 P2 °वित् 8 B °जिगीषुः 9 B °शिष्ट°; P1 °पितृ° 10 P2 °भावक° 11 B °मुदयन्तं; P1P2 °यनमत्य° edr. °यनं 12 B add. स् 13 P2 °नुद्गन्थ° 14 B P1P2 °धीय° edr. °चीय° 15 B P1 °धीयं 16 B °रूपगङ्गा° 17 P1 °आयत्त° 18 P1 °सम° 19 B P1P2 °सौवर्ण्य°; edr. °सौवर्ण° 20 B P1P2 add. °कृतार्थः 21 P1 om. °नव° 22 P1 प्रमदाभिः aft. चतुराभिः 23 P2 तद्गन्थानु 24 P1 खण्डयन् युक्तिभिः 25 P2 विशिष्टा° 26 P1 om. °आदि° 27 P1 add. च 24 P1P2 विशिष्टा° 29 B °चारेऽपि 30 P1 °दमयन्त्योः; P2 °दमयन्तीनां 31 P1 °नाशमिति 32 P1 add. वस्तुनिर्देशेन 33 P1 add. स्म॥

1 P2 text °रक्षणः 2 P1 om. निपीयेति। 3 P1 add. अथवा सितच्छत्रिता कीर्तिर्यत्र तत्तथा। सितच्छत्रितकीर्ति मण्डलं स्वराष्ट्रं यस्य। मण्डलं परराष्ट्रं यस्मात् स तथा। 4 B °संनिधानम् 5 B add. यस्य 6 B P1P2 पीय्; edr पीङ्; and P1 पीङ्........प्रयोगः aft. न आद्रियन्ते। 7 B P2 तथा........प्रकारेण aft. न आद्रियन्ते॥ 8 P1 om. श्री° 9 P1 add. सूर्योऽपि महसा तेजसा ज्वलति शोभते। विजातीयानां संयुक्तानां सजातीयेन युक्तानां केवलानां वा उच्चारणस्याभेदात्। 10 P1 add. वीरचरितानि 11 P1 राजान°—॥ १॥

1 P1 रसैरित्यादि। 2 P1 भूभर्ता अभूत् here 3 P1 सूत्रेण निङ्। and add. स च, नि (ङि) च्चे (पा. I. i. 53) त्यन्तस्य अल आकारस्य

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

भवति । तत्र च लोपो व्योर्वली (पा: VI. i. 66)ति यलोप: । 4 P1 गुणै: शौर्यादिभि: सन्धिविग्रहादिभिर्वा अथवा रत्युपचार(रै:) वा चातुर्यादिभि: । रत्युपचारे—चतुरस्तुङ्गकुलो रूपवानरुक् मानी । अग्राम्योज्ज्वलवेषोऽनुल्बणचेष्ट: स्थि(ति) रप्रकृति: ।। (का. लं XII. 7) ।। सुभग: कलासु कुशलस्तरुणस्त्यागी प्रियंवदो दक्ष: । गम्यासु च विश्रम्भी तत्र स्यान्नायक: ख्यात: ।। (XII.8) इत्याद्युक्तैश्चाणक्यभरतमुनिप्रमुखोपनिषद्ग्रन्थप्रसिद्धैरुद्धृ तः । 5 P2 °धीरिणी 6 P1 om. विसर्ग: 7 P1 om. संजाते वा 8 BP1 कीर्तिमण्डले 9 B या; P1 येन 10 P1 add. प्रत्ययो ण्यन्तात् । 11 P1 add. शोभनो - वर्णो यस्य दण्डेन उपायविशेषेण एकं सितमातपत्रं सञ्जातं यस्य । तदस्य सञ्जातं ताद(र)कादिभ्य: इत्(त)च् (पा. V. ii. 37) । ज्वलन्ती प्रतापावलि-कीर्तिर्मण्डले यस्य । पश्चात् क्रमेण कर्मधारय: । 12 P1 अत्र च ।। 13 P2 om. विसर्ग 14 P2 धावयति 15 P1 °दर्शनी; P2 °दर्शिनां धीवृद्धि° 16 P1 °शक्तियुक्त: 17 B °र्वतिता; P1 add. क्वचित् अवधीरिणीति पाठान्तरम् । तदा रसै: शृङ्गारादिभि: सुधामवधीरयतीति व्याख्येयम् । कथा हि शृङ्गारादिनवरसा सुधातु[ल्या] मधुरादिषड्रसा मधुर[र]सैव वा । अत्र रसैरिति भेदको धर्म: पृथगुक्त: पूर्वत्र तु प्रतीयमाने इति भेद: । शब्दोपात्ते प्रतीते वा सादृश्ये वस्तुनोर्द्वयो: । यत्र तद्भेदकथनं व्यतिरेक: स उच्यते इति (का°द° II. 140) दण्डिवचनात् व्यतिरेको यथासंख्यं च ।। २ ।।

1 P2 text पवित्रयिष्यते 2 P1 पवित्रमित्यादि ।। 3 P1 तदास्य 4 P2 उत्प्रेक्ष्यते 5 B मदिग्रां 6 P1 स्वसेविनीमेव नान्यसेविनी[म्] ।। ३ ।।

1 P2 text °पादि° 2 P1 °बोधेत्यादि 11; P2 अधीतीती । 3 P1 om. विसर्ग: 4 P1P2 om. कारणात् 5 P1 om. किं कुर्वन् 6 P1 om. च 7 P1 वेदार्थविधारणक्ष्; B2 बोधोऽर्थं° 8 P1 अध्यापनादिप्रवर्तनबाहुल्यम् 9 P1 om. upto यासां 10 B संभवति 11 P2 °धिकत्वं 12 P1 योग्य° 13 P1 °पाधि: । om. घटाकाश°........सम्बन्धात् 14 P2 om. संख्यायां 15 P1 add. यद्यपि क्षत्रियस्याऽध्यापनेऽनधिकारस्तथापि धनुर्वेदादिष्वधिकारो वर्ण्यते । तथा च कालिदास:—त्वचं स मेध्यामि (रघु° II. 31a) त्यादि । अनुप्रास: ।। P2 Recto. mg. add. अत्रोत्प्रेक्षालङ्कार: ।

1 P2 text व्यगाहत 2 P2 text °पृथक्° 3 P1 विधेत्यादि । 4 P2 व्यगाहत 5 B चतुरो 6 B पुराणन्याय° 7 P1 add. रसनाग्रनर्त्तकी 8 P1 om. नर्त्तकी 9 P2 °दशानां 10 B °दशभि: 11 P1 द्वीपं च 12 P2 °वर्षं च 13 B add. खण्डम् 14 P2 अङ्गानां षण्णां 15 P1P2 विस्तारं 16 P1 विद्या रसवती 17 P2 अङ्गाणां 18 P1 add. अस्य 19 BP1 पञ्चक एतै° 20 P1 add. उपमा । जिगीषयेत्यध्यवसायस्य सिद्धत्वादत्तिश-योक्ति: । जिगीषयेवेति प्रतीयमानोत्प्रेक्षा वा ।। ५ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 दिगीशेत्यादि ।।; P2 दिगीशेति । 2 P2 द्वयाद° 3 P1 दशं तृतीयां 4 P1P2 °तारत्व° 5 P2 दिक्पलां° 6 P2 ईसिता 7 P1P2 °लस्य 8 P2 °रोचनीं 9 B अंशं न 10 P1 add. अपि 11 P1 add. अथवा दिगीशवृन्दे अंशो यस्य । विशिष्टा भूतिर्भस्म यस्य, ततः कर्मधारयः । 12 P1 add. रूपकं श्लेष उपमाऽपि । तथा च दण्डी—यथाकथं विसादृश्यं यत्रोन्तं प्रतीयते । उपमा नाम सा तस्याः प्रपञ्चोऽयं निदर्श्यते ।। (क° द° II. 14)।।

P2 Sup. mg. add. इन्द्रानिलयमार्काणामग्नेश्च वरुणस्य च । ईशवित्तेशयोश्चैव मात्रान्निर्गत्य शाश्वतीः ।। अष्टाभिश्च सुरेन्द्राणां मात्राभिर्निर्मितो नृपः । तस्मादभिभवत्येष सर्वभूतानि तेजसा ।। (VII. 4.5.) मनुः । नरहरीभट्टमध्ये ।। ६ ।।

1 P1 पदैरित्यादि ।। P2 पदैरिति । 2 P1 अस्पृशन् 3 B add. किं कुर्वन् ? । 4 P1 स्पर्शाः 5 P1 कृतो 6 P1 add. तद्विरुद्धे नञ् । अनुप्रास उपमा विरोधश्च ।। ७ ।।

1 P1 यदस्येत्यादि ।।, P2 यदस्येति । 2 B उद्धृतं; P1 add. उद्धुतमिति पाठान्तरम् । 3 B मञ्जिष्ठमा 4 P2 किं कुर्वन् ?। पङ्क्तीभवन् । 5 P1 add. विधौ 6 P1 add. रूपकमुपमाऽतिशयोक्तिश्च ।। ८ ।।

1 P2 text °रिङ्गार° 2 P1 °धनुरित्यादि ।। P2 स्फुरदिति । 3 P1 शताद्याः येषां ते पराः, संख्याशतादिकान् । 4 P2 सुच् 5 B P1P2 शात्तस्य; edr. प्रतापस्य 6 P1 अङ्गाल 7 B P1P2 add. प्रतापस्य 8 B P2 स्फुरत् 9 P1 add. अथवा घनानामाशुगानां प्रगल्भया 10 P1 add. स्वनाभावो वा निःस्वन इत्यर्थः । तदा स्फुरद्धनुरिति पदम् । 11 P1 add. रूपकमुत्प्रेक्षा च ।। ९ ।।

1 P1 °दग्धा[रि]पुरेत्यादि ।।; P2 अनल्पेति । 2 P1 add. सृष्टया 3 P2 किं भूतैः । 4 P1 उज्ज्वलैर्वा 5 P1 om. the line 6 P2 कृतायां 7 B P1 om. इति 8 B करणे न 9 P2 रराजघः । 10 P1 add. अनुप्रास उपमा च ।। १० ।।

1 P1 निवारि(त्य)ता इत्यादि ।। P2 निवारीति । 2 P1 सत्य 3 P1 गमिते ईति°; P2 °रहितानां 4 P1 add. प्रापिते 5 P2 ज्वलद्भावा° 6 B P1 ता निरन्तरं 7 P2 मूषकाः 8 P2 च 9 P1 add. नूनमनन्यविश्रमाः सत्यो दृष्टीर्न तत्यजुः इति उत्प्रेक्षा । विपक्षरमणीरोदनप्रतिपादनेन तेन सर्वेऽपि प्रतीपभूपाः क्षयं नीता इति पर्यायोक्तम् । यदाह रुचकः-गम्यस्याऽपि भङ्ग्यन्तरेणाख्यानं पर्यायोक्तम् (अलं. स. II. 37) । अतिवृष्टय इत्यतिशयोक्तिश्च ।। ११ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P2 text om. रेफ of °र्धयति 2 P2 सितांश्विति। 3 B P2 om. चातुरी 4 P2 °विशेषा 5 P1 add. तैः प्रसिद्धैर्वा गुणैः 6 P1 वानकाष्ठं; P2 वान्° 7 P1P2 सहकृतवती 8 P1 वापदण्डः। यदाह— पुंसि वेमा वापदण्डः (अमर° II. x. 24)। उच्य(प्य)ते तन्त्रे सूत्रं येनेति वापस्तदर्थो दण्डः वापदण्ड इति तु युक्तम्। 9 P1 °वनँ सहे चे (III. ii 96) ति पाणिनीयम्। 10 P1P2 °प्रभृतिकाष्ठैः 11 P1 °निमित्त° 12 P1 सवर्णैः 13 P1 add. क्रयते स्त्री° 14 P1P2 आवारकः 15 P1 add. अपि 16 P1P2 सितः 17 P2 om. °तन्तु° 18 P1 add. रूपकं, गुणैरिति श्लिष्टम्॥ १२॥

1 P1 भूपैरित्यादि॥ P1 प्रतीपेति। 2 P2 add. हि 3 P1P2 om. रेफ 4 B P1 परस्परवि° 5 P2 rec. mg. add. विरुद्धधर्मा हि भेदका परस्परं भेदका भवन्ति, नलविषये च तथाभूता नाभवन्नित्यर्थः। 6 P1 om. विसर्ग 7 P1 add. विगता 8 P1 add. अभेदेन 9 P1 add. उत्प्रेक्षा विरोधश्च॥ १३॥

1 P1 तदो॥ P2 तदोजेति। 2 P1 इति किम्? 3 P2 यशसः श्च 4 P1 मृषा वृथा 5 P1P2 यत् 6 P1P2 तद्रेखया 7 P1 add. यदा यदेति येन केनचिद्रूपेण स्थितः सर्वात्मकः कालः आक्षिप्तः। तथाभूत एव तदेति तच्छब्देन परामृश्यते। यद्यत्तापं प्रतिजहि जगन्नाथ नम्रस्य तन्मे (मा. मा. I. 5) इतिवत् प्रतीपम्। यदाह—उपमानस्याक्षेपात् उपमेयताकल्पनं वा प्रतीपम्। (अलं. स. II. 70) परिवेषेन(ण) भवति। किन्तु कुण्डलनेत्यपह्नुतिश्च॥ १४॥

1 P1 अयं दरिद्रो भ॥; P2 अयमिति। 2 P1 इति किम्? 3 P1 दारिद्र° 4 B दरिद्र 5 BP1 यस्य स तथा तस्य 6 B om. विसर्ग 7 P1 om. कल्पवृक्षो 8 P1 add. लघुकृतोऽमरतरुः। 9 P1 add. अनुप्रासोतिशयोक्तिश्च॥; P2 sup. lecto. mg. add. अत्रातिशयोक्तिरलङ्कारः॥ १५॥

1 P1 विभज्येत्यादि। P2 विभज्येति 2 B अयशः इदम्; P2 om. इदम् 3 P1 add. अपह्नुतिरलङ्कारः॥ १६॥

1 P2 text °भ्यास° 2 P1 अजस्त्र॥ P2 अजेति। 3 P1P2 om. श्री 4 P2 om. विसर्ग 5 BP1 सूर्यस्य 6 B समीपम् उप; P2 om. समीपं 7 P1 add. अभ्यस्यते वाप्यते अभ्यासः समीपम्। अन्यस्तु पटीयांसमिति पठित्वा पटीयांसं सर्वाङ्गीणमुदयं यन् गच्छन्। अयमनुकूलं दैवं न दधौ,

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

अपि तु दधौ। इति काक्वा व्याचष्टे। उपमा सहोक्तिः श्लेषोऽनुप्रासश्च ॥ १७ ॥

1 P1 अधो ॥ 2 P2 अङ्कित 3 P1 इति किम्? 4 P2 add. विसर्गं; 5 P1 ऊर्ध्वा भविष्यति 5 P1 ति[र]स्करणात् 6 B क्ष्माभुजानां 7 P1 पराजयात्। 8 P1 add. उत्प्रेक्षा ॥ १८ ॥

1 P1 om. इति 2 P1 विद्यतेऽस्य 3 P1 तथाविध एव; P2 यस्य तथाविध एव 4 P1 add. एव 5 P1 add. भाण्डागारं; P2 द्रव्यसङ्ग्रहं 6 P2 कर्मा 7 P1 add. आश्लिष्यत् 8 P1 add. अनुप्रास उपमा च ॥ १९ ॥

1 P1 अधारि; P2 अधोरीति 2 P1 lecto mg. add. धृता। तदपेक्षया चरणस्याऽतिसुन्दरत्वात्। अन्योऽपि योऽतिरमणीयो भवति सोऽन्यन्निकृष्टं निन्दन्तीत्यर्थः। 3 B अस्य 4 B पार्विकः; P1 पार्वणः पार्विकः 5 P1 om. विसर्ग 6 P1 add. शारद इति मेघतुहिनादिरहितः। पार्वणः इति पूर्णकलः। शर्वरीश्वर इत्यत्र स ईश्वरः इह तु 7 P1P2 च 8 B तथा 9 P1 शरीरप्रधानाव° 10 P1 छाया शोभा°; P2 छायालवो° 11 P2 add. न 12 P1 अनुप्रासः परिकरः व्यतिरेकश्च ॥ २० ॥

1 P1 किमस्य। P2 किमस्येति। 2 B रोम्णां and add. रोमं भूरुहानां किमु 3 B संस्थां कृतवानेव। कोटिभिरुपलक्षिताः। दूषणदोषाः कृताः। 4 P1 गुणगणनरेखाः 5 P1 वेधसा 6 P1 दूषणशून्य° 7 B नास्ति। अत्र दूषणं नास्ति। 8 P1 add. कोटिसंख्यारोमकूपौघमिषेण कृताः। अनुप्रास उत्प्रेक्षा अपह्नुतिश्च ॥ 9 P2 रोमकूपमिषेण कृताः ॥ २१ ॥

1 P1 अमुष्य। P2 अमुष्येति। 2P1 °माददते लुटन्ति। 3 P1 om. उरः; P2 उरसः 4 P2 om. च 5 P1 add. या 6 P1P2 add. च 7 B विशालत्वं 8 P1 add. ध्रुवमित्युभयत्राऽपि सम्बध्यते। इत्युत्प्रेक्षा वा अलङ्कारः। उत्तरार्द्धः उपमा प्रतीयमानोत्प्रेक्षा वा ॥ P2 inf. mg. add. अत्रोत्प्रेक्षोपमालङ्कारः ॥ २२ ॥

1 P1 स्वके। P2 स्वकेलीति। 2 P1 अकेले 3 P2 लेशे अवयवे 4 P2 om. स्वम् 5 P1 निजअंशरूपा मुखैकदेशभूता या 6 P1 add. च 7 BP1 स 8 B किं च 9 P1 add. जि(जं)गमेषु स्थावरेषु पद्मं तदुभयं 10 P1 निर्जितम् 11 B द्वेष्याः; P1 द्वेष्यः; P2 द्विद्वेषाः; edr. द्वयस्य 12 P1 add. अत्र वक्ष्यमाणे च प्रतीपमनुप्रासश्च ॥ 23 ॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 B om. Com.; P1 सरोरुहम् । 2 edr. add. महीयसी 3 P2 om. विसर्ग 4 P1 एतदुभयस्मात् 5 P1 add. रम्ये वस्त्वन्तरं 6 P2 तदुपमा 7 P1 add. अथवा परम् उत्कृष्टं कुतो भविष्यति ॥ २४ ॥

1 P1 स्ववाल ।; P2 स्ववालेति ॥ 2 P1 आसतामन्ये ज्ञानिनः; पशुः चमरी 3 P1 बाल° 4 B तुल्यं 5 P1 उत्तमानाम् 6 P1 समं 7 P1 add. प्रतीयमानोत्प्रेक्षाऽपह्नुतिश्च ॥ २५ ॥

1 P1 महीभृतः ।; B महीति 2 B भुवं 3 B विलासभ्रान्तिश्च 4 P1 मन्मथस्य श्रिया वा मन्मथवत् श्रिया 5 P2 °र्जाया 6 P1 om. नलं 7 P2 om. च 8 P1 add. अनुप्रासो निदर्शनम् उपमा वा भ्रान्तिमान् श्लेषश्च ॥ २६ ॥

1 P2 text. °शून्यै° Corrected as °निः स्थैः° sec menu. (recto. mg.) 2 P1 निमी । B निमीलेति । 3 P1 अभ्यासभरं 4 P1 om. विसर्ग 5 P2 निमीलननिमेष° 6 B °विलोकनेन 7 P1 add. प्रतीयमानोत्प्रेक्षा अध्यवसायस्य सिद्धत्वादतिशयोक्तिर्वा ॥ २७ ॥

1 P2 text फलधि° 2 P1 अदः । P2 अद इति । 3 P1 स्तुवन्ति स्म here. 4 P1 इति किम् ? 5 P1 om. सफलं 6 P2 प्रसिद्धिः 7 B अनालोकिक° 8 P1 स्थिताः 9 P1 पश्यति । and add. क्रियाविरोधः ॥ २८ ॥

1 P1 विलोक । P2 विलोकेति । 2 P1 मनुष्याङ्ग° 3 P2 अस्य 4 P1 विघ्नलेशोऽपि 5 B मानुषीणां मर्त्या° 6 P1 बभूव द्विधा 7 P1 add. उक्तनिमित्ता विशेषोक्तिः ॥ २९ ॥

1 P1 न का । P2 न केति । 2 P1P2 om. सुवासिनी 3. P1P2 om. नलं 4 B add. विसर्ग 5 B नायका; B add. अपि 6 B repeats अयं मम........न भवति here also 7 P2 नलं 8 B का 9 P1 प्रौढ° 10 P1P2 om. त्रिविधा 11 P2 नायका 12 P1 add. अनुप्रासः ॥ ३० ॥

1 P1 श्रियाऽस्य योग्याह । P2 श्रियाऽस्येति । 2 P1 नायकया 3 P1 add. ज्योत्स्नातमिस्राशृङ्गिणोर्जस्विन्नूर्जस्वलगोमिन्मलिनमलीमसाः (पा. V. ii. 44) इति निपातः । and om. अपि तु कृत एव । किं कृत्वा ? 4 P1 सा तया 5 B वीक्षितुं 6 P1 इति किम् ? 7 P1 आत्मायोग्यं 8 P2 मुक्तो

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

न । 9 P2 om. इति 10 P1 add. अनुप्रासः । गर्वस्य व्यभिचारिभावस्य शान्तिः ।। ३१ ।।

1 P1 यथो । P2 यथेति । 2 P2 om. विषयान् 3 P1 add. हठात् 4 P2 तत्पुत्रो 5 P1 add. शोणितपुरं 6 P1 add. श्रीकृष्णवाहनेन 7 P1 add. प्रसह्य क्षमित्वा 8 P2 भूते 9 P1 °श्रीकृष्ण° 10 B °देवेनानु° 11 P1 add. खलु वाक्यालङ्कारे । प्रसह्येति हठार्थे अव्ययम् । पक्षे, ल्यबन्तम् । भोगिभोजिनेति पाठे भोगिनः पुरुषान् भुङ्क्ते विषयीकरोति । पक्षे, भोगिनः सर्पान् । श्लेषोपमा ।। ३२ ।।

1 P1 नृपे । P2 नृपेऽनुरूप इति । 2 B °नन्दना; P1 नन्दिनी 3 P1 add. नन्दिग्रहिपचादिभ्यो ल्युणिन्यच (पा. III. i. 134) इति ल्युप्रत्ययः । 4 P1 om किं भूते ? 5 P1 add. गते here 6 P1 प्राप्ते 7 B कामस्य मनो° 8 P1 आज्ञया 9 P1 add अत्र श्रवणादनुरागः । तदुक्तम् परकीया तु द्वे [द्वि]-धा कन्योढा चेति जायेत । गुरुमदनार्ते नायकमालोक्याकार्यं वा सम्यक् (का° लं° XII. 30) इति । भीमनरेन्द्रनन्दिनीति पाठान्तरम् । प्रियवशे वदः खच् (पा. III. ii. 38) । अनुप्रासः समं काव्यलिङ्गं च ।। ३३ ।।

1 P1 उपासनामित्यादि 2 P2 सो 3 P1 अवसरे 4 P1 भूता 5 P2 om. सती P1 add. अलमतिशयेन 6 P1 इति श्रवणकालः प्रतिपादितः । तदुक्तं शृङ्गारतिलके—अन्यदीया द्विधा प्रोक्ता कन्योढा चेति ते प्रिये । दर्शनाच्छ्रवणाच्चापि कामार्ते भवतो यथा ( ) इति ।। प्रतिपाद्यदेशकाले च भङ्ग्या च श्रवणं चास्य तद्यथेति । रुद्रटोऽपि, देशे काले भङ्ग्या साधु तदाकर्णनं च स्या (का° लं° XII. 32) दिति । भावोदयः अनुप्रासः ।। ३४ ।।

1 P1 कथानुषङ्गेष्वित्यादि । 2 P1 कथानु° 3 BP1 °नाम्नि 4 P1 °शब्दस्या तृण° 5 P2 °वर्णनायां 6 P1 add. मिथोऽन्योऽन्यं रहस्यपि हर्षोत्सुक्यशबलता । अनुप्रासः ।। ३५ ।।

1 P1 तपरासोरित्यादि । 2 P1 add. पूर्वार्द्ध प्रक्रान्तस्य 3 P1 नैषधं after उपमानभूतम् 4 P2 recto. mg. add. sec. manu. अकारयत् 5 BP2 किञ्चित् 6 P2 add. तं 7 P1 इति किम् ? 8 P1 om. हि 9 P1 भिन्नं त्वं 10 B °दन्यत् उदाहरणम् उदाहर 11 P1 om. सा 12 P1 add. अत्र गुणसंकीर्तनलक्षणा स्मरदशोक्ता । काव्यलिङ्गम् ।। ३६ ।।

1 P1 नल । 2 P1 om. च 3 P1 add. केनचित् 4 B P1P2 add. बभूवेति तृतीया 5 P1 अत्र चिन्ताया उदयः । अनुप्रासः ।। ३७ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 प्रियं । 2 P1 चित्रक° 3 P1 om. च 4 P1 इति किम् ? 5 P1 कारुवर ! 6. om. च 7 P1 add. त्रिजगज्जयश्रियौ 8 P1 add. तथाविधयोः 9 P1 °कार 10 P1 add. एवम् 11 P1 नलेन सह साम्यं 12 P1 add. अत्र चित्रे नाथदर्शनम् । तथा च रुद्रटः—साक्षाच्चित्रे स्वप्ने स्यादृर्शनमेवमिन्द्रजालेऽपि (का° लं° XII. 32) । शृङ्गारतिलके च साक्षाच्चित्रे तथा स्वप्ने तस्य स्यादृर्शनं त्रिधा ।। ( ) । समः ।। ३८ ।।

1 P1 मनोरथ ।; P2 मनोरथेति । edr. मनोरथेनेति । 2 P2 क्व aft. नलं 3 P2 om. सर्वस्यां रात्रौ 4 edr. add. अर्थं 5 P1 add. अनुप्रासोऽर्थान्तरन्यासः काव्यलिङ्गं च ।। ३९ ।।

1 P1 निमीलि । 2 B संमोह्य 3 P1 add. यद्यपि 4 B P2 मनसा° 5 B मानेन 6 P1 तं अत्रो° 7 B add. भोक्तु 8 P1 add. वा 8 P1P2 तत्र तत्र 9 P1 नवं नवं 10 B P1P2 भोक्तान्; edr. भोगान् 11 P1 om. च 12 B रक्षं; P2 °न्नपरं 13 P1 °मृतदवश्च° 14 P1 पूरुष 15 P1 एष 16 P1 add. अनुप्रास[:]विभावना च ।। ४० ।।

1 P1 अहो । 2 B प्रविहितागमे° 3 P1 दक्षरणा° 4 P1 add. बिभरांबुभूविरे 5 B पूर्वा° 6 P1P2 सति 7 P1 °बुभुविरे 8 B लक्षणाया 9 P1 रात्र्यो 10 P2 ऋतोर्यदा 11 P1 स्यात् 12 P1 °निरागमनेन 13 P1 जायते 14 P1 om. विसर्ग 15 B एवं 16 P2 add. हि 17 B दृश्यते 18 B P2 तदा परं 19 P1 add. अभूत् । हिमागमे सत्यपि दिनलघुत्वं ग्रीष्मे सत्यपि रात्रिलघुत्वमनेनोक्तमिति विशेषोक्तिः । दिनरात्रिमहत्त्वे च स्मरार्द्दितत्वं कारणं तेन विभावनाऽनुप्रासश्च ।। ४१ ।।

1 P1 स्वकां । P2 स्व कान्तीति । 2 P1 add. गुणोदयश् 3 P1 om. श्रुतवान् 4 P1 om. शीलम् 5 B कान्तिः & add. unsystematic lines 6 P1 दार° 7 P1 om. चेतसि 8 P1 om. योजिता 9 P1P2 सम्बन्धी 10 B कान्तिः 11 P1 °कान्तिः 12 P1 add. एतेन उभयानुराग उक्तः । रूपकं निदर्शना च ।। ४२ ।।

1 P1 तमेव । 2 P1 om. तया 3 P1P2 om. उत्प्रेक्षते 4 P2 निजा 5 B add. यत् 6 P2 °शोभाया 7 P1P2 om. उत्पन्नक्रोधः । 8 P1 काव्यलिङ्गमुत्प्रेक्षा च ।। ४३ ।।

1 P1 अकरि । 2 edr. add. तेन 3 P1 add. स्वात्मेति पुनरुक्तवदाभासः । तुल्ययोगिता च ।। ४४ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 अमुष्य वीरस्येत्यादि । 2 edr. add. खलु 3 edr. add. साहसी 4 P1 add. वीरं 5 P1 जिगीषति 6 P1 add. नलं 7 P1 add. वा 8 P1 add. नलस्य वीरत्वात् विरुद्धान् ईरति वीरः । धीरस्येति पाठे धिया राजते इति धीरः । अथवा धियं राति ददाति इति धीरः । धीः राधनं यस्येति वा धीरः । अतो धीरं नलं जेतुमिच्छुः साहसी यशः संशये निमज्जयांमास । काव्यलिङ्गं विरोधश्च ।। ४५ ।।

1 P2 text पोष्पै° 2 P1 अनेन । 3 P1P2 पूर्वोक्तप्रकारेण 4 P2 घटयितो 5 B P2 पुष्पै° 6 P1 add. अशरीरशरैः 7 B तादृशं 8 P2 om. स° 9 B °हीनमपि 10 B शरोधैर्यं 11 P1 add. अनुमानं विरोधश्च ।। ४६ ।।

1 P1 किम । P2 किमन्यदिति । 2 B कथ्यसे 3 P1 °माश्रियति 4 p1 क्षायाया भावस्तत्ता तया 5 P1 om. च 6 P1 लङ्घितुं न कोऽपि 7 P1 अथ च 8 P1 अल्पशोभः तनुच्छायः 9 P1 add. अनुप्रासोऽतिशयोक्तिरुत्प्रेक्षा श्लेषश्च ।। ४७ ।।

1 P1 उरोभु । 2 B उल्लसितम् 3 B वा 4 P1P2 om. नूतन 5 B यस्मिन् 6 P1 add. उरोभुवेति च पदोपकृतं कुम्भयुगेनेति पदमन्तर्निगीर्य 7 P1 add अतिशयोक्तिरुत्प्रेक्षा रूपकं श्लेषश्च ।। ४८ ।।

1 P1 अप । P2 अपह्नुवानस्येति । 2 B add. औत्सुकत्वम् 3 P1 कृतं कामेन विहितम् । and add. श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमाणः (पा. I. iv. 34) इति सम्प्रदानम् । 4 P1 तद्दुःखं 5 P1 add. श्लेषः तुल्ययोगिता उपमाऽपि ।। ४९ ।।

1 P1 स्मरोप । 2 P1 भृशं after स्मरेण 3 P2 °राजतनुजां 4 B P1 add. तनयामिति पाठान्तरम् here 5 P1 add. विरोधोऽर्थान्तरन्यासश्च ।। ५० ।।

1 B मृषा विवेदेति । P1 मृषा । 2 P1 वियोगाज्जातां 3 P1 add. नटनात् 4 P1 add. इत्यभिनयात् 5 P1 °यश्चन्द्रस्य 6 P1 श्रीखण्डस्य 7 P1 कर्पूरस्य 8 P2 प्रगटनात् 9 P1 add. व्याजोक्तिः ।। ५१ ।।

1 P1 शशाक । 2 P1 add. नलः 3 P1 om. भ्रान्त्या 4 B वः 5 B add. अथवा अयेन दैवेन निह्नोतुं शशाक । यत् समाज एवं सभैव मुमूर्च्छ । तदस्य दैवानुकूल्यमिति वा 6 P1 °सारिणासु 7 P1 add. here वैंणिकैः........प्रारब्धासु । 8 P2 मूर्च्छां 9 P1 तत्र प्रत्यक्षे उत्तरं किमपि न

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

शक्यते कर्तुम् । and add. एतेन प्रतापमूर्च्छे स्मरदशे उक्ते । अनुप्रासः ।। ५२ ।।

1 P1 अवा । 2 P2 om. क्रमेण 3 P1 add. परस्मात् लज्जावहे जाते अपत्रपा । यदाह—सापत्रपा अन्यतः (अमर° I. vii. 23) । अनुप्रासः ।। ५३ ।।

1 P2 text रोद्धुमिहाभवन्नमी 2 P1 अलं नलं रोद्धु । P2 अलमिति 3 P2 om. किलेति संभावने 4 edr. add. अमी 5 P1P2 अभवत् 6 P1P2 नलस्य 7 P1 add. सृजति 8 P1 कन्दर्पः 9 P1 om. स्वजायायाम् 10 B पुरुषं 11 P1 add. अनुप्रासोऽर्थान्तरन्यासश्च ।। ५४ ।।

1 B °चिह्नममीति । P1 अनङ्ग । 2 B P2 नैषध at the end. 3 P1P2 add. प्रलापादिकं 4 B निरासितु 5 P1 add. सभायां 6 P1P2 °विहारस्य 7 P1P2 om. उपवनक्रीडाव्याजात् 8 B विजनप्रदेशं 9 P1 add. अपह्नुतिः ।। ५५ ।।

1 P1 अथ । 2 P1 add. न लोकाव्ययेत्यादि (II. iii. 69) पाणिनीयम् । 3 P1 add. गुह्य 4 P2 विन्दती° 5 P1 add. अनुप्रास - उपमा च ।। ५६ ।।

1 P1 अग्नी ततः । 2 P1 om. किं भूतम् ! 3 P1 अजस्र° 4 P2 add. खुरप्रान्तैः 5 P1 add. प्रान्तैः 6 B स तथा 7 P1 add. पुंभावे तत्क्रियायां च पौरुषम् । 8 P1 add. ऊर्ध्वविस्तृतदोःपाणिनृमाने पौरुषं त्रिषु (अमर° II. 87) । पौरुषमिति श्लिष्टम् । जातिरनुप्रासश्च ।। ५७ ।।

1 P1 अथ । 2 P1 °मित्याद्यन्तं सप्तभिः कुलकम् । 3 B °शासनात् 4 P2 om. तं 5 P1 add. आददानम् । हसन्तमिति पाठान्तरम् । P2 श्रयन्तम् 6 P1 चन्द्रमसः 7 P1 क्ष्मावृतो 8 P1P2 add. नृपा 9 P2 om. सं 10 B दीर्घं° 11 P1 स 12 P1 ये रश्मयः 13 B add. कीदृशमश्वम् ? । केसरकेशा एव स्कन्धकेशा एव रश्मयः किरणास्तैर्विराजितम् । 14 B add. देवमणेरुत्थितैरिव । निगाले आवर्ते देवमणिस्तस्मादुत्थितैः रश्मिभिर्विराजितम् । कीदृशात् ? । निगालगाद् गलदेशजातात् । 15 B °द्देशः and add. निगलत्यनेन निगालः । गलजस्तु सन्धिः । उन्योर्गिर (का° IV. v. 19) इति घञ् । देवमणेरावर्तस्य स्थानम् । 16 P1 आवर्तस्तु 17 P2 om. उत्थितैः आन्तरेण 18 P2 मध्यगामिना अध्व[न]ा । मार्गेण 19 B कीदृशेन ?। 20 B add. अनुप्रासोत्प्रेक्षारूपकाणां च सङ्करः । P1 add. अनुप्रास उपमा उत्प्रेक्षा रूपकं च ।। ५८ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 B अजस्रेति । P1 अजस्र । 2 B कीदृश° 3 B कीदृशैः ? 4 P1P2 om. अनवरतं 5 B कुट्टनं ताडनं तेनोक्षतैः 6 P1 add. उद्यतैः उत्थितैः 7 P1 om. लोकस्य 8 B चित्तैरिव 9 B कीदृशैः ? । 10 B अणिमाङ्कितैः अणिमायुक्तैः 11 B कीदृशैः ? 12 B °स्याध्ययन-पाठस्तदर्थम् 13 B instead अन्योऽपि यः पठति स पादोपासनां करोति । 14 B add. उत्प्रेक्षाजाती ।। P1 add. जातिरुत्प्रेक्षा च ।। P2 add. एतेन मनसोऽप्यधिकवेग इत्यर्थः ।। ५९ ।।

1 B चलाचलेत्यादि । P1 चला । 2 B च पुनः कीदृशम् ?। 3 P1 add. उत्प्रेक्षते । 4 P1 om. नासिका 5 P1 तस्योष्ठौ 6 P1 स्फुरितः 7 P1 उत्प्रेक्षते 8 P1 om. च 9 P1 प्रकारणात् 10 P1 स्वयं after आशयं 11 P1 add. सापह्नवोत्प्रेक्षा ।। ६० ।।

1 P1 महारथ ।। 2 P2 add. अनीदृशां 3 P1P2 श्रीसूर्याश्वाः 4 P1 add. अपह्नुतिः व्यतिरेकः श्लेषश्च ।। ६१ ।।

1 P1 सिता 2 P1 om. किं कुर्वाणम् ?। 3 P2 वाजितां 4 P1 add. स्फुटमुत्प्रेक्षायाम् । कैश्चलच्चामरयुग्मचिह्नैः । प्राधान्यात् क्रियाभेदाद् वा बहुवचनम् । स्फुटामिति पाठे । 5 B चिह्नितैः; P1 चिह्नैः 6 P1 om. प्रकटाम् 7 B P2 किं तत् 8 P2 °त्याशयेनाह— । 9 P1 om. केन 10 B P1P2 om. च edr. add. च 11 P1P2 om. गतवन्तः 12 B add. लोलयताम् 13 B चाल्यन्ते here 14 P1 add. सापह्नवोत्प्रेक्षा ।। ६२ ।।

1 P1 अपि । P2 अपीति । 2 P1 किं भूतम् ? here. 3 P2 om. या 4 B P2 सादृश्यं; P2 fur. अनुकुर्वाणं 5 P1 गरुत्मतः 6 P1 अग्रम् 6 P1 add. अनुप्रास उपमा अपह्नुतिरपि वा प्रतीयमानोत्प्रेक्षाऽपि ।। ६३ ।।

1 B P1P2 com. under I. 58 1 P1 चलन्नलङ्कृत्येत्यादि ।। 2 edr. add. स्य 3 P1 add. वेशो 4 B पक्षाणि 5 P1 ते तथा 6 P1 add. विशति येन इति वेशः तालव्यं शकारमाहुः । निष्पन्द इति षत्वं चिन्त्यम् । न ह्यस्य षत्वलक्षणमस्ति । कस्कादिपाठोऽपि अस्य न निश्चितः । सुषामादिष्विव (पा. VIII. iii. 98) ति संज्ञायां मूर्द्धन्यविधानात् । 7 P1 add. अनुप्रासो जातिश्च ।। ६५ ।।

1 P1 क्षणादथैष इत्यादि । 2 P1 अथ स नलः 3 B अश्वान् 4 P1 पठत्येवेत्यर्थः 5 P1 om. वेगेन 6 P1 add अनुप्रास उपमा सहोक्तिः जातिरपि ।। ६६ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 निजा। 2 P1 add. निजा हिता 3 B यवना° 4 P1P2 add. सन्तं 5 P1P2 om. प्रकटं 6 B पाणौ 7 P1 करतले 8 P2 यस्याम् 9 P1P2 om. के इव ?। 10 B add. इव 11 B स्वभावात् 12 P1 add. भानोः 13 P1 उन्निद्रकमलयुगल° 14 P1 add. अस्य पूर्वश्लोकद्वयात् पूर्वमेव क्वचित् पाठः। अनुप्रास उपमा रूपकं श्लेषश्च ।। ६७ ।।

1 P2 text °शिल्प° 2 P1 ततः 3 B °द्वये 4 P2 अलीकां 5 P1 इति किम् ?। 6 P2 ताः 7 B वलं P1 आगच्छ वलं; P2 भल्लं 8 P1 add. अथवा उल्लासितानि शल्यानि पल्लवा इव वा। शल्यान्येव पल्लवा याभ्यां ते तथा। पल्लवत्वेनाऽहिंस्रत्वमुक्तम्। अनुप्रास उपमा रूपकमपि। P2 recto. inf. mg. add. यथा पल्लवेन किञ्चित् पीडादिकं न क्रियते तथा शल्येनेति भावः ।। ६८ ।।

1 P1 प्रयातु। 2 P1P2 om. आत्मीयेन 3 P2 om. वेगेन 4 P1P2 om. उद्धतः 5 B पाथोधेः 6 B P1P2 कियत्पदं पृथिवी; edr. पृथिवी कियत्पदं 7 P1P2 चलितानां 8 P1P2 add. अपि 9 B P1 न भवि° 10 P2 इत्यत्र कर्तुः क्यङ्सलोपश्चे (पा° III. i. 11) ति क्यङ् 11 P1 add. क्यङि। लुप्तोपमोत्प्रेक्षाऽनुप्रासोऽपि ।। ६९ ।।

1 P1 हरे। 2 P1 विहितोत्प्लवनैः 3 P1 यैः 4 P1 इति किम् ?। 5 P1 हरीणामपि 6 B तस्य 7 P1 add. तस्य नेति पाठे हरीणां न त्रपा अपि तु त्रपैवेति काक्वा व्याख्येयम्। उत्प्रेक्षा, हरिशब्दः श्लिष्टः '। ७० ।।

1 P1 चमू°। P2 चमूचरामिति। 2 B P1 om. सैनिकाः 3 P1 add. प्राप्य 4 P1 add. प्रचुरानपि 5 B आकारयन् 6 P1 add. संभूय मण्डलरूपान् 7 P1 वा कारित° 8 P1 add. सैन्धवाः 9 B °द्धवलोका 10 P1 श्रद्धालुत्वेन; P2 श्राद्धजडतया 11 P1 अवाप्य 12 P1 मण्डलबन्धेन; P2 °बन्धेन 13 P1 add. बुद्धालया बलि वा 14 B णित्यण्-प्रत्ययः ।। 15 P1 add. सादिनोऽपि सैन्धवाः। उत्प्रेक्षा ।। ७१ ।।

1 P1 द्विषद्भिरेवास्येत्यादि। 2 P1 add. पञ्चविधां गतिं 3 P2 om. इति 4 P1 दिशो भयेन 5 P1P2 तथा 6 P1 प्रयामः 7 P1 om. वा 8 B समुद्रं 9 B पूर्वं रुद्धं 10 P1 om. इति; P2 om. सुट् 11 P1 add. आस्कन्दितं धौरितं रेचितं वल्गितं प्लुतम्। गतयोऽमूः पञ्चधाराः (अमर° II. viii. 48, 49)। अतिशयोक्तिः रूपकोत्प्रेक्षानुप्रासाः ।। ७२ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 B P2 अचीकरदिति । P1 अकारयच्चारु । 2 P1 om. तलस्य 3 P1 add. चारुहृयेनेति समस्तं पदं वा । 4 P2 कविनो° 5 P1 om. किम् 6 P1 instead न शक्तुमिच्छति । शिक्षितः प्रवीणो न भवति । शकेः सन्नन्ताज्जिज्ञासायामित्यात्मनेपदम् । 7 P2 om. काशिकायां........°न्तर्गतं 8 P1 add. साधु 9 P2 om. शिक्षतेः 10 P2 add. ताः 11 B °चार्त 12 B जिज्ञासात् 13 P1 add. अत्र 14 B अतिनतस्य 15 P1 add. तत् 16 P1 add. तथा च हृक्रोरन्यतरस्यामि (पा° I. ii. 53) ति सूत्रम् । अनुप्रास उत्प्रेक्षा च ॥ ७३ ॥

1 P1 विवेशा । ततः 2 P1 add. कदाचिदत्र मम सन्तापो निवर्त्तत इति वाञ्छया । अथ धृतीच्छया विलासकाननं यत् विवेश । तद्विलासकाननमेव बिले आस्ते बिलासकः सर्पस्तस्य आननं मुखं तत्र धृतेरभावात् । 3 P2 om. श्रीहरिः 4 P1 प्रवालानां रागेण च्छुरितः 5 P1 add. अनुप्रास उपमा श्लेषश्च ॥ ७४ ॥

1 P1 वनां ॥ 2 P1 add. स P2 तथाविधि 3 P1 add. इति 4 P1 add. निवृत्तम् 5 B किं भूयः ? 6 B P1P2 एत्य उपेत्य edr. उपेत्य एत्य 7 P1 om. इत्यत्र 8 B वेण्यापाथ° 9 P2 रूपे 10 B अति° 11 P1 instead सहायैः अनुव्रज्य तेऽपि निवृत्ताः । इष्टयोऽपि विलोककलोकानां निवृत्ता इत्यर्थः । and add. अनुप्रासः सहोक्तिश्च ॥ ७५ ॥

1 P1 ततः प्रसूने[इ]त्यादि । 2 B कमनीयकं 3 P1P2 add. च 4 B दर्शने 5 P1 च फलं 6 P1 add. अनुप्रासो जातिश्च ॥ ७६ ॥

1 P2 text °द्गत° 2 P1 फल । 3 P1 om. तस्मिन् 4 P1 add. स्थितैः 5 P1 instead महर्षिवृद्धसमूहाद् 6 B वार्द्धकत्वात् 7 P2 om. वृद्धसमूहा°........वार्द्धकात् 8 P1 add. अत्र वार्द्धकादिति वृद्धभावादित्यर्थः । यदाह-वार्द्धकं स्थविरं ज्यायान् वर्षीयान् दशमीत्यपि (अ° चि° III) इति । 9 B P2 नलातिथ्यार्थ after स्थितैः 10 P2 पुष्पं फलं ॥ B किं भूतेन च ॥ 12 P2 वातिथिं 13 P1 add. रूपकं प्रतीयमानोत्प्रेक्षा श्लेषश्च ॥ ७७ ॥

1 P1 विनिद्र ॥ 2 B add. दुर्यशो दुष्टमपवादं स्फुटं दधानम् ? पुनः कीदृशम् ? तथा 3 P1P2 om. गमनशीलम् 4 P2 om. अपह्नुतिः ॥ ७८ ॥

1 P1 वियोगिनी ॥ 2 P1 om. क्रोधेन 3 edr. add. दुराकर्षतया 4 P1 add. जनस्तेन 5 P1 add. अनुप्रासो रूपकं च ॥ ७९ ॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 त्वदग्रसूच्येत्यादि । P2 त्वदग्रसूच्येति । edr. त्वदग्रसूचीति । 2 P2 मरण° 3 P2 यत्तद् 4 P1 om. च 5 P2 °चरति । P1 add. दारुणायत इति पाठे तव पत्रैर्मनोभवो दारुणायते इति कश्चित् । अनुप्रास-समासोपमाः ॥ ८० ॥

1 P1 धनुः । 2 P1 add. अनुप्रासः ॥ ८१ ॥

1 P1 विदर्भे । 2 P2 om. हि 3 P2 om. इति 4 P1 add. दोहदमिति अस्य एकदेशद्वारेण असभ्यार्थस्मारकत्वमाशङ्क्य जुगुप्सादाव-श्लीलत्वभ्रमो न कार्यः । तस्य लोकसंवीतत्वेना(प्रतिभासात् । यदाह न गुप्तलक्षित-संवृतानी (का. सू. II. i. 15) ति । इदं हि सूत्रम् असभ्यार्थान्तर-मसभ्यस्मृतिहेतुश्चाश्लीलमि (I. i. 14) त्यस्यापवादः । तल्लोकसंवीतं संवृतम् । यथा—उपस्थानं दोहदमि (II. i. 18) ति । उत्प्रेक्षा ॥ ८२ ॥

1 P1 वियो । 2 P2 om. अथ च विरहिणीं 3 P2 °स्मरणेन 4 P2 किंशुकपुष्पाशुगा 5 P2 add. कीरैः 6 P2 स्फोटयते 7 P2 om. स्तन°........ मवति । 8 P1 add. अनुप्रासो रूपकमुत्प्रेक्षा ॥ ८३ ॥

1 P1 स्मरार्द्धं । 2 P1 om. अति 3 P2 om. इव 4 P1 om. किंभूते ? । 5 P1 add. स्फुटं पलाशनात् पलाशे इत्यपि व्याख्या । अनुप्रास उपमोत्प्रेक्षा रूपकं च ॥ ८४ ॥

1 P1 नवा लता । 2 P1 शोभिनी कुड्मलानि 3 P2 विकसितकुड्मला 4 P2 om. तस्यास्तदवस्थत्वात् 5 P2 om. अथ च 6 P2 तामन्ये........ पश्यन्ति । सस्मिता च भवति । 7 P1 add. पपे इति अगूढमगुणीभूतव्यङ्ग्यम् । अनुप्रासः समासोक्तिश्च ॥ ८५ ॥

1 P1 विचिन्वती । 2 P2 विचिन्वतीः 3 P2 मायावी 4 P1 दीवडी° 5 P1 add. रूपकमपह्नुतिरुपमोत्प्रेक्षा च ॥ ८६ ॥

1 P1 अमा 2 P1 मध्यगं 3 P2 om. स्मरेण 4 P2 om. शरेषु 5 P1 add. अनुप्रासोत्प्रेक्षा ॥ ८७ ॥

1 P1 पिकाद्वने । B पिकान्वनेति । 2 P1 add. स 3 P1 add. वियोगिनांमनास्थया अनवस्थितत्वेन अवलम्बनाय सूनकरप्रसारिणीमित्यन्यः । 4 B वेन 5 P1 om. सति 6 P2 उदयं चन्करुणो 7 B अथकात् 8 P1 दुःखितानाम् 9 B °दवश्च 10 P1 असारः संसारः 11 P1 edd. समासोक्ती रूपकं प्रतीयमानोत्प्रेक्षा ॥ ८८ ॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 रसाल। 2 P1 आम्र: 3 P1 om. विसर्ग 4 B समीरणेन 5 P1 भर्त्सनया 6 P1 add. अनुप्रासः उत्प्रेक्षा च ॥ P2 add. दातुकाम इव ॥ ८९ ॥

1 P1 दिने दिने। 2 B P2 रक्ताक्षा 3 P1 इति किम्? 4 P1 add. हे 5 P1 add. अधिकं यथा भवति एवं 6 P2 च here 7 P1 om. च 8 P1 रोषात् 9 B किञ्चित् 10 P1 add. अनुप्रास उत्प्रेक्षा। द्विजानिति श्लिष्टम् ॥ ९० ॥

1 P1 अलि। 2 P1 add. नागकेसरसम्बन्धि अथवा 3 P1 धिया कातरया; P2 बुद्धया धिया 4 P1 यस्य 5 P1 add. चाम्पेयो नागकेसरः। तथा च·········चाम्पेयः केसरो नागकेसरः काञ्चनाह्वयः। (II. iv. 63) इत्यमरसिंहः। आह च—नागपुष्पो मतो नागकेसरो नागकेसरः। चाम्पेयो नागकिञ्जल्कं कनकं हेमकाञ्चनम् ॥ (भाव° II.67) अथ च चाम्पेयो चम्पको हेमपुष्पक इति (अमर°, II. ii. 63) चम्पकेऽपि। आह च-चम्पकः सुकुमारश्च सुरभिः शीतलश्चलः। चाम्पेयो हेमपुष्पश्च काञ्चनः षट्पदातिथिरि (?) ति चम्पादेशे भवः चाम्पेयः। अनुप्रास उत्प्रेक्षा च ॥ ९१ ॥

1 P1 गलत्परागम्। 2 P1 °परागो 4 B गलति 5 P1 add. उत्प्रेक्षा जातिश्च ॥ ९२ ॥

1 P1 तदं। 2 BP2 om. विसर्ग 3 P2 om. बाणाः 4 B om. भ्रान्तिज्ञानाद् 5 P1 add. गुणस्पृशः 6 P1 add. सकाशात् 7 P1 P2 गुणं मौर्वी 8 P1 add. गन्धस्येदुत्पूतिसुसुरभिभ्यः (पा° V. iv. 135) [इति] इत्। श्लेषः ॥ ९३ ॥

1 P1 मरुल्लल। 2 P2 om. बिल्वस्य 3 P1 सारसौरभं 4 B °स्त्रीणां 5 P2 add. येन वा 6 B om. विटानां 7 P2 सुरयः 8 P1 add. अनुप्रास उपमा च ॥ ९४ ॥

1 P1 युव। 2 P1 तस्या° 3 B बोध्ये; P1 विध्ये सति 4 B प्रसूतानि 5 P1 add. शून्येतरं गर्भगह्वरं यस्य मध्यकुहरं वा। अनुप्रासरूपके ॥ ९५ ॥

1 P1 मुनिद्रुमः। 2 P2 कुडमलितः 3 P2 add. सञ्जातकोरकः 4 P2 शिति° 5 P1 add. राहुरपि कृष्णवर्णः। 6 P1 add. इव। अत्र गौण्या वृत्या प्रयुक्तं वमन्निति अतिसुन्दरम्। 7 P1 प्रान्तः त्रुटिः 8 P1 add. अनुप्रासः श्लेषो रूपकं च अपह्नुतिरुत्प्रेक्षा ॥ ९६ ॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 पुरो। 2 P1 add. अथ च………क्रीडा here. 3 B निमीलन्ती 4 P2 सिसृक्षुः 5 B विरह° 6 B निमीलनम् 7 P1 विलोकिताः before तं मिलन्ती; and om. पुनः कथंभूताः ? । 8 B कण्टकावरणवीरुधि 9 P1 add. पक्षे कृतभ्रमणाः 10 P1 आरूढायां 11 P1 add. वा 12 P1 add. वृत्तिवीरुन्नभस्वच्छब्दैः कुट्टिनी साधारणा स्त्री नायिका उच्यन्ते इति। समासोक्तिरनुप्रास उपमा च ।। ९७ ।।

1 P1 गताः 2 B P2 अतिमात्रं here 3 P1 स्वां 4 P2 पृथिवीं 5 P2 माता 6 P1 नतैः शिरोभिः 7 P2 वर्द्धते च 8 P1 add. समासोक्तिः ।। ९८ ।।

1 P1 नृपाय 2 edr. add. हिमितं 3 P1 शीतला अमृतरूपा श्वेता 4 P1 add. अनुप्रासो रूपकम् उक्तनिमित्ता विशेषोक्तिः ।। ९९ ।।

1 P1 अयोग। 2 P1 om. इति 3 B मुहुः; P2 कुहुः after वैरिणी 4 P2 add. यद्वा पिकेन कुहू रौतीति कुहूरुत् तेन कुहूरुता चन्द्रवैरिणी अमावास्या आहूयत। 5 B वसितः 6 P1 om. नलस्य 7 P1 add. इव 8 P1 add. अथवा प्रत्यक्षचन्द्रं पश्यता। 9 P1 °पि 10 P1 म्लानिं 11 B चक्षुः 12 P2 रौति 13 P1 P2 निरीक्ष्य 14 P1 कोपाविष्ट इव 15 B P1 P2 क्रुद्धा; edr. क्रुद्धो 16 P1 add. प्रत्यक्षसदृशोः साक्षात्। (हला° V. 88)। रुताशब्देनेत्यन्ये। कुहूरुता कोकिला नेति वा। उपमा रूपकमुत्प्रेक्षा ।। १०० ।।

1 P1 अशोक। 2 P1 om. पान्थान् 3B अव° 4 P1 °रहितं 5 P1 add. सापह्नवोत्प्रेक्षा ।। १०१ ।।

1 P1 विलास। 2 P1 नृत्यगीतवाद्यं नाट्यं 3 B आलीनां 4 P1 add. अर्थान्तरन्यासः ।। १०२ ।।

1 P2 text गायिनी° 2 P1 तद। 3 P1 add. तथैव तदर्थमध्याप्य जनेन तद्वने विमुक्ताः 4 P1 add. अनुप्रासो रूपकं च ।। १०३ ।।

1 P1 इती 2 P1 इष्टेन; P2 इति प्रकारेण इष्टेन 3 P2 वनं समृद्धं 4 B बहिश्चिरम् 5 B अपरं 6 P1 om. हर्षं 7 B किल 8 P1 add. उक्तनिमित्ता विशेषोक्तिः ।। १०४ ।।

1 P2 text मधुं वने 2 P1 करेण। 3 P1 add. सर्वर्तुवनमिति संज्ञा वा। 4 P2 add. जलं 5 B तत् 6 P2 तत्र 7 P1 मत्स्यो° 8 P1 add. अनुप्रासः काव्यलिङ्गमुत्प्रेक्षा च ।। १०५ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 लता। 2 P1 add. सिषेवे 3 P1 add. कृतं 4 P1 add. अनुप्रासो रूपकं च ।। १०६ ।।

1 P1 अथ स्वमादाय। 2 B मनांस; 3 P1 add. समुद्ररत्नानि; P2 om. रत्नानि 4 P1 add. आत्मानं वा 5 B °धिक्यं 6 P1 संभवति 7 P1 add. अनुप्रासो रूपकमुत्प्रेक्षा वा समासोक्तिः ।। १०७ ।।

P1 पयोनि। 2 B add. न 3 B जालस्य 4 P1 अर्द्धरुद्धस्य 5 P1 om. इति 6 P1 add तद्वत् शोभनच्छवीन्। सच्छवीनिति पाठे 7 P1 छवीन् 8 P2 om. न 9 P2 दन्ताः किमु 10 P1 add. अनुप्रासोऽपह्नुतिरुपमा च ।। १०८ ।।

1 P1 वयं। 2 P2 छदा 3 B स्फुटेव 4 P2 om. तटप्रान्तः 5 B om. चञ्चलम् 6 P1 बलतुरग° 7 P1 बहुशः 8 P1 add. अनुप्रासोऽपह्नुतिः रूपकमुत्प्रेक्षा च ।। १०९ ।।

P1 सितां। 2 P1 यः सरोऽम्भोधिः 3 P1 कमलानां 4 P1 add. प्रचुरं 5 P2 om. तेषां 6 B एकम् 7 P1 add. एवमुत्तरत्राऽपि यथासंभवम्। अनुप्रासोऽपह्नुतिरुपमा च ।। ११० ।।

1 P1 रथां। 2 P2 पयोम्भोधिः 3 P1 om. किंभूतम्°। 4 B भजन्ते 5 P1 रथाङ्गमायुधविशेषं 6 P1 om. तेन तथा 7 B बाणः; P2 बाणाः 8 B भुवः; P1 तदुद्भवा 9 P1 om. पक्षे 10 P1 add. श्लेषोपह्नुतिः रूपकं च ।। १११ ।।

1 P1 तरं। 2 P1 add. सरः 3 P1 om. प्रियाः 4 P1 अत एव 5 P1 om. च 6 P1 दरम् 7 P1 कोकनदौघानां कोरकैः रक्तोत्पलमुकुलैः 8 P1 add. अनुप्रासो रूपकमपह्नुतिश्च ।। ११२ ।।

1 P1 महीयसः 2 P1P2 नीलोत्पलस्य 3 P1 add. अनुप्रासोऽपह्नुतिर्यथासंख्यं प्रतीयमानोत्प्रेक्षा च ।। ११३ ।।

1 B चलीकृतेति। P1 चली। 2 P1P2 अबला 3 P1P2 शेवाल° 4 P1 om. तासां परम्परा ध्रुवं 5 P1 भूमा यत्र स चासौ धूमश्च तस्य भावस्तथा शेवाल एव........ 6 P1 add. भूमधूम्रतामिति पाठान्तरम्। अनुप्रासोत्प्रेक्षा ।। ११४ ।।

1 P1 प्रका। 2 P2 अप्सरा इव 3 BP2 विग्रहं 4 P1 add. अथवा धृतः स्फुटश्रीगृहो विग्रहो यस्याः 5 B किंभूतम् ?। 6 P1 add. दिवा 7 B

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

करञ्चिताः 8 P1 add. आमोदभरं विवृण्वन्तीः 9 P1 स्फुटं 10 P1 श्रीशोभागृहं 11 P1 °स्थानं 12 P2 om. देहो 13 P1 add. अनुप्रासः श्लेषोपमा ।। ११५ ।।

1 यद । 2 P2 तटः द्रुमः 3 B किं भूतस्य ?। 4 P1 add. अनुप्रासोपमे ।। ११६ ।।

1 B °लक्ष्मीमिति । P1 पयोधि । 2 P1 add. पल्वले 3 B °मवबोधि 4 B मुषति P1 पुष्णाति 5 P1 add. विविधं भ्रमन्तं मृणालादि भक्षयन्तं वा 6 P1 add. चरन्तमिति क्रियाविशेषणं वा 7 P1 दुःखाव° 8 B add. हिरण्मयं 9 B add. अबोधि दृष्टवान् । किंभूते ?। 10 BP2 कदापि 11 P1 हिरण्मयं 12 P1 om. विसर्ग 13 P1 add. अनुप्रास उपमा समासोक्तिश्च ।। ११७ ।।

1 P1 प्रिया । 2 P1 om. च 3 B समो ° 4 P1 add. दधानम् 5 P1 add. समुच्चयो यथासंख्यं रूपकमपह्नुतिश्च ।। ११८ ।।

1 P1 मही । 2 P1 मनाक् ईषत् 3 P1 add. अनुप्रासो विशेषोक्तिश्च विभावना ।। ११९ ।।

1 P1 अव । P2 अवश्यभव्येष्विति । 2 P1 add. वृत्तेन 3 B P1P2 add. वात्या 4 P1 ततश्च 5 P1 add. अत्र विशेषे प्रवृत्ते सामान्यमुदीतम् । यथा हि कृष्णं हि निहत्य नरकासुरवधूनां यदि दुःखं शमयसि तत्त्वमेव श्लाघ्य इति ।

सुहृद्वधूबाष्पजलप्रमार्जनं करोति वैरप्रतियातनेन यः । स एव पूज्यः स पुमान् स नीतिमान् सुजीवितं तस्य स भाजनं श्रियः ।। (का. प्र. X. 51) इति । अनुप्रासोऽप्रस्तुतप्रशंसा उपमा च ।। १२० ।।

1 P1 अथा । 2 P1 सरःसमीपे 3 B रक्तस्तेन 4 P1 add. जातिः ।। १२१ ।।

1 P1 सनाल । 2 B नालत्वम् 3 P1 चरणस्यालोहितत्वात् । and add. ससन्देहः । अनिश्चयः संशय का° लं° VII. 59 इति रुद्रटः ।। १२२ ।।

1 P1 कृतावरोहस्य । 2 P1 विरेजतुः 3 P1 तया 4 P2 om. इव 5 P1 किसलयैः 6 B पदयोगश्च 7 P1 om. च 8 P1 add. यथासंख्य मुत्प्रेक्षा च ।। १२३ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 विधाय मूर्तिम् । 2 P1 add. पदेन वा 3 P1 om. अपि 4 P1P2 बलेर्ध्वंस° 5 P1 °त्रयस्य 6 P1 add. मौलिनेति पठित्वा मुकुटेनोपलक्षित इति व्याचष्टे अन्यः । उपमा च ।। १२४ ।।

1 P1 तदात्त । 2 P1 केवलं after करौ 3 P1 add. प्रायसदिति लुट् । जातिः ।। १२५ ।।

1 P1 ससं । 2 P1 add. नलं 3 P1 add. उपमा वा करैरिव 4 P1 प्रतिपद्य 5 P1 om. स्वं 6 P1 उन्मनस्त्वेन 7 P1P2 पूर्वकं 8 B च तैः 9 B निषेध्यते; P1 add. उत्क उन्मना । येनान्तर्जलचारिभिर्जलचरैरप्युत्कमुत्कजित (व.°जी° II. xvi. 59) मिति । अत्र धर्ममात्रेऽपि प्रयोगो दृश्यते । सोत्कण्ठश्चान्यत्र । अनुप्रासोत्प्रेक्षोपमाः समासोक्तिश्च ।। १२६ ।।

1 B पतत्रिणेत्यादि । P1 पतत्रि । 2 B कलहंसीनां 3 P1 विहाय 4 P1 om. उत्प्रेक्षते 5 P1 सरो विहाय निर्गच्छतीत्याह 6 P1 om. अत्र; P2 om. अत्रानुप्रास ....समासोक्तिश्च । 7 B P1 °नुप्रासोपमा ।। १२७ ।।

1 P1 न वास । 2 P1 पक्षिणः 3 P1 इति किम् ? 4 P1 add. येन 5 P1 जातिः पर्यायः उत्प्रेक्षा च ।। P2 om. उत्प्रेक्षालङ्कारः ।। १२८ ।।

1 P2 text. मुदा 2 P1 न जात । 3 P2 om. तेन 4 B जनाधिपः 5 B करपङ्कजः P1 करमेव पञ्जरं 6 P1 इति किम् ? 7 P1 add. अनुप्रासो रूपकं च ।। १२९ ।।

1 P1 धिग । P2 धिगस्तु तृष्णेति । 2 P1 तुषारनीहार 3 P1 बहुभिः 4 P1 om. कियान् 5 P1 जलस्य 6 P2 om. वृद्धिः 7 P1 भवति 8 P1 P2 om. अपितु 9 P1 उपमा । कमलोदय इति श्लिष्टम् ।। P2 om. उपमालङ्कारः ।। १३० ।।

1 P1 न के । 2 P1 add. मे 3 P1 किंभूतः 4 BP1 स तथा 5 P2 निर्बर्हणं 6 B P2 विगर्हितं विशेषेण 7 P1 अनुप्रासोऽर्थान्तरन्यासश्च ।। P2 om. अत्र........ मलङ्कारः ।। १३१ ।।

1 P1 पदे पदे । 2 P1 P2 om. योधाः 3 P2 विषयेषु 4 B पतत्रिणि 5 P1 add. अनुप्रासः ।। १३२ ।।

1 P1 फलेन ।; P2 फलेन मूलेनेति । 2 P2 add. अथवा वारिरुहां फलेन भूरुहां मूलेन च 3 edr. add. अद्य 4 P1P2 धरिणी 5 B om. न

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

6 P1 add. हृणीङ् (2137) कण्डवादिः घृणार्थो, कण्डवादिभ्यो यक् (पा. III. 1. 27) इति यक् । अनुप्रास उपमा यथासंख्यमपि ।। १३३ ।।

1 P1 इती । 2 P1 add. कृतवान् 3 P2 च कृपया 4 P1 add. अनुप्रासो रूपकं च ।। १३४ ।।

1 P1 मदे । P2 मदेकपुत्रेति 2 P1 अस्याः 3 P1 add. म्रियते इति वरय । स्त्रीविषयत्वात् जाते (तौ) ङीप् नास्ति । 4 P2 om. वर्तमान .... शतृङ्प्रत्ययः । 5 P2 अथ 6 BP1 शतृङ्° 7 P1 add. अन्यस्तु गतिस्तयोरेष इति वाक्यच्छेदं कृत्वा जनो नललक्षणस्तमर्द्दयत् वर्त्तते इति व्याचष्टे । परिकरोनुप्रासश्च ।। १३५ ।।

1 P1 मुहूर्तं । 2 P1 add. न लोकाव्यये (पा° II. iii.6a) त्यादिना कर्तरि षष्ठी प्रतिषेधः । 3 P1 मयि दयापराः दयासखाः 4 P1 add ते तथा 5 P1 add. अनुप्रासो रूपकं च ।। १३६ ।।

1 मदर्थमिति । P1 मदर्थ । 2 P1 add. वान् 3 B इति इति किम् ?; P1 इति किम् ? 4 B ग्रामं गच्छति 5 B समर्थं; P1 मदर्थः नवकलिकार्पणं 6 P1 मृणालैः मदर्थ सन्देशेन आहृतानि वा मृणालानि तैर्मन्थरः । 7 P1 add. भावोदयोऽनुप्रासश्च ।। १३७ ।।

1 P1 कथं । 2 P1 P2 om. हे 3 edr. add. मयि 4 B विनिर्गता 5 P1 कथंभूता ? 6 B तप्यति 7 P2 यस्या 8 BP1 इति किम् ? । 9 B विरहं पश्यसि; P2 प्राप्स्यति । 10 P1 add. प्रोपाभ्यां युजे (पा° I. iii. 64) रित्यत्र स्वराद्यन्तोपसृष्टात् (वा. 630) इति वक्तव्यबलात् । अथवा कर्मकर्तरि आत्मनेपदम् । 11 P1 प्रियाः 12 P2 om. शीतत्वस्य 13 B किल before तादृग्गुणं 14 P1 add. शैत्यमृदुत्वशिल्पित्वेन 15 P1 om. च 16 P1 add. रूपकं विषयं च ।। १३८ ।।

1 P2 text °दीना 2 P1 अयि 3 B P2 हे लोलाक्षि at the end. 4 B परिक्षिभिः 5 B दिशा° 6 P1 add. उपमा च ।। P2 om. अनुप्रासः ।। १३९ ।।

1 P2 text विच्चित्रा° 2 P2 text ही 3 P1 मयैव । 4 P1 add. विचित्राङ्गी । 5 B शोकेन एव 6 P2 विपत्ति 8 P1 बालकाः पुत्राः 9 P1 तवापि 10 P1 add. काव्यलिङ्गम् ।। १४० ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 तवापि । P2 तवापि हाहेति । 2 P1 om. हे प्रिये ! 3 B नीऽतेषु 4 B लक्ष° 5 BP1 पूर्वा° 6 P1 add. अनुप्रासो विरोधोऽपि ।। १४१ ।।

1 P1 सुताः । B सुताः कमाहूय इति । 2 B किमिति 3 P1 कमाहूय here 4 B प्रर्थइष्यत 5 P1 om. तथा 6 P1 कम्प्राणि मुखानि प्रसारितानि वदनानि 7 P2 संमुखानि 8 B P2 अर्द्धोक्त........ कण्ठत्वात् aft. न्यूनार्थे गुणः । 9 P1 न्यूनपदं 10 P1 add. अमरुकः 11 B add. विसर्ग 12 P1 गता 13 P1P2 स्यादि° 14 P1 ततः 15 B प्रनष्टं 16 P2 सहसा 17 B सकाशात् 18 P1P2 हंसकृपरा° 19 P1 °पातमेकेन 20 P1 add. शिष्यध्वमिति पाठे कमाहूय कं प्रति कम्प्राणि मुखानि कृत्वा कथासु शिष्यध्वं चतुरा भविष्यथ इति व्याख्या । भावोदयोऽनुप्रासो जातिश्च । सर्वत्र वंशस्थं वृत्तम् ।। १४२ ।।

1 P1 इत्थ । P2 इत्थममुमिति 2 BP1 इति किम् ?। 3 P1 add. इति । दोधकवृत्तम् । अनुप्रासः काव्यलिङ्गं च ।। १४३ ।।

1 P1 आनन्दजा । P2 आनन्दजाश्रुभिरिति । 2 P2 °रस्रं: 3 B add. स्खलित° 4 B °शोकाश्रूणि 5 P1 add. अनवच्छिन्नमेव 6 P1 add. प्रवाहान् 7 P2 add. विमुक्तस्य 8 P1 add. रुद्रटमतेन; P2 om. आनन्दाङ्गता........सङ्करः । 9 P1 add. वसन्ततिलकावृत्तम् । and read अनुप्रासो जातिरपह्नुतिश्च मुम्भुटालकमतेन ।। १४४ ।।

1 P2 text नैषधीय° 2 P1 श्रीहर्षम् 3 P2 श्रीहर्ष यं 4 P2 मणिः 5 P2 मणि° 6 P1 वैरसेनस्य 7 P1 add. शार्दूलविक्रीडितं वृत्तम् । अनुप्रासः ।। P2 add. महाकाव्यत्वं चास्य सर्गसम्बन्धादिलक्षणयोगात् । तथाहि प्रथमश्लोके वस्तुनिर्देशः कृतः । सर्गनिबन्धोऽपि विद्यते । प्रथमसर्गे स्फुरदि(६)त्यादिना सङ्ग्रामवर्णनं, फलानि पुष्पाणी(७२)त्यादिना वनवर्णनं सूचितम् । [व्यर्तकि] सर्वर्तु घने वने (१०५) इत्यनेन ऋतुवर्णनसूचनम् । अथ स्वमादाये(१०७)त्यादिनाऽब्धिवर्णनसूचनम् । द्वितीयसर्गे नगरवर्णनं दूतप्रयाणं च कथितम् । षष्ठ(म)चतुर्थनवमसर्गेषु विप्रलम्भवर्णनम् । षोडशे विवाहः । अष्टादशे नैक(?)वर्णनं सूचितं, मधुपानरतोत्सववर्णनं च कृतम् । एकोनविंशे सूर्योदयवर्णनम् । विंशे वनकेलौ स्मराश्वत्थदलमि(९६)त्यनेन वनक्रीडा सूचिता । एकविंशे देवतास्तुतिः । द्वाविंशे चन्द्रोदयवर्णनम् । नायकोदयस्तु समस्तेनाऽपि । सलिलक्रीडाद्यवर्णनेऽपि महाकाव्यत्वभङ्गप्रसङ्गाः—न्यूनमप्यत्र यैः कैश्चिदङ्गैः काव्यं न दूष्यती (का.द. I. 20 ab) त्युक्तत्वात् । नैषधसम्बन्धि नैषधीयम् । वृद्धाच्छः (पा° IV. ii. 14) ।। १४५ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P2 cd आचार्यान्मुनिदेवसूरिबुधतः श्रुत्वा पुरा नैषधं, टीकां स प्रथमे नलीयचरिते सर्गे ततो निर्ममे ।। 2 B to P mg.-"पंक्ति ६ श्लोकः अर्द्धंगलितोऽस्ति, though complete. 3 B °वटेक° 4 P1 पूर्वत्र सर्गे शुभा । शार्दूलविक्रीडितम् । 5 P1 सिधा 6 P2 om. इति 7 P1 verse nos. 1-5 8 P1 प्रसादा 9 P1 inst. म्लेच्छोपलिङ्गाद् गलितप्रतीकां टीकामिमां पूरयति स्म सम्यक् ।। ५ ।। 10 P1 add. इति धवलक्ककवास्तव्य—नागर-श्रोत्रियावतंस - पण्डितश्रीवैद्यनाथशिष्यऋग्भाष्यकृत - लक्षहोमचतुष्टयकृत्-सम्राट्-स्थपति-सोमसंस्थायाजि-द्वादशाहाग्निवि(चि)द्-दीक्षित-श्रीचाण्डूविरचितायां नैषधदीपिकायां टीकायां हंसगमनो नाम प्रथमः सर्गः ।।छ।। ।।छ।। ।।छ।। 11 P2 श्रीनैषध° ।।

———— ❀ ————

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

सर्ग—२

द्वितीयः सर्गः

पूर्वसर्गे[1] नलस्य वर्णनपुरःसरं दमयन्त्याः समाकर्णनं राज्ञोऽपि तद्गुणश्रवणरण[2] रणकजनितपूर्वकमश्वोपवनतडागवर्णनं[3] च कृत्वा हंस-दर्शनग्रहणतद्वचननिरूपणमोचनान्यभिधाय[4] इदानीं प्रत्युपकर्तुं हंसस्य भैमीवर्णनपूर्वं गमनद्वारेण नगरीं विवर्णयिषुः कविर्द्वितीयं सर्गमारभते ।।

अधिगत्य जगत्यधीश्वरादथ मुक्तिं पुरुषोत्तमात्ततः ।
वचसामपि गोचरो न यः स तमानन्दमविन्दत द्विजः ।। १ ।।

अधिगत्येति[1] । अथ स द्विजो हंसः तमानन्दमविन्दत य आनन्दः वचसामपि न गोचरः अविषयः । किं कृत्वा ?। ततस्तस्मात् पुरुषोत्त-मान्नलात्[2] मुक्तिं मोचनमधिगत्य प्राप्य । किंभूतात् ?। जगत्या अधी-श्वरात् । अथ च स द्विजो ब्राह्मणः ब्रह्मनिष्ठः कश्चित् तमानन्दमविन्दत यो वचसामपि[4] न गोचरः । अपिशब्दान्मनसोऽप्यविषयः । तथा च श्रुतिः-यतो वाचो निवर्तन्ते अप्राप्य मनसा सह । आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चन ।। (तै. 3. II. 4) ।। किं कृत्वा ?। पुरुषोत्तमात्[5] पुरुषेषु उत्तमाद् अधिकादीश्वरात् मुक्तिं[6] बन्धात् संसारात् मोक्षमधि-गत्य[7] । ननु[8] मुक्तिं प्राप्य आनन्दम् अविन्दतेति[9] कथं घटते, यतो मुक्तिरेवाऽऽनन्दः ?। सत्यम् । यदि स[10] ईश्वरात् मुक्तिमविन्दतेत्युच्यते, तदा आत्यन्तिकी दुःखनिवृत्तिमोक्ष इति तार्किकाणां मोक्षशेषगुणोच्छेदो[11] मोक्षः स्यात् । वेदान्तसिद्धान्ते तु दुःखोच्छेदपुरःसरं[12] निरतिशयानन्द-प्राप्तिमोक्ष इति । तदर्थं मुक्तिं प्राप्याऽऽनन्दमविन्दत आनन्दस्वरूपं[13] लब्धवानित्यर्थः । लौकिकदृष्ट्या इदमुक्तं यद् आनन्दमविन्दत । परमार्थतस्त्वानन्द एव जातः[14] ।। १ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

अधुनीत खगः स नैकधा तनुमुत्फुल्लतनूरुहीकृताम् ।
करयन्त्रणदन्तुरान्तरे व्यलिखच्चञ्चुपुटेन[1] पक्षती ।। २ ।।

अधुनीव[2] इति । स खगो हंसः तनुं शरीरं नैकधा अनेकधा अधुनीत । किंभूताम् ?। उत्फुल्लानि तनूरुहाणि रोमाणि यस्याः तां तथाविधां[3] कृताम् । तथा[4] पक्षती चञ्चुपुटेन व्यलिखत् समीचकार[5] । किंभूते ?। करयन्त्रणेन[6] हस्तग्रहणेन दन्तुरं विषममन्तरं[7] ययोः[8] ते तथा । दन्त उन्नत उरच्[9] (पा. V. ii. 66) इति[10] उरच् । स्वभावोक्तिः[11] ।। २ ।।

अयमेकतमेन पक्षतेरधिमध्योर्ध्वगजङ्घमङ्घ्रिणा ।
स्खलनक्षण एव शिश्रिये द्रुतकण्डूयित मौलिरालयम् ।। ३ ।।

अयमेकेति[1] । अयं हंसः स्खलनक्षण एव मोचनकाल एव आलयं नीडं शिश्रिये । किंभूतः ? एकतमेन अङ्घ्रिणा द्रुतं कण्डूयितो[2] मौलिर्मस्तकं येन स तथा । कथम् ?। यथा भवति । पक्षतेर्मध्यम् अधि लक्षीकृत्य पक्षमध्येन[3] स्थित्वा । ऊर्ध्वगा जङ्घा यत्र कण्डूयते तत्तथा । अथवा यदेकेन[4] चरणेन द्रुतकण्डूयितमौलिः[5] जातः, तदेकेनैव चरणेन भूमौ स्थितत्वात् स्खलितः[6] । ततश्च स्खलनक्षण एव खगत्वात्[7] पतनक्षण एव आलयमाकाशं शिश्रिये उड्डीन इत्यर्थः । पक्षिणामयं जातिस्वभावो वर्णितः ।। ३ ।।

स गरुद्वनदुर्गदुर्ग्रहान् कटु कीटान् दशतः सतः क्वचित् ।
नुनुदे तनुकण्डुपण्डितः पटुचञ्चूपुटकोटिकुट्टनैः ।। ४ ।।

स गरुद्वनेति[1] । स हंसः क्वचित्कटु तीव्रं यथा भवति दशतः सतः कीटान् दंशमशकादीन्[2] नुनुदे प्रेरयामास । कैः ?। पटुनश्चञ्चूपुटस्य या कोटिरग्रं तस्याः कुट्टनैः । [किं]भूतः ?। तन्वाः शरीरस्य कण्डुः कण्डूयनं तत्र पण्डितो दक्षः । किंभूतान् कीटान् ?। गरुतां पक्षाणां[3] वनमेव दुर्गस्तत्र[4] दुर्ग्रहान्[5] ।। ४ ।।

अयमेत्य तडागनीडजैर्लघु पर्यव्रियताऽथ शङ्कितैः ।
उदडीयत वैकृतात्करग्रहजादस्य विकस्वरस्वरैः ।। ५ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

अयमेत्येति । अयं हंसः प्रथमं तडागस्य नीडजैः । पक्षिभिरेत्य आगत्य लघु शीघ्रं पर्यव्रियत । अथ तैः करग्रहात् जातात् वैकृतात्[3] शरीरविकारात् शङ्कितैः सद्भिः उदडीयत । किंभूतैः ?। विकस्वराः स्वराः येषां तैः[4] तथा[5] ।। ५ ।।

वहतो बहु शैवलक्ष्मतां धृतरुद्राक्षमव्रतं खगः ।
स नलस्य ययौ[1] करं पुनः सरसः कोकनदभ्रमादिव ।। ६ ।।

वहत[2] इति । स खगो हंसः पुनरपि नलस्य करं हस्तं ययौ । उत्प्रेक्षते-सरसः सरोवरस्य[3] कोकनदस्य रक्तोत्पलस्य भ्रमादिव[4] । किंभूतस्य सरसः ?। बहुशैवला क्ष्मा[5] पृथिवी यत्र तस्य भावस्तत्ता तां वहतः । किं भूतं करम् ?। धृताः रुद्राक्षा एव मधुव्रता येन तं तथा । नलोऽपि बहूनि शैवानि शिवभक्तस्य लक्ष्माणि चिह्नानि भस्मपुण्ड्रादिकानि यस्य भावस्तत्ता तां वहति[7] । कोकनदं[8] तु धृत मधु[9] व्रतम्[10] ।। ६ ।।

पतगश्चिरकाललालनादतिविश्रम्भमवापितो[1] नु सः ।
अतुलं विदधे कुतूहलं भुजमेतस्य भजन्महीभुजः[2] ।। ७ ।।

पतग[3] इति । स पतगः पक्षी भुजं भजन् सन् एतस्य[4] महीभुजः नलस्य[5] अतुलं कुतूहलं विदधे । नु इति वितर्के । चिरकाललालनात् अतिशयेन विश्रम्भं विश्वासम् अवापितः[6] प्रापित इव[7] । अत्रानुप्रासः ।। ७ ।।

नृपमानसमिष्टमानसः स निमज्जत्कुतुकामृतोर्मिषु ।
अवलम्बितकर्णशष्कुलीकलसीकं रचयन्नवोचत् ।। ८ ।।

नृपमानसम्[1] [इ]ति । इष्टं मानसं सरो यस्य स हंसः[2] अवोचत् । किंकुर्वन् ?। नृपस्य मानसं मनः अवलम्बिते विधृते कर्णशष्कुल्यौ एव कलस्यौ[3] येन तत्तथाविधं रचयन् । इन्द्रियान्तरपरित्यागेन कर्णदेशे अवहितं मनो जातम्[4] । किं कुर्वन्मनः ? कुतुकं[5] कौतुकं तदेव अमृतं तस्योर्मिषु निमज्जत् । यः कश्चित् तरणयोर्मिषु निमज्जति स तरणार्थं[7] कलशद्वयं गृह्णाति । अथ[8] च इष्टमानसं नलमनो यस्य । यः किल एवंभूतः स कथं मानसं ब्रुडन् मुञ्चति । यः किल ब्रुडति स तरणार्थं घटांवलम्बनं कुरुते । अवलम्बिते कर्णकुपिके एव कलसी ब्रुडकुम्भौ येन ।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

इष्टमानसत्वात् । ऊर्मिषु मज्जतो[9] मानसस्य कलस्यावलम्बनं हेतुत्व-युक्तम्[11] ।। ८ ।।

मृगया न विगीयते नृपैरपि धर्मागममर्मपारगैः ।
स्मरसुन्दर ! मां यदत्यजस्तव धर्मः स दयोदयोज्ज्वलः ।। ९ ।।

मृगया[1] नेति । नृपैर्धर्मागमो धर्मशास्त्रं स्मृतिः[2] तस्य मर्म[3] रहस्यं तत्र पारगैरपि मृगया आखेटकं न विगीयते[4] न निन्द्यते । हे स्मरसुन्दर ! यन्मां[5] त्वम् अत्यजः स तव धर्मो दयाया[6] उदयेनोज्ज्वलः । काव्य-लिङ्गम् ।। ९ ।।

अबलस्वकुलाशिनो झषान्निजनीडद्रुमपीडिनः खगान् ।
अनवद्यतृणार्दिनो मृगान् मृगयाऽघाय न भूभृतां घ्नताम् ।। १० ।।

अबलेति[1] । भू[भृ]तां राज्ञां झषान् मत्स्यान् घ्नतां मृगया अघाय[2] पापाय न भवति । किंभूतान् ?। अबलं स्वं निजं कुलम् अश्नन्तीत्ये-वंशीलान् । बलिभिर्दुर्बला भक्ष्यन्त इति मात्स्यो[4] न्यायः । तथा राज्ञां निजं नीडद्रुमं सर्वप्रकारैः[5] पीडयन्तीत्येवंशीलान् खगान्[6] पक्षिणो घ्नतां मृगया अघाय[8] न । तथा अनवद्यानीति[9] तद्विरुद्धेन नञ् । प्रशस्यानि तृणान्यर्द्दन्तीत्येवंशीलान् मृगान् घ्नताम् । यतो[10] राज्ञा अन्यायिनो दण्डयाः ।। १० ।।

यदवादिषमप्रियं तव प्रियमाधाय नुनुत्सुरस्मि तत् ।
कृतमातपसंज्वरं तरोरभिवृष्यामृतमंशुमानिव ।। ११ ।।

यदवादिषमिति[1] । यदहं तवाऽप्रियमवादिषं तत्प्रियमाधाय[2] नुनुत्सु-रस्मि[3] अपनेष्यामि । क इव ?। अंशुमानिव । यथा श्रीसूर्यः तरोर्वृक्षस्य कृतम्[4] आतपसंज्वरं तापममृतम्[5] अभिवृष्य नुदति । अत्र[6] बिम्बप्रति बिम्बभावेन द्रष्टान्तोत्प्रेक्षोपमालङ्कारः ।। ११ ।।

उपनम्रमयाचितं हितं परिहर्तुं न तवापि साम्प्रतम् ।
करकल्पजनान्तराद्विधेः शुचिनः प्रापि स हि प्रतिग्रहः ।। १२ ।।

उपनम्रमिति[1] । हे राजन् ! तवाप्ययाचितं हितं[2] रुचिरं उपनम्रं स्वयं[3] ढौकितं प्रियं परिहर्तुं न साम्प्रतं न युक्तम् । हि यस्मात् स प्रतिग्रहः विधेर्दैवात्[4] प्रापि प्राप्तः । किंभूतात् ?। शुचिनः पवित्रात्[6] तथा

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

करकल्पं विधिहस्ततुल्यं जनान्तरं मल्लक्षणं यस्य तस्मात्[7] तथा। अहं ब्रह्मणो हस्ततुल्यः। मया यद्दत्तं तद्विधिनैव दत्तम्[8]। तत्त्वं गृहाण। तथा[9] च-अयाचिताऽऽहृतं ग्राह्यमपि दुष्कृतकर्मणः (याज्ञ° आचारा° राड) इत्यादिभिर्विहितोऽयं प्रतिग्रहः। अत्र काव्यलिङ्गमलङ्कारः ॥ १२ ॥

पतगेन मया जगत्पतेरुपकृत्यै तव किं प्रभूयते।
इति वेद्मि न तु त्यजन्ति मां तदपि प्रत्युपकर्तुमर्तयः ॥ १३ ॥

पतगेनेति[1]। मया पतगेन पक्षिणा तव जगत्पतेः[2] उपकृत्यै उपकाराय किं प्रभूयते[3] किं समर्थेन भूयते ?। अपि तु न। अहमिति वेद्मि जानाम्येव[4]। तु पुनस्तदपि त्वां[5] प्रत्युपकर्तुम् अर्तयः[6] आधयो मां न त्यजन्ति। आधिभिरहं जानन्नपि व्याकुलितोऽस्मि ॥ १३ ॥

अचिरादुपकर्तुराचरेदथवात्मौपयिकीमुपक्रियाम्।
पृथुरित्थमथाणुरस्तु सा न विशेषे विदुषामिह ग्रहः ॥ १४ ॥

अचिरादिति[1]। अथवाशब्दः[2] पूर्वोक्त[3] माक्षिपति। अथवा उपकर्तुं पुरुषस्य अचिरात् तत्क्षणमेव[4] आत्मौपयिकीं सोपायसाध्यामुपक्रियां[5] पुरुष आचरेत्। इत्थम् अनेन प्रकारेण स्वसाध्योपायप्रकारेण अचिरलक्षणेन[7] सा[8] उपक्रिया पृथुर्महत्यस्तु अथवा अणुः स्वल्पाऽप्यस्तु[9]। इहाऽस्मिन् विशेषे[10] अल्पोऽहं मल्लक्षणे विदुषां जानतां नृणां[11] न ग्रहः[12] न निर्बन्धः[13] ॥ १४ ॥

भविता न विचारचारु चेत्तदपि श्रव्यमिदं मदीरितम्।
खगवागियमित्यतोऽपि किं न मुदं धास्यति कीरगीरिव ॥ १५ ॥

भविता[1] नेति। चेत् यदि मम इदम्[2] ईरितं चारु[3] न भविता भविष्यति। तदपि त्वया श्रव्यं श्रोतव्यम्। अतोऽपि कारणात् इति[4] मम वचनं तव किं मुदं न धास्यति। अपि तु करिष्यति। इतीति[5] किम् ?। इयं[6] खगस्य मानुषी वाक् कीरस्य शुकस्य गीर्वाक्[7] यथा मुदं कुरुते। शुकभाषिता[8] कदापि न गुणः, परं पक्षी मनुष्यवागेव गुणः। अनुप्रासः[9] ॥ १५ ॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

स जयत्यरिसार्थसार्थकीकृतनामा किल भीमभूपतिः ।
यमवाप्य विदर्भभूः प्रभुं हसति द्यामपि शक्रभर्तृकाम् ।। १६ ।।

स[1] [ज] यतीति । किलेति श्रूयते । स भीमभूपतिर्जयति । किंभूतः ?। अरिसार्थे[2] सार्थकीकृतं नाम येन स तथा । भीमत्वाद्भयङ्करः । यं भीमं प्रभुमवाप्य विदर्भदेशस्य भूः द्यामपि हसति । किंभूताम् ?। शक्र इन्द्रो भर्ता यस्याः तां तथा । अथ[4] च शक्यते इति शक्र । अथवा शङ्कते इति शक्रः । शङ्कायां[5] रप्रत्ययः । अत[6] एव नद्यृतश्चे (पा° V. i. 153)ति विहितोऽपि कुत्सायां[8] कप् प्रत्ययः । अत्र तु भीमो भर्ता[9] । अनुप्रासोपमे ।। १६ ।।

दमनादमनाक्प्रसेदुषस्तनयां[1] तथ्यगिरस्तपोधनात् ।
वरमाप स दिष्टविष्टपत्रितयानन्यसदृग्गुणोदयाम् ।। १७ ।।

दमनादिति[2] । स भीमो दमनान्नाम्नः[3] तपोधनात् तथ्यगिरः सत्यवाचः[4] तनयां पुत्रीं[5] वरमाप । किंभूतात् ?। अमनाक्[6] अधिकं प्रसेदुषः तुष्टात्[8] प्रसन्नात् भक्त्यादिना[9] । किंभूताम् ?। दिष्टत्रये[10] कालत्रये विष्पत्रितयेऽपि[11] [अ]नन्यसदृगसाधारणो[12] गुणोदयो यस्याः तां तथा । अथवा[13] दिष्टः कथितो[14] विष्टपत्रितयेऽनन्यसदृक् गुणोदयो यस्याः तां[15] तथा ।। १७ ।।

भुवनत्रय सुभ्रुवामसौ दमयन्ती कमनीयतामदम् ।
उदियाय यतस्तनुश्रिया दमयन्तीति ततोऽभिधां दधौ ।। १८ ।।

भुवनत्रयेति[1] । इयं तनया भुवनत्रयस्य सुभ्रुवां स्त्रीणां कमनीयताया मदं गर्वं तनुश्रिया शरीरशोभया कृत्वा[2] दमयन्ती सती अ[प]-नयन्ती यत[3] उदियाय ततो दमयन्तीति अभिधां नाम[5] दधौ[6] ।। १८ ।।

श्रियमेव परं धराधिपाद्गुणसिन्धोरुदितामवेहि ताम् ।
व्यवधावपि वा विधोः कलां मृडचूडानिलयां न वेद कः ।। १९ ।।

श्रियमेवेति[1] । त्वं[2] तां दमयन्तीं श्रियमेव[3] लक्ष्मीमेव अवेहि[4] जानीहि । किंभूताम् ?। परं धराधिपात् राज्ञ सकाशात् गुणानां सिन्धोः समुद्रात् उदिताम्[5] उत्पन्नाम् । वा अथवा[6] विधोश्चन्द्रस्य कलां व्यवधावन्तर्द्धानेऽपि सति दूरेऽपि[7] मृडस्य[8] श्रीमहादेवस्य चूडा-

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

निलयां[9] को न वेद । सर्वोऽपि जानाति । अत्र विधोरिती विधेयम् अत एव [1] समासः । यथा नागरिकाणां पत्तीन् हराभि[10] रूपकमाक्षे [प] श्च ।।१६।।

चिकुरप्रकरा जयन्ति ते विदुषी मूर्द्धनि साऽऽबिभर्ति यान् ।
पशुनाप्यपुरस्कृतेन तत्तुलनामिच्छतु चामरेण कः ।। २० ।।

चिकुर[1] प्रकरा इति । ते चिकुराणां प्रकराः[2] केशसमूहा जयन्ति । सा विदुषी विशेषज्ञा यान् मूर्द्धनि आबिभर्ति[3] आभरणरूपान् करोति । साऽऽबिभर्ति इति आकारप्रश्लेषः कार्यः । तेषां केशाना[4] तुलनां[5] चामरेण सह तुलां साम्यं क इच्छतु । किंभूतेन[6] ? । पशुनापि[7] चमरीलक्षणेनापि अपुरस्कृतेन[8] पश्चात् पुच्छभागे[9] कृतेन । अथ च अपूजितेन । केशान् सा विदुषी[10] मूर्द्धनि पुरस्करोति । चामरं तु मूर्खेणाऽपि[11] पशुना [पि] न पुरस्कृतम् । ततोऽनेन सह किं साम्यम् । अतिशयोक्तिः ।। २० ।।

स्वदृशोर्जनयन्ति[1] सान्त्वनां खुरकण्डूयनकैतवान्मृगाः ।
जितयोरुदयत्प्रमीलयोत्तदखर्वेक्षण शोभया भयात् ।। २१ ।।

स्व[2] दृशोर्जनयन्तीति । मृगाः खुरैः यत्[3] यत् चक्षुषां कण्डूयनं तस्य कैतवात् स्वयोर्दृशोः सान्त्वनां प्रियवाक्यस्तुतिं जनयन्ति । किंभूतयोः ?। भयात् उदयन्ती उत्पद्यमाना प्रकृष्टा मीला[4] प्र[5] मीलनं ययोस्तयोस्तथा । यतस्तस्याः अखर्वा[6] महती या ईक्षणयोर्लोचनयोः शोभा तया जितयोः[7] । अन्योऽपि यः जितः स निमीलिताक्षः स्यात्तस्याः सान्त्वनत्वं युक्तम् । जितत्पाद्ध्रयं[8] तस्मान्निमेषणम् । अथ च मृगा[9] यदा खुरैश्चक्षुः कण्डू[10] यन्ति तदा निमीलनं स्वभावः ।[11] समासो [क्ति] रपह्नुतिश्च ।। २१ ।।

अपि लोकयुगं दृशावपि श्रुतदृष्टा रमणीगुणा अपि ।
श्रुतिगामित्तया दमस्वसुर्व्यतिभाते सुतरां धरापते ।। २२ ।।

अपि[1] लोकयुगमिति । हे धरापते ! नल ! लोकयुगं पृथ्विस्व[2] लोकलक्षणमपि व्यतिभाते । व्यतिहारे आत्मनेपदम् । एक[3] वचन प्रयोगः । विनियमेन शोभते । दमस्वसुर्दमयन्त्याः श्रुतिगामितया । स्पर्शे पृथिव्यां श्रुतिगामिता[5] तया । अथवा पाताललोक[6] स्वर्गलोक द्वयम् उभयत्र श्रुतिगामिता, न तु दमयन्तीदर्शनम् । अतो विनिमयेन

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

सदृशी[7] शोभा। तथा दमस्वसुर्दृशावपि व्यतिभाते। द्विवचन प्रयोगः। विनिमयेन शोभेते। कया ?। श्रुतिगामितया कर्णान्तगामितया। लोचनद्वयमपि कर्णान्तविश्रान्तम्। तथा श्रुताः सामुद्रिक[9] शास्त्रे दृष्टाश्च दमयन्त्या[10] रमणी[11] गुणाः स्त्रीगुणा अपि सुतरां व्यतिभाते[12]। विनिमयेन शोभन्ते। बहुवचनप्रयोगः। कया ?। श्रुतौ वेदे गामितया। स्त्रीगुणा यादृशाः श्रुतौ अनुगताः[13] त एव दमयन्त्यां दृश्यन्ते।

व्यतिभाते-व्यतिभाते-व्यतिभाते-ते आते अते[14]। आत्मने चानकाराद् (का० III. V. 39) इति बहुवचने नकारलोपः। अथवा[15] श्रुतदृष्टा गुणा व्यतिभाते व्यतिक्रमेण शोभन्ते, श्रुतदृष्टा इव शोभन्ते। श्रुता दृष्टा इवेति। यतो हि लोके श्रूयन्ते बहवः, दृश्यन्ते अल्पाः। दमयन्त्यास्तु विपर्ययः— श्रूयन्ते अल्पाः, दृश्यन्ते बहवः। किं तु गुणाः वचसामगोचराः अनुभवैकगम्या एव। अथ च[16] लोकयुगं स्वर्गपृथिवी[17] लक्षणं दमस्वसुः[18] श्रुत्या गामितया उत्कृष्टा[19] व्यतिभाते। पूर्वं स्वर्ग उत्कृष्टः प्रसिद्धः[20]। पृथिवी[21] निकृष्टा। इदानीं श्रुत्या स्वर्गो निकृष्टः, पृथिवी[22] च गामितया उत्कृष्टा। दृशावपि कर्णगामितया व्यतिभाते। यदा दक्षिणं चक्षुर्दृश्यते, तदा[23] तदुऽकृष्टम्। वामं तथा[24] न भविष्यतीति कृत्वा निकृष्टमिति व्यतिभाते। वामे तु दृश्यमाने तदेवोत्कृष्टम्। पूर्वदृष्टं दक्षिणं निकृष्टमिति प्रतीतिः[25]। वेदगामितया रमणीगुणा अपि व्यतिभाते[26]। पूर्वं किल श्रुता उत्कृष्टाः दृष्टा निकृष्टाः। दमयन्त्यां तु[27] दृष्टा उत्कृष्टा वेदश्रुतास्तदपेक्षया निकृष्टा इति वैपरीत्यम्॥ २२॥

नलिनं मलिनं विवृण्वती पृषतीमस्पृशती तदीक्षणे।
अपि खञ्जनमञ्जनाञ्चिते पिदधाते रुचिगर्वदुर्विधम्॥ २३॥

नलिनं मलिन[1] मिति। तस्या ईक्षणे लोचने खञ्जनमपि खञ्जरीटमपि रुचिः शोभा तस्या[2] गर्वस्तेन दुर्विधं दरिद्रं[3] गर्वरहितं विदधाते। किंभूते ?। अञ्जनाञ्जिते[4] अञ्जनेनाऽञ्चिते व्याप्ते पूजिते[5]। किं कुर्वती ?। नलिनं मलिनं विवृण्वती। तथा पृषतीं मृगीम् अस्पृशती।[6] छेकानुप्रासातिशयोक्ती॥ २३॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

अधरं किल बिम्बनामकं फलमाभ्यामिति भव्यमन्वयम् ।
लभतेऽधरबिम्ब इत्यदः पदमस्या रदनच्छदे वदत् ।। २४ ।।

अधरमिति[1] । अधरबिम्ब[2] इत्यदः पदम् अस्या रदनच्छदे ओष्ठौ[3] वदत् सत् भव्यम्[4] अन्वयमर्थं[5] लभते । किल यस्मात् बिम्बनामकं फलम् आभ्याम् ओष्ठाभ्यां सकाशात् अधरं हीनम्[6] । अधरंहीनं[7] बिम्बं बिम्बीफलम् उपमानरूपं यस्मात् स अधरबिम्बः[8] । अथ च अधर[9] ओष्ठ इव बिम्बः ।[10] अत्रोत्प्रेक्षालङ्कारः । रदनच्छस्य नपुंसकत्वम् । तथा च प्रतापमार्तण्डः— अथ पक्षो गरुद्वाज[11] पिच्छं पत्रं छदोऽस्त्रियाम्[12] ।। २४ ।।

हृतसारमिवेन्दुमण्डलं दमयन्तीवदनाय वेधसा ।
कृतमध्यबिलं विलोक्यते धृतगम्भीरखनीखनीलिम ।। २५ ।।

हृतसारमिती[1] । वेधसा दमयन्तीवदनसृष्टये[2] इन्दुमण्डलं हृतसारं[3] हृतं सारं यस्मात्तथाविधमिव । यतः सारोद्धारात्[5] कृतं मध्ये बिलं छिद्रं यस्य तत्[6] तथा विलोक्यते । किंभूतम् ? । धृतो गम्भीराया:[7] खन्या गर्तस्य यत्[8] खम् आकाशं तस्य नीलिमा येन तत्तथा । आकाशं[9] नील-मित्यारोपः ।[10] अनुप्रासोत्प्रेक्षे ।। २५ ।।

धृतलाञ्छनगोमयाञ्चनं विधुमालेपनपाण्डुरं विधिः ।
भ्रमयत्युचितं विदर्भजाननीराजनवर्द्धमानकम् ।। २६ ।।

धृतलाञ्छनेति[1] । विधिर्विधुं विदर्भजाया आननस्य नीराजनार्थम् उत्तारणाय[2] वर्द्धमानकं शरावपात्रम्[3] उचितं भ्रमयति अवतारणकं कुरुते । किंभूदम् ?। धृतं लाञ्छनमेव गोमयाञ्चनं[4] पूजनं येन तत्तथा । किंभूतं विधुम्[5] ?। आलेपनवत् पाण्डुरम् । वर्द्धमानं हि[6] श्रीखण्डेन[7] पाण्डु गोमयाञ्चितं च । रूप(कं)[8] समं चालङ्कारः ।। २६ ।।

सुषमाविषये परीक्षणे निखिलं पद्ममभाजि तन्मुखात् ।
अधुनापि न भङ्गलक्षणं सलिलोन्मज्जनमुज्झति स्फुटम् ।। २७ ।।

सुषमेति[1] । सुषमायाः शोभायाः[1] विषये[3] परीक्षणे सति मुखं रुचिरं किं वा पद्ममिति परीक्षायां जलदिव्ये कृते निखिलं पद्मं तस्याः[4] मुखादभाजि भग्नम् । स्फुटमिति मन्ये । अधुनापि कमलं कर्तृ सलिले

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

उन्मज्जनं[5] भङ्गलक्षणं यत्तन्नोज्झति । यदा जलदिव्यं भवति तदा एको धनुर्धरः[6] तालिकात्रयदानादनन्तरं शरं मुञ्चति । अपरो वेध्यस्थानगतो[7] वेगवान् पुमान्[8] पतितं शरमादाय[9] धनुर्धरस्य समीपमायाति । शर-मोक्षणसमये दिव्यकर्ता[10] जानुदघ्नोदकस्थस्य उरू गृहीत्वा निमज्जति । यदि शरानयनकालं यावत् मग्नस्तिष्ठति[11] तदा शुद्धः । यदुक्तम्[12]—चिरकालमिषुं मुच्य-मानस्येघोतवी नरः । पश्येयैनं निमग्नाङ्गां तस्य शुद्धि समादिशेत् (याज्ञ°व्यव° 101)।। यद्युन्मज्जति तदा भग्नोऽशुद्धः ।। २६ ।।

धनुषी रतिपञ्चबाणयोरुदिते विश्वजयाय तद्भ्रुवौ ।
नलिके न तदुच्चनासिके त्वयि नालीक विमुक्तिकामयोः ।। २८ ।।

धनुषी[1] ति । तस्या भ्रुवौ रतेः पञ्चबाणस्य च कामस्य[2] धनुषी चापद्वयमुदिते उत्पन्ने । किमर्थम् ?। विश्वस्य जयाय । तस्या उच्चे[3] नासिके[4] नासाछिद्रद्वयं तयोरेव नलिके द्वे । किंभूतयोः ?। त्वयि नालीकस्य[5] विमुक्तिकामयोः । नलिकया[6] ये विमुच्यन्ते ते नालीका बाणाः । रूपकमलङ्कारः ।। २८ ।।

सदृशी तव शूर ! सा परं जलदुर्गस्थमृणालजिद्भुजा ।
अपि मित्रजुषां सरोरुहां गृहयालुः[1] करलीलया श्रियः ।। २९ ।।

सदृशी तवेति । हे शूर ! सा दमयन्ती परं केवलं[3] तवैव सदृशी त्वत्तुल्या[4] एव । किंभूता ? जलदुर्गस्थानि मृणालानि जयत एवंविधौ भुजौ यस्याः[5] । त्वमपि शूरत्वात् दुर्गस्थान् शत्रून्[6] जयसि । तथा[7] सा दमयन्ती सरोरुहां श्रियो लक्ष्म्या[8] करलीलया[9] हस्तशोभया गृहयालुः ग्रहणशीला । किंभूतानाम् ? मित्रम्[10] आदित्यं जुषन्ति[11] सेवन्ते । अथ च मित्राश्रितानामपि[12] शत्रूणां[13] त्वमपि करस्य दण्डस्य लीलया श्रियो लक्ष्म्या गृहयालुः ग्रहणशीलः । समश्लेषयो[14] सङ्करः ।। २९ ।।

वयसी शिशुतातदुत्तरे सुदृशि स्वाभिविधिं विधित्सुनी ।
विधिनापि न रोमरेखया कृतसीम्नि प्रविभज्य रज्यतः ।। ३० ।।

वयसी[1] शिशुतेति । शिशुता च[2] तस्याः उत्तरं वयः यौवनं चेति[3] शिशुता तदुत्तरे वयसी बालयौवने तस्यां सुदृशि दमयन्त्यां प्रकर्षेण[4]

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

विभज्य शरीरविभागं कृत्वा न रज्यत:[6] स्वविभागमर्यादया तिष्ठतः न रागं प्राप्नुतः। किंभूतायाम् ?। विधिना[7] दैवेन रोमरेखया कृतसीम्न्यपि। रोमरेखैव[8] सीमा तस्यां कृतायामपि न मिलित्वा भुक्तिं कुरुतः। किं विशिष्टे वयसी ?। स्वमभिविधिम् अभिव्याप्तिं विधित्सुनी। शिशुता शरीरमभिव्याप्तुमिच्छति[9]। यौवनं च[10] जित्वा स्वयं व्याप्तिं चिकीर्षति, वयः सन्धित्वात्[11]। अत्रोक्तनिमित्ता विशेषोक्तिरलङ्कारः ।। ३० ।।

अपि तद्वपुष प्रसर्पतोर्गमिते कान्तिझरैरगाधताम् ।
स्मरयौवनयोः खलु द्वयोः प्लवकुम्भौ भवतः कुचावुभौ ।। ३१ ।।

अपि[1] तद्वपुषोति। अपि[2] सम्भावने। खलु मन्ये। स्मरयौवनयोर्द्वयोरुभौ[3] कुचौ प्लवार्थं[4] तरणार्थं कुम्भौ भवतः। किंभूतयोः ? कान्तिझरैः[5] प्रवाहैः अगाधतां गमितेऽपि तस्या वपुषि प्रसर्पतोः।[6] अत्र कुचयोः कुम्भसम्भावनोत्प्रेक्षा, न रूपकम्। तथा च काव्यप्रकाशः—सम्भावनमथोत्प्रेक्षा प्रकृतस्य परेण यत् (X. 137) ।। खलूत्प्रेक्षा व्यञ्जकः। अतिशयोक्तिरपि ।।३१।।

कलशे[1] निजहेतुदण्डजः किमु चक्र [भ्रम] कारितागुणः ।
स तदुच्चकुचौ भवन् प्रभाझरचक्रभ्रममातनोति यत् ।।३२।।

कलशे[2] इति। किमु कथं कलशे कुम्भे चक्रभ्रमं करोतीत्येवंशीलः चक्रभ्रमकारितालक्षणो गुणः। कथं विद्यते इति प्रश्नः। किंभूतः ?। निजस्य कलशस्य हेतुरसमवायिकारणं यो दण्डः तस्माज्जातः। स[3] कलशः तस्या उच्चकुचौ[4] भवन् यत्[5] प्रभाझरे चक्रप्रभं चक्रवाकभ्रमम् आतनोति।

अयमर्थः। कार्यं यदुत्पद्यते तत्र जायमाने कारणत्रयं भवति। एकं समवायिकारणं मृत्तिका, उपादानकारणमपि तदेवोच्यते। द्वितीयमसमवायिकारणं दण्डचीवरादि, सहकारिकारणमपि तदेव ।[6] तृतीयं निमित्तकारणं कुलालादि अदृष्टादिकं च। तत्रोपादानकारणस्य मृत्तिकादेःगुणः श्यामत्वादिर्घटे कार्ये समवैति ।[7] [त] तो घटोऽपि श्यामो भवति। परमसमवायिनः स ह[8] कारिकारणस्य[9] दण्डचीवरादेः गुणो घटे[10] न समवैति ।[11] निमित्तकारणस्य[12] कुलालदेश्च गुणो न कार्ये

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

समवैति ।[13] गौरेण कुलालेन[14] कृतो घटो गौरो न भवति । श्वेतेन दण्डकाष्ठेन कृतः, श्वेतदोरकेण[15] च उत्तारितो घटः[16] श्वेतो न भवति । निमित्तकारणस्य च[17] सहकारिकारणस्य द्वयस्याप्यसमवायित्वात् । अत्र घटे चक्रभ्रमकारितालक्षणो गुणो दृश्यते । स चाऽसमवायिकारणात् दण्डाज्जातः । न हि दृष्टे अनुपपन्नं नाम । ततः कविरुत्प्रेक्षां कुरुते यत् चक्रभ्रमकारिता[18] नाम गुणः किं कलशे विद्यते ? यतः[19] तस्याः कुचौ द्वौ कलश एव । चक्रे आरोप्य एकं वस्तु यदा भ्राम्यते तदा भ्रान्त्या द्वयमिव भवति ।[20] अथ च प्रभाप्रवाहे चक्रवाकभ्रमं करोति । स कलशः कुचरूपेण सम्पन्न इति शब्दश्लेषः । अन्यत्र किल श्वेतेभ्यस्तन्तुभ्यः श्वेतः पटः । ननु तत्रादि सहकारिणां तुरीवेमतन्तुवायप्रभृतीनां[21] गुणाः पटे न[22] भवन्ति । अत्र कुचरूपे घटे वैपरीत्यं दृश्यते । ततः प्रश्नोऽयमिति ।[23] अत्रानुमानमलङ्कारः । तथा च काव्यप्रकाशे— अनुमानं तदुक्तं यत्साध्य-साधनयोर्वचः । (X. 117) स तदुच्चकुचौ भवन्निति रूपकम् । कुचकलशदर्शनाच्चक्रवाक भ्रान्तिजननात्[24] भ्रान्तिमान् । यथा कपोले मार्जारिः (का. प्र. X. 179) ।। ३२ ।।

भजते खलु षण्मुखं शिखीचिकुरैर्निर्मितबर्हगर्हणः ।
अपि जम्भरिपुं दमस्वसुर्जितकुम्भः कुचशोभयेभराट् ।। ३३ ।।

भजते[1] इति । शिखी मयूरस्तस्याः[2] चिकुरैः केशैः निर्मिता बर्हाणां पिच्छानां गर्हणा निन्दा[3] यस्य एवंविधः सन् । खल्विति शङ्के । षण्मुखं कार्त्तिकेयं भजते । तस्य किल षट्मुखानि[4] सन्ति, दमयन्त्या एकम् एव मुखम् । तथा दमस्वसुः कुचशोभया जितकुम्भस्थलः सन् [इ] भानां हस्तिनां[5] राट् राजाऽपि[6] ऐरावणः जम्भरिपुमिन्द्रं भजते ।[7] जभी (415) गात्र-विनामे । यो गात्राणां विनामयिता[8] जम्भस्तस्य रिपुरिन्द्रः तं भजते ।[9] अन्योऽपि जितो भवति । स तज्जिगीषया कमप्या-श्रयति । उत्प्रेक्षा रूपकं चालङ्कारः ।। ३३ ।।

उदरं नतमध्यपृष्ठतास्फुरदङ्गुष्ठपदेन मुष्टिना ।
चतुरङ्गुलिमध्यनिर्गतत्रिवलिभ्राजि कृतं दमस्वसुः ।। ३४ ।।

उदरमिति ।[1] दमस्वसुः[2] उदरं मुष्टिना कृतम् । किंभूतेन[3] ? । नतं मध्यं यस्य[4] तच्च पृष्ठं च[5] तस्य भावस्तत्ता तत्र[6] स्फुरदङ्गुष्ठस्य पदं[7]

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

स्थानं प्रतिबिम्बं यस्य तेन तथा । यदा मुष्टिना उदरं कृतं तदा अङ्गुष्ठः उदरस्य पश्चाद्भागे दत्तः । ततो वंश नाम पृष्ठभागो नम्रो[8] बभूव । किंभूतम् ? । चतसृणाम् अङ्गुलीनां मध्यात् अन्तरत्रयात् निर्गता यास्तिस्रो व ल यस्ताभिः[9] भ्राजते इत्येवंशीलम् ।[10] काव्यलिङ्गम् ।। ३४ ।।

उदरं परिमाति मुष्टिना कुतुकी कोऽपि दमस्वसुः किमु ।
धृततच्चतुरङ्गुलीव यद्वलिभिर्भाति सहेमकाञ्चिभिः ।। ३५ ।।

उदरं[1] परिमातीति । किमु कोऽपि कुतुकी[2] कौतुकवान् पुरुषः दमस्वसुरुदरं मुष्टिना परिमाति । यद्वलिभिः कृत्वा धृतास्तस्य[3] मुष्टेश्चतस्रोऽङ्गुल्यो येन तत्तथा एवंविधमिव भाति । किंभूताभिर्वलिभिः ? । सह[4] हेमकाञ्च्या मेखलया[5] वर्तन्ते यास्ताभिस्तथा । मेखलया सह वलीनां चतुष्टयत्वम्[6] ।। ३५ ।।

पृथुवर्तुलतन्नितम्बकृन्मिहिरस्यन्दनशिल्पशिक्षया[1] ।
विधिरेकचक्रचारिणं किमु निर्मित्सति मान्मथं रथम् ।। ३६ ।।

पृथुवर्तुलेति[2] । विधिर्ब्रह्मा किं मान्मथं[3] मन्मथ-सम्बन्धिनं रथम् एककेन चक्रेण चरतीत्येवंशीलं निर्मातुमिच्छति । कया ? । मिहिरस्य श्री सूर्यस्य स्यन्दनो रथस्तस्य शिल्पं विज्ञानपूर्वकं[4] करणं तेन या शिक्षा अभ्यासस्तयाः । एको रविरथ एकचक्रो विधिना कृतः[5] तेनाऽभ्यासेन[6] कामरथं तथाविधं किमु चिकीर्षति । किंभूतो विधिः ? । पृथुं वर्तुलं च तन्नितम्बं[7] करोतीति । नितम्ब एव कामरथचक्रमिति[8] ।। ३६ ।।

तरुमूरुयुगेन सुन्दरी किमु रम्भां परिणाहिना परम् ।
तरुणीमपि जिष्णुरेव तां धनदापत्यतपः फलस्तनीम् ।। ३७ ।।

तरुमूरु[1] इति । सा सुन्दरी ऊरुयुगेन परं केवलं किमु[2] रम्भामेव[3] कदलीं तरुमेव जिष्णुः । किंभूतेन ? । परिणाहिना विशालेन[4] सा सुन्दरी तां रम्भां तरुणीमपि देवाङ्गनां जयनशीला एव । किंभूताम् ? । धनदापत्यस्य नलकूबरस्य[5] तपसः फलं स्तनौ यस्याः सा[6] तां तथा । तदुपभोग्यत्वात् । एका तरुरपरा तरुणी ।[7] तरुरपि धनदो धनवान् तस्याऽऽपत्यस्य तपसा[8] फलं यस्य वृक्षस्य कदलीफलानि[9] धनवतोऽपत्यैरुपभुज्यन्ते[10] ।। ३७ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

जलजे रविसेवयैव ये पदमेतद्पदतामवापतुः ।
ध्रुवमेत्य रुतः सहंसकीकुरुतस्ते विधिपत्रदम्पती ।। ३८ ।।

जलजे[1] इति । ये जलजे द्वे कमले एतस्याः पदतां चरणतां पदं स्थानमवापतुः । उत्प्रेक्षते रवेः सूर्यस्य सेवया एव । ध्रुवमिति शङ्के । विधेः ब्रह्मणः पत्रे वाहने दम्पती ते जलजे चरणलक्षणे एत्य आगत्य रुतः शब्दं कुरुतः । तथा ते[2] पादपद्मे सहंसकीकुरुतश्च[3] । हंसकं नूपुरम् । अथ च[4] सह[5] हंसकैर्वर्तेते[6] ।। ३८ ।।

श्रितपुण्यसरःसरित्कथं न समाधिक्षपिताखिलक्षपम् ।
जलजं गतिमेतु मञ्जुलां दमयन्तीपदनाम्नि जन्मनि ।। ३९ ।।

श्रितपुण्येति[1] जलजं कमलं दमयन्तीपदनाम्नि जन्मनि वर्तमानं कथं न[2] मञ्जुलां गतिं[3] गमनम् उत्तमलोकप्राप्तिं च एतु । अपि तु सद्गतिं प्राप्नोतु[4] । किंभूतम् ? । श्रितानि[5] पुण्यानि सरांसि सरितश्च येन तत् तथा । तथा समाधिना एकाग्रनिमीलनेन क्षपिता अखिला[6] क्षपाः रात्रयो येन तत्तथा[7] । अन्योऽपि यः पुण्यतीर्थान्याश्रयति, योगेन रात्रिं क्षपयति, स उत्तमगतिं लभते । समासोक्तिरलङ्कारः । पूर्वश्लोके चरणौ वर्णितौ । अत्र गतिर्वर्णिता ।। ३९ ।।

सरसीःपरिशीलितुं मया गमिकर्मीकृतनैकनीवृता ।
अतिथित्वमनायि सा दृशोः सदसत्संशयगोचरोदरी ।। ४० ।।

सरसी[1] रिति । मया सा दमयन्ती दृशोरति[2] थित्वम् अनायि दृष्टा : किंभूता ? । सद्वा उदरमसद्वा उदरम् एवंरूपो[3] यः संशयः तद्गोचरमुदरं यस्याः सा तथा । अस्ति चेत्, कथं न दृश्यते ? । नास्ति चेत् कथं खानपानादि कुरुते ? । कृशोदरी[4] । किंभूतेन मया ? । गमेर्धातोः कर्म कारकं कृता नैके[5] नीवृता देशा येन तेन तथा । किं कर्तुम् ? सरसीः[6] महान्ति सरांसि परिशीलितुं विगाहितुम्[7] । अनेकदेशा मया गताः । ततः सा मया[8] दृष्टा[9] । अत्र कृशोदरीति वक्तव्ये सदसत्संशयेऽतिवाक्यार्थे ओजो गुणः । यदुक्तम्-अर्थस्य प्रौढिरोजः (का. सू. III. ii. 2) । यथा पभार्के (दार्थे) वाक्यवचनं वाक्यार्थं (र्थे) च । पक्षेऽ (दा) भिधा इत्यादि । यथा —अथ नयनसमुत्थं ज्योति (रघु॰ II. 75) रित्यादि (P. 141) ।। ४० ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

अवधृत्य दिवोऽपि यौवतैर्न सहाधीतवतीमिमामहम् ।
कतमस्तु विधातुराशये पतिरस्या वसतीत्यचिन्तयम् ।। ४१ ।।

अवधृत्येति । अहमिति अचिन्तयम् । इतीति[2] किम् ? । विधातुर्ब्रह्मण आशये हृदये कतमः तु[3] पुनरस्याः पतिर्वसति । किं कृत्वा चिन्तितवान् ? । इमां दमयन्तीं दिवोऽपि यौवतैः अप्सरोभिः सह न अधीतवतीं लक्षणया[4] न सदृशीम् अवधृत्य ज्ञात्वा[5] । स्वर्गाङ्गनानामपि असहाध्यायिनी[6] । ताभ्योऽपि सुन्दरी निश्चित्य[7] ।। ४१ ।।

अनुरूपमिमं निरूपयन्नथ सर्वेष्वपि पूर्वपक्षताम् ।
युवसु व्यपनेतुमक्षमस्त्वयि सिद्धान्तधियं न्यवेशयम् ।। ४२ ।।

अनुरूपमिति[1] । अथाऽनन्तरम् अहं त्वयि विषये सिद्धान्तधियं न्यवेशयम् । किंभूतोऽहम्[2] ? । सर्वेष्वपि युवसु तरुणेषु पूर्वपक्षतां[3] व्यपनेतुमक्षमः । किं[4] कुर्वन् ?। इमं पतिं[5] युवानम् अनुरूपं दमयन्तीयोग्यं निरूपयन । अयं योग्यो अयं योग्यो वर इत्यवलोकयतो मम सर्वेषु दोषवत्वात् पूर्वपक्षत्वं पश्यतः त्वयि नले सिद्धान्तबुद्धिर्बभूव-त्वं योग्य[6] इति[7] ।। ४२ ।।

अनया एव रूपसीमया कृतसंस्कारविबोधनस्य मे ।
चिरमप्यवलोकिताद्य सा स्मृतिमारूढवती शुचिस्मिता ।। ४३ ।।

अनयेति[1] । अद्य सा[2] शुचिस्मिता[3] मे मम स्मृतिमारूढवती पूर्वं चिरम [व] लोकिताऽपि[4] । किंभूतस्य मम ? । अनया[5] तव रूपसीमया कृत्वा कृतसंस्कारस्य विबोधनम् उद्बोधो यस्य तस्य[6] तथा । अनुभवात् संस्कारः, संस्कारात् स्मृतिः ।[7] अवलोकनं चिरकालेन विस्मृतं, परं[8] त्वद्दर्शनात्स्मृतम्[9] । स्मरणालङ्कारः ।। ४३ ।।

त्वयि वीर ! विराजते परं[1] दमयन्तीकिलकिञ्चितं किल ।
तरुणीस्तन एव दीप्यते मणिहारावलिरामणीयकम् ।। ४४ ।।

त्वयि[2] वीरेति । हे वीर ![3] परं केवलं दमयन्त्याः किलकिञ्चितं भावः त्वयि[4] विराजते । नान्यत्र । यतो मणीनां हारावल्या[5] रामणीयकं तरुण्याः स्तन एव दीप्यते । शृङ्गारभावहानादेः[6] संकरः किलकिञ्चितम् (   ) ।[7] क्रोधाश्रुहर्षभीत्यादेः संकरः किलकिञ्चितम् (द. रू. II. 39)[8] इत्यालङ्कारिकाः । किलेति शङ्के[9] ।। ४४ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

तव रूपमिदं तया विना विफलं पुष्पमिवावकेशिनः ।
इयमृद्धधना वृथाऽवनी स्ववनी सम्प्रवदत्पिकापि का ।। ४५ ।।

तव[1] रूपमिति । हे नल ! तव[2] इदं रूपं तया विना विफलम् । यथा अवकेशिनो वन्ध्यवृक्षस्य पुष्पं विफलं फलरहितम् । तथा तया विना इयमवनी पृथ्वी ऋद्धधना समृद्धा वृथा । इयं स्वकीया वनी उद्यानवनिकाऽपि का कीदृशी ? । न किञ्चित्, तया रहिता । किंभूता[4] ? । सम्प्रवदन्त[5]: पिकाः कोकिला यस्यां सा तथाविधाऽपि । व्यक्तवाचां समुच्चारणे (पा° I. iii. 48) इत्यनेन व्यक्तवाकचाभावादात्मनेपदाभावः। तथा च काशिकायां[7]–[ननु] वद (1078) व्यक्तायां वाचि इत्येव पठ्यते । तत्र [किं] व्यक्तवाचामिति [विशेषणेन]। प्रसिद्ध्युपसङ्ग्राहार्थम् [एतत्] व्यक्तवाच इति[8] हि मनुष्याः प्रसिद्धाः। [तेषां समुच्चारणे यथा स्यात्] । अन्यत्र परस्मैपदमेव[9] ।। ४५ ।।[10]

अनया सुरकाम्यमानया सह योगः सुलभस्तु न त्वया ।
घनसंवृतयाम्बुदागमे कुमुदेनेव निशाकरत्विषा ।। ४६ ।।

अनयेति[1] । तु पुनरनया सुरैः[2] काम्यमानया सह योगः त्वया न सुलभः । यथा[3] अम्बुदानामागमे[4] घनैर्मेघैः संवृतया तिरोहितया[5] निशाकरस्य त्विषा सह कुमुदेन योगो न सुलभः। न लोकाव्यय निष्ठाखलर्थतृनामि (पा° II. iii. 69) ति त्वयेति षष्ठीप्रतिषेधः[6] ।। ४६ ।।

तदहं विदधे तथा तथा दमयन्त्याः सविधे तव स्तवम् ।
हृदये निहितस्तया भवानपि नेन्द्रेण यथापनीयते ।। ४७ ।।

तदहमिति[1] । तदहं तथा तथा दमयन्त्याः सविधे[2] तव स्तवं[3] विदधे करोमि यथा तया देव्या[4] हृदये निहितो भवान् इन्द्रेणापि[5] नापनीयते । तथा तथेति तेन तेन प्रकारेण[6] । स्थितं[7] सर्वात्मकं वस्तु आक्षिप्तं, तथा भूतमेव यच्छब्देन परामृश्यते । यथा–यद्यत्पापं प्रतिजहि जगन्नाथ ! नम्रस्य तन्मे (मा° मा° I. 5) इत्यत्र यद्यदित्याक्षिप्तं तच्छब्देन परामृश्यते । एवमन्यत्रापि[8] । तथा तथेति अभिधाय[9] यथेति सकृदुपादानमविरुद्धम् ।। ४७ ।।

तव सम्मतिमेव केवलमधिगन्तुं धिगिदं निवेदितम् ।
ब्रुवते हि फलेन साधवो न तु कण्ठेन निजोपयोगिताम् ।। ४८ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

तव[1] सम्मतिमिति । ममेदं निवेदितं कथनं[2] धिक् निन्दन्तु जनाः । किं कर्तुं कथितम्[3] ? । केवलां[4] तव सम्मतिमेवा[5]ऽभिलाषमेवाऽधिगन्तुं ज्ञातुम्[6] । हि यतः साधवो निजामुपयोगितामुपकारं फलेनैव[7] ब्रुवते, न तु कण्ठेन[8] । कार्यं कृत्वैव[9] दर्शयन्ति ।[10] अर्थान्तरन्यासः[11] ।। ४८ ।।

तदिदं विशदं वचोऽमृतं परिपीयाभ्युदितं द्विजाधिपात् ।
अतितृप्ततया विनिर्ममे स तदुद्गारमिव स्मितं सितम् ।। ४६ ।।

तदिदमिति[1] । स नलो द्विजानां पक्षिणामधिपात् हंसात्[2] तत् इदं विशदं[3] वश एवामृतम् अभ्युदितं परिपीय सितं शुभ्रं स्मितं विनिर्ममे[4] । उत्प्रेक्षते । अत्यन्ततृप्ततया तस्य वचोऽमृतस्य[5] उद्गारमिव निर्मितवान् । यः किल द्विजाधिपात् चन्द्रात् उत्पन्नम् अमृतमतितृप्त्या पिबति, स तस्योद्गारं वमति[6] निर्मिमीते[7] । उत्प्रेक्षा रूपकमलङ्कारः ।। ४६ ।।

परिमृज्य भुजाग्रजन्मना पतगं कोकनदेन नैषधः ।
मृदु तस्य मुदेऽकिरद्गिरः प्रियवादामृतकूपकण्ठजा[1]: ।। ५० ।।

परिमृज्येति[2] । नैषधो भुजाग्रे जन्म यस्य तेन कोकनदेन रक्तोत्पलेन हस्ताग्रेण[3] पतगं हंसं परिमृज्य तस्य मुदे हर्षाय मृदु यथा भवति तथा[4] एवं गिरो वाणीरकिरत्[5] उवाच । किंभूताः ? । प्रियवाद[6] एवामृतं तस्य कूपो यः[7] कण्ठः तस्माज्जाताः ।[8] अत्र भुजाग्रजन्मना कोकनदेनेति अतिशयोक्तिरलङ्कारः ।। ५० ।।

न तुलाविषये तवाकृतिर्न वचोवर्त्मनि ते सुशीलता ।
त्वदुदाहरणाकृतौ गुणा इति सामुद्रिकसारमुद्रणा ।। ५१ ।।

न[1] तुलाविषय इति । हे हंस ! तवे[2] यमाकृतिर्न तुलायाः उपमायाः[3] विषये गोचरे वर्तते[4] । ते तव सुशीलता[5] सदवृत्ता[6] न वचसो वर्त्मनि मार्गे । तथा[7] आकृतौ[8] प्रधाने आकारे गुणाः शौर्योदार्यादयो[9] भवन्ति इति या सामुद्रिकशास्त्रस्य[10] शरीरलक्षणपरीक्षाशास्त्रस्य सारमुद्रणा रहस्यकथनं सा त्वदुदाहरणा त्वमुदाहरणं दृष्टान्तो यस्याः सा तथा । तथा च सामुद्रिकशास्त्रे प्रत्येकमङ्गलक्षणानि उपदिश्य[11] सर्वमुक्तम्[12] । यत्राकृतिस्तत्र गुणा वसन्ति ( ) । तस्य त्वमुदाहरणम्[13] ।। ५१ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

न सुवर्णमयी तनुः परं ननु किं वागपि तावकी तथा ।
न परं पथि पक्षपातिताऽनवलम्बे किमु मादृशोऽपि सा ।। ५२ ।।

न[1] सुवर्णेति । हे हंस ! तव तनुः शरीरमेव परं केवलं[2] न[3] सुवर्णमयी । ननु किं तावको वागपि वाण्यपि तथा सुवर्णमयी शोभना वर्णा यस्याः[4] सा[5] तथा । तथा अनवलम्बे निरालम्बे पथि[6] आकाशे पक्षपातिता पक्षैः पतनशीलत्वं परं केवलं न । किन्तु मादृशे अनवलम्बेऽपि पुरुषे सा पक्षपातोऽङ्गीकारो[7] विद्यते यस्य स पक्षपाती[8] तस्य भावस्ता[9] ।। ५२ ।।

भृशतापभृता मया भवान् मरुदासादि तुषारसारवान् ।
धनिनामितरः सतां पुनर्गुणवत्संनिधिरेव सन्निधिः ।। ५३ ।।

भृशतापेति[1] । हे हंस ! मया भवान् मरुत् वायुः आसादि । किंभूतेन ? । भृशेन तापं बिभर्तीति तेन तथा । किं भूतो वायुः ? । तुषारं शैत्यं तस्य सारं[2] विद्यते यस्य । अतः[3] धनिनामितरोऽन्यः[4] सन् प्रधानो निधिः धनलक्षणो निधानं सतां महात्मनां पुनर्गुणवतो संनिधिरेव सामीप्यमेव[5] सन्निधिः ।[6] रूपकमर्थान्तरन्यासोऽलङ्कारः ।। ५३ ।।

शतशः श्रुतिमागतैव सा त्रिजगन्मोहमहौषधिर्मम ।
अमुना तव शंसितेन तु स्वदृशैवाधिगतामवैमि ताम् ।। ५४ ।।

शतश[1] इति । सा दमयन्ती त्रिजगतो मोहार्थं महौषधिः शतशोऽनेकशः मम श्रुतिमागता एव श्रुता[2] । तु पुनस्तवामुना शंसितेन तां स्वदृशा[3] एव अधिगतां दृष्टाम् अवैमि ।[4] रूपकभाविकालङ्कारौ ।।५४।।

अखिलं विदुषामनाविलं सुहृदा च स्वहृदा च पश्यताम् ।
सविधेऽपि न सूक्ष्मसाक्षिणी वदनालङ्कृतिमात्रमक्षिणी ।। ५५ ।।

अखिल[1] मिति । विदुषां पुरुषाणाम् अखिलं[2] सुहृदा मित्रेण स्वकीयेन हृदा[3] हृदयेन च[4] पश्यतां सताम् अक्षिणी चर्मचक्षुषी वदनस्याऽलङ्कृतिमात्रं सविधेऽपि सान्निध्येऽपि । न सूक्ष्मस्य परमाण्वादेः[5] वस्तुनः साक्षिणी । तस्मात्त्वया । सुहृदा दृष्टाः सा ततो मय्येव दृष्टा ।[6] अतिशयोक्तिः ।। ५५ ।।

अमितं मधु तत्कथा मम श्रवणप्राघुणकीकृता जनैः ।
मदनानलबोधने भवेत् खग ! धाय्या धिगधैर्यधारिणाः ।। ५६ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

अमित[1] मिति । तस्याः कथा वार्ता जनैः श्रवणयोः प्राघुणकीकृता अतिथीकृता कथिता सती मम मदनानलस्य बोधने दीपने [हे] खग ![2] हंस ! धाय्या सामिधेनो भवेत् ।[3] किंभूतस्य ?। अधैर्यं धारयतीत्येवंशीलस्य[4] । यथा समिदाधानमन्त्रेणाऽग्निर्बोध्यते, तथा मम मदनाग्निं तत्कथा दीपयति । किंभूता ? । अमितं[5] प्रचुरं मधु अतिमधुरा[6] पाय्य-सांनाय्यनिकाय्यधाय्या मानहविर्निवाससामिधेनीषु (पा° III. i. 129) इत्यादिना[7] धाय्याशब्दः साधुः । अथ धाय्याऽग्निसंदीपनकारी भवति । अत्रातिशयोक्तिरूपकार्थान्तरन्यासानां सङ्करः ।। ५६ ।।

विषमो मलयाहिमण्डलीविषफूत्कारमयो मयोहितः ।
खग ! कालकलत्रदिग्भवः पवनस्तद्विरहानलैधसा ।। ५७ ।।

विषम[1] इति । हे खग ! मया कालस्य यमस्य कलत्रं या दिक् तस्याः भवः उत्पन्नः पवनः दक्षिणानिलो विषमः[2] ऊहितः विचारितः । कीदृक् वितर्कित इत्याह-मलय-पर्वतस्य या अहीनां सर्पाणां मण्डली तस्याः विषयुक्ता ये फूत्काराः तन्मयोऽयमिति ऊहितः । अन्यथा एवं विधस्तापो न भवति ।[3] किंभूतेन मया ?। तस्या विरहानल[4]स्य एधसा [5]इन्धनभूतेन । यः कालस्य कलत्रादुत्पद्यते, स मारयत्येव[6] ।। ५७ ।।

प्रतिमासमसौ निशापतिः खग ! संगच्छति यद्दिनाधिपम् ।
किमु तीव्रतरैस्ततः करैर्मम दाहाय स धैर्यतस्करैः ।। ५८ ।।

प्रतिमासमिति[1] । हे खग[2] ! यदसौ निशापतिश्चन्द्रः प्रतिमासममावास्यायां दिनाधिपं श्रीसूर्यं संगच्छति[3] । सकर्मकत्वात्, समो गमृच्छिप्रच्छी (पा° I. iii. 29) त्यादिना आत्मनेपदं न भवति ।[4] स किमु चन्द्रो मम दाहाय मिलति । कैः ?। करैः किरणैः ।[5] किंभूतैः ? । ततः श्रीसूर्यस्य सम्पर्कात्[6] तीव्रतरैः । विरहिणो[7] हि चन्द्रकिरणाः दुःसहा[8] । किंभूतैः ?। धैर्यस्य[9] तस्करैः ।[10] अत्रानुमानम् ।। ५८ ।।

कुसुमानि यदि स्मरेषवो न तु वज्रं विषवल्लिजानि तत् ।
हृदयं यदमूमुहन्नमूर्मम यच्चार्तितरामतीतपन् ।। ५९ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

कुसुमानीति[1] । यदि स्मरस्य इषवः कुसुमानि [तु]पुनर्वज्र लोहमयानि न[2] भवन्ति । तर्हि[3] विषवल्लिजानि[4] पुष्पाणि तानि[5] भविष्यन्ति । यदमूः इषवः मम हृदयम् अमूमुहत् । यच्चातितराम् अतीतपन् तापितवत्यश्च । इषुशब्दः स्त्रीलिङ्गः पुंल्लिङ्गश्च । विषवल्लि[6] जानि मोहं तापं च कुर्वन्ति[7] ।। ५९ ।।

तदिहामवधौ निमज्जतो मम कन्दर्पशराधिनीरधौ ।
भव पोत इवावलम्बनं विधिनाऽऽकस्मिक सृष्टसंनिधिः ।। ६० ।।

तदिहेति[1] । तत्[2] इहानवधौ निर्मर्यादे कन्दर्पशराणामाधिः मानसी पीडा स एव नीरधिः तत्र निमज्जतो[3] मम त्वं[4] हे हंस ! पोत इव प्रवहणमिव नौरिव[5] अवलम्बनं भव । किं भूतस्त्वम्[6] ?। विधिना आकस्मिकः सृष्टः संनिधिर्यस्य स तथा[7] ।। ६० ।।

अथवा भवतः प्रवर्तना न कथं पिष्टमियं पिनष्टि नः ।
स्वत एव सतां परार्थता ग्रहणानां हि यथा यथार्थता ।। ६१ ।।

अथवेति[1] । अथवा इयं भवतः नोऽस्माकं प्रवर्तना प्रेरणा[2] कथं पिष्टं[3] न पिनष्टि । यदहं भवन्तं स्वकार्ये[4] प्रवर्तयामि प्रेरयामि[5] । तत् वृथा पिष्टपेषणमेव करोमि[6] । हि यस्मात् सतां महात्मनां स्वत एव परप्रेरणं विनापि[7] परार्थता परकार्यकर्तृत्वम् । यथा ग्रहणानां[8] प्रमाणानां यथार्थता[9] सत्यता प्रामाण्यं स्वत एव । [10]यदाह–स्वतः सर्वप्रमाणानां प्रामाण्यमिति[11] गृह्यताम् ।

न हि स्वतोऽसती शक्तिः कर्तुमन्येन शक्यते ।। इति । अनुमानं च–सर्वे प्रत्यया यथार्थाः । प्रत्ययत्वात् । घट प्रत्ययवत् ।।

अथवा, गृह्यन्ते घटपटादयः पदार्था एभिरिति ग्रहणानि इन्द्रियाणि तेषां च[12] स्वत एव यथार्थता विषय-ग्रहणं, न तु परप्रेरणया । अथवा, ग्रहणानां ज्ञानानां यथा यथार्थता स्वत एव स्वप्रकाशत्वम् ।[13] ज्ञानानां यथेत्यर्थः ।।

अथवा, ग्रहणानां शब्दानां[14] यथार्थता वाचकत्वं यथा स्वत[15] एवेति ।[16] यथा इन्द्रियाणां यथार्थता स्वविषयता परार्था क्षेत्रज्ञार्थेव । इन्द्रियैर्यथाऽऽत्मार्थविषयाः परिच्छिद्यन्ते, न हि विषयपरिच्छेदे

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

इन्द्रियाणां फलमस्तीत्यर्थः । अत्र [17]निदर्शनकाव्यलिङ्गदृष्टान्तालङ्काराः ।। ६१ ।।

तव वर्त्मनि वर्ततां शिवं पुनरस्तु त्वरितं समागम।
अयि ! साधय साधयेप्सितं स्मरणीयाः समये वयं वयः ।।६२।।

तव[1] वर्त्मनीति । हे हंस ! तव वर्त्मनि[2] शिवं[3] कल्याणं वर्तताम् । पुनरपि त्वया सह समागमः त्वरितमस्तु । अयीत्यामन्त्रणे । हे हंस[4] ! त्वं साधय[5] सिद्धिं गच्छ । तथा साधय ईप्सितं कुरु । हे[6] वयः ! पक्षिन् ! वयं समये स्मरणीयाः[7] । वियति स्वेच्छया गच्छतीति वयः । ईप्सितमभिलषितं साधय साधय कुरु कुरु[8] । आशीर्नामालङ्कारः ।।६२।।

इति तं स विसृज्य धैर्यवान्नृपतिः सूनृतवाग्बृहस्पतिः ।
अविशद्वनवेश्म विस्मितः स्मृतिलग्नैः कलहंसशंसितैः ।।६३।।

इति[1] तमिति । स नलस्तं हंसमिति विसृज्य वनस्य[2] वेश्म अविशद्[3] विवेश । धैर्यवान् । तथा सूनृता सत्या या[4] वाक् वचनं तत्र बृहस्पतितुल्यः । किंभूतः ? स्मृतौ लग्नैः कलहंशसितैः[5] विस्मितः साश्चर्यः ।।६३।।

अथ भीमसुतावलोकनैः सफलीकर्तुमहस्तदेव सः ।
क्षितिमण्डलमण्डनायितं नगरं कुण्डिनमण्डजो ययौ ।।६४।।

अथ[1] भीमेति । अथ अण्डजः पक्षी क्षितिमण्डलस्य मण्डनायितं कुण्डिनं नगरं ययौ । किं कर्तुम् ? भीमसुतायाः अवलोकनैस्तदेवाऽहः सफलीकर्तुम्[2] ।।६४।।

प्रथमं पथि लोचनातिथिं पथिकप्रार्थितसिद्धिशंसिनम् ।
कलशं जलसंभृतं पुरः कलहंसः कलयांबभूव[1] सः ।।६५।।

प्रथममिति[2] । स कलहंसः प्रथमं पथि जलसंभृतं कलशं पुरः[3] कलयांबभूव ददर्श । किंभूतम् ? लोचनयोरतिथिम्[4] । तथा पथिकानां प्रार्थितस्य सिद्धिं शंसतीत्येवंशीलम् । एतेन शकुनेन कार्यसिद्धिः[5] । अनुप्रासः ।।६५।।

अवलम्ब्य दिदृक्षयाम्बरे क्षणमाश्चर्यरसालसङ्गतम् ।
स विलासवनेऽवनीभृतः फलमैक्षिष्ट रसालसङ्गतम् ।।६६।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

अवलम्ब्येति । स पक्षी अवनीभृतो नलस्य विलासवने उद्याने रसालेनाऽऽम्रेण संगतं लग्नं[2] फलमैक्षिष्ट[3] । किं कृत्वा ? क्षणमम्बरे[4] आश्चर्यरसेन अलसं[5] मन्दं गतं गमनम् अवलम्ब्य । कया ? दिदृक्षया उद्यानदर्शनेच्छया[6] । अत्राऽन्यसंदष्टयमकमलङ्कारः ।।६६।।

नभसः कलभैरुपासितं जलदैर्भूरितरक्षुपन्नगम् ।
स ददर्श पतङ्गपुङ्गवो विटपच्छन्नतरक्षुपन्नगम् ।।६७।।

नभस[1] इति । स पतङ्गपुङ्गवः नगं क्रीडापर्वतं ददर्श । किंभूतम्? जलदैः उपासितम् । किंभूतैः ? नभसः आकाशस्य कलभैः हस्तिबालकैः । किंभूतम् ? भूरयस्तरक्षवो मृगविशेषाः पन्नगाश्च यत्र तं[3] तथा । तथा[4] विटपैः शाखाभिः छन्नतराः छादिताः क्षुपाः ह्रस्ववृक्षाः यत्र तं तथा । व्याघ्राच्चित्रिकायां जातः तरक्षुः । ह्रस्वशाखाशिफः[5] क्षुपः (अमर°II.iv.8)[6] । अत्रातिशयोक्तिरन्त्यसंदष्टयमकं च ।।६७।।

स ययौ धुतपक्षतिः क्षणं क्षणमूर्ध्वायनदुर्विभावनः ।
विततीकृतनिश्चलच्छदः क्षणमालोकदत्तकौतुकः ।।६८।।

स[1] ययाविति । स पक्षी क्षणं[2] क्षणमात्रं धुतपक्षतिः सन् ययौ । क्षणम् ऊर्ध्वमयनेन उच्चैर्गमनेन दुर्विभावनो दुर्लक्ष्यः । तथा क्षणं विततीकृता निश्चलाः छदाः[3] पक्षा येन स तथा । अत एवाऽऽलोककानां दत्तं कौतुकं येन स[4] तथा ।[5] अत्र दीपकजात्योः सङ्करः ।।६८।।

तनुदीधितिधारया रयाद्गतया लोकविलोकनामसौ ।
छदहेम कषन्निवाऽलसत् कषपाषाणनिभे नभस्तले ।।६९।।

तनुदीधितीति । असौ हंसो नभस्तलेऽलसत् शुशुभे । किंभूते[2] ? कषपाषाणः[3] सुवर्णनिकषोपलस्तन्निभे । कया ? तनोः शरीरस्य दीधितीनां किरणानां धारया[4] रेखया । किंभूतया ? रयात्[5] लोकानां विलोकनां गतया । उत्प्रेक्षते छदानां पक्षाणां[6] हेम सुवर्णं कषन्निव घर्षन्निव । निकषे हि सुवर्णस्य[7] रेखा भवति ।[8] अत्रोत्प्रेक्षोपमा ।।६९।।

विनमद्भिरधःस्थितैः खगैर्झगिति श्येननिपातशङ्किभिः ।
स निरैक्षि दर्शकयोपरि स्यदझङ्कारितपत्रपद्धतिः ।।७०।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

विन[1] म द्भिरिति । स हंसोऽधःस्थितै खगैः पक्षिभिरुपरिस्थित एकया दृशा दृष्टया निरैक्षि । किंभूतः ? स्यदेन वेगेन झङ्कारिता[2] सशब्दा पत्राणां पक्षाणां पद्धतिर्मार्गो यस्य स तथा[3] । किंभूतैः ? झगिति श्येननिपातं[4] शङ्कन्ते इत्येवंशीलैः । श्येनभ्रान्त्या भीतैः । अत एव[5] विशेषेण नमद्भिः[6] ।।७०।।

ददृशे न जनेन यन्नसौ भुवि तच्छायमवेक्ष्य तत्क्षणात् ।
दिवि दिक्षु वितीर्णचक्षुषा पृथुवेगद्रुतमुक्तदृक्पथः[1] ।।७१।।

ददृशे[2] नेति । असौ पक्षी जनेन यन् गच्छन् सन् न ददृशे । किं भूतेन ? भुविभूमौ[3] तस्य छायां[4] अवेक्ष्य[5] दृष्ट्वा दिवि आकाशे दिक्षु च वितीर्णं[6] चक्षुर्यन तेन[7] तथा ।[8] किमिदं छायारूपमिति । अमनुष्यात् छायाशब्दो[9] नपुंसकलिङ्गः । छायान्तस्तत्पुरुषो[10] वा नपुंसकलिङ्गः । पूर्वपदार्थधर्मे तु, छाया बाहुल्ये (पा॰II.iv.22) इति नित्यम् । यथा शलभच्छायम् । किंभूतः ? पृथुना वेगेन[11] द्रुतं गमनं[12] तेन मुक्तो दृशः पन्था येन स तथा । ऋक्पूरब्धूः पथामानक्षे (पा॰V.iv.74) इति अ[13] ।।७१।।

न वनं पथि शिश्रियेऽमुना क्वचिदप्युच्चतरद्रुचारुतम् ।
न सगोत्रजमन्ववादि वा गतिवेगप्रसरद्रुचा रुतम् ।।७२।।

न[1] वनमिति । अमुना हंसेन पथि गच्छता वनं क्वचिदपि न शिश्रिये । किंभूतम् ? उच्चतराणां द्रूणां द्रुमाणां चारुता यत्र तत्तथा । वा अथवा[3] अनेन सगोत्राज्जातं रुतं शब्दो नान्ववादि अनूदितम्[3] । किभूतेन ? गतिवेगेन प्रसरन्ती रुक् दीप्तिर्यस्य तेन तथा ।[4] यमकम् ।। ७२ ।।

अथ भीमभुजेन पालिता नगरी मञ्जुरसौ धराजिता ।
पतगस्य जगाम दृक्पथं हरशैलोपमसौधराजिता ।। ७३ ।।

अथ[1] भीमेति । भीमनृपस्य भुजेन पालिता असौ[2] नगरी पतगस्य पक्षिणः दृशः पन्थानं जगाम । किंभूता ? । मञ्जुर्मनोज्ञा । किंभूतेन ? । धरां पृथ्वीं जयतीति भुजः तेन तथा । किंभूता ? । हरशैलः कैलास[3] स्तदुपमैः सौधैः धवलगृहैः राजिता ।[4] अत्र समासोपमा यमकं च ।। ७३ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

दयितं प्रति यत्र संतता रतिहासा इव रेजिरे भुवः ।
स्फटिकोपलविग्रहा गृहाः शशभृद्भित्तनिरङ्कभित्तयः ।। ७४ ।।

दयितं[1] प्रति [इति] । यत्र पुरि स्फटिकोपलानां विग्रहाः देहा येषां ते तथाविधा गृहाः हर्म्याणि रेजिरे । किंभूताः ?। शशभृतः चन्द्रस्य भित्तं खण्डं तद्वन्निरङ्का निष्कलङ्का भित्तयो येषां ते तथा । शुभ्राः ।[2] भित्तं शकलमि (पा° VIII. ii. 59) ति । भित्तर्णवित्ता[3] (IV. vi. 114) इति कात्यायनः । उत्प्रेक्षते—भुवो[4] भूमेर्दयितं भर्त्तारं भीमं प्रति संत रतिहासा इव क्रीडानर्माणीव ।[5] उत्प्रेक्षा[6] लुप्तोपमा ।। ७४ ।।

नृपनीलमणीगृहत्विषामुपधेर्यत्र भयेन भास्वतः ।
शरणार्थमुवास वासरेऽप्यसदावृत्त्युदयत्तमं तमः ।। ७५ ।।

नृपनीलेति[1] । यत्र पुरि[2] वासरेऽपि तमोऽन्धकारमुवास[3] शरणार्थम् । केन ?। भास्वतः[4] श्रीसूर्याद् भयेन । किंभूतं तमः ?। असती अविद्यमाना या आवृत्तिः पुनः पुनरुत्पत्तिः तया उदयत्तमम्[5] अतिवर्द्धमानम् । अन्य [त्र] तमो भवति[6] न भवति च । अत्र तु[7] स्थिरमेव[8] । कस्मात् ? । नृपस्य भीमस्य नीलमणीगृहाणाम् इन्द्रनीलवेश्मनां उपधेः छलात्[9] ।। ७५ ।।

सितदीप्रमणिप्रकल्पिते यदगारे हसदङ्करोदसि ।
निखिलान्निशि पूर्णिमा तिथीनुपतस्थेऽतिथिरेकिका तिथिः ।। ७६ ।।

सितदीप्रेति ।[1] यस्याः पुरो अगारे धवलगृहे एकिका पूर्णिमा तिथिः निशि निखिलान् अन्यान् तिथीन् प्रति अतिथिरुपतस्थे[2] । प्राघुणिकी[3] सर्वासु[4] तिथिषु पूर्णिमा[5] आगच्छति ।[6] किंभूते ? । सिता [:] शुभ्रा दीप्रा ये मणयः स्फटिकास्तैः प्रकल्पिते । पुनः किंभूते ? । हसन् हासयुक्तोऽङ्को[7] मध्यं यस्य तत् रोदो[8] हसदङ्करोदो यत्र[9] । हसन्ती अङ्के रोदसी यत्र अगारे तस्मिन् तथा । तेन शुभ्रेणाऽऽलयेन[10] द्यावापृथिव्यौ हसत इव[11] ।। ७६ ।।

सुदतीजनमज्जनार्पितैर्घुसृणैर्यत्र कषायिताशया ।
न निशाखिलयापि वापिका प्रससाद ग्रहिलेव मानिनी ।। ७७ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

सुदतीजनेति[1] । यत्र पुरि[2] वापिका दीर्घिका[3] अखिलयापि[4] समग्रया[5] निशापि रात्र्या न[6] प्रससाद न[7] निर्मला बभूव । किंभूता ? । सुदतीजनस्य कान्ताजनस्य[8] मज्जनेन स्नानेन अर्पितैः घृसृणैः कुङ्कुमैः कषायितो गडुलितः सुरभितः[9] आशयो मध्यं यस्याः सा तथा । का[10] इव ? । अहिला आग्रहपरा मानिनीव । यथा सा[11] सकलयापि रात्र्या मान्यमाना[12] सती पतिं प्रति न प्रसीदति । साऽपि[13] कषायितः कुपित आशयो मनो[14] यस्याः तथाविधा भवति[15] ।। ७७ ।।

क्षणनीरवया यया निशि श्रितवप्रावलियोगपट्टया ।
मणिवेशममयं स्म निर्मलं किमपि ज्योतिरबाह्यमिज्यते ।। ७८ ।।

क्षणनीरवया[1] इति । यया नगर्या मणिमयानां वेश्मनां[2] सम्बन्धि सावयवभूतं[3] किमप्यबाह्यमाभ्यन्तरं ज्योतिर्निर्मलमिज्यते स्म. प्राप्यते स्म । यज[5] (1071) देवपूजायां[6] सङ्गतौ च[7] वर्त्तते । किंभूतया ? । क्षणं[8] नीरवया निःशब्दया । निशि रात्रौ[9] लोके सुप्ते सति निःशब्दं भवति ।[10] तथा श्रितोवप्रस्य[11] प्राकारस्य आवलिरेव योगपट्टो यया तया तथा । यथा काचिद्योगिनी रात्रौ[12] निःशब्दा सती योगपट्टमाश्रित्य[13] निरतिशयं हृदये ज्योतिः परमात्मविज्ञानमवाप्नोति[14] ।। ७८ ।।

विललास जलाशयोदरे क्वचन द्यौरनुबिम्बितेव या ।
परिखाकपट स्फुटस्फुरत्प्रतिबिम्बानवलम्बिताम्बुनि ।। ७९ ।।

विललासेति[1] । या नगरी विललास शुशुभे । उत्प्रेक्षते—क्वचन कस्मिन्नपि जलाशयस्योदरे मध्ये अनुबिम्बिता[2] द्यौरिव स्वर्ग इव । किंभूते उदरे ? । परिखायाः कपटेन व्याजेन स्फुटं स्फुरन् उल्लसन् प्रतिबिम्बस्तेन अनवलम्बितम् अम्बु[3] यत्र तत्र[4] तथा । अयमर्थः मध्ये नगरी पर्यन्ते च जलपूर्णा परिखा । यदा च किञ्चिद्वस्तु जले प्रतिबिम्ब्यते तदा मध्ये प्रतिबिम्बं[5] भवति । परितश्च केवलं जलम् । अत्र च यावति प्रदेशे नगरी तत्र द्यौः प्रतिबिम्बिता । यत्र परिखा तत्र केवलं जलमिव[6] प्रतिबिम्बेन अनवलम्बितं प्रतिभाति[7] ।। ७९ ।।

व्रजते दिवि यद्गृहावलीचलचेलाञ्चलदण्डताडनाः ।
व्यतरन्नरुणाय विभ्रमं सृजते हेलिहयालिकालनाम् ।। ८० ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

व्रजते[1] दिवीति । यस्या[2] गृहावल्यां चलाश्चेलाञ्चला: ध्वजाञ्चला एव[3] दण्डा: कशास्तेषां ताडना:[4] प्रहारा दिवि व्रजतेऽरुणाय [श्री] सूर्यसारथये विश्रममिव[5] व्यतरन्[6]। किंभूताय ?। हेले:[7] श्रीसूर्यस्य हयानामाल्या: पङ्क्ते: कालनां प्रेरणां सृजते । यदा अरुणो नगर्या उपर्यागच्छति[9] तदा ध्वजपटा एव स्वयमश्वान् खेटयन्ति । तदा सारथेर्विश्राम:[10] ।। ८० ।।

क्षितिगर्भधराम्बरालयैस्तलमध्योपरिपूरिणां पृथक् ।
जगतां खलु याऽखिलाद्भुताऽजनि सारैर्निजचिह्नधारिभि: ।। ८१ ।।

क्षितिगर्भेति[1] । या पुरी[2] खलूत्प्रेक्षते–जगतां त्रयाणां सारैरजनि । किंभूतानाम् ? । तलं पातालं मध्यं पृथिवी[3] उपरि स्वर्लोक:[4] एतानि पूरय [न्ती] त्येवंशीलानां[5] जगताम् । कथम् ? । पृथक् पृथक्[6] पूरयताम् । यतोऽखिलाप्यद्भुतरूपा । किंभूतै: सारै: ? । क्षितिगर्भे पाताले धरायामम्बरे अन्तरिक्षे[8] च आलयो येषां साराणां तैस्तथा । क्षितिगर्भो भूगृहं, धरा भूमिरेव, अम्बरमुपरितन[9] भूमिस्तदालयै[10] रित्यपि व्याख्या । अत एव निजानि[11] स्वानि चिह्नानि धारयन्तीत्येवंशीलै:। तस्यां पुरि[12] सर्वाणि वस्तूनि लोकत्रयसम्बन्धीनि[13] तल्लक्षणलक्षितानि दृश्यन्ते इत्यर्थ: ।[14] यथासंख्यमलङ्कार: । त्रैलोक्यवस्तूनां तत्र संभवादुदात्तमपि ।। ८१ ।।

दधदम्बुदनीलकण्ठतां वहदत्यच्छसुधोज्ज्वलं वपु: ।
कथमृच्छतु नाम यत्र न क्षितिभृन्मन्दिरमिन्दुमौलिताम् ।। ८२ ।।

दधदम्बुदेति[1] । यत्र पुरि[2] क्षितिभृतौ[3] राज्ञो मन्दिरं न कथं नाम इन्दुमौलिता[4] मृच्छतु[5] । अपि तु[6] इन्दुमौलौ यस्य तस्य भावस्तत्ता तामाप्नोतु[7], उच्चैस्तरत्वात् । अथ च महेश्वरत्वम् । किं कुर्वन् ? अम्बुदेन नील: कण्ठ: उपरिभागो यस्य तस्य भावस्तत्ता तां दधत् उच्चत्वादेव । ईश्वरोऽपि मेघवन्नीलकण्ठ: । तथा अत्यच्छतया सुधया[8] चूर्णविशेषेण उज्ज्वलं वपुर्वहत् । श्रीमहादेवोऽपि सुधावत् निर्मलपीयूषवत् श्वेतं वपुर्व [ह] ति । इन्दुमौलिश्च ।[11] श्लेषालङ्कार: ।। ८२ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

बहुरूपकशालभञ्जिकामुखचन्द्रेषु कलङ्करङ्कवः ।
यदनेककसौधकन्धराहरिभिः कुक्षिगतीकृता इव ।। ८३ ।।

बहुरूपकेति[1] । बहुरूपका[2] नानारूपा याः शालभञ्जिकाः[3] पुत्तलिकाः तासां मुखचन्द्रेषु कलङ्करङ्कवः लाञ्छनमृगा यस्या नगर्याः अने [क] कैः सौधकन्धराणां हरिभिः सिंहैः कुक्षिगतीकृता इव भक्षिता[4] इव[5] । अत एव न दृश्यन्ते ।। ८३ ।।

बलिसद्मदिवं स तथ्यवागुपरि स्माऽऽह दिवोऽपि नारदः ।
अधराऽथ कृता ययेव सा विपरीताऽजनि भूविभूषया ।। ८४ ।।

बलिसद्मेति[1] । स नारदः बलेः सद्म पाताललक्षणं दिवं श्री विष्णु[2] पुराणे दिवोऽपि स्वर्गादपि उपरि आह स्म रमणीयमुक्तवान्[3] । किंभूतो नारदः ? । तथ्यवाक् सत्यगीः[5] । सा पाताल द्यौः यथा नगर्या भुवो विभूषया[6] अधरा[7] कृता[8] । अथ पश्चाद्विपरीता अधोभागस्थिता अजनीव[9] ।। ८४ ।।

प्रतिहट्टपथे[1] घरट्टजात् पथिकाह्वानदसक्तुसौरभैः ।
कलहान्न घनान् यदुत्थितादधुनाप्युज्झति घर्घरस्वरः ।। ८५ ।।

प्रतिहट्टेति ।[2] यस्या नगर्या सकाशात् उत्थितात्[3] पथिकानाम् आह्वानदैः सक्तूनां सौरभैः परिमलैः सह कलहात्[4] अधुनापि घर्घर-स्वरः[5] घनान् मेघान् [न] उज्झति । क्व ? । प्रतिहट्टपथे । वा तृतीयासप्तम्यो (पा°. II. iv. 84) रिति विकल्पेनाऽम्भावः । किं भूतात्[6] ? । घरट्टाज्जातात्[7] । सक्तुसौरभाणि आत्माभिमुखं पथिक-माकारयन्ति । मेघाश्च [स्व] गृहं प्रति प्रस्थापयन्ति । अतः कलह इति[8] ।। ८५ ।।

वरणः कनकस्य मानिनीं दिवमङ्कादमराद्रिरागताम् ।
घनरत्नकपाटपक्षतिः परिरभ्याऽनुनयन्नुवास याम् ।। ८६ ।।

वरणः[1] कनकस्येति । कन [क] स्य वरणः प्राकारः एवामराद्रिर्मेरुर्यां नगरीमेव दिवं स्वर्गं परिरभ्य[2] अनुनयन् सन् उवास ।[3] किंभूताम् ? । दिवं मानिनीम् । तथा अङ्कादुत्सङ्गादागताम् । किंभूतः ? । घनानि[4] रत्नमयानि कपाटान्येव पक्षती यस्य स तथा ।[6] अपक्षच्छेदत्वात् पक्षतिः पक्षभूतम् ।। ८६ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

अनलैः परिवेषमेत्य या ज्वलदर्कोपलवप्रजन्मभिः ।
उदयं लयमन्तरा रवेवहद्बाणपुरीपरार्ध्यताम् ।। ८७ ।।

अनलैरिति[1] । या पुरी[2] रवेः [श्री] सूर्यस्य उदयं तथा लयमस्तं चाऽन्तरा मध्ये बाणासुरस्य पुरीवत् परार्ध्यतां रम्यत्वमवहत् । किं कृत्वा ? । अनलैर्वह्निभिः[3] परिवेषमेत्य प्राप्य । किंभूतैः ? । ज्वलन्तो येऽर्कोपलाः तेषां वप्रात्तटात् जन्म येषां तैस्तथा । बाणपुरे[6] श्रीमहादेव-प्रसादात् परितो वह्निर्ज्वलितवान्[9] ।। ८७ ।।

बहुकम्बुमणिर्वराटिकागणनाटत्करकर्कटोत्करः ।
हिमवालुकयाच्छवालुकः पटु दध्वान यदापणार्णवः ।। ८८ ।।

बहुकम्बुमणिरिति[1] । यस्या आपणो हृ [ट्ट] श्रेणिरेवाऽर्णवः[2] पटुतरं दध्वान । किंभूतः ? । बहवः कम्बवः[3] शङ्खा मणयः च[4] यत्र । समुद्रोऽपि[5] तथा । वराटिकानां गणनया अटन्तो[6] ये वणिजां करा हस्ता स्त[7] एव [क] र्कटाः कच्छपास्तेषामुत्करः समूहो यत्र स तथा । करोऽपि पञ्चाङ्गुलित्वात् कच्छपवत्[9] कपर्दिकागणनायां चलति[10] । पुनः किंभूतः[11] ? । हिमवालुकया कर्पूरेण अच्छा वालुका यत्र स तथा[12] ।। ८८ ।।

यदगारघटाट्टकुट्टिमस्रवदिन्दूपलतुन्दिलापया ।
मुमुचे न पतिव्रतौचिती प्रतिचन्द्रोदयमभ्रगङ्गया ।। ८९ ।।

यदगारेति[1] । अभ्रगङ्गया[2] प्रतिचन्द्रोदयं पतिव्रताया औचिती योग्यता न मुमुचे । किंभूतया ? । यस्या[3] अगाराणां घटासु यान्य-ट्टकुट्टिमानि उपरि [भाग] बद्धभूमिकानि तेषु[4] स्रवन्तो ये इन्दूपलाः चन्द्रकान्तमणयः[5] तैस्तुन्दिलाः प्रचुरा आपो यस्यास्तया[6] तथा । तुन्दा[7]-दिभ्य इलच्च (पा° V. ii. 117) [इति] इलच् प्रत्य[यः] । चन्द्रोदये हि समुद्रो वर्धते[8] एव । तथा सौधानामुच्चत्वात् आकाश-गङ्गाऽपि[9] चन्द्रकान्तजलैः[10] नित्यं वर्द्धते ।[11] अत्र[12] पन्थिमन्थ्यृभुक्षाम् (का° II. ii. 35) इति अत् । ऋक्पूरब्धूःपथामानक्षे (पा° V. iv. 74) इति पाणिनीयम्[13] ।। ८९ ।।

रुचयोऽस्तमितस्य भास्वतः स्खलिता यत्र निरालयाः खलु ।
अनुसायमभुर्विलेपनापण कश्मीरजपण्यवीथयः ।। ९० ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

रुचय[1] इति । यत्र[2] विलेपनापणे[3] सौरभहट्टिकायां[4] कश्मीरजपण्य [स्य] कुङ्कुमस्य वीथयो[5] अनुसायम् अभुः । खल्विति मन्ये । अस्तमितस्य भास्वतः स्खलिताः पतिताः रुचयः कान्तय इव । किंभूताः ?। निरालयाः निराश्रयाः[6] ।। ९० ।।

विततं वणिजापणेऽखिलं पणितुं यत्र जनेन वीक्ष्यते ।
मुनिनेव मृकण्डुसूनुना जगतीवस्तु पुरोदरे हरेः ।। ९१ ।।

विततमिति[1] । यत्र पुरि वणिजापणे[2] हट्टे[3] पणितुं विक्रेतुं विततं प्रसारितमखिलं जगत्या[4] वस्तु जनेन[5] वीक्ष्यते[6] । केनेव ? मृकण्डुसूनुना मुनिनेव । यथा मार्कण्डेयेन [7]ऋषिणा पुरा कल्पान्ते हरेः [श्री]कृष्णस्योदरे प्रविष्टेन जगतीवस्तु त्रिभुवन[भव]मीक्ष्यते[8] । यावत्पुरानिपातयोर्लट् (पा° III. iii. 4)[9] ।। ९१ ।।

सममेणमदैर्यदापणे तुलयन्सौरभलोभनिश्चलम् ।
पणिता न जनारवैरवैदपि गुञ्जन्तमलिं मलीमसम् ।। ९२ ।।

सममेणेत्यादि[1] । यत्र पणिता विसाधयिता जनो यस्याः आपणे एणमदैः कस्तूरिकाभिः समम् अलिं भ्रमरं मलीमसं मलिनं[2] तुलयन् सन् नावेत् नाज्ञासीत् । इण् (।।२०) गतौ । लङ् । ह्यस्तनी (का° III. i. 27) । किंभूतम् ?। गुञ्जन्तमपि शब्दं कुर्वन्तम् । कैर्न ज्ञातवान् ?। जनानामारवैः कोलाहलैः । पुनः किंभूतम् ?। सौरभलोभेन निश्चलम्[4] ।। ९२ ।।

रविकान्तमयेन सेतुना सकलाहर्ज्वलनाहितोष्मणा ।
शिशिरे निशि गच्छतां पुरा चरणौ यत्र दुनोति नो हिमम् ।। ९३ ।।

रविकान्तेति[1] । यत्र हिमं शिशिरेऽपि निशि गच्छतां[2] चरणौ[3] पुरा पश्चात् न दुनोति न दहति । पुरायोगे वर्तमाना[4] ल्लट् । केन गच्छताम्[5] ?। रविकान्तमयेन सूर्यकान्तमणिमयेन[6] सेतुना मार्गेण । किंभूतेन ?। सकलमपि[7] अहर्ज्वलनेन आहित ऊष्मा तापो यत्र तेन तथा[8] ।। ९३ ।।

विधुदीधितिजेन यत्पथं पयसा नैषधशीलशीतलम् ।
शशिकान्तमयं तपागमे कलितीव्रस्तपति स्म नातपः ।। ९४ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

विधुदीधितीति[1]। यस्याः पन्थानं कलिवत् तीव्रोऽप्यातपो न तपति स्म। किंभूतम्[2]?। शशिकान्तमयम्। क्व?। तपागमे[3] ग्रीष्मे। पुनः किंभूतम्?। विधुदीधितिभ्यो जातेन पयसा चन्द्रकान्तमणिजलेन नैषधशीलवत् शीतलम्।[6] किल नलचरितेन कलिर्नश्यति[7]॥ ९४॥

परिखावलयच्छलेन या न परेषां ग्रहणस्य गोचरः।
फणिभाषितभाष्यफक्किकाविषमा कुण्डलनामवापिता॥ ९५॥

परिखावलयेति[1]। या पुरी[2] परिखायाः[3] वलयस्य छलेन कुण्डलनामवापिता। यतः किंभूता?। परेषां शत्रूणां ग्रहणस्य न गोचरः अविषया। किंभूता?। फणिना शेषेण[4] नागेन भाषिता या महाभाष्यस्य फक्किका[5] तद्वद्विषमा। पाणिनेरुपरि महाभाष्यस्य फक्किका[6] विषमत्वात् वररुचिना[7] कुण्डलीकृताः सन्ति। ता अपि परेषाम्[8] अन्येषां न ग्रहणविषया, ज्ञानाय[9] न[10] भवन्ति, व्याख्यातुमशक्यत्वात्[11]॥ ९५॥

मुखपाणिपदाक्षिण पङ्कजै रचिताङ्गेष्वपरेषु चम्पकैः।
स्वयमादित यत्र भीमजा स्मरपूजा कुसुमस्रजः श्रियम्॥ ९६॥

मुखपाणीति[1]। यत्र भीमजा स्मरपूजार्थं[2] या कुसुमस्रक् तस्याः श्रियं स्वयमात्मना आदित[3] जग्राह। दमयन्त्येव स्मरपूजा कुसुमस्रक्[4] जाता। किंभूता?। मुखं[च]पाणी च पदे च अक्षिणी च मुखपाणिपदाक्षी[णि] तत्र मुखपाणिपदाक्षिण[5]। समाहारद्वन्द्वः। द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम् (पा° II. iv. 2) इत्येकवचनम्। तेषु स्थानेषु मुखादिषु[6] पङ्कजै रचिता[7]। अपरेषु अङ्गेषु चम्पकै रचिता[8]। किल[9] मुखादीनि चत्वार्यङ्गानि कमलनिभानि, अन्यानि चम्पकनिभानि। पुष्पमालायां चत्वारः स्तवका[10] भवन्ति[11]॥ ९६॥

जघनस्तनभारगौरवात् वियदालम्ब्य विहर्तुमक्षमाः।
ध्रुवमप्सरसोऽवतीर्य यां शतमध्यासत तत्सखीजनः॥ ९७॥

जघनस्तनेति। ध्रुवं निश्चितं यां पुरीमवतीर्य[2] तस्याः[3] सखीजन एवाऽप्सरसः[4] शतमध्यासत आश्रयन्ति स्म[5]। किंभूता[6]?। जघनानां स्तनानां च भारगौरवात्[7] वियदाकाशमालम्ब्य विहर्तुमक्षमाः। अत एव भूमौ[8] तत्सखीजनव्याजेनाऽप्सरसोऽवतीर्णा इव[9]॥ ९७॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

स्थितिशालिसमस्तवर्णतां न कथं चित्रमयी बिभर्तु या ।
स्वरभेदमुपैतु या कथं कलितानल्पमुखारवा न वा ।। ९८ ।।

स्थितिशालीति[1] । या पुरी[2] चित्रमयी आश्चर्यमयी[3] स्थितिशालिन: समस्तवर्णा ब्राह्मणादय: यस्यां तस्या भावस्तत्तां कथं न बिभर्तु[4] । या किल[5] चित्रमयी आलेख्यमयी[6] तत्र स्थितिशालिन: समस्तवर्णा नीलपीता[7] दयोऽपि[8] लिख्यन्ते[9] । या च कथं[10] स्वराणां भेदं नोपैतु । यत: कलितो धृतोऽनल्पानां मुखानाम् आरवो यस्यां सा तथा । लोकानां बाहुल्यात् । अथ च स्व: स्वर्गस्तेन सहाऽभेदं कथं नोपैतु । किंभूतौ ?। कलितो धृतोऽनल्पमुखश्चतुर्मुखो ब्रह्मा तस्याऽऽरवो[12] वेदानां ध्वनिर्यस्याम् ।। ९८ ।।

लिलिहे स्वरुचा पताकया निशि जिह्वानिभया सुधाकरम् ।
स्थितमर्ककरै: पिपासु यन्नृपसद्मामलपद्मरागजम् ।। ९९ ।।

लिलिहे[1] [इ]ति । अमलेभ्य: पद्मरागेभ्यो जातं[2] यस्या[3] नगर्या नृपसद्म राजभवनं निशि पताकया सुधाकरं लिलिहे आस्वादयामास । किंभूतया पताकया ?। स्वया[4] आत्मी[य]या रुचा कान्त्या कृत्वा जिह्वानिभया रक्तीभूतया[5] । स्वरुचेति पताकाविशेषणं बहुव्रीहिर्वा । किंभूतं सद्म ?। अर्कस्य करै: कृत्वा पिपासु स्थितं तृषार्तम्[6] ।। ९९ ।।

स्वरुचाऽरुणया पताकया दिनमर्केण समीयुषोत्तृष: ।
लिलिहुर्बहुधा सुधाकरं निशि माणिक्यमया यदालया: ।। १०० ।।

स्वरुचेति[1] । यस्या[2] आलया: आवासा: माणिक्यमया: निशि[3] पताकया सुधाकरं बहुधा लिलिहु: । किंभूतया ?। स्वरुचा अरुणया । किंभूता आलया:[4] ?। अर्केण कृत्वा उत्कृष्टा तृट् येषां ते उत्तृष: । किंभूतेन अर्केण ?। दिनं समग्रमपि समीयुषा मिलितेन । कालाध्वनोरत्यन्तसंयोगे (पा° II. iii. 5) द्वितीया[5] ।। १०० ।।

अमृतद्युतिलक्ष्म पीतया मिलितं यद्वलभीपताकया ।
वलयायितशेषशायिन: सखितामादित पीतवासस: ।। १०१ ।।

अमृतद्युतीति[1] । अमृतद्युतेश्चन्द्रस्य लक्ष्म लाञ्छनं पीतवर्णया यस्या नगर्या वलभीनां पताकया मिलितं[2] सत् पीतवासस: श्रीकृष्णस्य

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

सखितामादित[3] सादृश्यं भेजे[1] । कीदृशस्य ?। वलयायिते शेषे शेते इत्येवंशीलस्य । चन्द्रः शेषः तत्र लाञ्छनं श्रीकृष्णस्य पीता पताका वासः[5] ।। १०१ ।।

अश्रान्तश्रुतिपाठपूतरसनाविर्भूतभूरिस्तवा-
जिह्मब्रह्ममुखौघविघ्नितनवस्वर्गक्रियाकेलिना ।
पूर्वं गाधिसुतेन सामिघटिता मुक्ता नु मन्दाकिनी
यत्प्रासाददुकूलवल्लिरनिलान्दोलैरखेलद्दिवि ।। १०२ ।।

अश्रान्त[1] श्रुतीति । यस्याः प्रासादानां दुकूलानां वल्लिः श्रेणीः[2] अनिलस्यान्दोलैः कम्पनैः दिवि अखेलत् चिक्रीड । नु इति वितर्के । पूर्वं पुरा गाधिसुतेन विश्वामित्रेण सामिघटिताऽर्द्धसृष्टा मुक्ता त्यक्ता[3] मन्दाकिनी गङ्गा इव ।[4] सामीत्येतदव्ययम् अर्द्धशब्दपर्यायः तस्या[5]-ऽसत्त्ववाचित्वात् द्वितीयया[6] नास्ति सम्बन्धः तत् सुबन्तं क्तान्तेन [सह[7]] समस्यते, तत्पुरुषश्च समासः [भवति] (का° पा° II. i. 27) । एकपद्यमेकस्वर्यं[8] तु वेदवत् काव्ये [न]गण्यते । किंभूतेन ?। अश्रान्तं श्रुतीनां पाठेन पूताभ्यो रसनाभ्यो जिह्वाभ्यः आविर्भूतै[9] [भूं]रिभिः स्तवैः स्तुतिभिः अजिह्मः ब्रह्ममुखानामोघः तेन विघ्निता नवा स्वर्गक्रियाकेलिर्यस्य तेन तथा । तदा नूतनगङ्गापि सृष्टा । ततश्च ब्रह्मणा[10] चतुर्भिर्मुखैः संस्तुतः, तदा सर्वा सृष्टिस्त्यक्ता । ततोऽर्द्धघटिता गङ्गापि आकाशे त्यक्ता । ततः किमियं[11] ध्वजानां दुकूलश्रेणिः सा गङ्गा[12] ।। १०२ ।।

यदतिविमलनीलवेश्मरश्मिभ्रमरितभाः शुचिसौधवस्त्रवल्लिः ।
अलभत शमनस्वसुः शिशुत्वं दिवसकराङ्कतले चला लुठन्ती ।। १०३ ।।

यदतिविमलेति[1] । शुचीनां श्वेतानां सौधवस्त्राणां वल्लिः[2] यस्या नगर्या अतिविमलानाम् इन्द्रनीलवेश्मनां रश्मिभिर्भ्रमरिताः[3] श्यामीभूता[4] भा कान्तिर्यस्याः सा तथाविधा सती शमनस्य यमस्य स्वसुर्यमुनायाः शिशुत्वं बाल्यम् अलभत तत्सदृशी जाता । किं कुर्वन्ती[5] वस्त्रपङ्क्तिः ?। [6]दिवसक[र]स्य श्रीसूर्यस्य अङ्कतले लुठन्ती चला[7] वायुवशात् । बालत्वे यमुना चला च[प]ला पितुरुत्सङ्गे श्रीसूर्यस्य उत्सङ्गे लुठितवती ।[10] शिशुरपि पितुरुत्सङ्गो चञ्चलः सन् लुण्ठति । यमुना[11] च श्यामला[12] ।। १०३ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

स्वप्राणेश्वरनर्महर्म्यकटकातिथ्यग्रहायोत्सुकं,
पाथोदं निजकेलिसौधशिखरादारुह्य यत्कामिनी ।
साक्षादप्सरसो विमानकलिताव्योमान एवाभव-
द्यन्न प्राप निमेषमभ्रतरसा यान्ती रसादध्वनि ।। १०४ ।।

स्वप्राणेश्वरेति[1] । यस्याः नगर्याः कामिनी निजस्य केलिसौध[2] स्य शिखरात् पाथोदं मेघम् आरुह्य अप्सरसः[3] साक्षादेव[4] अभवत् बभूव । साक्षाच्छब्द इवार्थे[5] । किंभूतं पाथोदम् ?। स्वप्राणेश्वरस्य यत् नर्महर्म्यं क्रीडासौधं तस्य कटके आतिथ्यग्रहायोत्सुकम् । भर्तृसौधं प्रति जिगमिषुम् । किंभूता अप्सरसः ?। विमानेन[6] कलितमाश्रितं व्योम याभिस्ता[7] स्तथा । बहुवचनान्तोऽप्सरसः[8] शब्द आविष्टलिङ्गः । यत्[9] यस्मात्[10] सप्तभूमिकसौधमार्गेणैव सा[11] यान्ती अध्वनि अभ्राणां तरसा बलेन वेगेन रसादनुरागात् कौतुकवशात् निमेषं न प्राप । अप्सरसोऽपि अनि[मे]षाः आकाशेन[12] गच्छन्ति । अभ्रै राच्छादितत्वात् सा कामिनी निरालम्बा[14] इव दृश्यते[15] ।। १०४ ।।

वैदर्भीकेलिशैले मरकतशिखरादुत्थितैरंशुदर्भै-
र्ब्रह्माण्डाघातभग्नस्यदजमदतया ह्रीधृतावाङ्मुखत्वैः ।
कस्या नोत्तानगाया दिवि सुरसुरभेरास्यदेशं गताग्रै-
यद्गोग्रासप्रदानव्रतसुकृतमविश्रान्तमुज्जृम्भते स्म ।। १०५ ।।

वैदर्भीति[1] । यस्या नगर्या गवां ग्रासप्रदानव्रतेन यत् सुकृतं[2] तदविश्रान्तम् उज्जृम्भते स्म प्रचुरं बभूव । कैः ?। वैदर्भ्याः[3] दमयन्त्याः केलिशैले मरकतमयात् शिखरात् उत्थितैरुत्पन्नैः अंशुभिः किरणैरेव दर्भैः हरिततृणैः । किंभूतैः ?। ब्रह्माण्डकटाहे[4] य आघातः आस्फालनं तेन भग्नः स्यदात् वेगात् जातो मदो गर्वो येषां ते तथा तेषां भावस्तत्ता[5] तया कृत्वा ह्रिया लज्जया धृतमवाङ्मुखत्वमधोमुखत्वं यैः । पुनः किंभूतैः ?। दिवि आकाशे कस्याः सुरसुरभेः कामधेनोः आस्यदेशं मुखमध्यं न गताग्रैः प्राप्तमग्रं येषां तैस्तथा । किंभूतायाः ?। उत्तानमूर्ध्वं मुखं यथा भवति एवं गच्छतीति सा तथा[6] । तस्याः स्वर्गे कामधेनवो हि उत्ताना गच्छन्ति । तथा च श्रुतिः-उत्ताना[7] वै देवगवाश्चरन्ति (आप°श्रौ°सू° XI. 76) । ततश्च मरक[त]किरणाः प्रथममूर्ध्वं गताः । ततो ब्रह्माण्डकटाहे स्खलिताः पश्चाद्वलिताः[8] सन्तः स्वर्गगवीनां मुखेषु प्रविष्टा दर्भधूलिका[9] इव विभान्ति[10] ।। १०५ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

विधुकरपरिरम्भादात्मनिष्यन्दपूर्णैः
शशिदृषदुपक्लृप्तैरालवालैस्तरूणाम् ।
विफलितजलसेकप्रक्रियागौरवेण
व्यरचि स हृतचित्तस्तत्र भैमीवनेन ।। १०६ ।।

विधुकरेति[1] । स हंसः तत्र भैम्याः वनेन हृतचित्तो[2] व्यरचि । किंभूतेन ?। विफलितं[3] व्यर्थीकृतं जलसेकस्य प्रक्रियायाः प्रकारस्य गौरवं येन तेन तथा[4] । कैः ?। तरूणामालवालैः । किंभूतैः ?। शशिदृषद्भिः चन्द्रकान्तमणिभिरुपक्लृप्तैः रचितैः । अत एव विधोः चन्द्रस्य कराणां परिरम्भात् आत्मनो निष्यन्देन स्रुतजलेनैव[5] पूर्णैः । स्थानकानि चन्द्रकान्तजलेन पूर्णान्येव सन्ति[6] ।। १०६ ।।

अथ कनकपतत्रस्तत्र तां राजपुत्रीं
सदसि सदृशभासां विस्फुरन्तीं सखीनाम् ।
उडुपरिषदि मध्यस्थायिशीतांशुलेखा-
नुकरणपटुलक्ष्मीमक्षिलक्षीचकार ।। १०७ ।।

अथ[1] कनकेति । अथ कनकपतत्रो[2] हंसः तत्र वने तां राजपुत्रीम् अक्ष्णोर्लक्षीचकार । किंभूताम् ?। सदृशभासां सरूपाणां[3] सखीनां सदसि विस्फुरन्तीम् । पुनः किंभूताम् ?। उडूनां नक्षत्राणां परिषदि मध्यस्थायिनी या शीतांशोश्चन्द्रस्य[4] लेखा तस्या अनुकरणे[5] पटुलक्ष्मीर्यस्याः तां तथा । चन्द्रकलासदृशीम्[6] ।। १०७ ।।

भ्रमणरयविकीर्णस्वर्णभासा खगेन
क्वचन पतनयोग्यं देशमन्विष्यताऽधः ।
मुखविधुमदसीयं सेवितुं लम्बमानः
शशिपरिधिरिवोर्ध्वं मण्डलस्तेन तेने ।। १०८ ।।

भ्रमणरयेति[1] । तेन खगेन अधो भागे क्वचन पतनयोग्यं[2] देशमन्विष्यता गवेष[य]ता सता ऊर्ध्वं मण्डलः[3] वर्तुलता कुण्डलता तेने विस्तारिता । किंभूतेन ?। भ्रमणस्य[4] रयेण वेगेन विकीर्णा विक्षिप्ता स्वर्णस्य भा दीप्तिर्येन तेन तथा । उत्प्रेक्षते-शशिनः परिधिरिव परिवेष इव । किंभूतः ?। अदसीयम् अमुष्या[5] दमयन्त्या मुखविधुं सेवितुं लम्बमानः । परिवेषः किल चन्द्रं सेवते[6] ।। १०८ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

अनुभवति शचीत्थं सा घृताचीमुखाभि-
र्न सह सहचरीभिर्नन्दनानन्दमुच्चैः ।
इति मतिरुदयासीत् पक्षिणः प्रेक्ष्य भैमीं
विपिनभुवि सखीभिः सार्धमाबद्धखेलाम् ।। १०९ ।।

अनुभवतीति[1] । तस्य पक्षिणः विपिनस्य वनस्य भुवि भैमीं सखीभिः सार्धं[2] सह आबद्धखेलां[3] क्रीडन्तीं[4] प्रेक्ष्य इति मतिः बुद्धिरुदयासीत्[5] उत्पन्ना । इतीति[6] किम् ?। इत्थं[7] शची इन्द्राणी घृताचीमुखाभिर्घृताची[8] प्रभृतिभिरप्सरोभिः सहचरीभिः सह[9] समं नन्दनवनस्याऽऽनन्दं[10] सा प्रसिद्धा नानुभवति । अपि[11] तु [अ]नुभवति । किं सैवेयं नन्दनानन्दमनुभवति । आनन्दाङ्कः[12] । मालिनीवृत्तम् ।। १०९ ।।

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहर्षं सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
द्वैतीयीकतया मितोऽयमगमत्तस्य प्रबन्धे महा-
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ।। ११० ।।

श्रीहर्षमिति[1] । तस्य[2] प्रबन्धे[3] द्वैतीयीकतया मितः द्वितीयत्वेन संख्यातः[4] सर्गोऽगमत् । द्वितीय[5] शब्दादीकक् । तीयादीकक् । न विद्याचित् । शार्दूलविक्रीडितम् । अनुप्रासः ।। ११० ।।

श्रीमानालिगपण्डितः[1] स्वसमयाविर्भूतसर्वाश्रम-
श्चाण्डूपण्डितसंज्ञितं प्रसुषुवे श्रीगौरिदेवी च यम् ।
तेन[2] क्षारवटावटङ्कमहिते जातेन गोत्रे सतां
टीकां नैषधवर्णने विरचिता सर्गे द्वितीये शुभा[3] ।। १११ ।।

इति[4] नैषधदीपिकायां विहङ्गमनो[5] नाम द्वितीयः सर्गः[6] ।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

टिप्पण

सर्ग–२

1 B om. अवतरणिका 2 श्रवणजनितरणकपूर्वम् 3 P1 श्वोपवर्णनं 4 P1 add. °वश्चन°

1 P1 अधिगत्येत्यादि । 2 P1 om. नलात् 3 P2 विमोचनम् 4 B मनसा° 5 B P2 om. पुरुषेषु उत्तमाद् 6 B P2 मुक्तिः 7 P2 मुक्ति बन्धात् 8 P1 om. ननु 9 B विन्दतेति 10 P2 ईश्वरात् स 11 B °विशेष° 12 P1 add. नित्य° 13 B आनन्दरूपं 14 P1 add. इत्यर्थः । वैतालीयं वृत्तम् । अनुप्रासः श्लेषश्च ॥ १ ॥

1 P2 text चञ्चूपटेन 2 P1 अधु । P2 अधुनीत खग इति । 3 B °विधीयतां; P2 °विधाकृतां; edr. °विधां 4 B om. तथा 5 P1P2 om. समीचकार 6 B कार° 7 P1 विषमोन्नतं; P2 विततम् 8 B यस्याः 9 P1 उन्नत उ इति and add. अनुप्रासः समासोक्तिश्च ॥ 10 B om. इति उरच् । 11 P1P2 om. स्वभावोक्तिः ॥ २ ॥

1 P1 अयमेकतमेन । P2 अयमेकतमेनेति । 2 B कण्डूयमा; P1 कण्डूयितं 3 P1 पक्षनि° 4 P1 एकतमेन 5 P1 द्रुतं 6 P2 स्खलिताः 7 P2 खञ्जत्वात् and ends the com. here ॥ ३ ॥

1 P1 स ग । P2 स गरुद्गनदुर्गेति । 2 B om. कीटान्; P2 पतङ्गान् दंशकादीन् 3 P1 पक्षानां 4 P2 दुर्ग 5 P1 add. अन्योऽपि काननदुर्गेण जलदुर्गेण वा दुर्ग्रहान् अतिशयेनोपद्रवं कुर्वतो दुष्टान् कुट्टनैर्मारणैर्नुदति । अनुप्रासः स्वभावोक्ती रूपकं समासोक्तिश्च ॥ ४ ॥

1 P1 अय । 2 P1 विकारात् वैकृतात् शङ्कितैः 3 B add. जात° 4 P1 ते 5 P1 add. अनुप्रासो जातिश्च ॥ ५ ॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P2 text करं ययौ 2 P1 वह । P2 वहतो बहु शैवलेति । 3 P1 add. कोकनदभ्रमादिव 4 P1 किंभूतस्य नलस्य ? । बहूनि शैवस्य शिवभक्तस्य लक्षणानि चिह्नानि यस्य तस्य भावस्तत्ता तां वहतः बिभ्रतः । 5 BP1 क्षमा 6 P1 सरसोऽपि बहु शैवलक्ष्मा पृथ्वी यत्र तस्य भावः तत्ता तां वहति । 7 P1 वहतः 8 P1 add. अपि 9 B घृतव्रतं; P2 °व्रतः 10 P1 add. श्लेषो भ्रान्तिमान् रूपक मुत्प्रेक्षा च ।। ६ ।।

1 P2 text °विश्रंस° 2 P2 text °पतेः 3 P1 पतगः । P2 पतगश्चिरेति । 4 P1 तस्य 5 P1P2 om नलस्य 6 BP1 P2 om. अवापितः edr. add. अवापितः 7 P1 add. अन्यस्तु चिरकालपालनादित्यवापितेन इति पाठे व्याचष्टे चिरं रक्षणात् तेन नलेन पतगः अतिविश्रम्भमवापितेन कारणेन स कुतूहलं विदधे चक्रे इति । अनुप्रास उत्प्रेक्षा च । 8 P1P2 om. अत्रानुप्रासः ।। ७ ।।

1 P1 नृप । 2 P2 om. विसर्गः 3 P2 कलसौ 4 P1 add. इत्यर्थः 5 P1 कुतकं 6 P1 अन्योऽपि ऊर्मिषु; P2 कश्चिदूर्मिषु मज्जति 7 B om. तरणार्थं; P2 तर° aft. गृह्णाति 8 P1P2 om. अथ च........°कुम्भौ येन 9 P1 निमज्जतो 10 P1 कलसाव° 11 P1 add. अनुप्रासो रूपकं च ।। ८ ।।

1 P1 मृग । 2 P1 मन्वादिस्मृतिः तत्र 3 B धर्म 4 B विशीयते and om. न निन्द्यते 5 P1P2 त्वं माम् 6 P1 add एव 7 P1P2 om. काव्यलिङ्गम्; P1 add. अनुप्रासो विरोधः उपमा हेतुश्च ।। ९ ।।

1 P1 अबला; P2 अबलस्वेति । 2 P1 add. पापर्द्धिः 3 B अबली बलिभिः 4 B मत्स्योऽन्यो न्यायः ।; P2 मत्स्यो न्यायः । 5 B सर्वकारैः; P1 om. सर्वप्रकारैः 6 B स्वभावान् 7 B om. मृगया........मृगान् घ्नताम् 8 P2 न पापाय 9 P2 अनवद्यानि तृणानि अर्दयन्ती° 10 P1P2 om. यतो ....दण्ड्याः ।; P1 add. अनुप्रासः काव्यलिङ्गं दीपकम् ।। १० ।।

1 P1 यद । 2 P1 तदप्रिय° 3 P1 add. किं कृत्वा ?। प्रियमाधाय अपनेष्यामीत्यर्थः । 4 P1P2 वृक्षं कृतं 5 P1P2 add. दृष्ट्वा सिक्त्वा 6 P1 बिम्बप्रतिबिम्बभावेनोपमा । P2 om. अत्र........°मालङ्कारः ।। ११ ।।

1 P1 उपनम्र । 2 P1 here प्रियं 3 P1 स्वयमुप° 4 P1 अदृष्टात् 5 P1 शुचितः 6 P1P2 om. पवित्रात् 7 B तस्य 8 P1 add. तस्माद् 9 P1P2 om. तथा च........°मलङ्कारः ।। P1 add. युक्ते द्वे साम्प्रतं स्थाने (अमर. III. iii. 11) । आर्थी उपमा । पूर्ववाक्यस्य उत्तरवाक्यहेतुत्वेन काव्यलिङ्गम् । सामान्येन वा समर्थने । अर्थान्तरन्यासः ।। १२ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 पतगेन । 2 B जगद्:पतेः 3 P2 भूयते 4 B om. जानाम्येव तु 5 P2 add. प्रति 6 B अर्त्तमो; P2 आर्तय 7 P1 जानन्नप्याधिभिराकुलितोऽस्मि । and add. अनुप्रासो विशेषोक्तिश्च ।। १३ ।।

1 P1 अचि । P2 अचिरादुपकर्तुरिति । 2 P2 om. अथ........ आक्षिपति । 3 P1 add. अर्थम् 4 B om. तत् 5 P1 add. युक्तां स्वलभ्यां 6 B समाध्यो° 7 B°लक्षेन 8 P1 add आत्मोचिता 9 P1 अल्पा अस्तु 10 P1 add. पृथुत्वाणुत्वलक्षणे; P2 अल्पमल्लक्षणे 11 B om. नृणां 12 B ग्रहणे 13 P1 add. उपाय एव औपयिकं विनयादित्वात्, उपायात्, ह्रस्वत्वं चे (of. पा° V. iv. 34) ति उक्प्रत्ययः । युक्तमौपयिकं लभ्यम् (अमर° II. viii. 24) । आक्षेपोऽनुप्रासश्च ।। १४ ।।

1 P1 भवि । 2 B P2 om. इदम् 3 P1P2 विचारे 4 P1 इति aft. किं; B P2 om. इति 5 P1 इति किम् ?। 6 P1 add. ईदृशी 7 B om. वाक् 8 P2 om. शुकभाषिता........अनुप्रासः । 9 P1 add. उपमा च ।। १५ ।।

1 P1 स ज । P2 स जयत्यरीति । 2 B add. सार्थे 3 B om. भीमत्वाद् ...तां तथा । 4 P1 अथवा शङ्कते इति शक्रः । शक्यते इति शक्रः । 5 P1P2 om. शङ्कायां रप्रत्ययः । 6 B om. अत एव....प्रत्ययः । 7 P2 om. नघृतश्चे°........विहितोऽपि 8 P2 add. च 9 B अनुप्रासोपमः ।। P1 अनुप्रास उपमा च ।। P2 om. अनुप्रासोपमे ।। १६ ।।

1 P2 text. तनया 2 P1 दम । P2 दमनादमनाकि(गि)ति । 3 P1 add. दमन° 4 B °वादः; P2 add. सत्यगिरः 5 P1 स्वपुत्रीं 6 B अमराक् 7 B प्रसेदुषः अधिकं 8 P1P2 om. तुष्टात् 9 P2 lecto. inf. mg. add. पुनः किं भूतस्य ?। तपो धर्म एव धनं यस्य तस्मात् । 10 B दिष्टः कथितो...... तां तथा here. and om. कालत्रये 11 P1P2 °त्रये च 12 P2 om. असाधारणो 13 P1 अनुप्रासोऽतिशयोक्तिश्च ।। 14 B कथितो aft. °त्रितये 15 B om. तां तथा ।। १७ ।।

1 P1 भुवनत्रय । P2 भुवनत्रयसुभ्रुवामिति । 2 P1P2 om. कृत्वा 3 P1 add. कारणात् 4 P1 add. कारणात् 5 B om. इयं; P2 add. इयं 6 P1 add. अतिशयोक्तिः ।। १८ ।।

1 P1 श्रिय । 2 B om. त्वं तां 3 P1 परं here 4 B P1P2 अवैहि; edr. अवेहि 5 P1 उत्पन्नाम् उदिताम् 6 P1 व्यवधानेऽपि अन्त° here 7 P1 add. सति 8 B रुद्रस्य 9 P1 add. विधोश्चन्द्रस्य कलां

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

10 P1 add. इति; add. केचित् मृडचूडानिलयत्वं विधेयमाहुः P2 om. रूपकमाक्षेपश्च ॥ १६ ॥

1 B om. चिकुरप्रकरा इति ।; P1 चिकुरप्र । 2 B प्रकाशः 3 P1 बिभर्तीति: P2 बिभर्ति 4 B केशोनां 5 P1 om. तुलनां 6 P1 add. चामरेण 7 P2 om. पशुनापि 8 P1 add. गवापि 9 B °भागेन 10 P1 P2 add. निज 11 P1 पशुनापि मूर्खेणाऽपि 12 P1 अनुप्रासोऽतिशयोक्तिश्च । अपुरस्कृतेनेति श्लिष्टम् ॥ P2 om. अतिशयोक्तिः ॥ २० ॥

1 B text °यन्तु 2 B om. स्वदशो°....भयात्; P1 स्वदृशोरित्यादि । 3 P2 यत् 4 B निमीला 5 B मीलनं; P2 निमीलनं 6 B om. अखर्वा.... स्यात्तस्या; 7 P1P2 जितत्वाद्°........निमेषणम् here. 8 B यद° 9 P2 यदा मृगाः 10 P1 कण्डूयनं कुर्वन्ति 11 P1 add. अनुप्रासः; P2 om. समासोक्तिरपह्नुतिश्च ॥ २१ ॥

1 B om. अपि लोकयुगमिति ।; P1 अपि 2 P1 स्वर्गलोक° 3 B om. एकवचनप्रयोगः 4 B स्वर्गश्रुतिः 5 P2 °गमितया प्रमिद्धतया 6 P1 °स्वर्लोक° 7 B om. सदृशी 8 P1 add. दमयन्त्याः 9 P1P2 om. सामुद्रिक° 10 P1 om. दमयन्त्या 11 B om. गुणाः; P2 रमणीयाः 12 P1 om. विनिमयेन शोभन्ते 13 B अवगता 14 P1P2 अन्ते 15 P1 P2 om. अथवा........अनुभवैकगम्या एव 16 P1P2 लोकयुगं........वैपरीत्यम् in the beginning of the verse. 17 P1P2 °पृथ्वी° 18 P1 add. श्रुतियुक्त्यागामितया; P2 श्रुतिगामितया 19 P1 P2 om. उत्कृष्टा; P1 add. वेत्यर्थः 20 P2 om. प्रसिद्धः 21 B पृथिव्यां; P1 P2 पृथ्वी 22 P1 P2 पृथ्वी 23 B om. तदा 24 P1P2 न तथा 25 B प्रतीतिर्वेद° 26 B प्रतिभासते 27 B तुष्टा ॥ २२ ॥

1 B om. नलिनं मलिनमिति ।; P1 नलिनं । 2 B गर्वेण 3 B दुःखं 4 P1 P2 om. अञ्जनाञ्चिते 5 B add. अञ्चिते 6 P1 add. विलासान भिन्नत्वात् । अनुप्रासोऽतिशयोक्तिश्च ॥; P2 om. छेकानुप्रासातिशयोक्ती ॥ २३ ॥

P1 अध । P2 अधरं किलेति । 2 B अधरं 3 P1 वदत् ओष्ठो and add. भाषमाणं 4 P1 add. रमणीयं 5 B अन्यर्थं 6 P1 om. हीनं 7 om. हीनं 8 B साध°; P2 om. स 9 P1 add. एव 10 P1 add. अधः इर्यति [इति] अधरः । यदाह यस्काचार्यः—अधरो अधो अरोधोनं धावति इत्यूर्ध्वगतिः प्रतिषिद्धा (II. 11) रदनयोः छदे इव वाससी इव । नपुंसकत्वं छदस्य प्रतापमार्तण्डे; 11 B °वाजिस्थि° 12 P1 add. तथा गरुत्पक्षच्छदोऽस्त्रियाम् उत्प्रेक्षा ॥ २३ ॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 हृत। 2 P1 °निर्मितये 3 P1 P2 om. हृतसारं 4 P1 विलोक्यते here. 5 B सारोपहाराद् 6 B om. तत् 7 P2 गम्भीरया 8 B om. यत् 9 B नीलिमा 10 B उत्प्रेक्षा ।। P2 om. अनुप्रासोत्प्रेक्षे ।। २५ ।।

1 P1 धृतलाञ्छन । 2 P1 P1 om. उत्तारणाय 3 P1P2 °भाजनम् 4 P1 add. गोमय° 5 B om. विधुम् 6 B om. हि 7 add. सुधाया वा 8 B रूपसमं; P1 add. अस्त्री शरावो वर्द्धमानः (अमर° II. 9-32)। अनुप्रासो रूपकमुपमा समं च ।। P2 om. रूपकं........चालङ्कार ।। २६ ।।

1 P1 सुष । : P2 सुषमाविषये इति । 2 P1 add. परमायाः 3 B विशेषये 4 B om. पद्म° 5 P1P2 यत् here. 6 P1P2 शरं here. 7 P1 P2 °स्थानस्यः पुरुषः P1P2 om. पुमान् 9 P1P2 शरं धनुर्धरसमीपे समानयति । 10 P1 दिव्यकर्ता before निमज्जति; P2 om. जानु°........ गृहीत्वा 11 P1 निमग्न° 12 P1P2 om. यदुक्तम् & the verse........ °ऽशुद्धः ।। but P1 add. सुपु समा इति । सुषामादिषु च (पा° VIII. iii. 94) इति षत्वम् । अनुमानमुत्प्रेक्षा अतिशयोक्तिश्च ।। २७ ।।

1 B P1 धनुषी ।; P2 धनुषी इतीति । 2 B om. पञ्चबाणस्य P1 P2 om. कामस्य 3 P1 उच्चा नासिका; P2 उच्चिके 4 B add. त्वयि नालीकविमुक्तिकामयोः तस्या भ्रुवो रतेः कामस्य धनुषी चापद्वयमुदिते उत्पन्ने । किमर्थम् ?। विश्वस्य जयाय । उच्चे नासिके; P1 add. नासा नासिके [इ]ति पठित्वा तस्य उच्चे नासिके नासा° 5 P1 वालीकविमुक्ति° 6 P1 om. नलिकया........°मलङ्कारः ।। 7 P1 om. अलङ्कारः । P2 add. उदिते इति नासिके इति च द्विवचनान्तपदे ।। २८ ।।

1 P2 text. ग्रहयालुः 2 B om. सदृशी तवेति ।; P1 सदृशी तव शूर सा परमित्यादि । 3 B om. परं and read केवलं aft सदृशी 4 P1 P2 om. त्वत्तुल्या एव 5 B यस्य 6 P1 अरीन् 7 B तदा; P1 सा दमयन्ती aft. हस्तशोभया 8 P1 लक्ष्मी शोभाः 9 P1 गृहयालुः here. 10 P1 add. मित्रजुषामपि । मित्रे जुषन्ते प्रीतानि भवन्ति । सूर्योदये विकसितानि भवन्ति तेषामपि । अथवा; 11 P1 जुषन्ते 12 P1 त्वमपि here. 13 P1 रिपूणां श्रियो लक्ष्मीः 14 P1 समश्लेषौ ।; P2 om. सम°........ सङ्करः ।। २६ ।।

1 B om. वयसी शिशुतेति ।; P1 वयसी । 2 P1 add तदुत्तरे 3 B P2 च ते P1 विमज्य प्रकर्षेण 5 P2 only विभागं 6 P1P2 om. स्व°........तिष्ठतः 7 P1 add. विधात्रा अथ च शास्त्रोक्तेन प्रकारेण 8 P1

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

P2 लोम° 9 P1 P2 व्याप्तुम् 10 P1 add. तां 11 P1 स्वाभिविधि विधित्सुनी इति उक्तनिमित्ता विशेषोक्तिः। P2 om. अत्रोक्त°........... °रलङ्कारः ।। ३० ।।

1 B om. अपि तद्वपुषीति ।; P1 अपि तद्वपुषी । 2 P1 om. अपि सम्भावने ।; P2 at the end. 3 P2 द्वयो उभौ 4 B P2 प्लवनार्थं 5 P2 °करैः 6 P1 add. खलुशब्दः सम्भावने । उत्प्रेक्षातिशयोक्तिश्च ।। P2 om. अत्र........अतिशयोक्तिरपि ।। ३१ ।।

1 B om. कलशे इति ।; P2 text. कलसे 2 P1 कलशे । P2 कलशेति । 3 P1 यत्; P2 om. स 4 P1P2 उच्चो 5 P1 om. यत् 6 P1 add. उच्यते 7 P1 समवेति 8 B सकारि°; P2 सहकारिणः 9 P1 add. चक्र° 10 P1P2 न घटे 11 P1 समवेति 12 P1 °कारणकुलालादे° 13 P1 समवेति 14 P1P2 कुम्भकारेण 15 P1P2 श्वेतेन 16 P1 श्वेतो घटो 17 P1P2 om. च 18 P1 °भ्रमको नाम; P2 °कारितालक्षणो नाम 19 P1 यत् 20 P2 भाति 21 P1P2 °वायादीनां 22 BP1 om. न 23 B प्रश्नोपरिति; P1 only अनुमानरूपकभ्रान्तिमन्तः ।।; P2 om. अत्रा°........मार्जारः 24 B om. भ्रान्तिजननात् ।। ३२ ।।

1 P1 भज । P2 भजते खल्विति । 2 P1 add. दमस्वसुः 3 P1P2 om. निन्दा 4 P1 षण्मुखानि 5 B om. हस्तिनां 6 P1P2 राजा एरावणोऽपि 7 P1P2 जभि 8 B नामयिता; P2 नमयिता 9 P1 अनुप्रास उत्प्रेक्षा दीपकमपि । भजते इति एकस्य पदस्य वाक्यदीपनात् । P2 om. अन्योऽपि........चालङ्कारः ।। ३३ ।।

1 P1 उदरं । P2 उदरं नतमध्येति । 2 P1 add. विधात्रा 3 P1 add. मुष्टिना 4 B यस्या 5 P2 om. च 6 P1 तदेव 7 P2 स्थानं पदं 8 B नम्ना; P2 नाम्ना 9 B वयस्ताभिः 10 P1 अनुप्रासोऽनुमानं च ।। P2 om. काव्यलिङ्गम् ।। ३४ ।।

1 P1 उदरं । 2 P1 कुतकी 3 P2 om. तस्य मुष्टेः 4 P2 सहेम° 5 P2 मेखलाया 6 P1 add. एतेन मुष्टिग्राह्यमध्यत्वात् कृशोदरीत्यर्थः । अनुमानमुपमोत्प्रेक्षा ।। ३५ ।।

1 P2 text. °शिष्यया 2 P1 पृथु । B पृथुवर्तुलमिति । 3 edr. add. मान्मथं 4 P1 °पूर्वं; P2 om. विज्ञानपूर्वकं 5 P1 निर्मितः 6 P1 °भ्यासेनापरमेकचक्रं मन्मथरथं किमु विधिर्विधित्सति । 7 P1P2 तस्या नितम्बं 8 P1 add. अनुमानमुत्प्रेक्षा च ।। ३६ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 तरु । P2 तरुमूरुयुगेति । 2 P1 किमु bef. जिष्णुः 3 B P2 om एव 4 P1 add. किन्तु 5 B om. नलकूबस्य; P2 °कुबरस्य 6 P1 P2 om. सा 7 P1 add रम्भां 8 P1 फलं तपसा 9 P2 फलानि 10 P1 add. उत्प्रेक्षाव्यतिरेकौ । रम्भाकलशब्दौ श्लिष्टौ ।। ३७ ।।

1 P1 जलजे । P2 जलजेति । 2 P1P2 om. ते पादपद्मे 3 B हंसकी° 4 P1 add हंसा एव हंसकाः 5 P2 महंसकैः 6 P1 add. अत्र हंसशब्दसाम्यात् रुतिसम्भवात चोत्प्रेक्षा । पूर्वार्द्धे तु हेतूत्प्रेक्षा ।। ३८ ।।

1 P1 श्रित । 2 B om. न 3 P2 गमने.......प्राप्ति च aft प्राप्नोतु 4 P1 add. एव 5 P2 श्रिताः पुण्याः 6 P1 om. क्षपाः 7 P1 श्रितपुण्य-तीर्थस्य समाधिगतः सद्गतिर्भवितेति । समासोक्तिः ।। P2 om. अन्योऽपि...... गतिर्वर्णिता ।। ३९ ।।

1 B सरसीति । P1 सरसीः । 2 B °रतित्वम् 3 B एवंशीलरूपो 4 P1 here. °दरीति वक्तव्ये इयमर्थस्य प्रौढिरोजः (का. सू. III. ii. 2) । वक्रोक्ति-जीवितकारेण चैष वक्रताप्रकारः कथ्यते । यथा-यमुनाकल्लोलवक्रालके (II.xii) ति ।; P2 om. कृशोदरी 5 P1 add. अनेके 6 B ससीः 7 P1P2 om. विगाहितुं 8 P1P2 om. मया 9 P1 add. काव्यलिङ्गम् ।। P2 om. अत्र........°रित्यादि ।। ४० ।।

1 P1 अव । 2 P1 इति किम् ?। 3 edr. add. तु 4 P1P2 om. लक्षणया न सदृशीम् 5 P1P2 om. ज्ञात्वा 6 B °ध्यायिनो 7 P1 add. प्रतीपं च ।। ४१ ।।

1 P1 अनु । 2 B हंसः 3 P2 अपनेतुम् 4 P1 om. किं कुर्वन् ? 5 B om. पतिं 6 B योग्यमिति 7 P1 add. समम् ।। ४२ ।।

1 P1 अन । P2 अनया तवेति । 2 B मम here; P2 मम सा 3 B om. मे; P2 lecto. inf. mg. add. शुचि निर्मलं स्मितम् ईषद्धासो यस्याः सा 4 P1 add. यद्यपि दृष्टायाः बहुकालो गत इ त्यर्थः । 5 P1 add. एवंविधया 6 P2 om. नस्य 7 P1 add. तस्या 8 P1 परमद्य स्मृतिप्रबोधोऽधायि तत्सदृशस्य 9 P1 स्मरणम् ।। P2 om. स्मरणालङ्कारः ।। ४३ ।।

1 P2 text वरं 2 P1 त्वयि । 3 P1 add. त्वयि 4 P1P2 add. एव 5 P1 हार° 6 P1 °हावभावा°; P2 हारभावा° 7 B om. क्रोधाश्रु°.... इत्यालंकारिकाः ।; P1 add. दशरूपकेऽपि; P2 क्रोधा°....... °किञ्चितम्

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

aft. शङ्के 8 P1 om. इत्यालङ्कारिकाः 9 P1 add. सम्भावयामीत्यर्थः । प्रतिवस्तूपमा ।। P2 add. शृङ्गारचेष्टाविशेषः । हर्षादुदितगीतादिव्यामृष्टं किलकिञ्चितम् ।। ४४ ।।

1 P1 तव । 2 P1P2 इदं तव 3 P1P2 वन्ध्यस्य 4 P1 add. विसर्गः 5 P2 °प्रवदन्ती 6 P2 वक्तोभाव° 7 edr. add. in [ ] fr. on. 8 B इति प्रसिद्धिर्मनुषोप्येव । 9 P1 add. विनोक्तिरुपमा । तया विनेति दीपकम् । 10 B no. 44 ।।

1 P1 अनया । P2 अनया सुरेति । 2 P1 add. भ्रमरैः 3 P2 यदा 4 P1 add. एतेनात्यन्तदुर्लभत्वम् । 5 P2 add. तया 6 P2 प्रतिषेधति । P1 add. बिम्बप्रतिबिम्बभावेनोपमा । यदाह रुचकः उपमानोपमेययोः साधर्म्ये भेदाभेदतुल्यत्वे उपमा (अलं स. II. 12) ।। ४६ ।।

1 P1 तद । P2 तदहं विदधे[इ]ति । 2 P1 add. समीपे 3 P1P2 add. स्तुतिं 4 B om. देव्या; 5 P2 यथा here 6 P1P2 रूपेण 7 B om. स्थितं; P1 स्थितिं 8 P1 इत्येव° 9 P1P2 यथा-यथा 10 P1P2 एवमत्रापि ।; P1 add. अतिशयोक्तिः ।। ४७ ।।

1 P1 तव । 2 P1 om. कथनं 3 P1 निवेदितम् 4 B किवलां 5 P1 add. अनुमतिमेव 6 B om. ज्ञातुम् 7 P1 add. एवं 8 P1P2 add. वदन्ति 9 B कृतमेव 10 P1 add. साधूनां फलेन वचनं प्रमाणान्तरावगतमपि शाब्देन प्रतिपादितं प्रयोजनान्तराभावात् । व्यपोह्यमानस्य वाक्यस्य कण्ठेन वचनस्य व्यवच्छेदाय पर्यवस्यति । वैधर्म्येण ।; P2 om. अर्थान्तरन्यासः ।। 11 P1 add. परिसंख्या च ।। ४८ ।।

1 P1 तदिदं विशदं वचोऽमृतमित्यादि । 2 P1 अभ्युदितं here 3 B om. विशदं 4 B निर्ममे 5 P1 वाचो° 6 P1P2 विनिर्मिमीते । 7 P1 रूपकमुत्प्रेक्षा च ।। P2 om. उत्प्रेक्षा........मलङ्कारः ।। ४९ ।।

1 P1 text °कण्ठकूपजाः 2 B परिसृज्येति । P1 परि । 3 P1P2 हस्तेन 4 P1P2 om. तथा 5 P2 om. विसर्गः 6 P2 प्रिया वाच 7 P2 om. यः 8 P1 उपमानेन निगीर्य हस्तसाध्यवसानम् इत्यतिशयोक्तिः । परम्परितरूपकं च ।। P2 om. अत्र........°रलङ्कारः ।। ५० ।।

1 P1 न तुला । P2 न तुलाविषये[इ]ति । 2 P1 P2 इयं तव 3 P1 om. उपमाया 4 P1 प्रवर्तते । 5 P1 शीलता 6 P1P2 om. सद्वृत्तता 7 P1P2 om. तथा 8 B अकृते 9 P1 शौर्यादयो; P2 सौन्दर्यों° 10 P1

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

P2 °ग्रन्थस्य ।। P2 उद्दिश्य 12 P1P2 सर्वस्व° 13 P1 add. नान्यः । पूर्वार्द्धस्य हेतुत्वेन वा त्वदुदाहरणेत्यादि योज्यम् । अतिशयोक्तिर्व्याख्यानन्तरे काव्यलिङ्गं चा[न]न्वयश्च ध्वन्यते ।। ५१ ।।

1 P1 न सु । P2 न सुवर्णमयीति । 2 P2 om. केवलं 3 P1P2 om. न 4 P1 यस्यां 5 B om. सा 6 B om. पथि 7 P2 °ङ्गीकरोति 8 P2 °पात: 9 B om. तत्ता; P1 add. श्लेष उत्प्रेक्षा च ।। ५२ ।।

1 P1 भृश । 2 P2 विद्यते यस्य सारं 3 B add यथा अतः 4 P1 स प्रधानोक्तया व्यवहृतः श्रेष्ठोऽयमिति । तैरभ्युपगतः । अथवा इतरो नीचो निकृष्टो निर्धनलक्षणो निधानं 5 P2 सन् विधि: 6 B रूपकर्था°; P1 इतरस्त्वन्यनीच-योरि (III. 3. 192) त्यमरसिंहः । तथा इतरस्यामरेति अन्यस्मिन् । रूप-कमर्थान्तरन्यासश्च ।। P2 om. रूपक°.......°लङ्कारः ।। ५३ ।।

1 P1 शतश: । 2 BP1 add. विसर्गः; P1 तु श्रुताः 3 P1 स्वदृशो 4 P1 रूपकं, भाविदर्शनं प्रत्यक्षमिवेति भाविकम् ।। P2 om. रूपकभाविका-लङ्कारो ।। ५४ ।।

1 P1 अखिलं । P2 अखिलं विदुषामिति । 2 P2 lecto. inf. mg. & mid. sup. mg. add. समस्तमनाविलम् अकलुषं निःसन्दिग्धमित्यर्थः । कीदृशानाम् ?। चक्षुषोऽपि स कान्मित्रकथितस्य आधिक्यमाह । अखिलम् अतिदूरादतिसामीप्यादिन्द्रियघातान्मनोऽनवस्थानात् सौक्ष्म्याद्व्यवधानात् अभिभावात् समानाभिहाराच्चेति स्वहृदयापेक्षयापि मित्रप्राधान्यद्योतनार्थं प्राथम्येनोपादानम् । 3 BP2 om. हृदा 4 BP1 om. च 5 P1P2 वस्तुनः परमाण्वादेः 6 P1 अप्रस्तुतप्रशंसा ।। ५५ ।।

1 P1 अमित मधु । 2 P1 add. हे 3 P1 add. अधैर्यधारिणः पुरुषान् धिक् । अथवा धिगिति पूर्वेण सम्बद्धय एकं वाक्यम् । 4 B add. कं धिक् ?। 5 P1 प्रचुरम् अमितम् अमलं 6 B om. पाय्य°........शब्दः but add. मम कष्टम्; P2 पाय्यसांन्नायेत्वादिना 7 P1 om. इत्यादिना........ साधुः । add. अतिशयोक्तिः रूपकमर्थान्तरन्यासश्च । 8 P1 om. अत्रा°........ सङ्करः । sup. text. add. ऋक् सामिधेनी धाय्या च या स्यादग्निसमिन्धने (II. 7. 22.) इत्यमरः । अग्निसंधूक्षणो ऋक् । भवेदित्यहार्थे लिट् ।। ५६ ।।

1 P1 विषमो । 2 P2 विषमय 3 P1 add. विषमत्वे वा हेतुरयम् 4 B °नलएधसा 5 P1P2 इन्धनेन भूतेन 6 P1 add. ओजोगुणः । रूपकमनु-प्रासः काव्यलिङ्गं च ।। ५७ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 प्रति । 2 B om. हे खग ! 3 P1 अधिगच्छति । 4 P1 add. ततः 5 P2 om. किं भूतैः ?। 6 P1P2 संसर्गात् 7 P1 विरहिणा 8 P1 om. विसर्गः 9 P1 धैर्यतस्करैः 10 P1 अनुप्रासः अनुमानं सङ्गमस्य कारकत्व-स्यापि सम्भवान् काव्यलिङ्गमपि । रूपकं च । साध्यसाधनयोर्निर्देशोऽनुमानम् ।। P2 om. अत्रानुमानम् ।। ५८ ।।

1 P1 कुसु । 2 P2 भवन्ति न 3 B तत्र तर्हि 4 P1 °जातानि 5 P1 om. तानि भविष्यन्ति; P2 om भविष्यन्ति । 6 B विजानि; P2 विषजानि 7 P1 add. अनुमानम् ।। ५९ ।।

1 P1 तदि । 2 B om. तत् 3 P1P2 मज्जतो 4 P1 हे हंस त्वं 5 B om. नौरिव 6 P1 add. पोतश्च 7 P1 add. रूपकमुपमा च । रूपकेण त्वभेदे प्रतिपादिते अनन्वयाविति भेदप्रतिपादनादतिशयोक्तिश्च । व्यति-रेकोऽपि घटते । तेनाऽत्र सन्देहसङ्करः ।। ६० ।।

1 P1 अथवा । 2 P1P2 om. प्रेरणा 3 B om. पिष्टं 4 P1P2 om. स्वकार्ये 5 P1P2 om. प्रेरयामि 6 P1P2 om. करोमि 7 P1 विना 8 P2 add. ज्ञानानां 9 B सत्यार्थता 10 P2 add. तथा च अनुमानम् । and. सर्वे प्रत्यया........°प्रत्ययवत् here; 11 P2 add. अत्र भट्टकार्तिकमपि 12 P1P2 om. च 13 P2 om. स्व° 14 P1 add. यथा 15 P1 एव प्रवृत्तत्वात् । अनुप्रासो निदर्शना काव्यलिङ्गम् उपमा ।। 16 P2 om. यथा.... °लङ्कारा: 17 B °कालिङ्ग° ।। ६१ ।।

1 P1 तव वर्त्मनि । 2 P1 add. मार्गे 3 P1 add. वर्तताम् 4 P2 त्वं हे हंस ! 5 P1 add. गत्वा अत्राऽऽगच्छेति परुषे वक्तव्ये साधयेति सौकुमार्यं नाम गुणः । तदुक्तं अपारुष्यं सौकुमार्यमि (का°सू° III. 2. 12)ति यथाऽमृतं यशः शेष इत्याहु । एकाकिनं देवताद्वितीय इति । तथा ईप्सितं साधय कुरु । अथवा एकमेव वाक्यम् ईप्सितं साधय साधय इति । द्विरुक्त्या सम्भ्रमो गम्यते । हे वयः 6 B om. हे 7 P1 add. प्यन्तो वा । यथोपकारिप्रकरणे भवन्तमेव स्मरामः । तथा यतितव्यमित्यर्थः । दमयन्ती यथा समयेऽस्मानेव स्मरति तथा प्रयतितव्यम् । इति केचित् । आशीरलङ्कारः । यदुक्तं—आशीर्नामाभिलषिते वस्तुन्याशंसनं यथा (का° द. II. 357) । अनुप्रासश्च ।। 8 P2 om. आशीर्नामालङ्कारः ।। ६२ ।।

1 P1 इति तम् । 2 P1 add. वनमेव वेश्म अथवा 3 B om. अविशद 4 B om. या 5 B °संशितैः; P1P2 कलहंसस्य 6 P1P2 om. साश्चर्यं:; P1 fur. रूपकमतिशयोक्तिश्च ।। ६३ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 अथ भीम । P2 अथ भीमसुतेति । 2 P1 add. अनुप्रासोपमा ॥ ६४ ॥

1 P2 text °चकार 2 P1 प्रथमं । P2 प्रथमं पथीति । 3 P1 add. पुरोवर्तिनि देशेऽग्रतः कलयांचकार । 4 P2 लोचनयोतिथिम् 5 P1 add. कलसमिति पाठः । P2 om. अनुप्रासः ॥ ६५ ॥

1 P1 अव । 2 P1P2 om. लग्नं 3 P1 add. एतेन शकुनकथनमिदमपि । 4 P1 add. विलासवनस्य 5 B अनलसं P1 अन्त्यसंदष्टकं यमकम् । P2 om. अत्रा°........°मलङ्कारः ॥ ६६ ॥

1 P1 नभसः । P2 नभसः कलभैरिति । 2 B हस्तिभिः बालकरिभिः 3 B add. तस्मात् 4 B om. तथा वि° 5 B ह्रस्वशाखाशिफः क्षुपः at the end. 6 P1 add. तरक्षुस्तु मृगादनः (अमर° II. V. ।) । 7 P1 रूपकमतिशयोक्तिर्वा । अन्त्यसंदष्टकं च ॥ P2 om. अत्रा°........°यमकं च ॥ ६७ ॥

1 P1 स य । P2 स ययौ धुतेति । 2 B om. क्षणं 3 P1 om. विसर्गः; P2 om. पक्षा 4 P2 om. स 5 P1 दीपकं जातिश्च ॥ P2 om. अत्र........सङ्करः ॥ ६८ ॥

1 B °दीधितिरिति । P1 तनुदीधिति । 2 P1P2 किंविशिष्टे ?। 3 B add. निभे 4 P1P2 धारा रेखां तया 5 P2 om. स्यात् 6 B om. पक्षाणां 7 P2 सुवर्णरेखा 8 P1 अनुप्रास उत्प्रेक्षा उपमा च ॥ P2 om. अत्रोत्प्रेक्षोपमा ॥ ६९ ॥

1 B विनद्धिरिति ।; P1 विनमद्भिरघः । 2 P1 add. शब्दिता 3 B P1P2 om. स तथा; edr. add. स तथा 4 P1P2 श्येनस्य 5 P1 add. झगिति 6 P1 add. जातिः काव्यलिङ्गं च ॥ ७० ॥

1 P2 text °वेगे° 2 P1 ददृशे न जनेन । P2 ददृशे न जनेनेति । 3 P1P2 पृथिव्यां 4 P1P2 add. हंसच्छायां 5 B om. अवेक्ष्य 6 P2 विस्तीर्णं 7 P1 येन स तथा तेन 8 P1 om. किमिदं छायारूपमिति । 9 P1 add. वा । °सुराच्छायाशालानिशानामि(पा° II. iv. 25)ति । 10 B om. छायान्त°........°च्छायम् । 11 P1 add. यत् 12 B om. गमनं तेन 13 B P2 अच्; P1 उच्; edr. अ । P1 fur. काव्यलिङ्गं च । पुनरुक्तवदाभासश्च । वेगद्रुतशब्दयोरेकार्थ्यमवभासनात् ॥ ७१ ॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 न वनं । P2 न वनं पथीति । 2 P1P2 समुच्चये 3 P2 add. इति गमनविषये सादरता प्रतिपादिता। 4 P2 om. यमकम् ॥ ७२ ॥

1 P1 अथ भौम । P2 अथ भीमभुजेनेति । 2 B om असौ P1P2 असौ aft. किंभूता ?। 3 B om. कैलास° 4 P1 यमकमुपमा च P2 om. अत्र........यमकं च ॥ ७३ ॥

1 P1 दयित । P2 दयितं प्रतीति । 2 P2 शुभ्राः aft. कात्यायनः 3 P2 भित्तेर्न 4 P1P2 पृथिव्याः 5 B °नम्रा° 6 P1 अनुप्रासोत्प्रेक्षोपमा[:] ॥ ७४ ॥

1 P1 नृप । 2 P1P2 नगर्यां 3 P1 शरणार्थमुवास । 4 P2 add. मयेन् 5 P1P2 om. आतिवर्द्धमानम् 6 B add. अ[प]ह्नुति[वि]भावना-सङ्करो 7 P2 om. तु 8 P1 add. असती आवृत्तिः आवरणं तया इति वा । न सदा नित्यमावृत्तिर्यस्य तत्तथा । उदयत्तमं चेति व्यस्तं समस्तं वा । 9 P1 add. अपह्नुतिर्विभावना उदात्तं च । वासरे सत्यपि तमोनाशाभावः । इन्द्रनीलमणीनां गृहाः सन्तीत्युदात्तम् ॥ ७५ ॥

1 P1 सित । 2 P1 add. तिथयोर्द्वयोः अतिथिर्न गृहागतो, नास्ति तिथिरस्याऽतिथिः । अतति सततं गच्छति वा । उपाद्देवकरणपूजासङ्गतिकरण-मित्रकरणपथिष्विति वक्तव्यमि (वा° 419) ति सङ्गतकरणे आत्मनेपदम् । सङ्गतकरणमुपाश्लेषो यथा गङ्गां यमुनाम् उपतिष्ठते । वा लिप्सायामि(वा° 624)ति वा आत्मनेपदम् । 3 P1 प्राघुणकी 4 P1P2 सर्वेषु 5 P1 om. पूर्णिमा 6 P2 किंभूतैः ?। 7 P1 add. यो 8 B P1P2 om. रोदो; edr. add. रोदो 9 P1 अथवा 10 P1P2 गृहेण 11 P1 add. अनुप्रासः । सर्वासु तिथिषु पूर्णिमा सम्बन्धप्रतिपादनात् असम्बन्धे सम्बन्धरूपातिशयोक्तिः । उदात्तम् । तिथीनां गृहस्थव्यवहारसमारोपात्समासोक्तिः । पूर्णिमा अतिथिरिति रूपकं च ॥ ७६ ॥

1 P1 सुदतीजनमज्जनार्पितैरित्यादि । 2 P2 यस्यां नगर्यां 3 B om. दीर्घिका 4 B om. अपि 5 P1 निशा सकलया 6 B om. रात्र्या 7 P1 निर्मला न 8 P1 °लोकस्य 9 B om. सुरभितः 10 B om. का इव 11 B om. सा 12 P1P2 अनुनीयमाना 13 P1 add. सपत्नीजने सुदतीजने यन्मज्जनमत्यासक्तिः प्रियस्येति शेषस्तेनार्ऽपितैः प्रियं सङ्क्रान्तैः घृसृणैः 14 P1P2 चित्तं 15 P1 add. उदात्तोपमे विरोधोऽपि ॥ ७७ ॥

1 P1 क्षण । P2 क्षणनीरवयेति । 2 B वेशानां 3 P1P2 अवयव° 4 B °मिष्यते 5 P2 यजि 6 P1 देवपूजासङ्गतौ 7 P2 om. च 8 B om.

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

क्षणं 9 B जने 10 P1 om. तथा 11 P1 वप्रावलि: 12 P1 om. रात्रौ 13 P1P2 श्रित्वा 14 P1P2 प्राप्नोति। P1 fur. रूपकमुदात्तम्। वेश्ममयमित्यपह्नुतिरपि ।। ७८ ।।

1 P1 विललास। 2 B om. °ता द्यौरिव........अयमर्थ: 3 P1 पानीयं 4 P1 तत्तथा 5 P2 add. च 6 P1P2 जलमिव aft. अनवलम्बितं 7 P1 add. उत्प्रेक्षा अपह्नुतिश्च ।। ७९ ।।

1 P1 व्रजते दिवि। 2 P2 यस्यां 3 B om एव 4 P1P2 om. विसर्ग: 5 P1 om. इव 6 P1 add. अ(द)द्रु: 7 B हरे: 8 P2 चालनां 9 P1 समागच्छति 10 P1 add. भवति। अनुप्रासो रूपकं, ताडनानामरुण-कार्यसम्बन्धप्रतिपादनादसम्बन्धरूपातिशयोक्ति: ।। ८० ।।

1 P1 क्षिति। 2 P1P2 नगरी 3 B भूमि: 4 P1 स्वर्गलोक: 5 P1 add भूतानां 6 P1P2 om पृथक् 7 B om. सारै: 8 P2 °रिक्षलोके 9 P1 om. °तन° 10 P1 °रित्यत्र यथासंख्यतोऽपि व्याख्या। 11 B स्वानि स्वानि P1 निजानि निजानि 12 P1P2 नगर्यां 13 P2 add. तत् 14 B अत्रार्थ:। P1 अनुप्रासो यथासंख्यमुत्प्रेक्षा उदात्तं च ।। P2 om. यथासंख्य°.... °दुदात्तमपि ।। ८१ ।।

1 P1 दधदं। 2 P1P2 नगर्यां 3 P2 °पते 4 P1 add. कथं न; P2 add. न here. 5 P2 recto. sup. mg. add. न गच्छतु गच्छत्वेव 6 P2 recto. sup. mg. add. अत्युच्चत्वात् 7 P1P2 प्राप्नोतु। 8 B सुघता 9 P2 °वंर्तते 10 P1P2 om. निर्मलपीयूषवत् ।। 11 P1 श्लेषो रूपकं च ।। P2 om. श्लेषालङ्कार: ।। ८२ ।।

1 P1 बहु। 2 B रूपका; P1 नानारूपका:; P2 बहुरूपा नानारूपा 3 P1P2 om. विसर्ग: 4 B om. भक्षिता इव 5 P1 रूपकमुत्प्रेक्षा ।। P2 om. अत........दृश्यन्ते ।। ८३ ।।

1 P1 बलिसद्मदिवं। 2 B om. विष्णु 3 P1 add अथ च ऊर्ध्वम् 4 B P2 किंभूतो........सत्यगी: at the end. 5 P1 om. सत्यगी: 5 P1 भूषया 7 P2 अधरो कृता 8 B add. इव 9 P1P2 add. अध:कृता। P1 fur. अधोभागे कृता तिरस्कृता च ।। ८४ ।।

1 P2 text प्रतिहट्टपथं 2 P1 प्रतिहट्ट। P2 प्रतिहट्टपथेति। 3 P2 उत्थितान् 4 P2 कलहान् 5 P1 add. विसर्ग: 6 BP2 किंभूतान् ? 7 B जातान्; P2 घरट्टजातान् 8 P1 add. अध्यवसायस्य सिद्धत्वादतिशयोक्ति: ।। ८५ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 B वरण:स्येति ।; P1 वरण: । P2 वरण: कनकेति । 2 B om. °भ्य अनु°........कपाटान्येव 3 P1 add. वृणोति वरण: । प्राकारो वरण: शाल: (अमर° II. iii. 3) 4 P1 घनरत्ने घने रत्नमये कपाट एव पक्षती 5 B क्षपति 6 P1 add. रूपकम् । व्यवहारप्रतीतिस्तु रूपकादेव । तेनात्र समासोक्ति: ।। ८६ ।।

1 P1 अनलै: । P2 अनलै: परिवेषमिति । 2 P1P2 नगरी 3 P1 अग्निभि:; P2 अग्निभि: aft. एत्य 4 P2 तटा 5 P1 ते तथा 6 P1P2 °नगरे 7 B रुद्र° 8 P1P2 वैश्वानरो 9 P1 add. अनुप्रासोदात्तनिदर्शना: ।। ८७ ।।

1 P1 बहुकम्बु । P2 °मणिमिति । 2 P2 °श्रेणिरिव 3 B om. कम्बव: 4 BP1 om. च 5 P2 समुद्रेऽपि 6 P1P2 ये अटन्तो; P1 add. गच्छन्तो 7 B करास्तत 8 P1 कुलीरा° 9 P1 कुलीरवत् 10 P1 add. अर्णवश्च बहुत्वात् वराटिका नाम गणनो भवति । अटत्कर्कटकश्च ।; 11 P2 किं भूत: पुन: ?। 12 P1 add. अनुप्रासो रूपकं च ।। ८८ ।।

1 P1 यदगारघटा । 2 P2 अत्र गङ्गया 3 B तस्या:; P1 यस्य 4 P1 तेन 5 B °कान्ता 6 B तस्या: 7 B तुन्दिलादि° 8 P1P2 om. एव 9 P1 गङ्गापि इन्दुकान्तजलप्रवाहैर्नित्यं वर्धत एव ।; 10 P2 जलैवर्द्धत एव नित्यम् । 11 P1P2 om. अत्र 12 B पंथिम् तुट् इति अच् 13 P1 add. अतिशयोक्ति: काव्यलिङ्गमुदात्तं च ।। ८९ ।।

1 P1 रुच । P2 रुचयोऽस्तमितमिति । 2 B यस्या: 3 B विलापनापुसुभिहट्टि° 4 P2 add. या 5 P1 add. पङ्कयो 6 P1 add. अनुप्रास उत्प्रेक्षा विशेषश्च ।। ९० ।।

1 P1 विततम् । 2 P1 आपणे हट्टे aft. विक्रेतुं 3 BP2 विततं here 4 P1 add. पृथिव्या: 5 P1 add. पुरा 6 P1 add. दृष्टम् 7 P1 मुनिना; P2 मार्कण्डेय° 8 B om. यावत्पुरानिपातयोर्लट् ।; P1 add. दृष्टम् 9 P1 add. अनुप्रास उपमा उदात्तं च ।। ९१ ।।

1 P1 सममेणमदैर्यदापणेत्यादि । P2 सममेणमदेति । 2 P1P2 om. मलिनं 3 P1P2 न अजानात् 4 P1 add. अनुप्रास: सामान्यं च ।। ९२ ।।

1 P1 रविकान्तमयेन । 2 P1 add. सतां 3 P2 पुरा चरणौ 4 B om. °ल्लट्; P1P2 om. वर्तमाना 5 P2 om. केन गच्छताम् ? 6 B om. मयेन 7 B om. अपि 8 P1 add. उक्तनिमित्ता विशेषोक्ति: । उदात्तं च ।। ९३ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 B विधुदीधितिरिति । P1 विधुदीधितिजेन । 2 P1 om. किं भूतम् ?। 3 P2 तापागमे 4 P1 चन्द्रकान्ते 5 P2 °शीलशीतलम् 6 P1 कलिः here 7 P1 add. अनुप्रास उपमा उक्तनिमित्ता विशेषोक्तिरुदात्तं च ।। ९४ ।।

1 P1 परिखावलय । 2 P1P2 नगरी 3 P1P2 परिखा° 4 P1P2 शेषनागेन 5 BP1 om. विसर्गः 6 BP1 om. विसर्गः 7 B om. वररुचिना 8 B om. परेषाम् 9 P1 ज्ञानगोचरा 10 B om. न 11 P1 add. अनुप्रास उपमा अपह्नुतिश्च ।। ९५ ।।

1 P1 मुखपाणिपदाक्षिण पङ्कजैरित्यादि । 2 P2 स्मरस्य 3 P2 अदित 4 B om. कुसुमस्रक्; P2 om. °कुसुम° 5 B °पदाक्षीणि 6 P1 मुखादि-पङ्कजैः 7 P2 रचितः 8 B °रिति । 9 P1 मुखादीनि केलिकमलसदृशानि, चत्वारि अङ्गानि, अन्यानि अङ्गानि चम्पकसदृशानि । 10 P2 सूचकाः 11 P1 add. अतिशयोक्तिर्निदर्शना च ।। ९६ ।।

1 P1 जघनस्तन । 2 P1P2 नगरीम् 3 P1 om. विसर्गः 4 B अप्सरोगणः; P1P2 शतम् here 5 P1 add. कर्मभूताधारत्वम् । 6 P1P2 किं विशिष्टा अप्सरसः ?। 7 P2 भारात् गौरवात् 8 P1P2 पृथिव्यां 9 P1 add. काव्यलिङ्गं च सापह्नुवोत्प्रेक्षा ।। ९७ ।।

1 P1 स्थितिशालिसमस्तवर्णतामित्यादि । 2 P1P2 नगरी 3 B °रूपा 4 P2 बिभर्ती 5 P1P2 om. किल 6 P1P2 om. आलेख्यमयी 7 B °पीतो° 8 P1P2 om. अपि 9 P1P2 आलिख्यन्ते 10 P1P2 कथं वा स्वरभेदं 11 P1 स्वर्गोऽपि(?) 12 P1 यत्र । अथ च कलितो ब्रह्मणा आखो वेदध्वनिर्यया सा स्वराणामुदात्तादीनां भेदमुपैति इति श्लेषः ।। P2 om. वेदानां ध्वनिः ।। ९८ ।।

1 P1 लिलिहे स्वरुचा । 2 B जातां 3 P2 तस्या 4 B स्वरुचा 5 P1 P2 रक्तीभूतया aft. बहुव्रीहिर्वा 6 P1 add. समासोक्तिः अतिशयोक्तिः सद्गुणोदात्तोपमाकाव्यलिङ्गानि विशेषणसाम्यादप्रस्तुतस्य गम्यत्वे समासोक्तिः । पताकायाश्च सम्बन्धप्रतिपादनादसम्बन्धे सम्बन्धः । स्वगुणत्यागादत्युत्कृष्टगुण-स्वीकारः । तद्गुणः ।। ९९ ।।

1 P1 स्वरुचाऽरुणया । P2 स्वरुचारुणेति । 2 P1 यस्यां 3 B om. निशि........अर्केण कृत्वा 4 P2 om. विसर्गः 5 P1 add. उपमावर्जिताः पूर्ववदलङ्काराः ।। १०० ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 अमृतद्युतिलक्ष्म । 2 P1 add. संलग्नं 3 P1P2 सादृश्यमादित 4 P1P2 om भेजे 5 P1 add. उपमा ।। १०१ ।।

1 B अश्रान्तमिति । P1 अश्रान्तश्रुतिपाठ । 2 P1 om. विसर्गः 3 P2 om. त्यक्ता 4 P2 om. सामी°........न गण्यते । 5 BP1 add. विसर्गः 6 B om. द्वितीयया नास्ति 7 edr. add. here in [ ] fr. on. 8 P1 add. च 9 P2 om. °भूतै 10 B ब्रह्मा 11 B किमयं 12 P1 add. शार्दूलविक्रीडितम् । गौडीया रीतिः । अनुप्रासोत्प्रेक्षा ।। १०२ ।।

1 P1 यदतिविमल । P2 यदतिविपुलेति । 2 P1 add. पताका 3 P2 भ्रमिरिव 4 P1P2 °कृता 5 P1P2 कुर्वती ? 6 P1 दिवाकरस्य 7 B om. चला वायुवशात् 8 P1 पितुः aft. श्रीसूर्यस्य 9 P2 om. उत्सङ्गे 10 P1P2 om. शिशुरपि........लुण्ठति । 11 P1P2 अपि 12 P1 श्यामा । and add. पुष्पिताग्रा वृत्तम् । अनुप्रासोतिशयोक्तिर्वा । तद्गुणोदात्तनिदर्शनाः ।। १०३ ।।

1 P1 स्वप्राणेश्वर 2 B °सौधशिखरात् 3 P2 साक्षादेव अप्सरसः 4 B सादिव P1 °दिव 5 B om. किं भूतं पाथोदं; P1 add. तदुक्तम्-प्रत्यक्षसदृशोः साक्षात् (हला° V 88) इति । यथा इयं लक्ष्मीः साक्षादियम-मृतवर्तिर्नयनयो(उत्तरराम° I. 38) रित्यादि । 6 B कवि° 7 B °स्ताथ । P1 add. °भूता एव । एवेत्याश्चर्ये । 8 P1P2 °प्सर·° 9 B यत्र; P1 तत्र 10 P1 अभ्राणां तरसा बलेन वेगेन रसादनुरागात् कौतुकवशात् अध्वनि सप्तभूमिकसौधमार्गेणैव यान्ती निमेषं लघ्वक्षरोच्चारणमात्रं कालम् । अथ च निमीलनं चक्षुषोर्न प्राप । 11 P1P2 om. सा 12 B आकाशे च 13 P1P2 अभ्रारूढत्वात् 14 P1P2 add. विमानस्था 15 P1 add. शार्दूलविक्रीडितं वृत्तम् मेघानामवष्टम्भकत्वमिति कविसमयः । यथा कान्तानां ग्रहचरितान्यथो रथानामिति । उपमोत्प्रेक्षेत्यन्यः । अनुप्रासश्च ।। १०४ ।।

1 P1 वैदर्भीकेलिशैले । 2 B सुकृत तं; P2 तत् विश्रान्तम् 3 B भंद° 4 P2 °कटाहैर्यं 5 B भावस्त्वथा 6 P1 यथा 7 om. उत्ताना हि देवगवा वहन्ति । 8 B om. पश्चाद्वलिताः 9 B °पुत्तलिका; P2 चूलिका 10 P1P2 भान्ति । P1 add. स्रग्धरा वृत्तम् । इति द्वात्रिंशताश्लोकैर्नगरीवर्णनमभिहितम् । अनुप्रासो रूपकमपह्नुतिश्च ।। १०५ ।।

1 P1 विधु । 2 P2 हृदि 3 B विफलितं........किं भूतैः ? aft. पूर्णैः 4 P1 add. इति तृतीया । अन्यपदार्थे आलवालैरिति करणे तृतीया । कर्तरि चेत्तदा यस्य यत्र वा तेन तथा । 5 P1 om. इव 6 P1 add. अतिशयोक्ति-रुदात्तं च ।। १०६ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 अथ कनकपतत्र । 2 B कपतत्रो 3 P1 सखीनां सरूपाणां 4 B add. कला 5 P2 °कारेण 6 P1 शशाङ्कलेखा सदृशी । and add. अनुप्रासोपमे ।। १०७ ।।

1 P1 भ्रमणारयविकीर्णं । 2 P1 पतनाय 3 P1 मण्डलं 4 P1 भ्रमस्य 5 P2 add. देव्य 6 P1 add. अनुप्रासो रूपकमुत्प्रेक्षा जातिश्च ।। १०८ ।।

1 P1 अनुभवति शचीत्थं सा । 2 B P1P2 om. सार्धं; edr. add. सार्धं 3 B °लीलां; P1 add. बद्धकेलीं 4 B क्रीडां 5 B om. मतिः; P1 om. बुद्धि° 6 B P2 om. इतीति किम् ? P1 इति किम् ?। edr. add. इतीति किम् ?।, 7 P1 add. दृश्यमानप्रकारेण and सा प्रसिद्धा here 8 B om. घृताची 9 B P1P2 om. सह edr. add. सह 10 P1 add. उच्चैरुन्नतं प्रचुरं नन्दनस्य 11 P2 अनुभवति अपि तु । 12 P1 आनन्दाङ्कता; P2 om. आनन्दाङ्कः । मालिनीवृत्तम् । 13 P1 add. पूर्वेषु त्रिषु अनुप्रास-भ्रान्तिमानौ । सादृश्याद्वस्त्वन्तरप्रतिपत्तिः भ्रान्तिमान् (अलं. स.-II. 19) ।। १०९ ।।

1 B om. श्रीहर्षमिति । P1 श्रीहर्षमित्यादि । 2 P1 add. महाकाव्य-रूपे 3 P1 add. नैषधीयं चरितं यत्र तत्र तथा 4 P1P2 add. आनन्दाङ्कः । 5 B om. द्वितीय°........अनुप्रासः ।। ११० ।।

1 P1 instead—इति धवलल्लकवास्तव्य—नागरश्रोत्रियावतंस—पण्डितवैद्यनाथशिष्य — ऋग्भाष्यकृल्लक्षहोमचतुष्टयकृत्—सम्राट् — स्थपति—सप्तसोमसंस्था [क] याजिद्वादशाहाग्निचित्— दीक्षित—महापण्डित—श्रीचाण्डूविरचितायां नैषधदीपिकायां टीकायां विहङ्गमनो नाम द्वितीयः सर्गः समाप्तः । मङ्गलमस्तु । शुभं भवतु कल्याणमस्तु सर्वजगतः परहितनिरता भवन्तु भूतगणाः । दोषाः प्रयान्तु नाशं सर्वत्र सुखी भवतु लोकः ।। संवत् १४७६ वर्षे (1420 A.D.) भाद्रपदमासे कृष्णपक्षे षष्ठ्यां तिथौ गुरुदिने भिषग्वर—मन्त्रिश्री—भाभलसुतनारायणस्य वैद्यकविशारदस्य वसुमतेः सदा परमसौमनस्यभावितान्तःकरणस्य निजविपुलविमलकुलगगनमण्डलशशधरस्य दामोदरपरिष्वङ्गशङ्खवलगुणग्रामविभूषितासंख्यद्वीपविभूषणसागराम्बराभोगस्य सारसारस्वतजपां कुटीसमाकृष्टभारतीस्वरसमर्पितकविताभाण्डागारस्वैरसमर्पणतर्पितानेकविद्यार्थिनः प्रज्ञागङ्गाहिमाद्रेः सज्जनजनमनो— —सन्तस्य पुस्तकमिदमलेखि । शुभं भवतु ।। छ ।। कल्याणमस्तु लेखकपाठकयोः ।। श्रीः ।। 2 B om. तेन........गोत्रे सतां 3 P2 add. किमपि........चास्य (canto-I) ।। २ ।। दोषोदयं न तनुते न कुरङ्ग-सङ्गमङ्गीकरोति न वशं तमसः प्रयाति । नो जाड्यवान् न कमलोदयमेष हन्ति न

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

क्षीयतेऽद्भुतमिदं द्विजनायकोऽपि ।। ३ ।। कृत्वैव........°नवमानितानि (canto-I) ।। ४ ।। तदात्मज°........प्रयोक्ता (canto-I) ।। ५ ।। सम्राट्°........महनीयजन्मा (canto-I) ।। ६ ।। श्रीवैद्यनाथा°......स्म टीकाम् (canto I) ।। ७ ।। 4 P2 add. श्री° 5 BP2 om. विहङ्गमनो नाम 6 P2 add. समाप्तमिति ।। ग्रन्थसंख्या ५०० ।। श्रीः ।। छः ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

सर्ग–३

पूर्वसर्गे[1] हंसमुखेन[2] नलं प्रति दमयन्तीस्वरूपनिवेदनपूर्वकं तद्भार्यत्वमङ्गीकार्य[3] कुण्डिनोपवने तां वर्णयित्वेदानीं तस्याऽनुरागवृद्धि[4] विवर्णयिषु:[5] कविस्तृतीयं सर्गभारभते ।।

आकुञ्चिताभ्यामथ पक्षतिभ्यां नभोविभागात्तरसाऽवतीर्य ।
निवेशदेशाततधूतपक्षः पपात भूमावुपभैमि हंसः ।। १ ।।

आकुञ्चिताभ्यामिति[1] । अथोपवनगमनानन्तरं स हंसः उपभैमि[2] भैम्याः समीपे[पपात[3]] । क्व[4] ?। भूमौ । किं कृत्वा ?। आकुञ्चिताभ्यां सङ्कुञ्चिताभ्यां पक्षतिभ्यां[5] नभोविभागात् तरसा बलेनाऽवतीर्य । किं भूतः ?। निवेशदेशे उपवनस्थाने आततौ तथा धूतौ[6] कम्पितौ[7] पक्षौ येन स तथा[8] ।। १ ।।

आकस्मिकः पक्षपुटाहतायाः क्षितेस्तदा यः स्वन उच्चचार ।
द्रागन्यविन्यस्तदृशः स तस्याः सम्भ्रान्तमन्तःकरणं चकार ।। २ ।।

आकस्मिक[1] इति । तदापक्षपुटाभ्याम् आहतायाः क्षितेराकस्मिको[2] यः स्वन उच्चचार, स स्वनः तस्याः दमयन्त्याः अन्तःकरणं मन[3] सम्भ्रान्तं चकार । कथम् ?। द्राग् झटिति । किंभूतायाः ?। अन्यत्र विषयान्तरे विन्यस्तादृक् यया तस्यास्तथा । अन्यचित्तो[4] हि स्वनेनो-[5]द्भ्राम्यते[6] ।। २ ।।

नेत्राणि वैदर्भसुतासखीनां विमुक्ततत्तद्विषयग्रहाणि ।
प्रापुस्तमेकं[1] निरुपाख्यरूपं[2] ब्रह्मेव चेतांसि यतव्रतानाम् ।। ३ ।।

नेत्राणीति[3] । वैदर्भस्य[4] राज्ञः सुतायाः सखीनां नेत्राणि तमेकमेव हंसं निरुपाख्यं वर्णयितुमशक्यं रूपं यस्य तं तथाविधं प्रापुः । किं भूतानि[5] ?। विमुक्तास्तेषां तेषां विषयाणां रूपाणां[6] ग्रहोऽनवलोकनं

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

यैः तानि तथा। अन्यत्सर्वं परित्यज्य हंसमेवावलोकयन्ति स्म। कानीव?। चेतांसीव। यथा यतव्रतानां[7] योगिनां मनांसि एकमद्वितीयं निरुपाख्यम् अत्यन्तासद्रूपं[8] यस्य तत्तथा अरूपं ब्रह्म प्राप्नुवन्ति। अथवा निरुपाख्यं[9] रूपम् अविज्ञेयस्वरूपम्। किंभूतानि?। विमुक्तास्तेषां तेषां शब्दादीनां विषयाणाम् इन्द्रियार्थानां ग्रहो यैस्तानि तथा। ध्यानैकतानानि इत्यर्थः[10] ॥ ३ ॥

हंसं तनौ सन्निहितं[1] चरन्तं मुनेर्मनोवृत्तिरिव स्विकायाम्।
ग्रहीतुकामादरिणा शयेन यत्नादसौ निश्चलतां जगाहे ॥ ४ ॥

हंसं तनाविति[2]। असौ दमयन्ती आदरिणा आदरयुक्तेन शयेन हस्तेन अथवा दरिणां[3] [4]भयचलेन[5] यत्नात् हंसं ग्रहीतुकामा निश्चलतां जगाहे। किंभूतम्?। स्विकायाम्[6] आत्मीयायां तनौ शरीरे सन्निहितं चरन्तम्[7]। का[8] इव?। मुनेर्योगिनो मनोवृत्तिरिव[9]। यथा मनसो वृत्तिर्मनोव्यापारः[10] स्वकीयतनौ[11] शरीरे सन्निहितमन्तश्चरन्तं हंसमात्मानम् आदरयुक्तेन आशयेन अन्तःकरणेन ग्रहीतुकामा[12] ज्ञातुमिच्छुर्निश्चलतां ध्यानपरतां[13] जगाहे[14] ॥ ४ ॥

तामिङ्गितैरप्यनुमाय मायामयं न भैम्या वियदुत्पपात।
तत्पाणिमात्मोपरिपातुकं तु मोघं वितेने प्लुतिलाघवेन ॥ ५ ॥

तामिङ्गितैरिति[1]। अयं हंसः तां भैम्या इङ्गितैश्चेष्टितैर्मायामनुमाया[पि] ज्ञात्वापि[2] वियदाकाशं नोत्पपात। तर्हि[3] किं चकार?। किन्तु तस्याः पाणिमात्मन उपरि पातुकं[4] धर्तुमिच्छया पतनशीलं मोघं वितेने वृथा चक्रे। केन? प्लुतेः[5] प्लुतस्य उत्प्लवनस्य[6] गतिविशेषस्य लाघवेन[7] ॥ ५ ॥

व्यर्थीकृतं पत्ररथेन तेन तथाऽवसाय व्यवसायमस्याः।
परस्परामर्पितहस्ततालं तत्कालमालीभिरहस्यताऽलम् ॥ ६ ॥

व्यर्थीकृतमिति[1]। आलीभिः सखीभिः तत्कालं परस्पराम् अव्ययशब्दः अन्योन्यमर्पितो हस्ते ताल[:] तालशब्दो[2] यत्र तद्यथा भवति तथा अलमहस्यत। किं कृत्वा?। तेन पत्ररथेन हंसेन अस्या भैम्याः तथा तादृशं व्यवसायमभिप्रायं[3] व्यर्थीकृतम् अवसाय मत्वा[4] ॥ ६ ॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

उच्चाटनीयः करतालिकानां दानादिदानीं भवतीभिरेषः ।
यान्वेति मां द्रुह्यति मह्यमेव साऽप्रेत्युपालम्भि तयालिवर्गः ।। ७ ।।

उच्चाटनीय इति[1] । तया दमयन्त्या आलीनां सखीनां वर्गः समूहः इत्युपालम्भि । इतीति[2] किम् ?। हे सख्यः ! भवतीभिः एष हंसः इदानीं करतालिकानां दानात् उच्चाटनीयः विद्रावणीयः । अथ च[3] उच्चं प्रदेशम् आटनीयः गमयितव्यः । ततोऽत्र[4] वने या सखी मामन्वेति, सा मह्यमेव द्रुह्यति[5] ।। ७ ।।

धृताल्पकोपा हसिते सखीनां छायेव भास्वन्तमभिप्रयातुः ।
श्यामाथ हंसस्य करानवाप्तेर्मन्दाक्षलक्ष्या लगति स्म पश्चात् ।। ८ ।।

धृताल्पकोपेति[1] । अथ श्यामा दमयन्ती[2] करेण हस्तेन अनवाप्तेः सकाशात् हंसस्य पश्चाल्लगति स्म । अप्रसूता भवेच्छ्यामा किं भूता ?। मन्दाक्षस्य लज्जाया लक्ष्या विषयभूता । तथा सखीनां हसिते धृतोऽल्पः कोपो यया सा तथा । केव ?। भास्वन्तं [श्री]सूर्यम-भिमुखं प्रयातुः पुरुषस्य छायेव । यथा सा छाया[4] पुरुषस्य पश्चाल्लगति । कुतः ?। हंसस्य [श्री]सूर्यस्य कराणामनवाप्तेः । साऽपि श्यामा । तथा [5]मन्दैरप्यक्षैरिन्द्रियैर्लक्ष्या भवति । तथा चापटुतरेन्द्रिया वदन्ति । छाया-मात्रं[6] लक्ष्यते, न तु स्पष्टरूपम्[7] ।। ८ ।।

शस्ता न हंसाभिमुखी पुनस्ते यात्रेति ताभिश्छलहस्यमाना ।
साह स्म नैवाशकुनीभवेन्मे भाविप्रियावेदक एष हंसः ।। ९ ।।

शस्ता न[1] हंसेति । सा दमयन्तीत्याह स्म उवाच । किंभूता ?। इति ताभिः सखीभिः छलेन हस्यमाना । हे दमयन्ति ! ते तव हंसस्य अभिमुखी यात्रा गमनं न शस्ता न[2] योग्या । अयं हस्तेन धर्तुमशक्यः । अथ च छलपक्षे, तव हंसस्य श्रीसूर्यस्य अभिमुखी यात्रा प्रयाणं न शस्ता । प्रतिसूर्यं[3] यात्रायाः शास्त्रे निषिद्धत्वात्[4] । किमुवाचेत्याह—हे सख्यः ! एष हंसो मे[5] मम नैवाऽशकुनीभवेत् । अपि तु शकु[न]रूपो भवति । यतो भावि भविष्यत्[6] यत् प्रियं शकुनद्वारेण अभिमतं वस्तु तस्याऽऽ-वेदकः । हंसः[7] श्रीसूर्यो[8] नाशकुनीभवेत् । अपि तु हंसः शकुनिः पक्षी भवेत् । भाविनः प्रियस्य भर्तुरावेदकः[9] ।। ९ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

हंसोऽप्यसौ हंसगतेः सुदत्याः पुरः पुरश्चारु चलन्बभासे ।
वैलक्ष्यहेतोर्गतिमेतदीयामग्रेऽनुकृत्योपहसन्निवोच्चैः ।। १० ।।

हंसोऽप्यसाविति[1] । असौ हंसोऽपि तस्याः हंससदृशगते सुदत्या[2] दमयन्त्या भैम्याः पुरः पुरः[3] चारु यथा भवति एवं चलन् सन् बभासे । उत्प्रेक्षते—अस्याः वैलक्ष्यहेतोः खेदनार्थम् एतदीयां गतिम् अग्रे[4] ऽनुकृत्योच्चैरुपहसन्निव[5] ।। १० ।।

पदे पदे भाविनी भाविनी तं यथा करप्राप्यमवेति[1] नूनम् ।
तथा सखेलं चलता लतासु प्रतार्य तेनाचकृषे कृशाङ्गी ।। ११ ।।

पदे पदे[2] इति । तेन हंसेन सा कृशाङ्गी प्रतार्य प्रलोभ्य लतासु मध्ये आचकृषे नीता । किं कुर्वता ?। तथा तेन प्रकारेण सखेलं सलीलं चलता सता । यथा सा[3] भाविनी साभिप्राया दमयन्ती भाविनि भविष्ये[4] पदे पदे क्रमे क्रमे तं[5] हंसं नूनं[6] निश्चितं करप्राप्यमवेति[7] जानाति । इदानीं धृत इदानीं धृत इति मन्यते तथा चलता ।। ११ ।।

रुषा निषिद्धालिजनां यदैनां छायाद्वितीयां कलयांबभूव[1] ।
तदा श्रमाम्भःकणभूषिताङ्गीं[2] स कीरवन्मानुषवागवादीत् ।। १२ ।।

रुषा[3] निषिद्धेति । यदा स[4] हंसः एनां छायाद्वितीयां[5] छायैव द्वितीया यस्याः[6] नाऽन्याकाचित्[7] तां तथाविधां कलयांबभूव वेत्ति स्म । यतो रुषा कोपेन निषिद्ध आलिजनो यया तां तथा । तदा कीरवत् शुकवत् मानुषवाक् सन्नवादीत् । किं भूताम् ?। श्रमाम्भसां[8] कणैः स्वेद[9]लवैर्भूषिताङ्गीम्[10] ।। १२ ।।

अये ! कियद्यावदुपैषि दूरं व्यर्थं परिश्राम्यसि वा किमित्थम्[1] ।
उदेति ते भीरपि किं नु बाले ! विलोकयन्त्या न घना वनालीः ।। १३ ।।

अये[2] कियदिति । अये[इ]त्यामन्त्रणे । त्वं कियद् यावद्दूरम् उपैषि । वाऽथवा व्यर्थं[3] निष्फलं किमित्थं[4] परिश्राम्यसि । वि पक्षी तस्यार्थम् । न हि पक्षिणोऽर्थे एवंविधः श्रमो[5] घटते । नु प्रश्ने । हे बाले । ते[6] तव भीरपि किं नोदेति । किंभूतायाः ?। घनाः वनालीः विलोकयन्त्याः[7] ।। १३ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

वृथार्पयन्तीमपदे पदं त्वां मरुल्ललत्पल्लवपाणिकम्पैः ।
आलीव पश्य प्रतिषेधतीयं कपोतहुङ्कारकिरा वनाली ।। १४ ।।

वृथार्पयन्तीमिति[1] । हे दमयन्ति ! वनाली[2] इयं त्वां प्रतिषेधति[3] । कीदृशी ?। कपोतहुङ्कारं किरति सा तथा। गिरेति पाठे कपोतानां[4] हुङ्कार एव प्रतिषेधगीर्वाणी[5] तया प्रतिषेधति[6] । त्वं पश्य । किंभूताम् ?। वृथा अपदेऽ[7] स्थाने पदमर्पयन्तीम्[8] । कैः प्रतिषेधति ?। मरुता[9] ललन्तो ये पल्लवाः त एव पाणयः तेषां कम्पैः । केव ?। आलीव । यथा आली सखी निषेधति । अन्योऽपि[10] हुङ्कारगिरा पाणिकम्पैश्च प्रतिषिध्यते । रूपकोपमे[11] ।। १४ ।।

धार्यः कथङ्कारमहं भवत्या वियद्विहारी वसुधैकगत्या ।
अहो शिशुत्वं तव खण्डितं न स्मरस्य सख्या वयसाऽप्यनेन ।। १५ ।।

धार्य[1] इति । अहं भवत्या[2] कथङ्कारं धार्यः । किंभूतोऽहम् ?। वियति विहर्तुं शीलमस्य[3] स तथा। किंभूतया ?। वसुधा एव एका[4] गतिर्यस्याः तया तथा। अहो इति आश्चर्ये । तव शिशुत्वम् अनेन स्मरस्य सख्या वयसा यौवनेनाऽपि न खण्डितम् । मया वयसा खण्डिष्यते[5] इति भङ्गिः[6] ।। १५ ।।

सहस्रपत्रासनपत्र हंसवंशस्य पत्राणि पतत्रिणः स्मः ।
अस्मादृशां चाटुरसामृतानि स्वर्लोकलोकेतरदुर्लभानि ।। १६ ।।

सहस्रपत्रासमेति[1] । वयं पतत्रिणः स्मः । किं भूताः ?। सहस्रपत्रम्[2] आसनं यस्य ब्रह्मणः स तथा तस्य पत्राणि वाहनानि ये हंसाः तेषां वंशस्य[3] अन्वयस्य पत्राणि अङ्कुराः। ततोऽस्मादृशां चाटुरसामृतानि प्रियवाक्यानि स्वर्लोकस्य ये लोका देवास्तेभ्य[4] इतरेषां[5] मानुषाणां दुर्लभानि ।। १६ ।।

स्वर्गापगाहेममृणालिनीनां नालामृणालाग्रभुजो भजामः ।
अन्नानुरूपां तनुरूपऋद्धिं कार्यं निदानाद्धि गुणानधीते ।। १७ ।।

स्वर्गापगेति[1] । वयमन्नस्य भक्ष्यस्य[2] अनुरूपां योग्यां तनोः शरीरस्य रूपस्य ऋद्धिं समृद्धिं भजामः । किंभूताः ?। स्वर्गापगायां गङ्गायां हेम्नः सुवर्णस्य मृणालिनीनां नालानां मृणालानाम् अग्रं[3] भुञ्महे[4] इति क्विप्,

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

ते तथा। युक्तोऽयमर्थः। कार्यं कर्तृ निदानात् कारणात् हि यतो गुणानधीते, लक्षणया प्राप्नोति। कारणानुगुणं[5] कार्यमिति न्यायात् सुवर्णनालादिभोजनात् शरीरमपि सौवर्ण्यमित्यर्थः। समानस्य ऋकारे वा प्रकृतिरिति[6] सन्धिकार्याभावः ।। १७ ।।

धातुर्नियोगादिह नैषधीयं लीलासरः सेवितुमागतेषु।
हैमेषु हंसेष्वहमेक एव भ्रमामि भूलोकविलोकनोत्कः ।। १८ ।।

धातुर्नियोगादिह[1] नैषधीयमिति। हैमेषु हंसेषु मध्ये अहमेक एव भ्रमामि। किंभूतः[2] ?। भूलोकस्य विलोकने[3] उत्कः उत्कण्ठितः। किंभूतेषु ?। नैषधसम्बन्धि लीलासरः एव[4] सेवितुमागतेषु। कुतः ?। धातुर्नियोगात् आदेशात्[5] ।। १८ ।।

विधेः कदाचिद्भ्रमणीविलासे श्रमातुरेभ्यः स्वमहत्तरेभ्यः।
स्कन्धस्य विश्रान्तिमदां तदादि श्राम्यामि नाविश्रमविश्वगोऽपि ।। १९ ।।

विधेरिति[1]। अहं स्वकीयेभ्यो महत्तरेभ्यो[2] वृद्धेभ्यो हंसेभ्यः स्कन्धस्य विश्रान्तिमदां दत्तवान्। किं भूतेभ्यः ?। विधेर्ब्रह्मणो भ्रमणीविलासे[3] गमनक्रीडायां मार्गवशात् श्रमातुरेभ्यः[4]। कथम् ?। कदाचित् तदादि तद्दिनादारभ्य अविश्रमं यथा भवति एवं[5] विश्वगोऽपि सर्वत्र गच्छन्नपि अहं[6] तेषां वृद्धानां प्रसादान्न श्राम्यामि[7] ।। १९ ।।

बन्धाय दिव्ये न तिरश्चि कश्चित्पाशादिरासादितपौरुषः स्यात्।
एकं विना मादृशि तन्नरस्य स्वर्भोगभाग्यं विरलोदयस्य ।। २० ।।

बन्धायेति[1]। कश्चित् पाशादिः[2] दिव्ये[3] मादृशि तिरश्चि पक्षिणि बन्धाय न आसादितं पौरुषं येन स तथा स्यात्। लुब्धकानां[4] पाशा न प्रभवन्ति। कथम् ?। एकं नरस्य पुरुषस्य स्वर्भोगभाग्यं[5] विना तत् प्रसिद्धम्। बध्नाति[6] नस्तन्वि! परमिति पाठे[7]। किं भूतस्य ?। विरल[8] उदयो यस्य तस्य तथा। यस्य[9] स्वर्भोगानां भाग्यं पृथिव्यां[10] स्थितस्याऽपि भवति। नोऽस्मान् बध्नाति। अथ च विगतेन रेफेण लस्य लकारस्य[11] उदयो यस्य तस्य[12] तथा नरस्य। नलस्येत्यर्थः। नरशब्दस्य रेफस्थाने[13] लकार उच्चार्यते, तदा नल इति[14] शब्दो भवति[15] ।। २० ।।

इष्टेन पूर्तेन नलस्य वश्याः स्वर्भोगमत्रापि सृजन्त्यमर्त्याः।
महीरुहा दोहदसेकशक्तेराकालिकं कोरकमुद्गिरन्ति ।। २१ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

इष्टेन[1] पूर्तेनेति । अमर्त्या देवा इष्टेन यागादिदानेन पूर्तेन वापीकूपतडागादिना च वश्या: सन्तो नलस्य स्व: स्वर्गस्य भोगमत्राऽपि पृथिव्यामपि सृजन्ति[2] । युक्तोऽयमर्थ: । महीरुहा वृक्षा: अचेतना अपि तावद्दोहददानशक्ते: सेकशक्तेश्च सकाशादाकालिकम् अकालोद्भवं कोरकं[3] कुडमलमुद्गिरन्ति । किं पुन: सचेतना: समर्थाश्च देवा भोगं[4] सृजन्तीति अत्र वक्तव्यम् । अन्तर्वेदि च यद्दानं तदिष्टमभिधीयते । बहिर्वेदि च यद्दानं तद्दत्तं प्रोच्यते बुधै: । वापीकूपतडागादि तत्पूर्तमभिधीयते इति[7] । आकालिकडाद्यन्तवचने[8] (पा॰ V. i. 114)[9] ।। २१ ।।

सुवर्णशैलादवतीर्य तूर्णं स्ववर्वाहिनीवारिकणावकीर्णै: ।
तं वीजयाम: स्मरकेलिकाले पक्षैर्नृपं चामरबद्धसख्यै: ।। २२ ।।

सुवर्णशैलादिति[1] । वयं सुवर्णशैलान्मेरोरवतीर्य तूर्णं[2] तं नलं स्मरकेलिकाले पक्षै:[3] सुरतश्रान्तं नृपं वीजयाम: । किंभूतै: ?। चामरेण बद्धसख्यै: सदृशै:[4] । पुन: किंभूतै: पक्षै:[5] ?। स्ववर्वाहिन्या: गङ्गाया: वारिकणैरवकीर्णै:[6] । वीजिर्धातुष्वपठितोऽपि शिष्टप्रयोगात् मिलिखचिकचिक्षपिवद्धातुतया द्रष्टव्य: । तथा च भट्टेन्दुराजेन स्वालङ्कारे— श्रुत्या सम्बन्धविरहात् यत्पदेन पदान्तरम् । गुणवृत्तिप्रधानेन युज्यते रूपकं च तत् ।। (का. लं. सा. I. 19) ।। बन्धस्तस्य यत:[7] श्रुत्यां श्रुत्यर्थाभ्यां च तेन तत् । समस्तवस्तुविषयमेकदेशविवर्ति[8] च ।। (का. लं. सा. I. 12) ।। समस्तवस्तुविषयमालारूपकमुच्यते । यद्वैकदेशवृत्ति: स्यात् पदरूपेण रूपणात् ।। (I. 13) ।। इत्यत्र[9]-उत्पतद्भि: पतद्भिश्च पिच्छाली वालशालीभि: । राजहंसैरवीज्यन्त शरदैव शरो नृपा: ।। (I. 19) ।। एकदेशविवर्त्युदाहरणे[10] व्याख्यातम्[11] ।। २२ ।।

क्रियेत चेत् साधुविभक्तिचिन्ता व्यक्तिस्तदासा प्रथमाभिधेया ।
या स्वौजसां साधयितुं विलासैस्तावत्क्षमानामपदं बहु: स्यात् ।। २३ ।।

क्रियेतेति[1] । चेत् यदि साधूनां विभक्तेर्विभागस्य चिन्ता क्रियेत तदा सा नललक्षणा व्यक्ति: प्रथमाभिधेया गणनीया । या नलरूपा[2] व्यक्ति: स्वकीयानाम्[3] ओजसां विलासै: प्रतापै: तावदतिप्रमाणं क्षमानाम[4] पृथिवीसंज्ञं पदं साधयितुं[5] बहु: स्यात् बह्वी[6] स्यात् । सर्वत्र नला बहवो भवन्ति । साधयतीति । साधु:[7] । कृवापाजिमिस्वदिसाधी (उ. सू: I. 1)-

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

त्यादिना उणादिक[8] उण्प्रत्ययः। बहुशब्दात्[9], [वो]तो गुणवचनादि (पा° IV. i. 44) त्यादिना विभाषया ईप्रत्ययः। अथ च यदि साधु सम्यग् विभक्तिनां सुबादीनां चिन्ता क्रियते तदा सा प्रथमा विभक्तिर्व्यक्तिः प्रथमाभिधेया वाच्या[10]। प्रथमाशब्दो द्विरावर्तनीयः। या[11] व्यक्तिः सुश्च श्रौ च[12] जश्च स्वौजसः, तेषां विलासैः तावत्संख्यम् असंख्यं बहु प्रचुरं नाम पदं सुबन्तं प्रातिपदिकं साधयितुं निष्पादयितुं क्षमा स्यात्। तथा च पाणिनीः-स्वौजसमौट्छस्[13] (पा° IV. i. 2) इत्यादिसूत्रं कृतवान्। अत्र[14] समाप्तोक्तिः। तावच्छब्दः[15] साकल्ये ॥ २३ ॥

राजा स यज्वा विबुधव्रजत्रा कृत्वाऽध्वराज्योपमयैव राज्यम्।
भुङ्क्ते श्रितश्रोत्रियसात्कृतश्रीः पूर्वं पुनः शेषमशेषमन्त्यम् ॥ २४ ॥

राजा स[1] यज्वेति। स राजा नलः यज्वा यजनशीलः सन् विबुधव्रजत्रा विबुधानामायत्तं कृत्वा राज्यं भुङ्क्ते। कया?। अध्वरस्य यज्ञस्य[3] यदाज्यं घृतं तस्य उपमया एव। यथा आज्यं[4] विबुधव्रजाय देवतासमूहाय देयं कृत्वा भुङ्क्ते तथा। किंभूतः?। श्रितानां श्रोत्रियाणाम् आयत्तीकृता श्री[5] र्लक्ष्मीर्येन स तथा। पुनः पूर्वम् अध्वरस्य[7] शेषं हुतशेषं भुङ्क्ते। तथा[8] अन्त्यं राज्यमशेषं समग्रमपि भुङ्क्ते चक्रवर्तित्वात्[9] ॥ २४ ॥

दारिद्रदारिद्रविणौघवर्षैरमोघमेघव्रतमर्थिसार्थे।
सन्तुष्टमिष्टानि तमिष्टदेवं नाथन्ति के नाम न लोकनाथम् ॥ २५ ॥

दारिद्रदारीति[1]। तं[2] लोकनाथं नाम अहो[3] के पुरुषा इष्टानि स्वाभिलषितवस्तूनि न नाथन्ति न प्रार्थयन्ते[4]। द्विकर्मकः। किंभूतम्?। दारिद्रं दारयतीत्येवंशीलं तत् द्रविणं सुवर्णं तस्यौघः प्रवाह[5] तस्य वर्षै[6] र्वृष्टिभिः कृत्वा[7] अर्थिसार्थे अमोघं सफलं मेघव्रतं[8] नियमो यस्य तं तथा। किंभूतम्?। सन्तुष्टम्। अर्थिप्राप्तौ सहर्षम्। तथेष्टास्तर्पिता देवा[9] इन्द्रादयो येन तं तथा। य[10] किल इष्टदेवो[11] लोकनाथः स प्रार्थ्यते[12]। अनुप्रासः ॥ २५ ॥

अस्मत्किल श्रोत्रसुधां विधाय रम्भा चिरं भामतुलां नलस्य ॥
तत्रानुरक्ता तमनाप्य भेजे तन्नामगन्धान्नलकूबरं सा ॥ २६ ॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

अस्मत्किलेति[1]। किल[2] रम्भा अप्सरोमुख्या अस्मत् सकाशात् चिरं चिरकालम् अतुलां निरुपमां नलस्य भां कान्तिं श्रोत्रेन्द्रियस्य सुधाममृतरूपां विधाय तत्र नलेऽनुरक्ता[3] सानुरागा अभूत्[4]। ततश्च सा तं नलमनाप्य[5] अप्राप्य तस्य[6] नामगन्धात् नामलेशान्नलकूबरं धनदपुत्रं भेजे। नलकूबरशब्दमध्ये नलशब्दोऽस्ति[7]॥ २६॥

स्वर्लोकमस्माभिरितः प्रयातैः केलीषु तद्गानगुणान्निपीय।
हा हेति गायन् यदशोचि तेन नाम्नैव हाहा हरिगायनोऽभूत्॥ २७॥

स्वर्लोकमिति[1]। अस्माभिरितः पृथिवीलोकात् स्वर्लोकं[2] प्रयातैः सद्भिः यत् हरेरिन्द्रस्य[3] गायनो गन्धर्वो गायन् सन् हा हा कष्टं कष्टमित्यशोचि[4]। किं कृत्वा ?। केलीषु क्रीडासु तस्य नलस्य गानगुणान् निपीय। तेन कारणेन हरेरिन्द्रस्य गायनो नाम्नैव हा हा इत्यभूत्। हा हा नाम[5]॥ २७॥

शृण्वन्सदारस्तदुदारभावं हृष्यन् मुहुर्लोम पुलोमजायाः।
पुण्येन नालोकत लोकपालः[1] प्रमोदबाष्पावृतनेत्रमालः॥ २८॥

शृण्वन्सदार[2] इति। लोकपालो[3] नाकस्य पालयिता सदारः सकलत्रस्तस्य नलस्य गीयमानम् उदारभावं शृण्वन् सन्[4] पुलोमजाया इन्द्राण्याः हृष्यन् मुहुः[5] रोमाञ्चीभूतं लोम अङ्गरुहं तस्या एव[6] पुण्येन सुकृतेन[7] नालोकत। इतरथाऽऽशङ्का स्यात्। किं भूताः ?। प्रमोदबाष्पैरावृता नेत्रमाला यस्य स तथा। आनन्देन[8] बाष्पावृतनेत्रत्वान्न पश्यति[9]॥ २८॥

सापीश्वरे शृण्वति तद्गुणौघान् प्रसह्य चेतो हरतोऽर्धशम्भुः।
अभूदपर्णाङ्गुलिरुद्धकर्णा कदा न कण्डूयनकैतवेन॥ २९॥

सापीश्वरे[1] [इ]ति। साप्यपर्णा देवी पार्वती ईश्वरे तस्य नलस्य गुणौ[घा]न् शृण्वति सति[2] कण्डूयनस्य कैतवेन[3] व्याजेन कदा अङ्गुल्या रूद्धः कर्णौ यया सा तथाविधा नाभूत्। अपि तु पिहितश्रोत्रा बभूव[4]। किंभूतात्[5] ?। प्रसह्य चेतो हरतः। यतः किं भूता देवी ?। अर्द्धशम्भुः। अत[6] एवाऽन्यत्र गन्तुमशक्यत्वात्। [अर्द्धं शम्भोरर्धशम्भुः। अर्द्धं नपुंसक (पा॰ II. ii. 2) मिति षष्ठीसमासापवादस्तत्पुरुषः। एकदेशिनैकाधिकरणे (पा॰ II. ii. 1) इति वर्तते। अवयवी एकं च द्रव्यं

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

शम्भुः समप्रविभागवचनश्चार्द्धशब्दः। अपरे तु] अर्द्धं शम्भुर्यस्याः सा तथा[6] ।। २९ ।।

अलं सृजन् धर्मविधौ विधाता रुणाद्धि मौनस्य मिषेण वाणीम् ।
तत्कण्ठमालिङ्ग्य रसस्य तृप्तां न वेद तां वेदजडः स वक्राम् ।। ३० ।।

अलं[1] सृजन्निति। विधाता[2] ब्रह्मा धर्मविधौ सृजन्[3] सर्गं कुर्वन् मौनस्य मिषेण सन्ध्यादौ यद्वाणीं रुणाद्धि तदलं पूर्यतां वृथा रुणाद्धीति[4]। स ब्रह्मा तां वाणीं नलस्य कण्ठमालिङ्ग्य रसस्य[5] तृप्तां न वेद न जानाति। यतो[6] वेदपाठेन जडः। किं भूताम्[7] ?। वक्रां कुटिलाम्। अथ[8] च वाणी नलकण्ठे[9] रसपूर्णा सरसा, विदग्धत्वाच्च[10] वक्रोक्तिरूपा[11] ।। ३० ।।

श्रियस्तदालिङ्गनभूर्न भूता व्रतक्षतिः कापि पतिव्रतायाः ।
समस्तभूतात्मतया न भूतं तद्भर्तुरीर्ष्याकलुषाणुनापि ।। ३१ ।।

श्रियस्तदिति[1]। श्रियो लक्ष्म्याः तस्य नलस्य आलिङ्गनभूः[2] परिरम्भजा कापि व्रतक्षतिर्हानिः[3] न भूता। किं भूतायाः ?। पतिव्रतायाः। तथा[4] तस्याः[5] भर्तुः श्रीपुरुषोत्तमस्य[6] ईर्ष्यया कोपेन[7] कलुषस्य[8] अणुनापि स्वल्पपरिमाणेनाऽपि न भूतम्। कया ?। समस्तभूतानाम्[9] आत्मतया। परमेश्वरः सर्वेषां प्रत्यगात्मा नलस्याऽपि[10] आत्मा स एव। अतो न कापि क्षतिः[11]। न च कालुष्यम्[12] ।। ३१ ।।

धिक् तं विधेः पाणिमजातलज्जं निर्माति यः पर्वणि पूर्णचन्द्रम्[1] ।
मन्ये स विज्ञः स्मृततन्मुखश्रीः कृतार्द्धमौज्झन्मृडमूर्ध्नि[2] यस्तम् ।। ३२ ।।

धिक्[3] तं विधेरिति। विधेर्ब्रह्मणः तमजातलज्जं निर्लज्जं पाणि धिक् निन्दामः। यः पर्वणि पूर्णं[4] चन्द्रं निर्माति[5]। अहमेवं[6] मन्ये—स पुनर्ब्रह्मणः पाणिर्विज्ञो विशेषज्ञः यः पाणिस्तं[8] चन्द्रं कृतार्द्धम् अर्द्धं कृतमेव मृडस्य श्रीमहादेवस्य मूर्ध्नि [औ]ज्झत्[10] चिक्षेपो किंभूतः ?। स्मृता तस्य नलस्य मुखश्रीर्येन स तथा[11] ।। ३२ ।।

निलीयते ह्रीविधुरः स्वजैत्रं श्रुत्वा विधुस्तस्य मुखं मुखान्नः ।
सूरे समुद्रस्य कदापि पूरे कदाचिदभ्रभ्रमदभ्रगर्भे ।। ३३ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

निलीय[1][ते] इति । विधुश्चन्द्रमास्तस्य[2] नलस्य मुखं नोऽस्माकं मुखात् स्वस्याऽऽत्मनो जैत्रं श्रुत्वा ह्रिया लज्जया विधुरः सन्[3] कदाचिदमावास्यायां सूरे श्रीसूर्यमध्ये[4] निलीयते अन्तर्हितो[5] भवति । कदाचिदस्तसमये समुद्रस्य पूरेऽन्तर्द्धत्ते[6] । स्मृततन्मुखश्री (III. 32) रुभयत्र सम्बध्यते । कदाचिदभ्रे आकाशे भ्रमन्ति यान्यभ्राणि मेघास्तेषां गर्भे प्रविशति[7] ।। ३३ ।।

संज्ञाप्य नः स्वध्वजभृत्यवर्गान् दैत्यारिरत्यब्जनलास्यनुत्यै ।
तत्संकुचन्नाभिसरोजपीताद्धातुर्विलज्जं रमते रमायाम् ।। ३४ ।।

संज्ञाप्य[1] न इति । दैत्यारिः श्रीकृष्णः[2] धातुर्ब्रह्मणः सकाशात् विलज्जं निर्लज्जं यथा भवत्येवं रमायां लक्ष्म्या विषये रमते । किंभूतात्[3] ? । तेन नलमुखस्तवेन[4] सङ्कुचता नाभिसरोजेन पीतात् अन्तर्हितात् । पूर्वार्द्धप्रक्रान्ताया[5] नुतेस्तच्छब्देन परामर्शः । किंकृत्वा ? । नोऽस्मान् अत्यब्जस्य अब्जं कमलमतिक्रान्तं येन तस्य तथाविधस्य नलास्यस्य[6] वक्त्रस्य नुत्यै स्तुत्यर्थं संज्ञाप्य संज्ञया प्रेर्य । किंभूतान् अस्मान् ? । स्वस्य ध्वजस्य गरुडस्य भृत्यवर्गान् परिचारकान् । यदा वयं नलमुखं स्तुमः तदा नाभिकमले संकुचिते ब्रह्मा न दृश्यते[7] ।। ३४ ।।

रेखाभिरास्ये गणनादिवास्य द्वात्रिंशता दन्तमयीभिरन्तः ।
चतुर्दशाष्टादश चात्र विद्या द्वेधापि सन्तीति शशंस वेधाः ।। ३५ ।।

रेखाभि[1] रिति । वेधाः ब्रह्मा[2] इति शशंस[3] । अत्र नलमुखे चतुर्दशविद्याः तथा अष्टादश च[4] विद्या द्वेधा द्विप्रकारा अपि सन्ति । उत्प्रेक्षते—अस्य नलस्याऽऽस्ये अन्तर्मध्ये[5] द्वात्रिंशता दन्तमयीभिः रेखाभिर्गणनादिव[6] । चत्वारो वेदाः, षडङ्गानि, पुराणं[7] न्यायो मीमांसा धर्मशास्त्राणीति चतुर्दश । अष्टादशपक्षेऽधिका विद्या आयुर्वेदो, धनुर्वेदो, नाट्यवेदोऽर्थशास्त्राणि । विशिष्टस्य पुरुषस्य द्वात्रिंशद्दन्ता भवति एते[8] दन्ता न भवन्ति किन्तु[9] विद्यागणनाया एता[10] रेखाः[11] ।। ३५ ।।

श्रियौ नरेन्द्रस्य निरीक्ष्य तस्य स्मरामरेन्द्रावपि न स्मरामः ।
वासेन तस्मिन् क्षमयोश्च सम्यग्बुद्धौ न दध्मः खलु शेषबुद्धौ ।। ३६ ।।

श्रियौ[1] नरेन्द्रस्येति । तस्य नरेन्द्रस्य नलस्य श्रियौ[2] निरीक्ष्य शोभामैश्वर्यं[3] च विलोक्य वयं[4] स्मरामरेन्द्रावपि[5] शोभया कामम् ऐश्व-

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

र्येण इन्द्रं[6] च न स्मरामः। किं च तस्मिन्नले उभयोः क्षमयोर्वासिन पृथ्वीतितिक्षयोरवस्थाने न शेषबुद्धावपि नागराजं बौद्धागमप्रणेतारं च बुद्धौ न दध्मः[7] ।। ३६ ।।

विना पतत्रं विनतातनूजैः समीरणैरीक्षणलक्षणीयैः।
मनोभिरासीदनणुप्रमाणैर्न लङ्घिता दिक्कतमा तदश्वैः ।। ३७ ।।

विना[1] पतत्रमिति। तस्य नलस्याऽश्वैः कतमा दिक् न लङ्घिता[2] आसीत्। किंभूतैः ?। [प]तत्रं[3] पक्षं विना विनतातनूजैः गरुडैः। पक्षैः वेगवान्।[4] एते स्वयमेव तथा। ईक्षणलक्षणीयैः समीरणैर्वायुभिः[5]। वायुः किल[6] चक्षुषाम[7] प्रत्यक्षो[8] भवति, अरूपत्वात्[9]। पुनः किंभूतैः ?। अनणुप्रमाणैर्मनोभिः। मनः किल[10] परमाणुपरिमाणं भवति। एते चाश्वा महापरिमाणानि मनांसि[11] ।। ३७ ।।

सङ्ग्रामभूमीषु भवत्यरीणामस्त्रैर्नदीमातृकतां गतासु।
तद्बाणधारापवनाशनानां राजव्रजीयैरसुभिः सुभिक्षम् ।। ३८ ।।

सङ्ग्रामभूमीष्विति[1]। तस्य नलस्य बाणधारा एव पवनाशनाः सर्पाः तेषां सङ्ग्रामभूमीषु राजव्रजीयैर्नृपसम्बन्धिभिरसुभिः प्राणैः सुभिक्षं भवति। किंभूतासु ? अरीणाम् अस्त्रैः रुधिरैः नदीमातृकतां गतासु। या भूमो नद्यम्बुजीवना भवति तस्यां सदैव[2] सुभिक्षम्। सर्पा हि[3] वायुभक्षाः।[4] प्राणाश्च वायवः[5] ।। ३८ ।।

यशो यदस्याऽजनि संयुगेषु कण्डूलभावं भजता भुजेन।
हेतोर्गुणादेव दिगापगालीकूलङ्कषत्वव्यसनं तदीयम् ।। ३९ ।।

यशो[1] यदस्येति। अस्य भुजेन संयुगे[षु]कण्डूलभावं भजता खर्जूलत्वं भजता यद्यशोऽजनि तदीयं तस्य यशसः सम्बन्धि दिश एवाऽऽपगाः नद्यः तासामालीः[2] श्रेणीः तस्याः कूलङ्कषत्वं तस्य व्यसनं हेतोः कारणस्य भुजलक्षणस्य गुणादेव खर्जूलत्वादेव। यादृग् गुणं कारणं तादृग्गुणं कार्यम्[3]। खर्जूलनादुत्पन्नं यशोऽपि खर्जूलम्। अत एव दिशां[4] कूलानि[5] कषति[6] ।। ३९ ।।

यदि त्रिलोकी गणनापरा स्यात् तस्याः समाप्तिर्यदि नायुषः स्यात्।
पारेपरार्धं गणना यदि स्याद्गणेयनिःशेषगुणोऽपि सः स्यात् ।। ४० ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

यदि[1] त्रिलोकीति । यदि त्रिलोकी अन्यकार्याणि[2] विहाय गणनापरा स्यात्[3] । यदि च तस्याः त्रैलोक्याः आयुषः समाप्तिर्न स्यात् । यदि गणितं[4] संख्या पारेपरार्धं स्यात् परार्धसंख्यायाः अधिकं स्यात्[5] । ततः सोऽपि नलो गणेयाः[6] गणयितु[7] शक्याः निःशेषाः गुणा यस्य स तथा विधः स्यात् । एतच्च पूर्वोक्तं नास्ति । अतो गुणगणनादि[8] न संभवति[9] । गण (1996) सङ्ख्याने चुरादावदन्तः । स्वराद्य (का. IV. ii. 10)[10] इति यप्रत्यये संज्ञापूर्वकविधेरनित्यत्वात् कारितस्याऽलोपे गुणे[11] च गणेय इति रूपम्[12] ।। ४० ।।

अवारितद्वारतया तिरश्चामन्तः पुरे तस्य निविश्य राज्ञः ।
गतेषु रम्येष्वधिकं विशेषमध्यापयामः परमाणुमध्याः ।। ४१ ।।

अवारितेति[1] । वयं तस्य राज्ञोऽन्तःपुरे निविश्य परमाणुमध्याः कृशोदरीः प्रमदाः रम्येषु गतेषु अधिकं विलासं विशेषमध्यापयामः । कया निविश्य[2] ?। तिरश्चां पक्षिणाम् अवारितद्वारतया[3] कृत्वा[4] । अनिषिद्ध[5] द्वार[6] प्रविशत्वेन[7] । पक्षिणो हि राजद्वारे न निषिध्यन्ते[8] ।। ४१ ।।

पीयूषधारानधराभिरन्तस्तासां रसोदन्वति मज्जयामः ।
रम्भादिसौभाग्यरहःकथाभिः काव्येन काव्यं सृजताऽऽहताभिः ।। ४२ ।।

पीयूषधारेति[1] । वयं तासामन्तः पुरीणामन्तश्चित्तं रम्भादीनां सौभाग्यस्य या रहः कथा एकान्तवार्तास्ताभिः रसोदन्वति[2] शृङ्गारसमुद्रे मज्जयामः[3] । किंभूताभिः ? । पीयूषधाराभ्यः सकाशात् अनधराभिः अहीनाभिः[4] । तद्विरुद्धे नञ् । उत्कृष्टाभिरित्यर्थः । पुनः किंभूताभिः ? । काव्येन शुक्रेण आदृताभिः । किं कुर्वता[6] ? । काव्यं कवित्वं सृजता[7] । उदन्वानुदधौ चे (पा° VIII. ii. 13) ति निपातः ।। ४२ ।।

काभिर्न तत्राऽभिनवस्मराज्ञाविश्वासनिक्षेपवणिक् क्रियेऽहम् ।
जिह्वेति[1] यद्वा बहुतोऽपि तिर्यक्कश्चित्तिरश्चस्त्रपते न तेन ।। ४३ ।।

काभिर्न[2] तत्रेति । तत्राऽन्तः पुरे काभिर्नायिकाभिः अहमभिनवा अपूर्वरूपा[3] या स्मराज्ञा कामाज्ञा तस्याः विश्वासेन यो निक्षेपः रहस्यवार्त्ताकथनं तत्र वणिक् वाणिजको न क्रिये । अपि[तु]सर्वा[4] अपि मम सर्वं कथयन्ति । यत्[5] कारणात् तिर्यक् पक्षी बहुतोऽपि रहस्यवार्त्ताकथ-

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

नात् अथवा[6] बहुभ्योऽपि[7] जनेभ्यो न जिह्रेति तेन कारणेन तिरश्चः पक्षणोऽपि सकाशात् कश्चिदपि जनो न त्रपते[8] ।। ४३ ।।

वार्ता च[1] नासत्यपि सान्यमेति योगादरन्ध्रे हृदि यां निरुन्धे ।
विरञ्चिनानाननवादधौतसमाधिशास्त्रश्रुतिपूर्णकर्णः ।। ४४ ।।

वार्त्ता[2] च नेति । यां वार्त्ताम् अहं योगाच्चित्तनिरोधात् अरन्ध्रे निश्छिद्रे हृदि निरुन्धे रुणध्मि, सा वार्त्ता[3] असती अपि अभव्यापि । अपि शब्दात् भव्यापि । अन्यं पुरुषं नैति न प्राप्नोति । अन्यो न जानाति तां[4] वार्त्ताम् । किंभूतोऽहम् ? । विरञ्चे[5] र्ब्रह्मणो नानाप्रकाराणामाननानां वादेन तर्केण धौतानि अनुगृहीतानि यानि सवाधिरूपाणि सिद्धान्तरूपाणि शास्त्राणि[6] विधिनिषेधपराणि तेषां श्रुत्या आकर्णनेन पूर्णौ कर्णौ यस्य मम स तथा[7] ।। ४४ ।।

नलाश्रयेण त्रिदिवोपभोगं तवानवाप्यं लभते बताऽन्या ।
कुमुद्वतीवेन्दुपरिग्रहेण ज्योत्स्नोत्सवं दुर्लभमम्बुजिन्या ।। ४५ ।।

[1]नलाश्रयेणेति । बत[2] इति खेदे । [3]नलाश्रयेण परिणयनेन त्रिदिवस्य स्वर्गस्योपभोगम् अन्या काचिल्लभते लप्स्यते । [4]यतस्तवानवाप्यमलभ्यम् । यथा कुमुद्वती इन्दोः परिग्रहेण ज्योत्स्नोत्सवं[5] ज्योत्स्नाया[6] उत्सवं लभते । किं भूतम् ? । अम्बुजिन्याः[7] कमलिन्या दुर्लभम्[8] ।। ४५ ।

तन्नैषधानूढतया दुरापं शर्म त्वयाऽस्मत्कृतचाटुजन्म ।
रसालवन्या मधुपानुविद्धं[1] सौभाग्यमप्राप्तवसन्तयेव ।। ४६ ।।

[2]तन्नैषधेति । तत्कारणात् त्वया नैषधेन अनूढतया[3] अपरिणीततया अस्माभिः कृताच्चाटुवाक्याज्जन्म यस्य तत्तथाविधं शर्म [4]दुरापं सुखं दुर्लभम् । यथा रसालवन्या आम्रबाणेन[5] मधुपैर्भ्रमरैः अनुविद्धं[6] सौभाग्यं दुर्लभम् । किं भूतया ? । अप्राप्तवसन्तया[7] । वसन्ते हि चूतमुकुलेषु[8] भ्रमरा ध्वनन्ति[9] ।। ४६ ।।

तस्यैव वा यास्यसि किं न हस्तं दृष्टं मनः केन विधेः प्रविश्य ।
अजातपाणिग्रहणाऽसि तावद्रूपस्वरूपातिशयाश्रयश्च ।। ४७ ।।

[1]तस्यैवेति । वा अथवा तस्यैव नलस्य हस्तं किं न यास्यसि ? । अपि[2] तु यास्यसि ! यतो विधेर्ब्रह्मणो मनोऽन्तः प्रविश्य केन दृष्टम् ।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

तावत्त्वम् अजातं पाणिग्रहणं यस्याः सा[3] तथाविधाऽसि । तथा रूपस्वरूपस्य लावण्यस्य अतिशयः तस्याऽऽश्रयश्च त्वमसि । अत्यन्तसुन्दरी । ततस्तेन सह संयोगोऽपि[4] घटते ।। ४७ ।।

निशा शशाङ्कं शिवया गिरीशं श्रिया हरिं योजयतः प्रतीतः ।
विधेरपि स्वारसिकः प्रयासः परस्परं योग्यसमागमाय ।। ४८ ।।

निशा[1] शशाङ्कमिति । विधेरपि ब्रह्मणोऽपि परस्परं योग्ययोः स्त्रीपुंसयोः समागमाय स्वारसिकः स्वरसेनैवोत्पन्नः[2] प्रयासः उद्यमः प्रतीतो[3] दृष्टः । किं कुर्वतः ?। निशा रात्र्या शशाङ्कं स्वयमेव योजयतः । तथा शिवया देव्या पार्वत्या गिरीशं[4] श्रीमहादेवं योजयतः । तथा श्रिया लक्ष्म्या हरिं श्रीकृष्णं[5] योजयतः[6] । योग्यानां समागमं स्वयमेव कुर्वतः[7] ।। ४८ ।।

वेलातिगस्त्रैणगुणाब्धिवेणिर्न योगयोग्याऽसि नलेतरेण ।
संदर्भ्यते दर्भगुणेन मल्लीमाला न मृद्वी भृशकर्कशेन ।। ४९ ।।

वेलातिगेति[1] । हे दमयन्ति ! त्वं नलादितरेण न योगयोग्या सम्बन्धयोग्या[2] असि । किं भूता त्वम् ?। वेलातिक्रान्तो यः स्त्रैणानां स्त्रीसम्बन्धिनां गुणानाम् अब्धिः समुद्रः तस्य वेणिः[3] प्रवाहरूपा । अतिगुणवती[4] । यतः[5] मृद्वी कोमला मल्लीमाला विचकितस्रक्[6] भृशं कर्कशेन दर्भस्य गुणेन रज्ज्वा[7] न[8] संदर्भ्यते[9] न[10] ग्रथ्यते[11] ।। ४९ ।।

विधिं वधूसृष्टिमपृच्छमेव तद्यानयुग्यो नलकेलियोग्याम् ।
त्वन्नामवर्णा इव कर्णपीता मयाऽस्य संक्रीडति चक्रिचक्रे ।। ५० ।।

विधिं वधूसृष्टिमिति[1] । अहं विधिं ब्रह्माणं नलस्य केलियोग्यां क्रीडासमुचितां वध्वाः[2] सृष्टिमुत्पत्तिमपृच्छमेव पृष्टवान् । किंभूतः ?। तस्य ब्रह्मणो याने रथे युग्यो धुर्यः सन् मया अस्य[3] विधेः चक्रिणो रथस्य चक्रे रथाङ्गे संक्रीडति सति शब्दं कुर्वति सति[4] त्वन्नामवर्णा इव[5] कर्णपीताः[6] श्रुताः । इवशब्देन[7] किञ्चिदस्पष्टता सूच्यते । संक्रीडतीत्यत्र समो कूजने (वा° 104) इत्यनेन कूजनत्वादात्मनेपदाभावः[8] ।। ५० ।।

अन्येन पत्या त्वयि योजितायां विज्ञत्वकीर्त्या गतजन्मनो वा ।
जनापवादार्णवमुत्तरीतुं विधा विधातुः कतमा तरिः स्यात् ।। ५१ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

अन्येन[1] पत्येति । वा अथवा त्वय्यन्येन[2] पत्या[3] भर्त्रा योजितायां सत्यां विधातुर्ब्रह्मणो हणहणकार:[4] जनापवादमेवाऽर्णवं[5] समुद्रम् उत्तरीतुं कतमा विधा कतमा प्रकारा[6] तरिर्नौः स्यात् । अपि तु न कैव । किं भूतस्य विधातुः ?। विज्ञत्वस्य विशेषज्ञत्वस्य[7] कीर्त्या गतं जन्म यस्य स तथा । एतावता नलस्य त्वमेव योग्येति भावः[8] ।। ५१ ।।

आस्तां तदप्रस्तुतचिन्तयाऽलं मयाऽसि तन्वि ! श्रमितातिवेलम् ।
सोऽहं तदागः परिमार्ष्टुकामः किमोप्सितं[1] ते विदधेऽभिधेहि ।। ५२ ।।

आस्तामिति[2] । तत् आस्तां[3] तिष्ठतु तस्मात् हे तन्वि ! अप्रस्तुतचिन्तया । अलं पूर्यताम् । असि त्वं मया अतिवेलं अत्यन्तं[4] बहुकालं श्रमिता तव श्रम उदपादि स[5] अहं तदागः अपराधं परिमार्ष्टुकामोऽस्मि[6] । अभिधेहि[7] कथय ते[8] तव[9] किमोप्सितं विदधे करोमि[10] ।। ५२ ।।

इतीरयित्वा विरराम पत्री स राजपुत्रीहृदयं बुभुत्सुः ।
हृदे गभीरे हृदि चावगाढे शंसन्ति कार्यावतरं हि सन्तः ।। ५३ ।।

इतीरयित्वेति[1] । स पत्री[2] हंसः इतीरयित्वा[3] उक्त्वा राजपुत्र्या हृदयं बुभुत्सुः[4] सन् विरराम उपरतः । युक्तं[5] चैतत् । यतः यस्मात्[6] हृदे गभीरे[7] नदे हृदि च गम्भीरे अवगाढे सति विलोडिते सति कार्यस्यावतरमारम्भं[8] सन्तः शंसन्ति । अवतारं तीर्थं च कार्यं च प्रशंसन्ति[9] ।। ५३ ।।

किञ्चित्तिरश्चीनविलोलमौलिर्विचिन्त्य वाचं[1] मनसा मुहूर्तम् ।
पतत्रिणं सा पृथिवीन्द्रपुत्री जगाद वक्त्रेण तृणीकृतेन्दुः ।। ५४ ।।

किञ्चित्तिरश्चीनेति[2] । सा[3] पृथिवीन्द्रपुत्री[4] पृथिवीन्द्रस्य[5] पुत्री दुहिता । षष्ठीतत्पुरुषो वा । पुत्रट् । पतत्रिणं हंसं जगाद । किंभूता ?। वक्त्रेण तृणीकृतो जित इन्दुर्यया सा तथा । पुनः[6] किंभूता ?। किञ्चित्तिरश्चीनो विलोलो मौलिर्मस्तकं यस्याः सा तथा । किं कृत्वा ?। मनसा मुहूर्तं[7] वाचं विचिन्त्य[8] ।। ५४ ।।

धिक् चापले वत्सिमवत्सलत्वं यत्प्रेरणादुत्तरलीभवन्त्या ।
समीरसङ्गादिव नीरभङ्ग्या मया तटस्थस्त्वमुपद्रुतोऽसि ।। ५५ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

धिक्[1] चापल इति। हे हंस ! चापले चपलत्वे वत्सिम्नो वात्सल्यस्य प्रीतिः अथवा वत्सिम्नि[2] इव वत्सलत्वे[3] इव वत्सलत्वं वात्सल्यं धिक्। यथा [5]वत्से धेनोर्वात्सिल्यं तथा चपलत्वे वात्सल्यं न कर्तव्यं, तत् मया कृतम्। यस्य चापल्ये वात्सल्यस्य प्रेरणात्[6] उत्त [र] लीभवन्त्योत्सुकी भवन्त्या मया त्वं तटस्थः उदासीनः सन्नुपद्रुतोऽसि। यथा समीरस्य सङ्गात् नीरस्य भङ्ग्या ऊर्मिणा तटस्थः उपद्रूयते[7] ॥५५॥

आदर्शतां स्वच्छतया प्रयासि सतां स तावत्खलु दर्शनीयः।
आगः पुरस्कुर्वति सागसं मां यस्यात्मनीदं प्रतिबिम्बितं ते ॥५६॥

[1]आदर्शतामिति। हे हंस ! त्वं स्वच्छतया[2] आदशतां प्रयासि। खलु[3] स आदर्शः तावत्सतां दर्शनीयः [4]त्वं च दर्शनीयः रम्यः। यस्य ते तव आत्मनीदम् आगः[5] अपराधः प्रतिबिम्बितम्। किं भूते आत्मनि। सागसं सापराधां[6] मां पुरस्कुर्वति संभावयति। अहं तावत्[7] [8]त्वां प्रति उपद्रव करणात् सापराधा[9]। त्वमादर्शवत्स्वच्छः। मां च पुरोऽग्रे करोषि। मयि प्रतिबिम्बितायां मम धर्मोऽपराधो[10] त्वयि नान्तरीय [11]कतया प्रतिबिम्वितः। अतस्त्वं सापराधः न तु [12]तवाऽपराधोऽस्ति[13] ॥५६॥

अनार्यमप्याचरितं कुमार्या भवान्मम क्षाम्यतु सौम्य ! तावत्।
हंसोऽपि देवांशतयाऽसि [1]वन्द्यः श्रीवत्सलक्ष्मेव हि मत्स्यमूर्तिः ॥५७॥

[2]अनार्यमपीति। [3]भवान्मम कुमार्याः अनार्यमप्याचरितं हे सौम्य ! तावत् [4]क्षाम्यतु क्षमस्व। त्वं हंसोऽपि देवा[5] नामं शतया वन्द्योऽसि। यथा मत्स्यमूर्तिः श्रीकृष्णः[6] श्रीवत् सलक्ष्म्या वन्द्यः। हि[7] यस्मान्निश्चितं वा[8] ॥५७॥

मत्प्रीतिमाधित्ससि कां त्वदीक्षामुदं मदक्ष्णोरपि यातिशेताम्।
निजामृतैर्लोचनसेचनाद्वा पृथक्किमिन्दुः सृजति प्रजानाम् ॥५८॥

[1]मत्प्रीतिमिति। [2]त्वं कां मम प्रीतिमाधातुं [3]कर्तुं मिच्छसि। या प्रीतिर्ममाक्ष्णोस्तवेक्षया या[4] मुद् हर्षः तामपि अतिशेताम्। सा[5] कापि प्रीतिर्नास्ति, या त्वद्दर्शनहर्षमतिक्रामति। [6]वाशब्देन प्रसिद्धत्वादाक्षिपति। अथ [7]वा इन्दुः प्रजानां निजैरमृतैर्लोचनानां [8]सेचनात् पृथगन्यत् किं सृजति। अपि तु दर्शनादेवाऽऽनन्दं ददाति। तथ त्वमपीति[9] ॥५८॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

मनस्तु यं नोज्झति जातु यातु मनोरथः कण्ठपथं कथं सः ।
का नाम बाला द्विजराजपाणिग्रहाभिलाषं कथयेदलज्जा ।।५९।।

मनस्तु[1] यमिति । तु[2] पुनः मनः यं मनोरथं जातु कदाचिदपि नोज्झति । स मनोरथो सन्तः करणात् कण्ठपथं यावत् कथं यातु । वक्तुं[3] न शक्यत[4] इत्यर्थः । यतः का बाला नाम [5]अलज्जा भूत्वा द्विजराजस्य चन्द्रस्य पाणिना ग्रहस्य आदानस्य[6] अभिलाषं कथयेत् [7]अप्राप्यं मनोरथं कथयति ? अथ च का बाला अप्रौढा हे द्विज ! [8]हंस ! राज्ञो नलस्य [9]पाणिग्रहाभिलाषं परिणयनमनोरथं निर्लज्जा भूत्वा कथयेत् । अपि तु न कथयेदेव[10] ।।५९।।

वाचं तदीयां परिपीय मृद्वीं मृद्वीकया तुल्यरसां स हंसः ।
तत्याज तोषं परपुष्टघुष्टे घृणां च वीणाक्वणिते वितेने ।।६०।।

वाचं[1] तदीयामिति । स हंसस्तदीयां मृद्वीं कोमलां वाचं[2] परिपीय श्रुत्वा [3]परपुष्टस्य कोकिलस्य घुष्टे शब्दे तोषं तत्याज हर्षं न[4] चक्रे । किं भूताम् ? । मृद्वीकया द्राक्षया[5] तुल्यरसाम् । [6]तथा वीणायाः क्वणिते घृणां[7] जुगुप्सां च वितेने । तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्यामि (पां II. iii. 72) ति तृतीया[8] ।।६०।।

मन्दाक्षमन्दाक्षरमुद्रमुक्त्वा तस्यां समाकुञ्चितवाचि हंसः ।
तच्छंसिते किञ्चन संशयालुर्गिरा मुखाम्भोजमयं युयोज ।।६१।।

[1]मन्दाक्षमन्देति । अयं हंसः गिरा वाण्या मुखाम्भोजं युयोज उवाच । किं भूतः ? । तस्याः शंसिते कथिते मनोरथे किञ्चन स्वल्पं संशयालुः सन्देहपरः । क्व सति ? । [2]तस्यां दमयन्त्यां मन्दाक्षेण लज्जया मन्दा अस्पष्टा[3] अक्षराणां मुद्रा यत्र वचने तद्यथा भवति एवमुक्त्वा समाकुञ्चिता वाक् यथा तथाविधायां सत्याम्[4] । मौनवत्याम्[5] ।।६१।।

करेण वाञ्छेव विधुं विधर्तुं यमित्थमात्थाऽऽदरिणी तमर्थम् ।
पातुं श्रुतिभ्यामपि नाधिकुर्वे वर्णं श्रुतेर्वर्ण इवान्तिमः किम् ।।६२।।

करेण[1] वाञ्छेति । करेण हस्तेन विधुं [2]चन्द्रं [3]विधर्तुं मम वाञ्छा ईदृशमिव इत्थं [4]यमर्थं त्वामादरिणी सती आत्थ । द्विजराज [5]पाणिग्रहाभिलाषमि (III. 51) त्यनेन श्लोकेन उक्तवती । तमनवाप्यम् अर्थमहं किं श्रुतिभ्यामपि पातुं श्रोतुं[6] नाधिकुर्वे[7] नाधिकृता[8] । यथा अन्तिमो

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

वर्णः शूद्रः श्रुतेर्वेदस्य वर्णमक्षरं श्रोतुमपि नाधिकरोति । [9]यमित्थमात्था-दरिणी[10] तमर्थमिति पाठो व्याकृतः । [11]यमित्थमामात्थमहो तमर्थमिति पाठे इत्थमित्यर्थे इत्थमिति अकारान्तो निपातः । तथा च [12]शाङ्खायन-कल्पसूत्रे द्वादशाध्याये—इहेत्थप्रागपागुदगधरागराला गुदभर्त्सत (XXIII. 1) इत्यत्र इत्थ इत्यतिप्रयोगो दृश्यते । इत्थमामात्थम् इति पदानि आत्थ[13] इत्यर्थे आत्थम् इति निपातः । इत्थम् अनेन[14] प्रकारेण मां त्वम् आत्थ[15] ब्रवीषीत्यर्थः । यमित्थमात्थत्वमहो इति [16]पाठान्तरम्[17] ।।६२।।

अवाप्यते वा किमियद्भवत्या चित्तैकपद्यामपि वर्त्तते[1] यः ।
यत्रान्धकारः किल चेतसोऽपि जिह्मेतरैर्ब्रह्म तदप्यवाप्यम् ।।६३।।

[2]अवाप्यते वेति । वा अथवा किमियत[3] यः चितस्य एकपदो मार्गस्तत्रापि वर्तते चेत् स अवाप्यते[4] यतः[5] यत्र ब्रह्मणि[6] किल चेतसोऽप्यन्धकारः अविषयः तदपि ब्रह्म जिह्मेतरैः अभियुक्ततरैः शास्त्राचार्यप्रसादा-वाप्यम्[7] । अविद्यानाशे विद्यया[8] स्वरूपस्य प्राप्तत्वादेव । यथा भ्रान्त्या [9]कण्ठगतमपि सुवर्णस्याऽलङ्करणं मदीयं क्व गतमिति पृच्छन् [11]सन् तटस्थेन तव [12]कण्ठ एव चामीकरमिति केनापि स्मारितः, ज्ञानाद् भ्रान्तिनिरासेन प्राप्तमेव प्राप्नोति । तथा योगी गुरुप्रसादात् प्राप्तमेव ब्रह्मस्वरूपं प्राप्नोति । अस्थूलमनणिव (बृहदा° III. viii. 8) त्यादि, नेति नेति (बृहदा° IV. iv. २२) इत्यादि श्रुतिभ्यः सर्वेन्द्रियादीनाम-गोचरत्वात्[13] ।।६३।।[14]

ईशाणिमैश्वर्यविवर्तमध्ये लोकेशलोकेशयलोकमध्ये ।
तिर्यञ्चमप्यञ्च मृषानभिज्ञरसज्ञतोपज्ञसमज्ञमज्ञम् ।।६४।।

[1]ईशाणिमेति । हे ईशस्य[2] ईश्वरस्य श्रीमहेश्वरस्य[3] [4]अणिमलक्षणमैश्वर्यं तस्य यो विवर्तः परिपाकः[5] [6]परिणामविशेषः तद्वत् [7]अल्पं मध्यं[8] कृशम् [9]उदरं यस्याः सा तथा, तस्याः सम्बोधनम्[10] । हे कृशोदरि । लोकेशो ब्रह्मा तस्य लोकेशया [11]ये लोकाः ब्रह्माण्डस्थिता जनाः तेषां मध्ये वर्त्तमानं तिर्यञ्चमपि पक्षिणमज्ञम्[12] अज्ञानजडमपि मां त्वमेवं विधम् अञ्च जानीहि । किंभूतम् ? । मृषानभिज्ञरसज्ञतायाः सत्यवादितायाः[13] या[14] उपज्ञा तया प्रथमतः प्रणीता[15] समज्ञाः सर्वतो ज्ञानसङ्केतः प्रतिज्ञा यस्य तं तथा । उपज्ञोपक्रमं तदाद्याचिख्यासायामि (पा° II. iv. २१) ति

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

सूत्रेण रसज्ञतोपज्ञसमज्ञेति[16] तत्पुरुषस्य नपुंसकत्वम् । मम प्रतिज्ञा[17] सत्यवादितोपज्ञमित्यर्थः:[18] [19]एतदुक्तं भवतिमृषा अनृतभाषणे [20]अनभिज्ञा रसज्ञाः जिह्वा येषां ते तथोक्ताः तेषां भावस्तत्ता तत्र उपज्ञा[21] उपक्रमस्तस्य समज्ञा [22]सम्यक् ज्ञानं यस्य मम स तथा । सत्यवदनोपज्ञ[23] मित्यर्थः[24] पक्षी किल तामससृष्टित्वात् जडोऽनृतवाक् भवति । अहं तु न तथा । तस्मान्मयि विश्वस्य ब्रूहि[25] ।।६४।।

मध्ये श्रुतीनां प्रतिवेशिनीनां सरस्वती वासमती मुखे नः ।
ह्रियैव[1] ताभ्यश्चलतीयमद्धा यथा न सत्सङ्गगुणेन नद्धा ।।६५।।

मध्ये[2] श्रुतीनामिति । नोऽस्माकं मुखे या सरस्वती [3]वाणी वर्त्तते सा श्रुतीनां वेदानां प्रतिवेशिनीनां[4] ब्रह्ममुखानि प्रतिवेश्मानि तत्र स्थितानां मध्ये वासवती [5]अथवा मन्मुखे एव प्रतिवेशिभावेन स्थितानां श्रुतीनां मध्ये सरस्वती[6] वासवती वसति । अद्धा असंशयम् इयमस्मद्वाणी ताभ्यः श्रुतिभ्यः[7] ह्रिया एव[8] लज्जयैव न चलति । उत्प्रेक्षते [9]सत्सङ्गगुणेन नद्धा यथा बद्धेव । साधुसङ्गतिरेव गुणो रज्जुस्तेन[10] बद्धेव ।[11] [12]ध्रुवे-वादीनामेव संभावनाभिधानक्षमत्वात् उत्प्रेक्षायामविवक्षितस्य साधर्म्यमात्रस्य प्रतिपादने पर्याप्तस्य[13] यथाशब्दस्य सम्भावनाभिधाने शक्तिरवाचकत्वमित्यत्र[14] दोषः । यथा-उद्ययौ[15] दीर्घिकागर्भान्मुकुलं मेचकोत्पलम् । नारीलोचनचातुर्यशङ्कासङ्कुचितं यथा ।। (का॰ शा॰ III. vi. 312) अत्र वाचकम् । अतः केचिदुपमां व्याचक्षते । दोषभयात् महाकविप्रयुक्तत्वात्तु प्रयोगः । तथा च–शरीरबद्धः प्रथमाश्रमो यथा (कुमार v. 30) इत्युक्तम्[16] ।।६५।।

पर्यङ्कतापन्नसरस्वदङ्कां लङ्कां पुरीमप्यभिलाषि चित्तम् ।
कुत्राऽपि चेद्वस्तुनि ते प्रयाति तदप्यवेहि स्वशयेशयालु ।।६६।।

[1]पर्यङ्कतेति । हे दमयन्ति ! यदि ते[2] तव चित्तं लङ्कामपि पुरीं प्रति अभिलाषि । किं भूताम् ? । पर्यङ्कतापन्नः शय्याकारतां प्राप्तः सरस्वतोऽङ्कः समुद्रोऽङ्को लक्षणमभिज्ञानं यस्याः तां तथा । समुद्रोप-लक्षिताम् । चेद्यदि कुत्रापि अन्यस्मिन्नपि वस्तुनि[4] ते तव चित्तं प्रयाति । [5]तदपि सर्वं त्वं [6]स्वे आत्मीये शये हस्ते शयालु हस्तस्थितमवेहि[7] जानीहि[8] ।।६६।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

इतीरिता पत्ररथेन तेन ह्रीणा च हृष्टा च बभाण भैमी ।
चेतो नलङ्कामयते मदीयं नान्यत्र कुत्राऽपि च साभिलाषम् ॥६७॥

[1]इतीरितेति । सा देवी[2] तेन पत्ररथेन[3] पक्षिणा इति ईरिता उक्ता सती ह्रीणा लज्जिता हृष्टा च हंसवचनान्मुदिता भैमी बभाण ।।मम चेतो न लङ्कां पुरीमयते गच्छति । अथ च नलं नैषधं कामयते । अन्यत्र कुत्रापि वस्तुनि[4] च साभिलाषं[5] न अस्ति[6] ॥६७॥

विचिन्त्य बालाजनशीलशैलं लज्जानदीमज्जदनङ्गनागम् ।
आचष्ट विस्पष्टमभाषमाणामेनां स चक्राङ्गपतङ्गशक्रः ॥६८

[1]विचिन्त्येति । स[2] चक्राङ्गानां पतङ्गानां हंसानां शक्र इन्द्रः [3]एनां दमयन्तीम् आचष्ट अब्रवीत् । कीदृशीम् ? । विस्पष्टम् अभाषमाणाम् । किं कृत्वा ? । बालाजनस्य शीलमेव[4] शैलं पर्वतं विचिन्त्य[5] । लज्जैव नदी तस्यां मज्जन अनङ्गः काम एव [6]नागो हस्ती यस्य तं [7]तथाविधं विचिन्त्य । बालानां न्यक्कृतकामा लज्जा विचार्येत्यर्थः[8] ॥६८॥

नृपेण पाणिग्रहणस्पृहेति नलं मनः कामयते ममेति ।
आश्लेषि न श्लेषकवेर्भवत्याः श्लोकद्वयार्थः सुधिया मया किम् ॥६९॥

नृपेण[1] पाणीति । मया किं भवत्याः श्लेषकवे[2] श्लेषेण काव्यकर्त्र्या द्विजराजपाणिग्रहाभिलाषमि (III. 51)-त्यादि चेतो नलं कामयते (III. 67) इत्यादि श्लोकद्वयस्य अर्थः[4] सुधिया[5] नाश्लेषि, किं[6] न ज्ञातः । अपि तु ज्ञातः । कथम् ? । इति । इतीति[7] किम् ? । मम नृपेण राज्ञा सह[8] पाणिग्रहणं तस्य स्पृहा । तथा द्वितीयश्लोके मम मनो नलं कामयते इति च । नृपस्येति[9] पाठान्तरम्[10] ॥६९॥

त्वच्चेतसः स्थैर्यविपर्ययं तु संभाव्य भाव्यस्मि तदज्ञ एव ।
लक्ष्ये हि बालाहृदि लोलशीले दरापराद्धेषुरपि स्मरः स्यात् ॥७०॥

त्वच्चेतस[1] इति । तु पुनस्तव[2] चेतसः [3]स्थैर्यस्य विपर्ययं संभाव्य चञ्चलत्वं मत्वा तत्कारणादज्ञ एव अजानान एव भावी भवितुकामोऽस्मि । हि यस्मात् बालाया[4] हृदि लक्ष्ये [5]वेध्ये लोलशीले चञ्चलस्वभावे स्मरोऽपि दरम् ईषत् अपराद्धेषुः [6]किञ्चिच्च्युतबाणः स्यात्[7] ॥७०॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

महीमहेन्द्रः खलु नैषधेन्दुस्तद्बोधनीयः कथमित्थमेव ।
प्रयोजनं संशयकम्प्रमीदृक् पृथग्जनेनेव स मद्विधेन ।।७१।।

[1]महीमहेन्द्र इति । खलु निश्चितम् । नैषध एवेन्दुः[2] मह्यां महेन्द्रः[3] भूमीन्द्रः तत्कथं स इत्थमेव निश्चयमन्तरेण संशयेन कम्प्रं चञ्चलं प्रयोजनं मद्विधेन प्रतिष्ठितपुरुषेण बोधनीयः[4] । केनेव ?। पृथग्जनेव । यथा पामरजनेन सन्दिग्धप्रयोजनं[5] कदाचित्[6] ज्ञाप्यते । इनन्तत्वात् [7]गतिबुद्धी (पा॰ I. iv. 52) त्यादिना द्विकर्मकः[8] ।।७१।।

पितुर्नियोगेन निजेच्छया वा युवानमन्यं यदि वा वृणीषे ।
त्वदर्थमर्थित्वकृति प्रतीतिः कीदृङ्मयि स्यान्निषधेश्वरस्य ।।७२।।

[1]पितुर्नियोगेनेति । त्वं यदि पितुर्नियोगेन वा अथवा[2] निजेच्छया[3] यदृच्छया अन्यं युवानं वृणोषे । ततो निषधेश्वरस्य मयि विषये कीदृक्[4] प्रतीतिर्विश्वासः[5] स्यात् । कीदृशे[6] मयि ? । त्वदर्थमर्थित्वं करोमीति[7] तस्मिंस्तथा[8] ।।७२।।

त्वयाऽपि किं [1]शङ्कितधिक्क्रियेऽस्मिन्नधिक्रिये वा विषये निधातुम् ।
इतः पृथक् प्रार्थयसे तु यद्यत् कुर्वे तदुर्वीपतिपुत्रि ! सर्वम् ।।७३।।

[2]त्वयापीति । हे दमयन्ति ! त्वयाऽपि वा अथवा[3] अस्मिन्नलप्रार्थनलक्षणे विषये निधातुमहं किमधिक्रिये ? । अपि तु नाऽहं तत्राऽधिकारी कर्तव्यः । किंभूते ?। शङ्किता सन्दिग्धा धिक्क्रिया धिक्कारो यत्र तत्र तथा । हे उर्वीपतिपुत्रि ! इतोऽस्मात् कार्यात् पृथक् अन्यत् यद्यत् प्रार्थयसे तत्तदहं[4] सर्वं कुर्वे । [5]कल्याणानां त्वमिह महतामीशिषे त्वं विधित्से[6] पुण्यां लक्ष्मीमथ मयि दृशं देहि[7] देव प्रसीद । यद्यत्पापं प्रतिजहि जगन्नाथ । नम्रस्य तन्मे भद्रं भद्रं वितर[8] भगवन् ! भूयसे मङ्गलाय (मा॰. मा॰. I. 5) इतिवत् यत् यदिति येन केनचिद्रूपेण स्थितं सर्वात्मकं वस्त्वाक्षिप्तम् । तथा भूतमेव तच्छब्देन परामृश्यते इति । यद्यदित्युक्त्वा तदित्युक्तेऽपि न दोषः[9] ।।७३।।

श्रवः प्रविष्टा इव तद्गिरस्ता विधूय वैमत्यधुतेन मूर्ध्ना ।
ऊचे ह्रियोऽपि श्लथितानुरोधा पुनर्धरित्रीपुरुहूतपुत्री ।।७४।।

[1]श्रवः प्रविष्टा इति । धरित्री पुरुहूतस्य राज्ञः[2] पुत्री पुनरपि ऊचे । किंभूता ? । ह्रियो लज्जाया अपि श्लथितोऽनुरोधो यया सा तथा ।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

शिथिलीकृतलज्जा इत्यर्थः ? । [3]वैमत्येन विरुद्धोक्तितया धुतेन मूर्ध्ना ताः तस्य हंसस्य गिरः विधूय[4] [5]निराकृत्य[6] । उत्प्रेक्षते—श्रवसि कर्णे प्रविष्टा इव भणित्वा । मूर्ध्ना कम्पितेन निराकृत्य[7] ।।७४।।

मदन्यदानं प्रति कल्पना या वेदस्त्वदीये हृदि तावदेषः ।
निशोऽपि सोमेतरकान्तशङ्कामोङ्कारमग्रेसरमस्य कुर्याः ।।७५।।

[1]मदन्यदानमिति । [2]तावत्त्वदीये हृदि एष वेदः ज्ञानम् अथ च वेदवाक्यं या[3] मम अन्यस्मै दानं प्रति कल्पना[4] नलव्यतिरिक्तो भर्त्ता शङ्क्यते ।[5] यदा[6] मम त्वया नलादन्यो भर्त्ता कल्पनीयः इति वेदः तदा अत एव निशोऽपि रात्रेरपि[8] सोमेतरकान्तशङ्कामेवोङ्कारं प्रणवम् अस्य वेदस्य अग्रेसरं प्रथमं कुर्याः ।[10] वेदारम्भे[11] [12]हि प्रणवः क्रियते ।[13] स्रवत्यनोंऽकृतं पूर्वमि (मनु॰ 2/74) ति स्मरणात्[15] ।।७५।।

सरोजिनीमानसरागवृत्तेरनर्कसम्पर्कमतर्कयित्वा ।
मदन्यपाणिग्रहशङ्कितेयमहो महीयस्तव साहसिक्यम् ।।७६।।

[1]सरोजिनीति । अहो आश्चर्ये । हे हंस ! तव महीयः महत्[2] [3]साहसिकत्वं यदियं ममाऽन्येन नलादितरेण पाणिग्रहस्य[4] शङ्किता वितर्कितत्वम् । किं कृत्वा ? । सरोजिन्या मानसस्य चित्तस्य रागवृत्तेः[5] अनुरागव्यापारस्य अनर्कसम्पर्कम् अतर्कयित्वा अविचार्य । कमलिन्याश्चेद् अर्कसम्पर्कव्यतिरेकेणाऽपि चन्द्रादिकेऽनुरागं तर्कयसि । तदा ममाप्यन्यो भर्त्ता तर्कणीयः । अन्यथा न [6]तर्कणीयः[7] ।।७६।।

साधु त्वयाऽतर्कि तमेतदेव स्वेनाऽनलं यत्किल संश्रयिष्ये ।
विनाऽमुना स्वात्मनि तु प्रहर्तुं मृषागिरं त्वां नृपतौ न कर्तुम् ।।७७।।

साधु[1] त्वयेति । तत्[2] त्वया एतदेव साधु रुचिरमतर्कि यदहं भैमी[3] स्वेनाऽऽत्मना अनलं संश्रयिष्ये । किलेत्युपहासे । तु पुनः अमुना विना स्वात्मनि स्वशरीरे प्रहर्तुमनलं वैश्वानरं संश्रयिष्ये । पुनः त्वां नृपतौ नलविषये मृषागिरम् अनृतभाषिणं कर्तुं नलादन्यं वरम् अनलं न संश्रयिष्ये[4] ।।७७।।

मद्विप्रलभ्यं पुनराह यस्त्वां तर्कः स किं तत्फलवाचि मूकः ।
अशक्यशङ्को व्यभिचारहेतुर्वाणी न वेदा यदि सन्तु केतु ।।७८।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

मद्विप्रलभ्यमिति ।[1] यः पुनस्तर्कः विचारः मया विप्रलभ्यं [2]विप्रतार्यं त्वामाह[3] । स तर्कः [4]किं तस्य विप्रलम्भनस्य फलवाचि फलवचने मूकः । येन तर्केण त्वमिति मन्यसे यत् दमयन्ती मां वञ्चयति[5] असत्यवचनेन कृत्वा तस्य वञ्चनस्य फलं तव स एव कथयिष्यति । तर्हि तव वाणी सत्यैव इति[6] कथं [7]ज्ञायते इत्याशङ्क्याह-यदि यस्या वाण्याः व्यभिचारस्य हेतुः कारणम् अशक्यशङ्कः[8] शङ्कितुमपि न[9] शक्यः सा व्यभिचारिणी वाणी यदि चेत् न वेदा, न वेदवत् प्रामाण्यभाक् ।[10] तु पुनः तर्हि वेदाः के सन्तु । अपि त्वन्ये न केऽपि । वेदानामपि अपौरुषेयत्वात् व्यभिचार [11]हेतुरागद्वेषसहितपुरुषप्रणीतत्वाभावात् [12]प्रामाण्यम् । तथा मम वाण्या अपि वेदतुल्यत्वात् व्यभिचाराभावः । विमतं वाक्यं वेदाः । अशङ्क्य शङ्कव्यभिचारहेतुत्वे सति [13]वाक्यत्वात् । [14]अग्निमीळे (RV. I. i. 1) इत्यादि वाक्यवदित्यनुमानम्[15] ।।७८।।

अनेषधायैव जुहोति तातः किं मां कृशानौ न शरीरशेषाम् ।
ईष्टे तनूजन्मतनोः स नूनं मत्प्राणनाथस्तु नलस्तथापि ।।७९।।

अनैषधायेति[1] । यदि तातो मम पिता मामनैषधाय नलादन्यस्मै जुहोति ददाति । हु (।।58।।) दाने । ततो[2] मां शरीरशेषां प्राणरहितां कृशानौ वह्नौ किं न जुहोति न प्रक्षिपति । यतो नूनं स पिता [3]तनूजन्मनोऽपत्यस्य तनोः शरीरस्य केवलस्य ईष्टे ईशो भवति । अधीगर्थदयेशां कर्मणी (पा° II iii. 52) ति षष्ठी । तु पुनस्तथापि मम प्राणानां नाथो नल एव[4] ।।७९।।

तदेकदासीत्वपदादुदग्रे मदीप्सिते साधु विधित्सुना ते ।
अहेलिना किं नलिनी विधत्ते[1] सुधाकरेणाऽपि सुधाकरेण ।।८०।।

[2]बदकेदासीत्वेति । ते तव मम ईप्सिते नलावाप्तिलक्षणे विधित्सुना[3] विधातुमिच्छता कर्तुमिच्छता साधु युक्ता । किं भूते ? । तस्य नलस्य[4] एकं [5]दासीत्वं पदं नाम पर्यायोक्तेन भार्यात्वं तस्माद् उदग्रे अतिस्पृहणीये दुर्लभफले । अथवा तस्य नलस्य एकं[7] दासीत्वपदं तस्मादपि उदग्रे परिपूर्णे । यदि दासीत्वमपि लभे, तेनाऽप्युदग्रेऽविकले । यतो नलिनी कमलिनी सुधाया अमृतस्याऽऽकरेण निधानेनाऽपि सुधाकरेण चन्द्रेण[8] किं विधत्ते[9] करोति । अपि तु न किमपीति ।[10] किं

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

भूतेन ?। अहेलिनाऽऽदित्यव्यतिरिक्तेन। तस्याऽहेलिना श्रीसूर्येण सङ्गे आह्लादः[11] ॥८०॥

तदेकलुब्धे हृदि मेऽस्तु लब्धुं चिन्ता न चिन्तामणिमप्यनर्घ्यम्।
चित्ते ममैकः सकलत्रिलोकी सारो निधिः पद्ममुखः स एव ॥८१॥

[1]तदेकलुब्धे इति। मम हृदि [2]तस्मिन्नेकस्मिन्नेव नलविषये लुब्धे अनर्घ्यं [3]महार्हं चिन्तामणिमपि लब्धुं न चिन्ता मनोरथो नास्ति। यतो[4] मम[5] चित्ते स[6] एवैकः सकलायाः त्रिलोक्याः सारः[7] पद्ममुखो नलरूपो निधिर्वर्त्तते। पद्म इव पद्ममिव [8]वा मुखं यस्येति[9] पद्ममुखः पद्म-शब्दो[10] निधिवचनस्तु पुंलिङ्ग एव। तथा सारशब्दः उत्कर्षे पुंसि। [11]न्यायार्थादनपेते नपुंसकम् (सि. है. VII. i. 13)। नैतत्सारमिति। अथ च यदा पद्मो [12]मुखं यस्य स पद्ममुखो निधिर्लभ्यते तदा चिन्ता-मणिना किं कार्यम्[13] ॥८१॥

श्रुतः स दृष्टश्च[1] हरित्सु मोहाद् ध्यातः स नीरन्ध्रितबुद्धिधारम्।
ममाद्य तत्प्राप्तिरसुव्ययो वा हस्ते तवाऽऽस्ते द्वयमेकशेषः ॥८२॥

[2]श्रुतः स दृष्ट इति। स मयाः श्रुतः। तथा[3] हरित्सु दिक्षु[4] [5]मोहात् दृष्टः। तथा स मया नीरन्ध्रिता विजातीयप्रत्ययेनाऽव्यवहिता[6] बुद्धिधारा सजातीयप्रत्ययवाहो यत्र ध्याने तद्यथा भवत्येवं [7]ध्यातः। ततो ममाऽद्य[8] तस्य प्राप्तिः[9] असुव्ययो वा प्राणत्यागो[10] वा द्वयमपि तव हस्ते आस्ते। [11]त्वदायत्तम्। किंभूतं द्वयम्? एकशेषः [12]एकशेषो यत् एकं किञ्चिद् [13]उभयोर्मध्यात् शिष्यते। इतरत्[14] निवर्त्तते[15] ॥८२॥

सञ्चीयतामाश्रितपालनोत्थं मत्प्राणविश्राणनजं च पुण्यम्।
निवार्यतामार्य! वृथा विशङ्का भद्रेऽपि मुद्रेयमये! भृशं का ॥८३॥

[1]सञ्चीयतामिति। हे हंस! आश्रितस्य पालनात् उत्थ उत्थानं यस्य[2] तत्पुण्यं सञ्चीयताम्।[3] तथा मम प्राणानां विश्राणनाद्दानाज्जातं[4] पुण्यं[5] च सञ्चीयताम्। हे आर्य! वृथा मिथ्या विविधा शङ्का निवार्यताम्। अये इति सम्बोधने। भद्रेऽपि कल्याणेऽपि अर्थे भृशं तवेयं का मुद्रा[6]। यदिदं[7] कार्यं नाङ्गीकरोषि[8] ॥८३॥

अलं विलङ्घ्य प्रियविज्ञ! याच्ञां कृत्वाऽपि वाम्यं विविधं विधेये।
यशः पथादाश्रवतापदोत्थात् खलु स्खलित्वास्तखलोक्तिखेलात् ॥८४॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

अलं[1] विलङ्घ्येति । हे [2]प्रियविज्ञ ! [3]याञ्चां[4] विलङ्घ्यालम् । [5]मम याञ्चा त्वया न विलङ्घनीया । तथा मम विधेये [6]कृत्ये कार्ये विविधं वाम्यं प्रातिकूल्यं विपरीतत्वं कृत्वापि[8] अलम् ।[9] [10]तदपि न कार्यम् । किं [11]भूतात् ? । यशः पथात् । स्खलित्वा खलु पूर्यताम् । किं भूतात् ? । अस्तः खलोक्तेः दुर्जनवचनस्य खेलः क्रीड़ा यत्र तस्मात्तथा । यस्मिन् कीर्तिमार्गे दुर्जनवचनानां प्रवेशो नास्ति, एवं विधान्मार्गात् मा [12]स्खलनं [13]तव भवतु । किं भूतात् ? । आश्रवता [14]वचनकारिता तदेव पदं तदुत्थितात् । हंसेन दमयन्त्या वचनं कृतमिति कीर्तिस्तव[15] भविष्यति[16] ।।८४।।

स्वजीवमप्यार्तमुदे ददद्भ्यस्तव त्रपा नेदृशबद्धमुष्टेः ।
मह्यं मदीयान्यदसूनदित्सोर्धर्मः कराद्भ्रश्यति कीर्तिधौतः ।।८५।।

[1]स्वजीवमपीति । तव ईदृशबद्धमुष्टेः कृपणस्य आर्तानां मुदे [2]हर्षार्थं [3]स्वं जीवं जीवितमपि[4] दददभ्यः पुरुषेभ्यः सकाशात् न त्रपा न[5] लज्जा । यत् तव करात् कीर्त्या धौतो धर्मो[6] भ्रश्यति । किं भूतस्य तव[7] ? । मदीयान् असून्[8] प्राणान् मह्यमेवाऽदित्सोः[9] अदातु-मिच्छोः[10] ।।८५।।

दत्वाऽऽत्मजीवं त्वयि जीवदेऽपि शुध्यामि जीवाधिकदे तु केन ।
विधेहि तन्मां त्वदृणान्यशोद्धुममुद्रदारिद्रसमुद्रमग्नाम् ।।८६।।

[1]दत्वाऽऽत्मजीवमिति । हे हंस ! अहं [2]त्वयि जीवदेऽपि प्राण-प्रदायकेऽपि आत्मजीवं दत्त्वा आत्मप्राणान् दत्त्वा शुध्यामि । जीवादधिको नलः तस्य दायके[3] त्वयि तु पुनः केन शुध्यामि । त्वां प्रति केन [4]आनण्यं गच्छामि तत् त्वं मा तव ऋणानि [5]अशोद्धुम् अमुद्रे दारिद्रसमुद्रे मग्नां विधेहि । नलप्रदानऋणं शोधयितुं न शक्नो-मीत्यर्थः[6] ।।८६।।

क्रीणीष्व मज्जीवितमेव पण्यमन्यन्न चेदस्ति तदस्तु पुण्यम् ।
जीवेशदातर्यदि ते न दातुं यशोऽपि तावत्प्रभवामि गातुम् ।।८७।।

[1]क्रीणीष्वेति । हे जीवेशदातः ! मज्जीवितमेव पण्यं क्रीणीष्व स्वीकुरु । [2]इदं जीवितं त्वदधीनमित्यर्थः ।[3] अन्यन्न[4] । जीवि-तादधिकस्य वस्तुनोऽभावात् । ननु यो [5]जीवितश्येशं ददाति तस्य

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

न्यूनत्वाज्जीवितं विनिमेयं न भवति इत्याह । अस्ति चेद्वस्त्वन्तरं तर्हि पुण्यमस्तु । [6]इष्टार्थिनश्चेदिष्टं[7] तवापेक्षितं, तर्हि ते तव यदि जीवतेशसमं वस्त्वन्तरं दातुं न प्रभवामि । तथा विषस्याऽभावात्[8] तथापि तावत् यशोऽपि गातुं प्रभवामि । यशोगानमिष्टं[9] भविष्यतीत्यर्थः ।।

अथवा हे हंस! त्वं मम जीवितमेव पण्यं[10] क्रीणीष्व विसाधय । चेत्[11] यदि अन्यद्दातव्यं[12] नास्ति तत्पुण्यमस्तु । ननु पुण्यं परलोकफलम्[13] इह लोके किमपि नास्तीत्याशङ्क्याऽऽह—हे जीवेशदातः[14] ! यद्यहं ते तुभ्यं[15] दातुं न प्रभवामि । किमपि दातुं न शक्नोमि । [16]तावत् तर्हि यशोऽपि गातुं प्रभवामि । तव कीर्तिमपि गातुं किं न प्रभवामि । [17]किमपि दातुं न शक्नोमि, तर्हि यशोऽपि गातुं न[18] प्रभवामि । तव[19] कीर्तिमपि गातुं न प्रभवामि किम् ? । यः किल जीवितेशं नलं ददाति तस्य [20]किं यशोगानव्यतिरेकेण दीयते ? ।[21] ।।८७।।

वराटिकोपक्रिययाऽपि लभ्यान्नेभ्याः कृतज्ञानथवाऽऽद्रियन्ते ।
प्राणैः पणैः स्वं निपुणं भणन्तः क्रीणन्ति तानेव तु हन्त सन्तः ।८८।।

[1]वराटिकेति । अथवा [2]इभ्याः धनवन्तः कृतज्ञान् पुरुषान्नाऽऽप्रियन्ते नाङ्गीकुर्वन्ति । किं विशिष्टान् ? । वराटिका कपर्द्दिका तस्या उपक्रिययाऽपि लभ्यात् । हन्त अहो सन्तः सत्पुरुषाः[3] तु पुनस्तानेव कृतज्ञान् क्रीणन्ति । कैः । स्वैः प्राणैः [4]पणैः । किं कुर्वन्तः ? । स्वमात्मानं[5] निपुणं भणन्तः अस्माभिः रुचिरं विसाधनकं लब्धमिति[6] ।।८८।।

स भूभृदष्टावपि लोकपालास्तैर्मे तदेकाग्रधियः प्रसेदे ।
न हीतरस्माद् घटते यदेत्य स्वयं तदाप्ति प्रतिभूर्ममाभूः ।।८९।।

[1]स भूभृदिति । स भूभृन्नलः अष्टावपि लोकपालाः तेषां अंशः तैर्लोकपालैः मे मम प्रसेदे प्रसन्नैर्जातम् । किं भूतायाः ?। तस्मिन्नले एकाग्रा धीर्यस्याः तस्याः[2] तथा । इतरस्मादन्यथा तेषामप्रसन्नत्वे[3] इति न घटते ।[4] हि यत्त्व[5] मेत्याऽऽगत्य स्वयं मम तस्याप्तये प्राप्त्यर्थं प्रतिभूरभूः[7] ।।८९।।

अकाण्डमेवाऽऽत्मभुवार्जितस्य भूत्वाऽपि मूलं मयि वीरणस्य ।
भवान्न मे किं नलदत्वमेत्य कर्त्ता हृदश्चन्दनलेपकृत्यम् ।।९०।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]अकाण्डमेवेति । भवान्मे[2] मम नल[3] दत्वमेत्य नलदातृत्वं प्राप्य चन्दनलेपस्य कृत्यं तापोपशान्तिलक्षणं किं न कर्त्ता । कस्य ? । हृदः हृदयस्य । किं कृत्वा[4] ? । मयि [5]विषये रणस्य रणरण[6]कस्य औत्सुक्यस्य मूलं भूत्वा । किं भूतो भवान् ? । विः पक्षी । किं भूतस्य ? । अकाण्डमेव अकालमेव [7]आत्मभुवा कामेनार्जितस्य । अपिशब्दो विरोधे । यः किल आत्मीयया भुवा अर्जितस्य वीरणस्य तृणविशेषस्य[8] मूलं भवति, स[9] कथं[10] नलदत्वं [11]सल्लकीत्वं प्राप्य हृदये चन्दनलेप-कृत्यं [12]करोति ।[13] उशीरं वीरणीमूलं च शीतत्वात्[14] प्रायेण तापं शमयति । तदपि काण्डेन पर्वणा रहितं, भुवि उद्गतं च भवति । मूलं किल सकलमेव काण्डरहितं भवति ।।६०।।

अलं विलम्ब्य त्वरितुं हि वेला कार्ये किल स्थैर्यसहे विचारः ।
गुरूपदेशं प्रतिभेव तीक्ष्णा[1] प्रतीक्षते जातु न कालमर्तिः ।।६१।।

[2]अलं विलम्ब्येति । हे हंस ! विलम्ब्य अलं पूर्यताम् । हि[3] यस्मात्त्वरितुं वेला[4] किल स्थैर्यसहे विलम्बक्षमे कार्ये विचारः कर्तव्यः । तीक्ष्णा[5] [6]अर्तिर्व्यथा[7] जातु कदाचिदपि कालं न प्रतीक्षते । का इव ? । प्रतिभा इव । यथा तीक्ष्णा प्रतिभा गुरुणामुपदेशं न[8] प्रतीक्षते । स्वयं जानाति[9] ।।६१।।

अभ्यर्थनीयः स गतेन राजा त्वया न शुद्धान्तगतो मदर्थम् ।
प्रियास्यदाक्षिण्यबलात्कृतो हि तदोदयेदन्यवधूनिषेधः ।।६२।।

[1]अभ्यर्थनीय इति । त्वया स नलो राजा शुद्धान्तगतोऽन्तः पुरगतो मदर्थं नाभ्यर्थनीयः । किं भूतेन ? । तत्र गतेन । तदा हि[2] प्रियाया अन्तःपुर्याः आस्यदाक्षिण्यं मुखदाक्षिण्यं तेन बलात्कृतोऽन्यस्याः वध्वा निषेध उदयेत्[3] ।।६२।।

शुद्धान्तसंभोगनितान्ततुष्टे न नैषधे कार्यमिदं निगाद्यम् ।
अपां हि तृप्ताय न वारिधारा स्वादुः सुगन्धिः स्वदते तुषारा ।।६३।।

[1]शुद्धान्तसंभोगेति । त्वया नैषधे शुद्धान्तस्य अन्तःपुरस्य संभोगेन नितान्ततुष्टे[2] तृप्ते सति इदं मदर्थप्रार्थनालक्षणं कार्यं न निगाद्यम् न वाच्यम् । हि यस्मादपां पानीयानां तृप्ताय पुरुषाय स्वादुरपि सुगन्धिश्च

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

वारिधारा [3]तुषारा शीतला च न स्वदते। अपामिति तृतीयार्थे षष्ठी[4] ।।६३।।

त्वया निधेया न गिरो मदर्थाः क्रुधा कदुष्णे हृदि नैषधस्य ।
पित्तेन दूने रसने सिताऽपि तिक्तायते हंसकुलावतंसः ।।६४।।

[1]त्वया निधेया इति हे हंस ! त्वया नैषधस्य हृदि[2] क्रुधा कदुष्णे ईषदुष्णे मदर्था गिरो न निधेयाः।[3] यतः हे हंसवधूनां वतंस ! हंसकुलस्यावतंस ! मुकुटभूत ! पित्तेन दूने संतप्ते रसने जिह्वेन्द्रिये सिता शर्कराऽपि तिक्तायते कटुर्भवति[4] ।।६४।।

धरातुराषाहि मदर्थयाञ्चा कार्या न कार्यान्तरचुम्बिचित्ते ।
तदार्थितस्याऽनवबोधनिद्रा बिभर्त्यवज्ञाचरणस्य मुद्राम् ।।६५।।

[1]धरातुराषाहीति । त्वया धरायाः [2]तुराषाहि इन्द्रे नले कार्यान्तरं चुम्बति चित्तं यस्य[3] तस्मिन् तथा । व्यग्रे सति मदर्थं याञ्चा न कार्या । तदा अर्थितस्य प्रार्थितस्य अनवबोधोऽप्रतिपत्तिः सैव निद्रा अवज्ञा-चरणस्य मुद्रां बिभर्ति । स व्यग्रत्वात् कार्यार्थं [4]नाऽत्रबुद्धयते । अन्ये इति जानन्ति यदयमवज्ञां कुरुते[5] ।।६५।।

विज्ञेन विज्ञाप्यमिदं नरेन्द्रे तस्मात्त्वयाऽस्मिन् समयं निरीक्ष्य ।
आत्यन्तिकासिद्धि विलम्बिसिद्धयोः काऽऽर्यस्य कार्यस्य शुभा विभाति ।।६६।।

विज्ञेन [1]विज्ञाप्यमिति । तस्मात् [2]कारणात् त्वया विज्ञेन विशेष-विदा [3]अस्मिन्नरेन्द्रे समयं प्रस्तावं निरीक्ष्य[4] इदं कार्यं विज्ञाप्यं वक्तव्यम् ।[5] यतः कार्यस्य एका आत्यन्तिकी[6] निश्चिता असिद्धिः । अपरा विलम्बेन सिद्धिः तयोर्द्वयोः सिद्धयसिद्धयोः मध्यात् आर्यस्य तव हंसस्य[7] का शुभा विभाति । असिद्धेः पार्श्वात् विलम्बेनाऽपि सिद्धि[8] भव्या[9] ।।६६।।

इत्युक्तवत्या यदलोपि लज्जा साऽनौचिती चेतसि नश्चकास्तु ।
स्मरस्तु साक्षी तददोषतायामुन्माद्य यस्तत्तदवीवदत्ताम् ।।६७।।

[1]इत्युक्तवत्येति । [2]तया इति पूर्वोक्तमुक्तवत्या [3]सत्या यत् लज्जा अलोपि त्यक्ता सा निर्लज्जतालक्षण्य अनौचिती नोऽस्माकं चेतसि चकास्तु प्रतिभासताम् । तु पुनः तस्याः अदोषतायां स्मर एव साक्षी [4]यस्तां

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

दमयन्तीमुन्माद्य विह्वलीकृत्य [5]तत्-तत् निर्लज्जवाक्यादिकं [6]अवीवदत् वादयामास[7] । तस्मान्निर्दोषा सा[8] ।।९७।।

उन्मत्तमासाद्य हरः स्मरश्च द्वावप्यसीमां मुदमुद्वहेते ।
पूर्वः परस्पर्द्धितया प्रसूनं नूनं द्वितीयो विरहाधिदूनम् ।।९८।।

[1]उन्मत्तमासाद्येति । उन्मत्तम् आसाद्य हरः श्रीमहादेवः स्मरः कामश्च द्वावपि असीमां मुदं हर्षमुद्वहेते । तयोर्मध्यात् पूर्वः प्रसूनं[2] धत्तूरकं [3]प्राप्य हरस्य धत्तूरकं प्रियम् । नूनं द्वितीयः कामः विरहस्य आधिभिर्दूनं पीडितमुन्मत्तं पुरुषं[4] प्राप्य मुदं वहति । कया ? । परेण सह शत्रुणा सह स्पर्द्धितया परस्परसङ्घर्षेण द्वावपि उन्मत्तं[5] प्राप्य नूनं हर्षं वहतः[6] ९८।।

तथाभिधात्रीमथ राजपुत्रीं निर्णीय तां नैषधबद्धरागाम् ।
अमोचि चञ्चूपुटमौनमुद्रा विहायसाऽनेन विहस्य भूयः ।।९९।।

[1]तथाभिधात्रीमिति । [2]अथ अनेन विहायसा[3] पक्षिणा विहस्य भूयः चञ्चूपुटस्य मौनमुद्रा अमोचि त्यक्ता[4] उक्तम् ।[5] किं कृत्वा ? । [6]तां राजपुत्रीं तथा पूर्वप्रकारेण अभिधात्री मुक्तवतीं सतीं नैषधे[7] बद्धरागां[8] बद्धानुरागां निर्णीय निश्चित्य[9] ।।९९।।

इदं यदि क्ष्मापतिपुत्रि ! तत्त्वं पश्यामि तन्न स्वविधेयमस्मिन् ।
त्वामुच्चकैस्तापयता नृपं च पञ्चेषुणैवाऽजनि योजनेयम् ।।१००।।

[1] इदं यदीति । हे क्ष्मापतिपुत्रि ! यदि इदं तव पूर्वोक्तं [2]तत्त्वं तथ्यं सत्यं तदहमस्मिन्नर्थे स्वस्याऽऽत्मनः किमपि विधेयं कर्त्तव्यं न पश्यामि । यत[4] इयं युवयोः योजना संयोगः पञ्चेषुणा[5] कामेनैव अजनि कृता । किं कुर्वता ? । त्वां च नृपं च [6]नलम् उच्चकैरत्यर्थं तापयता[7] ।।१००।।

त्वद्बद्धबुद्धेर्बहिरिन्द्रियाणां तस्योपवासव्रतिनां तपोभिः ।
त्वामद्य लब्ध्वामृततृप्तिभाजां स्वदेवभूयं चरितार्थमस्तु ।।१०१।।

[1]त्वद्बद्धबुद्धेरिति । हे भैमि ! तस्य नलस्य बहिरिन्द्रियाणां बाह्यानां चक्षुरादीनां स्वस्य[2] आत्मनो देवभूयं देवत्वभवनम् अद्य

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

चरितार्थमस्तु । किं भूतस्य ? । त्वयि दमयन्त्यां बद्धबुद्धेः त्वद्भूतान्तः[3] करणस्य । किं भूतानाम् ? । तपोभिः कृत्वा[4] उपवासव्रतिनाम् । इन्द्रियाणां[5] हि भोजनं शब्दादिविषयोपभोगः । त्वद्गतचित्तत्वात् भोगाभावे तेषामुपवासव्रतम् । पुनः किं भूतानाम्[6] ? । [7]त्वां लब्ध्वा अमृतवत्[8] तृप्तिं भजन्ते तेषां तथा । तेषां[9] विषयत्याग एव तपः । तथा च विष्णुपुराणम्-देवा वैकारिका दश (I. ii. 46) तस्य व्याख्यानम्-देवा द्योतनशीलाश्चक्षुरादयः त्रिविधादहङ्कारात् [10]इन्द्रियाधिष्ठात्रीणां देवतानाम् इन्द्रियाणां [11]भूतसूक्ष्माणां च सृष्टिः । सात्विकात् इन्द्रियाधिष्ठात्रीणां देवतानां दशानां सृष्टिः । देवता[12] यथा-चक्षुषः सूर्यः, श्रोत्रस्य[13] दिशः, पादयोः [11]पृथिवी पायोर्मित्रः ।[15] । एवं[16] कर्मेन्द्रियाणामपि[17] अधिष्ठात्रीसम्बन्धात् देवत्वम् । इन्द्रिययोगाच्च तस्य वैकारिका इति नाम । राजसात् चक्षुरादीनां सृष्टिः । स तैजसः । तामसात् भूतसूक्ष्माणां [18]शब्दादीनां सिद्धिः । स भूतादिसंज्ञः । देवा अपि उपवासैः तपसा च देवत्वं प्राप्य अमृततृप्तिं भजन्ते[19] ।।१०१।।

तुल्यावयोर्मूर्तिरभून्मदीया दग्धा परं साऽस्य न ताप्यतेऽपि ।
इत्यभ्यसूयन्निव देहतापं तस्याऽतनुस्त्वद्विरहाद्विधत्ते ।।१०२।।

[1]तुल्योवयोरिति । अतनुः कामः तस्य नलस्य देहतापं तव विरहात् विधत्ते [2]तनोति । इति कारणात् अभ्यसूयन्निव असहमान इव । इतीति किम्[3] ? । पूर्वमावयोः मम नलस्य च उभयोरपि मूर्तिः सौन्दर्येण तुल्या समानाऽभूत्[4] । तदनु मदीया मूर्तिः महेश्वरेण दग्धा परं पुनरस्य नलस्य सा मूर्तिः ताप्यतेऽपि न[5], तप्ताऽपि न भवति । इति तापं विधत्ते[6] ।।१०२।।

लिपिं दृशा भित्तिविभूषणं त्वां नृपः पिबन्नादरनिर्निमेषः ।
चक्षुर्भ्रमैरर्पितमात्मचक्षूरागं स धत्ते रचितं त्वया नु ।।१०३।।

[1]लिपिं दृशेति । इदानीं क्रमेण विरहि(णो)या[2] दश[3] स्मरदशाः नयनप्रीतिः[4] प्रथमं चित्तासङ्गास्ततोऽथ सङ्कल्पः । निद्राच्छेदस्तनुता [5]बाष्पाणि तथा प्रलापश्च । उन्मादो मूर्छा मृतिरित्येताः स्मरदशाः दशैव स्युः । इत्याद्यास्ता दर्शयति । चतुर्थपादे[6] [7]विषयनिवृत्तिस्त्रपानाश इति शास्त्रान्तरे पाठः ।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

नृपो नलः हे दमयन्ति ! भित्तेर्विभूषणभूतां त्वां [8]लिपि चित्रलिखितां दृशा आदरेण निर्निमेषः सन् पिबन् एकदृष्ट्या[9] सादरमवलोकयन् आत्मनः चक्षुषि रागं रक्ततां धत्ते । किं भूतम्[10] ? । चक्षुषोर्झरैरश्रुप्रवाहैरर्पितम् । उत्प्रेक्षते-त्वया रचितमिव[11] । अत्यवलोकनादनिमिषतयाऽश्रुभिर्नयनानि रक्तानि भवन्ति । त्वयि सानुरागत्वात् त्वया कृतमिव । एतेन[12] नयनप्रीतिर्दशा[13] ।।१०३।।

पातुर्दृशालेख्यमयीं नृपस्य त्वामादरादस्तनिमीलयाऽऽस्ते ।
ममेदमित्यश्रुणि नेत्रवृत्तेः प्रीतेर्निमेषच्छिदया विवादः ।।१०४।।

[1]पातुर्दृशेति । अस्य नृपस्य अस्तनिमीलया निमेषरहितया दृशा [2]त्वामालेख्यमयीं चित्रलिखितां पातुरत्यर्थम्[3] अवलोकयतः सतः नेत्रेषु वृत्तेर्वर्तमानायाः [4]प्रीतेर्नयनप्रीतेर्दशाया [5]निमेषस्य छिदा [6]रहितता तया सह अश्रुणि बाष्पजलविषये विवाद आस्ते [7]विद्यते । कथम् ? । ममेदमिति नयनप्रीतिर्भणति । मदीयम् अश्रुं इदं मया कृतम्[8] । निमेषच्छिदा[9] भणति । इदमश्रुमदीयमिति । एतेन बाष्पप्रवृत्तिर्नाम[10] स्मरदशा । [11]या[12] चक्षुःप्रीते कार्यभूता अवान्तरदशोक्ता तस्या चक्षुप्रीतावन्तर्भावः[13] ।।१०४।।

त्वं हृद्गता भैमि ! बहिर्गताऽपि प्राणायिता नास्ति कयाऽस्य गत्या ।
न चित्तमाक्रामति तत्र चित्रमेतन्मनो यद्भवदेकवृत्ति ।।१०५।।

त्वं[1] हृद्गतेति । हे भैमि ! त्वमस्य नलस्य कया गत्या [2]प्राणा इव आचरिता नासि । अपि तु सर्वप्रकारैः प्राणायिता । किं भूता ? । बहिर्गताऽपि बाह्यस्थितापि[3] हृद्गता हृदि चिन्तया स्थिता । तत्रार्थे[4] चित्रम् आश्चर्यम् । [5]चित्तं मनः नाक्रामति यद्यस्माद् [6]एतस्य नलस्य[7] मनोभावत्यां त्वय्येव एकस्यां वृत्तिर्यस्य तत्तथा । [8]नाऽन्यत्र वर्तते । अथ च प्राणा[9] अपि नासिकया तथा आस्यस्य[10] मुखस्य गत्या च कृत्वा हृद्गताबहिर्गताश्च भवन्ति[11] । मुखनासिकासञ्चारी[12] प्राण इति । प्राणवायोर्लक्षणम्[13] । [14]एतेन चिन्ता नाम दशा उक्ता ।।१०५।।

अजस्रमारोहसि दूरदीर्घां सङ्कल्पसोपानतातिं तदीयाम् ।
श्वासान् स वर्षत्यधिकं पुनर्यद् ध्यानात्तव त्वन्मयतां तदाप्य ।।१०६।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]अजस्रमारोहसीति । हे भैमि ! त्वं तस्य नलस्य सम्बन्धिनीमजस्रमनवरतं [2]दूरमतिशयेन दीर्घामविच्छिन्नां सङ्कल्पततिरेव सोपानततिः तामारोहसि । स त्वामेव सङ्कल्पैः विकल्पयते । पुनर्यत्स नलोऽधिकं श्वासान् वर्षति निःश्वासान् मुञ्चति, तत्तव[3] ध्यानात्त्वन्मयतां त्वच्छरीरत्वमाप्य[4] प्राप्य[5] । यः किल सोपानरोहणं कुरुते, सोऽधिकं श्वासान् मुञ्चति । त्वं सोपानान्यारोहसि । स श्वसितीत्यसंङ्गतम् । परं निरन्तरं यत् [6]ध्यायते तन्मयता तस्य भवतीति श्रुतत्वात् स नलः [7]त्वामेव संवृत्तः । ततो युक्तम् । [8]एतेन सङ्कल्पदशोक्ता:[9] ।।१०६।।

हृत्तस्य यां मन्त्रयते रहस्त्वां तां व्यक्तमामन्त्रयते मुखं यत् ।
तद्वैरिपुष्पायुधमित्रचन्द्रसख्यौचिती सा खलु तन्मुखस्य ।।१०७।।

हृत्तस्य[1] यामिति । तस्य नलस्य हृत् हृदयं यां[2] त्वां रहः एकान्ते मन्त्रयते यादृशीं भवतीं चिन्तयति यत्[3] तत् सर्वं मुखं कर्तृ व्यक्तं सभामध्ये प्रकटम् आमन्त्रयते वदति[4] सम्बोधनादिना । सा तस्य [5]नलसम्बन्धिमुखस्य तस्य [6]नलस्य वैरी यः पुष्पायुधः कामः तस्य मित्रं चन्द्रः तेन सह यत् सख्यं[7] मैत्री सादृश्यम्, मैत्री वदनस्य तस्य औचिती योग्यता किमु । कथमियं वर्तते । काम्यस्य वैरी नलः कामस्य मित्रमित्रं नलवदनं नलेन रहो यन्मन्त्रितं किमपि तत् प्रकटयतीत्युचितमेव मन्त्रभेदं कुरुते । यत् एतेन प्रलापदशा[8] ।।१०७।।

स्थितस्य रात्रावधिशय्य शय्यां मोहे मनस्तस्य निमज्जयन्ती ।
आलिङ्ग्य या चुम्बति लोचने सा निद्राऽधुना न त्वदृतेऽङ्गनावा ।।१०८।।

स्थितस्य[1] रात्राविति । अधुना तस्य [2]त्वदृते त्वां विना सा निद्रा वाऽङ्गना कामिनी वा सा काचिन्नाऽस्ति । या रात्रौ शय्यां शयनीयमधिशय्य आश्रित्य स्थितस्य नलस्य मनो मोहेऽज्ञाने निमज्जयन्ती सती लोचने नयनद्वयमालिङ्ग्य चुम्बति । दयिताप्यालिङ्गनपुरःसरं लोचने चुम्बति । शय्यामिति कर्मभूताधारः[3] [4]निद्राच्छेदो[5] नाम[6] विषयनिवृत्तिश्च स्मरदशा[7] अत्रविकल्पोऽलङ्कारः । यदुक्तम्-तुल्यबलविरोधो विकल्पः (अलं. सं. 65) ।।१०८।।

स्मरेण निस्तक्ष्य वृथैव बाणैर्लावण्यशेषां कृशतामनायि ।
अनङ्गतामप्ययमाप्यमानः स्पर्धां न सार्धं विजहाति तेन ।।१०९।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

स्मरेण[1] निस्तक्ष्येति । अयं स्मरेण बाणैः निस्तक्ष्य[2] तनूकृत्य तथा[3] लावण्यमेव शेषं[4] यस्याः तां तथाविधां कृशतामनायि प्रापितः । यथा [5]अयमनङ्गताम् [6]आप्यमानोऽपि प्राप्यमानोऽपि तेन सार्धं[7] स्पर्धां न जहाति । प्रथमं [8]सौन्दर्यस्पर्द्धाऽभूत् । पश्चादनङ्गत्वेऽपि तथैव स्पर्धते । [9]एतेन निद्रामलभमानस्य शरीरकार्श्यं तनुता नाम दशा[10] ।।१०९।।

त्वत्प्रापकात् त्रस्यति नैनसोऽपि त्वय्येष दास्येऽपि न लज्जते यत् ।
स्मरेण बाणैरतितक्ष्य तीक्ष्णैर्लूनः स्वभावोऽपि कियान् किमस्य ।।११०।।

[1]त्वत्प्रापकादिति । एष तव प्रापकात् एनसः पापात्[2] अपि न त्रस्यते । पातकमपि कृत्वा त्वामर्थयते । यच्च[3] त्वयि विषये दास्येऽपि[4] दासत्वेऽपि न लज्जते च । ततः किमस्य कियान् स्वभावोऽपि स्मरेण तीक्ष्णैर्बाणैः अतितक्ष्य लूनः छिन्नः[5] ।।११०।।

स्मारं ज्वरं घोरमपत्रपिष्णोः सिद्धागदङ्कारचये चिकित्सौ ।
निदानमौनादविशद्विशाला साङ्क्रामिकी तस्य रुजेव लज्जा ।।१११।।

स्मारं ज्वरमिति । तस्य नलस्य[2] लज्जा सिद्धौषधप्रयोक्तरि अथ[3] सिद्धानां देवानाम् अगदङ्कारचये वैद्यानां समूहेऽविशत् प्रविष्टा इव । किं भूते ? । तस्य स्मरसम्बन्धिनं ज्वरं चिकित्सौ प्रतिकर्तुमिच्छौ । किं भूतम् ? । घोरम् । तस्य किं भूतस्य ? । अपत्रपिष्णोः लज्जापरस्य[4] । कस्मात् ? । निदानविषये मौनात् तूष्णीभावात् ।[6] निदानं पृष्टाःसन्तः वैद्या लज्जया[7] कामज्वरोऽयमिति कारणं [8]कथयितुमशक्ता मौनमेव कुर्वन्ति[9] । राजाऽपि[10] लज्जावशान्मौनमेव [11]कुरुते । किं भूता लज्जा ? ।[12] विशाला साङ्क्रामिकी रुजा इव रोग इव । यथा कुष्ठा [13]दिपामादिरुजा सङ्क्रामति तथा लज्जाऽपि[14] किं नलात् वैद्येषु सङ्क्रान्तेत्यर्थः ।[16] अत्रापि त्रपानाशः[17] ।।१११।।

बिभेति रुष्टासि किलेत्यकस्मात् स त्वां किलापेति हसत्यकाण्डे ।
यान्तीमिव त्वामनु यात्यहेतोरुक्तस्त्वयेव प्रतिवक्ति मोघम् ।।११२।।

बिभेति[1] रुष्टेति । स राजा इति अकस्मात् [2]निष्कारणं बिभेति । [3]इतीति किम् ? । त्वं किल रुष्टासि । यथा त्वयि दमयन्त्यां रुष्टायां बिभेदि । तथा स[4] त्वां किलाप प्राप इति कृत्वा अकाण्डे अप्रस्तावे हसति । स त्वां यान्तीमिव क्वापि[5] गच्छन्तीमिव अनु पश्चाद्याति ।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[6]परमहेतोः कारणं विनापि तथा स मोघं निष्फलम्[7] आकाशे एव प्रतिवक्ति उत्तरं दत्ते । उत्प्रेक्षते-त्वया उक्त इव[8] । उन्मादो नाम दशा । [9]यस्मात् प्रणष्टलज्जस्य निर्भयस्य चोन्मादः प्रवर्तते [10]अकस्मात् अहेतोः[11] अकाण्डे मोघम् इति नवीकृतम्[12] ।।११२।।

भवद्वियोगाच्छिदुरार्तिधारायमस्वसुर्मज्जति निःशरण्यः ।
मूर्छामयद्वीपमहान्ध्यपङ्के हा हा महीभृत्कुलकुञ्जरोऽयम् ।।११३।।

[1]भवद्वियोगेति । हा हा इति खेदे । अयं नलो[2] महीभृत्कुले राजकुले[3] कुञ्जरः प्रधानभूतो [4]महीभृद्भटकुञ्जर इति पाठे वृन्दारकनागकुञ्जरैः पूज्यमानम् (पा॰ II. i. 62) इति समासः । निःशरण्यः सन् मूर्च्छामयं यद्द्वीपं जलमध्यगतस्थलं तत्र महदान्ध्यम् अन्धत्वं [6]मूढत्वं तदेव पङ्कस्तत्र मज्जति कस्याः ? । नद्या द्वीपे भवत्याः[7] तव वियोगेन या अच्छिदुरा अविच्छिन्ना अर्तिधारा बाधापरम्परा सैव यमस्वसा यमुना तस्याः । [8]यथा कुञ्जरो नदीद्वीपपङ्केऽशरणो[9] मज्जति । ततः[10] कष्टं द्रष्टुर्भवति ।[11] एतेनोन्मादानन्तरभूता अस्पष्टसंज्ञतारूपा [12]मूर्च्छा दशा[13] ।।११३।।

सव्यापसव्यत्यजनाद्द्विरुक्तैः पञ्चेषुबाणैः पृथगर्जितासु ।
दशासु शेषा खलु तद्दशा या तया नभः पुष्पतु कोरकेण ।।११४।।

[1]सव्यापसव्येति । या दशसु[2] दशासु मध्ये शेषा[3] अवशिष्टा दशमी[4] मरणरूपा तस्य दशा अवस्था वर्तते[5] तया दशया कोरकेण कुड्मलेन नभः आकाशं पुष्पतु विकसतु । [6]आकाशकुसुमानामभावात् । लक्षणया अत्यन्ताभावो भवतु । सा दशा मा भवतु । [7]खलु इत्यहं मन्ये । किं भूतासु[8] ? । पञ्चेषोः कामस्य बाणैः पृथक् अर्जितासु कृतासु । किं भूतैः ? । सव्येनाऽपसव्येन च वामदक्षिण[9] पक्षाभ्यां त्यजनात् द्विरुक्तैः-द्विभावं प्राप्तैः । पञ्च बाणाः यदा उभयथा क्षिप्यन्ते[10] तदा दश भवन्ति[11] ।।११४।।

त्वयि स्मराधेः सततास्मितेन प्रस्थापितो भूमिभृताऽस्मितेन ।
आगत्य भूतः सफलो भवत्या भावप्रतीत्या गुणलोभवत्याः ।।११५।।

त्वयि[1] स्मराधेरिति । अहं तेन [2]भूमिभृता नलेन त्वयि विषये प्रस्थापितोऽस्मि । किं भूतेन ? । स्मरस्याऽऽधेः सकाशात्सततमस्मितेन

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

स्मितरहितेन। ततोऽहं भवत्यास्तव भावस्य अभिप्रायस्य प्रतीत्या [3]अत्र आगत्य सफलो भूतः सञ्जातः[4]। किं भूतायास्तव ? । गुणेषुः लोभवत्याः[5] ।।११५।।

धन्याऽसि वैदर्भि ! गुणैरुदारैर्यया समाकृष्यत नैषधोऽपि ।
इतः स्तुतिः का खलु चन्द्रिकाया[1] यदब्धिमप्युत्तरलीकरोति ।।११६।।

[2]धन्यासीति। हे वैदर्भि ! [3]त्वं धन्याऽसि [4]यया गुणैः [5]सौन्दर्यादिभिरुदारैः [6]उत्कृष्टैः नैषधो नलोऽपि[7] समाकृष्यत। खलु यस्मादितोऽतोऽधिका का[8] चन्द्रिकायाः ज्योत्स्नायाः स्तुतिः यत् सा ज्योत्स्ना अब्धि [9]समुद्रमप्युत्तरलीकरोति[10] ।।११६।।

नलेन भायाः शशिना निशेव त्वया स भायान्निशया शशीव ।
पुनः पुनस्तद्युगयुग्विधाता योग्यामुपास्ते नु युवां युयुक्षुः ।।११७।।

नलेन[1] भाया इति। हे दमयन्ति ! त्वं नलेन[2] कृत्वा[3] भायाः शोभस्व[4]। यथा निशा शशिना [5]भासते, तथा त्वया स [6]नलो भायात् शोभताम्। यथा शशी चन्द्रः निशया रात्र्या भाति। नु इति वितर्के। विधाता ब्रह्मा युवां युयुक्षुः नलं च[7] त्वां च[8] योजयितुमिच्छुः सन् योग्यामभ्यासमुपास्ते। किं भूतः ? । पुनः-पुनः तद्युगं चन्द्रनिशायुग्मं युनक्ति। क्विप्प्रत्ययः। नित्यं–निन्यं[9] रात्रिं चन्द्रं[10] च योजयन्[11] विधियुर्वयोर्मेलना[12] याभ्यासं विधत्ते किम्[13] ? ।।११७।।

स्तनद्वये तन्वि ! परं तवैव पृथौ यदि प्राप्स्यति नैषधस्य ।
अनन्यवैदग्ध्यविवर्धिनीनां पत्रावलीनां वलना समाप्तिम् ।।११८।।

[1]स्तनद्वये इति। हे तन्वि ! तवैव[2] पृथौ विशाले स्तनद्वये परं केवलं नैषधस्य पत्रावलीनां पत्रवल्लीनां वलना रचना समाप्तिं यदि प्राप्स्यति यास्यति[3] तदा तवैव[4] स्तनयुगे नाऽन्यस्याः। किं भूतानाम् ? । [5]नाऽन्यस्य वैदग्ध्यं विवर्धयन्तीति[6]। किन्तु [7]नलस्यैव[8] ।।११८।।

एकः सुधांशुर्न कथञ्चन स्यात्तृप्तिक्षमस्त्वन्नयनद्वयस्य ।
त्वल्लोचनासेचनकस्तदस्तु नलास्यशीतद्युतिसद्वितीयः ।।११९।।

[1]एकः सुधांशुरिति। एकः सुधांशुश्चन्द्रः कथञ्चन [2]त्वदीयस्य नयनद्वयस्य तृप्तिक्षमो न स्यात्। एकेन द्वयोस्तृप्तिर्नभवति। ततश्चन्द्रो[3]

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

नलस्याऽऽस्यमेव शीतद्युतिः तेन सह द्वितीयः सन् तव लोचनयोरासेचनकोऽस्तु [4]अतृप्तिकरोस्तु। यदि नलमुखेन [5]सहितोऽभूत्। तथापि तव। विलोकयन्त्याः तृप्तिर्न भविष्यति। तमासेचनकं प्राहुस्तृप्तिर्यस्य न जायते (हला॰ II. 95)। यस्य स्वाद्यमानस्य वस्तुनः तृप्तिर्न जायते। किन्तु तृष्णा [6]वर्धते सोऽसेचनकः। तत्र[7] हि द्विधा व्याख्यानम्। [8]सिच्यते आपाद्यते सुभोजनेनाऽपि इति व्युत्पत्त्या तथा न सिच्यते। आपाद्यते दर्शनेन च व्युत्पत्त्या आसेचनको भक्षयिता भक्ष्यं च। कर्तरि सम्बन्धे[9] षष्ठी विधानात्। अतो हलायुधेन कर्तृप्रकरणपाठे[10] अपठितेऽपि आवृत्तिव्याख्या स्वीकृतम्। आसेचनकशब्दस्य आस्वाद्यकर्मविषयत्वमेवाऽत्र व्याख्येयम्। तथा चाऽमरदत्तः [11]तदासेचनकं तृप्तेर्नास्त्यन्तो यस्य दर्शनात् (III. i. 53) इत्याह। त्वल्लोचनासेचनकम् इत्यनूद्य चन्द्रं नलास्यशीतद्युतिसद्वितीयाऽस्तु इति विधेयमिति व्याख्या[12] ॥११६॥

अहो तपःकल्पतरुर्नलीयस्त्वत्पाणिजाग्रस्फुरदङ्कुरश्रीः।
त्वद्भ्रूयुगं यस्य खलु द्विपत्री तवाधरो रज्यति यत्कलम्बः ॥१२०॥

अहो[1] तप इति। अहो इत्याश्चर्ये। नलीयो नलसम्बन्धी तप[2] एव कल्पतरुः। किं भूतः?। त्वदीया[3] ये पाणिजा नखास्तेषामग्राणि तान्येव स्फुरन्तोऽङ्कुरास्तैः श्रीः शोभा यस्य स तथा। यस्य वृक्षस्य खलु त्वदीयं भ्रूयुगमेव द्विपत्री द्वयोः पत्रयोः समाहारः यस्य[4] तरोः [5]तवाऽधर ओष्ठ एव कलम्बो द्वितीयकाण्डप्ररोहो रज्यति ॥१२०॥

यस्ते नवः पल्लवितः कराभ्यां स्मितेन यः कोरकितस्तवाऽऽस्ते।
अङ्गाम्रदिम्ना तव पुष्पितो यः स्तनश्रिया यः फलितस्तवैव ॥१२१॥

यस्ते[1] नव इति। यो वृक्षो[2] नवस्ते[3] तव कराभ्यां पल्लवितः। यश्च तव स्मितेन कोरकितः आस्ते। यश्च तवाऽङ्गाम्रदिम्ना[4] सौकुमार्येण पुष्पितः। यश्च तव स्तनश्रिया फलितः। एवंविधस्त्वल्लक्षण[5] नलः[6] तपःकल्पपादपो रूपकेन निरूपितः[7] ॥१२१॥

कांसीकृताऽऽसीत्खलु मण्डलीन्दोः संसक्तरश्मिप्रकरा स्मरेण।
तुला च नाराचलता निजैव मिथोऽनुरागस्य समीकृतौ वाम् ॥१२२॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]कांसीकृतेति । खलु इत्यहं मन्ये । इन्दोर्मण्डलो स्मरेण कांसीकृता ग्रासीत् पात्ररूपा कृता[2] । किं भूता: ? । संसक्तो रश्मीनां [3]प्रकरो यत्र सा [4]तथा । तथा निजैव कामस्यैव नाराचलता तुला[5] ग्रासीत् । किमर्थम् ? । वां[6] युवयोर्मिथ: ग्रनुरागस्य समीकृतौ साम्यतोलननिमित्तम् ।[7] सूत्रादिवस्तुतोलनार्थं लोहमय्यां तुलायाम् एकस्मिन् पक्षे कांस्यपात्री सूत्ररश्मि:[8] प्रोता भवति[9] ।।१२२।।

[1]सत्त्वस्रुतस्वेदमधूत्थसान्द्रे तत्पाणिपद्मे मदनोत्सवेषु ।
लग्नोत्थितास्त्वत्कुचपत्रलेखास्तन्निर्गतास्तं प्रविशन्तु भूय: ।।१२३।।

[2]सत्त्वस्रुतेति । तस्य नलस्य पाणिपद्मे तव कुचसम्बन्धिन्य: पत्रलेखा: मदनोत्सवेषु लग्ना: [3]हस्तसंसक्ता ग्रत[4] उत्थिता: प्रतिबिम्बिता: सत्य: भूयस्तं हस्तं प्रविशन्तु[5] । किं भूते ? । सत्वात् सात्त्विकात् भावात् स्रुतं गलितं स्वेद एव मधूत्थं मकरन्द: तेन सान्द्रे क्लिन्ने । मधूत्थं मीणं[6] वा । किं [7]विशिष्टा: ? । [8]तस्मात्पाणे: सकाशात् निर्गता: । [9]तत्पाणिना कुचेषु[10] कृता: पत्रवल्लिका:[11] स्पर्शकाले स्वेदार्द्रे[12] तत्करे एव [13]लगिष्यन्तीत्यर्थ: । यन्निर्गता[14] इति पाठे यस्मात् करात् निर्गतास्तं[15] करं प्रविशन्तु । [16]यस्मादुत्पद्यते घट: तत्र मृत्तिकायामुपादानकारणे[17] लीयते[18] विनाशकाले[19] ।।१२३।।

बन्धाढ्यनानारतमल्लयुद्धप्रमोदितै: केलिवने मरुद्भि: ।
प्रसूनवृष्टिं पुनरुक्तमुक्तां प्रतीच्छतं भैमि ! युवां युवानौ ।।१२४।।

[1]बन्धाढ्येति । हे भैमि ! युवां युवानौ मरुद्भिर्वायुभि: केलिवने [2]क्रीडाकानने पुनरुक्तं वारंवारं[3] मुक्तां [4]प्रसूनवृष्टिं पुष्पवृष्टिं प्रतीच्छतं[5] पतन्तीं गृह्णीतम् । किं भूतै: ? । बन्धै: [6]भरतशास्त्रोक्तवात्स्यायनादिप्रणीतै:[7] करणविशेषैराढ्यं[8] कामशास्त्रोदिता: पङ्कजासनवेणुदारितादयो बन्धास्तै: प्रचुरं नानाविधं रतमेव मल्लयुद्धं तेन प्रमोदितै: तै:[9] वृक्षेभ्य: [10]पातिताम् । ग्रथ च युद्धप्रमोदिता मरुतो देवा द्वयोर्योद्ध्रोरुपरि[11] पुष्पवृष्टिं मुञ्चन्ति[12] । [13]युवतिश्च युवा च, पुमाँस्त्रिया (पा॰ I. ii. 27) इत्येकशेष:[14] ।।१२४।।

ग्रन्योन्यसङ्गमवशादधुना विभातां तस्याऽपि तेऽपि मनसो विकसद्विलासो ।
स्रष्टुं पुनर्मनसिजस्य तनुं प्रवृत्तमादाविव द्व्यणुककृत्परमाणुयुग्मम् ।।१२५।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]अन्योन्यसङ्गमेति । अधुनाऽन्योन्यसङ्गमवशात् तस्याऽपि नलस्य ते[2] तवापि उभयोरपि मनसी उभे अपि विभाताम् । किं भूते ? । विकसन्तो विलासा ययोस्ते तथा । उत्प्रेक्षते—परमाण्वो युग्मं[3] युगं द्वन्द्वमिव । किं भूतम् ? । आदौ [4]द्वचणुकक्कृत् । पुनः किं भूतम् ? । मनसिजस्य कामस्य तनुं[5] शरीरं पुनरपि स्रष्टुं प्रवृत्तम् । [6]द्वचणुकादि-सृष्टिः वैशेषिकाणाम् ईश्वरेच्छापूर्वकमदृष्टलक्षणप्राणिपूर्वकर्मवशात् निमित्तकारणात् परमाणुभ्यः पार्थिवाप्यतैजसवायवीयेभ्यः समवायि[7] कारणेभ्यः जगत [8]उत्पत्तिः । अदृष्टवशात् परमाणुद्वयसंयोगः[9] । ततो द्वचणुकं, ततो द्वचणुकत्रयसंयोगात्[10] त्र्यणुकम् । तत्संयोगात् [च] स्थूलस्थूलतरस्थूलतमत्वं क्रमेण । अणुपरिमाणं मनः । ततो द्वयोर्मनसोः परमाण्वोः संयोगात् कामोत्पादकं [द्वचणुकम्[11]] । ततो क्रमेण मनसिज-देहोत्पत्तिः[12] ।।१२५।।

कामः कौसुमचापदुर्जयममुं जेतुं नृपं त्वां धनु-
र्वल्लीमव्रणवंशजामधिगुणामासाद्य माद्यत्यसौ ।
ग्रीवालङ्कृतिपट्टसूत्रलतया पृष्ठे कियल्लम्बया
भ्राजिष्णुं कषरेखयेव [1]निवसत्सिन्दूरसौन्दर्यया ।।१२६।।

काम[2] इति । हे भैमि ! [3]असौ कामस्त्वां धनुर्वल्लीमासाद्य माद्यति ।[4] किं कर्तुम् ? । अमुं नृपं नलं जेतुम् । किं भूतम् ? । कौसुमेन चापेन दुर्जयम् । किं भूताम् ? । अव्रणे निर्दोषे[5] वंशे अन्वये[6] जाताम् । तथा अधिकागुणाः सौन्दर्यादयो यस्याः तां तथा । धनुरपि व्रणरहितवंशाद् भवति । ज्यामधिरूढं च । पुनः किं भूताम् ? । [7]ग्रीवायामलङ्कृतौ आभरणे विलग्ना या पट्टसूत्रलता दोरकलक्षणा तया भ्राजिष्णुं शोभमानाम् । किं भूतया[8] ? । पृष्ठभागे कियत् स्तोकं लम्बया[9] बन्धनावशेषदोरको हि पृष्ठदेशे[10] लम्बमानो भवति । उत्प्रेक्षते-कषस्य रेखयेव । किं भूतया ? ।[11] निवसता सिन्दूरेण सौन्दर्यं यस्याः । [12]धनुषो वंशस्य परीक्षा यदा क्रियते तदा सिन्दूररेखा वंशे क्रियते ।[13] पट्टसूत्रदोरकः[14] सिन्दूरसदृशो[15] भवति शार्दूलविक्रीडितं[16] वृत्तम् ।।१२६।।

त्वद्गुच्छावलिमौक्तिकानि गुलिकास्तं राजहंसं विभो-
र्वेध्यं विद्धि मनोभुवः स्वमपि तां मञ्जुं धनुर्मञ्जरीम् ।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

यन्नित्याङ्कनिवासलालिततमज्याभुज्यमानं लस-
न्नाभीमध्यबिला विलासमखिलं रोमालिरालम्बते ।।१२७।।

[1]त्वद्गुच्छावलीति । हे भैमि ! त्वदीया या गुच्छावलिः[2] हारलता तस्या मौक्तिकानि त्वं गुलिका विद्धि जानीहि । तथा तं राजहंसं नलं मनोभुवो वेध्यं लक्ष्यं विद्धि । त्वं स्वमप्यात्मानं धनुर्मञ्जरीं[3] विद्धि । किं भूताम् ? मञ्जुं मनोज्ञाम् । यस्या धनुर्मञ्जर्या नित्यमङ्के उत्सङ्गे निवासेन लालिततमा[4] स्फुरन्ती या ज्या मौर्वी तया भुज्यमानं[5] क्रियमाणं विलासमखिलं समग्रमपि रोमाली[6] रोमावलिरालम्बते । किं भूता ? । लसन्ती नाभी एव मध्ये बिलं यस्यां सा तथा । गोलकधनुर्वल्यां मौर्वीमध्ये पृथुलं गर्ताकारं बिलं[7] भवति । तत्र गोलिकां मुक्त्वा हंसादयः पक्षिणो लक्ष्यन्ते ।[8] त्वमेव धनुर्वल्ली तत्र रोमालीमौर्वी[9] तत्र नाभीलक्षणं बिलम्[10] ।।१२७।।

पुष्पेषुश्चिकुरेषु ते शरचयं त्वद्भालमूले धनू
रौद्रे चक्षुषि तज्जितस्तनुमनुभ्राष्ट्रं च यश्चिक्षिपे ।
निर्विद्याश्रयदाश्रमं स वितनुस्त्वां तज्जयायाऽधुना
पत्रालिस्त्वदुरोजशैलनिलया [1]तत्पर्णशालायते ।।१२८।।

[2]पुष्पेषुरिति । हे भैमि ! पुष्पेषुः ते तव चिकुरेषु केशेषु[3] शराणां चयं[4] चिक्षिपे निक्षेपं कृतवान् । केशेषु पुष्पाणि भवन्ति[5] । तव भालमूले[6] ललाटमूले स्वं[7] धनुः कामो निक्षिप्तवान् ।[8] ललाटस्य[9] मूलं धनुराकारं भवति । तथा कन्दर्पो रुद्रस्य तृतीयं चक्षुषि अनुभ्राष्ट्रं[10] भ्राष्ट्रस्याऽनुरूपं यथा भवति एवं स्वां तनुं शरीरं चिक्षिपे जुहाव । यतस्तेन नलेन जितः[11] स ततोऽनन्तरं निर्विद्य निर्वेदं कृत्वा [12]त्वामाश्रमम् आश्रयत् ।[13] यतो वितनुः शरीररहितः । किमर्थम् ? । तस्य नलस्य जयाय । अधुना[14] अन्योऽपि विरक्तः तपोर्थमाश्रमं भजते । अत एव तव उरोजद्वयमेव शैलः तन्निलया पत्रालिः पत्रवल्ली तस्य कामस्य पर्णशाला इवाचरति, सोऽपि पर्वते पत्रकुटीं[15] कृत्वा तपस्यति[16] ।।१२८।।

इत्यालपत्यथ पतत्रिणि तत्र भैमीं
सख्यश्चिरात्तदनुसन्धिपराः परीयुः ।
शर्मास्तु ते विसृज मामिति सोऽप्युदीर्य
वेगाज्जगाम निषधाधिपराजधानीम् ।।१२९।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]इत्यालपतीति । अथ[2] पतत्रिणि पक्षिणि[3] हंसे इत्यालपति सति सख्यः सर्वाः चिरात् तत्र[4] भैमीं[5] तां [6]परीयुः परितो व्यापुः । किं भूताः ? । तस्या दमयन्त्याः अनुसन्धानं वनमध्येऽवलोकनं[7] तत्पराः सत्यः । सोऽपि हंस [8]इत्युदीर्य वेगान्निषधाधिपस्य राजधानीं जगाम । [9]इतीति किम् ? । ते[10] तव शर्म सुखमस्तु । हे भैमि ! [11]मां विसृज त्वं प्रस्थापय[12] ।।१२९।।

चेतोजन्मशरप्रसूनमधुभिर्व्यामिश्रतामाश्रय-
त्प्रेयोदूतपतङ्गपुङ्गवगवीहैयङ्गवीनं रसात् ।
स्वादं स्वादमसीममृष्टसुरभि प्राप्ताऽपि तृप्तिं न सा
तापं प्राप नितान्तमन्तरतुलामानर्च्छ मूर्च्छामपि ।।१३०।।

[1]चेतोजन्मेति । सा दमयन्ती[2] नितान्तं तापं प्राप । अन्तर्मध्ये अतुलां मूर्च्छामपि आनर्च्छ प्राप[3] । किं भूता ? । प्रेयसो भर्तुः दूतस्य पतङ्गपुङ्गवस्य हंसस्य या गौर्वाणी [4]पतङ्गपुङ्गवगवी[5] सैव हैयङ्गवीनं [6]दुग्धदधिसारं तत्[7] रसात् अनुरागात् स्वादं स्वादम् आस्वाद्याऽऽस्वाद्य स्वदित्वा तृप्तिं न प्राप्ताऽपि सती अतृप्ताऽपि । किं भूतम् ? । असीम निरतिशयं[8] मृष्टं मधुरं सुरभि च प्रसिद्धम् । किं कुर्वत् ? । चेतोजन्मनः कामस्य शरा एव प्रसूनानि तेषां मधुभिर्मकरन्दैः व्यामिश्रितामाश्रयत् । यथा नलवार्तां शृणोति तथा कामशरैः पीड्यते[9] । अन्योऽपि यो मधुना मिश्रं हैयङ्गवीनं भक्षयति स उभयसंयोगे[10] उपविषतुल्य[11] त्वात्[12] मूर्च्छां तापं च प्राप्नोति, तृप्तेरभावेऽपि । गवीत्यत्र, गोरतद्धिताभिधेये (का. II. vi. 41·2) इति अदन्तता[13] । हैयङ्गवीनं संज्ञायामि (पा॰ V. ii. 23) ति निपतः[14] ।।१३०।।

तस्या [1]दृशाऽधिपतिबन्धुमनुव्रजन्त्या-
स्तं बाष्पवारि नचिरादवधी बभूव ।
पार्श्वेऽपि विप्रचकृषे यदनेन दृष्टे-
रारादपि व्यवदधे न तु चित्तवृत्तेः ।।१३१।।

तस्या[2] दृशेति । तस्या भैम्या दृशा दृष्टया अधिपतेर्भर्तुः बन्धुं हंसं[3] तमनुव्रजन्त्याः सत्याः [4]यदनेन हंसेन दृष्टेः पार्श्वेऽपि स्थिते न [5]दृष्टेर्विप्रचकृषे विप्रकृष्टेन न जातम्[6] । [7]बाष्पव्याकुलिता[8] दृष्टिर्न पश्यति । तथा आरादपि चित्तवृत्तेर्दूरेऽपि सता नचिरादेव बाष्पवारि

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

नयनजलमवधीबभूव[9]। नदीतीरे किलेष्टं बन्धुं विसर्जयेत्। [10]उक्तं च-नदीतीरे गवां गोष्ठे क्षीरवृक्षे जलाश्रये। आरामेषु च कूपादाविष्टं बन्धुं विसर्जयेत्॥ तथा चयमिच्छेत् पुनरायातं न तं दूरे विसर्जयेत्। [11]अनेन हंसेन तु पुनर्न व्यवदधे न व्यवहितेन जातम् तत्रस्थत्वात्[12] ॥१३१॥

अस्तित्वं कार्यसिद्धेः स्फुटमथ कथयन्पक्षयोः कम्पभेदै-
राख्याता वृत्तमेतन्निषधनरपतौ सर्वमेकः प्रतस्थे।
कान्तारे निर्गतासि प्रियसखि ! पदवी विस्मृता किं न मुग्धे !
मा रोदीरेहि यामेत्युपहृतवचसो निन्युरेनां[1] वयस्याः ॥१३२॥

[2]अस्तित्वमिति।[3] द्वयोर्मध्यादेको[4] हंसो निषधनरपतौ नलविषये[5] सर्वं वृत्तमाख्याता सन् सर्वं वृत्तान्तं कथयितुं प्रतस्थे।[6] तृन्प्रत्यये[7] निष्ठादित्वात्सर्वमिति कर्मषष्ठ्यभावः।[8] आचष्टे इत्येवंधर्मा। किं कुर्वन्?। पक्षयोः कम्पभेदैः कार्यसिद्धेरस्तित्वं स्फुटं कथयन्। शकुनशास्त्रे हि पक्षिणां चेष्टया कार्याणां सिद्धिरसिद्धिर्वा[10] ज्ञायते। वयस्याः सख्यः[11] एनामन्यां द्वितीयां दमयन्तीं निन्युः। किं भूताः?। इति तां प्रति उपहृतवचसः[12] उक्तवाक्याः। [13]इतीति किम्?। हे प्रियसखि ! त्वं कान्तारे वने एकाकिनी निर्गतासि। हे मुग्धे ! किं तु तव पदवी मार्गो विस्मृता। त्वं मा रोदीः[14] एह्यागच्छ। सर्वा अपि यामः[15] ॥१३२॥

सरसि नृपमपश्यद्यत्र तत्तीरभाजः
स्मरतरलमशोकानोक हृस्योपमूलम्।
किसलयदलतल्पम्लायिनं प्राप तं स
ज्वलदसमशरेषुस्पर्द्धिपुष्पर्द्धिमौलेः ॥१३३॥

[1]सरसीति। स हंसो यत्र यस्मिन् सरसितं नलमपश्यत्। तत्तीरभाजः तस्य सरसः तटे उद्भूतस्य[2] अशोकतरोरुपमूलं मूलसमीपे[3] तं नृपं[4] प्राप। किं भूतं नृपम्[5]?। स्मरेण तरलं व्याकुलम्। पुनः किं भूतम्?। किसलयदलतल्पं मृदुपल्लवमयीं[6] शय्यां[7] [8]म्लापयति [9]मर्मरीकरोतीत्येवंशीलस्तम्। किं भूतस्य?। अशोकानोकहस्य[10] ज्वलतो दीप्तान् असमशरस्य कामस्य[11] इषून् स्पर्द्धते इत्येवंशीला पुष्पर्द्धिमौलौ यस्य[12] तथा[13] ॥१३३॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

परवति ! दमयन्ति ! त्वां न किञ्चिद्वदामि
द्रुतमुपनम किं मामाह सा शंस हंस !
इति वदति नलेऽसौ तच्छशंसोपनम्रः
प्रियमनु सुकृतां हि स्वस्पृहाया विलम्बः ।।१३४।।

[1]परवतीति । असौ हंसः आकाशे एव नले इति वदति सति[2] उपनम्रः सन्[3] तत् सर्वं [4]शशंस । [5]इतीति किम् ? । हे [6]परवति ! [7]परतन्त्रे ! दमयन्ति ! अहं त्वां किञ्चिदपि न वदामि । हे हंस ! [8]द्रुतमुपनम आगच्छ, शंस कथय । सा दमयन्ती मां प्रति किमाह[9] । युक्तोऽयमर्थः । सुकृतां[10] साधूनां प्रियमर्थम् [11]अनुलक्ष्यीकृत्य स्वस्पृहाया एव विलम्बः । यावदिच्छां न कुर्वन्ति, तावदेव विलम्बः[12] ।।१३४।।

कथितमपि नरेन्द्रः शंसयामास हंसं
किमिति किमिति पृच्छन् भाषितं स प्रियायाः ।
अधिगतमथ सान्द्रानन्दमाध्वीकमन्तः
स्वयमपि शतकृत्वस्तत्तथान्वाचचक्षे ।।१३५।।

[1]कथितमपीति । नरेन्द्रो नलः प्रियायाः भैम्या भाषितं वचनं[2] कथितमपि हंसेन पुनरपि हंसं शंसयामास आख्यापयामास । हंसमिति शंसेः [3]शब्दकर्मकस्य इनन्तत्वात् कर्मत्वम् । किं कुर्वन् ? । किमिति किमिति कृत्वा हंसं पृच्छन् । अथाऽनन्तरं सान्द्रस्याऽऽनन्दस्याऽर्थे माध्वीकमंरेयसदृशम् । [4]अनेनाऽऽनन्दाङ्कृता । अन्तर्मध्ये अधिगतं विज्ञातार्थं तत् सत्[5] प्रियाभाषितं यथा हंसेनोक्तं तथैव शतकृत्वः शतं वारान् स्वयमात्मानाप्य[6] न्वाचचक्षेऽन्वकथयत्[7] ।।१३५।।

[1]श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
तार्तीयीकतया मितोऽयमगमत्तस्य प्रबन्धे महा-
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ।।१३६।।

[2]श्री हर्षमिति । तार्तीयीकतमा[3] तृत्तीयत्वेन मितः परिज्ञातः[4] ।।१३६।।

[1]श्रीमानालिगपण्डितः स्वसमयाविर्भूतसर्वाश्रम-
श्चाण्डूपण्डितसंज्ञितं प्रसुषुवे श्रोगौरिदेवी च यम् ।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

उक्ताख्ये क्रतुपुङ्गवे शिखिमुखे नानाहविर्निह्नुतैः
सन्तर्प्यं त्रिदशान् स एष विवृतिं सर्गे तृतीये व्यधात् ॥१॥

किमपि मुकुटरत्नं नागरश्रोत्रियाणां
प्रतिनिधिरिव तेजः सद्मनः पद्मयोनेः ।
विधुरुपशमसिन्धोरालिगो नाम धीमा-
निह समजनि पत्नी गौरिदेवीति चास्य ॥२॥

क्लृप्तैर्यथा स्वसमयं पशुबन्धचातुर्मास्याध्वराग्रयणसोमसुखैर्मखैर्यः ।
सम्प्रीणयन् दिविषदः सदसद्विवेकधीरः कृतार्थमकृतश्रुतिदृष्टमर्थे ॥३॥

तदात्मजस्ताल्हणनामधेयो विशारदः शारदचन्द्रकीर्तिः ।
महाक्रतौ ज्योतिषि कर्मकाण्डं क्रमाच्चतुः संस्थतया प्रयोक्ता ॥४॥

सम्राट्स्थपत्यग्निचिदग्रजन्माग्रगण्यचाण्डूजनुषोऽनुजन्मा ।
त्रैविद्यवृद्धार्चितसर्वदेवबुधाग्रजन्मा महनीयजन्मा ॥५॥

श्रीवैद्यनाथाभिधसूक्तदेवीपदप्रसादोपचितप्रसादैः ।
पदैरुदारैर्विवृतप्रक्लृप्तां क्वचित् क्वचित् शोधयति स्म टीकाम् ॥६॥

इति [2]श्रीमच्चाण्डूपण्डितविरचितायां नैषधदीपिकायां
[3]पतिपतङ्गदूतो नाम तृतीयः सर्गः समाप्तः[4] ॥३॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

टिप्पण

सर्ग—३

1 P1 add. ॐ नमः सा(शा)रदायै । 2 P1 पूर्वं 3 B तद्भार्यास्व° 4 P1 तस्या अनु°; P2 नलस्या° 5 P2 वर्द्धयिषुः—

1 P1 आकुञ्चिता ।। 2 BP2 उपभैमि aft. समीपे 3 P2 प्रयातः 4 P2 क्व ?। भूमौ aft. अवतीर्य 5 B om. पक्षतिभ्यां and add. कृत्वा 6 P2 भूतौ 7 P2 om. कम्पितौ 8 P1 add. उपजातयो वृत्तम् । अनुप्रासो जातिश्च ।। १ ।।

1 P1 आक । 2 P1P2 यः आकस्मिकः 3 P1P2 om. मनः 4 B °चित्ता 5 P2 उद्वास्यते 6 P1 add. उदश्चरः सकर्मकात् (पा° I. iii. 53) इति सकर्मकत्वाभावादात्मनेपदाभावः । अनुप्रासो जातिश्च ।। २ ।।

1 P2 text आपु° 2 P2 text निरुपाक्ष° 3 P1 नेत्राणि 4 P2 विदर्भस्य 5 B om. किं भूतानि 6 B om. रूपाणां 7 P1 add. चेतांसि 8 P1 अत्यन्तासन्न° 9 B नैरुपा° 10 P1 add. लिङ्गभेदेऽप्युपमा । स्त्रीव गच्छति षण्ढोऽयं वक्त्येषा स्त्री पुमानिव (का. द. II. 52) । इत्यादिवदुद्वेगकरत्वाभावान्नात्र दोषः । पर्यायिश्च ।। ३ ।।

1 P2 text सन्निहतं 2 P1 हंसम् । 3 B परिणा 4 P1 add. स्त्रीभावात् उडुयनहेतोर्वा 5 B भयनलेन 6 B स्वीकीयाया° 7 B भ्रमरन्तम्; P1 add. गच्छन्तं भक्षयन्तं वा । तनौ इति षष्ठ्यर्थे सप्तमी । प्रत्ययस्मात्कात्पूर्वस्यात इदाप्यसुप (पा° VII. iii. 44) इति प्राप्तं, न यासयोरि (पा° VII. iii. 45) ति निषेधाधिकारे, उदीचामातः स्थाने यकपूर्वाया (पा° VII. iii. 46) इत्यत उदीचामित्यधिकारे च, भस्त्रैषाजाज्ञा[द्वा]स्वानञ्पूर्वाणामपी (पा° XII. iii. 47) ति स्वाशब्दस्यातः स्थाने योऽकारस्तस्य इत्थं न भवति उदीचामार्याणां मतेन । उदीचां ग्रहणं विकल्पार्थम् । नञ्पूर्वाणामपि । इति अपि शब्दात् अन्यपूर्वाणां केवलानां च विधिरयमिष्यते । निः स्विका । निः स्वका । बहुस्विका ।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

बहुस्वका । इत्येवमादयो विद्यन्ते । तत्र नञ्पूर्वाणामिति वचनमनुवाद एव । मन्दबुद्धिप्रतिपत्त्यर्थमिति विकल्पेन इकारः । 8 B om. का इव 9 P2 om. मनो° 10 P2 मनसो 11 P1 स्वकीयायां 12 B °कामो 13 B om. ध्यानपरतां 14 P1 add. उपमा ॥ ४ ॥

1 P1 तामिङ्गितैः । P2 तामिङ्गितैरपीति । 2 P1 om. अपि 3 P1 P2 om. तर्हि किं चकार ?। 4 edr. add. पातुकं 5 BP2 om. प्लुतेः 6 B उत्पतनस्य; P1 उत्प्लवस्य; P2 तत्प्लवनस्य; edr. उत्प्लवनस्य 7 P1 add. वृत्त्यनुप्रासो जातिश्च ॥ ५ ॥

1 P1 व्यर्थी । 2 P1 तालिका 3 P1 add. उद्यमम् 4 P1 add. तत्कालमिति कालाध्वनोरत्यन्तसंयोगे (पा° II. iii. 5) द्वितीया । अनुप्रासो जातिश्च ॥ ६ ॥

1 P1 इत्यादि । 2 P1 इति किम् ?। 3 P1 om. च 4 P1 om. ततः 5 B क्रुध्यति । P1 add. क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः (पा° I. iv. 38) इति चतुर्थी । काव्यलिङ्गं च ॥ ७ ॥

1 P1 धृता । 2 P2 दमयन्त्या 3 B भविष्यामो; P1 add. विदग्धा च । 4 P2 पुरुषस्य छाया लगति पश्चात् । 5 P1 °रपि रक्षः 6 B °मन्त्रं; P2 add. तु 7 P1 add. उपमा भावशबलता च ॥ ८ ॥

1 P1 शस्ता । 2 B om. न योग्या....न शस्ता 3 B सूर्ये 4 P1 add. मकरादौ प्रतीच्यवाच्योर्गमने सूर्याभिमुखी यात्रा कर्क्करादौ प्राच्युदीच्योर्गमने च । तथा लग्नस्थे सूर्ये प्राचीं यातुश्च । यदाहुः—दिनकरकरयुततां मकरादावुत्तरां च पूर्वां च । यायात्कर्कटकादौ याम्यामाशां प्रतीचीं च ॥ ९ ॥

तिग्मांशुशिष्ययनयोरनुकूलमाहुर्यानं प्रशस्तमुभयोरूपयत्प्रभावे (?)। यायाद्दिवानिशमसंशयमन्यथा तु यातुर्भवन्ति बहुधा वधबन्धदोषाः ॥ २ ॥ अयनानुकूलगमनं हितमर्केन्दोर्द्वयोरसम्पत्तौ । द्युनिशं जयाय यायाद्विपर्यये लेशवधबन्धाः ॥ ३ ॥ अयनेन गतोर्कसोमयोः द्युनिशं चास्थितयोः पृथक् पृथक् । विदुषामिव शब्दशास्त्रवित् समवाये द्विषता विराजता ॥ ४ ॥ तथा लग्नस्थे सूर्ये प्राचीं यातुश्च सूर्याभिमुखी यात्रा ॥ दिशानधीशा रविशुक्रभौमतयो वमेन्द्विन्दुजसूर्यः: स्युः । ललाटगे न प्रवसेद्दिगीशे गन्तव्यमस्मिन् खलु कण्टकस्थे ॥ ५ ॥ लग्नस्थश्चण्डरश्मिस्तनयरिपुगतो रात्रिनाथो ललाटीमाहे यः कर्मसंस्थो हिमकरतनयो बन्धुगो द्वित्रिसंस्थः । जीवो लाभान्त्यसंस्थस्त्रिदशरिपुगुरुः सप्तम[श]चार्कसूनुः स्यात् सूनुः सिंहिकायाः निधननवमगः सर्वदैव प्रयाणे ॥ ६ ॥ 5 P1 om. मे 6 B भविष्यथ; P2 भविष्यं 7 P1 add. एष 8 P1 add. हंसशब्देन

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

वायुरप्युच्यते—हंसो वायुरभिमुखो यस्यामिति । अथ च एष हंसो 9 P1 add. वक्रोक्तिः ।। ६ ।।

1 B हंसोऽथसाविति । P1 हंसो । 2 B om. सुदत्या; P1P2 om. दमयन्त्या 3 B पुरः once 4 B om. अग्रे 5 P1 add. वैलक्ष्यवृद्धयै गमनानि तस्या अपि पाठान्तरम् । उपमोत्प्रेक्षे ।। १० ।।

1 P2 text. °मवैति 2 P1 पदे । 3 P1P2 om. सा 4 P1 भविष्यत्यागामिनि 5 B add. तं 6 BP2 नूनं निश्चितम् at the end. 7 B °मेवेति; P1P2 °मवैति; edr. °मवेति ।। ११ ।।

1 P2 text °चकार 2 P2 text भूषणा° 3 P1 रुषा 4 B om. स 5 P1P2 om. छायाद्वितीयां 6 P1P2 om. यस्याः 7 P1 नान्यैव 8 P1 add. श्रमाम्भः कणा एव भूषणं सादृश्यान्मौक्तिकालङ्कारो येषां तानि तथा अङ्गानि यस्याः तां तथा । भूषिताङ्गीमिति पाठे 9 P1P2 स्वेदैः 10 P1 add. रूपकमुपमा च ।। १२ ।।

1 P2 text किमर्थं 2 P1 अये । 3 P1P2 व्यर्थं....परिश्राम्यसि aft. घटते as निरर्थकं वा इत्थं किं परिश्राम्यसि; P1 fur. किमर्थमिति पाठान्तरम् । 4 B om. इत्थं 5 B add. न 6 P1 om. ते 7 P1 add. अनुप्रासः ।। १३ ।।

1 P1 वृथा । 2 P1 इयं वनावली; P2 वनावली 3 P2 om. प्रतिषेधति....गिरेति पाठे । 4 P1 add. कपोतहुङ्कार एव गिरा यस्याः सा तथा । अथ वा 5 P2 प्रतिषेधः 6 B प्रतिषेधयति 7 B अपथे 8 P1 add. अपथे पाठे 9 P1 add. वायुना 10 P1 add. अपदे पदमर्पयन् 11 P1 रूपकमुपमा च ।। P2 om. रूपकोपमे ।। १४ ।।

1 P1 धार्यः । P2 धार्यः कथङ्कारमिति । 2 P2 add. त्वया 3 B °मस्येति; P1 यस्य मम 4 B एवका; P1 add. मुख्या 5 B खण्डयते 6 P1 add. विरोधो विशेषोक्तिश्च ।। १५ ।।

1 B °पत्रासनमिति । P1 सहसपत्रा । P2 सहस्रपत्रेति । 2 B °पत्रासनं 3 P1 वंशः अन्वय एव वंशो वेणुस्तस्य 4 P2 देशा° P1 इतरैर्मानुषैर्दुर्लभानि and add. अमृतं हि मानुषैर्दुर्लभम् । अत्र मनुष्यपदे वाच्ये स्वर्लोकलोकेतरेति वाक्यं प्रयुक्तम् । अत्राऽर्थेनयनसमुत्थं ज्योति (रघु° II. 75) रित्यादिव (का.° सू.° III. ii. 2) ओजोगुणः । अनुप्रासः परम्परितरूपकं च ।। १६ ।।

1 P1 स्वर्गा । P2 स्वर्गोपमेति 2 P1P2 भक्षस्य 3 P2 recto. mg. sup. add. वयं 4 P1 भुक्ष्महे 5 B °नुरूपं; P1 करणां 6 P1 °रियं संधेरभावः । and add. अनुप्रासोऽर्थान्तरन्यासश्च ।। १७ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 धातु । P2 धातुर्निगादिति । 2 P2 किं भूताः ?। 3 P2 विलोकनैः 4 edr. add. एव 5 P1 add. अनुप्रासः ।। १८ ।।

1 P1 विधेः । P2 विधेः कदाचिदिति । 2 P2 om. महत्तरेभ्यो P2 om. श्रमणी° 4 P1P2 श्रमेण आतुरेभ्यः 5 BP1 om. एवं 6 P1 अहं bef. श्राम्यामि 7 P1 add. अनुप्रासः काव्यलिङ्गं विरोधाभासश्च ।। १६ ।।

1 P1 बन्धाय दिव्ये । P2 बन्धाय दिव्ये इति । 2 P1P2 om. विसर्गः 3 P2 दिव्यैः 4 P1 लुब्धकादीनां 5 P1 add. दैवं 6 P2 om. बध्नाति........पाठे । 7 P1 पाठान्तरम् । 8 P1 add. विरलोदयस्य 9 P1 यस्य aft. भाग्यं 10 P1 पृथ्वीस्थितस्य 11 B repeat. उदयस्य........ लकारस्य 12 BP2 om. तस्य तथा 13 P1 रकारस्थाने; P2 रेफस्य 14 P1 om. इति 15 P1 add. अनुप्रासः । पाशादिना असम्बन्धप्रतिपादनात् दैवेन च सम्बन्धप्रतिपादनात् सम्बन्धेऽसम्बन्धे च सम्बन्ध इत्येवंरूपातिशयोक्तिश्च ।। २० ।।

1 P1 इष्टेन । 2 P1 add. यत्र दुःखेन संभिन्नं न च ग्रस्तमनन्तरम् । अभिलाषोपनीतं च सुखं स्वर्गापदास्पदम् ।। (?) ।। 3 P1 कुडमलं कोरकं 4 P1 add. तं 5 P1 add. एकाग्निकर्महवनं त्रेतायां यच्च हूयते (?) । 6 P1 तद्वृत्तं प्रोच्यते बुधैः । 7 P1 om. इति । 8 B om. आका°........ °वचने । 9 P1 add. दृष्टान्तः ।। २१ ।।

1 P1 सुवर्णशैलात् 2 P1 om. तूर्णं 3 P1 पक्षैः aft. नृपं; P2 aft. °श्रान्तं 4 P1 add. इत्यर्थः 5 B om. पक्षैः 6 B add. व्याप्तैः and om. वीजि°.......व्याख्यातम् ।। 7 P2 यत् 8 P1 बिभर्ति 9 P1 om. इत्यत्र 10 P2 °हरणं 11 P1 add. अनुप्रास उपमा च ।। २२ ।।

1 P1 क्रियेत चेत् । 2 P1 °लक्षणा 3 P2 स्वकीयेन 4 P1 add पदं 5 P1 add. पालयितुं 6 P1 भवेत् P2 om. बहुव्रीही स्यात् । 7 P1 कृत्वापाजिविस्वदीत्यादिना P2 °स्वदीसाधीत्यादिना 8 P1 उणादिकाः 9 P1 बहुवचनात् 10 P1 om. वाच्या 11 P1 add. तया व्याक्रियते; P2 om. या व्यक्तिः 12 BP1 P2 औश्च; edr. औ च 13 P1P2 शस् 14 P2 om. अत्र····साकल्ये । 15 P1 om. ताव°····सकल्ये ।। २३ ।।

1 P1 राजा । 2 P1P2 विदुषामा° 3 B यागस्य 4 B om. आज्येन 5 B शूर्येण 6 P2 पुनः पुनः 7 P1 add. आज्यं 8 P1P2 om. तथा 9 P1 add. अनुप्रास उपमा व्यतिरेकश्च । शब्दोपात्ते प्रतीते वा सादृश्ये वस्तुनोर्द्वयोः । तत्र यद्भेदकथनं व्यतिरेकः स उच्यते ।। (का. द. II. 180) ।। उपमया चेति पाठे उत्प्रेक्षापि ।। २४ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 दारिद्र; 2 B om. तं 3 B om. अहो 4 B P2 प्रार्थयन्ति 5 P1 समूह° 6 B om. वर्षैः 7 P1 om. कृत्वा 8 P1P2 मेघस्य 9 B देवेन्द्रा°; P देवतादयो; P2 देवता; edr. देवा 10 P1 add. इष्टानि सन्तुष्टमिवेति पाठान्तरम् । 11 P1 इष्टो 12 P1 add. एतेन त्यागी नायको विहितः । अनुप्रास उपमा च ।। P2 om. अनुप्रासः ।। २५ ।।

1 P1 अस्मत्किल श्रोत्र । 2 B om. किल; P1 किल aft. ततश्च सा; P2 om. किल 3 P1 add. विसर्गः 4 P1 om. अभूत् 5 B om. अवाप्य; P2 om. अनाप्य 6 P1 add. नलस्य 7 P1 add. अनुप्रास उत्प्रेक्षा च ।। २६ ।।

1 P1 स्वर्लो । 2 BP1 स्वर्गलोकं 3 BP2 इन्द्रस्य हरे । 4 P1 अशोचत 5 P1 नाभा । and add. अतिशयोक्तिः ।। २७ ।।

1 P2 text नाकपालः 2 P1 शृण्वन्नित्यादि । 3 P1 om. लोकपालो 4 P2 om. सन् 5 P1P2 om. विसर्गः 6 P1 पुण्येनैव 7 P1 add. एव 8 P1 आनन्दबाष्पा° 9 P1 °नापश्यत् । and add. हर्षो व्यभिचारी, पुलकोद्गमश्च सात्त्विकः । तयोरुदयः । छेकानुप्रासः ।। २८ ।।

1 P1 सापी । 2 P1 P2 कदा here 3 P2 व्याजेन कैतवेन 4 P1 add. इत्यर्थः 5 P1P2 किंविशिष्टात् ? । 6 B अत····°मशक्यत्वात् at the end. 7 P1 add. अपर्णेति साभिप्रायम् । व्याजोक्तिः ।। २९ ।।

1 P1 अलं ।; P2 अलं सजन्निति । 2 P1 धाता 3 B सजन् अङ्गीकुर्वन्; P2 सजन् सङ्गं कुर्वन् 4 P1 om. इति 5 P1 om. रसस्य तृप्तां 6 B तयो 7 P2 add. तां 8 B तथा 9 P2 न लस्य 10 P2 च at the end 11 P1 add. एवं विधां च वेदजडो वक्तुं न जानाति । एतेन तस्य वाग्मिता प्रतिपादिता । अनुप्रासोऽपह्नुतिः समासोक्तिश्च ।। ३० ।।

1 P1 श्रियः । 2 B आलिङ्गनेन 3 P1 व्रतस्य 4 B यतः 5 P1 अस्याः 6 B कृष्णस्य 7 B add. वा 8 P1 add. कालुष्यस्य 9 P1 समस्तभूतात्मतया 10 B om. अपि ।। P1 व्रतक्षतिः 12 P1 add. अनुप्रासः काव्यलिङ्गं च ।। ३१ ।।

1 P2 text °मिन्दुम् 2 P2 text °रुद्र° 3 P1 धिक् । 4 P1 पूर्णचन्द्रं 5 P1 add. पूर्णमिन्दुमिति पाठान्तरम् । 6 P1 इति; P2 om. एवं 7 P1 ब्रह्मणः स पाणिर्विज्ञः; P2 स ब्रह्मणः पाणिः पुत्रः विज्ञः 8 P1 पाणिश्चन्द्रं कृतोऽर्द्धो यस्य तं कृतार्द्धम् 9 P रुद्रस्य 10 B add. किं; P1 add. तत्याज 11 P1 add. इदं पूर्ववाक्येऽपि सम्बन्धनीयम् । प्रदीपं दीपकं च ।। ३२ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 निलीय । 2 B चन्द्रस्तस्य; P1 om. विसर्गः 3 B om. सन्....अन्तर्धत्ते । 4 P om. श्री° 5 P2 अन्तर्हीना 6 P1P2 om. स्मृत°.... सम्बद्धचते 7 P1 add. न भ्राजति अभ्र ंडः प्रत्ययः । व्योम अभ्रति अपोराति वा । अभ्रं न भ्रश्यन्ति आपोऽस्मादित्येके । यदुक्तम् न भ्रश्यन्ति यतस्तेभ्यो जलान्यभ्राणि तान्यतः । (?) इत्यभ्रं मेघः । अन्योऽपि स्वजैत्रं श्रुत्वा यत्र क्वापि निलीयते । समासोक्तिः पर्यायः तुल्ययोगिताऽपि अनुप्रासश्च ।। ३३ ।।

1 P1 संज्ञाप्य । 2 B विष्णुः 3 P1 किं भूतात्....अन्तर्हितात् aft.. परिचारकान् 4 P2 °स्तवनेन 5 B om. पूर्वार्द्धे°....परामर्शः । 6 P1 नलस्य 7 P1 add. अनुप्रासः काव्यलिङ्गं च ।। ३४ ।।

1 P1 रेखाभिः । P2 रेखाभिरास्ये इति । 2 P1 om. ब्रह्मा 3 B शंशस 4 P1P2 om. च 5 BP2 अन्तर्मध्ये aft. °गंणनादिव । 6 P1 add. विंशत्याद्याः । सदैकत्वे सर्वाः संख्येयसंख्ययोः 7 B पुराणन्याय° 8 B P2 om. एते 9 B om. किन्तु 10 P1P2 रेखा एताः 11 P1 add. सापह्नवोत्प्रेक्षा अनुप्रासश्च ।। ३५ ।।

1 P1 श्रियौ । P2 श्रियो नरेन्द्रस्येति 2 P1 श्रियो 3 P2 ऐश्वर्येण 4 P2 om. वयं 5 P1 न स्मरामः here 6 P1 चन्द्रं 7 P1 add. खलुशब्दोऽप्यर्थे । अनुप्रासो यथासंख्यं प्रतीपं वा ।। ३६ ।।

1 P1 विना । 2 P1 add. निर्जिता 3 B पक्षौ 4 P1 add. अमी स्वत एव 5 B समीरैं° 6 P1 add. न 7 B चक्षुषां aft. भवति; P1P2 चक्षुषः 8 P1 प्रत्यक्षीभवति 9 P1P2 add. शब्दस्पर्शगुणश्च । 10 P2 om. किल 11 P1 add. अनुप्रासो विभावना वा तदुक्तं-यस्य यथात्वं लोके प्रसिद्धमर्थस्य विद्यते तस्मात् । अन्यस्याऽपि तथात्वं यस्यामुच्येत सान्येयम् (का. लं. IX. 20) ।। यथा असंभृतमण्डनमित्यादि ।। ३७ ।।

1 P1 सङ्ग्राम । 2 P1P2 सर्वदा 3 P1 च 4 P1 add. जनाः 5 P1 add. अनुप्रासो रूपकं पर्यायोक्तं च । गम्यस्यापि भङ्ग्यन्तरेणाविधानं पर्यायोक्तम् । (अलं स. 36) यथा स्पृष्टास्ता नन्दने शच्या केशसंभोगलालिताः मञ्जर्यो । सावज्ञं परिजातस्य यस्य सैनिकैः ।। (Ibid) ।। ३८ ।।

1 P1 यशो । 2 B तासां त्वा° 3 P1 खर्जूलादुत्पन्नं; P2 खर्जूलत्वादेवो° 4 B om. दिशां 5 P1P2 तटानि 6 P1 add. अनुप्रासो रूपकं च ।। ३९ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 यदि। 2 P1P2 om. अन्य°....विहाय 3 P1P2 तस्याश्च त्रैलोक्य। यदि 4 P1 गणित° 5 P1 भवेत् 6 P1 गणया 7 B गणितुं 8 B गुणगतानां 9 P1 add. गणनीये तु गणेयम् (अमर° III. i. 64)। उणादौ, गणेरये: (?)। अथवा 10 P1P2 om. इति य° 11 P2 om. गुणे च 12 P1 add. पारे मध्ये षष्ठ्या वा (पा° II. i. 18)। अनुप्रासोऽतिशयोक्तिश्च। रुद्रटमतेन उत्पाद्योपमा। दण्डिमतेन तु अद्भुतोपमा। अतिशयोक्तिरेव तु श्रेय: ॥ ४० ॥

1 B अवारीति। P1 अवा। 2 P2 om. निविश्य 3 P1 °द्वारया 4 P1P2 om. कृत्वा 5 P2 om °द्वार° 6 P1 प्रवेशित्वेन 7 P2 add. द्वारस्य 8 P1 add. णिचश्चे (पा° I. iii. 74) ति कर्त्रभिप्रायक्रियाफल विवक्षायामात्मनेपदे प्राप्ते बुधयुधनशजनेङ्प्रुद्रुसृभ्यो णे (पा° I. iii. 86) रिति परस्मैपदम्। अनुप्रासो लुप्तोपमा च ॥ ४१ ॥

1 P1 पीयूष। 2 P1 om. रसोदन्वति....किंभूताभि: ?। 3 P2 उदन्वानु°....निपात: here. 4 B अहीननाभि: 5 P2 om. तद्विरुद्धे.... °त्यर्थ:। 6 B P2 किंभूतेन ?। 7 P1 add. अनुप्रासोपमे ॥ ४२ ॥

1 P2 text यन्नैव कुतोऽपि 2 P1 काभिर्न 3 P1P2 om. अपूर्वरूपा 4 B सर्वापि 5 BP2 यत: 6 B om. वा 7 P2 om. अपि. 8 B P2 त्रपति। P1 add. तिर्यक् शब्दो नपुंसकमपि। यथा—मधुरैरवशानिलं सयन्नपि तिर्यञ्चि शयं निरीक्षितैः (?) रिति। रूपकं काव्यलिङ्गं चानुप्रासोऽपि ॥ ४३ ॥

1 P2 text °पि 2 P1 वार्ता। 3 P1 add. च 4 B सा; P2 om. तां 5 P1 विश्वे° 6 P1 विधिनिषेधरूपाणि शास्त्राणि 7 P1 add. काव्यलिङ्गं चानुप्रासोऽपि ॥ ४४ ॥

1 P1 नलाश्रयेणेत्यादि। 2 BP1 om. बत इति खेदे 3 P1P2 नलस्य 4 P1 यद्यत:; P2 अत: 5 P1P2 om. ज्योत्स्नोत्सवं 6 P1P2 ज्योत्स्नया 7 B P2 om. विसर्ग: 8 P1 add. उपमा ॥ ४५ ॥

1 P2 text °नुबद्धं 2 P1 तन्नै। 3 B अनूढया अपरिणीतया 4 P2 दुरापं शर्म 5 P1P2 om. आम्रबाणेन 6 P1 add. अनुबद्धं 7 P2 °वसन्त-तया 8 B °वनेषु; P1 मुकुले 9 P1 add. उपमा ॥४६॥

1 P1 तस्यैव। P2 तस्यैव वेति। 2 B om. अपि तु यास्यसि। 3 P1P2 om. सा। 4 P1 add. तव 5 P1 add. आक्षेप: काव्यलिङ्गं च ॥४७॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 निशा । 2 P1 om. एव 3 P2 प्रतीत 4 B शिवं महेश्वरं 5 P1 श्रीवासुदेवं 6 P1 add. एवं 7 P1 add. समं तुल्ययोगिता च ।।४८।।

1 P1 वेला । 2 B om. सम्बन्धयोग्या; P1 सम्बन्धोचिता 3 P2 om. विसर्गः 4 P1 अतिशयेन 5 P1 यत् 6 P1P2 विचकिल° 7 P1 om. रज्ज्वा 8 B om. 9 P1 संदभ्मते 10 P1 om. न 11 P1 add. संदर्भ्यंते पाठे ग्रथ्यते । अनुप्रासो रूपकं समं दृष्टान्तश्च ।।४६।।

1 P1 विधिं । 2 P2 om. विसर्गः 3 P1P2 om. अस्य विधेः 4 P1P2 om. सति 5 P2 इति 6 P1 कर्णेन 7 P1 इव पुनः शब्देन 8 P1 add. अनुप्रास उपमा च ।।५०।।

1 P1 अन्ये । P1 add. भवत्याम् 3 P1 om. पत्या 4 P1P2 om. हणहणाकारः 5 P1 °वाद एवाऽर्णवः समुद्रः तम् 6 P1 °प्रकारं पुनः स्यात् । तरिरिति पाठान्तरम् । कतमप्रकारतरिनौः स्यात् । 7 BP2 विशेषत्वस्य 8 P1 add. त्वद्योगसंयोगादितरेण पत्या इति पाठान्तरम् । अनुप्रासो रूपकमाक्षेपश्च ।।५१।।

1 P2 text किमीप्सीतं 2 P1 आस्ताम् । 3 B आस्तां aft. पूर्यताम् । 4 and om. तिष्ठतु B om. अत्यन्तं 5 B om. स 6 P1P2 add. स्फेटयितुकामोऽस्मि । 7 P1 अभिधेहि कथय aft. करोमि 8 BP2 om. ते 9 P1 add. भवत्याः 10 P1 add. तवेहितं किमिति पाठान्तरम् । अनुप्रासः ।।५२।।

1 P1 इत्येत । 2 P2 पतत्री 3 P1 इति ईदृशम् एवम् अमुना प्रकारेण उक्त्वा । ईरयित्वेति पाठे ईरयित्वा 4 P1 add. जिज्ञासमानः 5 P1P2 om. युक्तं चैतत् 6 P1P2 om. यस्मात् 7 P1 गभीरे गम्भीरे नदे ह्रदे गभीरे हृदि च अवगाढे 8 P1 अवतारम् 9 P1 add. अनुप्रासोऽर्थान्तिरन्यासश्च ।।५३।।

1 P2 text. वाच्यं 2 P1 किञ्चिदित्यादि । 3 P1 om. सा 4 P2 पृथिवीन्द्रस्य दुहिता 5 B om. पृथिवी°.........पुत्रट् । 6 P1P2 om. पुनः 7 B om.मुहूर्त्तं 8 P1 add. वाच्यमिति पाठान्तरम् । अनुप्रास उपमा च ।।५४।।

1 P1 धिक् चापले । P2 धिक् चापले इति । 2 P1 वत्सिम्नी 3 P1 वत्सत्वे 4 P1 बाल्यं 5 BP2 वत्सो 6 P1 add. प्रेषणात् 7 P1 add. वत्सां साम्यां कामबले (पा.° V. ii. 98) इति लप्रत्ययः । अनुप्रास उपमा च ।।५५।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 आदर्शतामित्यादि । 2 P1 add. स्वच्छान्तःकरणतया, पक्षे निर्मलतया आदर्शितां 3 BP2 om. खलु 4 B om. त्वं च दर्शनीयः 5 P1P2 add. अयम् 6 B °राधं 7 B om. तावत् 8 P2 add. तत् 9 P2 °राधः 10 B °राधे; P2 add. अपि 11 BP1 नान्तरीक° 12 P2 तथा° 13 P1 add. अनुप्रास उपमा श्लेषश्च ।।५६।।

1 P2 text. °भिवन्धः 2 P1 अनार्यं । 3 P1 हे सौम्य ! तावत् here 4 B om. क्षाम्यतु 5 B देवांशतया 6 P1P2 श्रीवत् सलक्ष्म्या श्रीकृष्णः 7 P1 हि निश्चितम्; P2 हि यस्मात् 8 P1 add. अथवा यस्मादित्यर्थे काव्यलिङ्गमुपमा च ।।५७।।

1 P1 मत्प्रीतिमित्यादि ।। 2 P1 add. हे हंस ! 3 P1P2 om. कर्तुम् 4 P1 om. या 5 P2 स्तोकापि 6 B om. वाशब्देन………°क्षिपति । 7 B om. वा 8 P2 सेवनात् 9 P1 om. इति; and add. अनुप्रास आक्षेपश्च ।।५८।।

1 P1 मनस्तु । 2 B om. तु पुनः 3 P1 न वक्तु॑ 4 B शक्य इत्यर्थः 5 BP2 अलज्जा भूत्वा aft. अभिलाषं कथयेत्; P2 add. अहो 6 B दानस्य 7 B om. अप्राप्यं……अपि तु न 8 P1 add. हे 9 P1 °ग्रहणा° 10 P1 add. कापि । अनुप्रासोऽर्थान्तरन्यासः श्लेषश्च ।।५९।।

1 P1 वाचं; P2 कथं तदीयामिति । 2 P1 add प्रतिपद्य 3 B om. परपुष्टस्य 4 P1 जहौ 5 B दाक्षा; P1 द्राक्षाकया 6 P1 om. तथा; P2 तया 7 B जुगुप्सां घृणां 8 P1 add. तद्वाचमेनां प्रतिपद्येति पाठान्तरम् । अनुप्रास उपमा प्रतीतं च ।।६०।।

P1 मन्दाक्ष; P2 मन्दाक्षेति । 2 B om. तस्यां 3 P2 अस्पृष्टा 3 B मत्यां 4 P1 add. अनुप्रास उपमा च । गिरा युयोजेति रूपकस्य बाधकम् । ननूपमायाः साधकम् । विध्युपमर्द्दिनो बाधकस्य तदपेक्षया उत्कटत्वेन प्रतीतेः ।।६१।।

1 P1 करेण । 2 P1 चन्द्रमसं 3 B घतु॑ 4 P2 यत्सर्वं त्वं 5 B om. पाणि 6 B श्रोत्रं 7 P2 °कुर्वते 8 BP2 °धिकृतः 9 B om. यमित्थ°……… पाठान्तरम् ।। P1 यमत्थ° 10 P1 °दरी°; P2 °दरिणा 11 P2 यमित्थमात्थमहो 12 P2 सङ्ख्यायन° 13 P2 आ इत्यर्थे 14 P1 अमुना 15 P2 आत्थं 16 P2 पाठः 17 P1 add. अनुप्रास उपमा च ।।६२।।

1 P2 text. विद्यते 2 B अवाप्यते मेवेति । P1 अवाप्य । 3 B °यत; P1 add. यत्; P2 om. किमियत् 4 B add. च 5 B यतः य ब्रह्मणि;

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

P1 om. यत: 6 P1 किल ब्रह्मणि 7 P2 om. अवाप्यम् 8 BP1 विद्यायाः 9 B कण्ठे 10 P1P2 सुवर्णालङ्करणम् 11 BP2 om. सन् 12 B न कण्ठमेव 13 P1 add. अनुप्रासोऽत्राऽऽक्षेपो विरोधश्च। 14 B onw. 64 ff. ॥६३॥

1 P1 ईशाणि। 2 B om. ईशस्य; P1P2 om. ईश्वरस्य 3 P1 श्रीमहादेवस्य 4 B P2 अणिमा° 5 P1P2 om. परिपाक: 6 B परमाणु° 7 P1P2 om. अल्पं 8 B om. मध्यं; P1 कृशं मध्यं 9 P1P2 om. उदरं 10 P1 add. अत्र ओजो गुणः॥ P2 येऽपि 12 P2 add. अपि 13 P2 add. सत्यवाचितायाः 14 P1P2 om. या 15 P1 कीर्तिर्यस्य मम तं तथा 16 B °ज्ञेति 17 P1 °मज्ञभन्येति 18 B °तोपक्रम°; P2 °तामित्यर्थः 19 B om. एतदुक्त........°मित्यर्थः; P2 तदुक्तं 20 P2 अनाभिज्ञा 21 P2 om. उपज्ञा 22 P1 कीर्तिर्यस्य 23 P1 °पज्ञं मम कीर्तिरित्यर्थः; P2 सत्यवादनोपज्ञ° 24 P1 add. समाज्ञायते अनया इति समज्ञा कीर्तिः। समज्ञेति पाठे समस्मिन् सर्वत्र ज्ञायते इत्यर्थः। अथवा मृषानभिज्ञाश्च रसज्ञाश्च सहृदयाः तेषां भावो मृषानभिज्ञरसज्ञता तत्र उपज्ञा आद्यज्ञानं येषां ते तथा। तेषु समज्ञा कीर्तिर्येषां तेषु मध्ये मत् माद्यन्ती सा ज्ञानं यस्य तं तथा। सत्यवादिनां रसज्ञानां श्रेष्ठमित्यर्थः। उपज्ञा ज्ञानमाद्यं स्यात् (अमर° II. 7·13)। 25 P1 add. अनुप्रासः ॥६४॥

1 P2 text. ह्रियेव 2 P1 मध्ये श्रुतीनामित्यादि। 3 B om. वाणी 4 P1 °वेशनी° 5 B om. अथवा........सरस्वती 6 P2 om. सरस्वती 7 P1P2 ह्रिया एव श्रुतिभ्यो 8 B om. एव; P2 ध्रुवेवा°........°क्षमत्वात् here. 9 P2 तत्सङ्गा° 10 P2 om. विसर्गः 11 P1 add. या किल गुणेन दोरेकेण बध्यते सा च न चलति। 12 B om. ध्रुवेवादी°........इत्युक्तम्॥ 13 P2 याप्तस्य 14 P2 om. इत्यत्र 15 P2 उदयो 16 P1 add. समासोक्तिरुत्प्रेक्षा च। उपमा वा पक्षे अनुप्रासोऽपि ॥६५॥

1 P1 पर्यङ्क। 2 P1 तत् 3 B सरस्वान्; P2 अथा 4 B च 5 P1 add. सा च तच्च तत् 6 B om. स्वे 7 B °स्थितमेव 8 P1 add. अनुप्रासः ॥६६॥

1 P1 इती। 2 P1 भैमी here; B om. तेन 3 P1 add. पतगेन 4 P1 च वस्तुनि 5 P1P2 न साभिलाषं; P1 om. अस्ति, and add. इत्येवमुक्त्वा इति पाठान्तरम्। श्लेषः॥ 6 B P2 here. द्विजराजपाणिग्रहणाभिलाषमित्यादि तथा चेतो नलं कामयते इत्यादिद्वयस्यार्थः of III. 69.

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 विचिन्त्य । 2 P1 add. हंसः वक्राकाराङ्गो वृत्तत्वात् वक्राङ्गा इत्येके । स चक्राङ्गापतङ्गानां 3 P1 एतां 4 P1 शीलं स्वभावमेव शीलं 5 P1P2 om. विचिन्त्य 6 B om. नाम्नो 7 P1P2 तथा 8 P1 add. अनुप्रासो रूपकं च ।।६८।।

1 P1 नृपेण । 2 P2 om श्लेषकवेः 3 BP2 ²ग्रहणा°; P1 °ग्रहेति 4 BP2 add. मया किं; P1 add. किं 5 P1P2 स्वधिया 6 P1P2 om. किं न ज्ञातः । 7 P1 इति किम् ? । 8 P1P2 om. सह 9 P1 नृपस्य पाणिरिति 10 P1 add. अनुप्रासः ।।६९।।

1 P1 त्वच्चेत । 2 P2 om. तव चेतसः 3 B धैर्यस्य 4 P2 बालाहृदि 5 P2 वध्ये 6 P1P2 om. किञ्चित् 7 P1 add. लक्षं लक्षं शरव्ये लक्ष्यते इति घञ् ण्यश्च । अनुप्रासोऽर्थान्तरन्यासश्च ।।७०।।

1 P1 मही । 2 P2 om. विसर्गः 3 P1 महेन्द्रवत् P2 तत् here 4 P1 add. ज्ञापनीयः 5 P2 °प्रयोजनः 6 P1 कश्चित्; P2 क्वचित् 7 B om. गतिबुद्धीत्यादिना 8 P1 add. अनुप्रासः काव्यलिङ्गं च उपमाऽपि ।।७१।।

1 P1 पितुर्नि । P2 पितुर्नियोगेति । 2 P2 om. अथवा 3 BP2 om. निजेच्छया 4 P2 कादिक 5 P1P2 om. विश्वासः 6 P1P2 किं विशिष्टे ? । 7 P1 om. इति 8 P1 add. अनुप्रासः ।।७२।।

1 P2 text °विक्रिये 2 P1 त्वया 3 P2 om. अथवा 4 P1 तत् अहं 5 B om. कल्याणानां.........न दोषः ।। 6 P2 विधत्से 7 P1 देव ! देहि 8 P2 वितरत भवन् 9 P1 add. यत्त्वमिति पाठान्तरे दैवरक्ताः किंशुकाः । अनुप्रासो यमकमपि ।।७३।।

1 P1 श्रवः प्रविष्टाः । 2 P1 दुहिता राजपुत्री दुहिता 3 P1 श्रवसि.... भणित्वा here 4 P1 इव here 5 P2 निरक्षराकृत्य 6 P1 add. इव 7 P1 add. मूर्द्धकम्पेन गिरां निराकरणं सम्भावितम् । अनुप्रास उत्प्रेक्षा च ।।७४।।

P1 मदन्य । 2 P1 तावत्.........वेदवाक्यं aft. शङ्क्यते 3 P2 om. या 4 P2 कल्पनात् व्यति° 5 P2 प्रथमं here 6 P2 तदा 7 P2 om. इति वेदः तदा 8 P1 रात्रेऽपि 9 P1 om. प्रथमं 10 P1 add. पुरः सरं प्रथमं विदध्याः 11 B भेदा° 12 P1 om. हि 13 P2 om. स्रवत्य°.......... स्मरणात् 14 B अवत्यनाकृतं 15 P1 add. अनुप्रासो रूपकं यद्यथोक्तिकल्पितातिशयोक्तिश्च ।।७५।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 साधु । ; P2 सरोजनीति । 2 P1 महत्तरं; 3 edr. add. साहसिक्यं 4 BP1 °ग्रहणस्य 5 P2 om. विसर्गः 6 P2 कारणीयः 7 P1 add. अनुप्रासोऽतिशयोक्तिश्च ॥७६॥

1 P1 साधु त्वयेत्यादि । 2 B तत्र 3 P1P2 om. मैमी 4 P1 add. श्लेषः ॥७७॥

1 P1 मद्विप्र । 2 P2 add. मया 3 P2 add. ब्रुवते 4 P2 add. विजारः 5 B वञ्चयेति 6 P1 om. इति 7 P1 प्रतीयते 8 P2 शङ्क्यः 9 B om. न शक्यः सा 10 B प्रमाण° 11 B add. विसर्गः 12 P1 प्रमाण्यम् 13 P1P2 वाणीत्वात् 14 BP1P2 °मीले; edr. °मीळे 5 P1 add. अनुप्रासः अनुमानं च ॥७८॥

1 P1 अनै । 2 B2 add. किं 3 B °जनानो 4 P1 add. तनूजन्मेति साभिप्रायम् । अनुप्रासः काव्यलिङ्गं च ॥७९॥

1 P2 text करोति 2 B °दासीत्वेऽपि; P1 तदेकदा । 3 B om. विधित्सुना; P1P2 om. विधातुमिच्छता 4 P1P2 om. नलस्य 5 P1 °दासीत्वपदं 6 P1 दुर्लभे; 7 P1 एकदासी° 8 P1 चन्द्रमसा 9 BP1 करोति विधत्ते; P2 om. करोति 10 P1P2 om. इति 11 P1 add. अनुप्रासो दृष्टान्तश्च ॥८०॥

1 P1 तदे । 2 P1 om. एकस्मिन् 3 B महार्घ्यं 4 P1 add. मे 5 P1 add. अन्तः 6 P1 एकः स एव; P2 एक एव 7 P1 पद्म इव.......... पुल्लिङ्ग एव here. 8 P1 om. वा 9 P1 om. इति पद्ममुखः 10 P1 add. जलजे उभयलिङ्गः 11 P2 om. न्यायाद°..........सारमिति । 12 B om. मुखं यस्य स पद्ममुखो 13 P1 add. चित्ते ममैक इत्यपि पाठः । अनुप्रासो रूपकं श्लेषश्च ॥८१॥

1 P2 text स 2 B सृतः; P1 श्रुत । 3 B यथा 4 P1 add. सकलासु 5 P2 om. मोहात् 6 P1 add. या 7 P2 add. स 8 B मया° 9 P1 प्राप्तिम् 10 P1 प्राणपरित्याग इति द्वयमपि 11 BP1 त्वया दत्तम् । 12 B om. एकःशेषो 13 B उत्थितयो° 14 B इतरत्तव हस्तगतम् 15 P1 add. तत् एकशेषरूपद्वयं तव हस्तगतम् । समुच्चयः क्रियायौगपद्यं समुच्चयः ॥८२॥

1 P1 सञ्चीयतामित्यादि । 2 P1 add. पुण्यस्य 3 P1 add. आस्थिति पाठे अङ्गीकृतपालनादिति व्याख्या 4 P1P2 om. दानात् 5 P1P2

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

च पुण्यं 6 P2 recto. Sup. mg. add. किमिदं मौनं 7 B यदीदं 8 P1 add. अनुप्रासः ।।८३।।

1 P1 अलं वि । P2 अलं विलम्ब्येति.........विचारो युक्तः fr. no. 91 2 P2 हे हंस ! 3 B add. विशेषज्ञाऽपि यस्य नलस्य विशेषज्ञ ! 4 P1 याञ्चाः प्रार्थनाः 5 P1 om. मम.........तथा मम 6 P1 om. कृत्ये 7 B om. विविधं 8 B om. अपि 9 P1 add. पूर्यताम् । 10 P1 om. तदपि न कार्यम् । 11 B om. किं भूतात् 12 P1 तव स्खलनं मा 13 B om. तव 14 P1P2 °करता 15 P1 तव कीर्तिः 16 P1 add. अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा (पा° III. iv. 18) । अनुप्रासः ।।८४।।

1 P1 स्वजीव । 2 P2 हर्षाय 3 P1 स्व 4 B om. ददद्भ्यः; P2 om. अपि 5 P2 om. न 6 P1 add. अपि 7 P1 om. तव 8 B om. असून् 9 P1 om. एव 10 P1 add. बद्धमुष्टेः कराद्भ्रंश इति तु चित्रम् । विरोधः काव्यलिङ्गमतिशयोक्तिश्च ।।८५।।

1 P1 दत्वाम् । 2 P1 तव 3 P1 दायिके; P2 दायकत्वे 4 B केनण्यं 5 BP1 शोढुं; P2 शोढुं; edr. अशोढुम् 6 P1 add. ऋणेष्विति पाठान्तरम् । अनुप्रासो विरोधः रूपकं च ।।८६।।

1 P1 क्रीणी ।; P2 क्रीणीष्विति । 2 B मत् 3 P1 add. मत्प्राणमयं चेति पाठान्तरम् 4 P1P2 om. न 5 P1P2 जीव° 6 P1P2 दृष्टा° 7 P1P2 दृष्टं 8 P1P2 add. एव 9 P1P2 दृष्टं 10 P1 क्रुणीष्व 11 B चित् 12 P1P2 om. दातव्यं 13 B °लोके 14 B °दारः 15 P1 om. तुभ्यं 16 B om. तावत् 17 B om. किमपि.........प्रभवामि किम् 18 P om. न 19 P1 तावकी 20 P1 किं aft. °व्यातिरेकेण । 21 P1 add. अनुप्रासोऽतिशयोक्तिश्च ।।८७।।

1 P1 वरा । 2 P1 इभ्यां 3 P1P2 om. सत्पुरुषाः 4 P1P2 om. पणैः 5 P1 add. कृपणं भणन्त इति पाठे कृतज्ञानां प्राणेभ्योऽधिकं दातुमुचितम् । प्राणमात्रदाने तु कृपणत्वमिति व्याख्या 16 P1 add. अनुप्रास आक्षेपश्च । अहं तावत् कृतज्ञा त्वं च सत्पुरुषः । तस्मात्कार्यमिदं कुरुष्वेति प्रस्तुते सामान्याभिधानादप्रस्तुतप्रशंसा च ।।८८।।

1 P1 स भू । 2 B सा 3 P1 add. सति 4 B हि घटते 5 B om. यत्त्वम् 6 P1 तस्याः 7 P1 add. रूपकमनुमानं च ।।८९।।

1 P1 अकां । 2 P2 om. मे 3 B नलनलदातृत्वं 4 P1 add. नलदत्वमितः 5 B om. विषये 6 B रणरणस्य 7 B om. आत्मभुवा 8 B

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

°विशेषं भवति 9 P1 add. वीरणमूलनलदयोः पर्यायत्वात् 10 P1 कथं aft. °कृत्यं 11 P1 उशीरत्वं 12 P1 मलयजलेपकार्यं कथं कुरुते । 13 P1 add. चन्दनलेपो ह्यन्य एव अतस्तस्मात् पृथगेव वीरणमूलनलशब्दाभ्यामभिधेयमुशीराख्यं वस्तु स्वकार्यं भिन्नमेव करोति । 14 P2 शीतल° ॥९०॥

1 P2 text तीव्रा 2 P1 अलं 3 P2 किं 4 P1 किलवेला 5 B om. तीक्ष्णा 6 P1 आर्ति° 7 P2 add. पीडा 8 P1 om. न 9 P1 add. अनुप्रासः काव्यलिङ्गमर्थान्तरन्यास उपमा च ॥९१॥

1 P1 अभ्यर्थ । 2 B om. हि 3 B °मुदयेत्; P1 add. प्रियस्येत्यपि कश्चित्तदा प्रियस्य भर्तुः अन्यवधूकर्तृको निषेध उदयेदिति व्याचष्टे । काव्यलिङ्गमनुप्रासोऽपि ॥९२॥

1 P1 शुद्धान्त । 2 P1 °तृप्ते तुष्टे 3 P1 om. तुषारा 4 P1 add. दृष्टान्तः ॥९३॥

1 B om. com-of 94-96; P1 त्वया । 2 P1 add. रुषा 3 P1 om. विसर्गः 4 P1 add. दृष्टान्तो विरोध उपमा च ॥९४॥

1 P1 तुसाराहि । 2 P1 तुसाराहि । P2 तुरासाहि edr. तुराषाहि 3 P2 यस्मिन् 4 P2 न बुध्यते 5 P1 add. काव्यलिङ्गमुपमा च ॥९५॥

1 P1 विज्ञे । 2 P1 करणात् 3 P1 तस्मिन् 4 P1 add. समीक्ष्य; P2 om. इदं कार्यं 5 P1 add. विज्ञापयितव्यमेतत् इति पाठान्तरम् । 6 P2 शावांबिली (?) 7 P1 om. हंसस्य 8 P1 add. साधीयसी 9 P1 add. अनुप्रासः काव्यलिङ्गं च ॥९६॥

1 P1 इण्युक्त्व । 2 P1 add. यत् 3 B om. सत्या 4 P2 om. यः 5 B तत् once 6 B वीदत् 7 P1 add. अत्र कर्त्रभिप्रायक्रियाफलविवक्षाभावादात्मनेपदाभावः । 8 P1 add. उन्मत्तवचनं हि न दोषाय । अतिशयोक्तिः ॥९७॥

1 P1 उन्मत्त । 2 B धत्तूरकं प्रसूनं 3 B om. प्राप्य हरस्थ धत्तूरकं 4 P1 °पुष्पं 5 B तन्मत्तं 6 P1 add. उत्प्रेक्षा व्यतिरेकश्च । तदुक्तं-शब्दोपात्ते प्रतीते वा सादृश्ये वस्तुनोर्द्वयोः । तत्र यद्भेदकथनं व्यतिरेकः स उच्यते (का. द. II. 195) ।

1 B तथाविधा°; P1 तथाभिधात्री । 2 edr. add. अथ 3 P1 पक्षिणा विहायसा 4 P2 om. उत्तमम् 5 P1 add. इत्यत्र वक्तव्यम् ।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

6 P2 om. तां 7 P1 नैषद° 8 BP2 om. बद्धरागां; P1 om. बद्धानुरागां 9 P1 add. इति ब्रुवाणामिति पाठान्तरम् । अनुप्रासः ।।९९।।

1 P1 इदं । 2 P om. तत्त्वं 3 P1 अस्या° 4 P1 यत् 5 P1 add. एव 6 P1 नलं च 7 P1 add. तप्तं तप्तेन किल योज्यते । तापयतेति तापस्य कारणस्य वर्तमानत्वं योजनालक्षणस्य कार्यस्याऽजनीत्यतीतत्वम् । इति कार्यकारणपौर्वापर्यविपर्ययादतिशयोक्तिरनुप्रासश्च ।।१००।।

1 P1 त्वद्बद्ध । 2 P1P2 स्वसम्बन्धि 3 P1P2 त्वद्गता° 4 P1 om. कृत्वा 5 P1 add. बाह्यानां चक्षुरादीनां 6 P2 भूतां 7 P1 add. तपोभिः 8 P1 add. तस्य वा 9 P2 om. तेषां 10 P2 om. इन्द्रिया°.... ....देवतानां 11 P2 प्रभूत° 12 P1 add. इन्द्रियाणां द्योतनायोगात् 13 B श्रोत्रियस्य 14 P1 पृथ्वी 15 B मैत्रः 16 P1 add. अपरबुद्धि° 17 P1 add. इन्द्रियाणां द्योतनायोगात्तथा 18 P2 शब्दानां 19 P1 add. अनुप्रासः समासोक्तिश्च ।।१०१।।

1 P1 तुल्याव । 2 P2 om. तनोति 3 P1 इति किम्? 4 P1 add. त्यदादीनि सर्वैर्नित्यभि (पा° I. ii. 72) त्येकशेषः 5 P2 ना 6 P1 add. अनुप्रासः समासोक्तिश्च ।।१०२।।

1 P1 लिपिं । 2 P1 om. या 3 P2 स्मरदशा दश 4 B नयनां 5 P1 विषयनिर्वृतिस्त्रपानाशः । 6 B om. चतुर्थं°........पाठः । 7 P1 बाष्पाणि तथा प्रलापश्च । 8 P2 om. लिपिं 9 P1P2 om. एकदृष्ट्या सादरम् 10 B किं भूताम्? । 11 P2 रचित इव 12 P1 add. स्त्रियं दृष्टवतः सम्प्रयोगेच्छालक्षणात् कामादनन्तरं दशे स्निग्धे भवतः इति । 13 P1 add. उत्प्रेक्षा श्लेषश्च ।।१०३।।

1 P1 पातुर्दृशे । 2 P2 त्वम° 3 P1 °रित्यर्थं° 4P2 प्रीति° 5 P2 निवापस्य 6 B हरितता 7 B om. विद्यते 8 P2 कृतानि 9 P2 मम छिदा 10 P2 °वृत्तिः 11 P2 om. या............°र्भवः 12 P1 add. विसर्गः 13 P1 add. अनुप्रासः ।।१०४।।

1 P1 त्वं हृ । 2 P2 प्राण 3 P1P2 बाह्यस्था° 4 B अत्रार्थे 5 B om. चित्तं 6 B °चैतस्य 7 P1 om. नलस्य 8 B om. नान्यत्र वर्त्तते 9 B om. प्राणा........प्राण इति । 10 श्रासस्य 11 P1 भवति 12 P2 °नासिकायां 13 B °वयोर्लक्षणी 14 P1 एतेन विषयप्राप्तौ मनः सक्तिरूपा चिन्तासक्तो नाम दशा उक्ता । अनुप्रासो विरोधश्च श्लेष उपमा हेतुश्च ।।१०५।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 अजरस्रं । P2 om. दूरम् 3 P2 om. तत् तव 4 P1 °चरीरताम् 5 P1 अपाप्य 6 P2 om. ध्यायते 7 P1P2 त्वमेव 8 P1 add. एतेन मनसि सक्ते सङ्कल्पोत्पत्तिः । कथं प्राप्स्यामि प्राप्य चैवमनुष्ठातव्यमित्येवंरूपा । 9 P1 add. ध्यानात्तव त्वन्मयतामाप्येति सङ्गतिहेतुप्रतिपादनादसङ्गत्याभासः काव्यलिङ्गम् ॥१०६॥

1 P1 हृत्त । P2 हृत्तस्य यदिति । 2 P1 om. यां 3 P1 om. तत् 4 P1 सम्बोधनादिना वदनि; P2 om. सम्बोधनादिना 5 B om. नल ………तस्य; P1 नलस्य 6 P1 नलस्य तस्य 7 B मैत्री सख्यं; P1 om. मैत्री 8 P1 add. नाम सङ्कल्पदशायाः कार्यभूता अवान्तरदशा उक्ता । अस्याः सङ्कल्पेऽन्तर्भावः । अनुप्रासः उपमा उत्प्रेक्षा च ॥१०७॥

1 P1 स्थितस्य । 2 P2 त्वात् ऋते 3 B °भूतत्वाधारत्वम् 4 P1 add. सङ्कल्पयतो 5 BP2 °च्छेदे 6 B om. विषयनिवृत्तिश्च; P1 add. तथा विषयेभ्यो व्यावृत्तिः । सर्वथा त्वद्गतचित्तत्वादन्यान् विषयान् ज्वलदनलप्रख्यान् नोपैतीति एवंरूपा 7 P1 add. अनुप्रासः श्लेषो विकल्पश्च । तदुक्तम्तुल्यबलविरोधो विकल्पः (अलं. स. 65) । यथा भक्ति प्रह्वविलोकनप्रणयिनी (216) त्यादि 8 B om. अत्र………विकल्पः ॥१०८॥

1 P1 स्मरेण । 2 P1 add. एव तेन एवंप्रकारेण तथैव 3 P1 add. तथैव इति क्वचित्पाठः । 4 P2 विशेषं 5 P2 इयम् 6 edr. add. आप्यमानोऽपि 7 B om. सार्धं 8 P1 सौन्दर्ये 9 P2 एतेन तनुता नाम दशा 10 P1 add. अत्र पूर्ववाक्ये तथेति वचनात् उत्तरवाक्ये पूर्वाचार्यप्रयोगदर्शनात् यथेत्याक्षिप्यते । अथवा प्रक्रान्तप्रसिद्धानुभवैकगोचरान्यतमप्रकारेण बाणैर्निस्तक्ष्य कृशतामनायि ततश्च अनङ्गतामपि आप्यमानोऽयं स्पर्द्धां न जहाति इति तच्छब्दनैरपेक्ष्येणैव व्याख्या । अतिशयोक्तिः ॥१०९॥

1 त्वत्प्रापका । 2 P1 प्रापा° 3 P1 om. च 4 B om. अपि 5 P1 add. विषयेभ्यो निवर्तमानस्य त्रपानाश उक्तः । येन गुरुभ्योऽपि न लज्जते । लज्जाया उपलक्षणार्थत्वात् न बिभेति च । अतो भयस्य नाशोऽपि त्रपानाशान्तर्भूतः । अत्र यत्तच्छब्दानुपादानेऽपि सामर्थ्याद्द्वयमपि गम्यते । यथा—ये नाम केचिदिह नः प्रथयन्त्यवज्ञां जानन्ति ते किमपि तान् प्रतिनैष यत्नः । उत्पत्स्यते तु मम कोऽपि समानधर्मा कालो ह्ययं निरवधिर्विपुला च पृथ्वी ॥ (मा° मा° I. 4) इत्यत्र य उत्पत्स्यते तं प्रति गम्यते । लज्जते यदिति पाठे अलङ्कारिणामनभिमतोऽपि शास्त्रेषु तथा प्रयोगदर्शनात्तदित्याक्षेपः । शास्त्राभिमानिनः खण्डनकारस्य कवेः कवित्वेऽपि शास्त्ररीत्यनुसरणं भूषणं न तु दूषणम् । अर्द्धव्यत्यायेनोत्तरवाक्यगतत्वं यच्छब्दस्येत्यन्ये । अनुमानमुत्प्रेक्षा विरोधाभासोऽपि ॥; P2 add. त्रपानाश उक्तः ॥११०॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 स्मार । P1 अपत्रपिष्णोः गतलज्जस्य । अन्ये तु अपत्रपाशब्दं लज्जावाचकं पश्यन्तः प्रकृतानुपययुक्तमाहुः । तन्मते लज्जापरस्य 3 P2 add. पूर्वं॰ 4 P2 अपरस्य 5 P1 निदानस्य वातपित्तादेरभावात् तस्य 6 P1 add. अथ 7 P1 लज्जमानाः, 8 P1 वक्तुम॰ 9 P1 add. रामा तु ज्वराविष्ट एव इति अन्ये त्वाहुः 10 P1 तु 11 B करोति 12 B विशाला लज्जा 13 P2 om. ॰पामादि॰ 14 P2 अपि लज्जा 15 B सङ्क्रामते॰ 16 P1 add. तदुक्तं-कुष्ठं ज्वरश्च शोषश्च नेत्राभिस्पन्द एव च । उपसर्गिकरेगाश्च सङ्क्रामन्ति नरान्नरम् । 17 P1 add. वैद्येषु-वैद्येषु लज्जाप्रवेशारोपादपह्नुतिः । उपमा ।।१११।।

1 P1 विभेति । 2 P1 निःकारणं 3 P1 इति किम् ? । 4 P1 स किल त्वाग् आप प्राप 5 P1 om. क्वापि 6 P2 परा॰ 7 P1P2 निःफलं 8 P1 प्रणष्टलज्जस्य निर्भयस्य च उन्मादो नाम दशा । 9 P2 om. यस्मात्........ प्रवर्तते 10 B om. अकस्मात्........नवीकृतम् ।। 11 P2 अकाण्डम् अहेतोः 12 P1 add. उत्प्रेक्षा ।।११२।।

1 P1 भव । 2 P1 महीमृन्नलो 3 B राजा 4 B om. मही॰........ इति समासः । 5 P2 वृङ्कारकनाम॰ 6 B om. मूढत्वं 7 P1P2 om. विसर्गः 8 B या P2 ॰पङ्क्तेः शरणो 10 P2 तत् 11 P2 एतेन मूर्च्छा नाम दशा उक्ता । 12 P1 add. तस्य 13 P1 add. अतिधारायाः कालुष्यात् यमुनात्वेन रूपणम् । रूपकम् । कुञ्जरशब्दः श्लिष्टः ।।११३।।

1 P1 सव्या । 2 B om. दशसु 3 P1 शेषः शेषा इत्यन्यः 4 P1 दशमा 5 P1P2 om. वर्तते 6 B om. आकाश॰........॰भावो भवतु । 7 BP2 खलु........मन्ये at the end. 8 P1 add. दशासु 9 B om. ॰पक्ष॰ 10 P2 क्षिप्यन्ति 11 P1 add. आर्थं यथासङ्ख्यं रूपकमुत्प्रेक्षा आशीरपि ।।११४।।

1 P1 त्वयि । 2 P1 भूमृत । 3 P1 अवगत्या 4 P1 संज्ञातः 5 P1 add काव्यलिङ्गं यमकं च ।।११५।।

1 P2 text add. विसर्गः 2 P1 धन्यासी ।; P2 धन्यासि वैदर्भीति । 3 P1 om त्वं 4 P1 add. अत्र पूर्ववाक्यत्वात् यच्छब्दोपादानं नापेक्ष्यम् 5 B शौर्यादि॰ 6 P1P2 प्रकृष्टैः 7 B om. नलो 8 P1 का aft. ज्योत्स्नायाः 9 P1 add. गम्भीरं 10 P1 add. दृष्टान्तः । अन्यस्तु इतो भवत्याः सकाशात् चन्द्रिकायाः का स्तुतिः । अपि तु न काऽपि । यत्तु अब्धि जलमय स्वभावतरलम् उत्तरलीकरोति तया तु तथा गभीरो नलः क्षोभ्यते इति

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

त्वमेव धन्येति व्याचक्षाणः प्रतीपालङ्कारमाह । तत्तु व्याख्यानम् अपि शब्दानर्थक्यादिना प्रायः प्रतीतमेव प्रतीमः । सहृदया एवाऽत्र प्रमाणम् ॥११६॥

1 P1 नलेन । 2 P2 add. सह 3 P1 add. तथा 4 P1 शोभेथाः; P2 शोभयेद्वा 5 P2 शोभते 6 B om. स; P1P2 नलः त्वया 7 P2 om. च 8 P1 om. च 9 B om. नित्यं 10 P1 चन्द्रं रात्रि 11 P2 योजन् 12 B °मेलनाभ्यासं; P1 add. योजनाय 13 B om. किम्; P1 add. आशीरूपमोत्प्रेक्षा ।; P2 recto. inf. mg. add. अत्रोत्प्रेक्षालङ्कारः । आशीर्वादप्रतिवादनादाशीरलङ्कारोऽपि ॥११७॥

1B स्तनद्वयेऽपि ।; P1 स्तनद्व ।; P2 स्तनद्वयेति । 2 B P2 पृथौ विशाले at the end. 3 P1 P2 यास्यति bef. यदि 4 B स्तनद्वये····तदा तवैव twice. 5 P1 add. अनल्पं वैदग्ध्यं विवर्धयन्ति । यास्तासां तथा । अनन्येति पाठे । 6 P1 वर्धयन्तीति 7 B om. किन्तु; P2 नलस्यैव किन्तु 8 P1 add. अथवा न विद्यते अन्यत् वैदग्ध्यं यस्मात् तस्याऽनन्यस्य सर्वोत्कृष्टस्य वैदग्ध्यस्य विवर्धनीनाम् । सममलङ्कारः ।; P2 lecto. sup. mg. add. sec. m. सममत्राऽलङ्कारः । समं योग्यता योगो यदि सम्भावितः क्वचिदिति लक्षणात् ॥११८॥

1 B om. एकः सुधांशुरिति । P1 एकः 2 P1 तदीयस्य 3 P1 चन्द्रस्य 4 P1 P2 आनन्दसेककर्ता 5 P1 सतो 6 B वर्तते; P1 add. एव 7 B om तत्र हि····°मिति व्याख्या ॥ 8 P2 om. सिच्यते····व्युत्पत्त्या 9 P2 add. च 10 P1 °प्रकरणे कृतेऽपि 11 B P1 तमासेच 12 P1 add. रूपकम् ॥११९॥

1 P1 अहो तप । 2 P1 य एव 3 P2 त्वदीयो पाणि 4 B तस्य 5 P1 तथा°—॥१२०॥

1 P1 यस्ते न । 2 P2 वृक्ष 3 B om. ने 4 P1 P2 अङ्गानां 5 P1 °स्थूल° 6 P2 om. विसर्गः 7 P1 add. समस्तवस्तुविषयं रूपकम् ॥१२१॥

1 B °कृता इति ।; P1 कांसी । P1 add. कारसी इति अपभ्रंशः । 3 P2 प्रकारो 4 B स तथा 5 P1 तुलादण्ड 6 P1 वायुं वायोः अनु° 7 P2 मिथः here 8 B P2 om. विसर्गः 9 P1 add. रूपकम् । रश्मिपदं श्लिष्टम् ॥१२२॥

1 P2 text °श्रुत° 2 B °श्रुत इति ।; P1 सत्व ।; P2 °श्रुतेति । 3 B अस्त°; P2 °संयुक्ताः 4 B अभ्यु° 5 P1 विशन्तु 6 P1 मधूच्छिष्टं 7 P2

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

किं विशिष्ट: ? 8 B तत्पाणे: 9 P2 त्व° 10 P1 कुचयो: 11 P1 पल्लविका: 12 P1 स्वेदार्द्रे त्वत्करे 13 P1 गलिष्यन्ति° 14 B om. यन्निर्गता···· प्रविशन्तु 15 P1 om. तं 16 B °दुह्यते 17 P2 मृत्तिकोपा° 18 P1 विनाशकाले लीयते 19 P1 add. आशीरूपकं च ।। P2 add. हतेन नल-पाणिपद्मेन सह तव कुचस्पर्शो भवत्विति आशीरलङ्कार: रूपकं च ।।१२३।।

1 P1 बन्धा 1 P2 बन्धाठयननानारतेति । 2 P2 क्रीडावने 3 P2 वारं once 4 B om. प्रसूनवृष्टिं 5 P2 प्रतीच्छतां 6 B सुरत° 7 P1 वात्स्याय-नमुनिप्रणीतै: पङ्कजाव्सनवेणुदारितप्रभृतिभि: करण° 8 P2 add. नानाविधं 9 P2 om. तै: 10 B प्रतिताम् 11 B °मूर्ध्नो° 12 B P2 मुञ्चति 13 P2 om. युवति°·········°शेष: 14 P1 add. अनुप्रासो रूपकं प्रतीय-मानोत्प्रेक्षा श्लेष: ।।१२४।।

1 P1 अन्यो । 2 P2 om. ते·······कामस्य; but recto. inf. mg. add. अपि तेऽपि तवाऽपि मनसी व्यतिभाताम् । कीदृशे ?। विळसन्त उल्लसन्त: विभ्रमा विलासा ययोस्ते । अत्रोत्प्रेक्षते मनसिजस्य कामस्य 3 B P1 om. युग्मं 4 P1 द्वयणुकृत् 5 P1 तनु: 6 P2 द्वयणुकादि: 7 P1 समवाय° 8 P1 जगदु° 9 P1 °संयोगात् 10 P1 add. तत् 11 B om. द्वयणुकम् 12 P1 add. वसन्ततिलका वृत्तम् । मनसिजस्येति साभिप्रायम् । आशी: समुत्प्रेक्षा च ।।१२५।।

1 P2 text विलस° 2 P1 काम ।; P2 काम: कौसुमचापेति । 3 B om. असौ 4 P2 add. दुष्यति 5 B निद्वेषि 6 P2 अन्वयाज्जातां 7 P2 ग्रीवाया: 8 P1 add. तया 9 P add. लम्बमानया 10 P1 °देशेऽव 11 P1 निवसत् विलसत् सिन्दूरवत् सौन्दर्यं; P2 निवसत् सिन्दूरवत् सौन्दर्य 12 P1 add. अथ च सिन्दूरस्य सौन्दर्यं यस्याम् । 13 P1 विधीयते 14 P1 add. च; P2 दोरका 15 P1 सिन्दूररेखासदृशो 16 B om. शार्दूलविक्रीडितं वृत्तम् । 17 P1 add. अनुप्रासो रूपकमुत्प्रेक्षा श्लेषश्च उपमा वा 11; P2 lecto. sup. mg. add. अत्र वक्ष्यमाणश्लोके च शार्दूलविक्रीडितं वृत्तम् ।।१२६।।

1 P1 त्वद्गु । 2 P1 add. पञ्चविंशतियष्टिका 3 P1 add. धनुर्वल्लरीं 4 P1P2 लासित° 5 P1 add. भज्यमानं 6 B P2 om. रोमाली 7 P2 om. बिलं 8 P1 add. विध्यन्त इत्यर्थ: 9 P1 रोमा-वलिरेव; P2 रोमावली 10 P1 add. राजहंस इव । पक्षे, आताम्रचरणा ततो हंस: । अनुप्रासो रूपकं च ।।१२७।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P2 text तत्पत्रपत्रा° 2 P1 पुष्पे ।; P2 पुष्पेपुश्चिकुरेष्विति । 3 P2 om. केशेपु 4 P1 add. चिक्षिपे निरस्तवान् । अथवा अनुपसर्गस्याऽपि धातोर्निक्षेपार्थवाचकत्वम्; B P2 निचिक्षिपे 5 P1 add. पुष्पेपुरिति साभिप्रायम् । 6 P2 °स्तले 7 P2 त्वं 8 P1 add. ललाटमूलेभ्रूद्वयम् । अथवा 9 P1 भालस्यैव 10 P1 om. अनुभ्राष्टं भ्राष्टस्या° 11 P1 add. निर्जित: 12 P2 om. त्वाम् 13 B आश्रयेत् 14 P1 om. अधुना 15 P1 पर्ण° 16 P1 add. शरचयेन कुसुमसमूहस्य धनुषा च भ्रूयुगस्याऽन्तर्निगीर्ण-स्याऽध्यवसानादतिशयोक्ति: । समासोक्ति: । रूपकमुपमाऽनुप्रासोऽपि । पातालमिव ते नाभि: स्तनौ क्षितिधरोपमौ (का. प्र°. X.587) इत्युपमायाम् उपमानस्य प्रमाणगताधिकतानुचितार्थत्वं दोष इति मम्मटेनोक्तम् । तेनैव न्यायेन स्तनयो: शैलत्वारोपणं यद्यपि दोष एव तथापि पर्णशालायत इत्युपमायामेतद्रूपकमङ्गन् । एतदभावे उपमाया अनुदय एव स्यात् । अत उपमानुरोधादधिकप्रमाणरूपणं न दोषमावहति । प्रत्युत अतिशयप्रतिपादनादौचित्यमेवाऽनिर्वि[ण्ण]पुरुषव्यापारे वर्णनाद्वा अत्र न दोष: इति सर्वमनवद्यम् ।।१२८।।

1 P1 इत्या ।; P2 इत्यालपत्यथेति । 2 P1 add. तत्र 3 P2 om. पक्षिणि 4 P1 add. विपिने 5 P1P2 तां भैमीं 6 P1 पुरीयु: 7 P1 add. गवेषणं 8 P2 इति दीर्घ° 9 P1 इति किम् ?। 10 P1 om. ते 11 P1 त्वं here 12 P1 add. वसन्ततिलका वृत्तम् । अनुप्रास: । समासप्रौढिरोजो गुण: ।।१२९।।

1 B चेतोजन्म इति ।; P1 चेतो ।; P2 चेतोजन्मशरेति । 2 P1 अन्तर्मध्ये here 3 BP2 प्राप आनर्च्छ 4 P2 पुङ्गवी 5 P1 add. तस्य हैयङ्गवीनमिति उपमा तेनाऽन्तर्निगीर्ण सारभूतमध्यवसितम् । अथवा उपमेयं पतङ्गपुङ्गवगवी 6 B °वदि° 7 B तत्र 8 P2 निरतिमृष्टं 9 P1 add. चेतोजन्मेति साभिप्रायम् 10 B °संयोगै: 11 P1 °विषरूपत्वात्; and add. भजेते विषरूपत्वं तुल्यांशे मधुसर्पिणी (?) ति । 12 P1 तृप्तेरभावेऽपि here 13 P1 add गोरतद्धितलुकि (पा° V. iv. 92) इति पाणिनीयम् । ह्योगोदोहोद्भवं हैयङ्गवीनम् (अ° चि° III. 71) । 14 P1 add. शार्दूल-विक्रीडितं वृत्तम् । अनुप्रासोऽतिशयोक्ति: । समासोक्तिर्विरोधाभासश्च । हैयङ्गवीनं स्वादं स्वादं प्राप्ताऽपि अभीष्टं तत्फलं तृप्तिं न परं प्राप । यावद-प्रार्थितमप्यनर्थं विषमं तापं प्रापेति व्याख्यायां विषमश्च ।।१३०।।

1 P2 text वियति 2 B तस्या दशा इति ।; P1 तस्या: । P2 तस्या दशाधिपतिबन्धुमिति । 3 P1 तं हंस° 4 BP1 अनेन ·······दूरेऽपि सता aft. दूरे विसर्जयेत् । 5 P1 दृष्टि° 6 P1 जाता 7 P2 बाष्प°·······पश्यति at the end. 8 P1 बाष्पाकुलिता 9 P1 add चित्रप्रत्यय: 10 P1P2 om.

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

उक्तं च 11 P1 add. यत् 12 P1 add. वसन्ततिलका वृत्तम् । अतिशयोक्तिर्विरोधोऽपि ।।१३१।।

1 P2 text °रन्यां 2 P1 अस्ति ।; P2 अस्तित्वं कार्यसिद्धेरिति । 3 P1 add. एतामिति पाठान्तरम् अन्यामिति एक इति; P2 add. एक पाठान्तरं मूलपाठः । 4 P2 एक 5 P1P2 add. तत् 6 P1 आचष्टे इत्येवं-कर्मा here 7 B तृम् 8 P2 om. आचष्टे········ °धर्मा 9 P1 °सिद्धिः 10 B om. असिद्धिः 11 P1 add. मूलपाठे अन्यां द्वितीयाम् । एतां पाठान्तरे दमयन्तीं; P2 एनां पाठान्तरं मूलपाठः । अन्यां द्वितीयां दमयन्तीं 12 P1 add. उपहारीकृतवाक्याः उक्तवचनाः; P2 उक्तवत्याः 13 P1 इति किम् ? । 14 P2 om. विसर्गः 15 P1 add. स्रग्धरा वृत्तम् । उत्प्रेक्षा जातिश्च ।।१३२।।

1 P1 सरसि ।; P2 सरसि नृपमिति । 2 P1P2 उद्वतस्य 3 P2 om. मूल° 4 P1 नलं 5 P2 om. नृपं 6 P1 °पल्लवपर्णमयीं 7 P1 शय्या 8 P1 add. तत्राऽपि म्लानो भवतीत्येवंशीलम् । स्थायिनमिति पाठे पल्लवमयी या शय्या; P1P2 add. तत्र स्थितम्; म्लायितमिति पाठे 9 P1 मुर्मुरी-कुरुते; P2 om. मर्मरीकरोति 10 P1P2 °नोकुहस्य 11 B om. कामस्य 12 P1 add. तस्य 13 P1 add. मालिनीवृत्तम । अनुप्रासोपमे ।।१३३।।

1 P1 पर ।; P2 om. परवतीति 2 P2 add. तत्सर्वं सतां स 3 P2 आसन् 4 P2 om. शशंस 5 P1 इति किम् 6 P2 तपः तेऽतिगरतं हे दमयन्ति ! 7 P1 add. पितृ° 8 P1 add. त्वं 9 P1 add. मां प्रत्याह 10 B om. सुकृतां·········तावदेव विलम्बः ।। 11 P2 असुकक्षकृत्य 12 P1 add. अर्थान्तरन्यासः ।।१३४।।

1 B om. कथितमपीति । नरे; P1 कथि । 2 P2 वचपालः तासमपि (?) 3 B om. शंसेः शब्दकर्मकस्य; P2 शब्दकर्मत्वात् 4 P2 om. अनेनाऽऽनन्दाङ्कता 5 P1 om. तत् 6 edr. add. अन्वाचचक्षे 7 P1 add. अनुप्रासो जातिश्च ।।१३५।।

1 P2 om. श्रीहर्ष········यम् । and add. तदर्धम् 2 P1 श्रीहर्ष-मित्यादि । 3 P1 तार्तीयैक° 4 P1 add. तीयादीकस्वार्थे वा वक्तव्यः । न विद्यायाः विद्या चेद्वच्या तदा तृतीया विद्येत्येव भवति । शार्दूलविक्रीडितम् । ; P2 add. सर्गोऽगमत् ।

1 B om. श्रीमानालिग°········स्म टीकाम् ।।1-6 ।। 2 P1 महापण्डित श्री चाण्डू°; P2 om. श्रीम°········विरचितायां 3 B om. पतिपतङ्गदूतो नाम 4 BP1 om. समाप्तः and recto. mg. add. ७१५ ग्रन्थ; P2 add. ग्रन्थ ७४४ ।।छ।।श्रीः।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

सर्ग—४

[1]पूर्वसर्गे दमयन्त्या नलेऽनुरागं सप्रपञ्चमनुवर्ण्य[2] हंसमुखेन नलस्याऽपि दमयन्त्यामनुरागं निर्वर्ण्य[3] प्रथमानुरागाख्यं विप्रलम्भं विवर्णयिषुः कविश्चतुर्थं सर्गमारभते ।।

अथ नलस्य गुणं गुणमात्मभूः सुरभि तस्य यशःकुसुमं धनुः ।
श्रुतिपथोपगतं सुमनस्तया तमिषुमाशु विधाय जिगाय ताम् ।।१।।

अथ[1] नलस्येति । अथाऽनन्तरमात्मभूः कामः तां भैमीं जिगाय । किं कृत्वा ? ।[2] नलस्य गुणं[3]- गुणं[4] मौर्वीं विधाय । तथा तस्य नलस्य सुरभिः प्रसिद्धं यश एव कुसुमं धनुर्विधाय । तथा तं नलमिषुं बाणं विधाय ।[5] किं भूतं तम्[6] ? । श्रुतिपथे कर्णमार्गे उपगतम् । कया इषुं विधाय ? । सुमनस्तया । नलो हि सुमना विद्वान् । स्मरस्याऽपि धनुर्गुणो, नलस्य पद्मिनीनालस्य[7] गुणः तस्य धनुरपि सुगन्धि[8] कुसुमं तस्य इषुरपि आकर्णकृष्टः सुमनः पुष्पं च । एवं मौर्वी धनुर्बाणलक्षणां[9] साधनसामग्रीम् आसाद्याऽऽशु शीघ्रं तां[10] वशीचलारेत्यर्थ[11] ।।१।।

[1]यदतनुज्वरभाक् तनुते स्म सा प्रियकथासरसीरसमज्जनम् ।
सपदि तस्य चिरान्तरतापिनी परिणतिर्विषमा समपद्यत ।।२।।

[1]यदतनुज्वरेति । [2]यत्सा दमयन्ती प्रियस्य कथा एव सरसी तस्या एव रसे[3] शृङ्गारादौ विप्रलम्भे मज्जनम् आप्लवनं तनुते स्म । किं विशिष्टा सा ? । अतनुज्वरं कामज्वरं भजते या सा तथा । सपदि तत्क्षणं तस्य मज्जनस्य विषमा[4] परिणतिः [5]समपद्यत विषमपरिणामो बभूव । किं भूता परिणतिः[6] ? । चिरकालमान्तरं मनस्तापयतीत्येवंशीला ।[7] किल ज्वरभाजां तापार्त्या अप्सु आप्लवनं[8] कुर्वतां त्रिदोषलक्षणो विषमपरिणामो भवति । अस्या[9] अपि प्रियकथया विप्रलम्भो ववृधे[10] ।।२।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]ध्रु वमधीतवतीयमधीरतां दयितदूतपतद्गतवेगतः ।
स्थितिविरोधकरीं द्व्यणुकोदरी तदुदितः स हि यो यदनन्तरः ।।३।।

ध्रु वमधीतवतीति । ध्रु वं निश्चितम् इयं द्व्यणुकोदरी परमाणुद्वयं द्व्यणुकं परमाणोर्निरवयवत्वेन [3]प्रचयविशेषाभावात् तदपि परमाणु परिमाणमेव[4] द्व्यणुकमिवोदरं यस्याः सा तथा । दयितस्य दूतो योऽसौ [5]पतन् पक्षी हंसः तस्य वेगात् अधीरतां कातरत्वमधीतवती । किं विशिष्टामधीरताम् ? । [6]स्थितेरवस्थानस्य[7] विरोधकरीम् । हि यस्मात् यो यस्मादनन्तरः[8] स तदुदितः[9] तदुत्पन्नः । कारणोत्तरक्षणे हि कार्य-निष्पत्तिः । हंसगमनानन्तरवेवाधीरतादर्शनादियमाशङ्का[10] ।।३।।

अतितमां समपादि जडाशयं स्मितलवस्मरणेऽपि तदाननम् ।
अजनि पङ्गु रपाङ्गनिजाङ्गणभ्रमिकणेऽपि तदीक्षणखञ्जनः ।।४।।

[1]अतितमामिति । तस्या[2] [3]आननमतितमां स्मितस्य लवो [4]लेशस्तस्य स्मरणेऽपि जडाशयं समपादि । हास्यविस्मरणशीलं सम्पन्नम् । तथा तस्या ईक्षणं लोचनं तदेव खञ्जनः पक्षी अपाङ्गणं एव निजाङ्गणं तत्र भ्रमिकणो भ्रमणलेशः तत्राऽपि पङ्गु रजनि । कटाक्षं विस्मृतवान्, विप्रलम्भव्याकुलत्वात् । अथ च इतरान् खञ्जान् कुर्वन्नपि स्वयमङ्गणेऽपि पङ्गुर्बभूव[5] ।।४।।

किमु तदन्तरुभौ भिषजौ दिवः स्मरनलौ विशतः स्म विगाहितुम् ।
तदभिकेन चिकित्सितुमाशु तां मखभुजामधिपेन नियोजितौ ।।५।।

किमु[1] तदन्तरिति । [2]तस्या अन्तर्हृदयम् उभौ स्मरश्च नलश्च एतावेव दिवः स्वर्गस्य भिषजावश्विनीकुमारौ विगाहितुं विशतः स्म प्रविष्टौ । अतिसुन्दरवत्त्वादुत्प्रेक्षा । किं भूतौ ? । मखभुजामधिपेन इन्द्रेण नियोजितौ प्रहितौ । किं कर्तुम् ? । तां देवीमाशु चिकित्सितुम् । किं भूतेन[3] ? । तां [4]दमयन्तीं प्रति [5]अभिकेन कामुकेन[6] । [7]अनुकाभि-काभीकः कमिता (पा° V. ii. 74)[8] ।।५।।

कुसुमचापजतापसमाकुलं कमलकोमलमैक्षत तन्मुखम् ।
अहरहर्बहदभ्यधिकाधिकां रविरुचिग्लपितस्य विधोर्विधाम् ।।६।।

[1]कुसुमचापेति । तस्या मुखं कमलकोमलं कुसुमचापः कामः तस्माज्जातेन तापेन समाकुलं सत् रवेः रुचिभिर्ग्लपितस्य विधोर्विधां

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

प्रकारं सादृश्यं वहत्[2] ऐक्षत । किं भूताम् ? । अहरहः प्रतिदिनम् अभ्यधिकाधिकाम्[6] ।।६।।

तरुणतातरणिद्युतिनिर्मितद्रढिम तत्कुचकुम्भयुगं तदा ।
अनलसङ्गतितापमुपैतु नो कुसुमचापकुलालविलासजम् ।।७।।

[1]तरुणतेति तस्याः[2] कुचकुम्भयुगं तदा विरहकाले [3]अनलसङ्गतिः न नलस्य संयोगः तथा [4]तापं किं नो उपैतु मा प्राप्नोति । अपि तु उपैतु । कुम्भो हि अनलस्य वह्नेः संयोगात् तप्यते । किं भूतम् ? । [5]तरुणता एव तरणेः श्रीसूर्यस्य द्युतिस्तया निर्मिता द्रढिमा यत्र तत्तथा । पुनः किं भूतम् ? । कुसुमचापः काम एव कुलालस्तस्य विलासाज्जातम्[6] ।।७।।

अधृत यद्विरहोष्मणि मज्जितं मनसिजेन तदूरुयुगं तदा ।
स्पृशति तत्कदनं कदलीतरुर्यदि [1]मरुज्वलदूषरदूषितः ।।८।।

[2]अधृत यदिति । तस्या ऊर्वोर्युगं मनसिजेन[3] विरहोष्मणि मज्जितं सत् तदा [4]यत्कदनं कदर्थनम् अधृत, तत्कदनं कदलीतरुः तदा स्पृशति [5]दधाति । यदि मरुदेशे ज्वलता तप्तेन ऊषरक्षेत्रेण दूषितः स तरुर्भवति[6] ।।८।।

स्मरशराहतिनिर्मितसंज्वरं करयुगं हसति स्म दमस्वसुः ।
अनपिधानपतत्तपनातपं तपनिपीतसरःसरसीरुहम् ।।९।।

[1]स्मरशराहतेति । दमस्वसुः करयुगं[2] स्मरस्य शराहतिभिः निर्मितसंज्वरं [3]सन्तप्ततं सत् तपेन[4] ग्रीष्मेण निपीतं शोषितं यत्सरः तस्य सरसीरुहं कमलं हसति स्म । तस्मादपि तप्तं बभूव । किं भूतं कमलम् ? । अनपिधानं निरावरणं यथा भवत्येवं पतत् तपनस्य श्रीसूर्यस्य आतपो यत्र तत्तथा[5] ।।९।।

मदनतापभरेण विदीर्य नो यदुदपादि हृदा दमनस्वसुः ।
निबिडपीनकुचद्वययन्त्रणा तमपराधमधात्प्रतिबध्नती ।।१०।।

[1]मदनतापेति । यत् [2]दमनस्वसुः हृदा हृदयेन मदनस्य तापभरेण कृत्वा विदीर्य स्फुटित्वा नो उदपादि[2] नोत्पतितम् । तमपराधं निबिडं दृढं पीनं च[4] यत्कुचद्वयं तस्य यन्त्रणात् अधोऽधात् दधार[5] । किं कुर्वती ? ।

CC-0. Digitized by Sri Muthulakshmi Research Academy

प्रतिबध्नती । [6]बिदीर्योत्पन्ने प्रतिबन्धं कुर्वती ।[7] तापनिरोधं कुर्वती । अन्यदपि गृहं यत् निबिडैः पीनैः चेष्टकादिभिः बन्धैर्यन्त्रितं भवति तत् प्रज्वलनादितापेन न[8] स्फुटति[9] ।।१०।।

निविशते यदि शूकशिखा पदे सृजति सा कियतीमिव न व्यथाम् ।
मृदुतनोर्वितनोतु कथं नु[1] तामवनिभृत्तु निविश्य हृदि स्थितः ।।११।।

निविशत[2] इति । यदि शूकस्य शिखा किं शारुसूचिः[3] पदे चरणे निविशते । ततः सा कियतीमिव[4] व्यथां न सृजति । अपि तु [5]महाव्यथां कुरुते । तस्या मृदुतनोर्दमयन्त्याः [6]तु पुनः स[7] अवनिभृन्नलः हृदि निविश्य[8] स्थितः सन् तां पीडां कथं नु[9] न तनोतु । [10]अपितु करोतु । अथ च कोमलतनोर्हृदये[11]वनिभृत् पर्वतः प्रविष्टोऽतिव्यथते[12] ।।११।।

मनसि सन्तमिव प्रियमीक्षितुं नयनयोः स्पृहयाऽन्तरुपेतयोः ।
ग्रहणशक्तिरभूदिदमीययोरपि न सन्मुखवास्तुनि वस्तुनि ।।१२।।

[1]मनसीति । इदमीययोरस्याः समन्धिनोर्नयनयोः सन्मुखवास्तुन्यपि अभिमुखस्थितेऽपि वस्तुनि ग्रहणशक्तिर्दर्शनशक्तिर्नाभूत् । किं भूतयोः[3] ? । उत्प्रेक्षते-मनसि सन्तं प्रियं[4] नलमीक्षितुं स्पृहया अन्तर्हृदयमध्ये[5] उपेतयोः प्रविष्टयोरिव[6] ।।१२।।

हृदि दमस्वसुरश्रुझरप्लुते प्रतिफलद्विरहात्तमुखानतेः ।
हृदयभाजमराजत चुम्बितुं नलमुपेत्य किलागमितं मुखम् ।।१३।।

[1]हृदीति । दमस्वसुर्मुखमराजत । किं भूतम् ? । हृदिप्रतिफलत् प्रतिविम्बितम् । किं भूते ? । अश्रूणां झरैः प्रवाहैः [2]प्लुते । किं विशिष्टायाः ? । विरहेणाऽऽत्ता गृहीता मुखस्यानतिः[3] यया तस्यास्तथा । किल उत्प्रेक्षतेहृदयभाजं नलं चुम्बितुमुपेत्य पुनरपि[4] आगमितम् । आगमः सञ्जातो यस्य तदागमितम् आगतम् । तारकादित्वादितच्[5] ।।१३।।

सुहृदमग्निमुदञ्चयितुं स्मरं मनसि गन्धवहे न मृगीदृशः ।
अकलि निःश्वसितेन विनिर्गमानुमितिनिह्नुतवेशनमायिता ।।१४।।

[1]सुहृदमिति । लोकैर्मृगीदृशोर्दमयन्त्या निःश्वसितेन कृत्वा गन्धवहे वायौ विनिर्गमेन निःसरणेन अनुमितं यत् निह्नुतवेशनं [2]गुप्तप्रवेशनं

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

तस्य [3]मायिता कपटत्वं[4] किं न अकलि। अपि तु [5]वायोर्मायाविता ज्ञाता। किं कर्तुं प्रवेश: ?। मनसि स्मरं सुहृदमग्निं कामानलम् उदञ्चयितुम् उद्दीपयितुम्। अथवा नि:श्वसितेन गन्धवहेन नि:श्वास-वायुना मृगीदृशो मनसि[6] विनिर्गमेनाऽनुमितस्य निह्नुतवेशनस्य मायिता अकलि धृता[7] ।।१४।।

विरहपाण्डिमरागतमोमषीशितिमतन्निजपीतिमवर्णकैः।
दश दिश: खलु तद्दृगकल्पयल्लिपिकरी नलरूपकचित्रिताः ।।१५।।

[1]विरहेति। तस्या दृग् दृष्टिरेव लिपिकरी चित्रकरी।[2]। खलु दश दिश: नलस्य रूपकैः चित्रिताः अकल्पयत्। सर्वत्र नलं पश्यति स्म। कैः ?। विरहस्य पाण्डिमा तथा रागोऽनुराग एव रागः रक्तत्वम्। तमो मोह एव मषी तस्याः शितिमा कृष्णत्वम्। तथा[3] तस्य नलस्य निजो यः पीतिमा एते एव[4] वर्णकाः तैः। अथवा तस्य पीतिमा तथा दमयन्त्याश्च[5] पीतिमा[6] ।।१५।।

[1]स्मरकृतिं हृदयस्य मुहुर्दशां बहु वदन्निव नि:श्वसितानिलः।
व्यधित वाससि कम्पमदःश्रिते त्रसति कः सति नाश्रयबाधने ।।१६।।

[2]स्मरेति। नि:श्वसितानिल: अमुया [3]श्रिते वाससि कम्पं व्यधित। उत्प्रेक्षते-स्मरस्य[4] कृतिं कामकृतां[5] हृदयस्य दशामवस्थां मुहुर्बहु[6] यथा भवति एवं वदन्निव।[7] युक्तोऽयमर्थः। आश्रयस्य बाधने सति को न त्रसति। [8]वाससो यतो हृदयमाश्रय:[9] ।।१६।।

करपदाननलोचननामभिः शतदलैः सुतनोर्विरहज्वरे।
रविमहो बहु पीतचरं चिरादनिशतापमिषादुदसृज्यत ।।१७।।

करपदेति।[1] सुतनोर्दमयन्त्याः विरहज्वरे सति[2] करकमलपदाम्बुज-आननपद्म-लोचनपङ्कज[3] इति नामानि येषां तैः शतदलैः पद्मैः अनि-शतापस्य मिषात् रवेः श्रीसूर्यस्य महस्तेज उदसृज्यत उत्सृष्टम्। किं भूतम् ?। चिरात् प्रभृति बह्वत्यर्थं पीतचरं पूर्वं पीतम्। [4]भूतपूर्वे-चरट् (पा॰. V. iii. 53)[5] ।।१७।।

उदयति स्म तदद्भुतमालिभिर्धरणिभृद्भुवि तत्र विमृश्य यत्।
अनुमितोऽपि च बाष्पनिरीक्षणाद् व्यभिचचार न तापकरो नलः ।।१८।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]उदयतीति । [2]तदद्भुतमुदयति स्म[3] यत्[4] तत्र तस्यां[5] धरणिभृतो [6]राज्ञः भुवि[7] पुत्र्यां दमयन्त्यां विषये आलिभिः[8] सखीभिः विमृश्य बाष्पस्याऽश्रुणो निरीक्ष्य क्षणात् अनुमितोऽपि नलः तापकरो न व्यभिचचार । नलएवाऽस्या[9] विरहज्वरतर इति सखीभिः सम्यगेव ज्ञातम् । यतो धरणिभृतो भुवि पर्वतप्रदेशे धूमभ्रान्त्या बाष्पस्य [10]गोपालतप्तघटीबाष्पस्य[11] निरीक्षणात् विमृश्य योऽनलो वह्निरनुमितो भवति । तापकरः स व्यभिचरति । यतो यः सन्ततोर्ध्वबहुलधूमत्वात् वह्निमान् अयं पर्वत[12] इत्यनुमीयते । तत्र वह्निर्भवत्येवाव्यभिचारी । अन्यत्र बाष्पेण व्यभिचरति । अत्र[13] बाष्पेण लिङ्गेनाऽनुमितोऽपि नलो न व्यभिचरति स्म[14] इत्याश्चर्यम् । तापकरोऽनल इति सन्धौ सति । पक्षे, नलः पक्षे चाऽनल इति अकारप्रश्लेषे शब्दप्रश्लेषः[15] ।।१८।।

हृदि विदर्भभुवः प्रहरन् शरैः रतिपतिर्निषधाधिपतेः कृते ।
कृततदन्तरगस्वदृढव्यथः फलदनीतिरमूर्च्छदलं खलु ।।१६।।

हृदि[1] विदर्भेति । [2]रतिपतिर्विदर्भभुवो[3] हृदि शरैः निषधाधिपतेः कृते नलहेतोः प्रहरन् सन् अमूर्च्छत् वृद्धि प्राप । [5]खलु इति शङ्के । कृततदन्तरगस्वदृढव्यथः सन् मूर्च्छां प्राप । कृतः[7] दमयन्त्याः तस्य हृदयस्य [8]अन्तरगस्य स्वस्यात्मनो स्वरूपाऽऽत्मनो दृढव्यथो[9] येन स तथा । अत एव फलन्ती अनीतिर्यस्य स तथा । कामेन हृदयमध्यस्थितः[10] स्वात्मा विद्ध इति मूर्छितोऽनीतिश्च फलिता[11] ।।१६।।

विधुरमानि तया यदि भानुमान् कथमहो स तु तद्हृदयं तथा ।
अपि वियोगभरास्फुटनस्फुटीकृतदृषत्व मजिज्वलदंशुभिः ।।२०।।

[1]विधुरिति । यदि तया विधुः चन्द्रो भानुमानमानि । कया ? । विधुरमात्मानं मन्यते विधुरमानिनो भावः तया । एकमपि[2] पदम् आवर्त्य[3] द्विधा व्याख्येयम् । अहो आश्चर्ये । तु पुनः स चन्द्रस्तस्या हृदयं कथं तथांशुभिः अजिज्वलत् । किं भूतम् ? । वियोगभरेण वियोगाधिक्येन[4] यदस्फुटनं[5] तेन स्फुटीकृतं दृषत्वं येन तत् तथाविधमपि कथं ज्वालयामास । चन्द्रस्याऽविधुरत्वात् श्रीसूर्यवद्दीपनमनुचितमित्यर्थः[6] ।।२०।।

हृदयदत्तसरोरुहया तया क्व सदृगस्तु वियोगनिमग्नया ।
प्रियधनुः परिरभ्य हृदा रतिः किमनुमर्तुमशेत [1]चिताचिषि ।।२१।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

²हृदयदत्तेति । तथा दमयन्त्या विरहतापवशात् हृदये दत्तं सरोरुहं यया³ तथाविधया ⁴वियोगनिमग्नया सदृक् सदृशी रतिः कामवधूः⁵ क्वाऽस्तु कथं भवतु । ⁶यतः किं रतिः हृदा प्रियस्य धनुः कमलरूपं परिरभ्य अनुमतुं म्⁷ अनुगमनं कर्तुं चितायाः⁸ अर्चिषि यस्य⁹ तस्मिन् चितार्चिषि वह्नौ¹⁰ अशेत । अपितु न¹¹ यदि सा तथा प्रविष्टा स्यात्तदा उपमानं स्यात्¹² ।।२१।।

अनलभावमियं स्वनिवासिनो न विरहस्य रहस्यमबुध्यत ।
प्रशमनाय विधाय तृणान्यसूञ्ज्वलति तत्र यदुज्झितुमैहत ।।२२।।

²अनलेति । इयं दमयन्ती स्वस्मिन् निवासिनो विरहस्य रहस्यं सारमनलभावं ⁴नलस्याऽभावम् अप्राप्तिमथ च अनलभावं वैश्वानरभावं नाऽवबुध्यत न जज्ञौ । यत् तत्र विरहे ज्वलति सति तस्य विरहानलस्य प्रशमनायाऽसून्प्राणान् तृणानि विधाय तृणवत् सा उज्झितुमैहत ईहाञ्चक्रे । यदि जानाति तदा किं वह्नेः प्रशमनाय⁵ उपरि तृणानि क्षिपति⁵ ।।२२।।

प्रकृतिरेतु गुणः स न योषितां कथमिमां हृदयं मृदुनामयत् ।
तदिषुभिः कुसुमैरपि दुन्वता सुविवृतं विबुधेन मनोभुवा ।।२३।।

¹प्रकृतिरेत्विति । योषितां हृदयं नाम मृदु भवति इति योऽयं प्रकृतिर्गुणः स इमां दमयन्तीं कथं न एतु ²कथं न प्राप्नोतु । अपि तु तस्या हृदयं प्रकृत्यैव मृदु तच्च स्वाभाविक मृदुगुणत्वम् । मनोभुवा विबुधेन देवेन सुविवृतं प्रकटितम् । किं कुर्वता ? । कुसुमैरपि इषुभिः तत् हृदयं दुन्वता । अथ च यो विबुधो विद्वान् स³ सन्दिग्धमर्थं सुष्ठु विवृणोति टीकां कुरुते । यत् मृदु तत् कुसुमैरपि पीड्यते⁴ ।।२३।।

रिपुतरा भवनादविनिर्यतीं विधुरुचिर्गृहजालबिलैर्नु ताम् ।
इतरथात्मनिवारणशङ्कया ¹ज्वरयितुं विशवेषधराऽविशत् ।।२४।।

²रिपुतरेति । नु इति वितर्के । विधोश्चन्द्रस्य रुचिः ³विशस्य वेषधरा सती तां दमयन्तीं ज्वरयितुम् अविशत् । विरहेण ⁴पद्मिनीकन्दा हृदये⁵ दत्ताः चन्द्रकान्तिवदुत्प्रेक्ष्यन्ते⁶-कै प्रविष्टाः ? । गृहस्य जालानां गवाक्षाणां बिलैः छिद्रैः । किं कर्तुम् ? । ⁸तां ज्वरयितुम् । किं भूता ? । रिपुतरा⁹ प्रकर्षेण विरहिणीत्वात् शत्रुभूता । किं भूताम् ? । भवनात्

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

गृहात्[10] अविनिर्यतीम् । दमयन्ती हि गृहान्न निर्गच्छति । किमर्थं छलेन प्रविष्टा ? । इतरथा अन्यथा[11] आत्मनो निवारणशङ्कया । शत्रुः किल प्रवेशं न लभते[12] ।।२४।।

हृदि विदर्भभुवोऽश्रुभृति स्फुटं विनमदास्यतया प्रतिबिम्बितम् ।
मुखदृगोष्ठमरोपि मनोभुवा तदुपमाकुसुमान्यखिलाः शराः ।।२५।।

हृदि[1] विदर्भेति । मनोभुवा कामेन विदर्भभुवो हृदि[2] मुखं च दृशौ च ओष्ठौ च मुखदृगोष्ठं तस्य [3]मुखादेः उपमेयस्य उपमाः कुसुमान्येवाऽखिलाः शराः [4]अरोपि आरोपितम् । समाहारद्वन्द्वत्वादेकत्वम्[5] । मुखस्य पद्मं, दृशोरिन्दीवरद्वयम्, अधरयोर्बन्धुजीवम्[6] उपमा । कुसुमं शराः । स्फुटं निश्चितम्[7] । किं भूतम् ? । विनमदास्यं यस्याः तस्याः भावस्तत्त्वं तया प्रतिबिम्बितम् । किं भूते हृदि ? । अश्रुभृति विरहाश्रुपूर्णे । अतो मुखादिप्रतिबिम्बः[8] ।।२५।।

विरहपाण्डुकपोलतले विधुर्व्यधित भीमभुवः प्रतिबिम्बितः ।
अनुपलक्ष्यसितांशुतया मुखं निजसखं सुखमङ्कमृगार्पणात् ।।२६।।

[1]विरहपाण्डु इति । विधुश्चन्द्रः भीमभुवो दमयन्त्या विरहेण पाण्डुनि कपोलतले प्रतिबिम्बितः सन् मुखं [2]सुखम् [3]अनायासेन यथा भवति एवं निजस्याऽऽत्मनः सखायं सदृशं व्यधित[4] । कस्मात् ? । अङ्कमृगस्य कलङ्कमृगस्याऽर्पणात् । कया ? । अनुपलक्ष्याः सिता[5] अंशवो यस्य कपोले [6]प्रतिबिम्बितस्य स तथा, तस्य भावस्तत्ता तया तथा । चन्द्रः कपोले प्रतिबिम्बितोऽपि शुभ्रत्वान्न ज्ञायते । परं कलङ्केन प्रतिबिम्बितेन मुखं चन्द्रसदृशं सुखेन ज्ञायते[7] ।।२६।।

विरहतापिनि चन्दनपांशुभिर्वपुषि साऽर्पितपाण्डिममण्डना ।
विषधराभबिसाभरणानि [1]दधे रतिपतिं प्रति शम्भुविभीषिकाम् ।।२७।।

[2]विरहेति । सा दमयन्ती रतिपतिं [3]प्रति कामं प्रति शम्भोः श्री महादेवस्य विभीषिकां [4]भयानकत्वं दधे । किं भूता ? । चन्दनस्य [5]पांशुभिश्चूर्णैः वपुष्यर्पितं पाण्डिमैव मण्डनं यथा सा[6] शम्भुरपि पाण्डुः । किं भूते ? । विरहेण[7] तापिनि । पुनः किं भूता ? । विषधराः सर्पाः तदाभानि तत्सदृशानि बिसानां[8] पद्मिनीतन्तूनाम् आभरणानि यस्याः सा तथा । अतितापेन पद्मिनीकन्दाम्लानत्वात् [9]सर्पसदृशाः । यथा

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

शम्भुः सर्पाभरणः[10] पाण्डुश्च तथाहमपि भूत्वा [11]शम्भुवेषेण कामं [12]भीषयामीत्यभिप्रायः[13] ।।२७।।

विनिहितं[1] परितापिनि चन्दनं हृदि तया धृतबुद्बुदमाबभौ ।
उपनमन् सुहृदं हृदयेशयं विधुरिवाङ्कगतोडुपरिग्रहः ।।२८।।

[2]विनिहितमिति । तया परितापिनि हृदि[3] विनिहितं[4] चन्दनम् [5]आबभौ । किं भूतम् ? । तापवशात् धृता बुद्बुदा येन तत्तथा । उत्प्रेक्षते-विधुरिव । किं कुर्वन् ? । हृदयेशयं कामं [6]सुहृदम् उपनमन् आगच्छन् । किं भूतश्चन्द्रः ? । अङ्कगतः उत्सङ्गगतः[7] उडूनां[8] परिग्रहो यस्य[9] स तथा । चन्दनस्य चन्द्रसदृशत्वात् । बुद्बुदानां च नक्षत्रसदृशत्वात्[10] ।।२८।।

स्मरहुताशनदीपितया तया बहु मुहुः सरसं सरसीरुहम् ।
श्रयितुमर्द्धपथं[1] कृतमन्तरा [2]श्वसितनिर्मितमर्मरमुज्झितम् ।।२९।।

[3]स्मरहुतेति [4]तया बहु प्रचुरं मुहुः[5] सरसमार्द्रं सरसीरुहं कमल-जातीयं [6]श्रयितुं सेवितुम् अर्द्धपथमन्तरा[7] मध्येऽर्द्धमार्गं यावत् कृतम् । किं भूतम् ? । श्वसितेन निर्मितं[8] मर्मरं शुष्कपत्रत्वं यस्य तत्तथा उज्झितं तत्रैव च परित्यक्तम् । किं भूतया ? । स्मरहुताशनेन दीपितया । विरहि[9]निःश्वासस्योक्तत्वात् कमलानि शुष्कानि ।[10] अर्द्धपथमिति अन्तरायोगे द्वितीया । [11]अन्तरान्तरेण युक्ते (पा॰ II. iii. 4) ।।२९।।

प्रियकरग्रहमेवमवाप्स्यति स्तनयुगं तव ताम्यति किं [1]न्विति ।
जगदतुर्निहिते हृदि नीरजे दवथुकुड्मलनेन पृथुस्तनीम् ।।३०।।

[2]प्रियकरेति । हृदि [3]निहिते नीरजे द्वे कमले दवथुना तापेन यत् कुड्मलनं सङ्कोचस्तेन कृत्वा[4] पृथुस्तनीं दमयन्तीम्[5] इतीव जगदतुः ऊचतुः । इदं स्तनयुगं तव एवं सङ्कुचितकमलगृहीतस्तनवत् प्रियकर-ग्रहं भर्तुः [6]पाणिपीडनम् अवाप्स्यति । ततः किं नु[7] कथमिति ताम्यति[8] क्लिश्यति[9] ।।३०।।

त्वदितरो न हृदाऽपि मया धृतः पतिरितीव नलं हृदयेशयम्[1] ।
स्मरहविर्भुजि बोधयति स्म सा विरहपाण्डुतया निजशुद्धताम् ।।३१।।

त्वदितर[2] इति । सा हृदयेशयं नलं स्मरहविर्भुजि कामानले निजस्य शुद्धताम् इतीव बोधयति स्म ज्ञापितवती । कया ? । विरहेण

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

या पाण्डुता तया। इतीति[3] किम् ? । हे नल ! मया[4] त्वत्सकाशात् इतरोऽन्यः पुरुषो हृदाऽपि मनसाऽपि[5] न धृतः। यः किल दिव्येन शुद्धो भवति स शुक्लो भवति। शुद्धशब्दः श्लिष्टः[6]। गतिबुद्धी (पा°. I. iv. 52) त्यादिना कर्मत्वम्। बुधयुधनशजने (पा°. I. iii. 86) त्यादिना परस्मैपदम्[7] ।।३१।।

विरहतप्ततदङ्गनिवेशिता कमलिनी निमिषद्दलमुष्टिभिः।
किमपनेतुमचेष्टत किं पराभवितुमैहत तद्दवथुं पृथुम् ।।३२।।

[1]विरहतप्तेति। कमलिनी विरहेण तप्तं तस्या अङ्गं तत्र[2] निवेशिता सती तस्या दवथुं तापं पृथुं किमपनेतुं स्फेटयितुमचेष्टत। किं वा[3] पराभवितुमैहत अचेष्टत। कैः ? । निमिषन्ति सङ्कुचन्ति यानि दलानि तान्येव मुष्टयस्तैः। [4]यत् किलापनीयते तत् मुष्टीन् धृत्वा[5] क्षिप्यते। यच्च पराभूयते तन्मुष्टिभिर्हन्यते[6] ।।३२।।

इयमनङ्गशरावलिपन्नगक्षति[1]विसारि वियोग विषावशा।
शशिकलेव[2] खरांशुकरार्दिता करुणनीरनिधौ निदधौ न कम् ।।३३।।

[3]इयमनङ्गेति। इयं दमयन्ती कं पुरुषं करुणनीरनिधौ दयारस समुद्रे न निदधौ। अपि[4] तु [5]सर्वं निदधौ। किं भूता ? । अनङ्गस्य या शरावलिः सेव पन्नगाः सर्पास्तेषां[6] क्षतिर्दंशः तेन विसारी प्रसरणशीलो वियोगः एव विषं तेन अवशा विह्वला। [7]क्षत इति पाठे क्षतेषु विसारिणा व्याख्येयम्। केव ? ।[8] शशिनः कला इव। यथा [9]शशिकला खरांशोः श्रीसूर्यस्य करैरर्दिता सर्वमपि जनं करुणारसे निदधाति[10] [11]क्षिपति ।।३३।।

ज्वलति मन्मथवेदनया निजे हृदि तयार्द्रमृणाललतार्पिता।
स्वजयिनोस्त्रपया सविधस्थयोर्मलिनतामभजद्भुजयोर्भृशम् ।।३४।।

[1]ज्वलतीति। तया निजे[2] हृदि अर्पिता आर्द्रमृणाललता भृशं नूनं भुजयोस्त्रपया लज्जया मलिनतामभजत्। किं भूतयोः ? । स्वस्याऽऽत्मनो जयिनोः तथा सविधस्थयोः समीपस्थयोः। भुजाभ्यां [3]मृणालं जितम्। किं भूते हृदि ? । मन्मथवेदनया ज्वलति[4] ।।३४।।

पिकरुतिश्रुतिकम्पिनि शैवलं हृदि तया निहितं विचलद्बभौ।
सततत्तद्गतहृच्छयकेतुना हतमिव [1]स्वतनूघनघर्षिणा ।।३५।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[2]पिकरुतीति । तया[3] हृदि निहितं शैवलं विचलत् [4]सत् बभौ । किं भूते ? । पिकस्य कोकिलस्य [5]रुतेः श्रुतिः श्रवणं तेन कम्पिनि । उत्प्रेक्षते-सततं तद्गतो[6] दमयन्तीसंस्थो यो[8] कामः कस्य केतुः वत्स्यः [10]अथवा मकरः तेन हृतमिव चालितमिव । किं भूतेन ? । [11]स्वस्यास्तन्वाः शरीरस्य घनं घर्षणशीलेन । मत्स्यो हि शैवलं शरीरेण घर्षयति भक्षयति च । [12]मकरश्च कामध्वजे [13]मत्स्यमकरयोरैक्यम्[14] ।।३५।।

न खलु मोहवशेन तदाननं नलमनः शशिकान्तमबोधि तत् ।
इतरथा [1]शशिनोऽभ्युदये ततः कथमसुस्रवदश्रुमयं[2] पयः ।।३६।।

न [3]खलु मोहेति । नलस्य मनः कर्तृ [4]तत्तस्याः आननं कर्मतापन्नं मोहवशेन भ्रान्त्या शशिकान्तं चन्द्रकान्तं न खल्वबोधि । अपि तु निश्चितमेव चन्द्रकान्तं, [5]पक्षे मणिम् अबोधि[6] अबुद्ध । इतरथा अन्यथा शशिनोऽभ्युदये ततः[7] [8]दमयन्तीवदनात् अश्रुमयं पयो जलं कथमसुस्रवत् सुस्राव[9] । चन्द्रोदये चन्द्रमणिः स्रवति ।[10] भ्रान्त्या हि यत् मरुमरीचिकायां जलं [11]भवति । तेनाऽर्थक्रियातृप्तिर्न भवति । अतोऽर्थक्रियाकारित्वात्[12] चन्द्रकान्तत्वं प्रामाणिकम्[13] ।।३६।।

रतिपतेर्विजयास्त्रमिषुर्यथा जयति भीमसुताऽपि तथैव सा ।
स्वविशिखानिव पञ्चतया ततो नियतमैहत योजयितुं स ताम् ।।३७।।

[1]रतिपतेरिति । यथा रतिपतेः कामस्य विजयास्त्रम् [2]इषुर्बाणो जयति सा भीमसुताऽपि तथैव कामास्त्रवत् सर्वोत्कर्षेण वर्त्तते ।[3] ततः कारणात् स[4] कामः तां दमयन्तीं नियतमित्यहं मन्ये-पञ्चतया योजयितुमैहत अचेष्टत । पञ्चत्वं मरणम् । कानिव ? । स्वान् विशिखान् बाणानिव । बाणा अपि पञ्चसंख्यया योजिताः । साऽपि कामस्य विजयास्त्रम्[5] ।।३७।।

शशिमयं दहनास्त्रमुदित्वरं मनसिजस्य विमृश्य वियोगिनी ।
झटिति वारुणमश्रुमिषादसौ तदुचितं प्रतिशस्त्रमुपाददे ।।३८।।

[1]शशिमयमिति । असौ वियोगिनी शशिमयं[2] मनसिजस्य दहनास्त्रम् आग्नेयमस्त्रमुदित्वरमुदयपरं विमृश्य झटिति तस्याऽऽग्नेयस्योचितं प्रतिशस्त्रमुपाददे । किम् ? वारुणं [3]वरुणदैवत्यम् । कस्मात् ? । अश्रुमिषात्[4] ।।३८।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

अतनुना नवमम्बुदमाम्बुदं सुतनुरस्त्रमुदस्तमवेक्ष्य सा ।
उचितमायतनिःश्वसितच्छलाच्छ्वसनशस्त्रममुञ्चदमुं प्रति ।।३९।।

[2]अतनुनेति । सा सुतनुः अतनुना कामेन नवजलधर[3] माम्बुदं[4] मेघास्त्रम् उदस्तम् उत्क्षिप्तमवेक्ष्य अमुं कामं प्रति [5]उचितं श्वसनस्य शस्त्रं वायव्यास्त्रम् अमुञ्चत् । वायुना मेघाः स्फाटयन्ते । कस्मात् ? । आयकस्य दीर्घस्य निःश्वसितस्य छलात् । इयं सुतनुः [6]सवैरी अतनुः तं प्रति किं क्रियते ।[7] अतिशयोक्तिः ।।३९।।

[1]रतिपतिप्रहितानिलहेतितां प्रतियती सुदती मलयानिले ।
तदुरुतापभयात्तमृणालिकामयमियं [2]भुजगास्त्रमिवाददे ।।४०।।

[4]रतिपतीति । सा[5] सुदती मलयानिलविषये रतिपतिना[6] प्रहिता अनिलहेतिः वायव्यास्त्रं तस्याभावस्तत्ता तां[7] प्रतियती मन्यमाना सती इयं भुजगास्त्रमिवाऽऽददे । सर्पा वायुं पिबन्ति । किं भूतम् ? । तस्य [8]कामस्य य उरुतापः तस्य[9] भयात् आत्ता[10] गृहीताया मृणालिका तन्मयम् । सा किल म्लाना सती सर्पसदृशो कृष्णवर्णा [11]भवति । [12]तच्छब्देन [13]वृत्तिच्छन्नस्यापि रतिपतिपदस्यानुवृत्तिः । सर्वनाम्नाऽनुसन्धि वृत्तिर्वृत्तिच्छन्नस्यापी (V. i. 11) ति वामनः ।[14] सापह्नवोत्प्रेक्षा[15] ।।४०।।

न्यधित तद्धृदि शल्यमिव द्वयं विरहितां च तथापि च जीवितम् ।
किमथ तत्र निहत्य निखातवान् रतिपतिः स्तनबिल्वयुगेन तत् ।।४१।।

[1]न्यधितेति । रतिपतिस्तस्या हृदि विरहितां [2]जीवितमपि च तथा [3]इदं द्वयं शल्यमिव न्यधित[4] । अथ च[5] पश्चात् स किं तत्[6] शल्यद्वयं स्तनावेव बिल्वयुगं बिल्वफलद्वयं[7] बीलकद्वयं[8] तेनोपरि निहत्य[9] निखातवान् । यत्[10] कीकलादिकं क्वाऽपि जडनार्थं निक्षिप्यते । तस्य मस्तके[11] फुलडिकानिश्चेलनार्थं[12] निहन्यते घातः क्रियते ।[13] उपमोत्प्रेक्षा ।।४१।।

अतिशरव्ययता मदनेन तां निखिलपुष्पमयस्वशरव्ययात् ।
स्फुटमकारि फलान्यपि मुञ्चता तदुरसि स्तनतालफलार्पणाः[1] ।।४२।।

[2]अतिशरेति । मदनेन तामतिशरव्ययता [3]अतिशयेन शरव्यं कुर्वता वेध्यत्वेनाऽतिक्रामता सता स्फुटं तस्या[4] उरसि स्तनावेव तालफलयुग्मं[5]

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

तस्याऽर्पणा अकारि । कि[6] कुर्वता ? । फलान्यपि शरान् मुञ्चता । कस्मात् ? ।[7] निखिलानि पुष्पाण्येव [8]स्वशरास्तेषां व्ययात् । अतिशयेन वेध्यं कुर्वता सकलं पुष्पबाणाः व्ययिताः । [9]ततो बाणरूपेण फलान्यपि मुक्तानि[10] ।।४२।।

अथ मुहुर्बहुनिन्दितचन्द्रया स्तुतविधुन्तुदया च तया मुहुः ।
पतितया स्मरतापमये गदे निजगदेऽश्रुविमिश्रमुखी सखी ।।४३।।

अथ [1]मुहुरिति । तया अथ मुहुर्बहु यथा भवति एवं निन्दितश्चन्द्रो[2] यया तया[3] तथा स्तुतो विधुन्तुदो राहुर्यया तया तथा । सखी निजगदे उक्ता । किं भूतया[4] ? । स्मरतापमये गदे रोगे पतितया । किं भूता सखी ? । अश्रुभिर्विमिश्रं[5] मुखं यस्याः सा तथा[6] ।।४३।।

नरसुराब्जभुवामिव यावता भवति यस्य युगं यदनेहसा ।
विरहिणामपि तद्रतवद्युवक्षणमितं न कथं गणितागमे ।।४४।।

[1]नरसुराब्जेति । हे सखि ! नराश्च सुराश्च अब्जभुवश्च तेषां मध्ये[2] यावता यत्सङ्ख्या तेन अनेहसा कालेन यस्य[3] यत् युगं भवति गणितशास्त्रेऽस्ति तेषामिव विरहिणामपि तद्युगं[4] गणितागमे कथं न गणितम् । किं भूतम् ? । रतवतोः परस्परं रतियुक्तयोः यूनोः स्त्रीपुरुषयोः क्षणैर्निमेषकालावयवैः [5]मितं सङ्ख्यातम् । षष्ट्यधिकशतत्रयदिनैर्देवानां दिनम् । दिव्यवर्षाणां द्वादशसहस्रैः कृतत्रेताद्वापरकलिरिति चतुर्युगं देवानां युगम् । [6]दैविकानां युगानां यत्सहस्रद्वयं तेन ब्रह्मणो दिनमेकम् । तथा[7] परिगणनया ब्रह्मणः पञ्चाशता वर्षैः परार्द्धम् । परार्द्धद्वयं ब्रह्मणः परमायुः । यथा इत्थं तेषां परिगणना तथा प्रीतिमतां[8] यूनां ये क्षणास्तैरेतावत्सङ्ख्यैः[9] विरहिणो युगं भवतीति किं न गणितम् ? । किल [10]यस्तेषां क्षणः स वियोगिनां[11] युगान्तकल्पः[12] ।।४४।।

[1]जनुरधत्त सती स्मरतापिता हिमवतो न तु तन्महिमादृता ।
ज्वलति भालतले लिखितः सतीविरह एव हरस्य[2] न लोचनम् ।।४५।।

[3]जनुरधत्तेति । सती दक्षसुता स्मरेण तापिता [4]सती हिमवतः सकाशात् जनुर्जन्म अधत्त[5] । न [6]तु तस्य हिमाचलस्य[7] महिम्नि

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

माहात्म्ये आदृता आदरपरा पार्वती जाता । किं च हरस्य भालतले लिखितः स्थिरः सत्या दक्षसुताया अयं विरहानल एव ज्वलति न तृतीयं लोचनम् । [6]तादृगन्यव्यपोहो वाच्यः ।।४५।।

दहनजा न पृथुर्दवथुव्यथा विरहजैव पृथुर्यदि नेदृशम् ।
दहनमाशु विशन्ति कथं स्त्रियः प्रियमपासुमुपासितुमुद्धुराः ।।४६।।

[1]दहनजा नेति । दहनाज्जाता [2]दवथुव्यथा पृथुरधिका न भवति, किन्तु विरहाज्जाता एव व्यथा पीडा पृथुरधिकतरा । अत्र [3]व्यतिरेकोऽनुमानमर्थापत्तिर्वा । प्रमाणमाह-यदीदृशं न भवति [4]तदा स्त्रियः अपगता असवः प्राणा यस्य तं तथाविधं मृतं प्रिय भर्तारमुपासितु उद्धुराः उत्सुकाः[5] सत्यः दहनं कथं विशन्ति [6]सहगमनं कथं कुर्वन्ति । दहनव्यथा-विरहदुःखात् [7]न्यूनपरिमाणा तद्भयादङ्गीक्रियमाणत्वात् । यद्दुःखं यद्भयादङ्गीक्रियते तत्र ततो न्यूनम् । यथा लकुटप्रहारभयात्[8] कम्बा-प्रहारदुःख तथा चेदम् । तस्मात्तथा । इति प्रयोगः । तथा विरहे सति वह्निप्रवेशः अन्यथा [9]अनुपपद्यमानस्वदुःखमर्थात् विरहदुःखान्न्यूनं गमयति । इत्यर्थापत्तिरपि[10] ।।४६।।

[1]हृदि लुठन्ति कला [2]नितरामभूर्विरहिणीवधपङ्ककलङ्किताः ।
कुमुदसख्यकृतस्तु बहिष्कृताः सखि ! विलोकय दुर्विनयं विधोः ।।४७।।

[3]हृदि लुठन्तीति । हे सखि ! [4]विधोर्दुर्विनयं विलोकय । [5]यतः अभूर्विरहिणीनां वधलक्षणेन पङ्केन[6] कलङ्किताः कलाः [7]नितरां हृदि लुठन्ति, कलङ्कस्य[8] उत्सङ्गस्थितत्वात् । [9]तु पुनः याः कलाः कुमुदैः सह सख्यकृतः मैत्रीकारिण्यस्ताः बहिष्कृता[10] ।।४७।।

अयि ! विधु परिपृच्छ गुरोः कुतः स्फुटमशिक्ष्यत दाहवदान्यता ।
[1]ग्लपितशम्भुगलाद्गरलात्त्वया किमुदधौ जड ! वा वडवानलम् ।।४८।।

अयि[2] विधुमिति । अयि ! सखि ! [3]त्वं विधु परिपृच्छ-त्वया कुतो गुरोः सकाशात् [4]स्फुटं [5]दाहवदान्यता दातृत्वमशिक्ष्यत[6] । [7]किमुदधौ गरलात् विषात् शिक्षिता । किं भूतात्[8] ? । ग्लपितं[9] दग्धं शम्भोर्गलं येन कालकूटेन तस्मात्तथा ।[10] अथवा हे जड ! [11] उदधौ वडवानलात् दाहदातृत्वं शिक्षितम् । [12]त्वं समुद्राज्जातः[13] ।।४८।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]अयमयोगिवधूवधपातकैर्भ्रमिमवाप्य दिवः खलु पात्यते ।
शितिनिशादृशदि [2]स्फुटदुत्पतत्कणगणाधिकतारकिताम्बरः ।।४९।।

[3]अयमयोगीति । अयं चन्द्रः खलु इति मन्ये अयोगिनीनां[4] विरहिणीनां वधूनां]यो] वधो हिंसा तस्य[5] पातकैर्भ्रमिमवाप्य दिवः स्वर्गात् [6]शितिः कृष्णा निशा एव दृषत् [7]शिला तस्यां पात्यते । पातयन्तीति पातकानि । किं भूतः ? स्फुटन्तः अत एवोत्पतन्तश्च ये कणानां [8]विस्फुलिङ्गानां गणास्तैरधिकं[9] तारकितम् अम्बरम् आकाशं येन स तथा[10] । तारकाः सञ्जाता यत्र । तारकादिदर्शनात् सञ्जातेऽर्थे इतच् । [11]शुक्लपक्षात् कृष्णपक्षेऽधिकास्तारका भवन्ति । अन्योऽपि यो [12]भ्रामयित्वा शिलायां कुम्भादिः स्फोटयते[13] तस्य खण्डान्युत्पतन्ति[14] ।।४९।।

त्वमभिधेहि विधुं सखि ! मद्गिरां किमिदमीदृगधिक्रियते त्वया ।
न गणितं यदि जन्म पयोनिधौ हरशिरःस्थितिभूरपि विस्मृता[1] ।।५०।।

[2]त्वमभिधेहीति । हे सखि ! [3]त्वं मम गिरां विधुमभिधेहि ब्रूहि । त्वया हे चन्द्र ! इदं[4] प्रत्यक्षम् ईदृक् विरहिणीवधलक्षणं किमधिक्रियते । अयमधिकारः कथं क्रियते ? । यदि त्वया पयोनिधौ जन्म आत्मीयं न[5] गणितम् । ततः किं हरस्य शिरसि स्थितिभूराश्रयभूमिरपि विस्मृता ? । कुलं तव रत्नाकरः संसर्गश्च तव यन्महेश्वरः शिरसि[6] त्वां बिभर्ति । एवंविधा प्रतिष्ठा[7] ।।५०।।

किमसुभिर्ग्लपितैर्जड ! मन्यसे मयि निमज्जतु भीमसुतामनः ।
मम किल[1] श्रुतिमाह तदर्थिकां नलमुखेन्दुपरां विबुधः स्मरः ।।५१।।

[2]किमसुभिरिति । हे जड ! त्वं किमेवं[3] मन्यसे यदसुभिर्ग्लपितैर्भीमसुताया मनो मयि निमज्जतु । मरणे सति प्राणिनो [4]मनश्चन्द्रं लयमेति । किल यस्मात् विबुधो विद्वान् स्मरो मम तदर्थिकां श्रुतिं वेदवाणीं नलमुखेन्दुपरां[5] नलस्य यो मुखेन्दुस्तत्परां तन्निष्ठामाह । [6]परपुरुषस्य हि-चन्द्रमा मनसो जातः (RV. X. 90. 13) तस्य[7] चन्द्रो मनसि लीयते । [8]जनमनांसि तु चन्द्राज्जायन्ते चन्द्रे च लीयन्ते । मम मनो नलमुखचन्द्रे लयं प्राप्स्यति, न तु त्वयि चन्द्रे[9] ।।५१।।

निपतताऽपि न मन्दरभूभृता त्वमुदधौ शशलाञ्छन ! चूर्णितः ।
[1]अपि मुनेर्जठरार्चिषि जीर्णतां बत गतोऽसि न पीतपयोनिधेः[2] ।।५२।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[3]निपतताऽपीति । हे शशलाञ्छन ! त्वमुदधौ[4] निपतताऽपि[5] मन्दरभूभृता न चूर्णितः । बत इति खेदे । किं च[6] मुनेरपि अगस्त्यस्य जठरार्चिषि जीर्णतां त्वं न गतोऽसि । किं भूतस्य ? । पीतश्चुलुकितः पयोनिधिर्येन तस्य तथा[9] ॥५२॥

मुखरयस्व [1]यशोनवडिण्डिमं जलनिधेः कुलमुज्ज्वलयाऽधुना ।
अयि गृहाण वधूवधपौरुषं[2] हरिणलाञ्छन ! [3]मुञ्च कदर्थनाम् ॥५३॥

[4]मुखरयेति । हे चन्द्र ! त्वं यशसः कीर्तेर्नवडिण्डिमं पटहं मुखरयस्व । मया विरहिण्यो हता इति । [5]मुखरय इति स्वयश स इति वाऽपवादे । अधुना[6] जलनिधेः कुलमुज्ज्वलय । अयीति आमन्त्रणे । अपीति वा पाठः । हे हरिणलाञ्छन ! त्वं वधूनां वधेन पौरुषं गृहाण । कदर्थनां मुञ्च[7] ॥५३॥

निशि [1]शशिन् ! भज कैतवभानुतामसति भास्वति तापय [2]पाप ! माम् ।
अहमहन्यवलोकयितास्मि ते [3]पुनरहर्पतिनिह्नुतदर्पताम् ॥५४॥

निशि[5] शशिन्निति । हे शशिन् ! त्वं निशि कैतवेन छलेन भानुतां भज । हे पाप ! भास्वति श्री सूर्ये असति अविद्यमाने मां तापय । अहम् अहनि दिवसे ते[6] तव अहर्पतिना श्रीसूर्येण [7]निह्नुतदर्पतां[8] गलिताहङ्कारतां पुनः[9] अवलोकयितास्मि विलोकयिष्यामि । श्वस्तनी (सि. है. III. iii. 14) तास्मि[10] ॥५४॥

शशकलङ्क ! भयङ्कर ! मादृशां [1]ज्वलसि यन्निशि भूतपतिं श्रितः ।
तदमृतस्य तवेदृशभूतताऽद्भुतकरी परमूर्द्धविधूननी ॥५५॥

[2]शशकलङ्केति । हे [3]शशकलङ्क । मादृशां[4] हे भयङ्कर ! यत् त्वं निशि ज्वलसि तपसि । किं भूतः ? । भूतपतिं श्रितः श्रीमहादेवं श्रितः[6] । अथ च[7] भूतानि रात्रौ ज्वलनरूपाणि भूत्वा जनं भीषयन्ति[8] । तत्तवाऽमृतस्य[9] शीतलस्य ईदृशभूतता तापकरत्वमद्भुतकरी[10] आश्चर्यकरी । तथा परस्य मूर्ध्नो विधूननी । आश्चर्येन [11]मूर्द्धा धून्यते । अथ च अमृतस्य मरणरहितस्य[12] ईदृशीभूतता प्रेतत्वमाश्चर्यम् । भूतो हि[13] परशरीरमाविश्य मस्तकं धूनयति । भूतः शब्दः प्रेते उभयलिङ्गः । क्रियाशब्दस्याऽभिधेयवत् लिङ्गम् । ईदृशभूतस्य भावः तत्ता[14] ॥५५॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

श्रवणपूरतमालदलाङ्कुरं[1] शशिकुरङ्गमुखे सखि ! निक्षिप ।
किमपि [2]तुन्दिलितः स्थगयत्यमुं स यदि तेन तदुच्छ्वसिमि क्षणम्[3] ।।५६।।

[4]श्रवणपूरेति । हे सखि ! त्वं शशिनः कुरङ्गस्य मुखे श्रवणपूरार्थं कर्णाभरणार्थं यस्तमालपल्लवाङ्कुरः तं निक्षिप । स यदि[5] तेन भक्षितेन किमपि [6]तुन्दिलितः आपूरितोदरः सन् अमुं चन्द्रं स्थगयति । तत् क्षणमहम् उच्छ्वसिमि जीवामि[7] ।।५६।।

असमये मतिरुन्मिषति ध्रुवं करगतैव गता यदियं कुहूः ।
पुनरुपैति निरुध्य निवास्यते सखि! मुखं न विधोः पुनरीक्ष्यते ।।५७।।

असमय[1] इति । ध्रुवमसमयेऽप्रस्तावे मतिरुन्मिषति यदियं कुहूः अमावस्या करगता एव [2]सती गता अतिक्रान्ता । यदि पुनरपि उपैति निरुध्याऽत्रैव निवास्यते । यथा हे सखि ! विधोर्मुखं पुनर्न-[3] ईक्ष्यते[4] ।।५७।।

अयि ! ममैष [1]चकोरशिशुर्मुनेर्व्रजति सिन्धुपिबस्य न शिष्यताम् ।
अशितुमब्धिमधीतवतोऽस्य वा शशिकराः पिबतः कति शीकराः ।।५८।।

[2]अयि ममैष इति । अयि सम्बोधने । एष मम चकोरशिशुः सिन्धुपिबस्याऽगस्त्यस्य[3] मुनेः शिष्यतां किं[4] न व्रजति । वाशब्दो हेतौ । यस्मादस्य [5]चकोरशिशोरब्धिमशितुं पातुमधीतवतः शशिनः कराः पिबतः सतः कति शीकराः कियन्तो बिन्दवः । [7]बालस्याऽभ्यासे रुचिः भवति[8] ।।५८।।

कुरु करे[1] गुरुमेकमयोघनं बहिरितो मुकुरं च कुरुष्व मे ।
विशति तत्र यदैष विधुस्तदा सखि ! [2]सुखादिहितं जहि तं द्रुतम् ।।५९।।

[3]कुरु कर इति । हे सखि ! त्वं करे एकं गुरुम् अयसो लोहस्य घनं कुरु गृहाण । इतः प्रदेशान्[4] मे[5] मम मुकुरमादर्शं च बहिः कुरु[6] मुञ्च । तत्राऽऽदर्शे यदैष[7] विधुर्विशति प्रतिबिम्बितो[8] भवति, तदा सुखात्तम् अहितं[9] शत्रुं द्रुतं घनेन जहि खण्डशः कुरु[10] ।।५९।।

उदर एव धृतः किमुदन्वता न विषमो वडवानलवद्विधुः ।
विषवदुज्झितमप्यमुना न स स्मरहरः किममुं बुभुजे विभुः ।।६०।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]उदर एवेति । अयं विधुः उदन्वता समुद्रेण उदर एव किं[2] न धृतः ? । किं भूतः ?। वडवानलवद्विषमः [3]विषमत्वेन च साधर्म्योपमा । धृता त्वधर्म्येण वैधर्म्योपमा । किं चाऽमुना समुद्रेण विषवदुज्झितमपि अमुं चन्द्रं स विभुः समर्थः स्मरस्य हर्त्ता किं, न [4]बुभुजे ।।६०।।

असितमेकसुराशितमप्यभून्न पुनरेष [1]विधुर्विशदं विषम् ।
अपि निपीय सुरैर्जनितक्षयं स्वयमुदेति पुनर्नवमार्णवम् ।।६१।।

[2]असितमिति । [3]असितं विषं कालकूटम् एकेन सुरेण श्रीमहादेवेनाऽशितं भक्षितमपि पुनरपि नाऽभूत् न जातम् । पुनरेष चन्द्रो विशदं धवलं विषं [4]ततश्च सर्वैः सुरैर्निपीय जनितक्षयमपीदम् आर्णवं [5]विषं पुनर्नवं [6]वारंवारमुदेति[7] ।।६१।।

विरहिवर्गवधव्यसनाकुलं कलय पापमशेषकलं विधुम् ।
सुरनिपीतसुधाकमपापकं ग्रहविदो विपरीतकथाः कथम् ।।६२।।

[1]विरहिवर्गेति । हे सखि ! त्वमशेषकलं परिपूर्णं विधुं पापं पापिष्ठं कलय जानीहि । यतो विरहिणां वर्गस्य यो वधस्तेन व्यसनेनाऽऽकुलम् । यश्चन्द्रः[2] सुरैर्निपीतसुधाकः तमापकं पापरहितं विद्धि । कान्तिरहितत्त्वाद हिंसकम् । एते ग्रहविदो गणकाः कथं विपरीतकथाः पूर्णचन्द्रमपापं वदन्ति । क्षीणपापं ज्योतिःशास्त्रे ब्रुवन्ति[3] ।।६२।।

विरहिभिर्बहुमानमवापि यः स बहुलः खलु पक्ष इहाजनि ।
तदमितिः सकलैरपि यत्र तैर्व्यरचि सा च तिथिः किममीकृता ।।६३।।

[1]विरहिभिरिति । खलु इति मन्ये । यः पक्षो विरहिभिः बहुमानमवापि[2] स पक्षो बहुलोऽजनि[3] । बहुलाति गृह्णाति इति बहुलः[4] । चन्द्राभावादन्धकारपक्षोऽजनि । यत्र[5] यस्यां तिथौ तस्य बहुमानस्य अमितिः अतिमात्रता मितिरहितत्वं तैः सकलैरपि विरहिभिः व्यरचि । किं सा तिथिः अमीकृताः अमावास्या कृता । अनया अमाकृता अमीकृता मानं मा प्रमाणम् । न मा अमा तस्यां हि सर्वथा चन्द्राभावः । च्विप्रत्यये ईकारः[6] ।।६३।।

स्वरिपुतीक्ष्णसुदर्शनविभ्रमात् किमु विधुं ग्रसते स विधुन्तुदः ।
निपतितं वदने कथमन्यथा बलिकरम्भनिभं निजमुज्झति ।।६४।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]स्वरिपुतीक्ष्णेति । स विधुन्तुदो राहुः विधुं किमु स्वस्य रिपुः रिपोर्वा[3] इति व्याख्याने [4]प्रत्यनीकत्वम् । यः तीक्ष्णः सुदर्शनः श्रीकृष्ण चक्रं तस्य विभ्रमात्[5] भ्रान्त्या ग्रसते, न तु चन्द्रं मत्वा । अन्यथा[6] एनं चन्द्रं निजं बलिकरम्भनिभं कथं वदने निपतितं सन्तमुज्झति । राहोर्बलिदाने करम्भो दधिमिश्रो नैवेद्यम् । निजवदनमिति वा पाठः । निजे वदने इति वा[7] ।।६४।।

वदनगर्भगतं न निजेच्छया शशिनमुज्झति राहुरसंशयम् ।
अशित एव गलत्ययमत्ययं सखि ! विना गलनालबिलाध्वना ।।६५।।

[1]वदनगर्भेति । असंशयं राहुर्वदनगर्भगतं निजेच्छया शशिनं नोज्झति । किं तर्हि ?। [2]अयमशित एव भक्षित एव अत्ययं मरणं विना जीवन्नेव चन्द्रो गलनालस्य कण्ठस्य बिलं छिद्रं तेनाऽध्वना गलति निःसरति । हे सखि ![3] ।।६५।।

[1]ऋजुदृशः कथयन्ति पुराविदो मधुजितं किल राहुशिरश्छिदम् ।
विरहिमूर्द्धभिदं निगदन्ति न क्व नु शशी यदि तज्जठरानलः।।६६।।

[2]ऋजुदृश इति । [3]पुराविदो विद्वांसः किल मधुजितं श्रीकृष्णं राहोः शिरश्छिदं कथयन्ति ।[4] परं ते ऋजुदृशः आर्यदृष्टयः । [5]यतः विरहिणां मूर्द्धभिदं मस्तकच्छेत्तारं[6] यत् न निगदन्ति । यदि[7] तस्य राहोर्जठरानलः स्यात् । शशी चन्द्रः क्व नु[8] जीवेत् । परं राहोर्मस्तकं छित्वा विरूपं कृतम्[9] ।।६६।।

स्मरसखौ रुचिभिः स्मरवैरिणा मखमृगस्य यथा दलितं शिरः ।
सपदि सन्दधतुर्भिषजौ दिवः सखि ! तथा तमसोऽपि करोतु कः।।६७।।

[1]स्मरसखाविति । [2]यथा दिवः स्वर्गस्य भिषजौ अश्विनीकुमारौ स्मरस्य वैरिणा श्रीमहादेवेन दक्षप्रजापतेर्मखस्य[3] मृगरूपिणो दलितं छिन्नं शिरः सपदि सन्दधतु । किं भूतौ ?। रुचिभिः शोभाभिः स्मरस्य-सखायौ । स तु स्मरवैरी । हे सखि ! तथा तमसोऽपि राहोरपि शिरः कः करोतु सन्दधातु[4] ।।६७।।

नलविमस्तकितस्य रणे रिपोर्मिलति किं न कबन्धगलेन वा ।
धृतिभिया भृशमुत्पततस्तमोग्रहशिरस्तदसृग्दृढबन्धनम् ।।६८।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]नलविमस्तेति । वा अथवा रणे नलेन विमस्तकितस्य छिन्नशिरसः कस्यचिद्रिपोः कबन्धस्य गलेन कण्ठेन तमोग्रहस्य राहोः शिरो मस्तकं किं न मिलति न संयुज्यते[2] । किं भूतम् ? तस्य नलशत्रुशिरसः असृजा नवरुधिरेण दृढं बन्धनं सन्धिर्यस्य तत्तथा । किं भूतस्य रिपोः[4] ? । धृतिभिया धरणभयेन[5] भृशं दिवमाकाशम् उत्पततः । आकाशे वर्तमानं राहुशिरः उत्पततः रिपोः कण्ठे मिलितं सन् परिपूर्णो राहुर्भवति[6] ।।६८।।

सखि ! जरां परिपृच्छ तमःशिरः सममसौ दधताऽपि कबन्धताम् ।
मगधराजवपुर्दलयुग्मवत्किमिति न व्यतिसीव्यति केतुना ।।६९।।

सखि ![1] जरामिति । हे सखि ! त्वं जरां राक्षसीं परिपृच्छ वादय[3] तत्किम् असौ जरा तमसो राहोः शिरः[4] केतुना ग्रहेण सह किमिति न व्यतिसीव्यति तमः[5] शिरः इति व्यपदेशिवद्भावेन विहितायाः षष्ठ्याः समासः । केतोः कबन्धः राहोर्मस्तकं च उभयमपि विनिमयेन [5]कथं न घटयति । किं भूतेन ? । कबन्धतां दधता । अपि समुच्चये । केतुना[7] चेत्यर्थः । किं वत् ? । मगधराजस्य वपुषो यद्दलयुग्मम् अर्द्धद्वयं तद्वत् । यथा [8]चण्डकौशिक प्रसादसमासादितमाम्रफलं[9] बृहद्रथेन पत्नीभ्यां दत्तम् । ताभ्यां द्विधा कृत्वा[10] भक्षितम् जन्मकाले जरासन्धस्य फालिद्वयं [11]प्रादुर्भूतम् । चतुष्पथे त्यक्तम् । जरया मेलितम्[12] ।।६९।।

वद विधुन्तुदमालि ! मदीरितैस्त्यजसि किं द्विजराजभिया[1] रिपुम् ।[2]
किमु दिवं पुनरेति यदीदृशः पतित एष निषेव्य हि वारुणीम् ।।७०।।

वद[3] विधुन्तुदमिति । हे आलि ! [4]त्वं मम ईरितैर्वाक्यैर्विधुन्तुदं राहुं वद । त्वमिमं रिपुं चन्द्रं द्विजराजभिया ब्राह्मणोऽयमिति भयेन किं[5] त्यजसि ? । [6]द्विजराजधियेति वा पाठः । हि[7] यस्मादेष वारुणीं निषेव्य पतितः किमु दिवं पुनरेति यदीदृशः द्विजराजो [8]भवेत्तस्मान्नैवाऽयं द्विजराजः । नित्यं मद्यं ब्राह्मणो वर्जयेत् इति निषेधात् । अथवा यत्कारणादयमीदृशः पातकी विरहिणीहन्ता वारुणीं दिशम् अथ च मदिरां निषेव्य किमु[9] दिवमाकाशम् अथ च स्वर्गं किमु पुनरपि एति आगच्छति । किंतु[10] पतित एवाऽस्तमित एव । अथ च द्विजराज ईदृशमद्यपानेन पतित एव । पतनीयेन कर्मणा कृतेन[11] ।।७०।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

दहति कण्ठमयं खलु तेन किं गरुडवद्द्विजवासनयोज्झितः ।
प्रकृतिरस्य विधुन्तुद ! दाहिका[1] मयि निरागसि का वद विप्रता ।।७१।।

दहति[2] कण्ठमिति । खल्विति शङ्के । अयं चन्द्रः तव कण्ठं [3]गलितः सन् दहति यथा मां दहति । किं तेन कारणेन द्विजस्य वासनया श्रद्धया त्वयाऽपि गरुडवद् अयमुज्झितः । हे विधुन्तुद ! अस्य दाहिका[4] दहनशीला प्रकृतिः स्वभावः[5] । यतो मयि स्त्रियां निरागसि निरपराधायाम् अस्य का विप्रता कीदृशी ब्राह्मणता[6] वद । ब्राह्मणः किल अपराधं विना न पीडयति । [7]तस्माद् द्विजोऽयं नैव । गरुडेन पुरा निषादभक्षणे ब्राह्मणः कण्ठं दहन् परित्यक्तः[8] ।।७१।।

सकलया कलया किल[1] दंष्ट्रया समवधाय यमाय विनिर्मितः ।
विरहिणीगणचर्वणसाधनं विधुरतो द्विजराज इति श्रुतः[2] ।।७२।।

[3]सकलयेति । अयं विधुः[4] अतः द्विजानां [5]राजेति श्रुतः प्रसिद्धः । अयं दन्तानां राजा किल । यतः[6] सकलया कलया पूर्णया [7]सह समवधाय कला एव दंष्ट्रा तया सम्यगवधाय सम्बध्य यमाय [8]अन्तकार्थं [9]विनिर्मितः । किं भूतः ? । विरहिणीगणस्य चर्वणसाधनम् । दन्तेन हि चर्व्यते सर्वम्[10] ।।७२।।

स्मरमुखं हरनेत्रहुताशनाज्ज्वलदिदं चक्षुषे [1]विधिना विधुः ।
बहुविधेन वियोगिवधागसा शशमिषादथ कालिकयाऽङ्कितः ।।७३।।

[2]स्मरमुखमिति । अयं विधुर्नूनं स्मरस्य इदं[3] मुखं ज्वलत् सत् विधिना ब्रह्मणा हरस्य तृतीयनेत्रहुतासनाच्चक्षुषे । अथ [4]बहुविधेन वियोगिनां वधस्याऽऽगसा पापेन कृत्वा शशस्य मिषात् कालिकया अङ्कितः लाञ्छितः[5] ।।७३।।

द्विजपतिग्रसनाहितपातकप्रभवकुष्ठ [1]सितीकृतविग्रहः ।
विरहिणीवदनेन्दुजिघृक्षया[2] स्फुरति राहुरयं न निशाकरः ।।७४।।

[3]पुस्तकान्तरेऽयं श्लोको न भवति । द्विजपतीति । अयं राहुः स्फुरति निशाकरो न भवति । कया ? । विरहिणीनां वदनमेवेन्दुः तस्य जिघृक्षया । किं [4]भूत ? । द्विजपतेश्चन्द्रस्य अथ च ब्राह्मणस्य ग्रसनेनाऽहितात् पातकात् प्रभवं यत् कुष्ठं रोगस्तेन [5]सितीकृतः[6] श्वेतो विग्रहः शरीरं यस्य स तथा[8] ।।७४।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

इति विधोर्विविधोक्तिविगर्हणं व्यवहितस्य वृथेति विमृश्य सा ।
अतितमां दधती विरहज्वरं हृदयभाजमुपालभत[1] स्मरम् ।।७५।।

इति[2] विधोरिति । साऽतितमां विरहज्वरं दधती सती हृदयभाजमासन्नं स्मरमुपालभत[3] । किं कृत्वा ?। इति विमृश्य । इतीति[4] किम् ?। यदिदमिति विधोश्चन्द्रस्य व्यवहितस्य दूरस्थितस्य विविधयोक्त्या विगर्हणं निन्दनं तत्[5] वृथा[6] ।।७५।।

हृदयमाश्रयसे यदि मामकं ज्वलयसीत्थमनङ्ग ! तदेव किम् ?।
स्वयमपि क्षणदग्धनिजेन्धनः क्व भवितासि हताश! हुताशवत् ?।।७६।।

[1]हृदयमिति । यदि त्वं मामकं मदीयं हृदयमाश्रयसे हे अनङ्ग ! तदेवेत्थं कथं ज्वलयसि । हे हताश ! हे निन्द्य ! क्षणेन [2]दग्धो निज आत्मा एवेन्धनं[3] येन स तथाविधः सन् स्वयमपि[4] क्व भवितासि । अभावमापत्स्यसे । हुताशवत्[5] । यथा वह्निः [6]स्वाश्रयमिन्धनं दहत् स्वयमभावरूपो भवति । यतस्त्वमङ्गरहितः अन्यच्छरीरं नास्ति[8] ।।७६।।

पुरभिदा गमितस्त्वमदृश्यतां त्रिनयनत्वपरिप्लुतिशङ्कया ।
स्मर ! [1]निरैष्यत कस्यचनाऽपि न त्वयि किमक्षिगते नयनैस्त्रिभिः ।।७७।।

[2]पुरभिदेति । त्वं पुरभिदा श्रीमहादेवेन अदृश्यतां गमितः । कया ?। त्रिनयनत्वस्य (या) परिप्लुतिर्विप्लवो बाहुल्यं तया तस्या[3] वा शङ्कया । यतः हे स्मर ! त्वय्यक्षिगते दृश्यतां गते किं कस्यचनापि त्रिभिर्नयनैर्न निरैष्यत[4] । अपि तु सर्वः कोऽपि त्रिनेत्रोऽभविष्यत्, अत्युन्मत्तत्वात् ।[5] इण् (1120) गतौ । क्रियातिपत्तिः, [6]स्यत्, भावे आत्मनेपदम् । अथ च भवेदक्षिगतो द्वेष्यः (II. 211) इति हलायुधस्मरणात् । त्वयि द्वेष्ये सति । अत्राऽनुमानं प्रमाणमाह लोकस्त्रिनेत्रो भवेत् । कामस्याऽक्षिगतत्वात् ।[7] यस्य यस्य कामोऽक्षिगतः स स त्रिनेत्रः यथा श्रीमहादेवः । तथा चायं कामोऽक्षि गतः[8] । तस्मात् त्रिनेत्रः । एकत्र द्वेष्यः अपरत्र दृश्यः कामः[9] ।।७७।।

सहचरोऽसि रतेरिति विश्रुतिस्त्वयि च सत्यपि मे न रतिः कुतः ।
अथ न सम्प्रति सङ्गतिरस्ति वामनु मृता न भवन्तमियं किल ।।७८।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]सहचरोऽसीति। हे काम ! त्वं रतेः सहचरोऽसि इति विश्रुतिः। त्वयि च सत्यपि मे मम कुतो रतिर्नास्ति। अथ वा ज्ञातं कारणं[2] सम्प्रति वां युवयोः सङ्गतिर्नास्ति। किल यतः इयं रतिः भवन्तमनु न मृता। अनुगमनं कुर्वती आकाशवाचा निषिद्धा[3] ॥७८॥

रतिवियुक्तमनात्मपरज्ञ ! किं स्वमिव[1] मामपि तापितवानसि।
कथमतापभृतस्तव सङ्गमादितरथा हृदयं मम तप्यते[2] ॥७९॥

[3]रतिवियुक्तमिति। हे अनात्मपरज्ञ ! रत्या वियुक्तं [4]स्वमात्मानमिव [5]मामपि किं[6] तापितवानसि[7]। [8]स्वमपि मामिव पाठे। किमिति[9] उत्प्रेक्षायाम्। मामिव स्वमपि किं तापितवान्। अहम् अन्या त्वं चान्य इति न वेत्सि। इतरथा अन्यथा तव सङ्गमात् मम हृदयं कथं तप्यते दह्यते। किं भूतस्य तव ?। न तापं बिभर्तीति अतापभृत तस्य तथा। त्वं तु विरहित्वात् तापभृत्[10] ॥७९॥

अनुममार न मार ! कथं नु सा रतिरतिप्रथिताऽपि पतिव्रता ?।
इयदनाथवधूवधपातकी दयितयाऽपि तयाऽसि किमुज्झितः ॥८०॥

[1]अनुममारेति। नु इति प्रश्ने। हे[2] मार ! [3]मारणात्मक ! सा रतिः अतिशयेन अतिशयेन पतिव्रता इति प्रथिताऽपि[4] कथं त्वामनु पृष्ठतो न ममार। आशीरद्यतन्योश्च मृङ् (का° III. ii. 42-58) इति दुर्गसिंहवचनात्। म्रियतेर्लुङ्लिङोश्चे (पा° I. iii. 61) ति स्मरणात्। [6]लिट्लृङ्शप्[7] संज्ञान्तर आशीरद्यतनी अन्विकरणव्यतिरेकेणाऽत्र परस्मैपदम्। किं तया दयितयाऽपि असित्वमुज्झितः। किं भूतः ?। इयतीनामेतावतीनामनाथानां वधूनां वधेन पातकी। आशुद्धेः सम्प्रतीक्ष्यो हि महापातक दूषितः (याज्ञ° अचारा° 77) इति श्रीयाज्ञवल्क्यस्मृतेः[9] ॥८०॥

सुगत एव विजित्य जितेन्द्रियस्त्वदुरुकीर्तितनुं यदनाशयत्।
तव तनूमवशिष्टवतीं ततः समिति भूतमयीमहरद्धरः ॥८१॥

[1]सुगत एवेति। यत्तवोरुकीर्तिरेव तनुः शरीरं तां सुगत एव बुद्ध एव अनाशयत्। [2]यतो जितेन्द्रियः तथा च भग्नं मारबलं [3]येनेत्यादि श्रूयते। किं कृत्वा ?। त्वां विजित्य[4] ततश्च[5] तवाऽवशिष्टवतीम्

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

उद्धृतां तनूं शरीरं भूतमयीं पञ्चभूतात्मिकां समिति संग्रामे हरोऽहरत् । कीर्तिशरीरे गते पुरुषो निर्वीर्यो भवति[6] ॥८१॥

फलमलभ्यत यत्कुसुमैस्त्वया विषमनेत्रमनङ्ग ! विगृह्णता ।
अहह नीतिरवाप्तभया ततो न कुसुमैरपि विग्रहमिच्छति ॥८२॥

[1]फलमलभ्यतेति । हे अनङ्ग ! यत्त्वा कुसुमैर्विषम[2] नेत्रं श्रीमहादेवं विगृह्णता फलं देहदाहलक्षणमलभ्यत । ततः कारणात् । अहह इति खेदे । नीतिरवाप्तभया सती कुसुमैरपि विग्रहं नेच्छति । पुष्पैरपि न योद्धव्यं किं पुनर्निशितैः शरै[3]रिति नीतिशास्त्रम्[4] ॥८२॥

अपि धयन्नितरामरवत्सुधां त्रिनयनात् कथमापिथ तां दशाम् ।
भण रतेरधरस्य रसादरादमृतमाप्तघृणः खलु मा पिबः ॥८३॥

अपि[1] धयन्निति । हे स्मर ! त्वमितरामरवत् सुधां [2]धयन्नपि पिबन् सन् त्रिनयनात् तां देहदाहात्मिकां दशां कथमापिथ । यथाऽन्यैर्देवैरमृतं पीतं तथा त्वयाऽपि । परममरो नाऽभूस्त्वम् । भण[3] वद । खलु इति मन्ये त्वममृतं नापिबः । किं भूतः ? । रतेः कान्तायाः अधरस्य[4] रसादरादाप्तघृणः प्राप्तजुगुप्सः सन् । अमृतं नीरसमधररसात्[5] ॥८३॥

भुवनमोहनजेन किमेनसा तव परेत ! बभूव पिशाचता ।
यदधुना विरहाधिमलीमसामभिभवन् भ्रमसि स्मर ! मद्विधाम् ॥८४॥

[1]भुवनेति । हे परेत ! हे प्रेत ![2] तव भुवनस्य मोहनात्[3] जातेनैनसा पापेन किं पिशाचता बभूव[4] । यत्त्वमधुना विरहस्याऽऽधिना मलीमसां मद्विधां स्त्रियमभिभवन् भ्रमसि ।[5] हे स्मर ![6] मलीमसमशुचि किल प्रेतोऽभिभवति ॥८४॥

बत ददासि न मृत्युमपि [1]स्मर ! स्खलति ते न[2] धनुः कृपया करात् ।
अथ मृतोऽसि मृतेन च मुच्यते न खलु मुष्टिरुरीकृतबन्धनः ॥८५॥

बत[3] ददासीति । हे स्मर ! त्वं [4]मम बत मृत्युमपि न ददासि । किं च ते [5]तव करात् कृपया[6] धनुर्न स्खलति न [7]पतति । अथवा ज्ञातं त्वं मृतोऽसि । अतो मृतेन पुरुषेण खलु [8]निश्चितं[9] मुष्टिर्न मुच्यते ।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

किं भूतः ? । उरीकृतमङ्गीकृतं बन्धनं येन[10] स तथा अतो[11] बद्धमुष्टित्वात् न ददासि । न च धनुः [12]स्खलति[13] ।।८५।।

[1]दृगुपहत्यपमृत्युविरूपताः शमयते परनिर्जरसेविता ।
अतिशयान्ध्यवपुः क्षतिपाण्डुताः स्मर ! भवन्ति भवन्तमुपासितुः ।।८६।।

[2]दृगुपहतीति । परेषामन्येषां निर्जराणां देवानां सेविता [3]श्रीकालेश्वरी श्रीवैद्यनाथ श्रीसूर्यादीनां सेवकः पुरुषः[4] [5]दृशामुपहतिम् अपमृत्युं विरूपतां च शमयते[6] । परं हे स्मर ! भवन्तमुपासितुः पुरुषस्याऽतिशयेनाऽऽन्ध्यं कामान्धता वपुषः [8]क्षतिः क्षयरोगेण मृत्युः पाण्डुता विरूपता च एताः प्रत्युत भवन्ति[9] ।।८६।।

स्मर! नृशंसतमस्त्वमतो विधिः सुमनसः कृतवान् भवदायुधम् ।
यदि धनुर्दृढमाशुगमायसं तव सृजेत् त्रिजगत्प्रलयं[1] व्रजेत् ।।८७।।

[2]स्मर ! नृशंसतम इति । हे स्मर ! त्वं नृशंसतमोऽतिक्रूरः । अतो विधिर्ब्रह्मा भवत आयुधं सुमनसः पुष्पाणि कृतवान् । अथ च त्वं [3]दुष्टमनाः शस्त्रं च सुष्ठु मनः । यदि विधिः[4] तव दृढं[5] धनुः आयसं लोहमयम् आशुगं बाणं च सृजेत् ततस्त्रिजगत् प्रलयं व्रजेत्[6] ।।८७।।

स्मर ! रिपोरिव रोपशिखी पुरां दहतु ते जगतामपि मा त्रयम् ।
इति विधिस्त्वदिषून् कुसुमानि किं मधुभिरन्तरसिञ्चदनिर्वृतः ।।८८।।

स्मर[1] ! रिपोरिति । हे स्मर ! विधिः किमनिर्वृतः सन् इति[2] हेतोः तव इषून् कुसुमानि अन्तर्मधुभिर्मकरन्दबिन्दुभिरसिञ्चत् । इतीति[3] किम् ?। यतः तव रोपाणां बाणानां[4] शिखी वह्निर्जगतां त्रयमपि मा दहतु । यथा[5] पुरां त्रयाणां रिपोः रोपशिखी पुरां त्रयं दग्ध[6]वान् ।।८८।।[7]

विधिरनंशमभेद्यमवेक्ष्य ते जनमनः खलु लक्ष्यमकल्पयत् ।
अपि स वज्रमदास्यत चेत्तदा त्वदिषुभिर्व्यदलिष्यदसावपि ।।८९।।

[2]विधिरनंशमिति । विधिस्ते तव खलु शङ्के जनानां मनश्चित्तम् अनंशं निरवयवम् अत एव [3]चाभेद्यम् अवेक्ष्य लक्ष्यं [4]वेध्यमकल्पयत् । चेत्[5] यदि स ब्रह्मा तव वज्रमपि लक्ष्यमदास्यत् तदा तवेषुभिः[6] असावपि वज्रोऽपि विशेषेणाऽदलिष्यत् शतखण्डोऽभविष्यत्[7] ।।८९।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

यदतनुस्त्वमिदं [1]जगते हितं क्व स मुनिस्तव यः सहते हतीः ।
विशिखमाश्रवणं परिपूर्य चेदविचलद्भुजमुज्झितुमीशिषे[2] ।।९०।।

[3]यदतनुरिति । [4]यत् त्वमतनुः अङ्गरहितः इदं जगते[5] हितं पथ्यं[6] चेत्[7] यदि त्वमाश्रवणं विशिखं परिपूर्य अविचलद्भुजं यथा भवति एव मुञ्झितुमीशिषे तदा स [8]क्व मुनिरपि अस्ति यस्तव हतीः प्रहारान्[9] सहते[10] ।।९०।।

अपि विधिः कुसुमानि तवाशुगान् स्मर ! विधाय न निर्वृतिमाप्तवान् ।
अदित पञ्च हि ते स नियम्य तांस्तदपि तैर्बत जर्जरितं जगत् ।।९१।।

[1]अपि विधिरिति । हे स्मर ! विधिः कुसुमानि[2] [3]अपि तवाऽऽशुगान् विधाय न निर्वृतिमाप्तवान् । [4]ततः स नियम्य हि[5] निश्चितं[6] पञ्चैव ते अदित दत्तवान् । नाधिकम् । तदपि बत तैः जगत् जर्जरितम्[8] ।।९१।।

उपहरन्ति न कस्य सुपर्वणः सुमनसः कति पञ्च सुरद्रुमाः ।
तव तु हीनतया पृथगेकिकां धिगियताऽपि न तेऽङ्ग ! विगर्हणम् ।।९२।।

[1]उपहरन्तीति । हे स्मर ! पञ्च सुरद्रुमाः [2]मन्दाराद्याः कल्पवृक्षाः कस्य सुपर्वणो देवस्य कति सङ्ख्याः सुमनसः पुष्पाणि [3]नोपहरन्ति । अपि तु बहून्यर्पयन्ति । तु पुनस्तव हीनतया पृथक्[4] एकिकां[5] सुमनस एकैकं कुसुममर्पयन्ति ।[6] अङ्ग सम्बोधने । [7]धिगिति खेदे । तव[8] विगर्हणमियताऽप्येतावतापि न[9] भवति[10] ।।९२।।

कुसुममप्यतिदुर्नयकारि ते किमु वितीर्य धनुर्विधिरग्रहीत् ।
[1]किमकृतैष तवैकतदास्पदे द्वयमभूदधुना हि नलभ्रुवोः ।।९३।।

[2]कुसुममपीति । विधिः कुसुममपि धनुस्ते[3] तव वितीर्य किमु पुनरप्यग्रहीत् । किं भूतम् ? । अतिशयेन दुर्नयकारि । एष विधिः [4]किमकृत । न किमपि कृतवान् । हि यस्मात्[5] एकस्य तस्य[6] धनुषः आस्पदे [7]स्थाने अधुना[8] तव नलस्य भ्रुवौ धनुर्द्वयमभूत्[9] ।।९३।।

षड्तवः कृपया स्वकमेककं कुसुममक्रमनन्दितनन्दनाः ।
ददति षड्भवते कुरुते भवान् धनुरिवैकमिषूनिव[1] पञ्च तैः ।।९४।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[2]षड्तव इति । षट् ऋतवः कृपया स्वकमात्मीयं यत् एककं कुसुमं भवते[3] मिलित्वा षट् कुसुमानि ददति । किं भूताः ? । अक्रमेण युगपत् [4]नन्दितं नन्दनं वनं[5] यैः ते तथा तैर्भवानेकं धनुरिव कुरुते पञ्च इषूनिव कुरुते[7] ।।६४।।

सह तया स्मर ! भस्म [1]धगित्यभूः पशुपतिं प्रति यामिषुमग्रहीः ।
ध्रुवमभूदधुना वितनोः शरस्तव पिकस्वर एव स[2] पञ्चमः ।।६५।।

[3]सह तयेति । हे स्मर ! त्वं तया इष्वा बाणेन[4] सह धगिति[5] भस्माऽभूः । यामिषुं पशुपतिं प्रत्यग्रहीः ।[6] [7]ध्रुवमधुना तव वितनोः शरीररहितस्य स पिकस्वर एव पञ्चमध्वनिः[8] पञ्चमः [9]शरोऽभूत्[10] ।।६५।।

स्मर ! स मद्दुरितैरफलीकृतो भगवतोऽपि भवद्दहनश्रमः ।
सुरहिताय हुतात्मतनुः पुनर्ननु जनुर्दिवि तत्क्षणमापिथ ।।६६।।

स्मर ![1] स मद्दुरितैरिति । हे स्मर ! स[2] भगवतः श्रीमहादेवस्याऽपि[3] भवतो[4] दहनश्रमः मम दुरितैरफलीकृतः ।[5] ननु यस्मात् त्व दिवि तत्क्षणं [6]पुनरपि जनुर्जन्म आपिथ[7] अवापिथ ।[8] किं भूतः ? । सुराणां हिताय हुताः आत्मनस्तनुर्येन स तथा[9] ।।६६।।

विरहिणो विमुखस्य विधूदये शमनदिक्पवनः स न दक्षिणः ।
सुमनसो नमयन्नटनौ धनुस्तव तु बाहुरसौ यदि दक्षिणः ।।६७।।

[1]विरहिण इति । विरहिणः पुरुषस्य विधोरुदये विमुखस्य सतः शमनस्य यमस्य या दिक् दक्षिणा तस्याः पवनो मलयानिलो न[2] न[3] दक्षिणः न[4] अनुकूलः । [5]यश्च दक्षिणस्याः[6] वायुः स दक्षिणो भवत्येव । अथ च चन्द्रोदये पश्चिमाभिमुखस्य दक्षिणोऽपि वामो भवति । यः सत्व शमयति तद्दिग्भवः कथमनुकूलः । यद्यसौ दक्षिणानिल एव तु[7] पुनस्तव बाहुः स्यात्तदा दक्षिणः । तेन सम्बन्धेन भुजरूपेण दक्षिणः न तु दक्षिणा सम्बन्धात् । किं कुर्वन् [8]वायुः ? । सुमनसः पुष्पाणि धनुः[9] अटनौ प्रान्ते नमयन् । स्मरो हि दक्षिणभुजेन धनुर्नमयति[10] ।।६७।।

किमु भवन्तमुमापतिरेककं मदमुदान्धमयोगिजनान्तकम् ।
यदजयत्तत एव न[1] गीयते स भगवान् मदनान्धकमृत्युजित् ।।६८।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[2]किमु भवन्तमिति । हे स्मर ! यदुमापतिर्भवन्तमेव एककं मदस्य[3] मुदा अन्धं तथा अयोगिनो विरहिणो जनस्याऽन्तकं हन्तारमजयत् । तत एव स भगवान् मदमुदितो मदन[4] एव अन्धको [5]अन्धो मृत्युर्विरहि-मारयिता तं जितवान् स[6] तथा लोकैर्न किमु[7] गीयते ? । अपि तु तस्मा-देव कारणात् ननु [8]मदनजेता अन्धकदैत्यस्य[9] जेता मृत्योः कालस्य जेता इति त्रयजेता[10] ।।९८।।

[1]त्वमिव कोऽपि परापकृतौ कृती न ददृशे न च मन्मथ ! शुश्रुवे ।
स्वमदहो दहनात् ज्वलतात्मना ज्वलयितुं परिरभ्य जगन्ति यः ।।९९।।

त्वमिव[2] कोऽपीति । हे मन्मथ ! [3]त्वमिव परस्यापकृतौ द्रोहे कृती दक्षः । कोऽपि[4] न ददृशे न शुश्रुवे च । यस्त्वं[5] दहनात्[6] ज्वलताऽऽत्मना परिरभ्य[7] जगन्ति ज्वलयितुं स्वमात्मानम् अदहः । त्वं सर्वजन-चित्तस्थत्वादात्मना दह्यमानेन सर्वमपि धक्ष्यामीति स्वयम-धाक्षीः[8] ।।९९।।

त्वमुचितं नयनार्चिषि शम्भुना भुवनशान्तिकहोमहविः[1] कृतः ।
तव वयस्यमपास्य मधुं मधुं हतवता हरिणा बत किं कृतम् ।।१००।।

[2]त्वमुचितमिति । त्वं शम्भुना उचितं युक्तं [3]नयनस्यार्ऽचिषि भुवनस्य शान्तिकार्थं[4] सुखार्थं होमार्थं हविः होतव्यद्रव्यं कृतः । बत इति खेदे । तव वयस्यं मित्रं मधुं वसन्तमपास्य मधुं दैत्यं हतवता हरिणा[5] श्रीकृष्णेन किं कृतम् । न किञ्चित्[6] ।।१००।।

इति कियद्वचसैव भृशं प्रियाधरपिपासु तदाननमाशु तत् ।[1]
अजनि पांशुलमप्रियवाक्ज्वलन्मदनशोषणबाणहतेरिव ।।१०१।।

इति[2] कियदिति । तत्[3] तस्मात् तत् आननम्[4] आशु पांशुलं धूलियुक्तमिवाऽजनि[6] । केन ? । इति [7]कियत् स्वल्पमात्रेण वचसा एव कण्ठशोषणात् ।[8] किं भूतम् ? । प्रियस्याऽधरं[9] पिपासु । उत्प्रेक्षते-अप्रियया वाचा ज्वलन् कोपज्वलितो यो मदनस्तस्य शोषणेन बाणेन[10] या हतिर्हननं तस्याः सकाशादिव पांशुलं जातम् । यः किल तृषितस्तस्य कण्ठशोषात् पांशुरिव जायते[11] ।।१०१।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

प्रियसखीनिवहेन सहाऽथ सा व्यरचयद्गिरमर्द्धसमस्यया ।
हृदयमर्मणि मन्मथसायकैः क्षततमा [1]बहुभाषितुमक्षमा ॥१०२॥

[2]प्रियसखीति । अथ कण्ठशोषणाद्वचनाशक्त्या सा दमयन्ती प्रियसखीनिवहेन सहार्द्धं [3]समस्यया गिरं व्यरचयत् । अर्द्धं सखी[4] वदति, अर्द्धं [5]देवी वदति । यतः[6] बहुभाषितुमक्षमा । किं भूता ? । मन्मथस्य सायकैर्हृदयमर्मणि क्षततमा[7] ॥१०२॥

अकरुणादव सूनशरादसून् सहजयाऽऽपदि[1] धीरतयाऽऽत्मनः ।
असव एव ममाद्य विरोधिनः कथमरीन् सखि ! रक्षितुमात्थ माम् ॥१०३॥

[2]अकरुणादिति । हे दमयन्ति ! त्वमकरुणात् सूनशरात् कामात्[3] आत्मनोऽसून् प्राणानव[4] रक्ष । क्व ? । आपदि सत्याम् । कया ? । सहजया धीरतया । हे सखि ! ममाऽद्याऽसव एव[5] विरोधिनो जाताः । प्राणा एव शत्रवः । तत्कथं तान् अरीन् रक्षितुं माम्[6] आत्थ त्वं वदसि[7] ॥१०३॥

हितगिरं न शृणोषि किमाश्रवे ! प्रसभमप्यव जीवितमात्मनः ।
सखि! हिता यदि मे भवसीदृशी मदरिमिच्छसि या मम जीवितम् ॥१०४॥

[1]हितगिरमिति । हे आश्रवे ! वचनकरे दमयन्ति ! हितगिरं किं न शृणोषि ? । आत्मनो जीवितं जीवनं प्रसभमपि बलादप्यव रक्ष । सर्वत एव आत्मानं [2]गोपयेदित्यादिशास्त्रात् । हे सखि ! [3]यदि त्वं मे मम[4] हिता भवसि तदीदृशी भवसि ।[5] या त्वं जीवितं[6] मदरिं मम शत्रुभूतम् इच्छसि । यो हि हितो भवति स ईदृशो न भवति[7] ॥१०४॥

अमृतदीधितिरेष विदर्भजे ! भजसि तापममुष्य किमंशुभिः ।
यदि भवन्ति मृताः सखि! चन्द्रिकाः शशभृतः क्व तदा परितप्यते ॥१०५॥

[1]अमृतदीधितिरिति । सखी[2] आह-हे[3] विदर्भजे ![4] [5]एषोऽमृत-दीधितिस्तत्किममुष्यांऽशुभि[6]स्तापं[7] भजसि[8] । [9]दमयन्त्याह हे सखि ![10] यद्यस्य शशभृतश्चन्द्रिकाः[11] [12]दीधितयो[13] मृता [14]भवन्ति तदा क्व[15] परितप्यते[16] ॥१०५॥

व्रज धृतिं त्यज भीतिमहेतुकामयमचण्डमरीचिरुदञ्चति ।
[1]ज्वलयति स्फुटमातपमुर्मुरैरनुभवं वचसा सखि ! लुम्पसि ॥१०६॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

व्रज[2] धृतिमिति। सख्याह-त्वं धृतिं व्रज। अहेतुकां[3] निष्कारणां भीतिं त्यज। [4]यतोऽयम् अचण्डमरीचिश्चन्द्रः उदञ्चति उद्गच्छति। दमयन्त्याह। [5]हे सखि! त्वं ममाऽनुभवं प्रत्यक्षं वचसा वचनमात्रेण लुम्पसि[6]। प्रत्यक्षेणाऽस्य मरीचयश्चण्डा अनुभूयन्ते। त्वं तु अचण्डतां वदसि। ततस्त्वद्वाक्यम् आप्तवाक्यमपि प्रत्यक्षविरुद्धम्। यतोऽयमातपस्य मुर्मुरैश्चूर्णैः स्फुटं प्रत्यक्षं मां ज्वलयति। [8]त्वचमिति पाठे त्वगेव कर्म ॥१०६॥

अपि शपे हृदयाय तवैव तद्यदि विधोर्न रुचेरसि गोचरः।
रुचिफलं सखि! दृश्यत एव यज्ज्वलयति त्वचमुत्कलयत्यसून् ॥१०७॥

अपि[1] शपे इति। सख्याह—अहं तवैव हृदयायाऽपि शपे। [3]अकरणीयमपि शपथं करोमि। [4]हृदयमत्र ज्ञीप्सितमिति श्लाघह्नुङ् (पा॰ I. iv. 34) इत्यादिना सम्प्रदानम्। यदि त्वं विधोश्चन्द्रस्य रुचेः कान्तेर्गोचरः[5] विषयभूता नाऽसि। [6]दमयन्त्याह सोत्कण्ठम्—हे सखि! रुचेः प्रीतेः फलमिदं ननु[7] दृश्यते एव यदयं[8] चन्द्रः त्वचं ज्वलयति, असूनुत्कलयति निष्कासयति। यदि मयि रुचिः प्रीतिः स्यात्[9] न मां ज्वलयेत्। न[10] च असून् उत्कलयेत् ॥१०७॥

विधुविरोधितिथेरभिधायिनीं ननु[1] न किं पुनरिच्छसि कोकिलाम्।
सखि! किमर्थगवेषणया गिरं किरति सेयमनर्थमयीं मयि ॥१०८॥

[2]विधुविरोधीति। सख्याह—त्वं पुनरपि कोकिलां किं नेच्छसि?। किं भूताम्?। विधोर्विरोधिनी[3] या तिथिरमावास्या तस्या [4]अभिधायिनीमाकारिणीम्। [5]अमावास्याभिधायिनीं कोकिलाम्[6] अपि किं पुनर्नेच्छसि इति वा[7] योजना। दमयन्त्याह—हे सखि! अर्थस्य गवेषणाया[8] कुहूशब्देनाऽमावास्याऽभिधीयते। अनयाऽर्थान्वेषणया किं [9]कार्यम्?। सेयं कोकिला मय्यनर्थमयीं गिरं [10]किरति। विरहिणां पिकध्वनिरनर्थकरः ॥१०८॥

हृदय एव तवाऽस्ति स वल्लभस्तदपि किं दमयन्ति! विषीदसि।
हृदि परं न बहिः खलु वर्तते सखि! यतस्तत एव विषद्यते[1] ॥१०९॥

हृदय[2] एवेति। हे दमयन्ति! स वल्लभस्तव हृदये एवाऽस्ति। हे दमयन्ति! [3]तदपि किं विषीदसि?। दमयन्त्याह—हे सखि! यतः[4]

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

स मद्वल्लभः परं केवलं हृद्येव वर्तते न बहिर्दृश्यते । तत एव विषद्यते ।।१०९।।

स्फुटति हारमणौ मदनोष्मणा हृदयमप्यनलङ्कृतमद्य ते ।
सखि ! हताऽस्मि तदा यदि हृद्यपि प्रियतमः स मम व्यवधापितः ।।११०।।

[1]स्फुटतीति । सख्याह–मदनस्योष्मणा तापेन हारमणौ स्फुटति सति[2] अद्य ते तव हृदयमपि [3]अनलङ्कृतं न अलङ्कृतं, हाराभावात् । अथ[4] चाऽनलं नलरहितं कृतम् इति[6] भ्रान्तिज्ञाने[7] जाते दमयन्त्याह–हे सखि ! अहं हताऽस्मि । तदा यदि स मम प्रियतमो हृद्यपि हृदयेऽपि व्यवधापितः व्यवहितीकृतः । हृदयं चेदनलं कृतम् ।।११०।।

इदमुदीर्य तदैव मुमूर्च्छ सा मनसि मूर्च्छितमन्मथपावका ।
क्व सहतामवलम्बलवच्छिदामनुपपत्तिमतीमपि दुःखिता ।।१११।।

[1]इयमुदीर्येति । सा इदमुदीर्य तदैव मुमूर्च्छ । किं भूता ?। मनसि मूर्च्छितो । वृद्धिं गतो मन्मथपावको यस्याः सा तथा । नन्वनलं कृतं तव हृदयमिति श्रवणमात्रात् कथं [2]मूर्च्छां गता इत्याशङ्क्याऽऽह दुःखिता[3] अनुपपत्तिमतीम् अपि अघटमानामपि[5] अवलम्बलवस्य छिदां क्व सहतां कथं [6]क्षमते । [7]तस्या हृदये नलोऽस्तीत्यालम्बनमासीत् । तदपि सखीवचनेन त्रुटितं[8] भ्रान्तिज्ञानं तु तत्[9] ।।१११।।

अधित कापि मुखे सलिलं सखी प्यधित कापि सरोजदलैः स्तनौ ।
व्यधित कापि हृदि व्यजनानिलं न्यधित कापि बिसं सुतनोस्तनौ ।।११२।।

अधित[1] काऽपीति । तदनन्तरं काऽपि सखी मुखे सलिलम् अधित । काऽपि सरोजानां दलैः स्तनौ [2]प्यधित आच्छादयामास । काऽपि तस्या हृदि व्यजनानिलं व्यधित । कापि सुतनोर्दमयन्त्यास्तनौ[3] शरीरे बिसं[4] पद्मिनीकन्दं न्यधित[5] ।।११२।।

उपचचार चिरं मृदुशीतलैर्जलजबालमृणालजलानिलैः[1] ।
प्रियसखीनिवहः स तथा क्रमादियमवाप यथा लघु चेतनाम् ।।११३।।

[2]उपचचारेति । प्रियसखीनां निवहः स तथा तां मृदुभिः शीतलैश्च जलजैर्बालमृणालैर्जलैर्व्यजनानिलैश्च चिरमुपचचार ।[4] यथेयं दमयन्ती क्रमाच्चेतनां लघु शीघ्रमवाप[5] ।।११३।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

अथ कले ! कलय श्वसिति स्फुटं चलति पक्ष्म चले ! परिभावय ।
अधरकम्पनमुन्नय मेनके ! किमपि जल्पति कल्पलते ! शृणु ।।११४।।

रचय चारुमति ! स्तनयोर्वृतिं कलय केशिनि ! कैश्यमसंयतम् ।
अवगृहाण तरङ्गिणि ! नेत्रयोर्जलझराविति शुश्रुविरे गिरः ।।११५।।

अथ[1] कले ! इति । युग्मम् । अथेति गिरो वाणीः[2] शुश्रुविरे अन्तःपुरे[3]–हे कले ! सखि ! त्वं[4] कलय जानीहि स्फुटं प्रकटम् इयं दमयन्ती श्वसिति । हे चले ! हे [5]सखि ! अस्याः पक्ष्म चलति त्वं परिभावय विलोकय । हे मेनके ! त्वमस्या अधरस्य कम्पनं स्फुरणम् उन्नय विचारय[6] । हे कल्पलते ! इयं किमपि जल्पति इति शृणु[7] । रचयेति ।[8] हे चारुमति ! त्वं स्तनयोर्वृतिं रचय । हे केशिनि ! त्वमस्याः असंयतं स्रस्तं कैश्यं केशकलापं कलय बधान । [9]केशाश्वाभ्यां यञ्छावन्यतरस्यामि (पा° IV. ii. 48) ति यञ् । हे तरङ्गिणि ! त्वमस्या[10] नेत्रयोर्जलझरावश्रुप्रवाहौ अवगृहाण अपनुद । कला-चला-मेनका-कल्पलता-चारुमती-केशिनी[11] तरङ्गिणीति[12] सखी-नामानि[13] ।।११४–११५।।

कलकलः स तदालिजनाननादुदलसद्विपुलस्त्वरितेरितैः ।
यमधिगम्य सुतालयमेतवान् धृतदरः स विदर्भपुरन्दरः ।।११६।।

[1]कलकल इति । तस्या[2] आलिजनस्याऽऽननात् [3]स कलकल उदलसत्[4] । किं भूतः ? । त्वरितैरीरितैर्विपुलः[5] । यं कोलाहलमधि-गम्य ज्ञात्वा स विदर्भपुरन्दरो भीमो धृतदरः सभयः सन् सुताया आलय-मेतवान् गतः[6] ।।११६।।

कन्यान्तःपुरबाधनाय यदधीकारन्न दोषा नृपं
द्वौ मन्त्रिप्रवरश्च तुल्यमगदङ्कारश्च तावूचतुः ।
देवाकर्णय सुश्रुतेन चरकस्योक्तेन जानेऽखिलं
स्यादस्या नलदं विना न दलने तापस्य कोऽपि क्षमः ।।११७।।

[1]कन्यान्तःपुरेति । तौ द्वौ नृपं भीमं दमयन्ती पितरमूचतुः तुल्यं सदृशमेव वाक्यम् एकमेवेत्यर्थः । कः[2] कः ? । मन्त्रिप्रवरश्चा-ऽमात्यश्च[3] तथा अगदङ्कारश्च वैद्यश्च । यस्य मन्त्रिणोऽधिकारात् व्यापारात् कन्यान्तःपुरस्य बाधनाय[4] व्यभिचारादयो दोषा[5] न भवन्ति ।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

तथा[6] यस्य वैद्यस्य अधिकारात् कन्यानां पीडनाय रोगादयो दोषा[7] न प्रभवन्ति । [8]हे देव त्वमाकर्णय । अहं चरकस्य प्रणिधेः उक्तेन सुष्ठु श्रुतेनाऽऽकर्णितेन सर्वं जाने । अस्यास्त्वत्पुत्र्यास्तापस्य दलने नलं ददाति यः कश्चित्तं विना कोऽपि न क्षमः स्यात्[9] इत्यन्तः पुराधिकृतमन्त्रिणो [10]गदङ्कारस्य च वचनम् एकमेव । तथाऽहं सुश्रुतेन आयुर्वेदग्रन्थेन तथा चरकग्रन्थस्योक्तेनाऽखिलं रोगनिदानं जाने । अस्या नलदं[11] सल्लकीमतिशीतलामोषधीं विना तापस्य दलने कोऽपि[12] न क्षमः स्यात्[13] । [14]शार्दूलविक्रीडितं वृत्तम् ॥११७॥

ताभ्यामभूद्युगपदप्यभिधीयमानं भेदव्ययाकृति मिथः प्रतिघातमेव ।
श्रोत्रे तु तस्य पपतुर्नृपतेर्न किञ्चिद्भैम्यामनिष्ट-
शतशङ्कितयाकुलस्य ॥११८॥

[1]ताभ्यामभूदिति । ताभ्यां मन्त्रिवैद्याभ्यां युगपदभिधीयमानमपि तदेकं वाक्यं मिथः परस्परं प्रतिघातो यस्य तत्तथाविधं व्याहतमेवाऽभूत् । एकस्याऽन्यो वाक्यार्थः, अपरस्याऽन्यः । किं भूतम् ? । भेदव्ययस्याऽभेदस्याऽऽकृतिर्यस्य तत्तथा अभिन्नाकारम्[2] । तु पुनस्तस्य नृपतेः श्रोत्रे कर्णौ न किञ्चित् पपतुः[3] न [4]शुश्रुवाते । किं विशिष्टस्य ? । भैम्यां सुतायामनिष्टानां शतस्य शङ्कितया आकुलस्य व्याकुलस्य । अतिव्याकुलतया राज्ञा तयोर्वाक्यं न चिन्तितम् । यतः[5] अनिष्टशङ्कीनि बन्धुहृदयानि[6] ॥११८॥

द्रुतविगमितविप्रयोगचिह्नामपि तनयां नृपतिः पदप्रणम्राम् ।
अकलयदसमाशुगाधिमग्नां झटिति पराशयवेदिनो हि विज्ञाः ॥११९॥

[1]द्रुतविगमितेति । नृपतिस्तां तनयां द्रुतं विगमितमपनीतं विप्रयोगस्य विरहस्य चिह्नं मृणालादिकं यस्याः तां तथाविधमपि पदयोः प्रणम्रां सतीम् । असमा विषमा आशुगा[2] बाणा यस्य स तथा तस्य [3]कामस्याऽऽधिषु वियोगपीडासु मग्नाम् अकलयत् ज्ञातवान् । हि यस्मात् ये विज्ञा विशेषज्ञास्ते झटिति परस्याऽऽशयस्याऽभिप्रायस्य वेदिनो भवन्ति[4] ॥११९॥

व्यतरदथ पिताऽऽशिषं सुतायै नतशिरसे सहसोन्नमय्य मौलिम् ।
दयितमभिमतं स्वयंवरे त्वं गुणमयमाप्नुहि वासरैः कियद्भिः ॥१२०॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]व्यतरदथेति । अथ पिता सुतायै आशिषं व्यतरत् । किं भूतायै ?। नतं लज्जया शिरो यस्याः तस्यै तथा । किं कृत्वा ? । सहसा मौलिमुन्नमय्य । हे दमयन्ति ! त्वं स्वयंवरे अभिमतं दयितं भर्त्तारं गुणमयं कियद्भिर्वासरैराप्नुहि[2] ।।१२०।।

तदनु स तनुजासखीरवादीत्तुहिनऋतौ गत एव हीदृशीनाम् ।
कुसुममपि शरायते शरीरे तदुचितमाचरतोपचारमस्याम् ।।१२१।।

तदनु[1] स इति । स राजा तदनु पश्चात् तनुजायाः स्वपुत्र्याः[2] [3]सखीरवादीत् । हि निश्चितम् ईदृशीनां किञ्चित् यौवनप्रवेशवतीनां तुहिनऋतौ हेमन्ते गते एव शरीरे कुसुममपि लग्नं सत् शर इवाचरति । कोमलाङ्गत्वात् । अथ च वसन्ते[4] कामःबाणायते । तदस्यां विषये उचितमुपचारमाचरत । यूयं शीतोपचारं कुरुत[5] ।।१२१।।

कतिपयदिवसैर्वयस्यया वः स्वयमभिलष्य वरिष्यते वरीयान् ।
ऋशिमशमनयाऽनया तदाप्तुं रुचिरुचिताऽथ भवद्विधाभिधाभिः ।।१२२।।

[1]कतिपयेति । हे सख्यः ! कतिपयदिवसैः वो युष्माकं वयस्यया[2] दमयन्त्या स्वयमभिलष्य वरीयान् भर्त्ता वरिष्यते । तत्तस्मादनया[3] सुतया भवद्विधानां सखीनाम् अभिधाभिरुक्तिभिः[4] रुचिः शोभा आप्तुमुचिता [5]अर्हा । अथ[6] पुनरपि स्वशरीरकान्तिः प्राप्यताम् [7]कया ? । ऋशिम्नः[8] कृशत्वस्य शमना उपशमकारिता तया कृत्वा[9] ।।१२२।।

एवं यद्वदता नृपेण तनया नापृच्छि लज्जास्पदं[1]
यन्मोहः स्मरभूरकल्पि वपुषः पाण्डुत्वतापादिभिः ।
यच्चाशीः कपटादवादि सदृशी स्यात्तत्र या सान्त्वना
तन्मत्वाऽऽलिजनो मनोविधमतनोदानन्दमन्दाक्षयोः ।।१२३।।

[2]एवं यदिति । यदेवं पूर्वोक्तं वदता सता नृपेण राज्ञा तनया लज्जाया[3] आस्पदं दमयन्ती नाऽपृच्छि । त्वं किं[4] लज्जसे ?। इति न पृष्टम् । यच्च वपुषः पाण्डुत्वेन तापादिभिश्चास्याः स्मरोद्भूतो [6]जातो मोहोऽकल्पि[7] । यच्चाशीः[8] कपटात् तत्र प्रस्तावे सदृशी योग्या । सखीनां च[9] तस्याश्चोचिता या सान्त्वना सामवाक्यप्रयोगः स्यात् सा अवादि

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

राज्ञोक्ता।[10] तत्सर्वं मत्वा आलिजनः स्वकीयं मनः आनन्दमन्दाक्षयोरब्धिं समुद्रमतनोत्। मनसि हर्षश्च लज्जा च समुद्रतुल्या बभूव। [11]आनन्दाङ्कता[12] ।।१२३।।

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्।
तुर्यं स्थैर्यविचारणप्रकरणभ्रातर्ययं तन्महा-
काव्येऽत्र व्यगलन्नलस्य चरिते सर्गो निसर्गोज्ज्वलः[1] ।।१२४।।

[2]श्रीहर्षमिति। तस्य कवरेत्र महाकाव्येऽयं तुर्यश्चतुर्थः सर्गो व्यगलत्। किं भूते ?। स्थैर्यविचारणं नाम बौद्धानां क्षणिकवादपक्षदुर्ललितानां पराजयार्थं प्रकरणं ग्रन्थविशेषस्तस्य भ्रातरि। तदप्यनेन कृतमित्यर्थः[3] ।।१२४।।

[1]श्रीमानालिगपण्डितः स्वसमयाविर्भूतसर्वाश्रम-
श्चाण्डूपण्डितसंज्ञितं प्रसुषुवे श्रीगौरिदेवी च यम्।
इष्ट्वा षोडशिनि ऋतौ शतमखं सन्तर्प्य सोमग्रहैः
काव्ये नैषधसंज्ञिते स विवृतिं सर्गे चतुर्थे व्यधात् ।।१२५।।

इति [2]श्रीचाण्डूपण्डितविरचितायां नैषधदीपिकायां टीकायां वैदर्भीविप्रलम्भो नाम चतुर्थः सर्गः समाप्तः[3] ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

टिप्पण

सर्ग—४

1 B om. अवतरणिका; P1 add. ॐ नमः सिद्धम् । 2 P1 °मुप° 3 P1 add. तस्यां ।

1 P1 अथ । 2 P1 add. तस्य 3 P2 recto. inf. mg. add. शीलादिकं 4 BP1 गुणं once 5 P1 add. कृत्वा 6 P1 om. तं 7 P2 °नलस्य 8 B सुगन्धं पुष्पं; P2 सुगन्ध° 9 P1P2 °लक्षणं 10 P2 lecto. Sup. mg. तामपि ॥ P1 add. द्रुतविलम्बितं वृत्तम् । रूपकं दीपकं श्लेषश्च ॥१॥

1 P1 यद् । 2 P1 om. यत् 3 P1 विप्रलम्भशृङ्गारादौ 4 P1 add. विरुद्धा अक्षरच्युतकेन विषमेत्यर्थः । 5 B om. समपद्यत.........: ? । 6 P1 परिणितिः 7 P2 °शील: 8 P1P2 तस्या 9 P1 add. रूपकं रूपका-देवाऽर्थान्तरसमासोक्तिः ॥२॥

1 B gives text. onw. and om. प्रतीक upto IV. 106. 2 P1 ध्रुव । 3 P2 प्रचयमपि 4 P2 °परिणाम° 5 BP2 पतत् 6 P1 थितेर्जिवितस्य व्यवस्थाया वा पक्षे अवस्थानस्य 7 P2 lecto. inf. mg. add. जीवितस्य नाशिकां वा 8 P1 °दनन्तरं 9 edr. add. तदुदितः 10 P1 add. अनुप्रास उपमोत्प्रेक्षार्थान्तरन्यासः । स्थितिरिति अव-शिष्टम् ॥३॥

1 P1 अति । 2 B अस्या 3 P2 आनने 4 P2 लेशस्य 5 P1 add. अनुप्रासोऽतिशयोक्तिनिरङ्गरूपकं च ॥४॥

1 P1 किमु । 2 B अस्या 3 P1 add. तदभिकेन तस्या अभिकेन 4 P1 add. दैवीं 5 B आभिकेन 6 P1 add. इत्यर्थः । 7 B om.

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

अनुका°.........कमिता ।; P2 °मीकाभिक: 8 P1 add. उत्प्रेक्षा काव्यलिङ्गं च ।।; P2 Sup. lin. add. एतेनेन्द्रस्याऽपि अभिलाषो भैम्यामस्तीति सूचितम् ।।५।।

1 P1 कुसु । 2 B दधत् 3 BP2 एक्षत 4 P2 किं भूतम् ? । 5 B अभ्यधिकाम्; P2 अत्यधि° 6 P1 add. अनुप्रासनिदर्शने ।।६।।

1 P1 तरुण । 2 B om. तस्या: कुचकुम्भयुगं 3 P2 अनलस्य 4 P1 म:तम् 5 BP1 तरुणता.........तत्तथा at the end. 6 P1 add. कर्मविशेषणं चेदम् । अनुप्रासो रूपकं श्लेषश्च ।।७।।

1 P2 text °ज्वर° 2 P1 अवृत । 3 P2 recto. Sup. lin. add. कामेन 4 B तत् 5 P1P2 om. दधाति । 6 P1 lecto. mg. add. ऊषरक्षेत्रेण-एतावता ऊषरभूमिकायां न कदलीतरुर्भविष्यति । न ऊर्वो: उपमानं कदनेऽपि । कदलीतरोर्नोपमानमिति भाव: । अनुप्रासोऽतिशयोक्तिश्च ।।८।।

1 P1 स्मर । 2 P1 °युग्मं 3 P1 तप्तं 4 B तप्तेन. 5 P1 add. अनुप्रास उपमा च ।।९।।

1 P1 मदन । 2 B दमस्वसु: 3 B नोदपाति 4 B om. च 5 B दाधार 6 B om. विदीर्योत्पन्नं 7 P1 om. ताप°.........कुर्वती; P2 add. अथवा 8 P1P2 om. न 9 P1 add. अतिशयोक्ति: ।।10।।

1 P2 text न 2 P1 निविश ।; P2 निविडपातेति । 3 B om. किंशारुरुचि:; P2 om. सूचि: 4 P2 add. वा 5 B महतीं B om. तु 7 P1 om. 8 B प्रविश्य 9 P1 om. नु 10 B om. अपितु करोतु 11 B om. हृदये 12 P1 add. अनुप्रासोऽतिशयोक्ति: काव्यलिङ्गम् । अवनिभृदिति श्लिष्टम् ।।११।।

1 P1 मनसि । 2 P1 add. सन्मुखवास्तुनि अभिमुखभूमौ यदस्तु तस्मिन्निति वैयधिकरण्यमित्यन्य: । 3 P2 किं तयो: ? । 4 P1 नलं प्रियं 5 P2 अन्तर्हृदयान्तर्मध्ये 6 P1 add. ग्लानि: । व्यभिचारी । अनुप्रास उत्प्रेक्षा विरोधाभासश्च । उक्तनिमित्तां विशेषोक्तिर्वा ।।१२।।

1 P1 हृदि । 2 B प्लुतौ 3 P1 आवनति: 4 B om. अपि 5 P1 add. अन्यसुहृदयभाजं नलं चुम्बितुमुपेत्य समीपं गत्वा मुखमागमितमिवाऽऽनीतमिव । मुखं तु नलस्यैव । यस्य किल चुम्बनं क्रियते तस्य मुखं समीपे आनीय चुम्बयत इत्याह । उत्प्रेक्षाऽतिशयोक्तिश्च ।।१३।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 सुहृदमित्यादि । 2 BP2 गुप्तं 3 P1 मायाविता; P2 मायावित् 4 B कपटत्वं aft. किं न 5 B मायाता 6 P1 add. अग्निमुदञ्चयितुम् 7 P1 add. अथवा गन्धवहेन वायुना कर्त्रा निःश्वसितेन करणभूतेन विनिर्गमानुमितनिह्नुतवेशनमायिता धृता । निःश्वसितेन कर्त्रा गन्धवहेन घ्राणेन करणभूतेन विनिर्गमानुमितनिह्नुतवेशनमायिता इत्यन्यः । रूपकमुपमाऽनुमानं काव्यलिङ्गं च ।।14।।

1 P1 विरह । 2 P2 om. चित्रकरी । 3 P1 add. तस्या दमयन्त्या अथवा 4 P2 om. एव 5 B om. च 6 P1 add. उत्प्रेक्षा रूपकं विशेषोऽनुप्रासोऽपि ।।१५।।

1 P2 text °कृतां 2 P2 स्मर । 3 P1 श्रितम् अदः तदयं वा पूर्वार्द्धप्रक्रान्तं तेन श्रुते 4 B स्मरकृतिं 5 P1 कामस्य 6 P1 मुहुर्मुहु यथा 7 P2 वदन्नपि 8 P1 वससो 9 P1 add. अनुप्रास उपमाऽर्थान्तरन्यासश्च ।।१६।।

1 P1 कर । 2 P2 inf. mg. add. वियोगसन्तापे सति 3 B °नाम्बुज° 4 P2 अभूतपूर्वं° 5 P1 add. अन्योऽपि यः पूर्वं पानीयादि पिबति स पश्चात् ज्वरे सति उत्सृजति । अतिशयोक्तिः । समासोक्तिरपह्नुतिः 11 P2 inf. mg. add. एतेनाऽतिदाहः प्रतिपादितः ।।१७।।

1 P1 उदय ।; P2 उदयेति । 2 P2 Sup. mg. add. आश्चर्यम् 3 P1 Sup. mg. add. उद्गतं सञ्जातमिति यावत् 4 B यत्र 5 B om. तस्यां 6 B om. राज्ञः 7 P1 add. तत् 8 P1 आलिभिः 9 edr. एवाऽस्या 10 P1 om. °तप्त° 11 P2 om. बाष्पस्य..........अत्र 12 P1 add. धूमत्वात् 13 P1 add. तु 14 B om. स्म 15 P1 add. इ (333) गतावित्यस्माल्लट् । श्लेषो व्यतिरेको विरोधाभासश्च ।।१८।।

1 P1 हृदि । 2 P1 om. रतिपतिः 3 P2 add. दमयन्त्या 4 B om. सन् 5 P1 add. मूर्च्छा वृद्धिर्मोहश्च । 6 P2 add. विसर्गः 7 P1 कृतस्य हृदयस्य; P2 कृततस्य 8 B अन्तरस्य and om. अन्तर्गतस्य 9 P1P2 दृढो 10 B °स्थितमात्मानं विद्धम् । 11 P1 add. काव्यलिङ्गमुत्प्रेक्षा अमूर्च्छेदिति श्लिष्टम् ।।१९।।

1 P1 विधुर । 2 P1 एकमपीदं 3 B आवर्त्ता 4 P1P2 om. वियोगाधिक्येन 5 P1 °भूतं 6 P1 add. अनुप्रासो विरोधश्च ।।२०।।

1 B text चिन्ता° 2 P1 हृदया । 3 P2 यथा 4 P1P2 वियोगे 5 P2 om. विसर्गः 6 B om. यतः 7 B °सतु° 8 P1P2 चितायाम्

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

9 B तस्य 10 P1 add. चिताया अर्चिषि ज्वालायां वा 11 B om. न 12 P1 add. व्यतिरेकः ॥२१॥

1 B text °न्यस्त्र° 2 P1 अनल । 3 B वासिनो 4 P2 om. नलस्याऽभावम् 5 P1P2 प्रशमाय 6 P1 add. अनुप्रासोऽनुमानमतिशयोक्तिः काव्यलिङ्गं विरोधश्च रूपकं वा ॥२२॥

1 P1 प्रकृ । 2 B om. कथं 3 P1 संसदि अमर्थं 4 P1 add. अनुमानं श्लेषो विरोधश्च ॥२३॥

1 P2 text ज्वल° 2 P1 रिपुत । 3 P2 बिसस्य 4 B पद्मिकं वा 5 P1P2 हृदि 6 BP1 उत्प्रेक्षन्ते 7 B प्रविष्ठाः 8 P1 om. तां ज्वरयितुम् । 9 P1 तस्या विरहिणीत्वात् प्रकर्षेण शत्रुभूता । 10 P2 om. गृहात् 11 B om. अन्यथा 12 P1 add. बिसमिति बिस्यतेर्धातोः प्रयोगः । यदाह यास्काचार्यः—बिसं बिस्यतेर्भेदेन कर्मणो द्विकर्मणो वा (I. 11.) इति । यः किल शत्रुः सोऽन्यरूपं कृत्वाऽद्वारेण रिपुं तापयितुं प्रविशति । सापह्नवोत्प्रेक्षा समासोक्तिः काव्यलिङ्गं च ॥२४॥

1 P1 हृदि । 2 B हृदये 3 BP2 om. मुखादेः 4 B om. आरोपि 5 P1 add. द्वन्द्वश्च प्राणितूर्यसेनाङ्गानामि (पा° II. iv. 2) ति सूत्रम् । तत्रैको बाणो द्वौ दृशौ द्वावोष्ठौ एवं पञ्च । 6 P1 add. इत्यादि । 7 P1 add. इत्युत्प्रेक्षाव्यञ्जकम् । 8 P1 add. अतिशयोक्तिः ॥२५॥

1 P1 विरह । 2 P2 om. सुखं 3 P1P2 om. अनायासेन 4 B व्यधिता 5 B शितांशुः चन्द्रो यत्र कपोले 6 B om. प्रतिबिम्बतस्य 7 B ज्ञायत ।; P1 add. अनुप्रास उपमा सामान्यं च । रुद्रटमते अतद्गुणः । यदाह–यस्मिन्नेकगुणानामर्थानां योगलक्ष्यरूपाणाम् । संसर्गे नानात्वं न लक्ष्यते तद्गुणः स इति (का° लं° ix. 22) ॥२६॥

1 P2 text दधौ 2 P1 विरहन्तापि 3 P1P2 om. प्रति 4 B मायनक° 5 P2 om. पांशुभिः 6 B om. सा 7 B विरहण 8 B विशानां पद्मिनीनां 9 B om. सर्प° 10 B om. पाण्डुश्च; P1 add. भस्मना 11 B om. शम्भुवेशेण 12 P2 °यानो° 13 P1 add. अनुप्रासः काव्यलिङ्गमुपमा च ॥२७॥

1 B text °हतं 2 P1 विनि । 3 P1 add. हृदये 4 B °हतं 5 P1 बभौ 6 B om. सुहृदम् 7 B °मतः 8 P1 उडुपरि° 9 P1 यस्याः सा 10 P1 add. काव्यलिङ्गमुत्प्रेक्षा च ॥२८॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 B text °पथी; P2 text °पथे 2 B text °मुर्मुर° 3 P1 स्मर। 4 P1 मया 5 B om. मुहुः 6 P2 om. श्रयितुं 7 P1 अर्द्धपथं कृतम् अर्द्धमार्गं यावत् कृतम्। अन्तरा मध्ये उज्झितम्। 8 P1 निर्मितः मर्मरः शुष्कपत्रशब्दः शुष्क° 9 BP1 विरह° 10 P1 अर्द्धपन्था यस्येति सरसीरुह-विशेषणम्। अथवा अन्तरे निःश्वसितेत्यादिना समस्यते। अथ मर्मरः स्वनिते वस्त्रपर्णानामि (I. iv. 33, 34) ति अमरसिंहः। मर्मरेति शब्दानुकरणम् अनुप्रासोऽतिशयोक्तिः 11 B om. अन्तरान्तरेण युक्ते ।।२९।।

1 P2 text त्विति। 2 P1 प्रिय। 3 P1P2 निहते 4 P1 om. कृत्वा 5 P1 add. इति 6 P1 पाणिना 7 P2 तु 8 B ताम्यसि 9 P1 add. प्रतीयमानोत्प्रेक्षा ।।३०।।

1 P2 text °स्थितं 2 P1 त्वदि। 3 P1 इति किम्?। 4 P2 om. मया 5 P2 om. मनसाऽपि 6 P2 add. भवति and om. गति°........परस्मैपदम्। 7 P1 add. उत्प्रेक्षा ।।३१।।

1 P1 विरहिता। 2 B अत्र 3 P2 च 4 P2 add. किं तु 5 P1P2 भूत्वा 6 P1 add. उत्प्रेक्षा ।।३२।।

1 BP2 text °क्षत° 2 B text °कलेय 3 P1 इयम्। 4 P2 om. अपि........निदधौ 5 B सर्वे 6 B सर्पः 7 B क्षत........व्याख्येयम् at the end. 8 B शशिकला and om. इव; P1 शशिनः कला twice 9 B om. शशिकला 10 P2 om. निदधाति 11 P1 om. क्षिपति; and add. रूपकमुपमा च ।।३३।।

1 P1 ज्वल। 2 B om. निजे 3 B मृणालं 4 P1 add. अन्योऽपि स्वजयिनः सन्निधौ लज्जया मलिनतां भजते। अनुप्रास उत्प्रेक्षा च ।।३४।।

1 B text स्वनूधम° 2 P1 पिक। 3 B तथा 4 P2 om. सत् 5 BP1 रुतिः 6 P1 add. हृदयगतो 7 P1P2सक्तो 8 P1 यः aft. कामः 9 P1 हृदयः 10 B om. अथवा मकरः 11 P1 तस्याः 12 B om. मकरश्च 13 P1 मकरमत्सयोः 14 P1 add. उत्प्रेक्षा ।।३५।।

1 B text शशिना° 2 B text °मसुस्रुवदस्रु° 3 P1 न खलु। 4 P1P2 om. तव 5 B om. पक्षे 6 P1P2 om. अबोधि 7 P1 om. ततः 8 B दमयन्त्याः 9 P2 शुश्राव 10 P2 अतोऽर्थ°..........प्रामाणिकम् here. 11 P2 add. न 12 P1 °कान्तित्वं 13 P1 प्रामाणिकी; and add. दीपजने (पा° III. i. 61) त्यादिना चिण्। अनुमानम्। शशिकान्त-मिति श्लिष्टम् ।।३६।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 रति। 2 P2 इषुबाणो 3 B वर्त्तंत 4 P1 om. स 5 P1 add. अतिशयोक्तिरुपमोत्प्रेक्षा । पञ्चतयेति श्लिष्टम् ॥३७॥

1 P1 शशि। 2 P1 मनसिजस्य शशिमयं 3 B °दैवत्वम्; P1P2 देवत्यम् 4 P1 add. अतिशयोक्तिरपह्नुतिश्च ॥३८॥

1 P2 text °च्छ्‌वसनमस्त्रं° 2 P1 अतनु। 3 B om. जलधर°; P2 जलवर्षि 4 P1 add. वारुणम्। अथवा जलवर्षि नवम् आम्बुदं 5 BP2 उचितं aft. अमुञ्चत् 6 B om. स 7 P1 अनुप्रासोऽतिशयोक्तिश्च अपह्नुतिः॥ P2 om. अतिशयोक्तिः॥३९॥

1 B text °घति° 2 B text °जास्त्र° 3 P2 text °वादित 4 P1 रति। P1 om. सा 6 P2 add. कामेन 7 P1 om. तां 8 B कामास्त्रस्य; P1P2 रतिपतेः 9 P1 तद्‌भयात्; P2 तदुभयात् 10 P2 अत्ता 11 P2 om. भवति 12 B om. तच्छब्देन.........वामनः। 13 P2 °वृत्ते° 14 P2 om. सापह्नवोत्प्रेक्षा 15 P1 add. अनुप्रासोऽपि ॥४०॥

1 P1 न्यधित। 2 P1 add. च 3 P1 add. अथवा तथाऽपि विरहित्वेऽपि जीवितं च 4 P1 add. द्वयस्य शल्येन संभावनाम् उभयोः साधर्म्यमित्यन्यः। 5 B om. च 6 B om. तत् 7 BP2 om. बिल्वफलद्वयम् 8 BP2 °बालक° 9 P1 निहत्य twice 10 P1 add. किल 11 B मस्ते 12 P2 °निश्चलतार्थं 13 P1 उत्प्रेक्षा रूपकं च। पाक्षिकी उपमाऽपि॥; P2 om. उपमोत्प्रेक्षा ॥४१॥

1 P2 text °युगा° 2 P1 अति। 3 B om. अतिशयेन सरव्यं कुर्वंता 4 P2 उपरि 5 P1P2 °युगं 6 P2 कृत्वा 7 P1 add. निखिला पुष्पमयाः 8 B स्वरा° 9 P1 add. न 10 P1 add. उत्प्रेक्षा रूपकं च।; P2 Sup. mg. add. एतेन स्मरतापाधिक्यं प्रतिपादितम् ॥४२॥

1 P1 अथ मु। 2 B °श्चन्द्रा 3 P1 om. तया 4 B किं भूता?। 5 B वितिश्रं 6 P1 add. वक्ष्यमाणयोरपि चन्द्रनिन्दाराहुस्तुत्योः सामान्येन प्रतिपादनादतीतत्वेन निर्देशः। यथा क्रमादमुं नारद इत्यबोधि स (शिशु° I. 3) इति भविष्यत्यपि नारदबोधे,—ददर्शावतरन्तमम्बराद् हिरण्यगर्भाङ्गभुवं मुनिं हरि (शिशु° I. 1) रिति प्रागेव मुनिदर्शनस्य सामान्येनाऽतीतत्वेन निर्देशः। अनुप्रासः॥४३॥

1 P1 नर। 2 B मध्य 3 P1 यस्य twice 4 P1 om. तद्युगं 5 P1 add. नियतैः कैश्चिन्मितम्। एकेनैव वा क्षणेन 6 P2 om. दैविकानां

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

............द्वयं 7 BP2 तया; P1 add. हि 8 P1 प्रीतिमतोर्यूनोः 9 P1 add. एकेनैव वा रतवद्युवक्षणेन 10 P1 यस्तयोः 11 P1P2 वियोगिनोः 12 P1 add. उपमातिशयोक्तिश्च ।।४४।।

1 B text जमु° 2 B text न हरस्य 3 P1 जनु। 4 P2 om. सती 5 P1 add. अन्यत् स्थापयित्वा प्रकृतिनिषेधमाह 6 P2 तेन 7 B महिमालस्य 8 P1 add. मालतलं हि विधातृलिपिलेखनास्पदम् इति लिखित इत्युक्तम्। ज्वलतिनाऽनलत्वमाक्षिप्तम्। अपह्नुतिरतिशयोक्तिश्च 11 P2 om. तादृग°............वाच्यः ।।४५।।

1 P1 दहन। 2 edr. add. दवथु° 3 BP1 व्यतिरेकाऽनु 4 B om. तदा 5 P1 add. उत्कटाः 6 P1 अनुगमनं 7 P1 नुपरि° 8 P2 om. कम्वा°............अर्थात् 9 P1 अन्यथाऽनुपपद्यमानः 10 P1 add. अनुमानं व्यतिरेकश्च ।।४६।।

1 P1 add. इदानीं चन्द्रनिन्दामाह। 2 B om. विसर्गः 3 P1 हृदि लुठन्तीत्यादि। 4 P2 विधौ 5 B om. यतः 6 P2 om. पङ्केन 7 B om. नितरां 8 P2 कलङ्कस्य............°स्थितत्वात् at the end 9 B स 10 P1 add. कला चन्द्रस्य षोडशो भागः शिल्पं च। अनुप्रास समासोक्तिश्च ।।४७।।

1 B text °श्चम्भु° 2 P1 अयि। 3 P1 om. त्वं 4 P1 om. स्फुटं 5 P2 दाहस्य 6 P1P2 अशिक्षित 7 P2 om. उदधौ 8 B किं भूतम्? । 9 P1P2 om. दग्धं 10 P1 add. त्वं हि शम्भोर्मालिमावससि। 11 P1 जल 12 P1 समुद्राज्जातस्त्वम्। 13 P1 add. आख्यातोपयोगे (पा° I. iv. 29) इत्यपादानम्। अनुप्रासः ।।४८।।

1 B text °यव° 2 B text स्फुटमु° 3 P1 अय। 4 P1 add. अयोगानां 5 P1 add. तस्माद्धातेन 6 P1 शनिः 7 P1 शाला 8 B स्फुलिङ्गानां; P2 किं 9 P1 अधिकतारकितम् अधिकतारकीकृतम्। 10 B तारकाः............इतच् aft. भवन्ति; P1 add. तारकितमिति ण्यन्तनिष्ठा 11 P1 add. अधिकं तारकितमम्बरं यस्मादिति वा। 12 B भ्रमित्वा 13 B पात्यते 14 P1 add. अनुप्रास उत्प्रेक्षा रूपकम् अनुमानं समासोक्तिश्च ।।४९।।

1 B text add. विसर्गः 2 P1 त्वम। 3 P2 om. त्वं 4 P2 om. इदं 5 P2 om. न 6 P1P2 त्वां शिरसि 7 P1 add. विभ्रमः ।।५०।।

1 B text किलि 2 P1 किम। 3 B °मेयं 4 B °श्चन्द्रे 5 BP2 नलस्य............तन्निष्ठां aft. लीयते 6 B पुरुषस्य 7 P1 add. च 8 B

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

om. जनमनांसि............त्वयि चन्द्रे ।। 9 P1 add. काव्यलिङ्गं रूपकं जडविबुधपदश्लिष्टम् ।।५१।।

1 B text °चिषि 2 B text °निर्वः 3 P1 निप 4 P1 अब्धौ 5 P1 अपि aft. °भूभृता 6 P1 add. पीतं............तथा here 7 P2 om. त्वं 8 B किं भूतः ? । 9 P1 add. विभावना । अनयोः श्लोकयोः पाठे क्वचिद्विन्यासः ।।५२।।

1 B text शयो° 2 B text पौरुषं 3 B text मुच 4 P1 मुखर । 5 B om. मुखस्य..............वाऽपवादे 6 B om. °ना............कदर्थ °7 P1 add. अनुप्रासो व्याजस्तुतिर्दीपकं च ।।५३।।

1 B text शशि 2 B text माप 3 B text °रहंपति° 4 BP2 text °निह्नुत° 5 P1 निशि । 6 P1 om. ते तव 7 P2 निह्नुत 8 P1 add. त्याजितदर्पत्वं 9 B om. पुनः 10 P1 add. पाणिनीये लुट् । उत्तमपुरुषैकवचनम् । अतिशयोक्तिः । पर्यायोऽपि ।।५४।।

1 B text छलसि 2 P1 शशिकलङ्क । 3 B शशलाञ्छन; P1 शशि° 4 P1 हे मादृशां 5 P1 किम् ? 6 B श्रितम् 7 P1 om. च 8 P1 भीषयन्ते 9 P1 add. सुधामयस्य 10 P1 add. ईदृशश्चासौ भूतश्च तस्य भावः । क्रियाशब्दस्य अभिधेयवल्लिङ्गम् । पिशाचे उभयलिङ्गत्वम् । 11 B मूर्ध्ना 12 P1 ईदृशश्चासौ भूतश्च ईदृशं च तद्भूतं चेति वा । 13 P1P2 अपि 14 P1 add. विरोधः श्लेषोऽनुप्रासश्च ।।५५।।

1 B text °लाङ्कुर 2 P2 text तुन्दलितः 3 B text क्षणाम् 4 P1 श्रवणपूरण । 5 P1 add. चेत् 6 P1P2 तुन्द° 7 P1 add. तुन्दादिभ्य इलच् (पा° V. ii. 117) ततो ण्यन्तान्निष्ठा । हेतुः ।।५६।।

1 P1 असम । 2 P2 om. सती गता 3 P2 ईर्ष्यते 4 P1 add. अर्थान्तरन्यासः ।।५७।।

1 B text शिशुमुने 2 P1 अयि । 3 P1P2 मुनेरगस्त्यस्य 4 P1 om. किं 5 edr. add. °शिशोः 6 B पठितः 7 P1P2 बालस्याऽभ्यासो रुचिरो भवति । 8 P1 add. अनुप्रासो विरोधश्च ।।५८।।

1 B text करं 2 B मुखा° 3 P1 कुरु । 4 P1 add. अस्मिन्प्रदेशे वा 5 B om. मे 6 B कुरुष्व 7 P1P2 यदैव 8 B प्रतिबिम्बो 9 P2 शत्रुम् अहितं 10 B om. कुरु; P1 add. अनुप्रासः 11 P lecto. Sup. mg. add. न हि अन्यनायिकास्य शत्रुः सत्या इत्यर्थः ।।५९।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 उदर। 2 B om. किं न धृतः ?। 3 BP1 om. विषम° ....साधर्म्योपमा। 4 P1 विबुभुजते। and add. विषवदेव उपमा-सन्देहौ ।।६०।।

1 B text पुन° 2 P1 असित। 3 P1 add. आर्णवं समुद्रोत्पन्नम् 4 P1 om. ततश्च 5 P1P2 स्वयं 6 P1 °वारं नूतनं सत् उदेति 7 P1 add. आलवमिति पाठे लवं लेशमप्यभिवाप्य निपीय जनितक्षयमपीति योज्यम्। अङ्कुरमात्रमपि न शेषितमित्यर्थः। अथ वा नवं देशलेशमपि अव्यभिवाप्य उदेति योज्यम्। व्यतिरेकविरोधौ ।।६१।।

1 P1 विरह। 2 B om. विसर्गः 3 P1 add. अनुप्रासः काव्यलिङ्ग-मतिशयोक्तिर्विरोधश्च ।।६२।।

1 P1 विरहिभिः। 2 P1 add. ण्यन्तमण्यन्तमपि वा 3 P1 add. बहु मानमस्याऽस्तीति बहुलः। सिध्मादिपाठात् लच्। अथवा बहु मानं लायते आप्यते बहुलः। अथवा 4 P1 add. क्षयित्वे 5 B परं च 6 P1 add. पक्षे, बहुलशब्दः पुलिङ्गः। यदाह-बहुलं भूरि वियतोर्बहुलः पावके शितौ। कृष्णपक्षे तु बहुलः सुरभ्यां नीलिकैलयोः (अने° स° III. 710)। उत्प्रेक्षा-द्वयम् ।।६३।।

1 P1 स्वरिपु। 2 B स्वरिपुः 3 P2 यः तीक्ष्णः here 4 B om. प्रत्यनीकत्वं यः 5 P1 भ्रान्त्या विभ्रमात् 6 P1 अथवा 7 P1 om. वा; and add. भ्रान्तिमानमनुमानं च। अन्यस्तु किं चक्रभ्रमाद् ग्रसते, अपि तु न। किं तर्हि ?। एवमेव रिपुभ्रान्त्या चन्द्रं न ग्रसते इति व्याचष्टे ।।६४।।

1 P1 वदन। 2 P2 om. अयम् 3 B om. हे सखि; P1 add. अनुप्रास उत्प्रेक्षा विरोधश्च ।।६५।।

1 B om. text ऋजु°............शशी यदि 2 P1 ऋजु। 3 B पुर°; P2 om. °विदो 4 P1 add. राहोः शिर इति षष्ठी। शिलापुत्रकस्य शरीरमिति तदुपचाराद्भेदे। 5 B om. यतः 6 P1 °त्भेत्तारं 7 P1 first शशी............जीवेत्। then यदि............स्यात्। 8 P1 न 9 P1 add. काव्यलिङ्गम् ।।६६।।

1 P1 स्मरस। 2 P1 यदा 3 BP1P2 यज्ञस्य; edr. मखस्य 4 P1 add· उपमा ।।६७।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 नल । 2 P1 add. तमोग्रहस्य शिर इति अभेदेऽपि भेदोपचारः । 3 P2 नलस्य 4 B om. रिपोः 5 B °भिया; P2 चरणस्य 6 P1 add. काव्यलिङ्गम् ॥६८॥

1 P1 सखि । 2 P1 वादयस्य 3 P1P2 om. तर्त्कि 4 P1 add. अपि 5 B om. तमः..........समासः । 6 P1 किं; P2 om. कथं 7 P1 add. तमोयस्तकं 8 B om. चण्ड°..........भक्षितम् । 9 P1 °समासादित-प्रसादम् 10 P1 भूत्वा 11 B om. प्रादु°..........त्यक्रम् । 12 P1 add. उपमा ॥६९॥

1 BP2 text °धिया 2 B text विधुम् 3 P1 वद विधुन्तुद । 4 P1 om. त्वं 5 P1 add. न 6 B om. द्विजराज°..........निषेधात् । अथवा 7 P2 om. हि यस्मादेव 8 P2 om. भवे°..........द्विजराजः 9 B om. किमु 10 P1 add. हि निश्चितम् 11 P1 add. तस्माद् यद्यपि द्विजराजोऽयं भवति तथाऽपि पुनः प्राप्त्यभावात् द्विजराजबुद्धया द्विजराजभिया वा रिपुर्न त्याज्यः । समासोक्तिः ॥; P2 recto. Sup. mg. add. अत्र समासोक्ति-रलङ्कारः ॥७०॥

1 B text दाहिकी 2 P1 दह । 3 P1 गिलितः 4 P2 दाहका 5 P2 add. कः 6 P1 add. ब्राह्यं तेजः; P2 om. वद 7 B om. तस्माद् द्विजोऽयं नैव 8 P1 add. उत्प्रेक्षा काव्यलिङ्गमुपमाऽतिशयोक्तिश्च ॥७१॥

1 B om. text किल..........श्रुतः and अयं विधुः अतः द्विजा° 2 P2 text श्रुतिः 3 P1 सकल । 4 P1 किल here 5 P1 राज इति 6 P1 add. सम्भावने वा 7 B om. सह 8 P2 अन्तकाय 9 P1 add. वधायेति पाठे वधार्थं 10 P1 add. श्रुतिरिति पाठान्तरम् । अनुप्रासः सापह्नु-वोत्प्रेक्षा ॥७२॥

1 P2 text विधिना चकृषे 2 P1 स्मर । 3 B om. इदं 4 P2 add. च 5 P1 om. लाञ्छितः; and add. अनुप्रासो रूपकमपह्नु-तिश्च ॥७३॥

1 P1 text °शिती° 2 B text जिघत्सया 3 B om. पुस्तकान्तरेऽयं श्लोको न भवति ! 4 किं भूतः ? । 5 P1 शितीकृतः 6 P2 विग्रहः श्वेतः; P1 श्वेतविग्रहः 7 B शरं 8 P1 add. उत्प्रेक्षा ॥७४॥

1 B text °जनु° 2 P1 इति विधो । 3 P1 °लभते 4 P1 इति किम् ? । 5 B om. तत् 6 P1 add. अनुप्रासः ॥; P2 lecto. Sup. add. अतः स्मरोपानम्भनं कृतम् ॥७५॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 हृदयमाश्रय । 2 P1 दग्धं निजमात्मीयमिन्धनं 3 P1 add. निजमात्मीयम् इन्धनं हृदयं 4 B त्वमपि 5 BP1 हुताशनवत् 6 P1 स्वमाश्रय° 7 B °निन्धनं 8 P1 add. अनुप्रास उपमा च ।।७६।।

1 BP2 text निरैक्ष्यत 2 P1 पुर ।; P2 सुरभिदेति । 3 B om. तस्या वा 4 B निरैक्ष्यत 5 P1 add. अयमाभाणकोपन्यासः । 6 B तस्य 7 P1 add. कः त्रिनेत्रो भवेत् 8 B °गतत्वात् 9 P1 add. उत्प्रेक्षाऽनुमानं च । अक्षिगत इति श्लिष्टम् ।।७७।।

1 P1 सह । 2 P1 युवयोः here; P2 सम्प्रति युवयोः 3 P1 add. रतिः कामभार्या सुखं च । विभावना आक्षेपः काव्यलिङ्गं च । रतिशब्दः श्लिष्टः ।।७८।।

1 P2 text स्वमपि मामिव 2 B text दह्यते 3 P1 रतिवियुक्त-मित्यादि । 4 P2 स्वमिव आत्मानमिव 5 B ममापि 6 P1 add. पूर्वं स्वं तनुं मां च कस्मात् 7 P1P2 om. असि 8 B om. स्वमपि.........न तापं बिभर्त्ति° 9 P2 om. किमति उत्प्रेक्षायाम् 10 P1 add. दह्यत इति कर्म-कर्त्तरि । उपमोत्प्रेक्षानुमानं च ।।७९।।

1 P1 अनु । 2 B हि 3 P1 मरणा° 4 B om. अपि; P2 add. तत् 5 B om. म्रियते°.........संज्ञान्तर°; P1 °लिङ्लिडो° 6P1 लिङ्लुङ् 7 P2 स इ 8 P2 om. एतावतीनाम् 9 P1 add. अनुप्रास उत्प्रेक्षाऽतिश-योक्तिश्च विरोधोऽपि ।।८०।।

1 P1 सुगत । 2 P1 जितो 3 P1 add. निर्जितं भवपञ्जरम् 4 P1P2 विजित्या 5 P1 तत्र; P2 om. च 6 P1 add. अनुप्रासो रूपकं च ।।८१।।

1 P1 फल । 2 B om. विषम° 3 P1 add. युद्धे विजयसन्देहः प्रधानपुरुषक्षयः ।। 4 P1 add. प्रतीयमानोत्प्रेक्षा ।।८२।।

1 P1 अपि । 2 B om. धयन्नपि 3 P1 वद भण 4 P1 अधरमाद-रात् 5 P1 add. उत्प्रेक्षा ।।८३।।

1 P1 भुवन । 2 P1 add. मृत ! 3 P1 मोहजातेन 4 P1 add. हे स्मर ! 5 P1 add. अनुमानम् । तत्र हि किमिति संशयपूर्वप्रश्ने उत्प्रेक्षा-व्यञ्जकमुत्प्रेक्षा इत्यन्यः । तत्र तु उत्प्रेक्षितस्य तात्त्विकेन रूपेण परिवर्जितत्वात्

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

निरुपाख्यप्रख्यस्य सिद्ध्यर्थं साधनवचनं गगनतलं सिद्धये । साधनोपादानमिवाऽत्यन्तमसमीचीनमिति । निर्विषयत्वमेतस्याऽनुचितार्थता दोषः ।। 6 P1 om. मलीमस°……भवति ।।८४।।

1 B text स्मरः 2 P2 text कृपया न धनुः 3 P1 बत । 4 P2 add. मे 5 B तव ते 6 P1P2 add. वा 7 P2 om. न पतति 8 P1 add. किल 9 P1P2 om. निश्चितं 10 P1 यस्य; P2 यस्या 11 B om. अतो……स्खलति 12 P2 पतति 13 P1 add. अनुप्रास आक्षेपश्च उत्प्रेक्षेत्यन्यः । तत्तु विचारासहम् ।।८५।।

1 B °हस्त्य° 2 P1 दृगुपहत्यपमृत्यु इत्यादि । 3 B om. श्रीकालेश्वरी °……सेवकः 4 P1 add. अपरनिर्जरसेवित्वमित्यन्यः 5 B दृशानु° 6 P2 श्रीकाले°……सेवकः here 7 P2 भमतः 8 B om. क्षतिः 9 P1 add. व्यतिरेको विषमोऽनुप्रासश्च ।।८६।।

1 P2 text प्रलयं त्रिजगत् 2 P1 स्मर नृशंसतम इत्यादि । 3 P1 द्रष्टु° 4 P1P2 तव विधिः 5 B धनुः दृढं 6 P1 add. काव्यलिङ्गम् । सुमनस इति श्लिष्टम् ।।८७।।

1 P1 स्मररिपोः । 2 B om. इति हेतोः 3 B om. इतीति किम् ? यतः; P1 इति किम् ? । 4 P1 शखी बाणानां 5 P1P2 add. स्मरः 6 P1 add. उपमा उत्प्रेक्षा च 7 B 89 ।।८८।।

1 B text °विद° 2 P1 विधि । 3 P2 om. च 4 B वैध्य°; P1 °मवाकल्पयत् । 5 B व्यति°; P2 यदि चेत् 6 P1 add. बाणैः 7 P1 add. विरोधः ।।८९।।

1 P2 text जगतो 2 P1P2-94 3 P1 यदत । 4 P1 यतः 5 B जगतो add. लोकस्य 6 P1P2 om. पथ्यं 7 B om. चेत् 8 P1 कः 9 P1 प्राणान् 10 P1 add. अनुप्रासो हेतुश्च ।।९०।।

1 P1 अपि । 2 P1 कुसुमान्यपि aft. आशुगान् 3 B om. अपि 4 B om. ततः 5 B om. हि 6 P1 add. अवधारणे वा 7 B om. ते 8 P1 add. तैरिति करणे तृतीया । कर्तृत्वोपचारो वा । विरोधः ।।९१।।

1 P1 उप । 2 B om. मन्दाराद्याः 3 P2 om. न 4 B पृथक् twice 5 P2 एककं 6 P1P2 उपहरन्ति 7 B धिगिगितिखेदे at the end 8 B om. तव 9 P1 तव विगर्हणं न 10 P1 add. काव्यलिङ्गं व्यतिरेकोऽपि ।।९२।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 B text किमच्छ 2 P1 कुसुम । 3 B om. ते; P1 तुभ्यं तव वा 4 P1 add. तव 5 P1 add. बत 6 B तव 7 B स्थानके 8 P2 अघनु 9 P1 add. तव बतेति पाठः । उत्प्रेक्षा अतिशयोक्तिश्च ।।९३।।

1 B text °मिषून्विव 2 P1 षड़ ।; P2 षड़्तवः । 3 P1 add. ददति । षड्भवते इति क्वचित् पाठे 4 P1 निन्दितं 5 P2 om. वनं 6 P1 एवं 7 P1 add. पूर्ववाक्यगतयच्छब्दापेक्षस्तैरिति तच्छब्दः पाटान्तरे प्रक्रान्तापेक्षः । उपमोत्प्रेक्षा च ।।९४।।

1 B text धिगि° 2 B न 3 P1 सहा । 4 P2 om. सह 5 P1 झगिति; P2 झिगिति 6 P2 lecto. inf. text add. धृतवान् 7 P2 lecto. inf. text add. ध्रुवमुत्प्रेक्षाव्यञ्जकः । पञ्चम इति श्लिष्टम् । 8 P1 add. विशेषः आवृत्त्या 9 B स्वरो° 10 P1 add. उत्प्रेक्षा । पञ्चम इति श्लिष्टम् ।।९५।।

1 P1 स्मर । 2 P1 om. स 3 P1 add. श्रमो 4 B भवेत् 5 B °विफली° 6 BP2 पुनरपि aft. अवापिथ 7 edr. add. आपिथ 8 P2 lecto. inf. text add. तस्मिन्नेव समये प्राप्तवानसि । 9 P1 add. अनुप्रासोऽतिशयोक्तिश्च ।।; P2 inf. text add. शम्भुकोपानलेन दग्धः किं जीवति यच्च जीवितो भवान् तन्मम पातकानां फलमित्यर्थः । अत्राऽतिशयोक्तिरलङ्कारः ।।९६।।

1 P1 विरहिणो वि । 2 P2 om. न 3 edr. add. स 4 P2 अननु° 5 P1 om. च; P2 om. यश्च 6 P2 दक्षिणास्या 7 P2 om. तु 8 B om. वायुः 9 B om. धनुः 10 P1 add. अतिशयोक्तिः । दक्षिण इति श्लिष्टम् । विरोधोऽपि ।।९७।।

1 B text न twice 2 P1 किमु । 3 P2 मदनमुदा 4 P2 मद एव 5 P2 अन्ध° 6 B om. स 7 BP1P2 किं 8 P1 मदनस्य 9 P1 अन्धकस्य 10 P1 add. अनुप्रासः सापह्नवोत्प्रेक्षा च । रुद्रटेन च मतमित्यपह्नुतेः पृथगुक्तम् ।।९८।।

1 B text त्वमपि 2 P1 त्वमिव कोऽपीत्यादि । 3 B त्वमपि 4 B om. अपि; P1 यत्त्वं 5 B दहनाच् 6 P2 परिज्वलयितुं 7 B °मधीक्षीः । P1 स्वमधाक्षीः; and add. अनुप्रास उपमाऽतिशयोक्तिश्च ।।९९।।

1 B text °विधिः 2 P1 त्वमु । 3 P1P2 om. नयनस्यार्चिषि 4 P1 शान्तिकार्यम् उपद्रवशमनेन 5 B om. हरिणा 6 P1 add. अनुप्रासो रूपकमतिशयोक्तिश्च ।।१००।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P2 text यत् 2 P1 इति । 3 P2 तस्या यत् 4 B आननं twice 5 B पांसुलं 6 P1 add. वचस: प्रक्रान्तत्वात् तत्कारणस्याऽऽननस्याऽपि प्रक्रान्तत्वमतिरमणीयत्वेन प्रसिद्धत्वं वा । 7 P1 कियता 8 P1P2 °शोषात् 9 B °धुरं 10 B om. बाणेन 11 P1 add. उत्प्रेक्षा । लेशोक्तिश्चेत्यन्य: ॥१०१॥

1 B text वाषितु° 2 P1 प्रियसखी । 3 P1 °समयस्यया 4 B देवी 5 B सखी 6 B om. यत: 7 P1 add. हेतु: सहोक्तिश्चाऽनुप्रासोऽपि ॥१०२॥

1 B text °परि 2 P1 अक । 3 B कामान् 4 B प्राणेनव 5 B om. एव 6 P2 om. माम् 7 P1 add. इतोऽष्टसु वक्रोक्ति: ॥१०३॥

1 P1 हित । 2 P1 रक्षयेत् 3 P2 om. यदि 4 P1 मह्यं 5 P1 add. इति तच्छब्द: सम्बन्धनीय: । अथवा सखिहितात्वम् इत्येकं वाक्यम् । नैव हितेत्यर्थ: । यदि मे मम ईदृशी भवसि । 6 P1 जीवितं aft. शत्रुभूतं 7 P2 add. तदा क्व परितप्यते ॥१०४॥

1 P1 अमृत । 2 P2 om. सखी आह 3 B अहो 4 P2 add. भैमि 5 P1 add. सुधांशु:; P2 सुधाकर: तस्मादमुष्यां 6 P2 add. मयूख: किं 7 P2 add. दाह 8 B add. आश्रयसे 9 P1 दमयन्ती न मृता दीधितयोऽस्येति मनसि कृत्य श्लेषेण आह ।; P2 एषोऽमृतमयो वर्त्तते इति सखीवच: भैमी प्राह 10 P1 अस्य; P2 om. मद्यस्य 11 P2 add. चन्द्रस्य 12 P2 add. ज्योत्स्ना यदि चेत् 13 P2 om. दीधितयो 14 P2 add. गतासवो 15 P2 क: 16 P2 add. अपि तु न क्वाऽपीत्यर्थ: । अतो मृता: । अत: परिताप: ॥१०५॥

1 P2 text ज्वलयसि 2 P1 व्रज । 3 P2 om. अहेतुकं 4 P1 यत् 5 P2 om. हे 6 P2 lecto inf. text add. नाशयसि । लुम्पसीति मुचादित्वान्मकारागम: । 7 P1P2 मर्मरै: 8 B om. त्वचमिति पाठे त्वगेव कर्म ॥१०६॥

1 P1 अपि । 2 B om. अपि 3 P1 अकरीय° 4 B om. हृदयं°.....सम्प्रदानम् । 5 P1 गोचरं 6 P1 add. चन्द्रचन्द्रिकाविषये त्वं न वर्तसे । अत: किं परितापेनेत्यर्थ: । रुचिर्वाञ्छा इति श्लेषेण 7 P1 न तु; P2 om. ननु 8 P2 तत् 9 P1 add. तत् 10 B om. न च.........उत्कलयेत् ॥१०७॥

1 P2 text अपि 2 P1 विधु । 3 P1 °धिनीं 4 P2 अभिधायिनी आकारिणी 5 B om. अमावास्या°.........वा योजना । 6 P2 om. कोकिलाम् 7 P1 योजना वा 8 P1 गवेषया 9 B कार्य: 10 P1 करति ॥१०८॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P2 text विषिद्यते 2 P1 हृदय एवेत्यादि । 3 P2 om. तदपि 4 P1 om. यत: स — ।।१०९।।

1 P1 स्फुट । 2 B om. सति 3 B om. अनलङ्कृतं 4 P2 om. अथ च 5 P2 om. कृतम् 6 P1 add. श्लेषेण 7 P1 भ्रान्ति अज्ञाने ।।११०।।

1 P1 इद । 2 P1 मूर्च्छागता 3 P1 दु:खिनोभाव: 4 B °मती 5 P2 om. अघटमानामपि 6 B कष्टं क्षमताम् 7 P1 add. दु:खिता दमयन्तीत्यन्य: । तस्य 8 BP2 त्रुटितभ्रान्ति° 9 P1 तत । and add. अनुप्रासो रूपकमर्थान्तरन्यासो व्याख्यान्तरे काव्यलिङ्गं विरोधश्च ।।१११।।

1 P1 अधि । 2 P1 व्यधित 3 P1P2 om. विसर्ग: 4 B बिशं 5 P1 व्यधित । and add. सर्वत्रैव सर्वत्रैक एव धातुरुपसर्गवशात् अर्थान्तर-प्रतीति: । अनुप्रासो जातिश्च । वक्ष्यमाणेन युग्मं वा ।।११२।।

1 P2 text °जलादिभि: 2 P1 उपच । 3 P2 om. मृदुभि: 4 P1 add. जलादिभिरिति पाठान्तरम् । आदिशब्दात् व्यजनानिलादीनां सङ्ग्रह: । नालमृणालेति पाठान्तरम् 5 B °माप । P1 add. अनुप्रासो जातिश्च ।।११३।।

1 P1 अथ ······ रचयेत्यादि । 2 P1P2 om. विसर्ग: 3 P1 om. अन्त:पुरे 4 B om. त्वं कलय ······ हे चले ! 5 P2 om. हे सखि ! 6 P1 add. नशिमन्योरलिटयेत्वं छन्दस्यमिपचोरपि । व्यानशन्मेनका चास्य व्येमानं लिडिपे चरन् ।। (पा. VI. iv. 120) ।। इति वार्त्तिककारवचनात् छान्द-सत्वेऽपि मेनकापदस्य महाकविप्रयोगादत्र प्रयोग: 7 P1 add. जल्पलतेति पाठान्तरम् । 8 P1 add. द्वितीयश्लोकस्य व्याख्या 9 B om. केशाश्वा°···· ····°मिति यत्र् । 10 P1 om. त्वम्; P2 एतस्या 11 P1 कैशिकी 12 P1 चेति 13 P1 add. अनुप्रासो जातिश्च ।।११४-११५।।

1 P1 कल । 2 B तस्यालि° 3 P1 om. स 4 P2 recto. Sup. text add उत्थित: 5 P1 add. ईरितैरिति उल्लासस्य करणं वा । 6 P1 add. अनुप्रासो जातिश्च ।।११६।।

1 P1 कन्या । 2 P1 om. विसर्ग: 3 P2 om. अमात्यश्च 4 P2 बाधनायस्य 5 P2 दोषाय 6 B om. तथा ······ न प्रभवन्ति । 7 P2 om. दोषा 8 P1 add. किमूचतुरित्याह- 9 P1 तथा अहं ······ न क्षम: स्यात् here 10 B om. अगदङ्कारस्य च 11 P1 नलम् उशीरम् अतिशीतलम् औषधम् 12 P1 add. औषधनिवहो 13 P1 add. श्लेष: । तुल्ययोगिता

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

चेत्यन्यः ।; P2 recto. inf. text add. अत्र तुल्ययोगिता श्लेषश्चालङ्कारः । चरक इत्यत्र स्वार्थे कः 14 B om. शार्दूलविक्रीडितं वृत्तम् ॥११७॥

1 P1 ताम्याम् । 2 P2 अभिधाना° 3 P1 पततु: 4 P1 शुश्रुवतुः 5 B om. यतः 6 P1 add. वसन्ततिलकावृत्तम् । विरोधो जातिश्च ॥११८॥

1 P1 द्रुत । 2 P1 om. आशुगा; P2 बाणा आशुगा 3 P2 कामश्च 4 P1 add. पुष्पिताग्रा वृत्तम् । विरोवोऽर्थान्तिरन्यासश्च ॥११९॥

1 P1 व्यत । 2 BP2 अवाप्नुहि । P1 add. आशीः ॥१२०॥

1 P1 तद । 2 B om. स्वपुत्र्याः 3 P2 om. विसर्गः 4 B om. वसन्ते 5 P1 add. अनुप्रासो विरोध उपमाऽर्थान्तिरन्यासः ॥१२१॥

1 P1 कति । 2B वयस्या 3 P1 add. अद्य 4 P1 विधाभिरुपचारप्रकारैः 5 B om. अर्हा 6 P1P2 om. अथ 7 P1 add. कीदृशीत्याह— ऋशिमशमनया ऋशिमशमाय नयो यस्याः सा तथा । अथवा 8 B ऋशित्वस्य 9 P1 add. अभिधाभिरिति पाठे अभिधाभिरुक्तिभिः । अयमर्थः ऋशिमशमनया कर्णभूतया रुचिः कान्तिः प्राप्तुमुचिता । अथ भवद्विधाभिः रुचिः योग्यवरविषयोऽभिलाषः कान्तिरेव वा प्राप्तुमुचिता । अनुप्रासो, रुचिरिति श्लिष्टम् ॥१२२॥

1 P2 text लज्जापदं 2 P1 एवं यद । 3 P1P2 पदं; P1 fur. नापृच्छि—किं तवेयं दुःखस्येति । अथवा लज्जायाः पदं 4 P2 किं aft. इति 5 P1P2 °प्रभृतिभि° 6 P1 om. जातो 7 P1 अकल्पयत् च । 8 BP1P2 यश्चाशिषः; edr. यच्चाशीः 9 P2 om. च 10 P1 add. अथवा कपटात् यच्च सदृशीराशीरवादि । या च तत्र सदृशी सान्त्वना स्यात् सा च अवादि । इत्यत्रापि सम्बध्यते वा । 11 BP2 om. आनन्दाङ्कता । 12 P1 add. शार्दूलविक्रीडितं वृत्तम् । रूपकं समुच्चयो भावशबलता च ॥१२३॥

1 P2 text add. here वैदर्भीविप्रलम्भो नाम ॥४॥; 2 P1 श्रीहर्षमित्यादि । 3 P1 add. अनुप्रासो रूपकं च ॥१२४॥

1 P1 om. the verse 2 B इति चतुर्थः सर्गः समाप्तः ॥; P1 महापण्डितश्रीचाण्डू°; P2 श्रीपण्डितचाण्डू° 3 P1 छ ॥ श्रीः ॥ शुभं भवतु ॥ छ ॥ कल्याण ॥ छ ॥ श्रीः ॥ छ ॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

सर्ग—५

पूर्वसर्गे दमयन्त्या विरहवर्णनमुखेन चन्द्रमसं मकरध्वजं च सखीसंवादमिषेण निन्दित्वा[1] स्वयंवरार्थम् [2]इन्द्रादिलोकपालानां दूतत्वाङ्गीकारं[3] विवर्णयिषुः श्रीहर्षः [4]कविः पञ्चमं सर्गमारभते ।

यावदागमयतेऽथे नरेन्द्रान् स स्वयंवरमहाय महीन्द्रः ।
तावदेव [1]ऋषिरिन्द्रदिदृक्षुर्नारदस्त्रिदशधाम जगाम ।।१।।

[2]यावदागमयते[3] इति । स महीन्द्रः[4] अथ यावत् स्वयंवरमहाय नरेन्द्रानागमयते तावदेव इन्द्रं दिदृक्षुः नारदऋषिः[5] त्रिदशानां[6] धाम स्वर्गं जगाम । [7]तस्मिन् प्रस्तावे जगाम[8] ।।१।।

नात्र चित्रमनु तं प्रययौ यत् पर्वतः स खलु तस्य सपक्षः ।
नारदस्तु जगतो गुरुरुच्चैर्विस्मयाय गगनं विललङ्घे ।।२।।

नात्र[1] चित्रमिति । अत्राऽस्मिन्नर्थे न चित्रं न आश्चर्यं [2]यत् पर्वतनामा ऋषिः तं नारदम् अनु पृष्ठतः प्रययौ अनुजगाम । खलु यतः स पर्वतः तस्य नारदस्य । सपक्षः सहचारी । अथ च पर्वतोऽपि[3] यदा सह पक्षतिभ्यां वर्त्तते तदा स[4] अनुगच्छति । तत्र चित्रं न भवति । तु पुनः यत् नारदो जगतो गुरुरपि[5] गगनं विललङ्घे । उच्चैर्विस्मयाय बभूव । यः किल गौरवयुक्तो[7] भारवान् स गगनं यदा विलङ्घते तदा आश्चर्यम् । गुरुत्वात् पतनमि (V. i. 18) ति वैशेषिकसूत्रम्[8] ।।२।।

गच्छता पथि विनैव जगाम व्योम तेन मुनिना विजगाहे ।
साधके[1] हि नियमोऽन्यजनानां योगिनां तु तपसाऽखिलसिद्धिः ।।३।।

गच्छता[2] पथीति । तेन मुनिना विमानं विनैव पथि गच्छता सता[3] व्योम विजगाहे । हि यस्मात् साधके[4] उपकरणविषये यो नियमः

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[5]नियतत्वं स[6] अन्यजनानाम्[7] इतरजनानामनेनैव करणेनेदं कर्त्तव्यम् इति नियमः । तु पुनर्योगिनां[8] तपसाऽखिला सिद्धिर्भवति[9] ।।३।।

खण्डितेन्दुभुवनाद्यभिमानाँल्लङ्घते स्म मुनिरेष विमानान् ।
अर्थितोऽप्यतिथितामनुमेने नैव तत्पतिभिरङ्घ्रिविनम्रैः ।।४।।

[1]खण्डितेन्दुभवनादीति । एष मुनिर्नारदो विमानान् [2]लङ्घते स्म । किं भूतान् ?। खण्डित इन्दुभुवनादीनां चन्द्रलोकप्रभृतीनाम् अभिमानो यैः तान् तथा । चन्द्रलोकादपि विमानानि रम्याणि ।[3] स नारदस्तेषां विमानानां पतिभिः[4] [5]स्वस्वस्थाने स्थितैरङ्घ्रिविनम्रैः चरणपतितैरपि [6]अर्थितोऽपि अभ्यर्थमानोऽपि अतिथितां नैव अनुमेने । [7]आतिथ्यं नैव[8] जग्राह[9] ।।४।।

तस्य तापनभिया तपनः स्वं तावदेव समकोचयदर्चिः ।
यावदे॰ दिवसे न शशीव द्रागतप्यत न तन्महसैव ।।५।।

तस्य[1] तापनेति । [2]तपनः[2] श्रीसूर्यः तस्य नारदस्य तापनभिया तापनात् भयेन स्वम् अर्चिः तावदेव समकोचयत् । तथा[3] स्वल्पं [4]कृतं यावदेव तस्य नारदस्य[5] महसा एव[6] द्राक् झटिति न [7]अतप्यत । यथा श्रीसूर्यः तत्तेजसा न तापितः । क इव ? शशीव । यथा दिवसे न[8] शशी ताप्यते[9] ।।५।।

पर्यभूद्दिनमणिर्द्विजराजं यत्करैरहह तेन तदा तम् ।
पर्यभूत् खलु करैर्द्विजराजः कर्म कः स्वकृतमत्र न भुङ्क्ते ।।६।।

[1]पर्यभूदिति । दिनमणिः श्रीसूर्यः यत्करैः किरणैः द्विजराजं चन्द्रं पर्यभूत् । अहह इति खेदे । [2]तेन कारणेन तदा तं श्रीसूर्यं करैस्तेजोभिः द्विजराजो नारदः पर्यभूत्[3] परिभवति स्म । [4]युक्तमिदम् । अत्र स्वेन कृतं कर्म को न[5] भुङ्क्ते ।।६।।

विष्टरं तटकुशालिभिरद्भिः पाद्यमर्घ्यमथ कच्छरुहाभिः ।
पद्मवृन्दमधुभिर्मधुपर्कं स्वर्गसिन्धुरदिताऽतिथयेऽस्मै ।।७।।

[1]विष्टरं तटेति । स्वर्गसिन्धुर्गङ्गा अस्मै अतिथये नारदाय तटे याः कुशानां दर्भाणामालयः पङ्क्तयस्ताभिर्विष्टरम् आसनम् अदित । अद्भिः

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

पानीयै[2] पाद्यं ददौ । अथ[3] पाद्यानन्तरं कूर्च्चपाद्यमर्घ्यमिति हि कल्पसूत्रे क्रमः । सूर्यलोकगमनानन्तरं वा । कच्छरुहाभिः दूर्वाभिरर्घ्यं ददौ[4] । तथा गङ्गा पद्मवृन्दानां मधुभिर्मकरन्दैः मधुपर्कम् [5]अदात् ।।७।।

स व्यतीत्य वियदन्तरगाधं नाकनायकनिकेतनमाप ।
सम्प्रतीर्य भवसिन्धुमनादिं ब्रह्मशर्मभरचारु यतीव ।।८।।

स [1]व्यतीत्येति । स नारदः वियत आकाशस्य अन्तर्मध्यम् अगाधम् अपारं व्यतीत्य[2] नाकनायकस्य इन्द्रस्य निकेतनं स्वर्गम् आप[3] । क इव ?। यतीव । यतं[4] विद्यते यस्य स यती संन्यासी । अनादिं प्रवाहनित्यं भवसिन्धुं संसारसमुद्रं सम्प्रतीर्य ब्रह्म परमात्मानं स्वरूपं प्राप्नोति । किं भूतम् ?। शर्मणः सुखस्य महानन्दस्य भरेण चारु[5] । योगी [6]मुक्तमेव विद्यया संसारिणमात्मानं मन्यमानः पुनरपि शास्त्राचार्यप्रसादात् मुक्तमेव जानाति । विस्मृतकण्ठगतचामीकरप्राप्तिवत् । [7]प्राप्तमेवाऽऽत्मानं प्रापत्[8] ।।८।।

अर्चनाभिरुचितोच्चतराभिश्चारु तं सदकृताऽतिथिमिन्द्रः ।
यावदर्हकरणं किल साधोः प्रत्यवायधुतये न गुणाय ।।९।।

[1]अर्चनाभिरिति । इन्द्रः तं नारदम् उचिताभ्यः सकाशात् उच्चतराभिः अर्चनाभिः चारु यथा भवति [2]एवं सदकृत सत्कृतवान् । किं भूतम् ? । अतिथिम् । किल यस्मात् साधोर्विदुषः यावदर्हस्य उचितस्य करणं प्रत्यवायस्य धुतये पापपरिहाराय भवति, न [3]गुणाय । अतोऽधिकां पूजां[4] चक्रे[5] ।।९।।

नामधेयसमतासखमद्रेरद्रिभिन्मुनिमथाऽऽद्रियत द्राक् ।
पर्वतोऽपि लभतां कथमर्चां न द्विजः स विबुधप्रभुलम्भी ।।१०।।

[1]नामधेयेति । अद्रिभिरिन्द्रः अथ द्राक् झटिति [2]अद्रेः नामधेयेन[3] समता साम्यं तया सखायं पर्वतं मुनिम् आद्रियत[4] अपूजयत् । युक्तोऽयमर्थः । स पर्वतोऽपि कथमर्चां न लभताम् । यतो द्विजः ब्राह्मणः तथा विबुधानां प्रभुमिन्द्रं लभते इत्येवंशीलः । अथ च विदुषां प्रभोः समीपं प्राप्तः पर्वतोऽपि जडोऽपि द्विजः[5] पूजां लभते । ब्राह्मणो [6]जायमानो हि पृथिव्यामधि जायते (मनु. I. 99) इति स्मरणात् । इतरथा योऽद्रिं भिनत्ति स कथम् अद्रिसखं पूजयति ?।[7] ।।१०।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

तद्भुजादतिवितीर्णसपर्या द्योद्रुमानपि विवेद मुनीन्द्रः ।
स्वःसहस्थितिसुशिक्षितया तान् दानपारमितयैव वदान्यान् ।।११।।

[1]तद्भुजादतीति । मुनीन्द्रो नारदः तस्य इन्द्रस्य भुजात् सकाशात् या दानस्य पारमिता परमप्रकर्षता तया एव[2] तान् [3]द्योद्रुमानपि स्वर्ग-[4]कल्पवृक्षानपि वदान्यान् विवेद ज्ञातवान् । किं [5]भूतया ?। स्वः स्वर्गे या सहस्थितिः इन्द्रस्य भुजेन सहावस्थानं तया सुशिक्षितया । किं [6]भूतात् भुजात् ?। अतिशयेन वितीर्णा सपर्या पूजा येन तस्मात्तथा[7] । परममेव । पारमम् । पारममस्याऽतीति पारमिणो भावः पारमिता । [8]अथवा पारम् इता[9] प्राप्ता इति व्युत्पत्तिः । बौद्धग्रन्थे यथा प्रज्ञापार-मिता । यद्वा[10] दानपारमिता इत्यादयः संज्ञा ।।११।।

मुद्रितान्यजनसंकथनः सन्नारदं बलरिपुः समवादीत् ।
आकरः स्वपरभूरिकथानां प्रायशो हि सुहृदोः सहवासः ।।१२।।

[1]मुद्रितान्येति । बलरिपुरिन्द्रः नारदं समवादीत् ।[2] किं भूतः[3] ?। मुद्रितानि अन्येषां जनानां संकथनानि येन स तथा । तानि निषिध्य । हि यस्मात् सुहृदोर्मित्रयोः सहवास एकत्र मिलनं[4] स्वभूरिकथानां [5]परभूरिकथानां च प्रायशो[6] बाहुल्येन आकरः[7] खनिः[8] ।।१२।।

तं कथानुकथनप्रसृतायां दूरमालपनकौतुकितायाम् ।
भूभृतां चिरमनागतिहेतुं ज्ञातुमिच्छुरवदच्छतमन्युः ।।१३।।

तं [1]कथानुकथनेति । शतमन्युरिन्द्रस्तमवदत् । किं कर्तुमिच्छु ?। स्वर्गे भूभृतां राज्ञां चिरम् [2]आरभ्य अनागतेर्हेतुं [3]कारणं ज्ञातुमिच्छुः । कस्यां सत्याम् ?। दूरम् अतिशयेन[4] आलपनस्याऽऽलापस्य कौतुकितायां कथानुकथनेन प्रसक्तानुप्रसक्त्या[5] प्रसृतायां वर्द्धितायां सत्याम्[6] ।।१३।।

प्रागिव प्रसुवते नृपवंशाः किं नु[1] सम्प्रति न वीरकरीरान् ।
ये परप्रहरणैः परिणामे विक्षताः क्षितितले निपतन्ति ।।१४।।

[2]प्रागिवेति । हे नारद[3] ! नृपाणां वंशाः अन्वयाः सम्प्रति किं नु[4] प्रागिव पूर्ववत् वीरा एव[5] करीरा अङ्कुरास्तान् न प्रसुवते । वंशाङ्कुरे करीरम् (अमर° III. iii. 173) इति । ये वीराः परिणामे अन्तकाले परेषां प्रहरणैः विक्षताः[6] सन्तः क्षितितले निपतन्ति । न तु खट्वायां

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

म्रियन्ते । अतश्च स्वर्गमायान्ति । वंशा अपि परेषां प्रहरणै: कुठारै: विक्षता: भूमौ पतन्ति । परिणतत्वात्[7] ।।१४।।

पार्थिवं हि निजमाजिषु वीरा दूरमूर्ध्वगमनस्य विरोधि ।
गौरवाद्वपुरपास्य भजन्ते मत्कृतामतिथिगौरवऋद्धिम् ।।१५।।

[1]पार्थिवं हीति । हि यस्मात् वीरा: पार्थिवं भौतिकं निजं वपु: आजिषु[2] अपास्य त्यक्त्वा मया कृताम् अतिथीन् प्रति गौरवस्य बहुमानस्य ऋद्धिं समृद्धिं भजन्ते स्वर्गे आगच्छन्ति । किं भूतं वपु: ?। गौरवात् गुरुत्वात् दूरम् अतिशयेन ऊर्ध्वगमनस्य विरोधि । गुरुत्वात् पतनम् (V. i. 18) इति कणादसूत्रम्[3] ।।१५।।

साभिशापमिव नाऽतिशयस्ते मां यदद्य भगवन्नुपयन्ति ।
तेन न श्रियमिमां बहु मन्ये स्वोदरैकभृतिकार्यकदर्याम् ।।१६।।

[1]साभिशापमिति । हे भगवन् ! यत् ते नृपा: अतिथय: अद्य साभिशापं सापवादमिव मां न [2]उपयन्ति । तेन कारणेनाऽहम् इमां श्रियं न बहु मन्ये । यत: स्वस्य उदरस्यैव या एका भृतिर्भरणं तदेव कार्यं तेन [3]कदर्याम्[4] ।।१६।।

पूर्वपुण्यविभवव्ययसृष्टा: श्रीभरा[1] विपद एव विमृष्टा: ।
पात्रपाणिकमलार्पणमासां तासु शान्तिकविधिर्विधिदृष्ट: ।।१७।।

[2]पूर्वपुण्येति । श्रीभरा लक्ष्मी अतिशया विभृष्टा: सन्त: विपद एव आपद[3] एव । किं [4]भूता: ?। पूर्वजन्मपुण्यस्य विभव: सञ्चय: तस्य व्ययेन विनाशेन सृष्टा:[5] बद्धा:[6] [7]तत एषां श्रीभराणां तासु आपत्सु सतीषु पात्राणां पाणिकमलेषु[8] अर्पणं दानं [9]यत:[10] स एव विधिना वेदेन दृष्ट: शान्तिकविधि: । न विद्यया केवलया तपसा वाऽपि पात्रता । यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रचक्षते (याज्ञ॰ अचारा॰ 200) ।। इति [11]मनु: (?) ।।१७।।

तद्विसृज्य मम संशयशिल्पि स्फीतमत्र विषये सहसाघम् ।
भूयतां भगवत: श्रुतिसारैरद्य वाग्भिरघमर्षणऋग्भि: ।।१८।।

[1]तद्विसृज्येति । तत् अद्य भगवतो वाग्भिर्मम अघमर्णस्य ऋग्भिर्भूयताम् । किं [2]भूताभि: ?। श्रुतीनां वेदानां सारै: । वेदे हि ऋतं

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

च सत्यं चे (ऋ. VIII. 8. 48) तिस्रः ऋचः पापस्फेटिन्यः[3]। अघमर्षणो भाववृत्तमनुष्टुप् इत्यार्षं दैवतं छन्दश्च (X. 190) इत्यनुक्रमण्यामुक्तम् । [4]किं कृत्वा ? । मम अत्राऽस्मिन् विषये नृपानागमनलक्षणे स्फीतम् अघम्[6] अज्ञानलक्षणं[7] [8]सहसा[9] विसृज्य विनाश्य ।। किं भूतम् ?। संशयशिल्पि सन्देहकारि । अज्ञानात् संशय उत्पद्यते ।[10] तत्राऽनवधारणज्ञानं संशयः। स च समानधर्माऽनेकधर्म-विप्रतिपत्ति–उपलब्धि–अनुपलब्धिभेदात् पञ्चधा भिद्यते। यथा समानधर्मात् स्थाणुर्वा पुरुषो वा। अनेकधर्मात् यथा आकाशः विशेषगुणत्वात्[11] अनित्यः शब्दो, नित्यो वा। विप्रतिपत्तेर्वादिनां यथा-एकं भौतिकानीन्द्रियाण्याहुः। अपरे त्वभौतिकानीति । उपलब्धेर्यथा किं सत् उदकमुपपलभ्यते उताऽसदिति। अनुपलब्धेर्यथा–किं विद्यमानः पिशाचो नोपलभ्यते किं वाऽविद्यमान इति (परि° I. P. 1) न्यायसारकारः[12] ।।१८।।

इत्युदीर्य मघवा विनयर्धि वर्धयन्नवहितत्वभरेण ।
चक्षुषां दशशतीमनिमेषां तस्थिवान् मुनिमुखे प्रणिधाय ।।१९।।

[1] इत्युदीर्येति । मघवा[2] इति उदीर्य चक्षुषां दशशतीं दशानां शतानां समाहारस्तां [3]साहस्रीं दृशो मुनेर्नारदस्य मुखे प्रणिधाय तस्थिवान् । किं भूताम् ?। अनिमेषाम्[4]। किं कुर्वन् ?। अवहितत्वस्य भरेणाऽऽधिक्येन विनयस्य ऋद्धिं वर्धयन्[5] ।।१९।।

वीक्ष्य तस्य विनये परिपाकं पाकशासनपदं स्पृशतोऽपि ।
नारदः प्रमदगद्गदयोक्त्या विस्मितः स्मितपुरःसरमूचे[1] ।।२०।।

वीक्ष्य[2] तस्येति । नारदः प्रमदेन हर्षेण गद्गदया उक्त्या[3] ऊचे ।[4] किं भूतः ?। विस्मितः साश्चर्यः ।[5] कथम् ?। यथा भवति स्मितपुरःसरम् । अथ च यो विगतस्मितो भवति स कथं स्मितपूर्वाभिभाषी ? इति[6] विरोधाभासः। कुत आश्चर्यमित्याशङ्क्याऽऽह–किं कृत्वा ? । तस्य [7]पाकशासनपदम् ऐन्द्रं पदं स्पृशतोऽपि विनये विवेकविषये परिपाकं परिणामं [8]वीक्ष्य । अथ च यः पाकं दैन्यं शास्ति तस्य विनये शासने परि समन्तात् पाकं शासनीयं वीक्ष्य आश्चर्यम् । अत्राऽपि विरोधाभासः[9] ।।२०।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

भिक्षिता शतमखी सुकृतं यत्तत्परिश्रमविदः स्वविभूतौ ।
तत्फले तव परं यदि हेला क्लेशलब्धमधिकादरदं तु ।।२१।।

भिक्षिता [1]शतमखीति। यत्त्वया शतस्य मखानां समाहारः शतमखी सुकृतं भिक्षिता[2]। द्विकर्मकः। तस्य सुकृतस्य फले स्वविभूतौ ऐश्वर्ये यदि हेला अवज्ञा तत्परं केवलं तवैव, नान्यस्य। किं भूतस्य ?। तस्य भिक्षणस्य[3] परिश्रमं वेत्तीति तस्य तथा।[4] तु यस्मात् क्लेशात् लब्धं वस्तु अधिकम् आदरं ददाति।[5] त्वं तु ऐश्वर्येऽपि विनीतः। अग्निष्टोमेन [6]यजेत स्वर्गकाम इति वेदवाक्यम्। यागक्रियायां कृतायामपि जीवतो यजमानस्य स्वर्गाभावात् वेदस्याऽप्रामाण्यं कुरुते। ततश्च अन्यथा अनुपपत्तिबलेन मीमांसका अपूर्वं कल्पयन्ति। यागोऽपूर्वं नाम सुकृतं कृत्वा विनश्यति। अत्राऽर्थापत्तिः[7] प्रमाणम्। इतरथा अप्रामाण्यं स्यात्। तथा[8] अनङ्गीकारे पराहतं वेदवादिभिः[9] ।।२१।।

सम्पदस्तव गिरामपि दूरा यन्न नाम विनयं विनयन्ते ।
श्रद्दधाति क इवेह न साक्षादाह चेदनुभवः परमाप्तः ।।२२।।

[1]सम्पदस्तवेति। तव गिरां वाचां दूरा अगोचरा अपि सम्पदः यत् नाम अहो विनयं विवेकं न विनयन्ते नाऽपनयन्ति[2] इति क इव जनः श्रद्दधाति। न कोऽपि मन्यते। इह चेत् यदि साक्षात्[3] प्रत्यक्षं परं केवलम् आप्तः प्राप्तः अनुभव. न[4] आह न वदति।[5] [6]अथ च यः परमश्चाऽसौ आप्तश्च [7]हितकारी यत् वदति। तत् [8]माननीयमेव। कर्तृस्थे चाशरीरे कर्मणी (पा॰ I. iii. 37) त्यात्मनेपदम्[9] ।।२२।।

श्रीभरानतिथिसात्करवाणि स्वोपभोगपरता न हितेति ।
पश्यतो बहिरिवान्तरपीयं दृष्टिसृष्टिरधिका तव काऽपि ।।२३।।

[1]श्रीभरानिति। हे इन्द्र ! तव इति पश्यतः सतः इयम् अन्तर्मध्येऽपि अधिका काऽपि दृष्टेः सृष्टिः ज्ञानाधिक्यं बहिरिव। यथा बहिः शरीरदेशेऽधिका सहस्रसङ्ख्यादृष्टीनां नयनानां सृष्टिः। किं [2]पश्यतस्तव ?। इत्याशङ्क्याऽऽह–अहं[3] श्रीभरान् लक्ष्मीविलासान् अतिथिसात्करवाणि। मम स्वस्याऽऽत्मन् एव उपभोगपरता न दिता[4] ।।२३।।

आः स्वभावमधुरैरनुभावैस्तावकैरतितरां तरलाः स्मः ।
द्यां प्रशाधि गलितावधिकालं साधु साधु विजयस्व बिडौजः ।।२४।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

आ: [1]स्वभावेति । आ इति हर्षे ।[2] हे इन्द्र: ! तावकै: स्वभाव[3]मधुरै: अनुभावैर्वयम् अतितरां तरला: स्म: हृषिता: स्म: । त्वं गलितावधिकालम्[4] अवधिरहितं समयं यावत् द्यां प्रशाधि । साधु यथा भवति [5]तथा स्वर्गं शाधि तथा साधु विजयस्व । हे विडौज:[6] ! हे इन्द्र: ।।२४।।

सङ्ख्यविक्षततनुस्रवदस्रक्षलिताखिलनिजाघलघूनाम् ।
यस्त्विहानुपगम: शृणु राज्ञां तज्जगद्युवमुदन्तमुदन्तम् ।।२५।।

[1]सङ्ख्यविक्षतेति । तु पुनर्यत् इह स्वर्गे राज्ञाम् अनुपगम: तम् उदन्तं वार्तां शृणु । किं भूतम् ? । जगतो यूनां तरुणानां मुदो हर्षस्याऽन्तं सीमानम् अथवा मुत् [2]हर्षो अन्ते यस्य तं तथा । किं विशिष्टानाम् ?। सङ्ख्ये रणे विक्षतेभ्यस्तनुभ्य: स्रवता अस्रेण रुधिरेण क्षालितं यत्[3] अखिलं[4] निज [5]शारीरम् अघं तेन लघूनां निष्पापानाम्[6] ।।२५।।

सा भुव: किमपि रत्नमनर्घ्यं भूषणं जयति तत्र कुमारी ।
भीमभूपतनया दमयन्ती नाम या मदनशस्त्रममोघम् ।।२६।।

सा[1] भुव इति । तत्र पृथिव्यां सा दमयन्ती [2]नाम भीमभूपस्य तनया कुमारी जयति सर्वोत्कर्षेण वर्त्तते ।[3] किं भूता ?। भुव: पृथिव्या: किमपि [4]अनिर्वचनीयं रत्नम् अनर्घ्यम् अमूल्यं भूषणं या[5] अमोघं सार्थकं मदनस्य शस्त्रम्[6] ।।२६।।

सम्प्रति प्रतिमुहूर्तमपूर्वा काऽपि यौवनजवेन भवन्ती ।
आशिखं सुकृतसारभृते सा क्वाऽपि यूनि भजते किल भावम् ।।२७।।

[1]सम्प्रति प्रतीति । सा सम्प्रति क्वाऽपि कस्मिन्नपि यूनि किलेति श्रूयते भावं भजते । किं [2]भूते ? । आशिखं शिखां [3]मर्यादीकृत्य नखात्प्रभृति सुकृतस्य सारैर्भृते पुण्यवति । किं कुर्वन्ती[4] ?। प्रतिमुहूर्तं क्षणे क्षणे यौवनस्य[5] जवेन अपूर्वा काऽपि अद्भुतरूपा[6] भवन्ती[7] जायमाना[8] ।।२७।।

कथ्यते न कतम: स इति त्वं मां विवक्षुरसि किं चलदोष्ठ: ।
अर्द्धवर्त्मनि रुणत्सि न पृच्छां निर्गमेण न परिश्रमयैनाम् ।।२८।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]कथ्यते नेति । हे इन्द्र ! त्वं मां किम् इति विवक्षुरसि ।[2] स युवा कतम इति न कथ्यते । [3]किम् ?। यतः त्वं चलन्तौ ओष्ठौ यस्य स तथा । [4]तत् [5]एनां पृच्छाम् अर्द्धवर्त्मनि किं न[6] रुणत्सि । अपि तु अर्द्धोक्ते स्थापय[7] । निर्गमेण एनां[8] न परिश्रमय । मा खेदं नैषीः ।।२८।।

यत्पथावधिरणुः परमः सा योगिधीरपि न पश्यति यस्मात् ।
बालया निजमनःपरमाणौ ह्रीदरीशयहरीकृतमेनम् ।।२९।।

[1]यत्पथावधिरिति । यस्मात् एनं युवानं सा प्रसिद्धा योगिनांधीः बुद्धिरपिः न पश्यति, योगिनोऽतीन्द्रिया[2] अपि न जानन्ति । यस्याः योगिबुद्धेः पन्थाः यत्पथः, यत्पथस्याऽवधिः परमोऽणुः । परमाणवो हि योगिप्रत्यक्षाः । ततोऽपि सूक्ष्मतरं योगिबुद्धेरगोचरम् । किं भूतम्[4] ?। तया बालया दमयन्त्या निजमनस्येव परमाणौह्रीर्लज्जा सैव दरी तत्र शयनशीलं हरिं सिंहं कृतम् । च्विप्रत्ययः । यथा [5]गिरिगुहास्थितं सिंहं न कश्चन[6] पश्यति । परमाणुपरिमाणं मनः । कामः सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मनः एवे (बृ० I. v. 3) ति । मनः परमाणुमध्ये लज्जा । तन्मध्येऽपि स्थितं सिंहं नृपं तत्राऽपि बालया गृहीतं कः पश्यति । [7]बालग्रहो हि दुर्मोक्षो भवति । तथा च मुरारिः–मनोऽपि शङ्कमानाभिर्बालाभिरुपजीव्यते ।[8] अषडक्षीणषाड्गुण्यमन्त्री मकरकेतनः ।। (अनर्घ III. 6) । परमाणु [9]सद्भावे प्रमाणम् अणुपरिमाण[10] तारतम्यं क्वचिद्विश्रान्तं परिमाणतारतम्यत्वात्, [11]महत्परिमाणतारतम्यवत् । महत्त्वपरिमाणतारतम्यं । यथा आकाशादौ[12] विश्रान्तम् । अत एव च नित्यत्वं तस्य सिद्धम् । यतः परं विभागो नाऽस्ति[13] स परमाणुः । कारणविनाशात्[14] कारण विभागाद्वावस्तुनो[15] विनाशः [16]परमाणोश्च कारणानि । अवयवा एव न सन्ति । कुतस्तेषां विनाशाद्विभागाद्वा विनाशोऽस्य सम्भवति । ततो नित्यत्वम् । [17]निरवयवत्वाद्वाऽतीन्द्रियत्वम् । ततश्च योगिनामेव प्रत्यक्षाः परमाणवः[18] ।।२९।।

सा शरस्य कुसुमस्य शरव्यं सूचिता विरहवीचिभिरङ्गैः ।
तातचित्तमपि धातुरधत्त स्वस्वयंवरमहाय सहायम् ।।३०।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

सा[1] शरस्येति । सा दमयन्ती तातस्य पितुश्चित्तमपि[2] [3]धातुर्ब्रह्मणः स्वस्य[4] स्वयंवरमहाय [5]उत्सवाय सहायम्[6] अधत्त । ब्रह्मणोऽग्रे स्वयंवरार्थम् आदरश्चित्तेऽभूत् । अधुना[7] पितुरपि चित्ते स्वयंवरार्थं किं भूता ? । विरहवाचिभिः अङ्गैः पाण्डुत्वकुशत्वयुक्तैः कुसुमस्य शरस्य कामबाणस्य शरव्यं[8] वेध्यं सूचिता:[9] ॥३०॥

मन्मथाय यदथादित राज्ञां हूतिदूत्यविधये विधिराज्ञाम् ।
तेन तत्परवशाः पृथिवीशाः सङ्गरं गरमिवाऽऽकलयन्ति ॥३१॥

[1]मन्मथायेति । यत् विधिर्ब्रह्मा अथ राज्ञां हूतिः[2] आह्वानं तदर्थम् दूत्यविधये मन्मथाय आज्ञाम् आदेशम् अदित[3] ददौ । तेन कारणेन तस्य[4] मन्मथस्य परवशाः पृथिवीशाः[5] क्षितीशाः राजानः सङ्गरं सङ्ग्रामं गरमिव विषमिवाऽऽकलयन्ति न[6] कुर्वन्ति ॥३१॥

येषु येषु सरसा दमयन्ती भूषणेषु यदि वाऽपि गुणेषु ।
तत्र तत्र कलयाऽपि विशेषो यः स हि क्षितिभृतां पुरुषार्थः ॥३२॥

येषु[1] येष्विति । दमयन्ती येषु येषु[2] भूषणेषु यदि [3]वाऽपि गुणेषु गीतादिषु सरसा[4] सानुरागा तत्र तत्र[5] तेषु तेषु भूषणेषु गुणेषु वा विषये[6] कलयाऽपि स्वल्पेनाऽपि यो विशेषः यस्याऽऽधिक्यं क्षितिभृतां राज्ञां स हि[7] एव पुरुषार्थः । अद्य[8] कल्पे राजानस्तदेवाऽभ्यसन्ति, न तु सङ्ग्रामम्[9] ॥३२॥

शैशवव्ययदिनावधि तस्या यौवनोदयिनि राजसमाजे ।
आदरादहरहः कुसुमेषोरुल्ललास मृगयाभिनिवेशः ॥३३॥

[1]शैशवव्ययेति । कुसुमेषोः कामस्य यौवनोदयिनि राज्ञां समाजे तरुणनृपसमूहेऽहरहः[2] आदरात् मृगयाभिनिवेशः उल्ललास । कथम् ?। तस्या दमयन्त्याः [3]शैशवव्ययस्य यौवनस्य दिनं तत् अवधिर्मर्यादा यत्र उल्लसते तद्यथा भवति । यौवनादारभ्य कामः राजकुमारेषु आखेटकं करोति[4] ॥३३॥

इत्यमी वसुमतीकमितारः सादरास्त्वदतिथीभवितुं न ।
भीमभूसुरभुवोरभिलाषे दूरमन्तरमहो नृपतीनाम् ॥३४॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]इत्यमीति । हे इन्द्र ! इति कारणात् अमी वसुमत्याः कमितारो नृपाः त्वयि अतिथीभवितुं न सादराः । अहो नृपतीनां [2]भीमभूर्दमयन्ती सुरभूः [3]स्वर्गस्तयोरभिलाषे दूरम् अन्तरं महान् भेदः । दमयन्ती रम्यतमा । अथ च भीमभूः सुरभूश्च तयोर्महदन्तरम् । एकाऽत्र, अपरा उपरि[4] ।।३४।।

तेन जाग्रदधृतिर्दिवमागां सङ्ख्यसौख्यमनुसर्तुमनु त्वाम् ।
यन्मृधं क्षितिभृतां न विलोके तन्निमग्नमनसां भुवि लोके ।।३५।।

तेन [1]जाग्रदिति । तेन कारणेन जाग्रती स्फुरन्ती अधृतिरधैर्यं यस्य स तथाविधः सन् [2]अहं त्वामनु लक्ष्यीकृत्य सङ्ख्यस्य अनुसर्तुं दिवम् आगाम् । तत्र [3]युद्धं भविष्यतीत्याशया[4] यत्[5] यतः भुवि लोके क्षितिभृतां[6] मृधं सङ्ग्रामं न विलोके न पश्यामि । यतः[7] तस्यां विषये निमग्नमनसाम्[8] ।।३५।।

वेद यद्यपि न कोऽपि भवन्तं हन्त हन्त्रकरुणं विरुणद्धि ।
पृच्छ्यसे तदपि येन विवेकप्रोञ्छनाय विषये रससेकः ।।३६।।

वेद[1] यद्यपीति । अहं यद्यपि इति वेद जानामि [2]यत् हन्त निश्चितं भवन्तं हे इन्द्र ! कोऽपि न विरुणद्धि त्वया विरोधं न कुरुते । किंभूतम् ?। हन्तरि विषये अकरुणं निर्दयम् । तदपि मया त्वं पृच्छ्यसे ।[3] यतः विषये शब्दस्पर्शादिके रसस्याऽनुरागस्य सेक आधिक्यं विवेकस्य प्रोञ्छनाय निराशाय भवति । यो मम च कलहे रागः । तेन विवेको निरस्तः । ततो जानन्नपि पृच्छामि[4] ।।३६।।

एवमुक्तवति देवऋषीन्द्रे द्रागभेदि मघवाननमुद्रा ।
उत्तरोत्तरशुभो हि विभूनां कोऽपि मञ्जुलतमः क्रमवादः ।।३७।।

[1]एवमुक्तवतीति । एवं देवर्षीणामिन्द्रे नारदे उक्तवति सति द्राक् झटिति मघोन इन्द्रस्य आननमुद्रा अभेदि मौनं भग्नम् ।[2] हि यस्मात् विभूनां स्वामिनां कोऽपि क्रमवादः अनुक्रमोक्तिप्रत्युक्तिप्रबन्धः[3] मञ्जुलतमः ।[4] उत्तरोत्तरेण शुभः । यद्यदुत्तरं तत्तद्रम्यम्[5] ।।३७।।

काऽनुजे मम निजे दनुजारौ जाग्रति स्वशरणे रणचर्चा ।
यद्भुजाङ्कमुपधाय जयाङ्कं शर्मणा स्वपिमि वीतविशङ्कः ।।३८।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]काऽनुजे ममेति। मम निजे अनुजे दनुजारौ उपेन्द्रे श्रीकृष्णे जाग्रति सति का रणस्य चर्चा चिन्ता विचारणा[2]। किं भूते ?। स्वस्य मम[3] शरणभूते। अहं यस्य विष्णोर्भुजाङ्कं[4] मध्यम् [5]उपधाय उच्छीर्षकं कृत्वा शर्मणा सुखेन स्वपिमि। वीता[6] विविधा शङ्का यस्य स तथा। किं भूतम् ?। जयस्याङ्कं चिह्नभूतम्। अथवा जयस्य अङ्कश्चिह्नं यत्र तं तथा। परमेश्वरस्य [7]भुजे जयलक्षणानि सन्ति[8]॥३८॥

विश्वरूपकलनादुपपन्नं तस्य जैमिनिमुनित्वमुदीये।
विग्रहं मखभुजामसहिष्णुर्व्यर्थतां मदशनिं स निनाय॥३९॥

[1]विश्वरूपकलनादिति। तस्य श्रीकृष्णस्य जैमिनिमुनित्वम् उदीये जातम्[2]। किं भूतम् ?। विश्वरूपमूर्तिकलनात् [3]धरणात् उपपन्नं घटमानम्। विश्वस्य[4] मध्ये जैमिनिराचार्योऽपि मीमांसाशास्त्रे सूत्रकारः। किं च तत्र[5] सहस्राधिकरणमध्ये एकं विश्वेदेवाधिकरणं कलितमस्ति। [6]अपरं रूपाधिकरणं नाम[7] कलितमस्ति। तत्र द्रव्यदेवतं हि कर्मणो रूपमि[8] ति रूपाधिकरणं विचारितमस्ति। इत्थं यो यो विश्वरूपकलनं कुरुते स स जैमिनिः। श्रीकृष्णोऽपि विश्वरूपकलनं कृतवान्। तस्माज्जैमिनिः इत्थमनुमानप्रमाणेनोपपन्नम्। सोऽपि जैमिनिर्मम अशनिं वज्रं व्यर्थतां निनाय। यतः मखभुजां यज्ञभागभुजां देवानां विग्रहं शरीरम् असहिष्णुः।

मन्त्रमयी हि देवता मीमांसकानां, न विग्रहवती। इदमग्नये इदमिन्द्राय इत्यादिचतुर्थ्यन्तनामपदं देवता। केचन वेदान्तिप्रभृतयो नैयायिका वैशेषिकाः साङ्ख्याश्च विग्रहवतीं देवतामाहुः। तदयुक्तम्। यतो विग्रहवत्त्वे[10] सति युगपदनेकयजमानानां कर्मसु जायमानेषु एकमिन्द्रशरीरम् एकस्य यागे गतं तस्मिन्नेव काले अपरस्य हविः कथं ग्रहीतुं शक्नुयात् ?। ऐश्वर्ययोगात्, चेत्, अनेकशरीराणि कृत्वा[11] युगपत् सर्वत्र प्रयास्यति। यथा योगी योगबलेन कैश्चित् शरीरैर्विषयान् सेवते। कैश्चिदुग्रं तपश्चरेदिति। तदपि न। न हि याः काश्चिद्देवता [12]यज्ञभागं लभन्ते। तासां सर्वासामपि वरमैश्वर्ययोगोऽस्ति। देवतामात्रस्य अपि यागे भागसम्बन्धोऽस्ति। तथा चानुक्रमणीकारः या

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

काचिन्मन्त्रे स्तूयते[13] सा देवता । चेतनाऽचेतना[14] वा भवतु । क्वचिद्वाणाः क्वचिद्धनुः क्वचिन्मौर्वी । निरुक्तकारोऽपि–सूक्तभाजो हविर्भाजश्च देवता (VII. 1·35) इत्याह । या यत्र भजते हविः सा तत्र[15] देवता । ततश्च विग्रहवत्त्वे अङ्गीक्रियमाणे युगपदेकस्या देवताया [16]हविर्ग्रहणशक्तिमत्त्वाभावात् । कर्मणामभावे वेदस्याऽप्रामाण्यं स्यात् । मन्त्रमयीत्वे त्वङ्गीक्रियमाणे शरीराभावात् इदमिन्द्रायेति चतुर्थ्यन्तं मन्त्रपदं देवता तस्या जात्या[17] सर्वत्र एकत्वात् । अनेकयागेष्वपि सम्बन्धो घटते । ततश्च वेदस्य[18] प्रामाण्यम् । इत्थं जैमिनिराचार्यो देवतानां विग्रहवतीत्वं[19] न सहते । ननु यदि विग्रहवत्त्वं नास्ति, तत्कथं वज्रहस्तः पुरन्दर (यजु॰ XXVIII. 3) इत्यादीनि श्रुतौ इन्द्रस्य हस्तविशेषणानि इत्याशङ्क्याऽऽह-स मम अशनिं वज्रहस्त इति विशेषितं व्यर्थताम् अर्थवादतां निनाय । प्रशंसामात्रमिदं, न पुनस्तस्य रूपम् । यतो विरोधे सति अयं गुणवादः । गौणमिदं वज्रहस्त[20] इति वाक्यम् । तथा च भट्टाचार्यः—विरोधे गुणवादः स्यादनुवादोऽवधारिते । भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः इति । अथवा मदशनिं व्यर्थतां निनाय । जैमिनेः स्मरणे विघ्नं न पतति । तथा च–जैमिनिश्च सुमन्तुश्च वैशम्पायन एव च । पुलस्त्यः पुलहश्चैव पञ्चैते वज्रवारणाः इत्यपि केचिदाहुः[21] ।।३९।।

ईदृशानि मुनये विनयाब्धिस्तस्थिवान् स वचनान्युपहृत्य ।
प्रांशुनिःश्वसितपृष्ठचरी वाङ् नारदस्य निरियाय निरोजाः ।।४०।।

[1]ईदृशानीति । स[2] ईदृशानि वचनानि मुनये नारदाय उपहृत्य ढौकनिकारूपाणि कृत्वा तस्थिवान् । किं भूतः ?। विनयस्य अब्धिः समुद्रः । ईदृशानि इति वदन् कविः मुनेरनभिमततां[3] सूचयति । तदनु नारदस्य वाक् निरियाय निर्गता । किं भूता ?। निर्गतम् ओजो यस्याः सा तथा । प्रांशु [4]दीर्घो यो निःश्वसितो वायुस्तस्य पृष्ठचरी च[5] । प्रथमं च निःश्वसितम् । ततो वाक्[6] ।।४०।।

स्वारसातलभवाहवशङ्की निर्वृणोमि न वसन् वसुमत्याम् ।
धां गतस्य हृदि मे दुरुदर्कः क्ष्मातलद्वयभटाजिवितर्कः ।।४१।।

[1]स्वारसातलेति । अहं वसुमत्यां पृथिव्यां वसन्[2] न निर्वृणोमि न निवृत्तो भवामि । किं भूतः ?। स्वर्गे रसातले वा भवम् आहवं शङ्कते

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

इत्येवंशील: । इति पृथिव्यां[3] स्थितस्तर्कयामि । यत:[4] स्वर्गे सङ्ग्रामो भविष्यति तत्र[5] गच्छामि । पाताले वा सङ्ग्रामस्तत्र[6] व्रजामि । तत्र द्यां गतस्य मे हृदि क्ष्मायाः पृथिव्याः यत्तलद्वयम् अधः उपरि च पातालं भूतलं च तत्र ये [7]भटास्तेषाम् आजेः सङ्ग्रामस्य वितर्कः दुरुदर्कः दुष्ट-परिणामो यस्य ।[8] स्वर्गे गच्छामि चेत् तत्र इति चिन्ता भवति । यत् पाताले[9] युद्धं पृथिव्यां वा ततो[10] [11]निर्वृत्तिः ।।४१।।

वीक्षितस्त्वमसि मामथ गन्तुं तन्मनुष्यजगतोऽनुमनुष्व ।
किं भुवः परिवृढा न विवोढुं तत्र तामुपनता विवदन्ते ।।४२।।

[1]वीक्षितस्त्वमिति । हे इन्द्र ! त्वं वीक्षितोऽसि । तत् मां मनुष्य-जगतो[2] पृथिव्यै गन्तुम् अथ अनुमनुष्व अनुजानीहि । गत्यर्थकर्मणि (पा° II. iii. 12) ति चतुर्थी । किं [3]तत्र पृथिव्यां भुवः परिवृढाः राजानः[4] तां दमयन्तीं विवोढुं परिणेतुं उपनताः[5] सन्तः [6]न विवदन्ते ।[7] अपि तु युध्यन्त एव । ततोऽहं भुवं [8]गच्छामि ।।४२।।

इत्युदीर्य स ययौ मुनिरुर्वीं स्वर्पतिं प्रतिनिवर्त्य बलेन ।
वारितोऽप्यनुजगाम स यन्तं तं कियन्त्यपि पदान्यपराणि ।।४३।।

[1]इत्युदीर्येति । इति उदीर्य स मुनिः नारदः उर्वीं पृथिवीं[2] ययौ । किं कृत्वा ?। स्वर्पतिम् इन्द्रं बलेन तरसा[3] प्रतिनिवर्त्य स इन्द्रः [4]सहस्र-नयनः[5] वारितोऽपि निषिद्धोपि तं [6]नारदम् अपराणि कियन्त्यपि पदानि अनुजगाम । किं भूतम् ?। यन्तं गच्छन्तम्[7] ।।४३।।

पर्वतेन परिपीय गभीरं नारदीयमुदितं परिनेदे ।
स्वस्य कश्चिदपि पर्वतपक्षच्छेदिनि स्वयमदर्शि न पक्षः ।।४४।।

[1]पर्वतेनेति । पर्वतेन मुनिना गभीरं [2]नारदीयं नारदसम्बन्धि उदितं वचनं परिपीय श्रुत्वा परिनेदे [3]अन्ववादि । स्वस्य आत्मनः [4]तस्मिन्निन्द्रे कश्चिदपि पक्षः स्वमतं [5]स्वयं न अदर्शि[6] । किं [7]भूते ?। पर्वतस्य पक्षस्य मतस्य छेदिनि [8]छेदनशीले[9] । अथ च पर्वतानां [10]गिरीणां पक्षान् छिनत्तीत्येवंविधे[11] [12]एवंरूपे । अथ च पर्वतो गिरः किमपि शब्दं पीत्वा प्रतिनादं कुरुते । इन्द्रे च पक्षान्न दर्शयति[13] ।।४४।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

पाणये बलरिपोरथ भैमिशीतकोमलकरग्रहमर्हम् ।
भेषजं [1]चिरचिताशनिवासव्यापदामुपदिदेश रतीशः ।।४५।।

[2]पाणये इति । अथ रतीशः बलरिपोरिन्द्रस्य पाणये भैम्याः शीतो यः कोमलश्च करग्रहः[3] पाणिग्रहणं तदुपदिदेश । किं भूतम् ?। चिरं चितानां सञ्चितानाम् अशनिवासस्य वज्रधारणस्य व्यापदाम्[4] अर्हम् [5]उचितं भेषजम् औषधम् । वज्रेण व्रणितस्य किल शीतलं कोमलं च औषधं वध्यते[6] ।।४५।।

नाकलोकभिषजोः सुषमाया पुष्पचापमपि चुम्बति सैव ।
वेद्मि तादृगभिषज्यदसौ तद्द्वारसङ्क्रमितवैद्यकविद्यः ।।४६।।

[1]नाकलोकेति । [2]अहम् इति वेद्मि [3]यत् नाकलोकभिषजोः अश्विनीकुमारयोः या सुषमा[4] शोभा सैव पुष्पचापमपि चुम्बति । [5]यत् असौ कामः[6] तादृक् तादृशं[7] यथा भवति एवं अभिषज्यत् भेषजं चक्रे । किं भूतः ?। तस्या शोभाया द्वारेण सङ्क्रमिता आत्मनि प्रवेशिता वैद्यकविद्या येन स तथाभूतः[8] । [9]यथाऽश्विनोः शोभा कामदेवे सङ्क्रान्ता तथा[10] वैद्यकमपि[11] ।।४६।।

मानुषीमनुसरत्यथ पत्यौ खर्वभावमवलम्ब्य मघोनि ।
खण्डितं निजमसूचयदुच्चैर्मानमानन सरोरुहनत्या ।।४७।।

[1]मानुषीमिति । मघोनि इन्द्राणी पत्यौ इन्द्रे मानुषं दमयन्तीम् अनुसरति सति अथ आननसरोरुहस्य नत्या लज्जानम्रतया खर्वभावं ह्रस्वत्वम् अवलम्ब्य निजम् उच्चैरुच्चतरं मानम् अभिमानं खण्डितम् असूचयत् लिङ्गं ज्ञापयामास । यस्य किल मानं प्रमाणं खण्डयते[3] स खर्वो भवति[4] ।।४७।।

यो मघोनि दिवमुच्चरमाणे रम्भया मलिनिमालमलम्भि ।
वर्ण एव स खलूज्ज्वलमस्याः शान्तमान्तरमभाषत भङ्ग्या ।।४८।।

[1]मघोनीति । मघोनि इन्द्रे दिवं स्वर्गम् उच्चरमाणे[2] सति उत्क्रम्य गच्छति, रम्भया अप्सरोमुख्यया अलमत्यर्थं यो मलिनिमा अलम्भि । खलु उत्प्रेक्षायाम् । स [3]वर्ण एवाऽस्या रम्भाया आन्तरं चित्तम् उज्ज्वलं शृङ्गाररसप्रधानं[4] भङ्ग्या [5]प्रकारविशेषेण शान्तं शमैकनिष्ठम् [6]अभाषत

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

आख्यत्[7] । उज्ज्वलस्य हि मालिन्यम् अनुपपद्यमानम् । अर्थापत्या दीप्त-तायाः शान्ततामाचचष्टे । उदश्चरः सकर्मका (पा° I. iii. 53) दित्या-त्मनेपदम्[8] ।।४८।।

जीवितेन कृतमप्सरसां तत्प्राणमुक्तिरिह युक्तिमती नः ।
इत्यनक्षरमवाचि घृताच्या दीर्घनिःश्वसितनिर्गमनेन ।।४९।।

[1]जीवितेनेति । घृताच्या अप्सरोमुख्यया[2] दीर्घस्य निःश्वसितस्य निर्गमनेन कृत्वा अनक्षरं यथा भवति एवम् इति[3] अवाचि उक्तम् । इतीति[4] किम् ?। नोऽस्माकम् अप्सरसां सर्वासामपि जीवितेन[5] कृतं पूर्यताम् । [6]तत् तस्मात् अस्माकं प्राणानां मुक्तिरेव युक्तिवती घटते । निःश्वासः किल प्राणवायुरेव[7] ।।४९।।

साधु नः पतनमेवमितः स्यादित्यभण्यत तिलोत्तमयाऽपि ।
चामरस्य पतनेन कराब्जात्तद्विलोडनचलद्भुजनालात् ।।५०।।

साधु [1]नः पतनमिति । तिलोत्तमानाम्न्या स्वर्गस्त्रिया इत्यभण्यत । अनक्षरम् [2]अव्यक्तम् । केन ? । कराब्जाच्चामरस्य पतनेन । किं भूतात् ?।[3] तस्य चामरस्य [4]शून्यविलोडनेन [5]कम्पनेन चलन्[6] भुजनालो यस्य[7] तस्मात्तथा । अन्यचित्ततया चामररहितहस्तविलोडनेन[8] । इतीति किम् ?। नोऽस्माकम् अप्सरसाम् इतः[9] स्वर्गात् एवं चामर[10]-पतनवत् पतनं साधु स्यात्, रुचिरं भवेत्[11] ।।५०।।

मेनका मनसि तापमुदीतं यत्पिधित्सुरकरोदवहित्थाम् ।
तत्स्फुटं निजहृदः पुटपाके पङ्कलिप्तिमसृजद्बहिरुत्थाम् ।।५१।।

मेनका[1] मनसीति । मेनका मनसि उदीतं[2] तापं पिधित्सुः[3] आच्छादयितुमिच्छुः सती यदवहित्थाम् आकारनिगूढनम्[4] अकरोत्[5], तत् स्फुटं निश्चितं निजस्य हृदो मनसः पुटपाकनिमित्तं बहिः [6]उत्थां बाह्यात्[7] उत्थां पङ्कलिप्तिम् असृजत् । यत्पुटपाकेन पच्यते तत्[8] उभयतः कर्दमेन लिप्यते[9] ।।५१।।

उर्वशी गुणवशीकृतविश्वा तत्क्षणस्तिमितभावनिभेन ।
शक्रसौहृदसमापनसीमस्तम्भकार्यमपुषद्वपुषैव ।।५२।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]उर्वशीति । उर्वशी शक्रस्येन्द्रस्य सौहृदं मैत्री तस्य समापनं[2] समाप्तिः तस्य सीमस्तम्भ आघाटः तस्य कायं वपुषा शरीरेणैवाऽपुषत् [3]पुष्टिं चक्रे । इन्द्रेण सहस्रनयनेन[4] सह मैत्रीसमाप्तिसीम्नि वपुरेवाऽऽघाटः । केन ? । तत्क्षणं यः स्तिमितभावः [5]निश्चलभावः तस्य निभेन व्याजेन । स्तम्भो हि निश्चलो भवति । किं भूता ? । गुणैः सौन्दर्यादिभिः वशीकृतं विश्वं यया सा तथा[6] ।।५२।।

कापि कामपि बभाण बुभुत्सुं शृण्वति त्रिदशभर्तरि किञ्चित् ।
एष कश्यपसुतामभिगन्ता पश्य कश्यपसुतः शतयज्ञः[1] ।।५३।।

कापि [2]कामपीति । काऽपि कामिनी कामपि सखीं त्रिदशभर्तरि देवेन्द्रे किञ्चित् [3]शृण्वति [4]सति बभाण [5]उवाच[6] । किं भूताम् ? बुभुत्सुं ज्ञातुमिच्छुम् । हे सखि ! त्वं पश्य[7] एष कश्यपसुतः इन्द्रः शतयज्ञः कश्यपसुतां पृथिवीम् अभिगन्ता ।[8] यो यज्ञान् करोति स कथं [9]भगिनीमभिगच्छति[10] ।।५३।।

आलिमात्मसुभगत्वसगर्वा काऽपि शृण्वति मघोनि बभाषे ।
वीक्षणेऽपि सघृणाऽसि नृणां किं यासि न त्वमपि सार्थगुणेन ।।५४।।

[1]आलिमात्मेति । काऽपि कामिनी [2]मघोनि इन्द्रे शृण्वति आलिं सखीं बभाषे । किं भूता ? । आत्मनः सुभगत्वेन [3]सगर्वा । हे सखि ! त्वं[4] नृणां वीक्षणेऽपि किं सघृणाऽसि जुगुप्सायुक्ता ? । त्वमपि सार्थगुणेन किं[5] न यासि । देवानां सार्थगुणेन[6] त्वमपि गच्छ[7] ।।५४।।

अन्वयुर्द्युतिपयःपितृनाथास्तं मुदाऽथ हरितां कमितारः ।
वर्त्म कर्षतु पुरः परमेकस्तद्गतानुगतिको न महार्घः ।।५५।।

[1]अन्वयुर्द्युतीति । द्युतिनाथोऽग्निः पयनाथो वरुणः पितृनाथो यमः एते हरितां दिशां कमितारो दिक्पालाः मुदाऽथ तम्[2] इन्द्रम् अन्वयुः । युक्तोऽयमर्थः । पुरोऽग्रे भूय एकः कश्चित् परं केवलं वर्त्म मार्गं [3]कर्षतु । तस्य गतानुगतिकः[4] अनुगन्ता न[5] महार्घः । सर्वः कोऽपि समर्थः सुप्राप[6] इत्यर्थः[7] ।।५५।।

प्रेषिताः पृथगथो दमयन्त्यै चित्तचौर्यतुरा निजदूत्यः ।
तद्गुरुं प्रति च तैरुपहाराः सङ्ख्यसौख्यकपटेन निगूढाः ।।५६।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

प्रेषिता:[1] पृथगिति । अथोऽनन्तरं[2] तैर्देवैर्दमयन्त्यै पृथक्[3] निजदूत्य: प्रेषिता: । किं भूता: ?। चित्तस्य चौर्ये मनसो हरणे चतुरा: । तथा तै: तस्या:[4] गुरुं पितरं प्रति च निगूढा: उपहारा: ढौकनिकाश्च प्रेषिता: । केन[5] गुप्ता: ?। सङ्ग्रचस्य सङ्ग्रामस्य सौख्यं तस्य कपटेन ।[6] भीमेन राज्ञा रिपुभि: सह सङ्ग्रामे क्रियमाणेऽस्माकमानन्दोऽजनि । तत उपहारा: प्रेषिता: इति व्याजात् निगूढा:[7] ।।५६।।

चित्रमत्र विबुधैरपि यत्तै: स्वर्विहाय बत भूरनुशस्त्रे ।
द्यौर्न काचिदथवाऽस्ति निगूढा सैव सा चलति यत्र हि चित्तम् ।।५७।।

[1]चित्रमत्रेति । अत्र चित्रम् आश्चर्यम् यत् तै:[2] विबुधैरपि स्व: स्वर्गं विहाय । बत खेदे । भू: पृथ्वी अनुसृता । अथवा द्यौर्नाम काचित् [3]निगूढा नाऽस्ति ! अमुक: स्वर्ग इति रूढिर्नास्ति । सा द्यौ: सैव यत्र [4]हि चित्तं चलति[5] ।।५७।।

शीघ्रलङ्घितपथैरथ वाहैर्लम्भिता भुवममी सुरसारा: ।
वक्रितोन्नमितकन्धरबन्धा: शुश्रुवुर्ध्वनितमध्वनि दूरम् ।।५८।।

[1]शीघ्रलङ्घितेति । अमी सुरसारा अथ [2]वाहैरश्वैर्भुवं लम्भिता: । किं [3]भूतै: ?। शीघ्रं लङ्घित: पथा यैस्तथा । [4]ततस्तेऽध्वनि दूरध्वनितं शुश्रुवु: । किं भूता: ?। वक्रितो वक्रीकृत उन्नमितश्च [5]कन्धरबन्धो यै: ते तथा । [6]ग्रीवया तिर्यक् पश्चाद्विलोकितम् उच्चैश्च[7] ।।५८।।

किं घनस्य जलधेरथवैवं नैव संशयितुमप्यलभन्त ।
स्यन्दनं परमदूरमपश्यन्नि:स्वनश्रुतिसहोपनतं ते ।।५९।।

किं[1] घनस्येति । ते देवा एवं संशयितुमपि[2] न [3]अलभन्त । यत् अयं ध्वनि: किं घनस्य अथवा जलधेरयं सन्देहं कर्तुमपि नाऽलभन्त[4] । परं केवलम् अदूरं समीपं स्यन्दनं रथं ते [5]अपश्यन् । किं भूतम् ?। नि:स्वनस्य[6] ध्वने: श्रुत्या श्रवणेन सह[7] उपनतम् आगतम् । रथध्वनि-श्रवणेन समकालं रथोऽप्यागत:[8] ।।५९।।

सूतविश्रमदकौतुकिभावं भावबोधचतुरं तुरगाणाम् ।
तत्र नेत्रजनुष: फलमेते नैषधं बुबुधिरे विबुधेन्द्रा: ।।६०।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]सूतविश्रमदेति । तत्रैते विबुधेन्द्रा देवा नैषधं नलं बुबुधिरे । किं भूतम् ?। सूतस्य सारथेर्विश्रमदः कौतुकिभावो यस्य तं[2] तथा । स्वयं सारथ्यकर्तारम् । तथा तुरगाणां भावबोधे चतुरम् । अश्वहृदयमन्त्रज्ञम् । तथा नेत्राणां जनुषो जन्मनः फलम् अतिसुन्दरम् । एतैरभिज्ञानैर्नलं ज्ञातवन्तः[3] ।।६०।।

वीक्ष्य तस्य वरुणस्तरुणत्वं यद्बभार निबिडं जडभूयम् ।
नौचिती जडपतेः किमु साऽस्य प्राज्यविस्मयरसस्तिमितस्य ।।६१।।

वीक्ष्य [1]तस्येति । तस्य तरुणत्वं वीक्ष्य वरुणः यत् निबिडं जडभूयं जाड्यं बभार । अस्य [2]जडपतेः जडानां प्रभोः सा किमु[3] न औचिती । किं भूतस्य ?। प्राज्येन प्रचुरेण विस्मयरसेन स्तिमितस्य । यः किल रसेन आर्द्रो भवति स जडो भवति । वरुणश्च नलं दृष्ट्वा आश्चर्येण जडोऽभूत्[4] ।।६१।।

रूपमस्य विनिरूप्य तथातिम्लानिमाप रविवंशवतंसः ।
कीर्त्यते यदधुनाऽपि स देवः काल एव सकलेन जनेन ।।६२।।

[1]रूपमस्येति । अस्य रूपं विनिरूप्य रविवंशस्य[2] वतंसो यमः तथा अतिशयेन म्लानिम्[3] आप । यत् अधुनाऽपि स देवः सकलेन जनेन काल एव कीर्त्यते कथ्यते । कृष्णवर्णत्वात् कालः । तथा काल इति यमस्य[4] नाम[5] ।।६२।।

यं बभार दहनः खलु तापं रूपधेयभरमस्य विमृश्य ।
तत्र भूदनलता जनिकर्त्री मा तदप्यनलतैव तु हेतुः ।।६३।।

यं [1]बभारेति । अस्य नलस्य रूपधेयस्य सौन्दर्यस्य भरं विमृश्य दहनः यं [2]तापं बभार । खलु इति मन्ये । तत्र[3] तापे अनलता[4] वह्नित्वं जनिकर्त्री जन्मकारिणी माऽभूत्[5] । न हि अग्निरात्मानं दहति, एकस्यैव कर्तृत्वकर्मत्वविरोधात् । तदपि तु पुनः अतलतैव नलाभावतैव हेतुः ।[6] अथवा तत्र अनलता वह्निता जनेर्धातोः [7]कर्त्री जायमाना हेतुर्माऽभूत् । नलादन्यत्वमेव जनेर्धातोः कर्तृकारकं तत्र हेतुः ।।६३।।

कामनीयकमधः कृतकामं काममक्षिभिरवेक्ष्य तदीयम् ।
कौशिकः स्वमखिलं परिपश्यन् मन्यते स्म खलु कौशिकमेव ।।६४।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]कामनीयकमिति । कामं सत्यं कौशिको महेन्द्रः अक्षिभिस्तदीयम् अधःकृतकामं[2] [3]कामनीयकं सौन्दर्यम् अवेक्ष्य स्वम् आत्मानम् अखिलं परिपश्यन् सन् खलु कौशिकमेव उलूकवत् विरूपमात्मानं मन्यते स्म[4] ॥६४॥

रामणीयकगुणाद्वयवादं मूर्तमुत्थितममुं परिभाव्य ।
विस्मयाय हृदयानि वितेरुस्तेन तेषु न सुराः प्रबुभूवुः ॥६५॥

[1]रामणीयकेति । सुरा देवाः अमुं नलं मूर्तं रामणीयकगुणस्याऽद्वयवादं मूर्तिमन्तं सौन्दर्याद्वैतम् उत्थितं परिभाव्य हृदयानि विस्मयाय वितेरुर्ददुः । तेन कारणेन तेषु हृदयेषु सुरान् प्रबुभूवुः न प्रभवो जाताः । तेषां मनांसि तस्य सौन्दर्येण [2]हृतानि ॥६५॥

प्रेयरूपकमशेषनिवेशैः संवदद्भिरमराः श्रुतपूर्वैः ।
एष एव स नलः किमितीदं मन्दमन्दमितरेतरमूचुः ॥६६॥

[1]प्रेयरूपकमिति । अमरा देवा इतरेतरं परस्परं मन्दं मन्दम् [2]इदम् ऊचुः[3] । किं स सर्वत्र प्रसिद्धो नलः एष एव [4]समीपवर्ती । समीपतरवर्ति चैतदो रूपं तदः[5] परोक्षे विनिर्दिष्टम् इति अभिधानकाण्डे । एष[6] स इति जहदजहल्लक्षणया सामानाधिकरण्यम् । कैः कृत्वा ?। अन्योन्यम् इति ऊचुः अशेषनिवेशैः समग्रावयवैः । किं विशिष्टैः ?। प्रेयरूपकं संवदद्भिः प्रियरूपतासंवादिभिः[7] । किं भूतैः ?। [8]श्रुतपूर्वैः । यादृशा अवयवा नलस्य श्रुताः तादृशा दृश्यन्ते । [9]अतोऽयं किं नल एव[10] ॥६६॥

तेषु तद्विधवधूवरणार्हं भूषणं स समयः स रथाध्वा ।
तस्य कुण्डिनपुरं प्रतिसर्पन् भूपतेर्व्यवसितानि शशंसुः ॥६७॥

तेषु[1] तद्विधेति । एते पदार्थास्तेषु देवेषु विषये तस्य भूपतेर्नलस्य व्यवसितानि स्वयंवरगमनादीनि शशंसुः [2]कथयामासुः । एकं, तद्विधाया दमयन्त्या वध्वाः वरणस्याऽर्हं योग्यं भूषणम् । तथा स समयः स्वयंवरलक्षणः । तथा कुण्डिनपुरं प्रतिसर्पन् स रथस्य अध्वा मार्गश्च-एते पदार्थाः[3] ॥६७॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

धर्मराजसलिलेशहुताशैः प्राणतां श्रितममुं जगतस्तैः ।
प्राप्य हृष्टचलविस्तृततापैश्चेतसा निभृतमेतदचिन्ति ।।६८।।

[1]धर्मराजेति । धर्मराजो यमः सलिलेशो वरुणः हुताशोऽग्निः एतैश्चेतसा निभृतं गुप्तम् एतत्[2] अचिन्ति । किं भूतैः ?। अमुं नलं प्राप्य हृष्टचलविस्तृततापैः । धर्मराजत्वात् हर्षः, सलिलेशत्वात् चलः, वह्नित्वात् विस्तृततापः[3] । किं भूतम् ?। जगतः [4]प्राणतां श्रितम् । नलो हि जगत्प्रियः । अथ [5]च जगतः प्राणान् प्राप्य यमो भक्षणार्थं [6]हृष्यति । सलिलं प्राणं [6]वायुं प्राप्य चलति । अग्निश्च हुतम्[8] अश्नन् प्राणं फुत्कारवायुं प्राप्य विस्तृततापो भवति[9] ।।६८।।

नैव नः प्रियतमोभयथाऽसौ यद्यमुं न वृणुते वृणुते वा ।
एकतो हि धिगमूमगुणज्ञामन्यतः कथमदः प्रतिलम्भः ।।६९।।

नैव नः[1] प्रियतमेति । असौ प्रियतमा नोऽस्माकम् उभयथाऽपि न घटते । यदि अमुं नलं न वृणुते अथवा[2] अमुं वृणुते । [3]हि यत एकतः अवरणपक्षे अगुणज्ञाम् अमूं दयमन्तीं धिक् या नलं त्यजति सा[4] न गुणान् वेत्ति ।[5] अन्यतोऽन्यस्मिन् नलवरणपक्षे अस्याः प्रतिलम्भोऽदः [6]प्रतिलम्भः कथं कुतः प्राप्तिः ? । इयं धर्मराजस्य [7]हर्षधर्मप्रधाना उक्ति.[8] ।।६९।।

मां वरिष्यति तदा यदि मत्तो वेद नेयमियदस्य महत्त्वम् ।
ईदृशी च कथमाकलयित्री मद्विशेषमपरान्नृपपुत्री ।।७०।।

मां [1]वरिष्यतीति । इयं वरुणस्य चञ्चलरूपा उक्तिः । इयं मां तदा वरिष्यति ।[2] यदि मत्तः सकाशात् इयदधिकम् अस्य नलस्य महत्त्वं न वेद न जानाति । ईदृशी चेदनभिज्ञा इयं नृपपुत्री अपरादन्यस्मात् यस्मात्कस्माच्चिदपि सकाशात् मम विशेषं कथम् आकलयित्री ज्ञास्यति[3] ।।७०।।

नैषधे बत वृते दमयन्त्या व्रीडितो न हि बहिर्भवितास्मि ।
स्वां गृहेऽपि वनितां कथमास्यं ह्रीनिमीलि खलु दर्शयिताहे ।।७१।।

नैषधे[1] बतेति । इयं वह्नेः तापयुक्ता उक्तिः । बत खेदे । दमयन्त्या नैषधे वृते अहं व्रीडितः सन् वहिर्न भवितास्मि । किन्तु गृहेऽपि स्वां

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

वनिताम् आस्यं [2]स्वं मुखं कथ दर्शयिताहे ।[3] किं भूतम् ?। ह्रिया निमीलि[4] सङ्कुचितम् । खलु निश्चितम् । णिचश्चे (पा° I. iii. 74) ति कर्त्रभिप्राय आत्मनेपदम् । अभिवादिदृशोरात्मनेपद उपसङ्ख्यान-(वा° 134) मित्यणिकर्तुः कर्मत्वं विभाषया । हृक्रोरन्यतरस्यामि (पा° I. ii. 53) ति सूत्रे उपसङ्ख्यानमिदम्[5] ।।७१।।

इत्यवेत्य मनसाऽऽत्मविधेयं किञ्चन त्रिविबुधी बुबुधे न ।
नाकनायकमपास्य तमेकं सा स्म पश्यति परस्परमास्यम् ।।७२।।

[1]इत्यवेत्येति । सा त्रयाणां विबुधानां समाहारः त्रिविबुधी[2] देवत्रयी मनसा इति अवेत्य आत्मनो विधेयं कर्तव्यं किञ्चन मनसा न [3]बुबुधे । तम्[4] एकं नाकनायकम् इन्द्रम् अपास्य विहाय सा [6]देवानां त्रयो[7] परस्परम् आस्यं मुखं पश्यति स्म । इन्द्र एवैको वक्ताऽभूत्[8] ।।७२।।

किं विधेयमधुनेति विमुग्धं स्वानुगाननमवेक्ष्य ऋभुक्षाः ।
शंसति स्म कपटे पटुरुच्चैर्वञ्चनं समभिलष्य नलस्य ।।७३।।

किं [1]विधेयामिति । ऋभुक्षाः स्वेषाम्[2] आत्मीयानाम् अनुगानां त्रयाणामपि आननम् इति विमुग्धं वीक्ष्य शंसति स्म उवाच । इतीति[3] किम् ?। अधुना[4] किं विधेयमिति । किं कृत्वा ?। नलस्य वञ्चनं[5] समभिलष्य[6] । यतः कपटे[7] पटुः छलनपरः[8] ।।७३।।

सर्वतः कुशलवानसि कच्चित्त्वं स नैषध इति प्रतिभा नः ।
स्वासनार्द्धसुहृदस्त्वयि रेखां वीरसेननृपतेरिव विद्मः ।।७४।।

सर्वत[1] इति ।[2] हे नृपः ! त्वं कच्चित् प्रश्ने सर्वतः[3] कुशलवानसि । नोऽस्माकम् इति प्रतिभा स्वत एव ज्ञानं वर्त्तते[4] यत् त्वं स[5] प्रसिद्धो [6]नैषधो नलः यतो वयं त्वयि वीरसेननृपतेरिव रेखां[7] सादृश्यं विद्मः ।[8] किं भूतस्य ?। स्वस्य ?। स्वस्य [9]आत्मन आसनस्याऽर्द्धे सुहृदः तव पिता ममार्द्धासने[10] मित्रम्[11] ।।७४।।

क्व प्रयास्यसि नलेत्यलमुक्त्वा यात्रयाऽत्र शुभयाऽजनि यत्नः ।
तत्तयैव फलसत्त्वरया त्वं नाऽध्वनोऽर्द्धमिदमागमितः किम् ।।७५।।

क्व [1]प्रयास्यसीति । हे नल ! त्वं क्व प्रयास्यसि इत्युक्त्वा अलं पूर्यताम् । यतोऽत्र[2] त्वदागमने [3]नोऽस्माकं यात्रया शुभया सुमुहूर्तया

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

अजनि । तत् तयैव सुलग्नया यात्रया फलदानाय सत्वरया त्वं किम् इदम् अध्वनोऽर्द्धं न आगमितः । अपि तु आनीतः । अथ च 'मा गाः', 'क्व [4]यासि' इति वाक्यं न वाच्यम्, [5]अपशकुनवाचित्वात्[6] ।।७५।।

एष नैषध ! स दण्डभृदेष ज्वालजालजटिलः स हुताशः ।
यादसां स पतिरेष च शेषं शासितारमधिगच्छ सुराणाम् ।।७६।।

एष[1] नैषधेति । हे[2] नैषध ! एष स[3] प्रसिद्धो दण्डभृत् यमः । दण्डधारित्वाद्भयङ्करः । तथा[5] एष [6]ज्वालजालैर्जटिलः स हुताशः हुतं भक्षयतीति[7] । भीष्मता[8] च ज्वालामालितया अधृष्यत्वात् । तथा स एष यादसां पतिर्वरुणः । अयमपि यादसां दुष्टजलचराणां पतित्वाद्भीमः । शेषं परिशिष्टं मां सुराणां [9]देवानां शासितारं [10]पतिमधिगच्छ जानीहि । [11]आत्मानमपि सुराणां[12] शासितृत्वेन रौद्रं कथयति । [13]जहदजहल्लक्षणया स एष इति पदयोः [14]सामानाधिकरण्यम् । दण्डभृदादयो वाचकाः साभिप्रायाः । यथा नलोपाख्याने-अहमिन्द्रोऽयमग्निश्च तथैवाऽयमपां पतिः । शरीरान्तकरो नृणां यमोऽयमपि पार्थिव ।। (म॰ भा॰ वन॰ 55.4) ।। [15]परिकरोऽलङ्कारः ।।७६।।

अर्थिनो वयममी समुपेमस्त्वां नलेति फलितार्थमवेहि ।
अध्वनः क्षणमपास्य च खेदं कुर्महे भवति कार्यनिवेदम् ।।७७।।

अर्थिन्[1] इत्यादि । हे [2]नल ! वयम् अर्थिनः सन्तः किल त्वाम् अमी समुपेमः आगच्छामः इति फलितार्थं [3]तात्पर्यार्थम् अवेहि जानीहि । क्षणम् अध्वनः खेदम् अपास्य च वयं भवति त्वयि कार्यस्य निवेदं कुर्महे [4]।।७७।।

ईदृशीं गिरमुदीर्य बिडौजा जोषमास न विशिष्य बभाषे ।
नाऽत्र चित्रमभिधाकुशलत्वे शैशवावधि गुरुर्गुरुरस्य ।।७८।।

[1]ईदृशीमित्यादि ।[2] ईदृशीं गिरं [3]वाचमुदीर्योक्त्वा[4] बिडौजा इन्द्रो जोषमास मौनं[5] जग्राह । विशिष्य विशेषं कृत्वा [6]किमपि न बभाषे न[7] उवाच । [8]अर्थित्वमेवोक्तम् । न तु दमयन्तीलक्षणम् । न च त्वरा दर्शिता । युक्तं चैतत्[9] । अत्र[10] चित्रम् आश्चर्यं नाऽस्ति । यतोऽस्य इन्द्रस्य [11]शैशवावधि गुरुर्बृहस्पतिः[12] अभिधाकुशलत्वे वचनचातुर्ये

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

गुरुरुपाध्यायः । कथम् ?। शैशवावधि शिशुत्वं मर्यादीकृत्य बृहस्पतिरेनं पाठयति । तस्मादभिप्रायमप्रतिपाद्य मौनमास्थितः तत्र नाऽऽश्चर्यम् । काव्यलिङ्गमलङ्कारः । आसेति, अस (950) दीप्त्यादानयोश्चेति[13] परोक्षः ।।७८।।

अर्थिनामहृषिताखिलरोमा स्वं नृपः स्फुटकदम्बकदम्बम् ।
अर्चनार्थमिव तच्चरणानां स प्रणामकरणादुपनिन्ये ।।७९।।

[1]अर्थिनामेति । स[2] नृपो नलः स्वमात्मानं तेषां देवानां चरणानाम् अर्चनार्थमिव प्रणामकरणात् उपनिन्ये । किं भूतमात्मानम् ?। स्फुटानां विकसितानां कदम्बकुसुमानां कदम्बं समूहम् । किं भूतः ?। अर्थिनो नाम्ना शब्देन श्रुतेनैव[3] हृषितान्यखिलानि रोमाणि यस्य स तथा । रोमाञ्चेन गात्रं कदम्बसदृशं जातम् । अतो नमस्कुर्वतः पूजा बभूव[4] ।।७९।।

दुर्लभं दिगधिपैः किममीभिस्तादृशं कथमहो मदधीनम् ।
ईदृशं मनसिकृत्य विरोधं नैषधेन समशायि चिराय ।।८०।।

[1]दुर्लभमिति । नैषधेन ईदृशं विरोधं मनसिकृत्य चिराय समशायि सन्देहः कृतः । ईदृशं [2]कीदृशमित्याह—अमीभिर्दिशाम् अधिपैः किं वस्तु दुर्लभम् ।[3] अहो आश्चर्यं[4] ममाधीनं कथं यन्मयि अर्थितां कुर्वन्ति ?। इति विमृष्टम् । अनत्याधान उरसिमनसी (पा° I. iv· 75) ति विभाषया कृञि गतिसंज्ञायां, ते प्राग्धातोरि–(पा° I. iv. 84) ति प्राक्प्रयोगे, कुगतिप्रादय (पा° II. ii. 18) इति समासे ल्यप् आदेशः । अनत्याधानमुपश्लेषणम् । तत्र गतिसंज्ञाभावात् उरसि कृत्वा पाणिं शेते इति ल्यबभावः[5] ।।८०।।

जीवितावधि वनीयकमात्रैर्याच्यमानमखिलैः सुलभं यत् ।
अर्थिने परिवृढाय सुराणां किं वितीर्य परितुष्यतु चेतः ।।८१।।

जीवितावधीति ।[1] यत् जीवितावधि प्राणपर्यन्तम् अखिलैरपि वनीयकमात्रैरर्थिमात्रैर्याच्यमानं वस्तु मम पार्श्वात् सुलभम् । तत्किं वस्तु सुराणां परिवृढाय अर्थिने इन्द्राय वितीर्य चेतः परितुष्यतु । [3]अर्द्धद्वयव्यत्यासेन यच्छब्दस्य उत्तरवाक्यता व्याख्येया[4] ।।८१।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

भीमजा च हृदि मे परमास्ते जीवितादपि धनादपि गुर्वी ।
न स्वमेव मम साऽर्घति यस्याः षोडशीमपि कलां किल नोर्वी ।।८२।।

भीमजा[1] चेति । मम हृदि भीमजा च आस्ते । परं जीवितादपि धनादपि [2]गुर्वी गुरुतरा अधिका । अतो अदेया किं च सा मम स्वमेव [3]वित्तमेव न भवति । स्वस्वामिभावाददेयैव सा । अतः तत्र शङ्कैव नाऽस्ति । यस्याः किल उर्वी पृथ्वी षोडशीमपि कलाम् अंशं न अर्घति । न षोडशभागस्याऽपि [4]मूल्यं लभते । मदीयं च पृथ्वी स्वम् । ततोऽस्वं न देयम्[5] ।।८२।।

मीयतां कथमभीप्सितमेषां दीयतां कथमयाचितमेव ।
तं धिगस्तु कलयन्नपि वाञ्छामर्थिवागवसरं सहते यः ।।८३।।

[1]मीयतामिति । एषां देवानाम् अभीप्सितम् इष्टं कथं मीयताम् । कथं च मया अयाचितमेव तत् दीयताम् । यतः तं पुरुषं धिक् अस्तु । स निन्द्यः । यो वाञ्छां कलयन्नपि अर्थिनां वाचः प्रार्थनाया[3] अवसरं सहते प्रतीक्षते[4] ।।८३।।

प्रापितेन चटुकाकुविडम्बं लम्भितेन बहुयाचनलज्जाम् ।
अर्थिना यदघमर्जति दाता तन्न लुम्पति विलम्ब्य ददानः ।।८४।।

[1]प्रापितेनेति । एवंविधेन अर्थिना दाता यत् अघं पापम् अर्जति । किं भूतेन ?। चटूनां[2] चाटुवाक्यानां काकुवाक्यानां च [3]विडम्बं विगोपकं प्रापितेन दैन्यं वादितेन । तथा बहु अतिशयेन याचनलज्जां लम्भितेन [4]तत्पापं विलम्ब्य[5] विलम्बं कृत्वा ददानः दाता लुम्पति[6] । अधिकस्य सुकृतस्य का वार्त्ता[7] ।।८४।।

यत्प्रदेयमुपनीय वदान्यैर्दीयते सलिलमर्थिजनाय ।
सार्थनोक्तिविफलत्वविशङ्कात्रासमूर्च्छदपमृत्युचिकित्सा ।।८५।।

[1]यत्प्रदेयमिति । यद्वदान्यैर्दातृभिः प्रदेयं वस्तु उपनीय उपढौक्यम् अर्थिजनाय सलिलं सङ्कल्पोदकं दीयते । सा अर्थनोक्तेः प्रार्थितस्य या विफलत्वस्य विशङ्का[2] तस्याः त्रासेन मूर्च्छन् प्रवृद्धो योऽपमृत्युः अकाले मरणं तस्य चिकित्सा औषधोपचारप्रतिकारः । मूर्च्छायाम् उदकसेकः क्रियते[1] ।।८५।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

अर्थिने न तृणवद्धनमात्रं किं तु जीवनमपि प्रतिपाद्यम् ।
एवमाह कुशवज्जलदापी द्रव्यदानविधिरुक्तिविदग्धः ।।८६।।

[1]अर्थिने न तृणवदिति । द्रव्यदानस्य विधिः इति कर्तव्यताशास्त्रं कुशवत् जलं दापयतीत्येवंशील: दर्भयुक्तो दापयिता सन् एवमाह इत्थं वदति । किं भूतः ? । उक्तिषु विदग्धः वचनभङ्गिकुशलः । इतीति किम् ?। अर्थिने याचकाय न केवलं धनमात्रं प्रतिपाद्यं किं तु जीवनमपि प्राणधारणमपि देयम् । कुशेन तृणं लक्ष्यते । जलेन जीवितम् । जीवन-शब्द उदकवाची च । जलदायीति वा पाठः । तदा जलं ददातीत्ये-वंशीलः । अन्तर्भूतकारितार्थः । परं दापीति पाठो रम्य[2] ।।८६।।

पङ्कसङ्करविगर्हितमर्हं न श्रियः कमलमाश्रयणाय ।
अर्थिपाणिकमलं विमलं तद्वासवेश्म विदधीत सुधीस्तत् ।।८७।।

[1]पङ्कसङ्करेति । श्रियो लक्ष्म्याः आश्रयणाय कमलं पद्मं न अर्हं न योग्यम् । यतः पङ्कस्य कर्दमस्य सङ्करेण विगर्हितं निन्द्यम् । पङ्कादुत्पन्नत्वात् । तत्तस्मात् सुधीर्विद्वान् अर्थिनः पाणिमेव कमलं [2]विमलं मलरहितं तस्याः श्रियो वासवेश्म विदधीत [3]कुर्वीत ।।८७।।

याचमानजनमानसवृत्तेः पूरणाय बत जन्म न यस्य ।
तेन भूमिरतिभारवतीयं न द्रुमैर्न गिरिभिर्न समुद्रैः ।।८८।।

[1]याचमानेति । बत खेदे ।[2] यस्य पुंसो जन्म [3]याचमानजनस्य मानसवृत्तेरभिलाषस्य पूरणाय न भवति तेनैव पुरुषेण इयं भूमिः अति-भारवती । न द्रुमैर्भारवती[4] न गिरिभिर्न समुद्रैश्च[5] ।।८८।।

मा धनानि कृपणः खलु जीवंस्तृष्णयाऽर्पयतु जातु परस्मै ।
तत्र चैष कुरुते मम चित्रं यत्तु नार्पयति तानि मृतोऽपि ।।८९।।

मा[1] धनानीति । खलु युक्तं कृपणः अदाता जीवन् सन् जातु परस्मै धनानि माऽर्पयतु । कया ?। तृष्णया । तत्र च पुनः एष कृपणो मम चित्रम् आश्चर्यं कुरुते । यत्पुनः तानि धनानि मृतोऽपि[2] नाऽर्पयति । अथ च नृपस्येदं नार्पम् । तस्येदमि (पा° IV. iii. 120) त्यण् । नार्पं द्रव्यं करोति । तत्करोती (पा° VII. iv. 97–ग°) त्यादिना इत् । कृपणस्य मृतस्य द्रव्यं नृपो[3] गृह्णाति । नार्पयतीति श्लेषः[4] ।।८९।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

मामभीभिरिह याचितवद्भिर्दातृजातमवमत्य जगत्याम् ।
यद्यशो मयि निवेशितमेतन्निष्क्रयोऽस्तु कतमस्तु तदीयः ।।६०।।

[1]मामभीभिरिहेति । अमीभिर्देवैर्मयि विषये यदेतद्यशो[2] निवेशितम् । [3]कीदृशैः ?। मामेवेह याचितवद्भिः । किं कृत्वा ?। जगत्यां दातॄणां जातं समूहम् अवमत्य ।[4] तदीयस्तस्य यशः निष्क्रयस्तु पुनः कतमोऽस्तु[5] ।।६०।।

लोक एष परलोकमुपेता हा विहाय निधने धनमेकः ।
इत्यमुं खलु तदस्य निनीषत्यर्थिबन्धुरुदयद्दयचित्तः ।।६१।।

लोक[1] एष इति । अर्थी एव बन्धुः इति कारणात् खलु शङ्के तत् [2]अस्य लोकस्य धनम् अमुं परलोकं निनीषति । द्विकर्मको नयति । किं भूतम् ?। उदयद्दयं[3] चित्तं यस्य स तथा । [4]इतीति किम् ?। यतः हा कष्टम् । एष सर्वोऽपि लोकः निधने मरणे प्राप्ते [5]सति धनं विहाय एकः एकाकी परलोकम् उपेता गमिष्यति[6] ।।६१।।

दानपात्रमधमर्णमिहैकग्राहि कोटिगुणितं दिवि दायि ।
साधुरेति सुकृतैर्यदि कर्तुं पारलौकिककुसीदमसीदत् ।।६२।।

[1]दानपात्रमिति । दानपात्रम् अधमर्णम् ऋणग्राहकम् ।[2] किं भूतम् ?। इह लोके एकगुणग्राहि परं दिवि परलोके कोटिगुणितं दायि दास्यति । भविष्यति गम्यादय (पा° III. iii. 3) इति णित् । अकेनोर्भविष्यदाधमर्ण्ययो (पा° II. iii. 70) रिति कर्मषष्ठ्या अभावः । ततश्च यदीदृशं पारलौकिकं कुसीदं वृद्धिजीवनं सुकृतैः असीदत् कर्तुम् अविनश्यत् । कर्तुम् एति जानाति, तदा साधुरेव एति जानाति, योऽर्थिभ्यो दत्ते । नाऽन्यो दाता[3] ।।६२।।

एवमादि स विचिन्त्य मुहूर्तं तानवोचत पतिर्निषधानाम् ।
अर्थिदुर्लभमवाप्य सहर्षान् याच्यमानमुखमुल्लसितश्रि ।।६३।।

[1]एवमादीति । निषधानां पतिः [2]मुहूर्तं यावत् एवमादि विचिन्त्य तान् देवान् अवोचत् । किं विशिष्टान् ?। याच्यमानस्य[3] नलस्य मुखम् उल्लसितश्रि सश्रीकम् अवाप्य दृष्ट्वा सहर्षान् । किं विशिष्टम् ?। अर्थिभिर्दुर्लभम् । [4]याचमानस्य हि मुखं कलुषं भवति[5] ।।६३।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

नास्ति जन्यजनकव्यतिभेदः सत्यमन्नजनितो जनदेहः ।
वीक्ष्य वः खलु तनूममृतादां दृङ्निमज्जनमुपैति सुधायाम् ।।६४।।

नास्ति[1] जन्येति । तावत् जन्यजनकयोः कार्यकारणयोः व्यतिभेदः परस्परभेदो नास्ति । अथ[2] च जनानां देहः अन्नेनैव जनितः । नाऽन्येन कारणेन । एतत्सत्यम् । ततश्च[3] वो युष्माकं देवानाम् अमृतादाम्[4] अमृतभोजनतत्परां तनूं शरीरं वीक्ष्य खलु मन्ये[5] मम दृक् दृष्टिः सुधायां निमज्जनम् उपैति । भगवच्छरीरममृतमेव । अथवा[6] अयम् अन्नेन भोजनेन जनितो जनदेहः नास्ति । अविद्यमानो जन्यजनकयोर्व्यतिभेदो यत्र स तथा । एतत्सत्यमेव । ततश्च युष्मच्छरीरेषु दृष्टेषु समामृतमज्जनं दृष्टिः प्राप[7] ।।६४।।

मत्तपः क्व नु तनु क्व फलं वा यूयमीक्षणपथं व्रजथेति ।
ईदृशं परिणमन्ति पुनर्नः पूर्वपुरुषतपांसि जयन्ति ।।६५।।

[1]मत्तपः क्वेति । मम तपः क्व नु अतितरां तनु[2] स्वल्पं वा अद्य[3] यूयं देवा ईक्षणपथं लोचनविषयं व्रजथ इति फलं क्व ?। महदन्तरम् ।[4] एतावन्मात्रेण तपसा महाफलम् इदं भवति। परं पुनः नोऽस्माकं [5]पूर्वपूरुषाणां तपांसि जयन्ति । किं कुर्वन्ति ?। ईदृशं युष्मद्दर्शनलक्षणं फलं परिणमन्ति ।[6] पूर्वजानां तपोभिरिदं जातम्[7] ।।६५।।

प्रत्यतिष्ठिपदिमां खलु देवीं कर्म सर्वसहनव्रतजन्म ।
यूयमप्यहह पूजनमस्या अन्निजैः सृजथ पादपयोजैः ।।६६।।

[1]प्रत्यतिष्ठिपदिति । खलु निश्चितम् । सर्वस्य भारादेः सहनमेव व्रतं तस्माज्जन्म यस्य तत्तथा । तादृक् कर्म सुकृतम् इमां देवीं [2]प्रत्यतिष्ठिपत् देवीत्वं चकार । अहह आश्चर्ये । यत् यूयमपि[4] हे देवाः अस्याः पृथिव्या निजैः पादपयोजैः पूजनं सृजथ ।[5] देवानां पादाः पृथिव्यां[6] किल न लगन्ति[7] ।।६६।।

जीवितावधि किमप्यधिकं वा यन्मनीषितमितो नरडिम्भात् ।
तेन वश्चरणमर्चतु सोऽयं ब्रूत वस्तु पुनरस्तु किमीदृक् ।।६७।।

[1]जीवितावधीति । जीवितावधि प्राणादानं यावत् यत् किमपि ततोऽप्यधिकं वा इतो मल्लक्षणात् नरडिम्भात् मनुष्यमात्रात् बालात् भवद्भिर्मनीषितं वाञ्छितम् । तेनाऽभिलषितेन वो युष्माकं सोऽयं

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

मल्लक्षणो जनश्चरणम् अर्चतु । यूयं ब्रूत कथयत ईदृक् वस्तु पुनः किम् अस्तु[2] ।।९७।।

एवमुक्तवति वीतविशङ्के वीरसेनतनये विनयेन ।
वक्रभावविषमामथ चक्रः कार्यकैतवगुरुर्गिरमूचे ।।९८।।

[1]एवमुक्तवतीति । अथ शक्रः वीरसेनतनये नले विनयेन एवमुक्तवति सति गिरम् ऊचे । किं भूताम् ?। [2]वक्रभावेन कौटिल्येन विषमाम् । किं भूतः ?। कार्यस्य कैतवे च्छले गुरुः । किं भूते नले ?।[3] वीता विशङ्का यस्य तत्र तथा[4] ।।९८।।

पाणिपीडनमहं दमयन्त्याः कामयेमहि महीमिहिकांशो ।
दूत्यमत्र कुरु नः स्मरभीतिं निर्जितस्मर ! चिरस्य निरस्य ।।९९।।

[1]पाणिपीडनेति । हे महीमिहिकांशो ! भूचन्द्र ! वयं दमयन्त्याः पाणिपीडनमहं [2]विवाहोत्सवं कामयेमहि । त्वम् अत्र नोऽस्माकं दूत्यं कुरु । किं कृत्वा ?। चिरस्य स्मरभीतिं निरस्य । हे निर्जितस्मर !।[3] °दूताद्यच्च (सि. है VII. i. 63) इति यप्रत्यये [4]जित्वाभावात् वृद्धेरभावः[5] ।।९९।।

आसते शतमधिक्षिति भूपास्तोयराशिरसि ते खलु कूपाः ।
किं ग्रहा दिवि न जाग्रति ते ते भास्करस्य कतमस्तुलयाऽऽस्ते ।।१००।।

[1]आसते शतमिति । हे नल! अधिक्षिति पृथिव्यां शतं भूपाः आसते । त्वं तोयराशिः असि । ते खलु कूपाः राजानः । किं ग्रहाः चन्द्रादयस्ते ते बहवः प्रसिद्धा दिवि न जाग्रति न स्फुरन्ति । तु पुनः भास्करस्य [2]तुलया सदृशः कतम आस्ते[3] ।।१००।।

विश्वदृश्वनयना वयमेव त्वद्गुणाम्बुधिमगाधमवेम ।
त्वामिहैवमनिवेश्य रहस्ये निर्वृतिं न हि लभेमहि सर्वे ।।१०१।।

[1]विश्वदृश्वेति । वयमेव तव गुणाम्बुधिम् अगाधम् अवेम[2] जानीमः ।[3] कीदृशाः ?। विश्वं दृष्टवन्ति विश्वदृश्वानि नयनानि येषां ते तथा । दृशेः क्वनिप् (पा° III. ii. 94) । ततः त्वाम् इह एवं रहस्ये गुह्यकथने अनिवेश्य सर्वे वयं[4] निर्वृतिं सन्तोषं हि निश्चितं न लभेमहि[5] ।।१०१।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

शुद्धवंशजनितोऽपि गुणस्य स्थानतामनुभवन्नपि शक्रः ।
क्षिप्नुरेनमृजुमाशु सपक्षं सायकं धनुरिवाऽजनि वक्रः ।।१०२।।

[1]शुद्धवंशेति । शक्र इन्द्रः वक्रः कौटिल्ययुक्तो अजनि । किं भूतः ?। एनं नलम्[2] आशु क्षिप्नुः क्षेप्तुकामः । [3]दमयन्ती भविष्यतीति । स्वीकारसहितं दूतत्वे प्रेरयितुकामः । किं भूतम् ?। सपक्षम् । साध्य-समानधर्मधर्मि सपक्षः (न्या॰ सा॰ P. 4) । यतः ऋजुं सरलबुद्धिम् । यः किल सरलः स परैः[4] क्षिप्यते । पुनः किं भूतः ?। शुद्धे वंशे[5] जनितोऽपि तथा गुणस्य[6] ऐश्वर्यादिः स्थानताम् अनुभवन्नपि । किमिव ?। धनुरिव । यथा धनुः सपक्षं पक्षैर्वाजैः सहितं[7] [8]ऋजुं सायकं वाणं क्षिप्नु प्रेरयितृ सत् वक्रं भवति । तदपि शुद्धे वंशे जनितं स्यात् । तथा गुणस्य मौर्व्याः स्थानताम् अनुभवति[9] ।।१०२।।

तेन तेन वचसैव मघोनः स स्म वेद कपटं पटुरुच्चैः ।
आचरत्तदुचितामथ वाणीमार्जवं हि कुटिलेषु न नीतिः ।।१०३।।

तेन[1] तेनेति । स नलस्तेन मघोन इन्द्रस्य [2]वचसैव कपटं छलं वेद स्म [3]जज्ञौ । अथ नलस्तस्य कपटस्य उचितां वाणीम् आचरत्[4] । हि यतः कुटिलेषु[5] आर्जवम् ऋजुस्वभावता नीतिर्न भवति ।।१०३।।

सेयमुच्चतरता दुरितानामन्यजन्मनि मयैव कृतानाम् ।
युष्मदीयमपि या महिमानं जेतुमिच्छति कथापथपारम् ।।१०४।।

[1]सेयमुच्चतरतेति । हे देवा ![2] सा इयं मया एव अन्यजन्मनि कृतानां दुरितानाम् उच्चतरता आधिक्यं या[3] दुरिताधिकता युष्मदीयमपि महिमानं जेतुमिच्छति । किं भूता ?। कथापथस्य पारं[4] वार्त्तामार्गं पारयति समाप्तिं नयति । कथाया अगोचरं[5] युष्मदीयाऽऽज्ञा यत्कर्तुं न शक्यते तद्दुरितानां फलमिति भावः । इत्थं वा महिमजया यूयम् अर्थिनोऽहं च प्रार्थनीय इति चेत् स्यात् तदा भवतां महिमा जितः स्यात् । तदेतदसम्बद्धत्वात् न घटते एव। एवं हि सत्यहं गुरुकृतः यूयं च लघूकृताः इत्यर्थः[6] ।।१०४।।

वित्थ चित्तमखिलस्य न कुर्यां धुर्यकार्यपरिपन्थि तु मौनम् ।
ह्रीगिरास्तु वरमस्तु पुनर्मा स्वीकृतैव परवागपरास्ता ।।१०५।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

वितथ[1] चित्तमिति । यूयं यद्यपि देवत्वात् अखिलजनस्य चित्तं वितथं जानीथ । तु पुनस्तथाप्यहं मौनं [2]न कुर्याम् । किं भूतम् ?। धुर्यस्य मुख्यस्य कार्यस्य परिपन्थि वैरिभूतम् । यतः वरं गिरा कृत्वा ह्रीर्लज्जाऽप्यस्तु । पुनः परस्य वाक् वाणी अपरास्ता अनिराकृता सती स्वीकृतैव मा अस्तु । परेण याचिते सति मौनं क्रियते तदा तदङ्गीकृतमिव प्रतिभाति । ततो लज्जामङ्गीकृत्य [3]वाचा [4]निराकरणीयम्[5] ।।१०५।।

यन्मतौ विमलदर्पणिकायां सन्मुखस्थमखिलं खलु विश्वम् ।
तेऽपि किं वितरथेदृशमाज्ञां या न यस्य सदृशी वितरीतुम् ।।१०६।।

यन्मतौ[1] विमलेति । खलु निश्चितम् ।[2] येषां मतौ यन्मतौ विमलदर्पणिकायाम् अखिलं विश्वम् । [3]तत्त्वं पाठान्तरम् । सन्मुखस्थं प्रतिबिम्बमित्यर्थः ।[4] तेऽपि ईदृशमनुचितामाज्ञां किं वितरथ दत्थ[5] । तदेवाऽनौचित्यं दर्शयति । या आज्ञा यस्य[6] वितरीतुं[7] दातुं न[8] सदृशी न योग्या । अज्ञानानामेवैतदुचितम् । ननु विश्वव्यवहारदृश्वनामित्यर्थः[9] ।।१०६।।

यामि यामिह वरीतुमहो तद्दूततां नु करवाणि कथं वः ।
ईदृशां न महतां बत जाता वञ्चने मम तृणस्य घृणाऽपि ।।१०७।।

यामि[1] यामिहेति । [2]अहो अहम् इह स्वयंवरे[3] यां वरीतुं यामि । तस्या दूततां वो युष्माकं कथं करवाणि ?। [4]बत खेदे । ईदृशां प्रसिद्धानां महतां[5] वो युष्माकं मम तृणस्य नलस्य । अथ च तृणप्रायस्य वञ्चने घृणा जुगुप्साऽपि न जाता[6] ।।१०७।।

उद्भ्रमामि विरहान्मुहुरस्या[1] मोहमेमि च मुहूर्तमहं यः ।
ब्रूत वः प्रभवितास्मि रहस्यं रक्षितुं स कथमीदृगवस्थः ।।१०८।।

[2]उद्भ्रमामीति । अहम् अस्या विरहान्मुहुः उद्भ्रमामि भ्रान्तो भवामि । ग्रथिलो भवामि । मुहूर्तं च पुनः मोहम् एमि आगच्छामि ।[3] यूयं ब्रूत सोऽहं कथम् ईदृगवस्थः उद्भ्रान्तो मूढो वा वो युष्माकं रहस्यं [4]दूत्यं रक्षितुं प्रभवितास्मि । अपि तु न[5] ।।१०८।।

यां मनोरथमयीं हृदि कृत्वा यः श्वसिम्यथ कथं स तदग्रे ।
भावगुप्तिमवलम्बितुमीशे दुर्जया हि विषया विदुषाऽपि ।।१०९।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

यां[1] मनोरथमयीमिति । अहं यां दमयन्तीं हृदि मनोरथमयीं मनः-कल्पितां कृत्वा योऽहं [2]श्वसिमि[3] सोऽहम् अथ पश्चात् तस्याऽग्रे भावस्य चित्तस्य गुप्तिं [4]गोप्यरहस्यम् अवलम्बितुम् [5]आश्रितुं कथम् ईशे समर्थो भवामि । हि यस्मात् विदुषाऽपि विषया दुर्जयाः[6] ॥१०९॥

यामिकाननुपमृद्य च मादृक् तां निरीक्षितुमपि क्षमते कः ।
रक्षिलक्षजयचण्डचरित्रे पुंसि विश्वसिति कुत्र कुमारी ॥११०॥

[1]यामिकानिति । मादृक् वीरः सुभगश्च यामिकान् रक्षकान् अनुपमृद्य अहत्वा तां निरीक्षितुमपि कः क्षमते ?। तथा रक्षिणां लक्षस्य जयेन [2]चण्डचरित्रः तस्मिन् मादृशे पुंसि कुमारी बाला अनभिज्ञा कुत्र कस्मिन् विश्वसिति ?। अपि तु न[3] ॥११०॥

आदधीचि किल दातृकृतार्घं प्राणमात्रपणसीम यशो यत् ।
आददे कथमहं प्रियया तत् प्राणतः शतगुणेन पणेन ॥१११॥

[1]आदधीचीति । [2]यद्यशः प्राणमात्रमेव पणस्य [3]मूल्यस्य सीमा [4]यस्य तत्तथाविधं वर्त्तते । किं भूतम् ?। आदधीचि[5] दधीचिम् ऋषिं [6]मर्यादीकृत्य दातृभिः कृतोऽर्घो मूल्यं यस्य तत्तथा । तेन ऋषिणा प्राणान् दत्त्वा यश उपार्जितम् । तत् यशः अहं प्रियया दमयन्त्या प्राणतः शतगुणेन पणेन मूल्येन कथम् आददे कथं गृह्णामि ?। तस्मादिदं यशो महार्घं ममाऽनेन [7]कार्येण ॥१११॥

अर्थना मयि भवद्भिरिवास्यै कर्तुमर्हति मयाऽपि भवत्सु ।
भीमजार्थपरयाचनवाचा यूयमेव गुरवः करणीयाः ॥११२॥

अर्थना[1] मयीति । मयाऽपि[2] भवत्सु विषये [3]अस्यै दमयन्त्यर्थम् अर्थना याच्ञा कर्तुम् अर्हति योग्यो भवति ।[4] भवद्भिर्मयि विषये अर्थना कर्तुम् अर्हति । अर्थनाशब्दस्य कर्तुंशब्दस्य च भाववचनत्वात्, मया इत्यत्र अनुक्ते कर्तरि तृतीया । न लोकाव्यये (पा° 1I. ii. 69) ति कर्तृषष्ठीप्रतिषेधात् भवद्भिरित्यत्राऽपि कर्तरि तृतीया । अहमपि दमयन्तीं [5]भवतां पार्श्वे प्रार्थयामि । यतो मया भीमजार्थं या परस्य पार्श्वे याचनवाक् परप्रार्थनी[6] वाणी तदर्थं यूयमेव गुरवः करणीयाः । अहं क्षत्रियत्वात् परं न प्रार्थयामि । परं युष्मदीया वाक् मया शिक्षिता । युष्माभिर्देवत्वात् परो न प्रार्थितः । इदानीमेवाऽहं प्रार्थितः । मम च यूयं गुरवः । अतो न लज्जा[7] ॥११२॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

अर्थिताः प्रथमतो दमयन्तीं यूयमन्वहमुपास्य मया यत् ।
ह्रीर्न चेद्व्यतियतामपि तद्वः सा ममाऽपि सुतरां न नदस्तु ।।११३।।

अर्थिता[1] इति । यूयं मया अन्वहम् उपास्यऽऽराध्य प्रथमतो दमयन्तीं यत् अर्थिताः तत् व्यतियतां व्यतिक्रामतां वो युष्माकं चेत् ह्रीर्लज्जा न । तत्तस्मात् ममाऽपि सुतरां[2] सा लज्जा न अस्तु मा भवतु[3] ।।११३।।

कुण्डिनेन्द्रसुतया किल पूर्वं मा वरीतुमुररीकृतमास्ते ।
व्रीडमेष्यति परं मयि दृष्टे स्वीकरीष्यति न सा खलु युष्मान् ।।११४।।

[1]कुण्डिनेन्द्रेति । किल श्रूयते ।[2] कुण्डिनेन्द्रसुतया[3] पूर्वं मां वरीतुम् उररीकृतम्[1] आस्ते । अङ्गीकारः[5] कृतोऽस्ति । परं केवलं मयि दृष्टे सा व्रीडम् एष्यति । खल्विति मन्ये ।[6] युष्मान् न स्वीकरिष्यति[7] ।।११४।।

तत्प्रसीदत विधत्त न खेदं दूत्यमत्यसदृशं हि ममेदम् ।
हास्यतैव सुलभा न तु साध्यं तद्विधित्सुभिरनौपयिकेन ।।११५।।

[1]तत्प्रसीदतेति । तत् यूयं प्रसीदत । खेदं न विधत्त मा कुरुत । हि यतो मम इदं दूत्यम् अतिशयेन असदृशम् । अनौपयिकेन[2] सामादिभिरुपायैर्विना तत्साध्यं विधित्सुभिर्भवद्भिर्लोकमध्ये हास्यता एव सुलभा सुप्रापा । न तु साध्यं दमयन्तीप्राप्तिलक्षणं फलं सुलभम् । उपाया एव औपयिकम्[3] ।।११५।।

ईदृशानि गदितानि तदानीमाकलय्य स नलस्य बलारिः ।
शंसति स्म किमपि स्मयमानः स्वानुगाननविलोकनलोलः ।।११६।।

[1]ईदृशानीति । स बलारिरिन्द्रः तदानीं नलस्य ईदृशानि अनभिमतानि गदितानि जल्पितानि आकलय्य मत्वा [2]किमपि [3]स्मयमानो हसन् सन् शंसति स्म उवाच । किं भूतः ?। स्वकीयानाम् अनुगानां वरुणादीनाम् आननस्य विलोकने लोलः[4] ।।११६।।

नाभ्यधायि नृपते ! भवतेदं रोहिणीरमणवंशभुवेव ।
लज्जते न रसना तव वाम्यादर्थिषु स्वयमुरीकृतकाम्या ।।११७।।

नाभ्यधायीति । हे नृपते ! भवता इदं रोहिणीरमणस्य[2] वंशे भुवा इव उत्पन्नेनेव नाऽभ्यधायि नोक्तम् । [3]यतः तव रसना अर्थिषु स्वयं

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

प्रथमम् [4]उरीकृतकाम्या अङ्गीकृताभिलषिता भूत्वा पश्चात् वाम्यात् प्रातिकुल्यात् न किं लज्जते। अथवा[5] हे नलः! त्वया रोहिणी [6]गौस्तस्या रमणो भर्त्ता बलीवर्दस्तस्य वंशोद्भवेन पशुना इव किं नाऽभ्यधायि ?। यतस्तस्य रसना वाम्यात् वमनं वामः रोमन्थोद्गार-स्तस्य भावस्तत्त्वम्। तस्मान्न लज्जते। प्रथमं गिलति। पश्चादुद्वमति। तथा त्वमपि प्रथममङ्गीकृत्य न कुरुषे[7] ।।११७।।

भङ्गुरं न वितथं न कथं वा जीवलोकमवलोकयसीमम्।
येन धर्मयशसी परिहातुं धीरहो चलति धीर! तवाऽपि ।।११८।।

[1]भङ्गुरमिति। त्वम् इमं जीवलोकं संसारं भङ्गुरं विनश्वरं वितथं[2] मिथ्याभूतं वा[3] अनिर्वचनीयत्वात् कथं न विलोकयसि। किं न विचारयसि। अहो धीर! येन कारणेन तवाऽपि धीर्बुद्धिर्धर्मं यशश्च[4] धर्मयशसी ते[5] परिहातुं [6]चलति[7] ।।११८।।

कः कुलेऽजनि जगन्मुकुटे वः प्रार्थकेप्सितमपूरि न येन।
इन्दुरादिरजनिष्ट कलङ्की कष्टमत्र स भवानपि मा भूत् ।।११९।।

कः[1] कुले इति। वो युष्माकं जगतां मुकुटभूते कुले एवं को अजनि। अपि तु न कोऽपि। येन प्रार्थकस्य ईप्सितं न अपूरि। युष्माकम् आदिः पूर्वजः इन्दुः कलङ्की अजनिष्ट। कष्टं[2] भवानपि स कलङ्कयुक्तो मा भूत्। अर्थिविमुखीकरणात्[3] ।।११९।।

याऽपदृष्टिरपि या मुखमुद्रा याचमानमनु या च न तुष्टिः।
त्वादृशस्य सकलः स कलङ्कः शीतभासि शशकः परमङ्कः ।।१२०।।

[1]याऽपदृष्टिरिति। या याचमानम् अनु लक्ष्यीकृत्य अपदृष्टिर्विरुद्धा दृष्टिः क्रियते। याऽपि मुखमुद्रा मौनं क्रियते। या च अर्थिनं प्रति तुष्टिः सन्तोषो न क्रियते। स सकलोऽपि त्वादृशस्य महात्मनः कलङ्कः शीत-भासि चन्द्रे परं केवलं शशक एव एकः अङ्को लाञ्छनम्[2] ।।१२०।।

नाऽक्षराणि पठता किमपाठि प्रस्मृतः किमथवा पठितोऽपि।
इत्थमर्थिचयसंशयदोलाखेलनं खलु चकार नकारः ।।१२१।।

[1]नाऽक्षराणीति। हे नल![2] इत्थम् अर्थिनां चयस्य यस्य[3] संशय एव दोला प्रेङ्खोलस्तत्र खेलनं खलु मन्ये[4] नकारश्चकार। सन्देहस्य

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

उभयकोटिविलम्बित्वात्[5]। किं भवता मातृकामध्ये अक्षराणि पठता नकारो न[6] अपाठि। अथवा पठितोऽपि किं प्रस्मृतः विस्मृतः। यत् अर्थिषु निषेधं न ब्रूषे[7] ।।१२१।।

अब्रवीत्तमनलः क्व नलेदं लब्धमुज्झसि यशः शशिकल्पम्।
कल्पवृक्षपतिमर्थिनमित्थं नाऽऽप कोऽपि शतमन्युमिहाऽन्यः ।।१२२।।

[1]अब्रवीत्तमिति। अनलो वह्निस्तमब्रवीत्। हे नल! त्वम् इदं शशिकल्पं लब्धं यशः क्व उज्झसि। एनं कल्पवृक्षस्य पतिं शतमन्युं यज्वानम् इन्द्रम् [2]अर्थिनं त्वत्तोऽन्यः कोऽपि न [3]इह अत्र आप[4] ।।१२२।।

न व्यहन्यत कदाऽपि मुदं यः स्वसदामुपनयन्नभिलाषः।
तत्पदे त्वदभिषेककृतां नः स त्यजत्वसमतामदमद्य ।।१२३।।

न[1] व्यहन्यतेति। यः स्वःसदां देवानामभिलाषः मुदम् उपनयन् कदाऽपि न व्यहन्यत न विहतोऽभूत्।[2] कर्मकर्त्तरि आत्मनेपदम्। तस्याऽभिलाषस्य पदे स्थाने तव अभिषेकं [3]कृतां कुर्वतां नोऽस्माकं सोऽभिलाषः अद्य असमताया मुदं गर्वं त्यजतु। त्वमेवेप्सितं पूरय यथाऽसौ समो न भवति[4] ।।१२३।।

अब्रवीदथ यमस्तमहृष्टं वीरसेनकुलदीप! तमस्त्वाम्।
यत्किमप्यभिबुभूषति तत्किं चन्द्रवंशवसतेः सदृशं ते ।।१२४।।

[1]अब्रवीदथेति। अथ यमस्तं नलम्[2] अहृष्टमनसम् अब्रवीत्। हे वीरसेनकुलस्य दीप। यत् किमपि[4] ते औपाधिकमपि तमः त्वाम्[5] अभिबुभूषति तत् किं[6] चन्द्रवंशवसतेः ते[7] तव सदृशम्?। अपि तु न। तमसा दीपो नाऽभिभूयते। चन्द्रान्वयोत्पन्नश्च। तमोऽज्ञानं च। दीपस्य हि स्वाभाविकस्तावन्न तमोऽन्वयः। चन्द्रवंशोत्पन्नस्य[8] न कारणवशात् औपाधिकः पुनः कश्चिदयमुपाधिनिरासेन निरसनीयः। त्रिधैव हि गुणान्वयो दृष्टः–यथा स्वभावादंशुषु शौक्ल्यं, पटे च कारणवशात्। [9]स्फटिके लौहित्यं जपाकुसुमोपाधेः। अत एवाऽभिषुभूषतीति इच्छा। सन्प्रयोग औपाधिकत्वज्ञापनाय[10] ।।१२४।।

रोहणः किमपि यः कठिनानां कामधेनुरपि या पशुरेव।
नैतयोरपि वृथाऽभवदर्थी हा विधित्सुरसि वत्स! किमेतत्।।१२५।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

रोहण:[1] किमपीति ।[2] यो रोहण: कठिनानां किमपि या कामधेनुरपि पशुरेवेति । पूर्ववाक्यद्वये यच्छब्दप्रयोगात् एतयोरित्यनेनोत्तरवाक्ये तच्छब्दार्थमाह । अथवा रोहण इत्येवं पूर्ववाक्यम् । य: कठिनानां किमपीति उत्तरम् । एवं द्वितीयार्द्धेऽपि तदा एतयोरिति प्रकृतिपरामर्शात् । तदयमर्थ:—यो रोहणाचल: श्रूयते स कठिनानां वस्तूनां मध्ये किमपि अतिशायी तथा या कामधेनुरपि सा पशुरेव । तत्[3] एतयोर्द्वयोरपि जडयोर्विषयेऽर्थी वृथा [4]नाऽभवत् । हा वत्स ! किम् एतत् त्वं विधित्सुरसि[5] ।।१२५।।

याचितश्चिरयति क्व नु धीर: प्राणने क्षणमपि प्रतिभू: क: ।
शंसति द्विनयनी दृढनिद्रां द्राङ्निमेषमिषघूर्णनपूर्णाम् ।।१२६।।

याचित[1] इति । धीरो याचित: नु [2]प्रश्ने क्व चिरयति ? न क्वाऽपि । यत: क्षणमपि प्राणने क: प्रतिभू: । जीवितं चञ्चलम् । इयं द्वयोर्नयनयो: समाहार: द्विनयनी दृढनिद्रां मरणलक्षणां शंसति । किं भूताम् ?। द्राक् झटिति निमेषमिषेण यत् घूर्णनं तेन पूर्णाम् । निद्राया: [3]पूर्वं रूपं घूर्णनम्[4] ।।१२६।।

अभ्रपुष्पमपि दित्सति शीतं सार्थिना विमुखता यदभाजि ।
स्तोककस्य खलु चञ्चुपुटेन म्लानिरुल्लसति तद्घनसङ्घे ।।१२७।।

अभ्रपुष्पमपीति । [2]यत् खलु स्तोककस्य चातकस्य [3]चञ्चुपुटेन अर्थिना[4] विमुखता अभाजि । सेतिशब्दमात्रजनिता । तथा च न कुलं[5] ब्रूयादि त्यादिस्मरणम् । तथाऽष्टमीनवमीचतुर्दशीषु देवीतिथिषु पिष्टस्य पेषणबन्धनादि[6] न कुर्वन्ति । तत्र हि अपभ्रंशभाषया पीठदलनं पीठबन्धनमित्यादिव्यवहार: । पीठस्य च देवीसम्बन्धत्वम् । अत: शब्दमात्रादपि दोषोऽस्त्येव । तत् घनानां सङ्घे मेघवृन्दे म्लानि: कालिमा उल्लसति । किं भूते ?। शीतम् अभ्रपुष्पमपि दुष्प्रापजलं दित्सति दातुमिच्छत्यपि । अथवाऽऽकाशकुसुममपि दित्सति । वे: पक्षिणो मुखता अभाजि । अत एव स्तोकक: । यो दातुमिच्छत्यपि विमुख: अतिस्वल्प: स्तोकं कमुदकं प्राप्तियोग्यं यस्य स तथा[7] ।।१२७।।

ऊचिवाननुचितमक्षरमेनं पाशपाणिरपि पाणिमुदस्य ।
कीर्तिरेव भवतां प्रियदारा दाननीरझरमौक्तिकहारा: ।।१२८।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]ऊचिवानिति । पाशपाणिर्वरुणोऽपि एनं नलम् उचितम् अक्षरम् ऊचिवान् । किं कृत्वा ?। पाणिं हस्तम् उदस्य ऊर्ध्वं कृत्वा । भवतां सोमवंशोत्पन्नानां कीर्तिरेव प्रिया दाराः कलत्रम् । किं भूताः ?। दाननीरस्य झरः प्रवाहः स एव मौक्तिकहारः येषां ते तथोक्ताः[2] ।।१२८।।

चर्मवर्म किल यस्य नभेद्यं यस्य वज्रमयमस्थि च तौ चेत् ।
स्थायिनाविह न कर्णदधीची तन्न धर्ममवधीरय धीर ! ।।१२९।।

[1]चर्मवर्मेति । [2]यस्य कर्णस्य चर्मैव त्वगेव वर्म सन्नाहं नभेद्यम् । तथा यस्य दधीचेर्ऋषेर्वज्रमयं[3] वज्रम् अस्थि च । किलेति श्रूयते । चेत्[4] तौ कर्णदधीची इह न स्थायिनौ विनश्वरौ । हे धीर ! तत् त्वं धर्मं न अवधारय माऽवगणय[5] ।।१२९।।

अद्य यावदपि येन निबद्धौ न प्रभू विचलितुं बलिविन्ध्यौ ।
आस्थितावितथतागुणपाशस्त्वादृशा स विदुषा दुरपासः ।।१३०।।

अद्य[1] यावदिति । स आस्थितस्याऽङ्गीकृतस्य अवितथता सत्यता स एव[2] गुणः तल्लक्षणः पाशः त्वादृशा विदुषा दुरपासः अपासितुं निराकर्तुमशक्यः । येन सत्यतापाशेन निबद्धौ बलिर्दानवो विन्ध्यः पर्वतश्च विचलितुं न प्रभू न समर्थौ । बलिः पाताले स्थितो विन्ध्यश्च न वर्द्धते । अथवा अवितथतागुणपाशः दुरपासः आस्थित । क्रियापद-मिदम् । प्रतिज्ञातवान् इत्यर्थः । तदा बलिविन्ध्याविति कर्मत्वम् । येन निबद्धौ बलिविन्ध्यौ चलितुं न प्रभू । आस्थितः सर्वः कोऽपि [3]जन इति शेषः । पुराणेषु तथा दर्शनात् । समवप्रविभ्य (पा॰ I. iii. 22) इति सूत्रे आङः स्थः प्रतिज्ञाने (वा॰ 621) इति वक्तव्यमित्यात्मनेपदमिति । अपि व्याख्यान्तरम्[4] ।।१३०।।

प्रेयसी जितसुधांशुमुखश्रीर्या न मुञ्चति दिगन्तगताऽपि ।
भङ्गिसङ्गमकुरङ्गदृगर्थे कः कदर्थयति तामपि कीर्तिम् ।।१३१।।

[1]प्रेयसीति । हे नल ! भङ्गीभङ्गुरः [2]सङ्गमो यस्याः सा चासौ कुरङ्गदृक् दमयन्ती तदर्थे तामपि कीर्तिं [3]कः कदर्थयति विनाशयति । या कीर्तिः प्रेयसी । तथा[4] जितसुधांशुमुखश्रीर्यस्याः कीर्तेर्मुखं प्रारम्भः । या च दिगन्तगताऽपि पुरुषं न मुञ्चति । इयं कुत्सितरङ्गा दृक् यस्याः ।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

ततश्च अप्रिया विरूपा च। संयोगा विप्रयोगान्ता (चा° VIII. 59) इति न्यायेन क्षणसंयोगाः[5] ॥१३१॥

यान्परं प्रति परेऽर्थयितारस्तेऽपि यं वयमहो स पुनस्त्वम्।
नैव नः खलु मनोरथमात्रं शूर! पूरय दिशोऽपि यशोभिः ॥१३२॥

[1]यान्परमिति। हे शूर! पुनः स त्वम् अहो खलु नैव केवलं नोऽस्माकं मनोरथमात्रं पूरय। किञ्च दिशोऽपि [4]यशोभिः पूरय। यं यं त्वां प्रति तेऽपि वयम् अर्थयितारः। अस्मान् प्रति परं केवलं परेऽन्ये लोका अर्थयितारः। अन्येषां वयम् अभिलाषं पूरयन्तोऽपि त्वां प्रार्थयामः। तस्माद् दूत्यं कुरु ॥१३२॥

अर्थितां त्वयि गतेषु सुरेषु म्लानदानजनितोरुयशः श्रीः।
अद्य पाण्डु गगनं सुरशाखी केवलेन कुसुमेन विधत्ताम् ॥१३३॥

[1]अर्थितां त्वयीति। हे नल! अद्य सुरशाखी कल्पवृक्षः केवलेन कुसुमेनैव पाण्डु गगनं विधत्ताम्। न तु कीर्त्याऽपि। किं भूतः?। यतः म्लाना विनष्टा दानजनिता ऊरुर्यशःश्रीः यस्य स तथा। केषु सत्सु?। सुरेषु[2] त्वयि अर्थितां गतेषु सत्सु। यदि कल्पवृक्षो दाता भवति तत्कथं देवा नलं प्रार्थयन्ते इति प्रवादात् गतकीर्तिः[3] ॥१३३॥

प्रवसते भरतार्जुनवैन्यवत्स्मृतिधृतोऽपि नल! त्वमभीष्टदः।
स्वगमनाफलतां यदि शङ्कसे तदफलं निखिलं खलु मङ्गलम् ॥१३४॥

[1]प्रवसते इति। हे नल! त्वं [2]प्रवसते ग्रामान्तरं गच्छते पुरुषाय[3] भरतार्जुनवैन्यवत् स्मृतिं धृतोऽपि अभीष्टफलदः। त्वं यदि स्वगमनस्य[4] अफलतां शङ्कसे तत् खलु शङ्के[5] निखिलम्[6] अन्यदपि शास्त्रोक्तं मङ्गलाचरणम् अफलम्। तस्मान्मङ्गलकरणात्[7] यथानुपपत्त्या[8] तव यात्रा[9] सफलैव। तथा च शास्त्रम्-वैन्यं पृथुं हैहयमर्जुनं च शाकुन्तलेयं भरतं नलं च। एतान्नरो यः स्मरति प्रयाणे तस्यार्थसिद्धिः पुनरागमश्च[10] ॥१३४॥

इष्टिं नः प्रति ते प्रतिश्रुतिरमूद्याद्य स्वराह्लादिनी
धर्मार्थं सृज तां श्रुतिप्रतिभटीकृत्याऽन्विताख्यापदाम्।
त्वत्कीर्तिः पुनती पुनस्त्रिभुवनं शुभ्राद्वयादेशना-
द्द्रव्याणां शितिपीतलोहितहरिन्नामान्वयं लुम्पतु ॥१३५॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

इष्टि नः[1] प्रतीति । या अद्य ते तव नोऽस्माकम् इष्टिम् अभिलाषं प्रति प्रतिश्रुतिरङ्गीकारोऽभूत् । दास्यामीति । किं भूता ?। स्वः स्वर्गस्य आह्लादिनी । त्वं तां[2] धर्मार्थं प्रति श्रुत्या वेदेन सह प्रतिभटीकृत्य प्रतिमल्लां कृत्वा अन्वितं सार्थकम् आख्यापदं नाम यस्याः एवंविधां सृज । यथा [3]वेदवाक्यं सत्यमेव तथा कुरु । अङ्गीकृतस्य दाने धर्मो भवति । अथ च इष्टि यागं प्रति या प्रतिश्रुतिः [4]प्रत्याश्रवणम् अस्तु श्रौषट् इति वाक्यं, तदपि उच्चैरुदात्तः (पा° I. ii. 29), नीचैरुदात्तः (पा° I. ii. 30), समाहारः स्वरितः (पा° I. ii. 31) इति पाठक्रमे प्रथमपठितेन, तथा, ब्रूहिप्रेष्यश्रौषडैवाषडावहानामादे (पा° VIII. iii. 9) रित्युदात्ताधिकारपठितसूत्रविहितेन आद्येन उदात्तेन स्वरेणाऽऽह्लादयति । साऽपि[5] धर्मार्था अपूर्वार्था सान्वया च । यतः श्रुतेः आश्रवणस्य ॐ श्रापयेति अध्वर्युणा उक्तस्य वाक्यस्य समनन्तरम् आग्नीध्रेण ऋत्विजा प्रतिभटीक्रियते । तथा च कात्यायनः-इध्मसंनहतान्यादादौं श्रावयेत्याहाऽस्तु श्रौषट् इत्यग्नीन् (सर्वानु°) इत्यभिधाय एवं सर्वत्राऽश्रुतप्रत्याश्रुतेष्वित्याह । यद्यध्वर्युर्गाढं वदति तदाऽऽग्नीध्रोऽपि उच्चैर्वदति । यदि स उपांशुः तदा परोऽपि मन्दम् इति सादृश्यसान्वयता । पुनः [6]तपकीर्तिः त्रिभुवनं पुनती सती सर्वेषां द्रव्याणां नानाविधानां [7]शिति कृष्णं पीतं लोहितं हरित् एषां नाम्नां[8] शब्दानाम् अन्वयम् अर्थं लुम्पतु । कस्मात् ?। शुभ्रस्य अद्वयस्य[9] एकस्यैव आदेशनात् । शुभ्रवर्णाद्वैतकरणात् ।[10] त्वं नाम्नोऽन्वयं कुरु । ते[11] तव कीर्तिः पुनर्नाम्ना नन्वयं लुम्पतु । अत्र[12] शार्दूलविक्रीडितं [13]वृत्तम् ।।१३५।।

यं प्रासूत सहस्रपादुदभवत्पादेन खञ्जः कथं
स च्छायातनयः सुतः किल पितुः सादृश्यमन्विच्छति ।[1]
एतस्योत्तरमद्य नः समजनि त्वच्चेतसां लङ्घने
साहस्रैरपि पङ्गुरङ्घ्रिभिरभिव्यक्तीभवन्भानुमान् ।।१३६।।

यं [1]प्रासूतेति । स[2] च्छायातनयः शनैश्चरः पादेन खञ्जः कथम् उदभवत् यं शनैश्चरं सहस्रसङ्ख्या[3] पादाः किरणा यस्य स श्रीसूर्यः प्रासूत । किल श्रूयते । सुतः पुत्रः पितुः सादृश्यम् अन्विच्छति[4] प्राप्नोति । यस्य पितुः सहस्रं पादाः स[5] कथं पङ्गुरित्यस्य पूर्वपक्षस्य अद्य नोऽस्माकम् उत्तरं सिद्धान्तो भानुमान् श्रीसूर्यः [6]समजनि । किं कुर्वन् ?। साहस्रैरपि अङ्घ्रिभिः पादैः तव तेजसां प्रतापानां लङ्घने पङ्गुः

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

असमर्थोऽभिव्यक्तीभवन् प्रकटीभवन् । ततो युक्तम् । पङ्गोः श्रीसूर्यस्य पुत्रः शनैश्चरः पङ्गुरित्युत्तरम्[7] ।।१३६।।

इत्याकर्ण्य क्षितीशस्त्रिदशपरिषदस्ता गिरश्चाटुगर्भा
वैदर्भीकामुकोऽपि प्रसभविनिहितं दूत्यभारं बभार ।
अङ्गीकारं गतेऽस्मिन्नमरपरिवृढः सम्भृतानन्दमूचे
भूयादन्तर्धिसिद्धेरनुविहितभवच्चित्तता यत्र तत्र ।।१३७।।

[1]इत्याकर्ण्येति । स क्षितीशो नलः त्रिदशानां परिषदः सभायाः ताः चाटुवाक्यगर्भा गिरः आकर्ण्य वैदर्भीं प्रति कामुकोऽपि स्वयं परं प्रसभं बलाद्विनिहितं दूत्यभारं बभार । अस्मिन्नले अङ्गीकारं गते सति अमरपरिवृढो महेन्द्रः सम्भृतानन्दं यथा भवति एवम् ऊचे तत्र इच्छाया[2] अन्तर्धिलक्षणायाः अदृश्यतायाः सिद्धेः अनुविहितभवच्चित्तता भूयात् । अनुकृतं भवतः चित्तं यथा सिद्धया सा तथा, तस्या भावस्तत्ता । यत्र तवेच्छा तत्र त्वम् अदृश्यो भविष्यसीति[3] वरदानम् । आनन्दाङ्कम् । अत्र[4] स्रग्धरावृत्तम्[5] ।।१३७।।

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
तस्य श्रीविजयप्रशस्तिरचना तातस्य नव्ये महा-
काव्ये चारुणि नैषधीयचरिते सर्गोऽगमत्पञ्चमः[1] ।।१३८।।

[2]श्रीहर्षमिति । तस्य[3] श्रीहर्षस्य [4]महाकाव्ये नव्ये पञ्चमः सर्गोऽगमत् । किं भूतस्य कवेः ? । श्रीविजयप्रशस्तिरचना नाम ग्रन्थस्तस्य तातस्य पितुः । सोऽपि ग्रन्थः कृतः[5] ।।१३८।।

श्रीमानालिगपण्डितः स्वसमयाविर्भूतसर्वाश्रम–
श्चाण्डूपण्डितसंज्ञितं प्रसुषुवे श्रीगौरिदेवी च यम् ।
साम्राज्यं बहुदक्षिणेऽधिगतवान् यो वाजपेयक्रतौ
टीकां पञ्चमसर्गबोध·······य तां नैषधे स व्यधात् ।।१।।

श्रीवैद्यनाथाभिधसूक्तदेवीपदप्रसादोपचितप्रसादैः
पदैरुदाराकृतिभिः प्रक्लृप्तां क्वचित्क्वचित् शोधयति स्म टीकाम् ।।२।।

इति [1]धवलकवास्तव्य–महापण्डित–श्रीचाण्डू–विरचितायां नैषधदीपिकायां [2]टीकायां पञ्चमः सर्गः समाप्त.[3] ।।५।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

टिप्पण

सर्ग–५

1 B नन्दित्वा 2 P1 add. °चतुष्टय° P1 °करणं 4 P1 महाकविरत ऊर्ध्वं ।

1 P2 text मुनि° 2 P1 add. ॐ नमः सरस्वत्यै । 3 P1 यावदित्यादि ।; P2 यावदिति । 4 B महेन्द्रः 5 P1 om. ऋषिः 6 P1 त्रिदशधाम 7 P2 om. तस्मिन्………जगाम 8 P1 add. क्रीडोऽनुसम्परिभ्यश्चे (पा° I. iii. 21) त्यत्र आगमेः क्षमायामित्यात्मनेपदं वक्तव्यम् (वा° 612) । क्षमा उपेक्षा कालहरणम् । ऋकारे समानस्य प्रकृतिभावो विभाषया । स्वागता वृत्तम् ॥१॥

1 P1 नात्र । 2 P1 यथा 3 P1 om. अपि 4 P1 सोऽनुगच्छति 5 P1 add. जगतः पूज्यः । अथ च जगतः सकाशात् गौरववान्; P2 add. तं 6 B यत् 7 P2 om. गौरव° 8 P1 add. विरोधः । सपक्षो गुरुरिति श्लिष्टम् ॥२॥

1 P2 text साधने 2 P1 गच्छतो । 3 P2 om. सता 4 P1 add. साधने 5 B नियंत° 6 P1 सोऽन्य° 7 BP1P2 °जनार्थ; edr. °जनानां 8 P2 योगिनः 9 P1 add. विशेषस्य सामान्येन वैधर्म्येण समर्थनादर्थान्तरन्यास उक्तनिमित्ता विशेषोक्तिर्व्यतिरेकोऽनुप्रासः ॥३॥

1 P1 खण्डि ।; P2 खण्डितेन्द्विति । 2 B विलङ्घते; P2 लम्भते 3 P1 add. ईदुभुवनादि इति पाठे ईदुभुवनं चन्द्रशालाशिरोगृहमिति यावत् । आदिशब्देन गिरिशिखरादीनां ग्रहणम् । ईद्रभुवनादीति पाठान्तरम् । 4 B यतिभिः 5 P1 स्वः स्वः 6 P2 अभ्यर्थितोऽपि 7 P1 अतिथ्यं; P2 आतिथ्यतां 8 P1P2 नः 9 P1 add. अनुप्रास उपमा विशेषोक्तिश्च । विभावना चेत्यन्यः ॥४॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 तस्य। 2 P1 तपनाः 3 P1 add. अति°; P2 add. अपि° 4 P1 कृतवान् 5 P2 om. नारदस्य 6 B च 7 BP2 अताप्यत 8 P1 शशी दिवसे न; P2 दिवसे शशी न 9 P1 add. यावदेव तन्महसैव न अताप्यत। अपि तु तापित इति काकुव्याख्यानम्। अथवा यावदेव तस्य नारदस्य महसैव न न अताप्यत। अपि तु तापितः। यथा दिवसे शशी तन्महसा सूर्यमहसा न ताप्यते। अपि तु ताप्यते इत्यन्यः तदा साधर्म्योपमा काव्यलिङ्गं वैधर्म्योपमाऽतिशयोक्ति-श्चानुप्रासोऽपि ॥५॥

1 P1 पर्यभूदित्यादि। 2 P1 add. अह्नीति पाठे दिवसे यत् पर्य-भूदित्यर्थः 3 edr. add. पर्यभूत् 4 P2 युक्तमिव 5 P2 नाम ॥६॥

1 P1 विष्टर।; P2 विष्टरमिति। 2 P1 पानीयैः twice 3 B om. अथ············°रर्घ्यं ददौ।; P2 कच्छ°············ददौ here 4 P1 ददे 5 P1 अदत्त and add. अनुप्रासस्तुल्ययोगिता च ॥; P2 add. गृहागतस्य किल विष्टरादिकं दीयते ॥७॥

1 P1 स व्य। 2 P1 add. शर्मंभरचारु 3 B प्राप 4 P2 यत् 5 P2 add. विसर्गः 6 B युक्तमेव 7 B प्राप्त 8 P1 प्राप्नोतिः and add. अना-दीति ब्रह्मविशेषणमिति कश्चित्। वियदन्तमिति पाठान्तरम्। अनुप्रासः पर्याय उपमा रूपकं च ॥८॥

1 P1 अर्धं। 2 P1 om. एवं; P2 add. सत्येवं 3 P2 add. तु 4 B पूजां twice 5 P1 add. अनुप्रासोऽर्थान्तरन्यासः परिसंख्या च ॥९॥

1 P1 नाम। 2 P2 om. अद्रेः 3 B नामधेयतत्सम° 4 B अद्रियत 5 B om. द्विजः 6 B याजमानो 7 P1 add. अद्रेर्नामधेयसमतासखमिति वाक्यप्रौढिरोजो विरोधः काव्यलिङ्गम्। पर्वतविबुधशब्दौ च श्लिष्टौ ॥१०॥

1 P1 तद्भुजेत्यादि। 2 P1 add. दातृतयैव न तु वल्गुत्वात् केन; P2 एतावान् 3 B द्यौ° 4 P1 स्वर्गद्रुमान् कल्पवृक्षानपि 5 B किं भूत्वा ?। 6 P1P2 किं भूतान् भुजान् ?। 7 B °तदा 8 P1 add. इत्यादयः संज्ञा अतिशयोक्तिश्च here। स्वर्गः त्रिविष्टपं द्योदिवौ (अ° चि° II. 1) इत्यादि-दर्शनाच्च। द्योशब्द उकारान्तोऽप्यस्ति। भाष्ये गोतो णिदि (पा° VII. i. 90) त्यत्र ओतो णिदिति न्यासान्तराम्नानात्। वायनोऽपि तपरकरणम्। ओनिर्देशार्थ-मेव। केचिदोतो णिदिति पठन्ति। द्योशब्दोऽपि हि विद्यते। तदर्थं द्योः द्यावौ द्यावः। गौः। स्वरव्ययं स्वर्गनाकत्रिदिवत्रिदशालयाः। सुरलोको द्योदिवौ द्वे स्त्रियां क्लीबे त्रिविष्टपम्। (I. i. 6) इत्यमरदत्तवचनात् ॥ 9 P2 om. इता 10 P2 तथा ॥११॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 मुद्रितत्यादि । 2 P1 add. नारदेन सह संवादं चकार । 3 P1 om. किं भूतः ?। 4 P1 मिलता 5 B om. परभूरिकथानां 6 B प्रायसो 7 B आकारः 8 P1 add. न इत्येतदेव वा तपकरणनिर्देशादोकारान्तोपलक्षणं द्रष्टव्यम् । वर्णनिर्देशेषु हि तपरकरणं प्रसिद्धम् । अतिशयोक्तिरर्थान्तरन्यासो जातिश्च ।।१२।।

1 P1 तं कथा । 2 P1 om. आरभ्य 3 P1 add. अनागमनस्य 4 B °शयेनस्याल° 5 P2 °प्रसक्त्यां 6 P1 add. अनुप्रासः ।।१३।।

1 P2 text तु P1 प्रागि । 3 P1 भगवन् 4 P1P2 तु 5 B om. एव करीरा 6 B om. विक्षताः............प्रहरणैः 7 P1 add. अनुप्रास उपमा रूपकं श्लेषश्च ।।१४।।

1 P1 पार्थिव । 2 BP2 अपास्य आजिपु 3 P1 add. ऋकारे समानस्य प्रकृतिभावो विभाषया । अनुप्रासः ।।१५।।

1 P1 साभि । 2 P1 °नयन्ति 3 B कदर्यम् 4 P1 add. उपमाऽनुप्रासः । पूर्वतरश्लोकनिर्दिष्टस्य नृपवंशानां वीरकरीराप्रसवलक्षणसाध्यस्य प्रातिथ्यग्रहणाय वीरानागमनलक्षणस्य श्लोकद्वयेनोपन्यासात् श्लोकत्रयेणाऽनुमानम् ।।१६।।

1 P2 text संपदो 2 P1 पूर्वपुण्य । 3 B व्यापद 4 B om. किं भूताः 5 B स्पृष्टाः 6 B om. बद्धाः 7 B तान्; P2 तत् 8 P2 add. यत् 9 P2 om. यतः 10 P1 add. श्रीर्हि कमले तिष्ठति 11 P1 add. अनुप्रासो रूपकमपह्नुतिश्च ।।१७।।

1 P1 तद्विसृज्ये 2 B om. किं भूताभिः ? 3 P2 स्फोटिन्यः 4 P1 om. किं कृत्वा 5 P2 नृपगमन° 6 P1 add. पापं दुःखं वा 7 B अज्ञानं 8 P1 add. शीघ्रं 9 P1 add. बलेन वा 10 P1 add. संशयशल्पि वा 11 P1 °गुणत्वात् किमयं शब्दो नित्यः स्यादनित्यो वेति । 12 P1 add. अघं दुःखे व्यसनैनसोः (अने° सं° II. 53) । रूपकमतिशयोक्तिर्वा । अघमिति श्लिष्टम् ।।१८।।

1 P1 इत्युदी । 2 P1 add. इन्द्रः 3 B साहस्रा 4 P1 अनिमिषाम् 5 P1 add. जातिरनुप्रासोऽपि ।।१९।।

1 P2 text °सरमाख्यत् 2 P1 वीक्ष्या । 3 B om. उक्त्या 4 P1 add. आख्यत् 5 P1 कथम् ?............°सरम् । before किं भूतः............

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

साश्चर्यः। 6 P1 om. इति 7 B om. पाक° 8 BP2 वीक्ष्य परिणामम् 9 P1 add. उक्त्या इति उपादानं विशेषणार्थम् । अनुप्रासः ।।२०।।

1 P1 मिक्षिते । 2 P2 lecto. Sup. mg. add. याचिता इत्यर्थः । 3 P1 add. तस्याः शतमख्या वा 4 P1 add. परं तेवैं (व)योऽक्षिस्तस्य नान्यस्येत्यस्य हेतुमाह । 5 B किन्तु 6 B यज्ञेन 7 P2 अग्निष्टोमेनेति वेदवाक्यम् । परम् अत्राऽर्थापत्तिः प्रमाणम् । पीनो देवदत्तेत्यादीक्षणविध्वंसिनां क्रिया । तर्हि यज्ञक्रियया कथं स्वर्गावाप्तिः । नैवम् । क्रियया यज्ञकर्त्तरि पुरुषे अपूर्वा परिणतिः स्वर्गाय भवति । 8 P1P2 तच्चा° 9 P1 add. काव्यलिङ्गम् ।।२१।।

1 P1 सम्प । 2 P1 नापनयन्ते; B वाप° 3 B om. साक्षात् प्रत्यक्षं 4 P2 om. न 5 P1 add. नेति पूर्ववाक्येन वा सम्बध्यते । 6 B om. अथ.........वदति । 7 P2 add. अति° 8 B मानसीय° 9 P1 add. प्रत्यक्षसदृशोः साक्षात् (हला° V. 58) । अनुप्रासोऽतिशयोक्तिश्च । परमाप्त इति श्लिष्टम् ।।२२।।

1 P1 श्रीभरा । 2 P1 किं पस्तव 3 P2 om. अहं 4 P1 add. अनुप्रासोऽतिशयोक्तिश्च । उपमा व्यतिरेकोऽपि ।।२३।।

1 P1 आ स्वभाव । 2 P1 add. अव्ययानामनेकार्थत्वात् निरर्थको वाक्यालङ्कारमात्रे वा आङ् । 3 P1 स्वभावैः 4 B अविधि° 5 P1 om. तथा 6 P1 हे विडोज ! 7 P1 add. आः इति पीडायाम् । तदाह—आस्तु स्यात् कोपपीडयो (अमर° III. iii. 240) रिति । अत एव गलितावधिकालं द्यां प्रशाधि इत्याशीः । इति पाठान्तरे व्याख्यानम् ।।२४।।

1 P1 सङ्ख्या तु । तु P1 om. हर्षो 3 P1 om. यत् 4 edr add. अखिलं 5 P1 शरीरं 6 P1 add. अनुप्रासोऽतिशयोक्तिः ।।२५।।

1 P1 सा भुव । 2 P1 om. नाम 3 P1 add. जयति सकर्मक एककर्मको द्विकर्मको वाऽनियतोत्कर्षे अकर्मकस्तु नियतोत्कर्षे । 4 B om. अनिर्वचनीयं रत्नं 5 B तथा 6 P1 add. अतिशयोक्तिः ।।२६।।

1 P1 सम्प्रति प्रतीत्यादि । 2 B किं भूताम् ?। 3 P1 शिखामभिव्याप्य 4 BP1 कुर्वती ?। 5 P2 यौवनजवेन 6 B °रूपं रूपं 7 P2 om. भवन्ती 8 P1 add अनुप्रासोऽतिशयोक्तिः ।।२७।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 कथ्यते । 2 P1 add. इति किम् ?। 3 P1 add. कथं विवक्षा ज्ञाता इत्याह—यत: 4 P1 add. ईषच्चलदोष्ठ इति वा । 5 B बत 6 P1 रुणत्सि न । 7 P1 स्थापयति । काकुव्याख्या । 8 P1 एताम् इमां—।।२८।।

1 P1 यत्प । 2 P1 अतीन्द्रियज्ञा 3 P1P2 परमाणु: 4 P2 किं भूता: ?। 5 B गिरिर्गुहा° 6 P2 कश्चित् 7 B om. बालग्रहो हि दुर्मोक्षो भवति । 8 B 'र्बलाभि° 9 B om. सद्भावे 10 P2 °तारतम्यात् 11 P1 om. महत्°………तम्यवत् 12 P2 add. च 13 B अस्ति न 14 B कारणविनाविभागा° 15 B om. वस्तुनो B om. परमा°……विनाशोऽस्य 16 B °त्वाच्चाती° 13 P1 add. अनुप्रासो विरोधो रूपकमतिशयोक्तिश्च । पृच्छाया अर्द्धवर्त्मनिरोधो निर्गमेण परिश्रमाभावयोरिदं वाक्यं हेतुरिति श्लोकद्वयेन काव्यलिङ्गम् ।।२६।।

1 B सा ररस्येति ।; P1 सा शरस्य । 2 P2 add. मनोऽपि 3 P2 add. स्वयंभुवो 4 P2 add. आत्मन: 5 P2 सर्वज्ञामेलनोत्सवाय 6 P2 add. सखायम् 7 P2 अधुनाऽपि चित्ते 8 B शव्या वेध्या 9 P1 add. अङ्कैरिति पाठान्तरम् । अनुप्रासोऽतिशयोक्तिरनुमानं समुच्चयश्च ।।३०।।

1 P1 मन्म । 2 B हूर्ति 3 P1 om. ददौ 4 P1 मन्मथस्य तस्य 5 edr. add. पृथिवीशा: 6 B om. न कुर्वन्ति ।।३१।।

1 P1 येषु । 2 B om. 3 BP2 om. यदि वापि 4 B सासा; P2 सारसा 5 BP2 om. तत्र 6 B om. विषये 7 P1 add. स; B P2 om. हि 8 P1 om. अद्य कल्पे 9 P1 add. तथा च वात्स्यायनीये कामशास्त्रे कन्यासम्प्रयुक्ते तृतीयेऽधिकरणे तृतीयाध्याये बालोपक्रमइङ्गिताकारसूचनप्रकरणाभ्यामयमपि सप्रपञ्चं निरूपित: । उल्लिङ्गनमात्रमत्र दर्शितम् । अभियुक्तैर्विशेषस्तत्र द्रष्टव्य: । अनुप्रासोऽतिशयोक्तिर्विरोधश्च ।।३२।।

1 P1 शैशवे । 2 P2 om. विसर्ग: 3 B शैशवस्य 4 P1 add. अतिशयोक्ति: ।।३३।।

1 P1 इत्यमी; P2 इत्यमी इति । 2 B सीम° 3 B स्वर्गभू° 4 P1 add. अमुत्र । अनुप्रासो हेत्वतिशयोक्ति: ।।३४।।

1 P1 तेन जाग्रदित्यादि । 2 P1 om. अहं 3 P2 शुद्ध° 4 P1 °शय: 5 P2 यद्यत् P1 add. क्षितिभुजां 7 P2 तत: 8 B °मनसम् ।।; P1 add. अनुप्रासो हेतुश्च ।।३५।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 वेद यद्य । 2 B om. यत् 3 B पृच्छ्यते 4 P1 add. अनुप्रासोऽर्थान्तरन्यासश्च ।।३६।।

1 P1 एवमुक्तवतीत्यादि । 2 P1 add. अत्रापि ऋदुपरे प्रकृतिर्विभाष्या । 3 B om. °प्रत्युक्ति° 4 P1 add. कीदृक् ?। 5 P1 add. अनुप्रासोऽर्थान्तरन्यासश्च ।।३७।।

1 P1 कनुज इत्यादि । 2 B om विचारणा 3 P1 add. ज्ञातेर्वा 4 P1P2 भुजस्य 5 B उपा° 6 BP2 वीत 7 P1P2 परमेश्वरभुजे 8 P1 add. अनुप्रासो हेतुश्च ।।३८।।

1 P1 विश्वरूप; P2 विश्वरूपेति । 2 P1 add. इङ् (1218) गतौ । 3 B धारणात् 4 B विश्वमध्ये 5 B om. तत्र 6 B om. अपरं·········कलितमस्ति । 7 P2 नामकरणं 8 P2 om. रूपमिति 9 B वेदान्त° 10 P1 विग्रहत्वे 11 P2 om. कृत्वा 12 P1P2 यज्ञे भागं 13 P1P2 श्रूयते 14 P2 add. या 15 BP2 om. 16 P1 °ग्रहणे 17 P1 add. विसर्गः 18 B देवस्य; P1 वेदप्रामाण्यं 19 P1P2 विग्रहवत्त्वं 20 P1 °हस्तमिति 21 P1 add. अनुप्रासो हेतुरतिशयोक्तिश्च ।।३९।।

1 P1 ईदृशानि । 2 B om. स 3 P1 °मततानि 4 P1 दीर्घं यन्निःश्वसितं विश्वासवायु° 5 P1 om. च 6 P1 add. अनुप्रासो रूपकं जातिश्चोपमाऽपि ।।४०।।

1 P1 स्वारसा । 2 P1 add. सन् 3 P2 पृथिव्याः 4 P1 यत् 5. B तत्रा 6 P1 add. वा 7 P1 भवा° 8 B यस्याः; P1 यस्या; and add. निवृत्तिहेतुत्वात्तत्राऽपि गतस्य युद्धादर्शनाद्वा 9 P2 add. नागलोके 10 P1 add. मे न क्वाऽपि न ।।P1 निवृत्तिः । and add. अनुप्रासो हेतुश्च ।।४१।।

1 P1 वीक्षित । 2 B add. जगति; P2 °जगते 3 P1 om. तत्र पृथिव्यां 4 P2 add. पार्थिवाः 5 P2 °नयता 6 P1 add. तत्र विषये अथवा तत्रेति पृथिव्यां 7 P2 add. न विषादं कुर्वन्ति 8 P2 add. भासनोपसंभाषाज्ञानयत्नविमत्युपमन्त्रणेषु वद (पा° I. iii. 47) इत्यात्मनेपदम् । विमतिर्मनो मतिर्विमतिपतितां विचित्रं भाषन्त इत्यर्थं । विवोढुं पाठान्तरम् । छेकानुप्रासः ।।४२।।

1 P1 इत्यु । 2 P1P2 om. पृथिवीं 3 P1P2 om. तरसा 4 P1P2 om. सहस्रनयनः 5 P1P2 add. बलेन 6 P1 om. तं नारदं 7 P1 add. वारितोऽप्यनुजगाम । सयन्तमिति पाठः । वारितेऽप्यनुगमाय

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

सयन्तमिति पाठे वारितेऽपि सति अपराणि कियन्त्यपि पदानि कियत्पदमार्गं यावत् अनुगमाय सयन्तं स्वर्पतिमिति योज्यम् । जातिः ।।४३।।

1 P1 पर्वतेन । 2 edr. add. नारदीयं 3 P2 अनुवादि 4 BP2 तस्मिन्निन्द्रे aft. अदर्शि 5 BP2 स्वयं aft. किं भूते ?। 6 P1 add. आगमनप्रयोजनादिक पर्वतपक्षच्छेदिनि यतः पर्वतस्य 7 P1 om. किं भूते ?। 8 P1P2 om. छेदनशीले 9 P1 add. अथ च पर्वतो.........कुरुते here 10 P1P2 om. गिरीणां ।। P2 om. °विधे..........दर्शयति 12 P1 om. एवंरूपे 13 P1 add. अनुप्रासः श्लेषश्च ।।४४।।

1 P2 text विर° 2 P1 पाण ।; P2 om. पाणये इति ।......... °रिन्द्रस्य 3 P1 करस्तस्य 4 B व्यापक्षे 5 B उपचितं 6 P1 add. अनुप्रासो रूपकं च ।।४५।।

1 P1 नाक । 2 P1 अहं..........वेद्मि aft. चुम्बति । 3 P1 om. यत् 4 P1 add. परमा 5 P1 om. यत् 6 P1 तस्या..........स तथाभूतः here 7 P1 add. पूर्वोक्तं 8 BP2 om. भूतः 9 P1 add. सन् । कण्ड्वादिभ्यो यक् (पा° III. i. 27) । 10 P1 add. शोभाद्वारेण ।। P1 add. अनुप्रासो विशेष उत्प्रेक्षा च ।।४६।।

1 P1 मानुषी । 2 P1 om. मानम् 3 B खण्डयति 4 P1 add. सर्वभावमिति पाठे समस्ताभिलाषेण मानुषीम् अनुसरतीति सम्बन्धनीयम् । निर्वेदभावोदयः । अनुप्रासो जातिश्च ।।४७।।

1 P1 यो मघो । 2 P1 om सति 3 B सर्वर्णं; P2 सवर्णे 4 P1P2 om. °रस° 5 B आकार° 6 edr. add. अभाषत 7 P2 आख्यातः 8 P1 add. अस्यामिति वा पाठः । भावोदयोऽनुप्रास उत्प्रेक्षा च ।।४८।।

1 P1 जीवे । 2 B °मुख्याया 3 B om. इति 4 P1 इति किम् ? । 5 B जीविते 6 P1 om. तत् 7 P1 add अपह्नुतिरतिशयोक्तिः श्लेषः ।।४९।।

1 P1 साधु । 2 P1P2 °मेवोक्तम् 3 P1 add. चामरावस्थिति-दशायां 4 P1 विलोलनाय वीजनाय 5 P1P2 om. कम्पनेन 6 P1 add. उद्यमपरस्तद्विलोलने चलन् कम्पमानो वा 7 P1 स तथा; and add. अथवा पतने सति तस्य चामरस्य पतनेन शून्यविलोडनेन चलन् भुजनालो यस्य तस्मात्तथा । P1 °विलोलनम् 9 P1 अतः 10 B चामार° 11 P1 add.

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

तद्विलोकनेति पाठे तस्य प्रस्तुतस्य इन्द्रागमनस्य दर्शनेन कम्पमानं भुजनालात् इति व्याख्या । तदा अवीजनदशायामेव स्वभावतो हस्तस्थचामरभ्रंशः । प्रतीयमानोत्प्रेक्षा रूपकमपह्नुतिश्च ।।५०।।

1 P1 मेनाक । 2 P1 तापमुदीतं 3 B विधि° 4 P1P2 °गूहनम् 5 P1 add. अवहित्थाकारगुप्तिः अङ्गवैकृतस्य बहिः स्थानादवहिः स्थितत्वमवहित्थमित्येके । 6 B सत्थां 7 P1 बाह्योत्थां 8 P1P2 तत्र 9 P1 add. नशिमन्योरलिप्ये त्वं छन्दस्यमिपचोरपि । व्यानशन्मेनका चाऽस्य व्येमानं लिडिपेचरन् ।। (पा° VI. iv. 120) इति वार्त्तिककारवचनात् । छन्दसत्वेऽपि मेनकाशब्दस्य भाषाया प्रायः प्रयोगो दृश्यते । अनुप्रास उत्प्रेक्षा च ।।५१।।

1 P1 उर्वशी । 2 P1 संमापनं; P2 om समापनं 3 P1P2 om. पुष्टिं चक्रे 4 P1P2 om. सहस्रनयनेन 5 B निश्चित° 6 P1 add. अनुप्रासोऽपह्नुतिश्च ।।५२।।

1 P2 text °मन्युः 2 P1 काऽपि 3 P2 शृणुति 4 B om. सति 5 B उक्तवान् 6 P1 add. किञ्चिदिन्द्रसम्बन्धिवार्ताजातम् 7 P1 add. त्रिलोकय 8 P1 add. वाक्यार्थेऽत्र कर्मेति प्रथमा । 9 P1 add. मद्यपपुत्रीं तथा कश्यपसुतः कश्यपसुतां 10 P1 add. अनुप्रासविरोधौ ।।५३।।

1 P1 आलि । 2 B मघोने 3 P1 सगर्वाम्; and add. कर्मविशेषणम् । पाठान्तरम् । 4 P1P2 किं here 5 B om. किं 6 P1P2 सार्थेन 7 P1 add. अनुप्रासः ।।५४।।

1 P1 अन्वयुः । 2 B om. तम् 3 P2 कथयितुं तं 4 B °गतिकाः 5 P1 नु 6 P1 सुप्राप्य 7 P1 add. अर्थान्तरन्यासः अनुप्रासोऽपि ।।५५।।

1 P1 प्रेषिता । 2 B अथा 3 P2 पृथक् once 4 B om. तस्याः 5 B पृष्टाः 6 P1 add. व्याजेन 7 P1 add. सख्यः सोख्येति पाठान्तरम् । अनुप्रासोऽपह्नुतिश्च ।।५६।।

1 P1 चित्र । 2 B om. तः 3 P1 निरूढा 4 P1 om. हि 5 B भवति; P1 वलति; and add. अनुप्रास आक्षेपः पर्यायोऽपि । विबुधपदं श्लिष्टम् । ये किल विबुधा मनीषिणः ते किं स्वर्गं विहाय भुवनमनुसरन्तीति विरोधोऽपि ।।५७।।

1 P1 शीघ्रलङ्घि । 2 P1 शीघ्रं ....तथा भूतैः here 3 P1 om. किं भूतैः ?। 4 P1 om. ततस्ते 5 P2 कम्बरं 6 B ग्रीवायाः P1

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

तथाकृतग्रीवे°; P2 ग्रीवा वा; edr. ग्रीवया 7 P1 add. अनुप्रासो जातिश्च ॥५८॥

1 P1 किं घन। 2 B °मभि 3 P2 अलम्भत् 4 P2 नालम्भत 5 P2 अपश्यत् 6 P1P2 निःश्वसनस्य 7 P1 om. सह 8 P1 add. ससन्देहः सहोक्तिरतिशयोक्तिश्च ॥५९॥

1 P1 सूतविश्रम। 2 P2 तत्तथा 3 P1 add. विदधिरे इति पाठे नलं नेत्रजन्मनः फलं विदधरे इति विधेयम्। अनुप्रासोऽनुमानमतिशयोक्तिश्च ॥६०॥

1 P1 वीक्ष्य तस्य। 2 BP2 जल° 3 B किमुत 4 P1 add. अथ च जलपतेस्तथा रसास्तिमितस्य रसेनाऽऽर्द्रस्य जलभूयमुचितमेव। अनुप्रासः समं श्लेषश्च ॥६१॥

1 P1 रूप। P2 om. रूपमस्येति 2 B °वंशस्यात्र° 3 P2 recto. Sup. mg. add. अतिश्यामतां 4 P2 जमस्य 5 P1 add. अनुप्रासोऽतिशयोक्तिः। कालशब्दः श्लिष्टः ॥६२॥

1 P1 यं बभार। 2 B तारं 3 B तव 4 P1 अनलता वह्निता........ अनलता here 5 P1 add. तापजनुषः कारणं मा भवत्वित्यर्थः। कर्त्री सम्पादयित्री जनयित्रीति यावत्। 6 P1 add. इममेवार्थं भङ्ग्यन्तरेण केचन व्याचक्षते। जनीति जनेर्ण्यन्तस्यैकानिर्देशस्तदयमर्थः। तत्र अनलता जनेर्जनयतेः कर्त्री प्रयोजिका माऽभूत् ।तथाऽप्यनलतैव हेतुः प्रयोजिका हेतुकर्त्रीत्यर्थः। यद्यपि क्रियां कुर्वन् कर्त्तोच्यते। जनिरित्यक्षरपङ्क्तौ कर्तृताया अभावः तथापि जनिवाच्योऽर्थो लक्षणया आक्षेपेण जनिनोच्यते। अथवा इकिश्तिपोर्धातोः स्वरूप इति धातुस्वरूपं नामधात्वर्थस्वरूपम् अक्षरव्यक्तिस्वरूपं चेति जन्यभियोत्पत्तिलक्षणेऽर्थे प्रत्ययो जननम्। जनिरिति भावे वा प्रत्ययः। नट (319/433) नृत्तौ इतिवत् विरोधः। काव्यलिङ्गमपि व्यतिरेकोऽपि॥ 7 P1 add. अर्थस्य ॥६३॥

1 P1 कामनीयक। 2 P1 add. विसर्गः 3 B कमनी° 4 P1 add. अनुप्रास उत्प्रेक्षारूपके प्रतीपं च ॥६४॥

1 P1 राम। 2 B हतानि—॥६५॥

1 BP2 प्रेय°।; P1 प्रेयरूपक। 2 B om. इदम् 3 P1 add. अत्र प्रकारार्थत्वे, प्रकारे गुणवचनस्ये (पा° VIII. i. 12) ति द्विर्वचने कृते

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

कर्मधारयवदुत्तरेष्विव (पा° VIII. i. 11) ति कर्मधारयवत् भावे मन्दं मन्द-मिति प्रयोग: । अत्र प्रकारार्थत्वे तु मन्दमन्दप्रयोगो यथा—मन्दं मन्दं नुदति पवन (पूर्वमेघ 10) इति । अत्रानेकभागात्मकस्य नुदे: सर्वे भागा मन्दत्वेन व्याप्तुमिष्टा-इति वीप्सालक्षणोऽर्थस्तत्र च नित्यवीप्सयोरि (पा° VIII. i. 2) ति द्विर्वचनम् । 4 B om. समीरवर्ति 5 B भेद: 6 B om. एष........°धिकरणम् 7 P1 संवदद्भि: 8 B °पूर्णै: 9 P2 श्रुतोऽयं 10 P1 add. अनुमानं जातिश्च ।।६६।।

1 P1 तेषु । 2 P1P2 om. कथयामासु: 3 P1 add. अनुप्रास: समुच्चयश्च ।।६७।।

1 P1 धर्म । B च तत् 3 B धर्मराज°..........ताप: twice 4 B प्रणतां 5 P1 च aft. प्राप्य 6 B दुष्यति 7 P2 वायुं प्राणं 8 BP1P2 हूतं; edr. हुतं 9 P1 add. यथासङ्ख्यम् ।।६८।।

1 P1 नैव । 2 B तथा 3 B om. हि 4 P2 om. सा 5 P1 add. उभसर्वतसो: कार्या धिगुपर्यादिषु त्रिषु । द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते (पा° 136) । इति धिक्योगे द्वितीया । 6 P2 om. °द: प्रतिलम्भ: 7 P2 हर्षस्य 8 P1 add. काव्यलिङ्गम् ।।६९।।

1 B om. Com. upto मनसा इति (V. 72); P1 मां वरि । 2 P1 add. उपैष्यति 3 P1 add. काव्यलिङ्गम् ।।७०।।

1 P1 नैषधे । 2 P2 स्वमुख 3 P2 Sup. mg. add. दर्शयिष्यामि 4 P1 add. च 5 P1 add. गृहे त्वेति पाठे बहिर्व्रीडितो न भविष्यामि । नलस्य सर्वोत्कृष्टत्वाद्वरणे मम बहिर्न लज्जा । गृहे तु पुनर्वनितां कथं मुखं दर्शयिताहे । हेतु: । पाठान्तरे व्यतिरेकोऽपि ।।७१।।

1 P1 इत्यवे । 2 P2 विबुधत्रयी 3 B om. बुबुधे 4 P1 om. तं & add. तथा प्रसिद्धं 5 P1 om. नाकनायकम् 6 B देवतानां 7 P2 त्रयाणां 8 P1 add. मोहभावोदयोऽनुप्रास: ।।७२।।

1 P1 किं वि । 2 P1P2 °स्तेषाम् 3 P1 इति किम् ?। 4 B अमुना 5 BP2 वचनं 6 B °भिलभ्य 7 P2 add. न 8 P1 add. अनुप्रासो हेतुश्च ।।७३।।

1 P1 सर्व । 2 P1 कच्चित् प्रश्ने here 3 P1 add. कुशलभाक् 4 P1 add. कच्चित् कामप्रवेदने (अमर° III. iv. 14) कामप्रवेदनं स्वाभि-प्रायप्रकाशनम् इति किं यथा । 5 P1 add. एष 6 B om. नैषधो.......

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

आसनस्यार्धे 7 P1 add. उल्लेखं 8 P1 add. रेखा स्यादल्प छद्मन्या-भोगोल्लेखयोरपि (अने° सं. II. 25) । 9 P1 om. आत्मन 10 B ममा-सनार्द्धं° 11 P1 add. हेतुरुपमा सम्भावनमपि ॥७४॥

1 P1 क्व प्रया ।; P2 om. क्व प्रयास्यसीति । 2 P2 add. अस्माकं त्वदागमने here 3 B om. नः 4 B यास्यति; P2 यामि 5 P2 om. अपशकुनवाचित्वात् 6 P1 °कारित्वात् and add. अनुप्रासः काव्यलिङ्गं च ॥७५॥

1 P1 एष ।; P2 एष नैषध इति । 2 P2 add. निषधाधिप ! 3 B om. स 4 P2 °कारित्वात् 5 P2 om. तथा 6 P1 ज्वालाजाल°; P2 ज्वालैर्जटिलः 7 P1P2 om. इति 8 P1 भीमता 9 P1P2 om. देवानां 10 P1P2 om. पतिम् 11 B om. आत्मान°............पार्थिव ! ॥12 P2 om. सुराणां शासितृत्वेन 13 P2 जहृदज्ज° 14 P1 समाना° 15 P1 add. परिकरः अनुप्रासोऽपि ॥; P2 om. परिकरोऽलङ्कारः ॥७६॥

1 P1 अर्थितो ।; P2 om. अर्थिन इत्यादि । 2 B om. Com. of this verse 3 P1 add. कलितार्थं 4 P1 add. अदसो विप्रकृष्टवाच-कत्वेनाऽमी दूरात् स्वर्गदेशात् त्वाम् उद्दिश्य अर्थिनो वयमागताः इत्याकूतसूचनात् परिकरः । विशेषणैर्यत् साकूतैरुक्तः परिकरस्तु सः (का° प्र° X. 183) ॥ इति अत्र विशेषणैरिति बहुवचनमतन्त्रम् ॥७७॥

1 P1 ईदृश ।; P2 ईदृशीमिति । 2 P1P2 विडौजा here; P2 add. इन्द्रः 3 P1P2 om. वाचम् 4 P1P2 om. उत्तसा 5 P1P2 मौनी बभूव 6 B om. किमपि 7 P1P2 om. न उवाच 8 B om. अर्थित्व° ....दर्शिता । 9 P1P2 °मिदम् 10 P1P2 add. अर्थे 11 B om. शैशवावधि गुरुः 12 P1 add. गुरुर्विनेता । क्व ?। 13 P1 अत्त्यस्मात् लिट् इति । and add. अनुप्रासः काव्यलिङ्गमुपमाऽपि ॥७८॥

1 B om. Com of this Canto. P1 अर्थिना ।; P2 अर्थिना-मिति ।; edr. अर्थिनामेति । 2 P2 om. स 3 P2 युतेनैवो 4 P1 add. अनुप्रासो रूपकमुत्प्रेक्षाऽपह्नुतिश्च ॥७९॥

1 P1 दुर्लभ । 2 P2 इतीति किम् ?। 3 P1 add. तथा तादृशं दुर्लभम् 4 P1 आश्चर्ये 5 P1 add. विरोधः ॥८०॥

1 P1 जीवि । 2 P1 om. अर्थिमात्रैः 3 P2 अर्थद्वय° 4 P1 add. न लोकाव्यये (पा° II. iii. 69) त्यादिना षष्ठ्यभावः । चिन्ता भावोदयः ॥८१॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 भीम । 2 P1P2 om. गुर्वी; edr. add. गुर्वी 3 P1 चित्त° 4 P2 स्वल्पं 5 P1 add. भीमजाप्येति पाठान्तरम् । अतिशयोक्तिरनुप्रासो विरोधोऽपि ॥८२॥

1 P1 मीयतामित्यादि । 2 P1 add. ज्ञायताम् 3 P1 प्रार्थनायाम् 4 P1 उभसर्वतसोः कार्या धिगि (पा° 136) त्यादिना द्वितीया । अतिशयोक्ति-र्हेतुश्च ॥; P2 inf. lecto. mg. add. धिगिति धिक्शब्दयोगे द्वितीया ॥८३॥

1 P1 om. प्रापितेनेति । 2 P1 बहूनां 3 P2 om. विडम्बं 4 P1 यत् 5 P1P2 om. विलम्ब्य; edr. add. विलम्ब्य 6 P2 Sup. lin. add. बहुप्रार्थनया किल याचको लज्जितो भवति । 7 P1 add. विषम: ॥८४॥

1 P1 यत्प्रदेयमित्यादि । 2 P1 विशङ्कास्तस्या: 3 P2 ओषधम् 4 P1 add. अतिशयोक्तिः ॥८५॥

1 P1 om. अर्थिने न तृणवदिति । 2 P1 add. प्रतीयमानोत्प्रेक्षा समासोक्तिर्वा ॥८६॥

1 P1 पङ्क । 2 P1P2 om. विमलं; edr. add. विमलं 3 P1 om. कुर्वीत and add. अनुप्रासो रूपकमतिशयोक्तिः समं च ॥८७॥

1 P1 याच । 2 P1 याचमानस्य here 3 P1 जनस्य 4 P2 भार: 5 P1 add. अनुप्रासोऽतिशयोक्तिः ॥८८॥

1 P1 मा ध । 2 P2 om. अपि 3 P1 add. हि 4 P1 add. विरोधोऽपि ॥८९॥

1 P1 मामभीभिरि । 2 P2 यद्यशो 3 P2 किं कृत्वा.............अवमत्य here 4 P2 Sup. lin. lecto. mg. add. अवगणय्य 5 P1 add. अनुप्रास: ॥९०॥

1 P1 लोक । 2 P2 om. अस्य लोकस्य 3 P2 उदयचित्तं 4 P1 किम् 5 P2 om. सति 6 P1 add. अनुप्रास उत्प्रेक्षा रूपकं हेतुश्च समासो-क्तिरपि ॥९१॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 दान । 2 P1 Sup. lin. mg. add. याचकग्रहितारम् 3 P1 add. कुत्सितं कौ वा सीदन्त्यत्र कुसीदम् अर्थस्य प्रयोगः । अथ च साधुर्वणिग्जनः एकमेव वाक्यम् । अनुप्रासोऽतिशयोक्तिर्व्यतिरेकश्च ॥९२॥

1 P1 एवमादि । P2 मुहूर्ते 3 P2 याच° 4 P1 याच्य° 5 P1 add. भावोदयः ॥९३॥

1 P1 नास्ति जन्येत्यादि । 2 P1 अयं च 3 P1 om. ततश्च 4 P1 add. अमृतभोजिनां तनूविशेषणमप्येके 5 P1 यस्मात् 6 P1 add. नास्तीति निपातः । अस्तिक्षीरादिवत् बहुव्रीहिः 7 P1 add. अर्थान्तरन्यासः ॥९४॥

1 P1 मत्तप । 2 P1 om. तनु 3 P2 अथ च 4 P1 add. अतिवैधर्म्यात्सम्बन्धो न घटते इति वैषम्यम् 5 P1P2 °पुरुषाणां; edr. पुरुषाणां 6 P1 add. सन्ति 7 P1 add. ईदृशान्यपि ददन्तीति पाठ ईदृशान्यपि फलानि प्रयच्छन्तीत्यर्थः । विषमोऽतिशयोक्तिश्च व्यतिरेकोपमे ॥९५॥

1 P1 प्रत्यति । 2 P2 प्रतिष्ठिपत् 3 P2 देवत्वं 4 P1 हे देवाः यूयमप्यस्याः 5 P2 recto. Sup. mg. add. अर्चनं कुरुथ 6 P1 किल पृथिव्यां 7 P1 add. उत्प्रेक्षा रूपकं च ॥९६॥

1 P1 जीवि । P1 add. अनुप्रासः ॥९७॥

1 P1 एव । 2 P2 वाचंभावेन 3 P1 add. मुक्ता विशङ्का येन । वीतेति पाठे 4 P1 add. अनुप्रासो हेतुश्च ॥९८॥

1 P1 पाणि । 2 P1 °महोत्सवं 3 P1 add. निन्दितस्मर ! 4 P2 om. जित्वाभावात् 5 P1 add. अनुप्रासो रूपकं च ॥९९॥

1 P1 आसते । 2 P1 तुला° 3 P1 add. तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्यामि (पा° II. iii. 72) ति तुलाशब्दप्रयोगे प्रतिषेधात् शेषलक्षणा षष्ठ्येव । अनुप्रासो रूपकं दृष्टान्तश्च ॥१००॥

1 P1 विश्व । P2 अवैमि 3 P2 om. कीदृशाः..........क्वनिप् । 4 P1 हि निश्चितं here 5 P1 लभामहि and add. अनुप्रासो रूपकं हेतुश्च ॥१०१॥

1 P1 शुद्ध । 2 P2 आशु नलं 3 P2 om. दमयन्ती..........सपक्षः । 4 P2 add. दुष्टैः 5 P1 add. अन्वये 6 P1 add. क्षान्तिऔदार्य° 7 P1

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

सहितुं 8 P2 सायकं बाणम् ऋजुं 9 P1 add. विरोध उपमा श्लेषश्च ॥१०२॥

1 P1 तेन तेन । P2 वचस्यैव 3 P1 जज्ञे 4 BP2 आचरन् ॥ 5 P2 inf. lin. mg. add. मायाविषु 6 P1 add. तथा च व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः (किरा° I. 30) इत्यादि । अनुप्रासोऽर्थान्तरन्यासश्च ॥१०३॥

1 P1 सेय । 2 P2 सा इयं हे देवा ! 3 P1 बहुता 4 P1 add. परं कुलम् अथवा कथापथं 5 P2 om. युष्मदीया········गुरुक्तः 6 P1 add. अनुप्रासो विरोधोऽपि ॥१०४॥

1 P1 वित्थ चित्तम् । 2 P2 om. न 3 P1 वा 4 P2 °करणीयः 5 P1 add. अनुप्रास उक्तनिमित्ता विशेषोक्तिरर्थान्तरन्यासः काव्यलिङ्गं च ॥१०५॥

1 P1 यन्मता । 2 P1 add. वाक्यालङ्कारे वा 3 P2 om. तत्त्वं पाठान्तरम् 4 P2 प्रतिबिम्बित° 5 P1 दत्त 6 P2 तस्य 7 P1P2 om. वितरीतुं; edr. add. वितरीतुं 8 P1P2 om. न सदृशी; edr. add. न सदृशी 9 P1 add. अनुप्रासो रूपकं विरोधो विषमोऽपि वा ॥१०६॥

1 P1 यामि । 2 P1 om. अहो 3 P1 add. स्थाने 4 P1P2 om. बत खेदे ।; edr. add. बत खेदे 5 P1 om. महतां 6 P1 add. अनुप्रासो रूपकं विरोधश्च ॥१०७॥

1 P2 text खलु यस्या 2 P1 उद्भ्रमामि । 3 P1 गच्छामि 4 P1 गुह्यं 5 P1 add. काव्यलिङ्गम् ॥१०८॥

1 P1 यां म । 2 P2 स्वसिमि 3 P1 add. पाठान्तरं स्वपिमि 4 P1 गोप्यं 5 P1 धारयितुं 6 P1 add. न लोकाव्यये (पा° II. iii. 69) त्यादिना षष्ठीप्रतिषेधः । अर्थान्तरन्यासः ॥१०९॥

1 P1 यामि । 2 P2 चन्द्र° 3 P1 add. कुमारीत्यत्राऽमङ्गलदाप्यश्लीलत्वं न शङ्कनीयम् । अभिप्रेतमित्यादिवत् दोषस्य लोकेन संवीतत्वात् । तथा चोत्तरवृत्तिकारः—स्वालश् असभ्यार्थान्तरमसभ्यस्मृति हेतुश्च अश्लीलमि (का° सू° II. i. 14) त्यभिदाय न गुप्तसंमृतलक्षितानी (का° सू° II. i. 15) ति अपवादमसूत्रयत् । अप्रसिद्धलाक्षणिकलोकसंवीतासभ्यं पदं नाऽश्लीलम् । काव्यलिङ्गमर्थान्तरन्यासश्च ॥११०॥

CC-0. ORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 आदधी । 2 P1 यतो यश: 3 P2 मूलस्य 4 P1 om. यस्य 5 P2 om. दधीचिम् 6 P2 मर्यादा° 7 P1 कार्यम् and add. आङो दोऽनास्यविहरण (पा° I. iii. 20) इत्यात्मनेपदम् । परिवृत्तिर्विषमो रूपकं च । अनुप्रासोऽपि ।।१११।।

1 P1 अर्थना । 2 P2 add. न 3 P2 तस्यै 4 P2 add. तथा 5 P2 om. भवतां 6 P1 परप्रार्थन° 7 P1 add. उपमा ।।११२।।

1 P1 अर्थिता । 2 P1 add. नितरां 3 P1 add. न गतिहिंसार्थेभ्य (पा° I. iii. 15) इति प्रतिषेधात् । कर्तरि कर्मव्यतिहार (पा° I. iii. 14) इति प्राप्तस्याऽऽत्मनेपदस्याऽभावे शतृप्रत्यय: । काव्यलिङ्गम् ।।११३।।

1 P1 कुण्डिने । 2 P1 add. प्रसिद्धौ सत्ये वा । 3 P1 कुण्डिनेन्द्रस्य कुण्डिनेन्दो: सुतया 4 P1 उरसि° 5 P2 om. विसर्ग: 6 P1 add. निश्चितं वा 7 P1 add. गुरोश्च हल (पा° III. iii. 106) इति अविधौ गुरो: स्त्रियां बहुलविपक्षा । स्त्रियां विवक्षा यथा ईहा लज्जा । अविवक्षा यथा आतङ्क: । उभयं यथा बाघा बाध: । ऊहा ऊह: । उत्कण्ठ: । काव्यलिङ्गम् ।।११४।।

1 P1 तत्प्र । 2 P1 add. अयुक्तेन अन्याद्येन 3 P1 add. विनयादित्वात्, उपायात् ह्रस्वत्वं चे (पा° V. iv 34-ग) ति इकप्रत्यय: । काव्यलिङ्गम् ।।११५।।

1 P1 ईद्द । 2 P2 किमपि aft. सन् P1 add. अल्पं 4 P1 add. अनुप्रास: ।।११६।।

1 P1 नाम्यधा । 2 P1 add. सोमस्य 3 P2 om. यत: 4 P2 उररी° 5 P1 अथ च 6 P2 om. गौ: 7 P1 add. अनुप्रास उपमा हेतुश्च ।।११७।।

1 P1 भङ्गु ।; P2 om. भङ्गुरमिति । 2 P2 मिथ्याभूतं वितथं 3 P1 om. वा 4 P2 om. धर्मं यशश्च 5 P2 om. ते 6 P2 add. न 7 P1 add. अनुप्रासो हेतुश्च ।।११८।।

1 P1 क: कुले । 2 P1 add. अहो 3 P1 add. अनुप्रासो रूपकं च ।।११९।।

1 P1 याऽपदष्टि: । 2 P1 add. अनुप्रास: समुच्चयो व्यतिरेकश्चोपमाऽपि ।।१२०।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 नाऽक्षराणि । 2 P1 नकारो here 3 P1 om. यस्य 4 P1 add. वाक्यालङ्कारे वा 5 P1 °कोटचव° 6 P2 om. न 7 P2 ब्रूते; P1 add. अत्र प्रस्मृतिर्विस्मरणे । रूढेः ननु योगाद्विप्रकृष्टस्मरणे । अनुप्रासः सन्देहो रूपकं च ।।१२१।।

1 P1 अब्रवीत्त ।; and Com. of verse no. 122–123 aft. no. 127. 2 P1 अर्थे न 3 P1P2 om. इह; edr. add. इह 4 P1 add. अनुप्रास उपमा काव्यलिङ्गं च ।।१२२।।

1 P1 न व्यहन्यत । 2 P2 विहितो; P1 माऽभूत् 3 P1P2 om. कृतां; edr. add. कृता 4 P1 add. अनुप्रासः पर्याय काव्यलिङ्गं च ।।१२३।।

1 P1 अब्रवी । 2 P1 om. नलम् 3 P2 अदृष्टं मनसम् 4 P1 किमपीत्यौपाधिक° 5 P1 add. अपि 6 P1 add. वंशवसतेः नलषष्ठचन्तो वा पाठः । 7 P1 om. ते 8 P1 add. च 9 P1 स्फुटिके 10 P1 add. रूपकं तमःशब्दश्च श्लिष्टः ।।१२४।।

1 P1 रोहण । P2 om. यो............तदयमर्थः 3 P1 बत 4 P1 न भवेत् 5 P1 add. अनुप्रासो विरोधश्च ।।१२५।।

1 P1 याचित । P2 om. °ग्ने............प्रतिभूः । जी° 3 P1 रूपं पूर्वं 4 P1 add. अनुप्रासो हेतुरपह्नुतिश्च ।।१२६।।

1 P1 अभ्रा । P2 om. यत् खलु 3 P2 °पटेन 4 P1 अर्थिता 5 P1 add. स कुलं 6 P2 °बन्धादि 7 P1 add. विरोधः श्लेषः उत्प्रेक्षा ।।१२७।।

1 P1 ऊचिवा । 2 P1 add. अविसर्गः पाठो वा । अनुप्रासो रूपके (कं) च ।।१२८।।

1 P1 वर्म । 2 P1 किलेति श्रूयते here. 3 P2 om. वज्रमयं 4 P1 तत् 5 P1 मावजगण; and add. अनुप्रासो विरोधो हेतुश्च ।।१२९।।

1 P1 अद्वा(द्य) । 2 P1 add. च 3 P1 add. विद्वान् 4 P1 add. रूपकमुपमाऽपि । गुणशब्दः श्लिष्टः ।।१३०।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 प्रेयसी । 2 P1 सङ्गो 3 P2 om. कः 4 P1 add. जिता सुधांशुमुखानां चन्द्रप्रभृतीनां श्रीर्यया । अथवा 5 P1 add. व्यतिरेकः विरोध उपमा । कीर्तेः प्रतिनायकत्वप्रतीतेः समासोक्तिरपि ॥१३१॥

1 P1 याद्वरमिति । यन्नोऽस्मान् प्रति परं केवलं परेऽन्ये लोका अर्थयितारः यं त्वां प्रति तेऽपि वयमर्थयितारः अहो स पुनस्त्वं नाऽन्योऽधिकृतः । खलु नैव केवलं नोऽस्माकं मनोरथमात्रं पूरय । हे शूर ! यशोभिर्दिशोऽपि पूरय । अन्येषां वयमभिलाषं पूरयन्तोऽपि त्वामर्थयामः । हे शूर ! इत्थमसाधारणयशोलाभो यस्मात्तस्मात् दूतत्वं कुरु । अनुप्रासः ॥ 2 P2 om. यशोभिः ॥१३२॥

1 P1 अर्थिता । 2 P1 add. देवेषु 3 P1 add. अतिशयोक्तिः परिसङ्ख्याऽपि ॥१३३॥

1 P1 प्रवसत । 2 P1 प्रवसति 3 P1 शाकुन्तलेयहैहयपृथुवत्; P2 om. भरतार्जुनवैन्यवत् 4 P1 स्वकीय° 5 P1 add. वाक्यालङ्कारे वा 6 P1P2 अखिलं; edr. निखिलं 7 P1 °प्रकरणात् 8 P1 add. अनुमानेन च 9 P1 यात्रायाः सफलतैव 10 P1 add. द्रुतविलम्बितं वृत्तम् । अनुप्रास उपमा च ॥१३४॥

1 P1 इष्टि न । 2 P2 add. प्रति 3 P1 देव° 4 P1 इत्याश्रवणम् 5 P2 om. धर्मार्थि........यतः 6 P1 तव कीर्तिः पुनः 7 P1 शति 8 P1 om. नाम्नां 9 P1 अन्वयस्य 10 P1 add. यथा भूप्रभृतीनामादेशनात् अस्त्याद्यन्वयलोपः । एवं शुभ्राद्ययादेशनात् कृष्णपीतादिना नाम्नोऽन्वयलोपोऽस्तु 11 P1 om ते 12 P1 om. अत्र 13 P1 om. वृत्तम् and. add. अनुप्रासः श्लेषोऽतिशयोक्तिः आशीर्व्यतिरेकश्च ॥१३५॥

1 P1 यं प्रा । 2 P1 स च्छाया°........उदभवत् aft. प्रासूत 3 P1 om. °सङ्ख्याः 4 P1 add. अन्विष्यति 5 P1 कथं स 6 P1P2 अजनि; edr. समजनि 7 P1 add. अतिशयोक्तिर्विरोधोऽपि ॥१३६॥

1 P1 इत्या । 2 P1 add. यत्र तत्र सर्वत्र 3 P1 add. अथवाऽन्तर्द्धिसिद्धेः पश्चात् कृता भवच्चित्तता इति पूर्वमन्तर्द्धिसिद्धिः कार्यं, पश्चाद्भवच्चित्तेच्छा कारणमिति पौर्वापर्यविपर्ययादतिशयोक्तिः । 4 P1 om. अत्र 5 P1 add. अनुप्रास आशीर्विरोधश्च ॥१३७॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P2 text add. पुरुहूतकैतवं नामा 2 P1 श्रीहर्षम् । 3 P2 यस्य 4 P1 P2 om. महा°; edr. add. महा° 5 P1 add. शार्दूल-विक्रीडितम् ।।१३६।।

1 P1 श्रीमहाकविचाण्डू°; P2 om. धवलक°·········विरचितायां 2 P1 नैषधदीपिकायां पञ्चमः; P2 नैषधटीकायां 3 P1 om. समाप्तः ।।; P2 add. ग्रन्थसङ्ख्या ।।·········।। ॐ नमः शिवाय ।। श्रीः ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

सर्ग—६

[1]पूर्वसर्गे प्रथमम् इन्द्रादीनां दमयन्ती-स्वयंवरोत्कण्ठापुरःसरं पृथिव्यां गमनानन्तरं[2] रम्भाद्यप्सरसां च [3]मानग्लानिमभिधाय तदनु तेषामेव नलदर्शनेन विस्मितानां[4] छललक्षणेन गूढाभिसन्धिना प्रथमं[5] प्रार्थनाङ्गीकारम् उपवर्ण्य ततश्च तस्याऽभिसन्धेरुद्घाटने नलाङ्गीकारं स्मृतिशास्त्रोपदेशेन दातृगुणवर्णनया पराहृत्य बलादकीर्तिप्रत्यवा-यादिभयात्[6] दूतत्वे प्रतिश्रुते दूतगुणान् धर्मशास्त्रद्वारेण[7] दर्शयितुं कविः षष्ठं सर्गमारभते ।।

दूत्याय दैत्यारिपतेः प्रवृत्तो द्विषां निषेद्धा निषधप्रधानः ।
स भीमभूमिपति राजधानीं लक्ष्यीचकाराऽथ रथस्यदस्य ।।१।।

दूत्यायेति[1] । अथ दूतत्वाङ्गीकृतेरनन्तरं स निषध-प्रधानः[2] नलः दैत्यारीणां देवानां पत्युरिन्द्रस्य दूत्याय प्रवृत्तः सन् भीमाख्यस्य भूमीपतेर्नृपस्य राजधानीं विदर्भां रथस्यदस्य रथवेगस्य[3] लक्ष्यीचकार वेगविषयां[4] चक्रे । यतो द्विषां निषेद्धा । अन्यथा भीमस्य भयङ्करस्य नगर्यां कथम्[5] एकाकी रथेन गच्छेत्[6] ।।१।।

भैम्या समं नाजगणद्वियोगं स दूतधर्मे स्थिरधीरधीशः ।
पयोधिपाने मुनिरन्तरायं दुर्वारमप्यौर्वमिवौर्वशेयः ।।२।।

भैम्या[1] सममिति । सोऽधीशो[2] दूतधर्मे स्थिरधीः सन भैम्या समं वियोगम् अन्तरायं[3] नाऽजगणत् ।[4] उर्वश्या अपत्यं मुनिरगस्त्यः[5] पयोधिपाने[6] दुर्वारमपि और्वं वडवानलं यथाऽन्तरायं विघ्नरूपं नाऽजगणत् । और्वशेयो[7] मैत्रावरुण इत्यर्थः । यदुक्तमनुक्रमण्याम्-मित्रा-वरुणयोर्दीक्षितयोरुर्वशीमप्सरसं[8] दृष्ट्वा वासतीवरे (?) कुम्भे रेतोऽपतत्ततोऽगस्त्यवसिष्ठावजायेतामि (?) ति[9] । उरु[10] प्रचुरम् अश्नाति भुङ्क्ते[11] उर्वशी तस्याः पुत्रस्य[12] बहुभोजित्वान्न गणना[13] ।।२।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

नलप्रणालीमिलदम्बुजाक्षीसंवादपीयूषपिपासवस्ते ।
तदध्ववीक्षार्थमिवाऽनिमेषा देशस्य तस्याऽऽभरणीबभूवुः ।।३।।

नलप्रणालीति ।[1] ते[2] देवाः तस्य देशस्याऽऽभरणीबभूवुः । [3]राजधानीलक्षणदेशस्य समीपे आगत्य स्थिताः[4] परम्[5] अनिमेषाः । उत्प्रेक्षते-तस्य नलस्याऽध्वनो वीक्षार्थमिव निमेषरहिताः । किंभूताः ? । नलप्रणाल्या[6] नलद्वारेण मिलन् योऽम्बुजाक्ष्या दमयन्त्याः संवादः स एव पीयूषममृतं तत् पिपासवः[7] ।।३।।

तां कुण्डिनाख्यापदमात्रगुप्तामिन्द्रस्य भूमेरमरावतीं सः ।
मनोरथः सिद्धिमिव क्षणेन रथस्तदीयः पुरमाससाद ।।४।।

तां कुण्डिनेति[1] । तदीयः[2] नलसम्बन्धी स रथस्तां भूमेरिन्द्रस्य भीमस्य राज्ञः अमरावतीं विदर्भां क्षणेन[3] आससाद । किं भूताम्[4] ? । कुण्डिन इत्याख्या-पदमात्रेण नाममात्रेण गुप्तां छन्नाम् । क इव ? । मनोरथ इव । यथा स क्षणेन सिद्धिं प्राप्नोति तथा पुरं प्राप[5] ।।४।।

भैमीपदस्पर्शकृतार्थरथ्या सेयं पुरीत्युत्कलिकाकुलस्ताम् ।
नृपो निपीय क्षणमीक्षणाभ्यां भृशं निशश्वास सुरैः क्षताशः ।।५।।

भैमीपदेति[1] । स नृपस्तां पुरीं क्षणम् ईक्षणाभ्यां निपीय भृशं निशश्वास[2] । किं भूतः ? सुरैः क्षता भग्ना आशा यस्य स तथा । किं भूतः ? इति उत्कलिकया उत्कण्ठतया आकुलः । इतीति[3] किम् ? । सा इयं पुरी भैम्याः पदस्पर्शैश्चरणभ्रमणेन कृतार्था रथ्या यस्याः सा तथा[4] ।।५।।

स्विद्यत्प्रमोदाश्रुलवेन वामं रोमाञ्चभृत्पक्ष्मभिरस्य चक्षुः ।
अन्यत् पुनः कम्प्रमपि स्फुरत्त्वात् तस्याः पुरः प्राप नवोपभोगम् ।।६।।

स्विद्यत्प्रमोदेति[1] । अस्य वामं चक्षुः तस्याः पुरः नवम्[2] उपभोगं प्राप ददर्श किं भूतम् ? । प्रमोदेन अश्रुणो[3] बाष्पस्य लवेन स्विद्यत् । तथा पक्ष्मभिः रोमाञ्चभृत् । पक्ष्मरोमाण्येव रोमाञ्चः । यः स्त्रिया नवम् उपभोगं[4] लभते स सात्त्विक-स्वेदरोमाञ्चाभ्यां[5] व्याप्यते । अन्यत् दक्षिणं चक्षुः पुनः स्वेदरोमाञ्चसहितं तथा स्फुरतो भावः स्फुरत्त्वम् । तस्मात् कम्प्रमपि कम्पयुक्तं[6] च[7] सत् तस्याः नवोपभोगं[8] प्राप । दक्षिणस्फुरणेन प्रियालाभसूचनम्[9] ।।६।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

रथादसौ सारथिना सनाथाद्राजाऽवतीर्याऽऽशु पुरं विवेश ।
निर्गत्य बिम्बादिव भानवीयात्सौधाकरं मण्डलमंशुसङ्घः ॥७॥

रथादसाविति[1] । असौ राजा[2] नलः सारथिना सनाथात् रथात् अवतीर्य आशु पुरं विवेश । यथा भानोः श्रीसूर्यस्य सम्बन्धिनो बिम्बात् निर्गत्य अंशूनां किरणानां सङ्घ; सौधाकरं चन्द्रमण्डलं[3] विशति देवैः पीतं चन्द्रं सुषुम्नाख्यो रविरश्मिराप्यायति[4] ॥७॥

चित्रं तदा कुण्डिनवेशिनः सा नलस्य मूर्तिर्ववृते न दृश्या ।
बभूव तच्चित्रतरं तथापि विश्वैकदृश्यैव यदस्य मूर्तिः ॥८॥

चित्रं[1] तदेति । चित्रम् आश्चर्यम् । यत्तदा कुण्डिनवेशिनः[2] कुण्डिनप्रवेशशीलस्य[3] नलस्य[4] मूर्तिर्न दृश्या ववृते, दृश्या जाता । तच्चित्रतरम्[5] अति आश्चर्यतरं बभूव[6] । तथाऽपि यत् अस्य मूर्तिः[7] शरीराकृतिः विश्वमध्ये एका दृश्यैव बभूव । यददृश्यं तत्कथं सर्वदृश्यम् ? अथ च रमणीया । एकैव[8] ॥८॥

जनैर्विदग्धैर्भवनैश्च मुग्धैः पदे पदे विस्मयकल्पवल्लीम् ।
तां गाहमाना पुरमस्य दृष्टिरथाददे राजकुलातिथित्वम् ॥९॥

जनैर्विदग्धैरिति[1] । अस्य दृष्टिः तां पुरं गाहमाना अथ राजकुलातिथित्वं आददे[2] । राजमन्दिरं गता[3] । किं भूताम् ? विदग्धैर्दक्षैर्जनैस्तथा [4]मुग्धैरन्यैर्भवनैर्गृहैश्च पदे पदे[5] स्थाने स्थाने विस्मयस्य कल्पवल्लीम्[6] अतिशयेन दात्रीम्[7] ॥९॥

हेलां दधौ रक्षिजनेऽस्त्रसज्जे लीनश्चरामीति हृदा ललज्जे ।
द्रक्ष्यामि भैमीमिति सन्तुतोष दूतं विचिन्त्य स्वमसौ शुशोच ॥१०॥

हेलां[1] दधाविति । स नलः अस्त्रैःसज्जे[2] रक्षिणां जने[3] जनविषये हेलाम् अवज्ञां दधौ[4] तथा लीनो गुप्तः सन् चरामि[5] इति कृत्वा हृदा[6] हृदयेन ललज्जे । अहमद्य भैमीं द्रक्ष्यामीति कृत्वा सन्तुतोष । किं च स्वम् आत्मानं दूतं विचिन्त्य शुशोच । दूतो निकृष्टः । तथा दूत्ये सति मनोविकारो[7] धर्मो न भवति । अतः शोकः[8] ॥१०॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

अथोपकार्याममरेन्द्रकार्यात् कक्षासु रक्षाधिकृतैरदृष्टः ।
भैमीं दिदृक्षुर्बहु दिक्षु चक्षुर्दिशन्नसौ[1] तामविशद्विशङ्कः ।।११।।

अथोपकार्यामिति[2] । असौ ताम् उपकार्यां राजभवनम्[3] अमरेन्द्रकार्यात् विशङ्कः सन् अविशत्[4] । किं भूतः ? । भैमीं दिदृक्षुः सन् बहु दिक्षु सर्वत्र [5]चक्षुर्दिशन्[6] । किंभूतः ? । कक्षासु द्वारान्तरेषु रक्षाधिकृतैः अदृष्टः[7] ।।११।।

अयं क इत्यन्यनिवारकाणां गिरा विभुर्द्वारि विभुज्य कण्ठम् ।
दृशं दधे[1] विस्मयनिस्तरङ्गां स लङ्घितायामपि राजसिंहः ।।१२।।

अयं क[2] इति । स विभुः राजा सिंह इव । उपमितं व्याघ्रादिभिः सामान्याप्रयोग (पा° II. i. 56) इति समासः । अथ च[3] राजैव सिंह इति रूपकम् । अथ वा[4] राज्ञां सिंह लङ्घितायामपि[6] अतिक्रान्तायामपि द्वारि विस्मयेन निस्तरङ्गां निश्चलां दृशं दधे । किं कृत्वा ? । कण्ठं विभुज्य वक्रीकृत्य पश्चाद् व्याघुटिकया अयं कः प्रविशति[6] इत्यन्यस्य प्रवेष्टुर्निवारकाणां रक्षकाणां द्वाःस्थानां गिरा पश्चात् व्यावृत्य दृष्टवान् । नलो जानाति । एभी रक्षकैरहं दृष्टो निवारितश्च परं तैरन्यः कोऽपि प्रवेष्टा[7] आक्षिप्तः सिंहोऽपि पश्चादवलोकनशीलो भवति । अत्र कण्ठं विभुज्य दृशं दधे इति रूपकपरिग्रहे[8] साधकं न तूपमाया बाधकम् इति रूपकमेव[9] प्रायो व्याख्येयम्[10] ।।१२।।

अन्तःपुरान्तः स निरीक्ष्य[1] बालां काञ्चित्समालब्धुमसंवृतोरुम् ।
निमीलिताक्षः परया भ्रमन्त्या सङ्घट्टमासाद्य चमच्चकार ।।१३।।

अन्तःपुरान्तरिति[2] । स नलः[3] परयाऽन्यया बालया कार्यवशाद् भ्रमन्त्या सत्या[4] सङ्घट्टं तस्याः स्पर्शमासाद्य चमच्चकार चमत्कृतवान् । किंभूतः ? । काञ्चिद् बालाम् अन्तःपुरान्तः समालब्धुम् उद्वर्तयितुम् असंसंवृतोरुम् असंवृतौ[5] अनाच्छादितौ ऊरू यया तां तथाविधां निरीक्ष्य[6] निमीलिताक्षः । परस्त्रिया गुह्यं स्थानं न द्रष्टव्यमिति बुद्ध्या चक्षुषी निमीलितवान् । ततश्च अन्यया स्त्रिया सङ्घर्षितस्ततः परस्त्रीस्पर्शभयेन चमत्कृतः[7] ।।१३।।

अनादिसर्गस्रजि वाऽनुभूता चित्रेषु वा भीमसुता नलेन ।
जातैव यद्वा जितशम्बरस्य[1] सा शाम्बरीशिल्पमलक्षि दिक्षु ।।१४।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[2]अनादिसर्गेति । सा दमयन्ती तेन नलेन सर्वासु दिक्षु अलक्षि । वा[3] अथवा[4] अनादिर्या सर्गस्रक् सृष्टिपरम्परा[5] तस्याम् अनुभूता सती सर्वत्र दृष्टा नलो दमयन्ती च सर्गे सर्गे उत्पन्नौ[6], तत्राऽनुभूतैव ।[7] अथवा चित्रेषु अनुभूता भीमसुता[8] । यद्वा जितः शम्बरो येन तस्य कामस्य शाम्बर्या मायाया[9] शिल्पं[10] जातैव[11] । कन्दर्पेण शाम्बरीं मायां जानता दिशि दिशि दमयन्ती[12] सृष्टा[13] ।।१४।।

अलीकभैमीसहदर्शनान्न तस्याऽन्यकन्याप्सरसो रसाय ।
भैमीभ्रमस्यैव ततः प्रसादैर्भैमीभ्रमस्तेन न तास्वलम्भि ।।१५।।

अलीकभैमीति[1] । तस्याऽन्याः कन्या एवाऽप्सरसः न रसाय बभूवुः । कस्मात् ? । अलीका भ्रान्त्या दृष्टा या भैमी तस्याः सहदर्शनात् । कन्या अपि पश्यति । भ्रान्तिभैमीमपि सहैव पश्यति । ततश्च तस्याः समीपे ताः विरूपत्वात् नाऽनुरागाय । ततश्च भैम्या भ्रमस्य भ्रान्तेः प्रसादैरेव[2] तेन नलेन तासु कन्यासु भैम्या भ्रमो विलासः न अलम्भि[3] ।।१५।।

भैमीनराशे हृदि मन्मथेन दत्तः स्वहस्ताद्विरहाद्विहस्तः ।
स तामलीकामवलोक्य तत्र क्षणादपश्यन् व्यषदद्विबुद्धः ।।१६।।

भैमीनिराशे[1] इति । स नलस्ताम् अलीकां दमयन्तीम् अवलोक्य[2] तत्र पश्चात् क्षणात् विबुद्धः बोधितभ्रान्तिः[3] सन् अपश्यन् व्यषदत् विषादं प्राप । किंभूतः ? हृदि विरहात् विहस्तो व्याकुलः । किंभूते? । भैम्यां विषये निराशे आशारहिते किंभूतात् ? । मन्मथेन[4] दत्तः स्वहस्तो हस्तावलम्बो यस्य तस्मात्तथा उद्दीपितात् । यस्य हस्तो दीयते तस्माद्विगतहस्तो भवति इति विरोधः[5] ।।१६।।

प्रियां विकल्पोपहृतां स यावद्दिगीशसन्देशमजल्पदल्पम् ।
अदृश्यवाग्भीषितभूरिभीरुभवो रवस्तावदचेतयत्तम् ।।१७।।

प्रियां[1] विकल्पेति । स नलः यावत् विकल्पेन भ्रान्तिज्ञानेन उपहृतां दर्शितां प्रियां दमयन्तीम् अल्पं दिगीशानामिन्द्रादीनां सन्देशम् अजल्पत् । तावत् रवः कोलाहलः तम्[2] अचेतयत् चेतनावन्तं मोहरहितं चकार । किंभूतः ? । अदृश्यस्य पुरुषस्य वाचो भीषिता भूरयो[3] भीरवः स्त्रियः ताभ्यो भव उत्पन्नः[4] ।।१७।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

पश्यन् स तस्मिन्मरुताऽपि तन्व्याः स्तनौ परिस्प्रष्टुमिवाऽस्तवस्त्रौ ।
अक्षान्तपक्षान्तमृगाङ्कमास्यं बभार[1] तिर्यग्वलितं विलक्षः ॥१८॥

पश्यन्[2] स तस्मिन्निति । स नलः आस्यं तिर्यग्वलितं व्यावर्त्त[3] विलक्षः सन् बभार । किंभूतम् ? । अक्षान्तः असोढः पक्षान्तस्य पूर्णिमाया मृगाङ्को येन तत्तथा जितचन्द्रम् । किं कुर्वन् ? । तस्मिन् सौधे तन्व्याः स्तनौ पश्यन् । किं[4] भूतौ ? । मरुताऽपि[5] वायुनाऽपि परिस्प्रष्टुमिव अस्तवस्त्रौ क्षिप्तवस्त्रौ[6] । तस्याः परस्त्रीत्वात् स्तनदर्शने[7] मुखं वालितवान्[8] ॥१८॥

अन्तःपुरे विस्तृतवागुरोऽपि बालावलीनां वलितैर्गुणौघैः ।
न कालसारं हरिणं तदक्षिद्वयं प्रभुर्बद्धुमभून्मनोभूः ॥१९॥

अन्तःपुरे[1] इति । मनोभूः तस्य नलस्य अक्षिद्वयमेव कालसारं हरिणं बद्धुं प्रभुर्नाभूत । अक्षि कालं कृष्णवर्णं सारं प्रधानं यत्र तत्तथा । हरिणं पाण्डुरम् । किं भूतः ? । बालावलीनां कन्यापङ्क्तीनां वलितैर्दृढैर्गुणानां सौन्दर्यादीनाम् ओघैः अन्तःपुरे विस्तृता[2] वागुरा जालिका येन स तथा । अथ च वालावलीनां केशावलीनां[3] वलितैर्गुणितैर्गुणौघैर्दोरकैर्विस्तृतवागुरोऽपि कालसारं न बध्नाति[4] ॥१९॥

दोर्मूलमालोक्य कचं रुरुत्सोस्ततः कुचौ तावनुलेपयन्त्याः ।
नाभीमथैष श्लथवाससोऽनु मिमील दिक्षु क्रमकृष्टचक्षुः ॥२०॥

दोर्मूलमिति[1] स नलोऽनु पश्चात् मिमील । किंभूतः ? । सर्वासु[2] दिक्षु क्रमेण कृष्टं चक्षुर्येन स तथा । तथा हि कस्यांचित् दिशि कचं केशपाशं रुरुत्सोर्बद्धुमिच्छोर्नायिकाया दोर्मूलं बाहुमूलम् आलोक्याऽपरस्यां दत्तचक्षुः । तदनु तौ स्तनौ अनुलेपयन्त्याः कस्याश्चित् कुचौ आलोक्याऽन्यत्र दत्ताक्षिः ।[3] अथ पश्चात् कस्याश्चित् श्लथवाससः नायिकायाः नाभीं[4] वीक्ष्याऽनुमिमीले[5] ॥२०॥

मीलन्न[1] शेकेऽभिमुखागताभ्यां धर्तुं निपीडय स्तनसान्तराभ्याम् ।
स्वाङ्गान्यपेतो विजगौ स पश्चात् पुमङ्गसङ्गोत्पुलके पुनस्ते ॥२१॥

मीलन्निति[1] अयं नलः मीलन् निमीलित-चक्षुर्भ्रमन्[2] अभिमुखं परस्परम् आगताभ्यां द्वाभ्याम् अन्तःपुरकन्याभ्यां निपीडय धर्तुं न

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

शेके। किं भूताभ्याम्[3] ?। सान्तराभ्यां स्तनाभ्यां मध्ये पतितत्वान्न धर्तुं न शक्तिः। परं स पश्चात् अपेतः स्तनान्तरान्निर्गतः सन् स्वाङ्गानि विजगौ परस्त्रीसङ्गान्निनिन्द[4]। ते द्वे स्त्रियौ पुनः पुंसो अङ्गं पुमङ्गं तत्सङ्गेन नलाङ्गस्पर्शेन उत्पुलके जाते[5] ॥२१॥

निमीलनस्पष्टविलोकनाभ्यां कदर्थितस्ताः कलयन्कटाक्षैः।
स रागदर्शीव भृशं ललज्जे स्वतः सतां ह्रीः[1] परतोऽतिगुर्वी ॥२२॥

निमीलनेति। स नलः भृशं ललज्जे। किं कुर्वन् ?। ताः अन्तःपुरपुरन्ध्रीः कटाक्षैरर्धनिमीलनैः कलयन्। किं भूतः ?। निमीलनेन स्पष्टविलोकनेन च[3] कदर्थितः। चक्षुर्निमीलनात् स्त्रीस्पर्श विलोकनात् परस्त्रीणामवयवदर्शनम् उभयमपि शास्त्रविरुद्धम्। क इव ?। यथा रागदर्शी कटाक्षैः पश्यति तथा पश्यन् लज्जितः। यतः सतां महात्मनाम् परतः सकाशात् लोकेभ्यः सकाशात् स्वतः स्वस्यैवाऽग्रे ह्रीर्लज्जा अतिगुर्वी[4] ॥२२॥

रोमाञ्चिताङ्गीमनु तत्कटाक्षैर्भ्रान्तेन कान्तेन रतेर्निदिष्टः।
मोघः शरौघः कुसुमानि नाऽभूत्तद्धैर्यपूजां प्रतिपर्यवस्यन् ॥२३॥

रोमाञ्चिताङ्गीमिति[1]। कुसुमानि शरौघः मोघः निष्फलो नाऽभूत्। किं भूतः ?। काञ्चित् स्वभावतो रोमाञ्चिताङ्गीं बालाम् अनु लक्षीकृत्य येन तस्य नलस्य कटाक्षाः स्वभावत एव अर्द्धमीलितालोकनानि तैः कृत्वा भ्रान्तेन रवेः कान्तेन स्मरेण नलं प्रति निदिष्टः प्रेरितः। कामस्य मनसि इति भ्रान्तिर्जाता। यदस्य कटाक्षैः अनुरागादियं रोमाञ्चिता ततश्च बाणा मुक्ताः। तर्हि कथं मोघो नाऽभूदित्याह-किं कुर्वन् शरौघः ?। तस्य नलस्य धैर्यस्य पूजां प्रतिपर्यवस्यन् परिणमन्। पश्चात् कामेन तस्य[2] निर्विकारत्वे ज्ञाते तान्येव पुष्पाणि धैर्यपूजायां[3] कृतानि। अतिमहात्माऽयं यन्न विक्रियते[4] ॥२३॥

हित्वैव वर्त्मैकमिह भ्रमन्त्याः स्पर्शः स्त्रियाः सुत्यज इत्यवेत्य।
चतुष्पथस्याऽऽभरणं बभूव लोकावलोकाय सतां स दीपः ॥२४॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]हित्वैव वर्त्मैकमिति । स नलः चतुर्णां पथां समाहारः चतुष्पथं तस्य आभरणं बभूव । किं कृत्वा ? । इति अवेत्य विचार्य । यत्[2] इह चतुष्पथे पृथुलमार्गे भ्रमन्त्याः स्त्रियाः स्पर्शः सुत्यजः सुखेन परिह्रियते । अत एनं सङ्कीर्णं वर्त्म मार्गं हित्वैव तत्र स्थितः यत्र सर्वे मार्गा मिलन्ति । तं[3] विशिनष्टि । कीदृगित्याह-यतः सतां लोकावलोकाय दीपो लोकव्यवहारदर्शनाय दीपरूपः । चतुष्पथे किल दीपेन भाव्यम्[4] ।।२४।।

उद्वर्तयन्त्या हृदये निपत्य नृपस्य दृष्टिर्न्यवृतद् द्रुतेव ।
वियोगिवैरात्कुचयोर्नखाङ्कैरर्धेन्दुलीलैर्गलहस्तितेव ।।२५।।

[1]उद्वर्तयन्त्या इति । नृपस्य दृष्टिः द्रुता एव वेगेनैव न्यवृतत् निवृत्ता ।[2] अनुदात्तत्वान्नित्यमात्मनेपदे प्राप्ते, द्युद्भ्यो लुङी (पा°. I. iii. 91) ति वा परस्मैपदम् । कालापके पुनर्वृतेर्द्धातोरात्मनेपदिऽपि द्युतादित्वात्परस्मैपदेऽण् विधानसामर्थ्यात्, अद्यतन्यां कर्तरि परस्मैपदम् (III. iv. 83) । किं कृत्वा ? । कस्याश्चित् उद्वर्तयन्त्या अङ्गरागं कुर्वन्त्या; कामिन्या हृदये निपत्य । उत्प्रेक्षते-तस्याः कुचयोर्नखाङ्कैः गलहस्तिता इव[3] । किं भूतैः ? ।[4] अर्धेन्दुलीलैः । नखक्षतानि अर्द्धचन्द्राकाराणि भवन्ति । यो गले ध्रियते सोऽपि अर्द्धचन्द्राकारं हस्तं कृत्वा प्रेर्यते । कस्मात् ? । वियोगिभिः सह वैरात् । यः किल विरही तस्याऽर्धेन्दुना वैरम् । कुचयोर्नखाङ्कैरपि सह वैरम् । स्त्रिया प्राप्त्यभावात्[5] । नलश्च दमयन्त्या सह वियोगी[6] ।।२५।।

तन्वीमुखं द्रागधिगत्य[1] चन्द्रं वियोगिनस्तस्य निमीलिताभ्याम् ।
द्वयं द्रढीयः कृतमीक्षणाभ्यां तदिन्दुता च स्वसरोजता च ।।२६।।

[2]तन्वीमुखमिति । तस्य वियोगिनो नलस्य ईक्षणाभ्यां द्वयं द्रढीयः निश्चितं कृतम् । एका तस्य तन्वीमुखस्य[3] इन्दुता चन्द्रता [4]च निश्चिता कृता । अपरा स्वस्याऽऽत्मनः लोचनयोरेवेत्यर्थः सरोजता पद्मता वा[5] निश्चिता [6]दृढीकृता । किं भूताभ्याम् ? । द्राक् झटिति तन्व्याः कस्या अपि मुखं चन्द्रम् अधिगत्य[7] निमीलिताभ्याम् परस्त्रीशङ्कया । किं भूतस्य[8] ? । [9]तस्य नलस्य वियोगिनः । कमलं हि[10] चन्द्रदर्शने सङ्कुचति[11] ।।२६।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

चतुष्पथे तं विनिमीलिताक्षं चतुर्दिगेताः सुखमग्रहीष्यन् ।
सङ्घट्ट्य तस्मिन् भृशभीनिवृत्तास्ता एव तद्वर्त्म न चेददास्यन् ॥२७॥

[1]चतुष्पथे इति । तं नलं चतुष्पथे स्थितं परस्त्रीदर्शनभयात् विनिमीलिताक्ष चतसृभ्यो दिग्भ्यः एता आगताश्चतस्रः स्त्रियः सुखं यथा भवति एवं अग्रहीष्यन् अधरिष्यन् । चेत् यदि ता एव चतस्रः स्त्रियः तस्मिन्नले अदृश्ये सङ्घट्ट्य सङ्घट्टं प्राप्य को [2]नामाऽदृश्योऽयं कश्चिदिति मत्वा भृशं भिया निवृत्ताः दूरे स्थिताः तस्य नलस्य वर्त्म मार्गं न[3] अदास्यन् परं[4] तासु निः[5]सृतासु निःसृत्य गच्छति[6] ॥२७॥

सङ्घट्टयन्त्यास्तरसाऽऽत्मभूषाहीराङ्कुरप्रोतदुकूलहारी ।
दिशा नितम्बं परिधाप्य तन्व्यास्तत्पापसन्तापमवाप भूपः ॥२८॥

[1]सङ्घट्टयन्त्या इति । स भूपः कस्याश्चित् तन्व्या नितम्बं दिशा[2] परिधाप्य दिग्वा (स) सं कृत्वा तस्य परस्त्रीवस्त्राकर्षणस्य पापस्य[3] सन्तापं दुःखम् अवाप[4] । मया [5]पापं कृतमिति हा कष्टम् । किं कुर्वन्त्याः[6] । [7]तरसा बलादागत्य सङ्घट्टयन्त्या नलं घर्षयन्त्याः । किं भूतः सः ? । आत्मनो भूषार्थं ये हीरा माणिक्यानि तेषाम् अङ्कुरेषु प्रोतं विलग्नं दुकूलं हरतीत्येवंशीलः अभीक्ष्णं हरतीति वा । दुकूलाञ्चलदशा नलभूषाहीराङ्कुराग्रे विलग्नाः तेन वस्त्राकर्षणं जातमित्यर्थः[8] ॥२८॥

इतः कयाचित् पथि कन्दुकेन सङ्घट्ट्य भिन्नः करजैः कयाऽपि ।
कयाचनाऽक्तः कुचकुङ्कुमेन संभुक्तकल्पः स बभूव ताभिः ॥२९॥

इतः[1] कयाचिदिति । स नलः पथि कयाचित् अदृश्यमान एव [2]कन्दुकेन क्रीडन्त्या दण्डकेन हतः । कयाऽपि सङ्घट्ट्य [3]करजैर्नखैर्भिन्नः । कयाचन अदृश्य एव कुचकुङ्कुमेन अक्तः [4]अभ्यक्तः अनुलिप्तः[5] । अतश्च स[6] ताभिः स्त्रीभिः ईषदपरिसमाप्तः[7] संयुक्तः संभुक्तकल्पो बभूव । किञ्चिच्च न संभुक्तः धर्मलोपे तद्धिते[8] आर्थी उपमा[9] ॥२९॥

छायामयः प्रैक्षि कयाऽपि हारे निजे स गच्छन्नथ नेक्ष्यमाणः ।
तच्चित्तयाऽन्तर्निरचायि चारु स्वस्यैव तन्व्या हृदयं प्रविष्टः ॥३०॥

छायामय[1] इति । कयाऽपि स नलः गच्छन् सन् निजे हारे छायामयः प्रतिबिम्बितः प्रैक्षि दृष्टः । अथ पश्चात् न ईक्ष्यमाणः

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

अदृश्यमानः सन् तया तन्व्या तच्चित्तया[2] सत्या तस्मिन्नेव[3] नले चित्तं यस्याः तया तथाविधया [4]स्वस्यैव हृदयं प्रविष्टोऽन्तश्चारु निरचायि। अयमर्थः—यत्[5] स्वस्यैव हृदयं प्रविष्टः। ममैव[6] हृदि अयं प्रविष्टः इति निरचायि। अन्तर्निश्चितं तत् चारु सम्यक् निश्चितम्[7]। तया[8] एकचित्तया[9] ॥३०॥

तच्छायसौन्दर्यनिपीतधैर्याः प्रत्येकमालिङ्गदमू रतीशः।
रतिप्रतिद्वन्द्वितमासु नूनं नामूषु निर्णीतरतिः कथञ्चित् ॥३१॥

[1]तच्छायसौन्दर्येति। रतीशः अमूरन्तःपुरकन्याः प्रत्येकम् आलिङ्गत्। किं भूताः? तस्य छाया प्रतिबिम्बस्तच्छायं तस्य सौन्दर्येण निपीतं[2] धैर्यं यासां तास्तथा। नूनं शङ्के। अमूषु स्त्रीषु कथञ्चिदपि न निर्णीता निश्चिता रतिः रमणं येन, स तथा। [3]अथ च न निर्णीता रतिर्भार्या येन, अत एव बह्वीनामालिङ्गनम्। किं भूतासु?। रतेः प्रतिद्वन्द्वितमासु स्पर्द्धिनीषु सदृशीषु। रतिभ्रान्त्या आलिङ्गत्। विभाषा सेनासुराच्छायाशालानिशानामि (पा.° II. vi. 25) त्येतदादिश्लोकचतुष्टये छायान्तस्य तत्पुरुषस्य नपुंसकत्वम्[4] ॥३१॥

तस्माददृश्यादपि नाऽतिबिभ्युस्तच्छायरूपाहितमोहलोलाः।
मन्यन्त एवादृतमन्मथाज्ञाः प्राणा[1] अपि प्रांशुदृशस्तृणाय ॥३२॥

[2]तस्माददृश्यादिति। ताः[3] स्त्रियः तस्मान्नलाददृश्यादपि न अतिशयेन बिभ्युः। किं भूताः[4]?। तस्य [5]छायारूपेण आहितो यो मोहस्तेन लोलाः। [6]किं नु प्रांशुदृशो नायिकाया आदृता मन्मथस्य आज्ञा याभिः एवंविधाः सत्यः प्राणा[7] अपि तृणाय[8] मन्यन्ते[9] एव[10]। स्वान् सुदृश इति पाठे स्वान् प्राणानिति सम्बन्धः[11] ॥३२॥

जागर्ति तच्छायदृशां पुरा यः स्पृष्टे च तस्मिन् विससर्प कम्पः।
द्रुतं द्रुते तत्पदशब्दभीत्या स्वहस्तितश्चारुदृशां परं सः ॥३३॥

जागर्ति[1] तच्छायेति। यः कम्पः पुरा तस्य[2] [3]छायदृशां स्त्रीणां जागर्ति उल्ललास। यावत्पुरानिपातयोर्लट्[4] (पा° III. iii. 4)। सात्त्विकभावादुत्पन्नः पश्चात् तस्मिन्नले स्पृष्टे च स एव कम्पः विससर्प। सात्त्विक एव प्रसरं भेजे। तासां चारुदृशां तस्मिन्नले द्रुतं

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

वेगेन द्रुते गते सति तस्य पदानां शब्दात् भीत्या परं केवल स्वहस्तितः[5] आत्महस्तगतः कृतः। यदा अदृश्यस्य[6] भूतादेः पादानां शब्दः श्रूयते तदा महान् कम्पो भवति। ततश्च विद्यमान एव कम्पः भयादधिको बभूव[7] ।।३३।।

उल्लास्यतां स्पृष्टनलाङ्गमङ्गं तासां नलच्छायपिबाऽपि दृष्टिः।
अश्मैव रत्यास्तदनर्ति पत्या छेदेऽप्यबोधं यदहृषि लोम ।।३४।।

[1]उल्लास्यतामिति। तासां स्त्रीणाम् अङ्गं [2]स्पृष्टं नलाङ्गं येन तत्तथाविधं भणित्वा उल्लास्यताम् उल्लासं प्रमदं प्राप्नोतु। तथा[3] नलच्छायस्य पिबा दृष्टिरपि उल्लास्यताम्। कर्मकर्तरि आत्मनेपदम्। तत्[4] रत्याः पत्या कामेन अश्मा पाषाण एवाऽनर्तिः नर्तितः[5] यल्लोमा[6]ऽहर्षि[7]। किं भूतम्?। छेदेऽपि सति [8]अबोधं जडम् अचेतनस्याऽपि लोम्नो हर्षः[9] ।।३४।।

यस्मिन्नलस्पृष्टकमेत्य हृष्टा भूयोऽपि तं देशमगान्मृगाक्षी।
निपत्य तत्राऽस्य धरारजःस्थे पदे प्रसीदेति शनैरवादीत् ।।३५।।

यस्मिन्नलेति[1]। काचिन्मृगाक्षी[2] यस्मिन् प्रदेशे [3]नलस्पृष्टकं नाम आलिङ्गनविशेषम् एत्य हृष्टा भूयोऽपि तं देशम् अगात् तत्र प्रदेशे अस्य नलस्य धरायाः[4] पृथिव्या रजसि स्थे[5] स्थिते प्रतिबिम्बिते [6]पदे दृष्टे सति निपत्य[7] इति शनैर्मन्दम् अवादीत्-यत्[8] हे कामिन्[9]! प्रसीद। तथा चोक्तम् यद्योषितः सन्मुखमागतायां [10]अन्यापदेशात् व्रजतो नरस्य। गात्रेण गात्रं भजते रतज्ञा आलिङ्गनं स्पृष्टकमेतदाहुः (रतिरहस्यम्-VI. i.)[11] ।।३५।।

भ्रमन्नमुष्यामुपकारिकायामायस्य भैमीविरहात् कृशीयान्।
असौ मुहुः सौधपरम्पराणामधत्त विश्रान्तिमुपत्यकासु ।।३६।।

[1]भ्रमन्नमुष्यामिति। असौ मुहुः[2] सौधपरम्पराणाम् उपत्यकासु अधोभूमिषु विश्रान्तिम् अधत्त उपाधिभ्यां त्यकन्नासन्नारूढयोः[3] (पा° V. ii. 34)। किं कृत्वा?। आयस्य आयासं प्राप्य। यतः[4] भैम्या विरहात् कृशीयान् कृशतरः। कि कुर्वन्?। अमुष्याम् उपकारिकायां राजगृहे भ्रमन्[5] ।।३६।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

उल्लिख्य हंसेन दले नलिन्यास्तस्मै यथाऽदर्शि तथैव भैमी ।
तेनाऽभिलिख्योपहृतस्वहारा कस्या न दृष्टाऽजनि विस्मयाय ।।३७।।

उल्लिख्य[1] हंसेनेति । भैमी तस्मै नलाय हंसेन नलिन्या दले पद्मिनीपत्रे उल्लिख्य यथा[2] यादृशी अदर्शि पूर्वं दर्शिता अभूत् । तथैव तादृशी एव तेन नलेनाऽपि तत्र[3] राजगृहभूमिप्रदेशे अभिलिख्य उपहृत: स्वकीयो हारो यस्या: तथाविधा दृष्टा सती सा दमयन्ती कस्या अन्त:पुरस्त्रिया विस्मयाय न अजनि । अपि तु सर्वासामा[4]श्चर्याय बभूव । केनेयं लिखितेति[5] ।।३७।।

कौमारगन्धीनि निवारयन्ती वृत्तानि रोमावलिवेत्रचिह्ना ।
साऽऽलिख्य तेनैक्ष्यत यौवनीयद्वा:स्थामवस्थां परिचेतुकामा ।।३८।।

[1]कौमारगन्धीनीति । सा दमयन्ती तेन नलेन आलिख्य ऐक्ष्यत[2] । किं भूता ? । यौवनीयद्वारि यौवनस्य द्वारे तिष्ठतीति याऽवस्था ताम्[3] अवस्थां बाल्ययौवनयसो: सन्धिलक्षणाम् अवस्थां परिचेतुकामा अभ्यसितुमिच्छु: । द्वा:स्थाया: प्रतिहार्या धर्मानाह-किं कुर्वती?[4] कौमारगन्धीनि वृत्तानि आचरणानि निवारयन्ती कौमारेऽज्ञानभावाल्लज्जादिकं न स्यात् । तत्र तु भवति । तथा किं भूता ? । रोमावलिरेव वेत्रो दण्डश्चिह्नं यस्या: सा तथा[5] ।।३८।।

पश्या: पुरन्ध्री: प्रति सान्द्रचन्द्ररज: कृतक्रीडकुमारचक्रे ।
चित्राणि चक्रेऽध्वनि चक्रवर्तिचिह्नं तदङ्घ्रिप्रतिमासु चक्रम् ।।३९।।

पश्या:[1] पुरन्ध्रीरिति । तस्य नलस्य अङ्घ्रिप्रतिमासु चरणप्रतिबिम्बेषु चक्रं रेखाचिह्नम् [2]अध्वनि धवलगृहे वर्तमानं पश्या: अवलोकयित्री: पुरन्ध्री: प्रति लक्ष्यीकृत्य चित्राणि आश्चर्याणि चक्रे । किं भूतं चक्रम् ?। चक्रवर्तिनश्चिह्नं लक्षणम्[3] । कि भूतेऽध्वनि ?। सान्द्रं बहुलं यत् चन्द्रस्य कर्पूरस्य रज: तत्र कृतक्रीडं क्रीडापरं कुमारचक्रं बालवृन्दं यत्र तत्र तथा । तत्र पदं चक्रयुक्तं दृष्ट्वा स्त्रियो विस्मिता: ।[4] पाघ्राध्माधेट्दृश: श (पा° III. i 137) इति शप्रत्यय:[5] ।।३९।।

तारुण्यपुण्यामवलोकयन्त्योरन्योन्यमेणेक्षणयोरभिख्याम् ।
मध्ये मुहूर्तं स बभूव गच्छन्नाकस्मिकाच्छादनविस्मयाय ।।४०।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]तारुण्यपुण्यामिति । स नलः [2]कयोश्चिददुभयोः एणेक्षणयोः [3]स्त्रियोर्मध्ये अन्तराले गच्छन् सन् आकस्मिकं यत् आच्छादनं व्यवधानं तेन कृत्वा यो विस्मय आश्चर्यं तस्मै बभूव । किं भूतयोः ?। अन्योन्यं तारुण्येन पुण्याम् अभिख्यां परस्परशोभां विलोकयन्त्योः । यदा स मध्येऽदृश्यः सञ्चरितः तदा एकया इतरस्याः शरीरं न दृष्टम् । इतरया च तस्या वपुर्न दृष्टम् । अतस्तयोराश्चर्यम्[1] ।।४०।।

पुरःस्थितस्य क्वचिदस्य भूषारत्नेषु नार्य्यः प्रतिबिम्बितानि ।
व्योमन्यदृश्येषु निजान्यपश्यन् विस्मित्य विस्मित्य सहस्रकृत्वः ।।४१।।

पुरः[1] स्थितस्येति । नार्य्यः अस्य नलस्य क्वचित् प्रदेशे भूषारत्नेषु निजानि प्रतिबिम्बितानि व्योमनि आकाशे विस्मित्य विस्मित्य[2] आश्चर्यं प्राप्य प्राप्य[3] सहस्रकृत्वोऽनेकवारम्[4] हि अपश्यन् । किं भूतेषु ?। अदृश्येषु । नलस्याऽदृश्यत्वाद्रत्नान्यप्यदृश्यानि । स्त्रीणां दृश्यत्वात् प्रतिबिम्बानि दृश्यानि[5] ।।४१।।

तस्मिन् विषद्याऽर्द्धपथात्तपातं तदङ्गरागच्छुरितं निरीक्ष्य ।
विस्मेरतामापुरविस्मरन्त्यः क्षिप्तं मिथः कन्दुकमिन्दुमुख्यः ।।४२।।

तस्मिन्निति[1] । इन्दुमुख्यः स्त्रियः मिथः परस्परं क्रीडार्थं क्षिप्तं कन्दुकं क्रीडनकं तस्मिन्नले अदृश्येऽपि विषद्य स्खलित्वा अर्द्धपथे आत्तपातं पतितं निरीक्ष्य विस्मेरताम्[2] आश्चर्यताम् आपुः । किं भूतम् ?। तस्य[3] अङ्गरागेण कुङ्कुमादिना च्छुरितम् अभ्यक्तम् अनुलिप्तम् । किं कुर्वन्त्यः ?। अविस्मरन्त्यः[4] ।।४२।।

पुंसि स्वभर्तृव्यतिरिक्तभूते भूत्वाऽप्यनीक्षानियमव्रतिन्यः ।
छायासु रूपं भुवि वीक्ष्य तस्य फलं दृशोरानशिरे महिष्यः ।।४३।।

पुंसि[1] स्वभर्तृ इति । महिष्यः अन्तःपुरस्त्रियः भुवि मणिमयप्रदेशे छायासु तस्य रूपं वीक्ष्य दृशोः फलम् आनशिरे किं कृत्वाऽपि ?। स्वस्मात् भर्तुः व्यतिरिक्तभूते[2] पुंसि [3]परपुरुषे [4]अनीक्षायाः अनीक्षणस्य अनवलोकनस्य नियमव्रतिन्यो भूत्वाऽपि । नियमेनाऽन्यपुरुषानवलोकने[5] सत्यपि । नियमव्रतिनो हि फलप्राप्त्या भाव्यम्[6] ।।४३।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

विलोक्य तच्छायमतर्कि ताभिः पतिं प्रति स्वं वसुधाऽपि धत्ते ।
यथा वयं किं मदनं तथैनं त्रिनेत्रनेत्रानलकीलनीलम् ॥४४॥

विलोक्य[1] तच्छायमिति । ताभिः स्त्रीभिः तच्छायं[2] तस्य छायां प्रतिबिम्बं विलोक्य इति अतर्कि । विभाषा सेने (पा° II. iv. 25) त्यादि नपुंसकत्वम् । किम्[3] इति वसुधाऽपि तथा स्वम् आत्मीयं पतिं प्रति एनं नलच्छाय[4] लक्षणं मदनं धत्ते । किं भूतम् ?। त्रिनेत्रस्य ईश्वरस्य नेत्रानलस्य [5]कीलो ज्वाला[6] तेन[7] नीलम् । छाया हि मेचका भवति[8] । यथा वयं स्त्रियः स्वं भर्तारं प्रति कामं बिभृमः[9] ॥४४॥

रूपं प्रतिच्छायिकयोपनीतमालोकि ताभिर्यदि नाम कामम् ।
तथाऽपि नाऽऽलोकि तदस्य रूपं हारिद्रभङ्गाय वितीर्णभङ्गम् ॥४५॥

रूपं[1] प्रतीति । यदि नाम ताभिः स्त्रीभिः प्रतिच्छायिकया उपनीतं रूपं कामं स्वेच्छया आलोकि । तथाऽपि अस्य नलस्याऽदृष्यत्वात् तत्[2] यथावस्थितं [3]रूपं न आलोकि । किं भूतम् ? । आलोकि आलोकयुक्तम् । उज्ज्वलं न दृष्टम् । छायामय एवं दृष्टम्[4] । [5]किं भूतं रूपं न दृष्टम् ?। इत्याह—यत् रूपं [6]हरिद्राया अयं हारिद्रो यो भङ्गः खण्डः तस्मै वितीर्णभङ्गम् । अथवा आलोकीति पादसंनिधानात् हरिद्रशब्देन लक्षणया सुवर्णं लक्ष्यते । तदयमर्थः आलोकयुक्तत्वात् हारिद्रस्य भङ्गाय छेदाय वितीर्णभङ्गां दत्तपराजयं तन्न दृष्टम्[7] । [8]आलोकीति पदं पूर्ववाक्यगतं वाक्यद्वये योजनीयम् । उत्तरवाक्यगतं वा[9] । आख्यातत्वेन मत्वर्थीयान्तत्वेन च योजनीयम्[10] ॥४५॥

भवन्नदृश्यः प्रतिबिम्बदेहव्यूहं वितन्वन् मणिकुट्टिमेषु ।
पुरं परस्य प्रविशन् वियोगी योगीव चित्रं स रराज राजा ॥४६॥

भवन्नदृश्य[1] इति । चित्रम् आश्चर्यं स राजा योगी इव रराज । किं कुर्वन् ?। अदृश्यो भवन् । तथा मणिमयकुट्टिमेषु प्रतिबिम्बरूपदेहानां व्यूहं समूहं वितन्वन् । तथा[2] परस्य[3] पुरम् अन्तःपुरं वा प्रविशन् । वियोगी विरही । योगी अपि क्षणमदृश्यः क्षणं बहूनि शरीराणि[4] तनोति[5] । परशरीर[6] प्रवेशं च[7] कुरुते ॥४६॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

पुमानिवाऽस्पर्शि मया भ्रमन्त्या छाया मया पुंस इव व्यलोकि ।
ब्रुवन्निवाऽतर्कि मयाऽपि कश्चिदिति स्म स स्त्रैणगिरः शृणोति ॥४७॥

[1]पुमानिवेति । स नल इति स्त्रैणगिरः स्त्रीणां वाचः शृणोति स्म । स्त्रीपुंसाभ्यां नञ्स्नञौ भवनादि (पा° IV. i 87) ति-नञ् । [2]इतीति किम् ? मया भ्रमन्त्या पुमानिव अस्पर्शि । मया च पुंसः छाया इव व्यलोकि । मयाऽपि कश्चिद् ब्रुवन्निवाऽ[3]तर्कि[4] ॥४७॥

अम्बां प्रणम्योपनता नताङ्गी नलेन भैमी पथि योगमाप ।
स भ्रान्तिभैमीषु न तां विवेद[1] सा तं च नाऽदृश्यतया ददर्श ॥४८॥

अम्बां[2] प्रणम्येति । [3]नताङ्गी बाला[4] अम्बां मातरं प्रणम्य[5] उपनता सती भैमी नलेन सह पथि योगम् आप ।[6] परं सतां दमयन्तीम् अन्यासु भ्रान्त्या दृश्यमानासु भैमीषु मध्ये न विवेद[7] नाऽजानात् सत्या इयमिति । सा च तम् अदृश्यतया न ददर्श[8] ॥४८॥

प्रसूप्रसादाधिगता प्रसूनमाला नलस्योद्भ्रमवीक्षितस्य ।
क्षिप्ताऽपि कण्ठाय तयोपकण्ठस्थितं तमालम्बत सत्यमेव ॥४९॥

[1]प्रसूप्रसादेति । प्रसूनानां पुष्पाणां माला तया दमयन्त्या उद्भ्रमेण वीक्षितस्य भ्रान्तिदृष्टस्य नलस्य कण्ठाय क्षिप्ताऽपि उपकण्ठे समीपे स्थितं तं नलं सत्यमेव आलम्बत । किं भूता[2] ? प्रसूः माता तस्याः सकाशात् प्रसादेन अधिगता । मात्रा दत्ता माला[3] ॥४९॥

स्रग्वासनादृष्टजनप्रसादः सत्येयमित्यद्भुतमाप भूपः ।
क्षिप्तामदृश्यत्वमितां च मालामालोक्य तां विस्मयते स्म बाला ॥५०॥

[1]स्रग्वासनेति । [2]भूपो नलः इति कारणात् अद्भुतम् आश्चर्यम् आप । इयं दमयन्ती भ्रान्तिमध्यगताऽपि सत्या । किं भूता ? स्रजो मालाया वासनया श्रद्धया[3] दृष्टो जनस्य दमयन्तीलक्षणस्य प्रसादो येन स तथाऽनया मम माला अर्पिता । अतः प्रसन्ना सत्या च । बाला च तां क्षिप्तां मालाम् अदृश्यत्वम् इतां प्राप्तां च आलोक्य विस्मयते स्म[4] ॥५०॥

अन्योन्यमन्यत्रवदीक्षमाणौ परस्परेणाऽध्युषितेऽपि देशे ।
आलिङ्गितालीकपरस्परान्तस्तथ्यं मिथस्तौ परिषस्वजाते ॥५१॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

अन्योन्यमिति[1]। तौ[2] दमयन्तीनलौ मिथः परस्परं तथ्यं सत्यमेव अबाध्यं परिषस्वजाते। क्व ?। आलिङ्गितालीकपरस्परान्तः आलिङ्गितं च यत् अलीकं परस्परं तस्य अन्तर्मध्ये सत्यमालिङ्गनं जातम्[3] किं कुर्वाणौ ?। अन्योन्यम् अन्यत्रवत्[4] अन्यप्रदेशे स्थिताविव ईक्षमाणौ विलोकयन्तौ। क्व ?। परस्परेण देशेऽध्युषितेऽपि आश्रितेऽपि। एकत्र देशे[6] स्थितावपि सत्यावपि तौ यथा नित्यं[7] भ्रान्त्या मिथ्यालिङ्गनमनुभवतः तथैव आत्मानं भ्रान्त्या आलिङ्गितं मन्येते स्म। परभ्रान्तिरपि यस्मात् भ्रान्तिकाले सत्या इव भवति। यथा स्वप्नः[8] स्वप्नव्यवहारकाले सत्यः पश्चात् बाध्यो भवति। तथा अलीकालिङ्गनमपि तत्काले सत्यं पश्चात् बाध्यम्[9]। यथा च शुक्तिरजतं तत्काले सत्यम्। पश्चात् बाध्यम्। परमयं विशेषः। भ्रान्त्या दृश्यमानस्य शुक्तिरजतादेरीदृशं भयं भवति यदिदं क्षणेन यदि बाध्यं भविष्यति तदा मम रजतप्राप्तिर्न[10] भविष्यति। अत्र तु सत्यालिङ्गनेऽपि भ्रान्त्यालिङ्गनसदृशी प्रतीतिर्जाता। अत्र वादिनां [11]विप्रतिपत्तिः।

[12]सत्ख्यातिवाद साङ्ख्यः भ्रान्तौ शुक्तिमस्तके यत् रजतं [13]ख्याति प्रतिभासते तत्सदेव। क्वाऽपि विद्यमानमेव। असत्ख्यातिवादी बौद्धः शून्यवादी माध्यमिकः—असदेव शून्यं रजतं भ्रान्त्या ख्यातिः। अन्यथाख्यातिवादी नैयायिको भाट्टश्च अन्यथा[14] वर्तमानं रजतं भ्रान्तिदोषवशात् पुरोवर्तिदेशे शुक्तिमस्तके अन्यथाख्यातिः[15]। यतः तस्य मते अभावोऽपि भावात्मकः। इह भूतले घटाभावो नास्तीत्युक्ते घटाभावो[16] नाम भूतलम्। न तु सर्वथाऽभावः। तथा इदं रजतमित्यर्थः। भ्रान्तौ नेदं रजतमित्यनेन बाधकज्ञानेनाऽन्यथाभावमात्रं बाध्यते, न तु रजतम्। तथा अनिर्वचनीयख्यातिवादी वेदान्ती इदं रजतं सन्न भवति बाध्यत्वात्[17]। तथा असदपि न भवति प्रतीयमानत्वात्। तथा सदसदपि न भवति भावाभावयोः परस्परविरोधात्। न च सदसद्भ्यामपरप्रकारोऽस्ति। तस्मात् केनापि प्रकारेण निर्वक्तुमशक्यत्वात् अनिर्वचनीयं रजतं ख्यातिः[18]। अख्यातिवादिनः प्राभाकराः। इदं रजतं न ख्याति न प्रातिभासिकं भाति। किन्तु सत्यमेव। यदेते ग्रहणस्मरणे[19] द्वे ज्ञाने सत्ये। तथा हि—वणिग्वीथ्यादौ कान्ताकङ्कणादौ च गृहीतं सत् चाकचिक्यादिश्वेतभास्वरत्वादिसादृश्यात् पूर्वानुभवसंस्कारोद्बोधे सति शुक्तिमस्तके तदेव रजतं

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

स्मृतम् । ततो द्वयमपि सत्यम् । इदं पुरोवर्तिसत्यं रजतम् । पूर्वानुभवात् स्मृतं तदपि सत्यम् ।

अयं श्लोकः [20]प्राभाकराभिप्रायेण कविना कृतः । अन्योन्यमन्यत्रवदीक्षमाणौ[21] तौ दमयन्तीनलौ मिथः परस्परं तथ्यं परिषस्वजाते । क्व ? । आलिङ्गितस्य अलीकस्य [22]परस्परस्याऽन्तर्मध्ये यत् लोके सम्प्रतिपन्नम् । इदं परस्परं[23] मिथुनम् अलीकालिङ्गितं तस्मिन् तथ्यं परस्परमालिङ्गितं बभूव । यतः आरोपितरूपेण परस्परेण अध्युषितेऽपि[24] पुरोवर्तिनि देशेऽन्योन्यम् अन्यत्रवत् भ्रान्तिस्थलवदीक्षमाणौ जानन्तौ । अयमर्थः—तत्पूर्वमन्यत्र देशे न नलेन क्वाऽपि सत्यालिङ्गनमनुभूतं गृहीतम् । दमयन्त्या च सखीभिः सहालिङ्गनमनुभवगृहीतम् । तदेवेदम् अध्युषितदेशे स्मृतम् । अतोऽन्योन्यालिङ्गनग्रहणज्ञानं स्मरणज्ञानं च उभयमपि तथ्यमेव न तु मिथ्या । अतस्तथ्यो[25] मिथः परिष्वङ्गः स्मरणज्ञानस्याऽबाधितत्वात्[26] इति मीमांसकैकदेशिनां प्राभाकराणामाशयः । अतोऽन्योन्यपरस्परमिथः शब्दानाम् अपौनरुक्त्यम् । अन्योन्यशब्दः एकः पूर्वानुभूताश्लेषवाची । अपरः[27] परस्परशब्दः पुरोवर्तिनिदेशे स्मरणज्ञानवाचकः । तृतीयः अपरवादिनां[28] सम्प्रतिपन्नाम् अलीकतां भ्रान्तिसंज्ञामनूद्य[29] ग्रहणस्मरणज्ञानयोरेकत्र मेलकः । चतुर्थो मिथःशब्दः प्राभाकरसिद्धान्तसिद्धां[30] प्रतिज्ञां प्रतिपादयति[31] । अतः सर्वप्रकारेण तथ्यं मिथस्तौ परिषस्वजाते[32] ।।५१।।

स्पर्शं तमस्याऽधिगताऽपि भैमी मेने पुनर्भ्रान्तिमदर्शनेन ।
नृपः स पश्यन्नपि तामुदीतस्तम्भो न धर्तुं सहसा शशाक ।।५२।।

स्पर्शं[1] तमस्येति । भैमी तम् अस्य नलस्य[2] स्पर्शम् अधिगताऽपि प्राप्ताऽपि सती अदर्शनेन अदृश्यतया पुनर्भ्रान्तिं मेने । स नृपः तां पश्यन्नपि सहसा धर्तुं न शशाक । किं भूतः ?। उदीत उत्पन्नः स्तम्भः सात्त्विकभावो यस्य स तथा[3] ।।५२।।

स्पर्शातिहर्षादृतसत्यमत्या प्रवृत्य मिथ्याप्रतिलब्धबाधौ ।
पुनर्मिथस्तथ्यमपि स्पृशन्तौ न श्रद्दधाते पथि तौ विमुग्धौ ।।५३।।

[1]स्पर्शातिहर्षेति । तौ पथि[2] पुनः तथ्यं स्पृशन्तावपि न श्रद्दधाते न मेनाते । यतः विशेषेण मुग्धौ । किं कृत्वा ?। प्रथमस्य स्पर्शस्य

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

अतिहर्षेण आद्दता[3] या सत्यमतिः सत्यबुद्धिः तया प्रवृत्त्य प्रवृत्तिं कृत्वा। तर्हि कथं न श्रद्धां दधतुः[4] इत्याशङ्क्याऽऽह—मिथ्याज्ञानेन पूर्वाभ्यस्तेन सत्यत्वेऽपि प्रतिलब्धो बाधो याभ्यां तौ तथा। सत्यत्वस्य बाधितत्वात् मिथ्यात्वमेव[5] ज्ञातवन्तौ[6] ।।५३।।

सर्वत्र संवाद्यमबाधमानौ रूपश्रिया [1]तथ्यकरं परं तौ।
न शेकतुः केलिरसाद्विरन्तुमलीकमालोक्य परस्परं तु ।।५४।।

[2]सर्वत्र संवाद्यमिति। तौ केलिरसात् क्रीडारसात् विरन्तुं निवर्तितुं न शेकतुः। तु पुनः परस्परम् अलीकम् आलोक्य। किं भूतं परस्परम्?। [3]परं केवलं तथ्यकरं सत्यत्वकरम्[4]। अतः रूपश्रिया सर्वत्र संवाद्यम्। [5]समुद्यते [6]इति संवाद्यम्। न तु रूपेण क्वाऽपि परस्परं विसंवदतः[7]। किं भूतौ?। अबाधमानौ। यदा पूर्वज्ञानम् उत्तर[8]ज्ञानेन बाधमानं भवति। तदा तथ्यं न स्यात्। तथाविधमपि सत्यं परस्परं क्रीडानुराग-मोहेन अलीकमिव जानीतः स्म[9] ।।५४।।

परस्परस्पर्शरसोर्मिसेकात् तयोः क्षणं चेतसि विप्रलम्भः।
स्नेहातिदानादिव [1]दीपिकार्चिर्निमिष्य किञ्चिद् द्विगुणं दिदीपे ।।५५।।

परस्पर[2]स्पर्शेति। तयोः परस्पर[3]स्पर्शस्य रसोर्मिसेकात् चेतसि क्षणं विप्रलम्भो रसो वियोगशृङ्गारः किञ्चित् निमिष्य शान्तो भूत्वा पुनर्द्विगुणं दिदीपे। किमिव?। यथा दीपिकाया अर्चिः स्नेहस्य तैलस्य अतिदानात्[4] किञ्चित् निमिष्य द्विगुणं दीप्यते[5] ।।५५।।

वेश्माप सा धैर्यवियोगयोगाद् बोधं च मोहं च मुहुर्दधाना।
पुनः पुनस्तत्र नृपः स पश्यन् बभ्राम तां सुभ्रुवमुद्भ्रमेण ।।५६।।

वेश्माप[1] सेति। सा दमयन्ती वेश्म गृहम् आप। किं कुर्वाणा?। धैर्ययोगाद् [2]वियोगयोगाच्च यथाक्रमं बोधं च मोहं[3] च मुहुर्दधाना। स नलः पुनरुद्भ्रमेण भ्रान्त्या तां सुभ्रुवं पुनः पुनः पश्यन् [4]तत्र बभ्राम[5] ।।५६।।

पद्ध्यां नृपः सञ्चरमाण एष चिरं परिभ्रम्य कथं कथञ्चित्।
विदर्भराजप्रभवानिवासं प्रासादमभ्रङ्कषमाससाद ।।५७।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

पद्भ्यां[1] नृप इति। एष नृपः पद्भ्यां सञ्चरमाणः सन् कथं कथञ्चित् चिरं परिभ्रम्य प्रासादम्[2] आससाद[3]। किं भूतम् ?। विदर्भराजप्रभवाया[4] [5]भूभृत्सुताया निवासम्। तथा अभ्रङ्कषम्[6] उच्चैस्तरम्[7] ॥५७॥

सखीशतानां सरसैर्विलासैः स्मरावरोधभ्रममावहन्तीम्।
विलोकयामास सभां स भैम्यास्तस्य प्रतोलीमणिवेदिकायाम् ॥५८॥

[1]सखीशतानामिति। स भैम्याः सभां तस्य [2]प्रासादस्य प्रतोली प्रवेशमार्गस्तत्र या मणिमयवेदिका[3] तस्यां विलोकयामास। किं भूताम्[4] ?। सखीशतानां सरसैर्विलासैः स्मरस्य अवरोधस्याऽन्तःपुरस्य भ्रमं भ्रान्तिम्[5] आवहन्तीम्[6] ॥५८॥

कण्ठः किमस्याः पिकवेणुवीणास्तिस्रो जिताः सूचयति त्रिरेखः।
इत्यन्तरस्तूयत यत्र काचिन्नलेन बाला कलमालपन्ती ॥५९॥

कण्ठः[1] किमस्या इति। यत्र सभायां काचिद्बाला नलेन कलं मधुरम् आलपन्ती सती इति [2]अन्तर्मध्ये अस्तूयत। [3]इतीति किम् ?। अस्या बालायाः कण्ठस्त्रिरेखो[4] रेखात्रयाङ्कमिषेण तिस्रः पिको[5] वेणु-वंशश्च वीणा च एता जिताः सूचयति। अतिमाधुर्यात्[6] ॥५९॥

एतं नलं तं दमयन्ति ! पश्य त्यजाऽऽर्तिमित्यालिकुलप्रबोधान्।
श्रुत्वा स नारीकरवर्तिसारीमुखात्स्वमाशङ्कत यत्र दृष्टम् ॥६०॥

एतं[1] नलमिति। यत्र सभायां स नलः स्वम्[2] आत्मानं दृष्टम्[3] आशङ्कत। किं कृत्वा ?। कस्याश्चित्[4] नार्याः करवर्तिन्याः हस्तस्थितायाः सार्याः सारिकाया मुखात् इति ईदृशान् आलिकुलप्रबोधान् श्रुत्वा। इतीति[5] किम् ?। हे दमयन्ति ! एतं[6] नलं पश्य। आर्तिं त्यज। यदा दमयन्ती विरहाकुला भवति तदा सख्यस्तां प्रबोधयन्ति[7]। त्वम् एतं[8] नलं पश्य। ईदृशं प्रबोधं [9]सारिका श्रुत्वा यदा पुनः पुनर्वदति तदा नलस्य दृष्टोऽहमिति शङ्काऽजायत[10] ॥६०॥

यत्रैकयाऽलीकनलीकृतालीकण्ठे मृषाभीमभवीभवन्त्या।
तद् दृक्पथे दौहृदिकोपनीता शालीनमाधायि मधूकमाला ॥६१॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

यत्रैकयेति[1]। यत्र सभायाम् एकया सख्या अलीकनलीकृता चासौ आली च तस्याः कण्ठे शालीनं सलज्जं यथा भवति एवं मधूकमाला वरणस्रक् आधायि आरोपिता। किंभूतया सख्या?। मृषाभीमभवीभवन्त्या अलीकदमयन्तीभूतया। एका सखी दमयन्तीरूपा जाता। अपरा सखी नलरूपा जाता। क्व?। [2]तस्य नलस्य दृक्पथे। तस्य पश्यतः सतः। किंभूता?। दौहृदिकै[3]र्वाटिका[4]पालैरिच्छावर्तिभिः उपनीता ढौकिता। यो वृक्षे दोहृदान् दत्ते स[5] दौहृदिकः[6] ।।६१।।

चन्द्राभमाभ्रं तिलकं दधाना तद्वन्निजास्येन्दुकृतानुबिम्बम्।
सखीमुखे चन्द्रसमे ससर्ज चन्द्रानवस्थामिव कापि यत्र ।।६२।।

[1]चन्द्राभमाभ्रमिति[2]। यत्र सभायां कापि सखी चन्द्रेण समे सख्या मुखे आभ्रम् अभ्रकस्येदम्[3] आभ्रम् अभ्रकसम्बन्धि तिलकं दधाना[4] ददाना सती चन्द्राणामनवस्थामिव बहुचन्द्रतामिव ससर्ज। किं विशिष्टे सखीमुखे?। चन्द्रसमे। किं भूतं तिलकम्?। चन्द्राभं चन्द्रसदृशम्। पुनः[5] किंभूतं तिलकम्?। तद्वत् तेनाऽभ्रतिलकेन युक्तं यत् निजं तिलकदात्र्याः स्त्रियाः सक्तं यत् आस्यमेव इन्दुः तेन कृतानुबिम्बम्। एकम् आभ्रं तिलकं चन्द्रः सखीमुखं चन्द्रः। द्वितीयायाः स्त्रिया मुखं चन्द्रः। तत्राऽपि आभ्रं तिलकं चन्द्रः। एवम् उभयोरपि प्रतिबिम्बद्वयं चन्द्रः। प्रतिबिम्बस्याऽपि प्रतिबिम्बश्चन्द्रः। इत्थं चन्द्राणामनवस्था ऊह्या[6] ।।६२।।

दलोदरे काञ्चनकेतकस्य क्षणान्मषीभावुकवर्णरेखम्।
तस्यैव यत्र स्वमनङ्गलेखं लिलेख भैमी नखलेखिनीभिः ।।६३।।

[1]दलोदरे इति। यत्र सभायां भैमी तस्यैव नलस्यैव[2] कृते स्वम्[3] अनङ्गलेखं काञ्चनकेतकस्य दलोदरे पत्रमध्ये नखा एव लेखिन्यस्ताभिर्लिलेख। किंभूतम्?। क्षणात् मषीभावुकाः कृष्णवर्णा भवन्त्या वर्णानाम् अक्षराणां रेखा यत्र तं तथा। केतकपत्रे या रेखा क्रियते सा तदैव कृष्णवर्णा भवति[4] ।।६३।।

विलेखितुं भीमभुवो लिपीषु सख्याऽतिविख्यातिभृताऽपि यत्र।
अशाकि लीलाकमलं न पाणिरपारि कर्णोत्पलमक्षि नैव ।।६४।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]विलेखितुमिति । यत्र सभायां भीमभुवो[2] लिपीषु दमयन्त्याम् आलेख्यमानायाम्[3] अतिविख्यातिभृताऽपि प्रसिद्धया चित्रकारिकयाऽपि[4] सख्या भैम्याः हस्तस्थितं लीलाकमलं विलेखितुम् अशाकि शक्तम् । न पाणिर्लिखितुं शेके । तथा कर्णोत्पलं चित्रयितुम् अपारि । नैव अक्षि लेखितुं शक्तम्[5] ।।६४।।

भैमीमुपावीणयदेत्य यत्र कलिप्रियस्य प्रियशिष्यवर्गः ।
गन्धर्ववध्वः स्वरमध्वरीणा तत्कण्ठनालैकधुरीणवीणः ।।६५।।

[1]भैमीमुपेति । यत्र सभायां गन्धर्वाणां वध्व एव प्रियशिष्यवर्ग एत्य आगत्य भैमीम् उपावीणयत् वीणया अतोषयत् । कस्य छात्र-वर्गः ?। कलिप्रियस्य कलहाद्दतस्य नारदस्य । [2]किं भूतः ?। स्वर एव मधु [3]अतिमधुरत्वात् तेनाऽरीणोऽक्षीणो यस्तासां[4] कण्ठनालस्तेन एकधुरीणा समाना वीणा यस्य स तथा । एकधुराल्लुक चे (पा° IV. iv. 79)ति । [5]आयनेयी (पा° VII. i. 2)ति ईनः[6] ।।६५।।

नावा स्मरः किं हरभीतिगुप्तेः पयोधरे खेलति कुम्भ एव ।
इत्यर्द्धचन्द्राभनखाङ्कचुम्बिकुचा सखी यत्र सखीभिरूचे ।।६६।।

नावा[1] स्मर इति । यत्र सभायां सखीभिः काचित् सखी इति ऊचे । किं भूता ? अर्द्धचन्द्राभनखाङ्कचुम्बी[2] कुचो यस्याः । नखाङ्कं चुम्बति इति णिनि । इतीति किम् ? किं स्मरः ते पयोधरे स्तने कुम्भे एव[3] नावा वेड्या[4] नखाङ्कछलात् खेलति । कुतः ? हरात् या भीतिर्भयं तस्या गुप्ते रक्षणात् । कुम्भ एव निलीनः[5] खेलति । अथवा इति बुध्या यत् पार्वतीभयेन हरस्तां स्त्रियं[6] न पश्यति । अथवा हरोऽपि [7]एतद्दर्शनमोहितो न वशग इत्यभिप्रायेण निर्भयः । अथ च पय उदकं धरतीति[8] पयोधरो जलाशयस्तत्र नावा खेलति[9] ।।६६।।

स्मराशुगीभूय विदर्भसुभ्रूवक्षो यदक्षोभि खलु प्रसूनैः ।
स्रजं सृजन्त्या तदशोधि तेषु यत्रैकया सूचिशिखां निखाय ।।६७।।

[1]स्मराशुगीभूयेति । खलु इति शङ्के । यत् प्रसूनैः पुष्पैः स्मरस्य आशुगीभूय बाणत्वं प्राप्य विदर्भसुभ्रूवक्षः भैमीहृदयमक्षोभि । यत्र सभायाम् एकया सख्या स्रजं सृजन्त्या गृथ्नत्या तेषु पुष्पेषु सूच्याः शिखां तीक्ष्णमग्रं निखाय प्रोतं कृत्वा तद्वैरमशोधि[2] ।।६७।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

यत्राऽवदत्तामतिभीय भैमी त्यज त्यजेदं सखि ! साहसिक्यम् ।
त्वमेव कृत्वा मदनाय दत्से बाणान् प्रसूनानि गुणेन सज्जान् ।।६८।।

[1]यत्राऽवदर्दिति । यत्र भैमी अतिशयेन भीत्वा तां मालां ग्रथ्नन्तीम्[2] अवदत् । हे सखि ! इदं [3]साहसिक्यं त्यज त्यज[4] यतः त्वमेव प्रसूनानि बाणान् गुणेन मौर्व्या[5] सज्जान्[6] कृत्वा मदनाय दत्से अर्पयसि । अथ दोरकेण सज्जान् प्रोतान् कृत्वा मदनाय दत्से अर्पयसि[7] ।।६८।।

आलिख्य सख्याः कुचपत्रभङ्गीमध्ये सुमध्या मकरीं करेण ।
यत्राऽऽलपत्तामियमालि! यानं [1]मन्ये त्वदेकावलिनाकनद्याः ।।६९।।

[2]आलिख्येति । यत्र काचित् सुमध्या कस्याश्चित् सख्याः कुचयोः पत्रभङ्गीमध्ये करेण मकरीम् आलिख्य तां सखीम् आलपत्—हे आलि[3] ! इयं मकरी तव एकावली हार एव नाकनदी गङ्गा तस्या यानं वाहनम् इत्यहं मन्ये । गङ्गाया हि मकरवाहनत्वम्[4] ।।६९।।

तामेव सा यत्र जगाद भूयः पयोधियादः कुचकुम्भयोस्ते ।
सेयं स्थिता तावकहृच्छयाङ्कप्रियास्तु विस्तारयशःप्रशस्तिः ।।७०।।

तामेव[1] सेति । यत्र सभायां तामेव सखीं सा पत्रवल्लीकर्त्री[2] सुमध्या भूयो जगाद । हे सखि ! सा इयं पयोधियादो मकरी तावकस्य हृच्छयस्य अङ्को मकरस्तस्य प्रिया । तव कुचकुम्भयोर्विस्तारयशसः प्रशस्तिरस्तु । किं भूता[3] ? । स्थिता रहिता[4] ।।७०।।

सारीं चरन्तीं सखि ! मारयैतामित्यक्षदाये कथिते कयाऽपि ।
यत्र स्वघातभ्रमभीरुसारीकाकूत्थसाकूतहसः ससज्जे ।।७१।।

[1]सारीमिति । यत्र सभायां स्वस्याऽऽत्मनो घातभ्रमः हननभ्रान्तिः तेन भीरुः सभया या सारी सारिका तस्याः काकुस्वरः दीनस्वरः तस्य[2] उत्थ उत्थानम् उत्पत्तिस्तेन साकूतः साभिप्रायो हसोऽथवा काकुर्दीनस्वरः तस्मादुत्थम् उत्थानं यस्य[3] हसस्य स तथाविधः साकूतः साभिप्रायो हसः प्रहासः ससज्जे सञ्जातः । क्व सति ? । कयाऽपि सख्या इति ईदृशे अक्षस्य पाशकस्य दाये कथिते सति । इतीति किम्[4] ? । हे सखि ! एतां चरन्तीं[5] सारीं द्यूतकलके मण्डितां मारय । अथ च चरन्तीं भ्रमन्तीं[6]

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

सारिका नाम पक्षिणी[7] मारय—इत्युक्ते सा पक्षिणी शुकवत् पटुवचनत्वात् काकुस्वरेण भयेन वदन्तीं दृष्ट्वा न्यत् मां मारयिष्यतीति सखीनां हासः। अभिप्रायोऽयम्-द्यूतफलके रमणार्थं काष्ठमयी सारी साऽपि पाशके[8] पतिते सति दानसङ्ख्यावशात् गृहात्[9] गृहं चरति[10] ।।७१।।

भैमीसमीपे स निरीक्ष्य यत्र ताम्बूलजाम्बूनदहंसलक्ष्मीम् ।
कृतप्रियादूत्यमहोपकारमरालमोहद्रढिमानमूहे ।।७२।।

भैमीसमीपे[1] इति । यत्र सभायां स नलः भैम्याः समीपे ताम्बूलार्थं यो जाम्बूनदस्य सुवर्णस्य हंसः तस्य लक्ष्मीं शोभां निरीक्ष्य दृष्ट्वा कृतः प्रियाया दूत्यलक्षणो महोपकारो येन स चाऽसौ मरालो हंसश्च तस्य मोहो भ्रान्तिस्तस्य द्रढिमानं दृढत्वम् ऊहे ऊढवान्[2] । स एवाऽयं हंस इति प्रत्यभिज्ञा भ्रान्तिर्जाता[3] ।।७२।।

तस्मिन्नियं सेति सखीसमाजे नलस्य सन्देहमथ व्युदस्यन् ।
अपृष्ठ एव स्फुटमाचचक्षे स कोऽपि रूपातिशयः स्वयं ताम् ।।७३।।

तस्मिन्निति[1] । अथ तस्मिन् सखीसमाजे स प्रसिद्धः कोऽपि [2]अनिर्वचनीयतया अविज्ञायमानो रूपातिशयः स्वयं तां दमयन्तीम् अपृष्ट एव सन् आचचक्षे कथयामास। कथम्? । इयं सा दमयन्ती। किं कुर्वन्[3]? । नलस्य सन्देहं व्युदस्यन् निराकुर्वन्[4] ।।७३।।

भैमीविनोदाय मुदा सखीभिस्तदाकृतीनां भुवि कल्पितानाम् ।
नाऽतर्कि मध्ये स्फुटमप्युदीतं तस्याऽनुबिम्बं मणिवेदिकायाम् ।।७४।।

[1]भैमीविनोदायेति । तस्य नलस्य अनुबिम्बं मणिवेदिकायां स्फुटम् उदीतमपि केनाऽपि न अतर्कि न ज्ञातम् । क्व उद्गतं प्रतिबिम्बम्? । भैम्या विनोदाय सखीभिर्मुदा कल्पितानामालेखितानां तस्य नलस्य आकृतीनां चित्रप्रतिकृतीनां[2] मध्ये[3] पतितत्वात्तदपि चित्रमेवेति[4] शङ्का जाता ।।७४।।

हुताशकीनाशजलेशदूतीर्निराकरिष्णोः कृतकाकुयाच्ञाः ।
भैम्या वचोभिः स निजां तदाशां व्यावर्तयद्दूरमपि प्रयाताम् ।।७५।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]हुताशकीनाशेति । स नलस्तदा भैम्या[2] वचोभिर्निजां [3]तदाशां तस्याः सम्बन्धिनीमाशां दूरं प्रयातामपि व्यावर्तयत्[4] । दमयन्तीवचन-श्रवणात् आत्मनः तत्प्राप्तिमनोरथोव्यावृत्या नीतः । [5]यः किल यस्य भवति स तस्य वचनेन निवर्तते[6] । किंभूतायाः ? । हुताशस्य कीनाशस्य यमस्य[7] जलेशस्य च दूनीः सर्वा अपि निराकरिष्णोः[8] । किं भूतास्ताः ? । कृता काक्वा दैन्येन याच्ञा याभिः तास्तथा । एको हुतं सर्वं भक्षयति । अपरः कीनाशः कदर्यः तृतीयो जडानामीशः । अतो निराकरणम्[9] ।।७५।।

विज्ञप्तिमन्तः सभयः स भैम्या मध्येसभं वासवसम्भलीयाम् ।
सम्भालयामास भृशं कृशाशस्तदालिवृन्दैरभिनन्द्यमानाम् ।।७६।।

[1]विज्ञप्तिमिति । स नलः[2] अन्तः सभयः सन् मध्येसभं वासवस्येन्द्रस्य[3] सम्भली कुट्टिनी दूती तत्सम्बन्धिनीं[4] विज्ञप्तिं सम्भालयामास शुश्राव[5] । किं भूतः ? भृशं कृशा आत्मनो दमयन्ती-प्राप्तिलक्षणा आशा यस्य स तथा । इन्द्रे प्रार्थयितरि नलस्य कुत आशा । किं भूताम् ? । तस्या आलीनां सखीनां वृन्दैः अभिनन्द्यमानाम् । सख्यः सर्वा अपि इन्द्रम् अनुजानन्ति[6] ।।७६।।

लिपिर्न दैवी सुपठा भुवीति तुभ्यं मयि प्रेषितवाचिकस्य ।
इन्द्रस्य दूत्यां रचय प्रसादं विज्ञापयन्त्यामवधानदानैः ।।७७।।

[1]लिपिर्न दैवीति । हे दमयन्ति ! त्वं मयि इन्द्रस्य दूत्यां विज्ञापयन्त्यां सत्याम् अवधानदानैः प्रसादं रचय । किंभूतस्य ? इति कारणात् प्रेषितं[2] वाचिकं वचनेनैव[3] सन्देशो येन तस्य तथा । कस्मै सन्देशः ? । तुभ्यम् । दमयन्त्यर्थमेवेत्यर्थः । कुतः ? । दैवी स्वर्ग-सम्बन्धिनी लिपिरक्षरविन्यासरूपा[4] भुवि पृथिव्यां न सुपठा[5] पठितुं न शक्या । अतो मयि विषये वाचिकं दत्तं, न तु पत्रे [6]लिखितम् ।।७७।।

सलीलमालिङ्गनयोपपीडमनामयं पृच्छति वासवस्त्वाम् ।
शेषस्त्वदाश्लेषकथाविनिद्रैस्तद्रोमभिः सन्दिदिशे भवत्यै ।।७८।।

[1]सलीलमिति । वासवः त्वां सलीलम् [2]आलिङ्गनया उपपीडम् । आलिङ्ग्य मयेति मया दूत्या कृत्वा उपपीडं गाढम् आलिङ्ग्य[3] अनामयं

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

कुशलं पृच्छति । पृच्छि द्विकर्मकः । उपपीडम् [4]सप्तम्यां चोपपीडरुधकर्षश्चे (पा° III. iv. 49) ति णमुल्प्रत्ययः । आलिङ्ग्येति इन्प्रत्ययः । [5]अहं त्वामालिङ्गामि । इन्द्रस्त्वां मया आलिङ्गयति । [6]मयेत्यनिनन्तस्य कर्ता इनन्ते सत्यनुक्तकर्तृत्वात्तृतीया । शेषः सन्देशार्थः तस्य वासवस्य[7] रोमभिरेव भवत्यै हे दमयन्ति । सन्दिदिशे । किं भूतैः ? । तव आश्लेषस्य कथामात्रेणैव विनिद्रैः रोमाञ्चितैः । [8]त्वं मां वरय इति सन्देशार्थः[9] ।।७८।।

यः प्रेर्यमाणोऽपि हृदा मघोनस्त्वदर्थनायां ह्रियमापदागः ।
स्वयंवरस्थानजुषस्तमस्य बधान कण्ठं वरणस्रजाऽऽशु ।।७९।।

यः[1] प्रेर्यमाण इति । हे दमयन्ति ![2] त्वं तम् अस्येन्द्रस्य कण्ठम् आशु वरणस्रजा स्वयंवरमालया बधान । किं भूतस्य ?। स्वयंवरस्थानं जुषते इति क्विप् । [3]स्वयंवरस्थानं सेवमानस्य । यः मघोनः इन्द्रस्य हृदा प्रेर्यमाणोऽपि त्वदर्थनायां विषये ह्रियमेव[4] लज्जामेव आगः अपराधम् आपत् । अग्रे अपूर्वत्वात् प्रार्थनां न कुरुते । अथ च योऽपराधी स सर्वप्रत्यक्षं[5] बध्यते[6] ।।७९।।

नैनं त्यज क्षीरधिमन्थनाद्यैरस्याऽनुजायोद्गमिताऽमरैः श्रीः ।
अस्मै विमथ्येक्षुरसोदमन्यां श्राम्यन्तु नोत्थापयितुं श्रियं ते ।।८०।।

नैनं[1] त्यजेति । त्वम् एनम् इन्द्रं न त्यज मा त्याक्षीः । यैः अमरैः अस्याऽनुजाय उपेन्द्राय श्रीकृष्णाय तदर्थं क्षीरधेः दुग्धसमुद्रस्य मन्थनात् श्रीर्लक्ष्मीरुद्गमिता उत्पादिता । ते देवा अस्मै इन्द्रार्थम् इक्षुरसोदम् इक्षुरससमुद्रं[2] विमथ्य अन्यां श्रियम् उत्थापयितुं न श्राम्यन्तु मा श्रमं कार्षुः । त्वमेव लक्ष्मीर्भव[3] ।।८०।।

लोकस्रजि द्यौर्दिवि चादितेयास्तथादितेयेषु महान्महेन्द्रः ।
किङ्कर्तुमर्थी यदि सोऽपि रागाज्जागर्ति कक्षा किमतः पराऽपि ।।८१।।

[1]लोकस्रजीति । तावत् लोकानां भूरादीनां सप्तानां स्रजि मालायां द्यौः स्वर्गं महती दिवि[2] च आदितेया देवा महान्तः आदितेयेषु अपि देवेषु मध्ये महेन्द्रो[3] महान् । एवमुत्तरोत्तरमुत्कर्षे यदि सोऽपि इन्द्रो[4] रागात् किङ्कर्तुं दासीभवितुम्[5] अर्थी जागर्ति । किं ते एव अतः पराऽपि काऽपि कक्षा प्रतिष्ठा[6] जागर्ति स्फुरति ?। अपि तु न[7] ।।८१।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

पदं शतेनाऽऽप मखैर्यदिन्द्रस्तस्मै स ते याचनचाटुकारः ।
कुरु प्रसादं तदलङ्कुरुष्व स्वीकारकृद्भ्रूनटनश्रमेण ।।८२।।

पदं[1] शतेनेति । यत् इन्द्रः पदं स्थानं[2] शतेन मखैर्यागैः आप स इन्द्रः तस्मै इन्द्रपदाय[3] ते तव याचने चाटुकारः[4] । त्वं दमयन्ति ! प्रसादं कुरु । तत् इन्द्रपदं स्वीकारकृत् अङ्गीकर्तृ यत् भ्रुवोर्नटनं चलनं तस्य श्रमेण अलङ्कुरुष्व[5] । अनुज्ञां भ्रूसंज्ञया[6] देहि[7] ।।८२।।

मन्दाकिनीनन्दनयोर्विहारे देवे [1]वरे देवरि माधवे च ।
श्रेयः श्रियां यातरि यच्च सख्यां तच्चेतसा भाविनि! भावयस्व ।।८३।।

[2]मन्दाकिनीति । हे भाविनि[3] ! यत् श्रेयः कल्याणं सुखं चेतसा भावयस्व विचारय तत् सुखं मन्दाकिन्यां [4]स्वर्गगङ्गाया विहारे नन्दनवनक्रीडायां च भवति । यत् देवे महेन्द्रे वरे भर्तरि च सुखं, यद्वा, माधवे श्रीकृष्णे देवरि श्रेयः । देवशब्दो देवरवाची ।[5] देवे भवेदिति पाठे, यद्वा, देवे माधवे देवरि श्रेयो भवेदिति व्याख्या । यच्च सुखं श्रियां लक्ष्म्यां यातरि देवरपत्न्यां[6] सख्यां सत्यां भवति तद्विचारय । अथ वा मन्दाकिन्यां विहारे नन्दने च विहारे यत् श्रेयः तद्भावय ।

अयमर्थः—अग्न्यादीनां वरणे मन्दाकिन्यामेव विहारः, नन्दने । इन्द्रस्य तु[7] वरणे द्वयम् । अग्न्यादिवरणे देवो वरो[8] भवति, न तु माधवो देवरः । इन्द्रवरणे तु देवे वरे माधवे च देवरि अस्मिन् द्वये सति श्रेयो भावय । अग्न्यादिवरणे श्रीः सखी भवति, न तु याता । इन्द्रवरणे तु श्रियां सख्यां यातरि च श्रेयो भावय । नन्दनादित्रयस्येन्द्रवरण एव भावात्[9] ।।८३।।

रज्यस्व राज्ये जगतामितीन्द्राद् याच्ञां प्रतिष्ठां लभसे त्वमेव ।
लघूकृतस्वं बलियाचनेन तत्प्राप्तये वामनमामनन्ति ।।८४।।

[1]रज्यस्वेति । हे दमयन्ति । त्वं जगतां राज्ये रज्यस्व इन्द्राणी भव । इतीदृशीं याच्ञां प्रतिष्ठां सन्मुखप्रार्थनाम् इन्द्रात् त्वमेव लभसे । लोकाः तस्य राज्यस्य प्राप्तये । भूप्राप्तये इति पाठे भुवः पृथिव्याः पदत्रयमात्रतया[2] प्राप्तये लघूकृतस्वं तृणीकृतम्[3] आत्मानं सन्तं श्रीकृष्णं वामनं नाम्ना आमनन्ति । केन लघूकृतस्वमित्याह—बलेर्याचनेन[4] ।।८४।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

यानेव देवान्नमसि त्रिकालं न तत्कृतघ्नीकृतिरौचिती ते ।
प्रसीद तानप्यनृणान् विधातुं पतिष्यतस्त्वत्पदयोस्त्रिसन्ध्यम् ।।८५।।

[1]यानेव देवानिति । त्वं यानेव देवान् त्रिकालं नमसि[2] तेषां कृतघ्नीकृतिः कृतघ्नत्वकरणं ते तव न औचिती न योग्या । त्वं तानपि अनृणान् विधातुं प्रसीद । किं करिष्यतः ? । त्वत्पदयोः त्रिसन्ध्यं पतिष्यतः । इन्द्राणी सर्वैर्देवैर्नमस्क्रियते । अग्रे त्वया देवा नताः इदानीं त्वां नमन्तीति कृतज्ञत्वम्[3] ।।८५।।

इत्युक्तवत्या निहितादरेण भैम्या गृहीता मघवत्प्रसादः ।
स्रक् पारिजातस्य ऋते नलाशां वासैरशेषामपुपूरदाशाम् ।।८६।।

[1]इत्युक्तवत्येति । [2]पारिजातस्य स्रक् माला नलस्य आशां मनोरथम् ऋते विना वासैः परिमलैः कृत्वा अशेषाम् आशां दिशम् अपुपूरत्[3] । किं भूता ?। इति उक्तवत्या दूत्या[4] आदरेण निहिता अर्पिता तथा[5] भैम्या गृहीता च । कथं गृहीता ? । इयं मघवतो महेन्द्रस्य प्रसादोऽनुग्रहो न प्रत्याख्येयः । ततो नलो निराशो जातः[6] ।।८६।।

आर्ये ! विचार्यऽलमिहेति काऽपि योग्यं सखि ! स्यादिति काचनाऽपि ।
ओङ्कार एवोत्तरमस्तु वस्तु मङ्गल्यमत्रेति च काऽप्यवोचत् ।।८७।।

[1]आर्ये विचार्येति । [2]काऽपि सखी इति अवोचत् । हे आर्ये ! इह इन्द्रप्रार्थने सति विचार्य अलं पूर्यताम् । काचनाऽपि इत्यवोचत् । हे सखि ! इदं कार्यं योग्यं स्यात् । काऽपि इति च अवोचत् । यदत्र कार्ये ओङ्कार एव अङ्गीकार एव उत्तरं मङ्गल्यम् वस्तु अस्तु । इदमेवोत्तरं युक्तम्[3] ।।८७।।

अनाश्रवा वः किमहं कदापि वक्तुं विशेषः परमस्ति शेषः ।
इतीरिते भीमजया न दूतीमालिङ्गदालीश्च मुदामियत्ता ।।८८।।

अनाश्रवा[1] व इति । भीमजया[2] इति ईरिते सति मुदां हर्षाणाम् इयत्ता न दूतीम् आलिङ्गत् । आलीश्च सखीश्च न मुदाम् इयत्ता आलिङ्गत् । अपि तु अतिशायी हर्षो बभूव । इतीति किम् ? ।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

हे सख्यः ! अहं किं कदाऽपि वो युष्माकम् अनाश्रवा अवचनकरी[3] ? । सर्वथा[4] भवतीनां भणितं करोमि । [5]परं वक्तुं कश्चिद्विशेषः शेषोऽस्ति वक्तव्यशेषमस्ति । ततो दूत्या सखीभिश्च [6]विज्ञातम् । यदियमिन्द्रं वरिष्यति ततो हर्षोऽजनि[7] ॥८८॥

भैमीं च दूत्यं च न किञ्चिदापमिति स्वयं भावयतो नलस्य ।
आलोकमात्राद्यदि तन्मुखेन्दोरभून्न भिन्नं हृदयारविन्दम् ॥८९॥

भैमीं[1] च दूत्यं चेति । नलस्य हृदयमेव[2] अरविन्दं कमलं यदि न भिन्नं न[3] स्फुटितम् अभूत् तदा तस्या मुखेन्दोः आलोकमात्रात् । अथ च चन्द्रालोकात् कमलं न विकसति । किं कुर्वतः ? । स्वयम् इति भावयतः चिन्तयतः[4] । इतीति किम् ? । अहं भैमीं च दूत्यं च न किञ्चित् आपम्[5] । उभयमपि गतम् । दूतत्वं दूत्या कृतं, दमयन्त्या इन्द्रस्य माला स्वीकृता । तत[6] इन्द्रो वृतः[7] ॥८९॥

ईषत्स्मितक्षालितसृक्वभागा भ्रूसंज्ञया[1] वारिततत्तदालिः ।
स्रजा नमस्कृत्य तयैव शक्रं तां भीमभूरुत्तरयां बभूव ॥९०॥

[2]ईषत्स्मितेति । भीमभूः तां दूतीम् उत्तरयां बभूव । किं कृत्वा ? । तयैव स्रजा शक्रं नमस्कृत्य । किं भूता ? । [3]ईषत्स्मितेन क्षालितः सृक्वभागो यस्याः सा तथा । तथा भ्रूसंज्ञया वारिता निषिद्धा सा सा आलिः सखीः यया । इन्द्रनमस्कारेणैव दूत्या[4] ज्ञातं यदिन्द्रो निराकृतः[5] ॥९०॥

स्तुतौ मघोनस्त्यज साहसिक्यं वक्तुं कियत्तं यदि वेद वेदः ।
मृषोत्तरं साक्षिणि हृत्सु नॄणामज्ञातृविज्ञाऽपि ममाऽपि तस्मिन् ॥९१॥

[1]स्तुतौ मघोन इति । हे दूति ! त्वं मघोन इन्द्रस्य स्तुतौ साहसिक्यं त्यज । तम् [2]इन्द्रं कियत् स्वल्पमपि वक्तुं स्तोतुं यदि वेद जानाति तदा वेद एव नान्यो [3]जानाति । तस्मिन् इन्द्रे[4] ममाऽपि उत्तरदानं मृषा[5] निरर्थकम् । यतः किं भूते ? । [6]नॄणां हृत्सु साक्षिणि चिन्तज्ञे । किं भूतम् उत्तरम् ? । अज्ञातॄन् विज्ञापयतीत्येवंशीलम् । उत्तरदानेन अज्ञातः[7] ज्ञाप्यते न तु इन्द्रः[8] ॥९१॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

आज्ञां तदीयामनु कस्य नाम नकारपारुष्यमुपैति जिह्वा ।
प्रह्वा तु तां मूर्ध्नि विधाय मालां बालाऽपराध्यामि विशेषवाग्भिः ।।९२।।

[1]आज्ञां तदीयामिति । तदीयामिन्द्रसम्बन्धिनीम् आज्ञाम् अनु लक्ष्यीकृत्य नकारपारुष्यं निषेधेन कठोरत्वं कस्य नाम जिह्वा उपैति ? । तु पुनरहं बाला तां मालां मूर्ध्नि विधाय प्रह्वा सती विशेषवाग्भिः अपराध्यामि । बालस्य किल वाचालताचापल्यं न गणनीयम्[2] ।।९२।।

तपः फलत्वेन हरेः कृपेयमिमं तपस्येव जनं नियुङ्क्ते ।
भवत्युपायं प्रति हि प्रवृत्तावुपेयमाधुर्यमधैर्यसर्जि ।।९३।।

[1]तप इति । इयं हरेरिन्द्रस्य कृपा मयि अनुकम्पा इमं मल्लक्षणं जनं तपस्येव नियुङ्क्ते । पुनस्तप एव कारयति । केन ? । तपसः फलत्वेन । जन्मान्तरे कृतस्य तपसः फलं हरेः कृपा । हि यस्मात् [2]कारणात् उपेयस्य साध्यस्य फलस्य माधुर्यं स्वर्गादिश्चारुता उपाय[3]-साधनम् अग्निष्टोमादिकं [4]प्रति प्रवृत्तौ अधैर्यसर्जि अविश्वासकारि भवति । प्रवर्तमानस्याऽऽत्मनि प्रवर्तमानदशायामेव फलस्य अप्रत्यक्षता अनुभवविषयत्वाभात् । इयं तु कृपा तपसः फलत्वेन प्रत्यक्षेणाऽनुभूता । इदं तपो मम समीहितं साधनमिति प्रवर्तमानायां मम तप [5]प्रति प्रवृत्तौ धैर्यं सृजति । अतो विश्वासात् तपस्येव नियुङ्क्ते । अथवा उपेयस्य साध्यस्य माधुर्यं नाम रमणीयम् । प्रवृत्तौ फलस्य प्रवर्तने सति[6] प्राप्तकाले उपायं प्रति व्यये अधैर्यम् अधीरत्वं सृजतीत्येवंशीलं भवति । येन तपसा उपायेन [7]साधनेन ईदृशं कृपालक्षणं साध्यं फलं प्रवृत्तं तस्य तपसो व्ययः कथं क्रियेत । तस्मादहं तप एव चिनोमीति[8] ।।९३।।

शुश्रूषिताहे तदहं तमेव पतिं मुदेऽपि व्रतसम्पदेऽपि ।
विशेषलेशोऽयमदेवदेहमंशागतं तु क्षितिभृत्तयेह ।।९४।।

[1]शुश्रूषिताह इति । तत्तस्मादहं तमेव[2] इन्द्रं पतिं शुश्रूषिताहे । किमर्थम् ? । मुदेऽपि हर्षाय च । व्रतसम्पदेऽपि तपःसम्पत्तौ च । तु पुनरयं विशेषस्य लेशोऽतिस्वल्पो विशेषः यत् तम् इन्द्रम् अदेवदेहं मनुष्यं [3]शुश्रूषिष्ये । [4]तथा क्षितिभृत्तया राजत्वेन इह पृथिव्याम् अंशेन आगतं नलरूपतया आगतम् । नलो हीन्द्रस्यांऽशः[5] ।।९४।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

अश्रौषमिन्द्रादरिणी गिरस्ते सतीव्रतातिप्रतिलोमतीव्राः ।
स्वं प्रागहं प्रादिषि नामराय किं नाम तस्मै मनसा नराय ।।६५।।

अश्रौषमिति[1] । अहम् इन्द्रविषये आदरिणी सती आदरपरा सती ते तव गिरोऽश्रौषम् । किं भूताः ? । सतीव्रतस्य अतिप्रतिलोमाः[2] प्रतिकूलाः अत एव तीव्राः । यतोऽहं स्वम् आत्मानं प्राक् पूर्वमेव तस्मै इन्द्राय अमराय न प्रादिषि न[3] दत्तवती । किं नाम किं पुनस्तस्मै नराय मनुष्याय राजरूपाय । अतोऽहमिन्द्रादरिणी एव । वाचस्तु सतीत्वप्रतिलोमाः । रलयोरेकत्वे[4] नराय नलाय[5] ।।६५।।

तस्मिन् विमृश्यैव वृते हृदैषा नैन्द्री दया मामनुतापिकाऽभूत् ।
निर्वातुकामं भवसम्भवानां धीरं सुधानामवधीरणेव ।।६६।।

[1]तस्मिन्नित्यादि । हे दूति । मया तस्मिन्नले हृदा चेतसा विमृश्यैव वृते सति ऐन्द्री[2] इन्द्रसम्बन्धिनी एषा[3] दया[4] मामनुतापिका नाऽभूत् । इन्द्रेण यत्प्रार्थिताऽहं तत्र मम पश्चात्तापो नाऽस्ति । यथा भव [सम्भवानां] सांसारिकाणां[5] सुखानाम् अवधीरणा[6] अवगणना निर्वातुकामं[7] मुमुक्षु योगिनं धीरं विद्वांसमनुतापिका न भवति । उपमा[8] हेतुश्च ।।६६।।

वर्षेषु यद्भारतमार्यधुर्याः स्तुवन्ति गार्हस्थ्यमिवाश्रमेषु ।
तत्राऽस्मि पत्युर्वरिवस्ययेह शर्मोर्मिकिर्मीरितधर्मलिप्सुः ।।६७।।

वर्षे [ष्वि[1]] त्यादि । आर्यधुर्याः विद्वांसो वर्षेषु[2] जम्बूद्वीप[3] खण्डेषु मध्ये यद्भारतं वर्षं स्तुवन्ति । यथा आश्रमेषु ब्रह्मचर्याश्रमेषु मध्ये गार्हस्थ्यं स्तुवन्ति ।[4] यस्मात् त्रयोऽप्याश्रमिणो[5] [6]ज्ञानेनाऽन्नेन चान्वहम् । गृहस्थैरवधार्यन्ते (मनु॰ III. 78) ।। तस्मात् [7]त्रिषु आश्रमेषु मध्ये गृहस्थाश्रमो मुख्यः सर्वोपजीव्यः । तत्र[8] भारते वर्षे [इह] लोके पत्युर्वरिवस्यया परिचर्यया शर्मणः सुखस्योर्मिभिः किर्मीरितो यो धर्मः तं लिप्सुर्लब्धुमिच्छुरहमस्मि । [9]नन्विन्द्रस्योपासनात् शर्म एव केवलमधुना[10] नरेन्द्रस्योपासनात् शर्मादिकं सर्वम् धुरो यड्ढकौ चे (पा॰ IV. iv. 77) ति यत्[11] ।।६७।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

स्वर्गे सतां शर्म परं न धर्मा भवन्ति भूमाविह तच्च ते च ।
शक्या मखेनाऽपि मुदोऽमराणां कथं विहाय त्रयमेकमीहे ।।९८।।

[1]स्वर्गे सतामित्यादि । स्वर्गे सतां विद्यमानानां महात्मनां परं केवलं शर्म [भोगः] सुखमेव न तु धर्माः धर्मा अपि पूर्वदत्ता भवन्ति । भूमौ पुनरिह च तच्छर्म [ते] च धर्माश्च भवन्ति । [2]धर्मा इति पूर्वदत्तलक्षणा एवाऽत्राऽभिप्रेताः[3] । इष्टस्य[4] तृतीयपादे वक्ष्यमाणत्वात् । तस्य चाऽयमर्थः । इन्द्रवरणे इन्द्रस्यैकस्यैव मुदो न पुनरन्येषां देवानाम् । भूमौ तु मखेन सर्वेषाममराणां मुदोऽपि शक्याः ।।

यदाह—मनुष्याणां चारम्भसामर्थ्यात् इति । अतस्त्रयं[5] विहाय कथमेकमीहे । केचन[6] पुनर्व्याचक्षते—अमराणां देवानां मुदो हर्षा मखेनाऽपि[7] यज्ञेनाऽपि शक्याः । इन्द्रवरणे[8] देवानां मुदः यज्ञैश्च । अतो मुदां साधारणत्वम् । अहं ततस्त्रयं देवमुदं धर्मं शर्म च पृथिव्यां विहाय स्वर्गे धर्मधर्मणोः[9] एकं शर्म कथमीहे । द्वयमिति पाठो[10] वा द्वयं [धर्मं] शर्म च विहाय एकं सुखं कथमहमिच्छामि[11] । अनुप्रासः[12] समुच्चयः[13] ।।९८।।

साधोरपि स्वः खलु गामिताधो गामी[1] स तु स्वर्गमितः प्रयाणे ।
इत्यायतिं[2] चिन्तयतो हृदि द्वे द्वयोरुदर्कः किमु शर्करेनः ।।९९।।

[3]साधोरपीत्यादि । साधोरपि [स्वः] स्वर्गाद् भ्रष्टस्य खलु अधो लोके गामिता[4] स तु पुनः साधुः इतो भूलोकात् प्रयाणे स्वर्गं गामी[5] गन्ता[6] इति प्रकारेण द्वयोर्भूस्वर्गयोरायतिमुत्तरकालं हृदि चिन्तयतः । किमु[7] द्वे शर्करे न[8] समम् उदर्कः ।[9] स्वर्गस्य उत्तरफलं शर्करा[10] । अधोगमनात् सिकता वालुका भुवस्तु उत्तरफलम् । खण्डशर्करा स्वर्गः ।[11] अनुप्रासो रूपकमुत्प्रेक्षा इत्यन्यः । शर्करे इति श्लिष्टम् ।।९९।।

प्रक्षीण एवाऽऽयुषि कर्मकृष्टेर्नरान्न तिष्ठत्युपतिष्ठते यः ।
बुभुक्षते नाकमपथ्यकल्पं धीरस्तमापातसुखोन्मुखं कः ।।१००।।

[1]प्रक्षी[ण] एवेत्यादि । को धीरो विद्वान् तम्[2] आपातसुखोन्मुखं तत्कालरम्यं परिणामविरसं नाकम् अपथ्यसदृशं बुभुक्षते । यः स्वर्गः प्रारब्धकर्मणः कृष्टेः क्षयात् प्रकर्षेण क्षीणे त्रुटिते एवाऽऽयुषि जीविते । कर्मणः सुकृतादेः[3] कृष्टेः कर्षणात् नरानुपतिष्ठते [4]उपश्लिष्यति

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

उपान्मन्त्रकरणे[5] (पा॰ I. iii. 25) इत्यत्र उपाद्देवपूजासङ्गतिकरण-मित्रकरणपथिष्विति वक्तव्यमु-(पा॰623)क्तम्। सङ्गतिकरणमुप-श्लेषः[6]। मित्रकरणं विनापि उपश्लेषेण मैत्रीसम्बन्धः मित्रकरणे महा-मात्रानुपतिष्ठते। न तिष्ठति आयुषि उपतिष्ठते स्वर्गः। यथा अपथ्यं कर्म कृष्टेः कर्मवशात् प्रक्षीणे आयुषि नरानुपतिष्ठते न तिष्ठति सति[7]। आयुषि तदपथ्यं तत्कालरम्यं को भोक्तुमिच्छति।[8] भुजोऽनवने (पा॰ I. iii. 66) इत्यात्मनेपदम्। धर्मपथ्यर्थन्यायादनपेते (पा॰ IV. iv. 92) इति यत्। [9]अनुप्रास उपमा च ॥१००॥

इतीन्द्रदूत्यां प्रतिवाचमर्धे प्रत्यूह्य सैषाऽभिदधे वयस्याः।
किञ्चिद्विवक्षोल्लसदोष्ठलक्ष्मीजितामनिद्रद्दलपङ्कजास्याः ॥१०१॥

[1]इतीन्द्रदूत्यामित्यादि। सा एषा दमयन्ती वयस्याः सखीरभिदधे[2]। किं कृत्वा?। इति प्रकारेण इन्द्रदूत्यां विषये प्रतिवाचं प्रतिवचनम् अर्धे अर्धोक्तमेव प्रत्यूह्य स्थापयित्वा। किं विशिष्टाः सखीः?। किञ्चिद्विवक्षया उल्लसन्ती या ओष्ठयोर्लक्ष्मीस्तया जितमपनिद्रद्दलं[3] विकसद्दलं पङ्कजं येव [4]तत्तथाविधमास्यं यासां तास्तथा। [5]उपमा ॥१०१॥

अनादिधा [1]विश्वपरम्पराया हेतुस्रजः स्रोतसि वेश्वरे वा।
आयत्तधीरेष जनस्तदार्याः। किमीदृशः पर्यनुयुज्य कार्यः ॥१०२॥

[2]अनादीत्यादि। हे आर्याः। सख्यः। एष[3] मल्लक्षणो जनः अनादिधा बीजाङ्कुरन्यायेन नित्या या विश्वपरम्परायाः स्रोतसि प्रवाहे आयत्तधीः परतन्त्रबुद्धिः। न स्वतन्त्र इति मीमांसकाः स्वभाव-वादिनश्च[4]। [5]अनादिरेव अनादिधा। तथा एष जनो हेतुस्रजः कारणमालायाः प्रवाहे आयत्तधीः पूर्वपूर्वशुभाशुभैः कर्मभिः कारणैः उत्तरोत्तरं जन्म प्राणिनां न स्वतन्त्रम् इत्यदृष्टकारणवादिनो नैयायिका मीमांसकाश्च। ईश्वरे वा आयत्तधीः। ईश्वरशब्देन मायाशबलं ब्रह्मोच्यते इति वेदान्तवादिनः। अथवा ईश्वरोऽशरीरी जगत्कर्ता इति नैयायिकाः। ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा[6]। ईदृशः[7] परतन्त्रो मल्लक्षणो भवतीभिः पर्यनुयुज्य पूर्वपक्षं कृत्वा किं कार्यः?। न किमपि मम[8] परतन्त्रायाः [9]पार्श्वात् कारयितव्यम्[10]। विश्वपरम्परायामिति मुख्यपाठः। विश्वपरम्परायामायत्तधीः। [11]अनुप्रासो हेतुः समुच्चयश्च ॥१०२॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

नित्यं नियत्या परवत्यशेषे कः संविदानोऽप्यनुयोगयोग्यः ।
अचेतना सा च न वाचमर्हेद्वक्ता तु वक्त्रश्रमकर्म भुङ्क्ते ।।१०३।।

[1]नित्यमित्यादि । हे [2]सख्यः ! नित्यं नियत्या अशेषे जगति परवति परतन्त्रे सति कः संविदानोऽपि[3] । अविवक्षितकर्मकः । जानन्नपि अनुयोगस्य पूर्वपक्षस्य योग्योऽस्ति । अपि तु नास्ति । त्वया अमुकमित्थं कथं न कृतमिति वक्तव्यं न[4] । यतो नियतिर्नाम षड्त्रिं[5]शतितत्त्वान्तर्गतं [6]तत्त्वं शैवानामागमोक्तम् । तदायत्तं सर्वमिति ते वदन्ति । सा [7]तर्हि नियतिरूपा लभ्यतामित्याशङ्क्याऽऽह–सा च नियतिरचेतना सती न वाचमुपालम्भमर्हेत्[8] । तु पुनर्वक्ता उपालम्भदाता तां नियतिं प्रति केवलं वक्त्रश्रमकर्म भुङ्क्ते । केवलं[9] मुखश्रमो भवति । समो गम्यृच्छिप्रच्छिस्वरत्यर्त्तिश्रुविदिभ्यः (पा° I. iii. 29) इत्यात्मनेपदम् । मानः । [10]अनुप्रासो हेतुर्विरोधश्च ।।१०३।।

क्रमेलकं निन्दति कोमलेच्छुः क्रमेलकः कण्टकलम्पटस्तम् ।
प्रीतौ तयोरिष्टभुजोः समायां मध्यस्थिता नैकतरोपहासः ।।१०४।।

[1]क्रमेलकमित्यादि । कोमलेच्छुः क्रमेलकम् उष्ट्रं निन्दति । क्रमेलकः कण्टकलम्पटः[2] तं कोमलभक्षकं निन्दति । उदासीनेन तटस्थेन पुरुषेण तयोर्द्वयोरपि स्वकीयं [3]स्वकाय इष्टं कोमलं वा कण्टकं वा[4] भुक्तवतोः समायां प्रीतौ सत्यां मध्यस्थिता औदासीन्यं कर्तव्यम् । न[5] एकतरस्याऽपि उपहासः कर्तव्यः । ततो भवतीभिर्मम वरवरणे औदासीन्यं कर्तव्यम्[6] ।।१०४।।

गुणा हरन्तोऽपि हरेर्नरं मे न रोचमानं परिहारयन्ति ।
न लोकमालोकयथाऽपवर्गात् त्रिवर्गमर्वाञ्चममुञ्चमानम् ।।१०५।।

गुणा[1] इत्यादि । हरेरिन्द्रस्य गुणा मनो हरन्तोऽपि मे मह्यं रोचमानम् [2]अभिरुचिरं नरं मनुष्यं न [3]परिहारयन्ति[4] । युक्तोऽयमर्थः । हे सख्यः । यूयं लोकं नाऽऽलोकयथ कथं न पश्यथ ? । किं भूतं लोकम् ? । अपवर्गान्मोक्षाद् अर्वाञ्चम् अवकृष्टमपि त्रिवर्गं धर्मार्थ-कामलक्षणम् अमुञ्चमानम् । यद्यपि मोक्ष उत्कृष्टस्तथापि कर्ममार्गे त्रिवर्गेऽभीष्टे लोकस्याऽभिरतिः । अनुप्रासो[5] विरोधोऽर्थान्तरन्यासश्च विशेषोक्तिर्वा ।।१०५।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

आकीटमाकैटभवैरि तुल्यः स्वाभीष्टलाभात् कृतकृत्यभावः ।
भिन्नस्पृहाणां प्रति चाऽर्थमर्थं द्विष्टत्वमिष्टत्वमपव्यवस्थम् ।।१०६।।

[1]आकीटेत्यादि । हे सख्यः ! आकीटं कीटमात्रात् प्रभृति तथा आकैटभवैरि श्रीकृष्णं यावत् स्वस्य स्वस्याऽभीष्टलाभात् सर्वेषामपि कृतकृत्यभावस्तुल्यः । [2]यादृशो विष्णोः कृतार्थभावः [3]कीटस्याऽपीच्छालाभे तादृगेव । भिन्नस्पृहाणां पुरुषाणाम् अर्थमर्थं प्रति द्विष्टत्वमिष्टत्वं[4] चापगता व्यवस्था नियमो यस्य तत्तथा । यदेकस्येष्टं तन्नियमेनाऽपरस्याऽपीष्टमिति न [5]नियतम् । किंतु (अ) नियतम् । यथा[6] एका कामिनी कामिन इष्टा, सैव परिव्राजकस्य द्विष्टा । तस्मादहमात्माभिलषितं [7]वरं [8]वरिष्ये । [9]अनुप्रासोऽर्थान्तरन्यासश्च ।।१०६।।

[1]अग्राग्रजाग्रन्निभृतापदन्धुर्बन्धुर्यदि स्यात्प्रतिबद्धुमर्हः ।
जोषं जनः कार्यविदस्तु वस्तु प्रच्छया निजेच्छा पदवीं मुदस्तु ।।१०७।।

[2]अग्राग्रजे इत्यादि । यो बन्धुरग्रेऽग्रे जाग्रती निभृता आपदेवाऽन्धुः कूपो यस्य स तथाविधो बन्धुर्यदि स्यात् ततः प्रतिबद्धुं माम् निषेद्धुम् अर्हो[3] योग्यो भवेत्[4] । अनिष्टशङ्कीनि बन्धुहृदयानी ति न्यायादिदं कार्यं कुर्वतोऽस्य इयमापत् भविष्यति इति शङ्कते यो बन्धुः स निवारयितुं[5] योग्यः । स्वजनस्य कार्यवित् युष्मादृशो जनः सखीलक्षणो जोषमस्तु तूष्णीं भवतु । यूयं कार्यं जानीथेति[6] भावार्थः । मम नलेऽनुरागः । [7]ततोऽहं न वारणीया । तु पुनर्मुदो हर्षस्य पदवीं वस्तु मया निजेच्छा प्रच्छया[8] । [9]पृच्छया इति पाठे पृच्छनीयमितिवत् रूढित्वात् सम्प्रसारणम् । यत्र मम हर्षस्तदहं[10] करिष्यामि । आत्मनस्तुष्टिरेव च (मनु° II. 4) इति धर्मसन्देहे मनुस्मरणात् । [11]अनुप्रासो रूपकं काव्यलिङ्गं च[12] ।।१०७।।

इत्थं प्रतीपोक्तिमतिं सखीनां विलुप्य पाण्डित्यबलेन बाला ।
अपि श्रुतस्वर्पतिमन्त्रिसूक्तिं दूतीं बभाषेऽद्भुतलोलमौलिम् ।।१०८।।

[1]इत्थमित्यादि । सा बाला इत्थं सखीनां प्रतीपोक्तिमतिं[2] प्रतिकूलवचनबुद्धिं पाण्डित्यबलेन शास्त्रयुक्त[3]—नीतिबलेन विलुप्याऽर्द्धोक्ते स्थापितामिन्द्रदूतीं पुनर्बभाषे । किं भूताम् ? । अद्भुतेन

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

लोलमौलिम् । किं भूताम् ?। अपि श्रुता[4] [5]स्वर्पतेर्मन्त्रिणो बृहस्पतेः सूक्तिः सुभाषितं यया तां तथाविधामपि । साश्चर्याम् । [6]अनुप्रासो [7]व्यतिरेकश्च ।।१०८।।

परेतभर्तुर्मनसेव दूतीं नभस्वतेवाऽनिलसख्यभाजः ।
त्रिस्रोतसेवाऽम्बुपतेस्तदाशु स्थिरास्थमायातवतीं निरास्थम् ।।१०९।।

[1]परेतभर्तुरित्यादि । हे दूति ! अहं परेतभर्तुः दूतीं निरास्थं निराकृतवती । अस्यतेस्थोऽन्त (का॰ III. vi. 95) इति थकारागमः । तदाऽऽ[2]गमनक्षण एव स्थिरा आस्था यत्र तद्यथा[3] भवति तथा आयातवतीमपि । कथं निरास्थम् ? । आशु वेगेन शीघ्रम् । केनेव ?। मनसा इव निरास्थम् । यथा मनोऽस्थिरं तथा वेगेन निराकृता । यतः प्रेतानां भर्ता । परेतानां[4] किल मनोऽस्थिरं तया आशु गच्छति । तथा अनिलसख्यभाजो [वह्नेः] दूतीं नभस्वता इव आशु निरस्तवती[5] । वायुरस्थिरो भवति । अम्बुपतेरपि दूतीं निरास्थं निरस्तवती[6] । त्रिस्रोतसा इव निराचकाराऽऽशु[7] । यथा गङ्गा त्रिभिः प्रवाहैर्वहति तथा निरास्थम् । अथवा, एकैकां दूतीमहं निरास्थम् । किं भूताम् ? । मनसैव दूतीम् । यथा मनःकल्पिता[8] दूतीः मिथ्या भवति । प्रेतानां हि मन एव । न तु शरीरम् । द्वितीयां नभस्वता इव दूतीम् । यथा वायुमयी दूती मिथ्या, न तु पारमार्थिकीं । यस्य[9] वायुना मैत्री तस्य दूत्याः कीदृक् प्रामाण्यम् ?। तृतीयां त्रिस्रोतसा इव दूतीम् । यथाप्रवाहेन दूतीं न किञ्चित् प्रमाणरूपां तथा त्रयमपि निरास्थम् । दूतीत्रयं मनोराज्यरूपं वायुः पानीयं च भूत्वाऽऽगतम् । अथवा, मनःप्रभृतीनां त्रयाणामपि परेतभर्तादित्रि[10]तयाधीनत्वान्मनसा इव आशु आयातवतीं[11] नभस्वता वायुनेव[12] आयातवतीं निरास्थमहं[13] निरास्थम्[14] । अन्यस्तु निरास्थदिति पठन् व्याचष्टे हुताशकीनाशजलेशदूतीनिराकरिष्णो (नै॰ VI. 75) रित्युक्तम् । तन्निराकरणार्थं[15] कविराहेति । केचिन्निरास्थमिति पठित्वा दमयन्त्या वचनं कुर्वन्ति । तन्न सङ्गतम् । उत्प्रेक्षावाक्यस्य[16] सङ्घट्टनादिन्द्रदूतीं प्रति [17]तन्निराकरणवचनस्य निरर्थकत्वात् इति चाह । तत्तु विचार्यम् । यतो दूतीं बभाषे इत्युक्त्वा मध्ये कविरुक्तिः । उत्तरश्लोके च दमयन्त्या वचनं व्याक्रियते । इति किं केन सङ्गतम् । सम्भावने च किं नाम ?। अघटनम् इन्द्रदूतीं

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

प्रति अन्यनिराकरणवचनमुपोद्वलनार्थम् । अनुप्रास[18] उत्प्रेक्षा उपमाऽपि[19] ।।१०६।।

भूयोऽर्थमेनं यदि मां त्वमात्थ तदा पदावालभसे मघोनः ।
सतीव्रतैस्तीव्रमिमं तु मन्तुमन्तर्वरं वज्रिणि मार्जितास्मि ।।११०।।

[1]भूयोऽर्थमित्यादि । हे दूति ! यदि त्वं मां भूयः पुनरपि एनमिन्द्र-वरणलक्षणमर्थमात्थ वदसि तदा मघोनो महेन्द्रस्य [2]पदौ चरणौ आलभसे स्पृशसि । शपथोऽयं ते । तु पुनरिमं तीव्रं मन्तुमपराधं वरमहम् अन्तश्चित्तमध्ये सतीव्रतैर्वज्रिणि विषये मार्जितास्मि । [3]श्वस्तनी (का° III. i. 30) । तास्मि । अपराधमार्जनं करिष्यामि । मन्तुमदुर्धरमिति पाठे सतीव्रतैरदुर्धरं सुसहमिति योजना । अनुप्रासः[4] ।।११०।।

इत्थं पुनर्वागवकाशनाशान्महेन्द्रदूत्यामपयातवत्याम् ।
विवेश लोलं हृदयं नलस्य जीवः पुनः क्षीबमिव प्रबोधः ।।१११।।

[1]इत्थं पुनरित्यादि । इत्थं शपथदानेन पुनरपि वाचो वचनस्य अवकाशनाशात् महेन्द्रदूत्यामपयातवत्यां सत्यां जीव आत्मा नलस्य लोलं चञ्चलं हृदयं [2]पुनर्विवेश । यथा प्रबोधः[3] ज्ञानं क्षीबं मत्तं पुनरपि प्रविशति[4] । अत्र उपजातिवृत्तम् । अनुप्रास उपमा ।।१११।।

श्रवणपुटयुगेन स्वेन साधूपनीतं
दिगधिपकृपयाऽऽप्तादीदृशः संविधानात् ।
अलभत मधु बालारागवागुत्थमित्थं
निषधजनपदेन्द्रः[1] पातुमानन्दसान्द्रः ।।११२।।

[2]श्रवणेत्यादि । [3]निषधजनपदेन्द्रो नल इत्थं बालाया रागेण [4]युक्ता या वाच उत्थम् उत्थानं यस्य तत्तथाविधं मधु आनन्दसान्द्रः सन् पातुमलभत । कस्मात् ? । दिगधिपानां कृपयाऽऽप्तात् ईदृश एतस्मात् संविधानात् दूतत्वकरणात् । किंभूतम् ? । श्रवणपुटयुगेन उपनीतं साधु सम्यक् दमयन्तीवचनलक्षणं[5] मधु शुश्राव । [6]आनन्दाङ्कम् । [7]मालिनीवृत्तम् । अनुप्रासो रूपकं च ।।११२।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहिरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
षष्ठः खण्डनखण्डतोऽपि सहजक्षोदक्षमे तन्महा—
काव्येऽयं व्यगलन्नलस्य चरिते सर्गो निसर्गोज्ज्वलः ।।११३।।

[3]श्रीहर्षमिति ।[4] तस्य महाकाव्येऽयं[5] षष्ठः सर्गो व्यगलत् । किंभूते ? । खण्डनखण्डतोऽपि ग्रन्थात् सहजात् स्वभावत एव क्षोदक्षमे । अथवा किंभूतात् ?। सहजाद् भ्रातुः खण्डनमपि श्रीहर्षेण कृतम् । अतिविषमम्[6] ।।११३।।

[1]श्रीमानालिगपण्डितः स्वसमयाविर्भूतसर्वाश्रम—
श्चाण्डूपण्डितसंज्ञितं प्रसुषुवे श्रीगौरिदेवी च यम् ।

किमपि मुकुटरत्नं नागरश्रोत्रियाणां
प्रतिनिधिरिव तेजःसद्मनः पद्मयोनेः ।
विधुरुपशमसिन्धोरालिगो नाम धीमानिह
समजनि पत्नी गौरिदेवीति चास्य ।।२।।

कलिकालाकुलां पुण्यलक्ष्मीं रक्षितुमिच्छता ।
प्राकारो विधिना योऽत्र विप्राकारो विनिर्मितः ।।३।।

तदात्मजस्तालहणनामधेयो विशारदः शारदचन्द्रकीर्तिः ।
महाक्रतौ ज्योतिषि कर्मकाण्डं क्रमाच्चतुःसंस्थतया प्रयोक्ता ।।४।।

सम्राट्स्थपत्यग्निचिदग्रजन्माग्रगण्यचाण्डूजनुषोऽनुजन्मा ।
त्रैविद्यवृद्धार्चितसर्वदेवबुधाग्रजन्मा महनीयजन्मा ।।५।।

श्रीवैद्यनाथाभिधसूक्तदेवीपदप्रसादोपार्चितप्रसादैः ।
पदैरुदारैर्विवृतप्रक्लृप्तां क्वचित्क्वचित् शोधयति स्म टीकाम् ।।६।।

इति [1]महापण्डितश्रीचाण्डूविरचितायां
[2]नैषधदीपिकायां टीकायां
निषधप्रवेशो[3] नाम
षष्ठः सर्गः समाप्तः[4] ।।६।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

टिप्पण

सर्ग–६

1 P1 ॐ नमः श्रीसारदायै ॥ P2 ॐ नमः शिवाय ॥ श्री ॥ 2 P1 गमनं 3 P2 °म्लानि° 4 P2 छलन° 5 P2 प्रथमा 6 P2 °प्रत्यवादि° 7 P2 om. धर्म° ॥ 1 P1 दूत्यायेत्यादि । 2 P2 निषधानां 3 P1 om. रथवेगस्य 4 P1 °विषयं 5 P2 एकाकां कथं 6 P1 add. दूत्यं तद्भावकर्मणी (अमर° II. viii. 32) । दूतवणिग्भ्यां चेति वक्तव्यम् (पा° 434) क्लीबे प्रधानम् । उपजातिवृतम् ॥ P2 lecto. sup. lin. mg. add. प्रधानमित्याविष्ट-लिङ्गम् । द्विषामिति कर्मणि षष्ठी ॥१॥

1 P1 मैम्या । 2 P2 योऽ° 3 P2 om. अन्तरायं 4 P1 add. यत् 5 P1 °रागात्स्य: 6 P2 पयोधे: 7 P2 मित्रा° 8 P2 मैत्रा° 9 P1 add. अत्रेतिहासः–प्राजापत्यो मरीचिर्हि मरीचेः काश्यपोऽभवत् । तस्य देव्योऽभवन् जाया दाक्षायण्यस्त्रयोदश ॥ तासु देवासुराश्चैव गन्धर्वाः पन्नगोरुगाः । वयांसि च पिशाचाश्च जज्ञिरेऽन्याश्च जातयः ॥ तत्र त्वेकाऽदितिर्देवी द्वादशोऽजनयत् सुता[न्] । द्वन्द्वं तस्यास्ततो जज्ञे मित्रं च वरुणं च ह ॥ तयोरागतयोः साऽत्र दृष्ट्वाऽप्सरसमुर्वशीम् । रेतश्च स्कन्द [यन्] कुम्भेन्यपतद्वासतीवरे ॥ तेनैव तु मुहूर्तेन वीर्यवन्तौ यशस्विनौ अगस्त्यश्च वसिष्ठश्च भ्रातरौ संबभूवतुः ॥ उदियाय ततोऽगस्त्यः शम्यानास्ते महातपाः । मानेन संमितो यस्मात्तस्यान्मान्य इहोच्यते ॥ यद्वा कुम्भादृषिर्जातः कुम्भे वाऽपि हि मीयते । कुम्भ इत्यभिधानं तु परिमाणं तु दृश्यते ॥ (बृह°. दे° V. 147–151) । इति प्रासङ्गिकेऽगस्त्यवाचकमान्य-शब्देतिहासः । कालिदासस्याऽपि–रघुनाथोऽप्यगस्त्येन मार्गसन्दर्शितात्मने (रघु° XV. 54)ति । केचित्पठन्ति–मानं कुम्भ इत्यर्थः । 10 P2 ऊढ 11 P1 भूङ्क्ते 12 P1 om. पुत्रस्य 13 P1 add. अनुप्रास उपमा । दूतधर्मे स्थिर-धीरित्यनेकपदार्थो हेतुश्च ॥२॥

1 P1 नल । P1 add. अपि 3 P2 om. राज°........समीपे 4 edr. स्थिताः; P1 add. यस्मिन्देशे नलो मिलितस्तत्रैवाऽऽभरणभूता स्थिता इति

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

वा । 5 P1 om. परम् अनिमेषाः 6 P1 नल एव प्रणाली जलनिर्गमनमार्गो मकरमुखादिस्तत्र मिलन् । 7 P1 add. रसादिकं हि प्रणाल्या मिलति द्वयोः प्रणालीपयसः पदव्याम् अन्ये स्त्रीनपुंसकयोराहुः । रूपकमुत्प्रेक्षा च ॥३॥

1 P1 तां कुण्डि । 2 P2 तदीयः–सम्बन्धी bef. किं भूताम् ? । 3 P1 क्षणेन P1 क्षणेन विदभाम् 4 P2 add. किं भूतः ? । 5 P1 add. व्यतिरेको रूपकमुपमा चानुप्रासोऽपि ॥४॥

1 P1 भैमी । 2 P2 निसश्वास 3 P1 इति किम् ? । 4 P1 add. पीङ् (1141) पाने । भावशबलता । अनुप्रासः काव्यलिङ्गं च ॥५॥

1 P1 स्विद्या । 2 P2 om. नवम् 3 P2 अश्रुजवेन स्विद्यत् 4 P1 भोगं 5 P1 रोमाञ्चसूचाभ्यां 6 P2 °मुक्तं 7 P2 वसन् 8 P2 तत्रो° 9 P1 add. स्फुरत्त्वादिति शतृप्रत्ययात् त्वप्रत्ययः । इगुपधे (पा° III. i. 135) त्यादिना क–प्रत्यये स्फुरत्त्वादिति द्या भावाः (?) । समासोक्तिः ॥६॥

1 P1 रथा । 2 P2 राजा aft आशु 3 P1 चन्द्रसम्बन्धि 4 P1 add. अनुप्रास उपमा च पर्यायश्च ॥७॥

1 P1 चित्रं । 2 P2 कुण्डिनं 3 P2 om. कुण्डिन° 4 P2 om. नलस्य 5 edr. add. चित्रतरम् 6 P2 om. बभूव 7; edr. add. मूर्ति. 8 P1 add. विरोधः ॥८॥

1 P1 जनैरित्यादि । 2 P2 om. राज°........गता । 3 P1 add. तद्दर्श । अहो (आङो) दोऽनास्य विहरणे (पा° I. iii. 30) इत्यात्मनेपदम् । विगाहमानस्य पुरं नलस्य दृष्टिर्ययौ पाठान्तरम् । 4 P2 रम्यै° 5 P1 om. पदे स्थाने स्थाने 6 P1 add. आश्चर्यस्य 7 P1 add. अनुप्रासो रूपकं पर्यायश्च ॥९॥

1 P1 हेलां । 2 P1 सज्ज 3 P2 om. जने जन° 4 P1 दधे 5 P2 वसामि 6 edr. add. हृदा 7 P2 मानोपि° 8 P1 add. भावशबलता ॥१०॥

1 P2 text क्षिपन् 2 P1 अथो । 3 P1 °भुवनम् 4 P2 om. अविशत् 5 P1 दिक्षु° 6 P1 add. बह्विति क्रियाविशेषणम् । मुहुर्मुहुरित्यर्थः । दिग्विशेषणं वा । 7 P1 add. अनुप्रासो हेतुश्च ॥११॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P2 text ददे 2 P1 अयं क । 3 P1 अथ वा 4 P1 om. अथ वा 5 P2 लङ्घितामपि 6 P2 om. इति 7 P2 प्रविष्टो 8 P2 परिग्रहं न तूपमाया 9 P1 om. प्रायो 10 P1 add. रूपकं जातिश्च ॥१२॥

1 P2 text विलोक्य 2 P1 अन्तः । 3 P1 स नलः aft. बालया 4 P1 om. सत्या 5 P2 om. असंवृतौ 6 P2 वीक्ष्य 7 P1 add. सक्थि क्लीबे पुमानूरु (अमर° II. vi. 73) । जातिः ॥१३॥

1 P2 text °सम्बर° 2 P1 अनादि । 3 P2 देवा 4 P1 add. किम् ? । 5 P2 दृष्टि° 6 P2 उत्पत्तौ 7 P1 add. वा 8 P1 °भुवा 9 P2 मायया 10 P1 शल्यं 11 P1 जातेव 12 P2 दमयन्तीं 13 P1 add. अनुप्रासो विशेषः हेतुश्च ॥१४॥

1 P1 अलीक । 2 P2 प्रासादो एव 3 P1 add. अनुप्रासो रूपकं हेतुश्च । °अमस्येवेति क्वचित्पाठे उत्प्रेक्षाऽपि ॥१५॥

1 P1 भैमी ।; P2 भैमीनिराशेति । 2 P1 विलोक्य 3 P2 बोधितः 4 P1 add. हृदि मनसि 5 P1 add. अनुप्रासो भावोदयः ॥१६॥

1 P1 प्रिया । 2 P1 add. नलम् 3 P1 भूरवो 4 P1 add. भावोदयोऽनुप्रासो जातिश्च ॥१७॥

1 P2 text दधार 2 P1 पश्य । 3 P1 om. व्यावृत्तं 4 P1 किं भूतः ?। 5 P2 मरुतौ 6 P1 add. अस्तवस्त्रत्वं देशस्वभावात् वाता वायुना 7 P2 स्तनदर्शने परस्त्रीत्वम् 8 P1 add. भावोदयोऽनुप्रास उत्प्रेक्षोपमा च ॥१८॥

1 P1 अन्तः । 2 P1 विस्मृता 3 P1 केशानां 4 P1 add. बलं सञ्जातं येषां ते बलिनः । अनुप्रासो रूपकं च विशेषोक्तिः श्लेषश्च ॥१९॥

1 P1 दोर्मूल । 2 P1 add. उदीचीप्राच्यवाचीषु 3 P1 add. किं कुर्वन्त्याः ?। प्रक्रान्तविषयस्तच्छब्दः 4 P1P2 नाभि; edr. नाभीं 5 P1 add. भावोदयोऽनुप्रासस्तुल्ययोगिता पर्यायो हेतुश्च ॥२०॥

1 P1 मीला । 2 P1 om. भ्रमन् 3 P1 add. स्तनाभ्यां 4 P1 निम्नदे 5 P1 add. काव्यलिङ्गं भावोदयः ॥२१॥

1 P2 text om. विसर्गः 2 P1 निमीलनेत्यादि । 3 P2 om. च 4 P1 add. काव्यलिङ्गम् उपमाऽर्थान्तरन्यासश्च ॥२२॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 रोमाञ्चितामित्यादि । 2 P1 तस्या विकारित्वे 3 P2 °पूजाया 4 P1 add. अनुप्रास काव्यलिङ्गम् ।।२३।।

1 P1 हित्वै । 2 P1 अमन्त्या: स्त्रिया: स्पर्श एकं सङ्कीर्णं वर्त्म मार्गं हित्वैव इह चतुष्पथे पृथुलमार्गे सुत्यजः सुखेन परिह्रियते । अतस्तत्र स्थितं सर्वे मार्गा मिलन्ति । 3 P2 om. तं ....भाव्यम् ।। 4 P1 add. ऋक्पूरब्धूः पथामानक्षे (पा° V. iv. 74) इति डच् । काव्यलिङ्गं रूपकं च ।।२४।।

1 P1 उद्वर्तं । 2 P2 om. अनुदात्त°........पुन° 3 P1 add. गले धृता इव 4 P2 om. अर्द्धेन्दु°........विरही तस्य 5 P1 add. इति नखाङ्कै सह साक्षादेव विरोधः । अर्द्धेन्दुसादृश्येन अर्द्धेन्दुद्वारेण च विरोधः । अतः साक्षादर्द्धेन्दु-सम्बन्धेन वा वैरिभिर्नखाङ्कैर्वियोगिनं धीरं नलमाश्रिताया दृष्टेस्तिरस्करणम् । 6 P1 add. उत्प्रेक्षा प्रत्यनीकं च ।।२५।।

1 P2 text °पत्य 2 P1 तन्वी । 3 P2 °मुखता 4 P2 om. च 5 P1 om. वा निश्चिता 6 P1 दृष्टा 7 P1 °कृत्य 8 P2 तस्य 9 edr. add. तस्य 10 P2 om. हि 11 P1 add. अनुप्रासो रूपकं हेतु अनुमान-मतिशयोक्तिश्च ।।२६।।

1 P1 चतुष्पथे ।; P2 चतुष्पथेति । 2 P1 भूत्ये वा अयं 3 P2 om. न 4 P1 add. अदास्यन् 5 P1 निवृत्तासु 6 P1 गतः; and add. भावो-दयः काव्यलिङ्गं च ।।२७।।

1 P1 सङ्घट्ट । 2 P2 दिशः 3 P2 om. पापस्य 4 P1P2 आप; edr. अवाप 5 P2 चापं 6 P2 किं भूतायाः ? 7 P1 add. स्पर्शसुखलोभा 8 P1 add. अनुप्रासः काव्यलिङ्गं समासोक्तिः भावोदयश्च ।।२८।।

1 P1 हृत । 2 P1 om. कन्दुकेन........कयाऽपि 3 P1 om. करजैर... ....अदृश्य एव 4 P1 om. अक्तः अभ्यक्तः 5 P1 add. कयाचि-दित्यादि नवीकृतम् 6 P2 om. स 7 P2 om. संभुक्तः 8 P2 om. तद्धिते आर्थी 9 P1 add. संमुक्त उपमानम् ।।२९।।

1 P1 छाया । 2 P2 °चित्ततया 3 P1 अपि 4 P2 om. स्वस्यैव...... अयमर्थः 5 P1 यत्तस्यैव 6 P1 om. ममैव........प्रविष्टः 7 P1 om. निश्चितम् 8 P1 add. तच्चितया 9 P1 add. चिन्तया चारुरिति पाठान्तरम् । भावोदयः ।।३०।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 तच्छाय । 2 P2 पीतं 3 P2 अत एव बह्वीनामालिङ्गनम् here 4 P1 add. भावशान्तिरनुप्रासो हेतुरुत्प्रेक्षा श्लेषश्च ।।३१।।

1 P2 text प्राणानपि स्वान् सुहृशस्तृणानि ।। 2 P1 तस्मा ।; P2 तस्माददृश्यामिति । 3 P1 ताः........बिम्युः aft. लोलाः 4 P1 om. किं भूताः ? । 5 P1 छायाया 6 P1 add. अथ सामान्येन समर्थनमाहः and om. किं नु 7 P1 प्राणान् 8 P1 add. तृणानि 9 P2 add. स्म 10 P1 add. शब्दो यस्मात् अर्थे 11 P1 add. विरोधो भावोदयोऽर्थान्तरन्यासस्तच्छायेत्यादि हेतुगर्भं पदम् ।।३२।।

1 P1 जागर्ति । 2 P2 तनस्य 3 P1 छाया; दृश्यां 4 P2 °लुंट् 5 P2 °हस्तिभिः 6 P1 °दृश्यभूतादेः 7 P1 add. छायादर्शनजनितः स्पर्शार्थप्रस्तुतः कम्पः शृङ्गारस्याऽङ्गिनोऽनुभावः । पदशब्दभीत्या स्वहस्तितोऽयं भयानकस्याऽङ्गस्याऽनुभावः । अनुप्रासो भावोदयः ।।३३।।

1 P1 उल्लास्य । 2 P2 om. स्पृष्टं नलाङ्गं 3 P1 om. तथा 4 P1 ततः 5 P1 add. अस्मैवेति पाठे रत्याः पत्या अस्मै नलाय तदर्नति नृत्तं प्रयत्नः कृतः । 6 P2 °लोमहर्षि 7 P1 add. कर्मकर्तरि 8 P2 तच्चैवं 9 P1 add. भावोदयः काव्यलिङ्गं विरोधोऽनुप्रासोऽपि ।।३४।।

1 P1 यस्मिन्नि । 2 P2 मृगाक्षी काचित् 3 P1 नलस्य 4 P2 om. विसर्गः 5 P1P2 om. स्थे; edr. add. स्थे 6 P2 पादे 7 P2 om. निपत्य 8 P1 om. यत् 9 P2 कामिनी ! 10 P2 अन्यो° 11 P1 add. स्पृष्टकसंज्ञाया प्रवृत्तिनिमित्तं योऽर्थः स्पर्शनलक्षणः तेनैव कर्मातिदेशः । स्पृष्टकमिति नपुंसके क्तः । पश्चात् संज्ञायां कन् (पा° V. iii. 87) । अनुरागस्य स्पृष्टकं लिङ्गं तत् प्रकाशनात् । वात्स्यायनीये कामशास्त्रे साम्प्रयोगिके द्वितीयेऽधिकरणे द्वितीयाध्याये आदितः सप्तमे उपगूहनविचारेऽष्टमे प्रकरणे प्रयोज्यप्रयोक्तृभावादिरस्य प्रपञ्चो द्रष्टव्यः । हर्षभावोदयोऽनुप्रासः ।।३५।।

1 P1 भ्रमन्नि । 2 P1 om. मुहुः 3 P1 add. उपत्यकाद्रेरासन्ना भूमिरि (अमर° II. iii. 7)ति । यद्यपि उपत्यकाऽद्रेर्भूमिरित्येव तथापि सौधपरम्परासु अद्रित्वारोपादेवं प्रयोगः । न यासयोरि (पा° VII. iii. 45) त्यत्र त्यकन्नुपसङ्ख्यानादित्वाभावः । 4 P1 यत........कृशतर aft. भ्रमन् 5 P1 add. काव्यलिङ्गम् ।।३६।।

1 P1 उल्लिख्य । 2 P1 यया 3 P1 अत्र 4 P1 add. अपि 5 P1 add भावोदयः ।।३७।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 कौमार। 2 P2 ऐष्यते 3 P1 ता अवस्था 4 P1 add. कौमार-गन्धोऽल्पो विद्यते येषामल्पाख्यायामि (पा° V. iv. 136), गन्धस्येत्° (पा° V. iv. 135); तानि 5 P1 add. रूपकम् ।।३८।।

1 P1 पश्यातर।; P2 यस्या: पुरन्ध्रीरिति। 2 P2 om. अध्वनि……°श्चिह्नं 3 P1 add. नृपचक्रे राजचक्रे वर्तते स्वाम्येन, चक्रं राष्ट्रं वर्तयति वा चक्रवर्ती सार्वभौम उच्यते। 4 P1 add. अन्यत्राऽपीति वचनात् अनुपसर्गेऽपि 5 P1 add. भावोदयोऽनुप्रासश्च ।।३९।।

1 P1 तारुण्ये।; P2 तारुण्यव्यमिति। 2 P1 कया 3 P1 om. स्त्रियो: 4 P1 add. भावोदयोऽनुप्रास उपमा च ।।४०।।

1 P1 पुर:। 2 P2 om. विस्मित्य 3 P2 om. प्राप्य 4 P2 °कृत्वा 5 P1 add. अनुप्रासोऽतिशयोक्तिश्च ।।४१।।

1 P1 तस्मि। 2 P2 विस्मेरत्वम् 3 P1 add. नलस्य 4 P1 add. अनुप्रास: काव्यलिङ्गमुपमा वा ।।४२।।

1 P1 पुंसि। 2 P2 व्यतिरिक्तं 3 P1 पुरुषे 4 P2 om. अनीक्षाया: 5 P1 °पुरुषावलोकनस्य 6 P1 add. विरोधोऽत्तिशयोक्तिश्च ।।४३।।

1 P1 विलोक्य। 2 P2 तच्छायां 3 P1 इति किम् ?। 4 P1 छाय-लक्षणं 5 P2 कील° 6 P1 ज्वालास्तेन 7 P2 तया 8 P1 भवन्ति 9 P1 add. [वह्ने]र्द्वयोर्ज्वालकीलावि (अमर° I. i. 57)ति वचनात् कीलशब्द: पुंल्लिङ्गोऽपि। अनुप्रास उपमोत्प्रेक्षा ।।४४।।

1 P1 रूपं।; P2 रूपं ब्रवीति। 2 P2 तं 3 P1 स्वरूपं; P2 om. रूपं 4 P2 add. श्यामम् 5 P1 om. किं……दृष्टम्। 6 P2 om. हरिद्राया……तदयमर्थ: 7 P1 add. आख्यातं 8 P2 आलोकतीति 9 P2 om. वा 10 P1 add. प्रतीपम् ।।४५।।

1 P1 भवन्नि 2 P2 तेषां 3 P2 परपुरं[न]गरम् अन्त:पुरं नगरम् 4 P2 शरीराण्यस्य 5 P2 om. तनोति 6 P2 °शरीरे 7 P1 कुरुते च। and add. अनुप्रासो विरोध उपमा च ।।४६।।

1 P1 पुमानिव। 2 P1P2 इति किम् ?। edr. इतीति किम ?। 3 P2 व्यतर्कि 4 P1 add. उपमा ।।४७।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P2 text व्यवित्त 2 P1 अम्बा। 3 P1 नताङ्गी aft. सती 4 P1 om. बाला 5 P1 add. प्रणिपत्य 6 P1 om. परं 7 P2 विशेषेण वेद 8 P1 add. सम्भ्रान्तिभैमीपु न तां व्यनक्ति सा तं च नादर्शदद्दश्यमेवेति पाठान्तरम्। अनुप्रासः काव्यलिङ्गं च ॥४८॥

1 P1 प्रसू। 2 P1 किं कृत्वा?। 3 P1 add. अत्र मालाशब्देनैव गतार्थं प्रसूनपदमुत्कर्षस्य प्रतिपत्त्यर्थम् उत्कृष्टानां प्रसूनानां मालेत्यर्थः। यथा प्रायशः पुष्पमालेव कन्यका कं न लोभयेत्। ननु मालाशब्दोऽन्यत्रापीति दृश्यते। यथा रत्नमाला शब्दमाला इति। सत्यम्। दृश्यते। किन्तु उपचारी स प्रयोगः। निरुपपादो हि मालाशब्दः पुष्परचनाविशेषमेवाऽभिधत्त इति ॥४९॥

1 P1 स्रग्वासनेत्यादि। 2 P2 नृपो 3 P1 add. वा वासनया 4 P1 add. अनुप्रासः ॥५०॥

1 P1 अन्यो। 2 P2 दमयन्तीनलौ तौ 3 P1 add. अथवा आलिङ्गितालीकपरस्परम् अन्तश्चित्तं यत्परिष्वङ्गे इति क्रियाविशेषणं तथ्यविशेषणं वा। गृहीतालीक-भैमीचित्तेन नलेन सत्या भैमी आलिङ्गिता। अलीकनलाविष्टचित्तया भैम्या च सत्यनल आलिङ्गितः। अत्र हेतुगर्भं विशेषणम्। 4 P2 अन्यवत् 5 P2 अपर° 6 P1 om. देशे 7 P2 नित्यं twice 8 P2 om. स्वप्नः 9 P1 बाध्यां 10 P1 om. न 11 P1 वा 12 P1 सङ्ख्या° 13 P2 ख्याति 14 P1 भाट्टत्य 15 P1 add. भ्रान्तिः 16 P1 घटा नाम 17 P2 बोध्य° 18 P1 ख्यात्यख्याति° 19 P1 °स्मरणविज्ञाने 20 P1 प्रभा° 21 P1 °मन्यत्र च वीक्ष° 22 P2 परस्परं 23 P1 परस्परमिथुनं 25 P2 om. पुरोवर्तिनि........नलेन क्वापि। 25 P2 तथ्यं 26 P1 °बोधितत्वात् 27 P1 अपरं 28 P2 om. वा 29 P1 अनूप 30 P2 om. °सिद्धान्त° 31 P2 om. प्रतिपादयति 32 P1 add. अनुप्रासः तृतीय-पादस्य पक्षान्तर-व्याख्याने हेतुरपि ॥५१॥

1 P1 स्पर्शं त। 2 P2 om. नलस्य 3 P1 add. काव्यलिङ्गं भावोदयः ॥५२॥

1 P1 स्पर्शं। P2 पथिकं ३ P1 आद्रिता 4 P1 चक्रतुः 5 P1 °मिव 6 P1 add. उक्तनिमित्ता विशेषोक्तिः ॥५३॥

1 P2 text °तिथ्य° 2 P1 सर्वा।; P2 सर्वत्र शंसयामिति। 3 P2 om. परं 4 P1 add. आतिथ्यकरमिति क्वचित्पाठे लक्षणया दर्शनीयम्। 5 P1 समुत्पद्यते 6 P1 P2 om edr. add. इति 7 P1 संविदति 8 P1 उत्तम° 9 P1 add अनुप्रासो हेतुश्च ॥५४॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P2 text °दीपका° 2 P1 परस्प । 3 P1 परस्परं 4 P2 दानात् अति 5 P1 add. दीपि (प) कार्चिरिति पाठान्तरम् । काव्यलिङ्गमुपमा च ॥५५॥

1 P1 वेश्मा ।; P2 विस्माप सेति । 2 P2 वैर्ययोगाच्च यथा 3 P2 दधाना मोहं च मुहुः 4 P2 om. तत्र 5 P1 add. तत्र पुरः स इति पाठान्तरम् । अनुप्रासो यथासङ्ख्यं भावशबलता च ॥५६॥

1 P1 पद्भ्यां । 2 P1 प्रसादम् 3 P1 add. समस्तृतीयायुक्तादि (पा° I. iii. 54) त्यात्मनेपदम् । शानच् । 4 P1 प्रभावाया 5 P1 add. भीम° 6 P1 उच्चैः 7 P1 add. अनुप्रासः ॥५७॥

1 P1 सखी । 2 P2 प्रसादस्य 3 P1 मणिमया 4 P1 add. ताम् 5 P1 om. भ्रान्तिम् 6 P1 add. अनुप्रास उपमा च ॥५८॥

1 P1 स कण्ठ । 2 P1 om. अन्तर्मध्ये 3 P1 इति किम् ? । 4 P2 रेखाः 5 P2 पिक° 6 P1 add. अनुप्रास उत्प्रेक्षा च ॥५९॥

1 P1 एतं । P2 एनं नलमिति । 2 P2 add. शक्त्या 3 P2 add. भणित्वा 4 P2 नार्याः कस्याश्चित् 5 P1 इति किम् ? । 6 P2 एनं नं 7 P1 प्रतिबोध° 8 P2 एनं 9 P1 add. श्रुत्वा here. 10 P1 add. भावोदयः ॥६०॥

1 P1 यत्रै । 2 P1 add. तस्या भीमभवाया अथवा 3 P2 add. या 4 P2 पालिकया उपनीता 5 P2 om. स दोहृदिकः 6 P1 add. इच्छा-वर्तित्वात् वा अनुप्रासः ॥६१॥

1 P1 चन्द्राभ 2 P2 °मात्र° 3 P2 अभकस्य अभ्रसम्बन्धि 4 P2 ददाना दधाना 5 P1 किं पुनर्भूतं 6 P1 add. अनुप्रास उपमा रूपकमुत्प्रेक्षा च ॥६२॥

1 P1 दलो । 2 P2 om. एव 3 P1 om. स्वम् ; P2 स्वयम् edr. स्वम् 4 P1 add. अनुप्रासो रूपकं च ॥६३॥

1 P1 विलो । 2 P1 °भुवी 3 P1 add. लिपीपु चित्रेपु 4 P1 add. भीमभुवः 5 P1 add. अनुप्रासो विरोधः परिसङ्ख्या प्रतीपं च ॥६४॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 भैमी 2 P1 om. किं भूतः ? । 3 P1 इति 4 P1 add. तस्या वा 5 P1 इति 4 P1 add. तस्या वा 5 P1 ग्रायनेयीनीयियः फढखछघां प्रत्ययादीनामि॰ 6 P1 add. अनुप्रासो रूपकमुपमा च ।।६५।।

1 P1 नावा । 2 P2 ॰चन्द्राभैः 3 P1 add. नाऽन्यत्र 4 P1 वेडया 5 P2 निमील: 6 P2 प्र॰ 7 P1 ॰दृशि॰ 8 P2 om. पयोधरो····खेलति 9 P1 add. अनुप्रास उपमा रूपकमुत्प्रेक्षा च ।।६६।।

1 P1 स्मरा । 2 P1 add. अनुप्रास उत्प्रेक्षा च ।।६७।।

1 P1 यत्रापद । 2 P2 ग्रन्थयित्रीं 3 P1 सहसिकं 4 P2 om. त्यज; P1 add. इति वीप्साया भयानुभावः 5 P2 दोरकेण सज्जान् प्रोतान् अथ च मौर्व्या 6 P1 अर्पयति 7 P1 add. अतिशयोक्तिः । गुणशब्दः श्लिष्टः ।।६८।।

1 P2 text जाने 2 P1 आलिख्ये । 3 P1 हे सखि ! 4 P1 add. अनुप्रासो रूपकं च ।।६९।।

1 P1 तामेव । 2 P2 ॰वल्लीं 3 P1 add. कुचकुम्भयोः 4 P1 add. तावकहृदयाङ्कप्रिया अस्तु इति वा विधेयम् । अनुप्रासो रूपकं च ।।७०।।

1 P1 सारीम् । 2 P2 om. तस्य········॰र्दीनस्वरः 3 P2 om. हसस्य········पाशकस्य 4 P1 इति किम् ? ।; P2 om. इतीति किम् ? । edr. इतीति किम् ?। 5 P1 add. गच्छन्तीं चरं कुर्वन्तीं वाऽनया सारिकया चरो भवति इति 6 P1 add. भक्षयन्तीं वा सारीं 7 P1 पक्षिणं 8 P1 पाशके पाशपतिते 9 P2 om. गृहात् 10 P1 add. भावोदयः श्लेषश्च ।।७१।।

1 P1 भैमीसमीपे । 2 P2 lecto. inf. lin. mg. add. भाग्यवतां हि गृहेषु पत्रपुगादिनिक्षेपार्थं स्वर्णमयो हंसो विधीयते चतस्रैव । 3 P1 add. अनुप्रासो भ्रान्तिमांश्च ।।७२।।

1 P1 तस्मि । 2 P2 निर्वचनीयतया 3 P2 कुर्यात् 4 P1 add. अतिशयोक्तिः ।।७३।।

1 P1 भैमी । 2 P1 ॰प्रकृतीनां 3 P1 add. तन्मध्ये 4 P1 प्रतीतिः; and add. मीलितं विरोधश्च ।।७४।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 हुता। 2 P1 भैमी°; P2 तस्याः 3 P2 om. तदाशां········ सम्बन्धिनीम् 4 P1 व्यवर्तयत् 5 P2 om. यः········निवर्तते 6 P1 add. आशा च दमयन्त्या अतस्तद्वचोभिर्निवर्तनमुचितम् 7 P2 च here. 8 P1 add. न लोकाव्यये (पा° II. ii. 69) त्यादिना षष्ठीप्रतिषेधः। 9 P1 add. अनुप्रासः ॥७५॥

1 P1 विज्ञ। 2 P1 add. कदाचिदिन्द्रमङ्गीकुर्यात्। कदा किं भवेदिति भैम्याम् 3 P1 वासवेन्द्रस्य 4 P1 add. युक्तं तद्वृत्तीनां तिसृणामपि 5 P1 add. पारे मध्ये षष्ठया वे(पा° II. i. 18)ति अव्ययीभावः। 6 P1 add. अनुप्रासः ॥७६॥

1 P1 लिपि। 2 P1 प्रोषितं 3 P2 वचनेन च 4 P2 om. °विन्यास° 5 P1 सुपाठा 6 P1 लिखिता; and add. लिप्यते अनया पत्रं लिपिं जपादित्वात्पक्षे बात्वे लिबिरित्यपि। काव्यलिङ्गम् ॥७७॥

1 P1 सलील। 2 P2 om. आलिङ्गनया········मयेति 3 P1 add. त्वां 4 P1 उपपीडरुधकर्षश्चे (का° IV. vi. 34) ति णम्। 5 P1 इह 6 P2 om. मयेति 7 P2 नलस्य 8 P1 add. इत्यग्रामे(म्ये)णार्थेन च त्वद्विरहात् कामवशगं 9 P1 add. सूचितः। अनुप्रासः ॥७८॥

1 P1 यः प्रेयं। 2 P1 यो मघोनः········न कुरुते here 3 P2 om. स्वयंवरस्थानं 4 P1 om. एव 5 P2 वध्यते 6 P1 add. रूपकं समासोक्तिः ॥७९॥

1 P1 नैनं। 2 P2 om. इक्षुरस° 3 P1 add. अनुप्रास उदात्त आक्षिप्ता उपमा च ॥८०॥

1 P1 लोक। 2 P2 दिवि तथा देवा 3 P2 महेन्द्रो twice 4 P2 इन्द्ररागात् 5 P1 किङ्करो 6 P1 add. कोटिः 7 P1 add. अर्थादनागते। अनुप्रासः सारश्च विरोधोऽपि ॥८१॥

1 P1 पदं। 2 P2 add. शतं 3 P2 °पदायो तव 4 P1 add. चाटुवचनं यस्य। अथवा याचनेन चाटुकारः। 5 P1 अलङ्कुरु 6 P1 भ्रूसंज्ञा; P2 °संज्ञाया edr. भ्रूसंज्ञया 7 P1 add. हेतुः ॥८२॥

1 P2 text भवेत् 2 P1 मन्दाकिनी। 3 P2 भामिनि 4 P1 गङ्गायां 5 P2 om देवे········व्याख्या 6 P2 देवरान्यां 7 P1 वरणे तु 8 P1 om. वरो 9 P1 add. अनुप्रासो दीपकं तुल्ययोगिता वा। व्याख्यान्तरे व्यतिरेकश्च ॥८३॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 रज्यस्व । 2 P2 पदत्वतया 3 P2 °कृतात्मानं 4 P1 add. अथवा लघूकृतस्वमिति विधेयम् । तदा वामनं तत्प्राप्तये बलियाचनेन लघूकृतस्वमामनन्ति–व्याख्या । व्यतिरेकः काव्यलिङ्गं वा ॥८४॥

1 P1 याने । 2 P2 recto inf. lin. mg. add. प्रणमसि 3 P1 add. अत्र देवानां दमयन्त्याश्च नतिक्रियासम्पादनद्वारेण परस्परं जनकतादर्शनादन्योन्यम् ॥८५॥

1 P1 इत्यु । 2 P1 add. मघवत्प्रसादः 3 P1 अपूरयत् 4 P1 om. दूत्या 5 P1 add. आदरेण 6 P1 add. काव्यलिङ्गम् ॥८६॥

1 P1 om. आर्ये विचार्येति । 2 P1 काचित् 3 P1 add. काचित् काचन काऽपीति न विकृतत्वम् । अनुप्रासः तुल्ययोगिता च ॥८७॥

1 P1 अनाश्रवेत्यापि । 2 P2 भीममुवा 3 P2 °कारिणी 4 P2 सर्वदा 5 P1 वरं 6 P2 इति ज्ञातम् 7 P1 add. अनुप्रासः ॥८८॥

1 P1 मैमीं । 2 P1 add. कमलं 3 P2 om. न 4 P1 om. चिन्तयतः 5 P2 आप 6 P1 तदिन्द्रो 7 P1 add. तुल्ययोगिताऽत्र रूपकं प्रतीयमानोत्प्रेक्षा हेतुर्भिन्नमिति च श्लिष्टम् ॥८९॥

1 P2 text दक्° 2 P1 ईषत्स्मि । 3 P1 ईषत्स्वल्पं यथा भवति एवं स्मितेन 4 P1 दूत्यां नापितं 5 P1 add. परिकरः ॥९०॥

1 P1 स्तुतौ । 2 P2 इन्द्रः 3 P1 जानाति नान्यः 4 P2 add. विषये 5 P1 निरर्थकं मृषा 6 P1 om. नृ्ऋणां 7 P2 अज्ञानं 8 P1 add. अनुप्रासोऽपि परिसंङ्ख्या हेतुश्च ॥९१॥

1 P1 आज्ञां तदीया । 2 P1 add. अनुप्रासो व्यतिरेको हेतुश्च ॥९२॥

1 P1 तपः फलत्वे । 2 P2 om. कारणात् 3 P1 उपरि° 4 P1 प्रवृत्त्येति 5 P1 om. प्रति 6 P2 सति twice 7 P1 om. साधनेन 8 P1 add. अनुप्रासोऽर्थान्तरन्यासश्च ॥९३॥

1 P1 om. शुश्रूषिताहे इति । 2 P1 om. एव 3 P2 शुश्रूषे 4 P1 add. ज्ञाशृस्मृदृशामि (पा° I. iii. 57) त्यात्मनेपदम् । 5 P1 add. अनुप्रासो व्यतिरेको हेतुश्च ॥९४॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 अश्रौष । 2 P2 °लोला 3 P2 om. न दत्तवती 4 P2 °त्वेन 5 P1 add. अनुप्रासो हेतुश्च परिसङ्ख्याव्यतिरेकावपि ।।९५।।

1 P1 तस्मि ।; P2 तस्मिन् विमृश्येति । 2 edr. add. ऐन्द्री 3 edr. add. एषा 4 B मया 5 P1 संसारि° 6 P2 °धीरणी 7 P2 om. कामं 8 P2 om. उपमा हेतुश्च ।।९६।।

1 P1 वर्षे ।; P2 वर्षेपु यदिति । 2 P2 सर्वेपु 3 B °द्वीपेपु 4 P2 om. यस्मात्……मध्ये 5 B °श्रमा 6 B P1P2 जनेनाऽन्ने 7 P1 add. ज्येष्ठाश्रमो गृही (मनु° III. 78) ति गृहस्था 8 P2 ततो 9 B अस्ये°; P1 नन्विहेन्द्र° 10 P1P2 om. अधुना ………सर्वम् 11 P1 add. अनुप्रास उपमा च ।।९७।।

1 P1 स्वर्गे । 2 B om. धर्मा; P2 om. धर्मा……°मेकमीहे 3 P1 om. अत्र 4 B यक्ष° 5 B अत्र स्वयं and ori. विहाय 6 P2 किञ्च अमराणां 7 B om. मखेनाऽपि 8 B इन्द्रा°; P2 om. इन्द्र° ……यज्ञैश्च । 9 P2 शर्मधर्मयोः 10 P2 पाठो रम्यः 11 P1 अहं कथम् 12 P2 om. अनुप्रासः समुच्चयः 13 P1 add. च ।।९८।।

1 P2 text गमी 2 P2 text °यतीं 3 P1 साधोरपि ।; P2 साधोरपीति । 4 P2 गमिता 5 P1P2 गमी 6 P2 गमिष्यति 7 B किं स्वे हृदि 8 P1P2 om. न समं 9 P1 om. स्वर्गस्य; P2 add. उत्तरफलं न भवति । 10 B om. शर्करा……उत्तरफलम् 11 P2 om. अनुप्रासो……श्लिष्टम् ।।९९।।

1 P1 प्रक्षीण ।; P2 प्रक्षीण एवेति । 2 B P2 om. तं 3 B सुकृतस्य 4 B om. उपश्लिष्यति 5 P2 om. उपान्मन्त्र°……नुपतिष्टते । इ; but P1P2 add. सङ्गतिकरणेऽत्रात्मनेपदम् । यथा गङ्गा यमुनामुपतिष्ठते 6 B P1P2 सङ्गत°; Ori सङ्गति° 7 P1P2 om. सति 8 P2 om. मुजो°……पदम् 9 P2 om. अनुप्रास उपमा च ।।१००।।

1 P1 इतीति ।; P2 °दूत्यामिति 2 P2 lecto. sup. lin. mg. add. बभाषे–स्तोकं वक्तुमिच्छया 3 P2 om. विकसद्दलं 4 P2 om. तत् 5 P2 om. उपमा ।।१०१।।

1 P2 text °विस्व° 2 P1 अना ।; P2 अनादिधेति । 3 B om. एष…… आयत्तधीः 4 P1 add. अपि; P2 वाचिनश्च 5 P2 om.

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

अनादिरेव अनादिधा 6 P2 च 7 B ईश्वरशब्द: 8 P2 om. मम 9 B सकाशात् 10 B कर्तव्यम्; P1 कारितव्यम् 11 P2 om. अनुप्रासो हेतु: समुच्चयश्च ॥१०२॥

1 P1 नित्यं; P2 नित्यं नियत्येति। 2 B om. हे .... नियत्या 3 B P1 add. वेत्ति 4 P1 om. न; P2 न वक्तव्यम् 5 P1P2 °त्रिशत् 6 B om. तत्त्वं 7 P1P2 तर्हि सा 8 P1 °महंति 9 P1P2 om. केवलं 10 P2 om. अनुप्रासो हेतुर्विरोधश्च ॥१०३॥

1 P1 क्रमेलकं।; P2 क्रमेलकमिति। 2 P1P2 कण्ठकेषु 3 B om. स्वकाय इष्टं; P2 om. स्वकाय 4 P1 om. वा 5 B om. न एक° .... कर्त्तव्यम् 6 P1 add. काव्यलिङ्गम् ॥१०४॥

1 P1 गुणा।; P2 गुणा हरन्तोऽपीति। 2 B °रचितं 3 B °हरयन्ति 4 P2 lecto. inf. lin. mg. add. न त्याजयन्ति 5 P1 add. रूपकमुत्प्रेक्षा। P2 om. अनुप्रासो .... विशेषोक्तिर्वा ॥१०५॥

1 P1 आकी।; P2 आकीटमा कीटभेति। 2 B त्वादृशो 3 P1 कीटकस्या° 4 P2 om. इष्टत्वम् 5 B नियति: 6 B तथा 7 B om. वरं 8 P2 वरयिष्ये 9 P2 om. अनुप्रासोऽर्थान्तिरन्यासश्च ॥१०६॥

1 P2 text अघ्वा° 2 P1 अग्रागे।; P2 अग्राग्रजाग्रदिति। 3 P1 अर्हा योग्या 4 P1 भवति 5 P1P2 निवारयति स्वजनं 6 P1P2 om. इति भावार्थ: 7 B अतो°; P1P2 add. इति 8 P1P2 पृच्छया 9 P2 om. पृच्छया इति .... सम्प्रसारणम्। 10 P2 om. तदहं 11 P2 om. अनु° .... च। 12 P1 om. च ॥१०७॥

1 P1 इत्थं।; P2 इत्थं प्रतीपोक्तिमतिमिति। 2 B °पोक्त° 3 B °नीतियुक्ति°; P2 °युक्तिमति° 4 B श्रुत्वा 5 P1P2 स्व: पते° 6 P2 om. अनुप्रासो व्यतिरेकश्च। 7 P1 विरोधश्च ॥१०८॥

1 P1 परेत।; P2 परेतमतुं रिति। 2 P2 om. आगमनक्षण एव 3 B तथा 4 P2 परेतानां .... गच्छति aft. तथा निरास्थम् 5 B तिरस्कुर्वती 6 P1P2 om. निरस्तवती 7 P2 आशु निराचकार 8 P1 °कल्पितो 9 P2 यस्य .... प्रामाण्यम् aft. भूत्वाऽऽगतम् 10 B P1 तृतीया° 11 P2 °वतीं स्थिरास्थम् अहं निरास्थम्। 12 P1 add. आशु 13 P1 add. त्रिस्रोतसेव आशु आयातवतीं 14 B P2 स्थिरास्थम्

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

15 P1 °करणं 16 P1 वाक्यस्याघटनात् 17 P1 om. तत् 18 P1 अनुप्रासोत्प्रे° 19 P1 च ॥१०९॥

1 P1 भूयो ।; B भूयोऽमिति । 2 B P2 पादौ 3 B निरस्ता°; P2 स्वस्तनी 4 P2 om. अनुप्रासः ॥११०॥

1 P1 इत्थं पु ।; P2 इत्थं पुनरिति । 2 P2 om. पुनः 3 B प्रबोधं 4 P2 om. अत्र........उपमा ॥१११॥

1 P2 text °पदेन्दुः 2 P1 श्रवण ।; P2 श्रवणपुटेति । 3 B नैषध° 4 B युक्तो यो 5 B वचो 6 P2 om. आनन्दाङ्कं........ रूपकं च ॥; 7 B P1 मालती°; edr. मालिनी ॥११२॥

1 P2 text om. श्रीहर्षं........ च यम् । 2 P2 text add. निषधप्रवेशो नाम here ॥६॥ 3 P1 om. श्रीहर्षमिति । 4 B सुगमोऽयम् and om. com. ॥ 5 P1 om. अयं 6 P2 add. च ॥११३॥

1 B P1 om. श्रीमानालिग°........ शोधयति स्म टीकाम् ॥६॥

1 P2 om. महापण्डितश्रीचाण्डूविरचितायां 2 P2 add. श्री° 3 P2 om. निषधप्रवेशो नाम 4 P2 add. ग्रन्थसङ्ख्या ५०३.

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

सर्ग—७

[1]पूर्वसर्गे नले[2] दूतत्वेऽङ्गीकृते सति अदृश्यतया सकलमप्यन्तः- [3]पुरपुरन्ध्रिजनं नलमुखेन दमयन्तीं च निर्वर्ण्य चतुर्णामिन्द्रादिदिक्पालानां दूतीनां वचनानि [4]इन्द्रदूत्योपलक्षणेन वर्णयित्वा तासां प्रत्युत्तरं दमयन्तीमुखेन निर्वर्ण्य अदृश्यस्यैव च नलस्य मुखेन केशादारभ्य नखपर्यन्तं दमयन्तीं विवर्णयिषुः कविः सप्तमं सर्गमारभते ।

अथ प्रियासादनशीलनादौ मनोरथः पल्लवितः पुरा यः ।
विलोकनेनैव स राजपुत्र्याः पत्या भुवः पूर्णवदभ्यमानि ।।१।।

[1]अथ प्रियासादनेति । अथ इन्द्रदूतीनिराकरणानन्तरं भुवः पत्या नलेन स मनोरथो राजपुत्र्या[2] दमयन्त्या [3]विलोकनेनैव पूर्णवदभ्यमानि अमन्यत । प्रायः [4]षष्ठीतत्पुरुषस्ततोऽग्रे, राजभोजमेरुदुहितुः पुत्रट् वा (under पा॰ VI. iii. 30) इति वार्त्तिकवचनात् अत्र[5] दुहितृशब्दस्य विभाषया पुत्रट् आदेशः । तथैव च माघकालिदासप्रभृतिभिरन्यैरपि वैयाकरणाभिमानिभिः प्रयुक्तः । केवलं पुनः षष्ठीतत्पुरुषव्यतिरेकेण, न मे गोत्रे पुत्री (शाङ्गं॰ प॰ 3761) त्यादिवद्व्याकरणाभिमानिनां पुत्रीशब्दप्रयोगः । तथा कवित्वाभिमानिनां न[6] इष्टः । केचित्तु गोरादिषु पुत्रशब्दं पठन्ति । यो मनोरथः प्रियाया आसादनशीलनादौ च पुरा पल्लवितः । पल्लविताच्चिरं[7] य इति पाठान्तरम् । प्रियायाः कथमासादनशीलनादि भवेत् । आसादने प्रियाया इत्थं करिष्यामि । परिचये च[8] अमुकं करिष्यामीति पल्लवितोऽभूत्[9] ।।१।।

प्रतिप्रतीकं प्रथमं प्रियायामथान्तरानन्दसुधासमुद्रे ।
ततः प्रमोदाश्रुपरम्परायां ममज्जतुस्तस्य दृशौ नृपस्य ।।२।।

प्रति [1]प्रतीकमिति । तस्य [2]नृपस्य दृशौ [3]दृष्टी प्रथमं [4]पूर्वं [5]प्रियायां विषये प्रतिप्रतीकं [6]प्रत्यवयवं ममज्जतुः । अथ पश्चात्

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[7]आन्तरोऽन्तर्वर्ती य आनन्दः स एव सुधासमुद्रस्तत्र मग्ने। ततोऽनन्तरं[8] प्रमोदाश्रु परम्परायां ममज्जतुः। आनन्दाश्रूणि प्रियादर्शनात् य[9] आनन्दस्तस्माद्[10] अश्रुपरम्परा जाता ॥२॥

ब्रह्माद्वयस्याऽन्वभवत्प्रमोदं रोमाग्र एवाऽग्रनिरीक्षितेऽस्याः।
यथौचितीत्थं तदशेषदृष्टावथ स्मराद्वैतमुदं तथाऽसौ ॥३॥

[1]ब्रह्माद्वयस्येत्यादि। स नलः [अस्या] रोम्णोऽग्रे [2]अग्रभागे एव अग्रे प्रथमं निरीक्षिते सति ब्रह्माद्वयस्य प्रमोदमन्वभवत्। एकमेवाऽद्वितीयं ब्रह्म (छा° VI. ii. 2) इत्यस्मिन्[3] विषये [4]यादृक् महानन्दो भवति तादृग् जातः। अथ रोमाग्र[5]निरीक्षणादनन्तरं क्रमेण तस्या[6] अशेषायाः सर्वावयवपूर्णाया अवयविन्या दृष्टौ सत्याम् असौ [7]नलस्तन्मयत्वात् स्मराद्वैतमुदम् अन्वभवत्[8]। कामाद्वैतानन्दमन्वभवत्। यथा इत्थम् औचिती[9] औचित्यम्। इत्थं परिगणनया रोमाग्रदर्शने ब्रह्मानन्दपरिगणनया सर्वावयवानां ब्रह्मानन्दस्य एकत्र मेलने यादृशः[10] कामाद्वैतानन्द[11] उचितो महान्[12] भवति, अनुभवात्[13], तावान् कामाद्वैतानन्दो बभूव।[14] सर्वे कामास्तद्दर्शनेन[15] समाप्ताः। केचित्तु—किं पुनः न्यायेन व्याचक्षते। [16]सर्वेभ्योऽप्यद्वैतानन्देभ्यः ब्रह्मानन्द उत्कृष्टः रोमाग्र एव दृष्टे ब्रह्माद्वैतानन्दोऽनुभूतः। अत इत्थं यथौचिती उचितमेव। किमु वक्तव्यं—यत् तदशेषदृष्टौ कामाद्वैतानुभव इति[17] ॥३॥

वेलामतिक्रम्य पृथुं मुखेन्दोरालोकपीयूषरसेन तस्याः।
नलस्य रागाम्बुनिधौ विवृद्धे तुङ्गौ कुचावाश्रयतः स्म दृष्टी ॥४॥

[1]वेलामतिक्रम्येत्यादि। तस्या[2] मुखेन्दोः आलोकपीयूषरसेन नलस्य रागाम्बुनिधौ विवृद्धे[3] सति[4] दृष्टी तुङ्गौ कुचौ आश्रयतः स्म। किं[5] कृत्वा विवृद्धे ?। [6]पृथुं वेलामतिक्रम्य। यथा समुद्रे उद्वेलिते सति स्थलम् आश्रीयते तथा तस्य अनुरागे विवृद्धे[7] कुचदर्शनं[8] समजनि ॥४॥

मग्ना सुधायां किमु तन्मुखेन्दोर्लग्ना स्थिता तत्कुचयोः किमन्तः।
चिरेण तन्मध्यममुञ्चताऽस्य दृष्टिः कृशीयः स्खलनाद्भिया नु ॥५॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]मग्ना सुधायामित्यादि । अस्य दृष्टिः तस्या मध्यमुदरं चिरेणाऽमुञ्चत । किं [2]भूतम् ? । कृशीयः कृशतरम् । उत्प्रेक्षते— स्खलनात् [3]पतनात् भिया । नु [4]वितर्के । यत्किल दुर्बलं स्थानं भवति तत्र तिष्ठतां पतनभयं भवति । अतस्तत्र चिरं[5] स्थित्वा मध्यम् अमुञ्चत । किमु तस्या मुखेन्दोः सुधायां मग्ना स्थिता । [6]अतश्च मज्जनेन व्याकुलिता । तत्राऽऽगत्य चिरं स्थिता । तथा किमु तस्याः कुचयोरन्तर्लग्ना स्थिता सती तत्र क्वाऽपि विलग्नत्वात् व्याकुलिता[7] सती उदरे आगत्य चिरेण तदमुञ्चत । यः[8] प्रथमं क्वाऽपि मग्नो भवति । तदनु क्वाऽपि लग्नो भवति । ततश्च तृतीयस्थाने गतः सन् श्रान्तत्वात् स्खलनभयेन चिरेण [9]तन्मुञ्चति । [10]तदपि स्थानं कृशीयः । अथवा, [11]पादद्वयेना[12]ऽधिकार्थान्तरविपक्षया पूर्वानुवादः । किमु अस्य दृष्टिः तन्मुखेन्दोः सुधायां मग्ना । मुखे चिरं स्थिता इत्यर्थः । [13]तथाऽस्य दृष्टिः तत्कुचयोरन्तर्लग्ना स्थिता । तत्राऽपि चिरं स्थिता । तथा [14]तदुदरमपि स्खलन भयात्[15] चिरममुञ्चत । यतः कृशीयः[16] ।।५।।

प्रियाङ्गपान्थी कुचयोर्निवृत्य निवृत्य लोला नलदृग्भ्रमन्ती ।
बभौतमां तन्मृगनाभिलेपतमःसमासादित दिग्भ्रमेव ।।६।।

[1]प्रियाङ्गपान्थीत्यादि । [2]नलस्य दृक् निवृत्य निवृत्य पुनः पुनः कुचयोर्भ्रमन्ती सती बभौतमाम् । यतो लोला । किं भूता ? । प्रियाया अङ्गेषु पान्थी सञ्चरणशीला । पथो[3] ण नित्यमि (पा॰ V. i. 76) ति णप्रत्ययः । उत्प्रेक्षते— तयोः कुचयोर्यो[4] मृगनाभेः कस्तूरिकाया लेपः स एव [5]तमोऽन्धकारं तेन समासादितो दिग्भ्रमो यया सा तथा[6] ।।६।।

विभ्रम्य तच्चारुनितम्बचक्रे दूतस्य दृक्तस्य खलु स्खलन्ती ।
स्थिरा चिरादास्त तदूरुरम्भास्तम्भावुपाश्लिष्य करेण गाढम् ।।७।।

[1]विभ्रम्य तदिति । तस्य दूतस्य दृक् तस्या ऊरू[2] एव रम्भास्तम्भौ [3]तौ करेण नयनकिरणेन गाढमुपाश्लिष्य चिरात् स्थिरा आस्त । ऊरूदेशं विलोकयामास । खलु उत्प्रेक्षते । तस्याश्चारुणि नितम्बचक्रे विभ्रम्य स्खलन्ती इव । यः किल चक्रे भ्रमित्वा स्खलति, स स्तम्भ-हस्तेनाऽऽलम्बते[4] ।।७।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

वासः परं नेत्रमहं न नेत्रं किमु स्वमालिङ्ग्य तन्मयाऽपि ।
उरोनितम्बोरु कुरु प्रसादमितीव सा तत्पदयोः पपात ।।८।।

वासः[1] परमित्यादि । सा [2]दृष्टिः इतीव तस्याः [3]पदयोः पपात । [4]इतीति किम् ? । किमु परं केवल वासः वस्त्रमेव नेत्रम् अहं दृष्टिः किं न नेत्रम्[5] ? । अपि तु[6] नयनम् । नेत्राभिधानं वस्त्रं च । तन्मयाऽपि[7] स्वम् आत्मीयम् उरोनितम्बोरु त्वम्[8] आलिङ्ग्य । समाहारद्वन्द्वत्वान्नपुंसकत्वम् । द्वन्द्वश्च प्राणितूर्यसेनाङ्गानामि (पा° II. iv. 2)त्येकवचनम् । हे दमयन्ति ! प्रसादं कुरु । दृष्टिः उरःप्रभृतिकमालिङ्गतु । नेत्रत्वात् यद्यन्नेत्रं तत्तदुरः प्रभृतिकम् आलिङ्गति । [9]यथा नेत्रं वस्त्रं तथा चेदमपि नेत्रम् । तस्मादुरःप्रभृति आलिङ्गतु । उरसि नेत्रमयं कञ्चुकं, नितम्बे ऊर्वोश्च नेत्रस्य[10] परिधानम् । इत्थं तेषामालिङ्गनं नेत्रस्य । अहम् उरोनितम्बोरु[11] आलिङ्गामि । त्वं मया [12]उरोनितम्बोरु आलिङ्ग्य । अनिनन्तकर्तृरसमच्छब्दवाच्यस्य इनन्ते सति, अनिनन्तकर्तृत्वात् अनुक्ते [13]कर्त्तरि तृतीया[14] ।।८।।

दृशोर्यथाकाममथोपहृत्य स प्रेयसीमालिकुलं च तस्याः ।
इदं प्रमोदाद्भुतसम्भृतेन महीमहेन्द्रो मनसा जगाद ।।९।।

[1]दृशोर्यथाकाममित्यादि । अथ स महीमहेन्द्रो नलः मनसा इदं जगाद । किं भूतेन ?। प्रमोदेन अद्भुतेन च सम्भृतेन । किं कृत्वा ?। प्रेयसीं दमयन्तीं तस्या आलिकुलं च दृशोर्नयनयोर्यथाकामम्[2] उपहृत्य ढौकयित्वा[3] ।।९।।

पदे विधातुर्यदि मन्मथो वा ममाभिषिच्येत मनोरथो वा ।
तदा घटेताऽपि न वा तदेतत् प्रतिप्रतीकाद्भुतरूपशिल्पम् ।।१०।।

पदे[1] विधातुरित्यादि । यदि विधातुर्ब्रह्मणः पदे स्थाने मन्मथो वा अभिषिच्येत वा अथवा मम मनोरथोऽभिषिच्येत, तदा तत् एतत् प्रतिप्रतीकं प्रत्यवयवम् अद्भुतरूपस्य[2] शिल्पं निर्माणं घटेत[3] । अपि[4] सम्भावने । वा अथवा न घटेत[5] । कामस्य वा [6]मन्मनोरथस्य वा कुर्वतः इयं रूपसृष्टिर्घटते वा [7]न वा । ब्रह्मणः पुनर्न [8]घटत एव[9] ।।१०।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

तरङ्गिणी भूमिभृतः प्रसूता जानामि शृङ्गाररसस्य सेयम् ।
लावण्यपूरोऽजनि यौवनेन यस्यां तथोच्चैस्तनता घनेन ।।११।।

[1]तरङ्गिणीत्यादि । अहं जानामि शङ्के । सा इयं दमयन्ती [2]भूमिभृतो राज्ञः सकाशात् [3]प्रसूता शृङ्गारस्य[4] रसस्य तरङ्गिणी नदी । यस्यां[5] यौवनेन लावण्यपूरोऽजनि । किं भूतेन ? । घनेन बहुलेन । तथा उच्चैस्तनताऽजनि[6] । अथ[7] वा तथा अनिर्वचनीयम् उच्चैः स्तनतया घनेनेति यौवनविशेषणम् । भूमिभृत इति, भुवः प्रभव (पा° I. iv. 31) इत्युपादानम् । अथ[8] च पर्वताज्जाता[9] नदी या भवति सा रसस्य उदकस्य तरङ्गयुक्ता भवति । तस्यां च[10] पूरो जन्यते । घनेन किं कुर्वता ? । उच्चैरतिशयेन स्तनता गर्जता[11] ।।११।।

अस्यां वपुर्व्यूहविधानविद्यां किं द्योतयामास नवां स कामः ।
प्रत्यङ्गसङ्गस्फुटलब्धभूमा लावण्यसीमा यदिमामुपास्ते ।।१२।।

[1]अस्यां वपुरित्यादि । अस्यां दमयन्त्यां विषये स कामः किं नवाम्[2] अपूर्वां वपुषो व्यूहो रचना तस्य विधानविद्यां द्योतयामास । यत् लावण्यसीमा प्रकर्षः इमां दमयन्तीम् उपास्ते । किं भूता ? । प्रत्यङ्ग[3] सङ्गेन स्फुटं लब्धो भूमा बाहुल्यं यया सा तथा । [4]अस्यां द्योतितायां वपुर्व्यूहविधानविद्यायां[5] लावण्यसीमभूम्नश्च साधनत्वम् । [6]यत्र किल काचिद्विद्या भवति सोऽन्यैरुपास्यते[7] ।।१२।।

जम्बालजालात् किमकर्षि जम्बूनद्या न हारिद्रनिभप्रमेयम् ।
अप्यङ्गयुग्मस्य न सङ्गचिह्नमुन्नीयते दन्तुरता यदत्र ।।१३।।

[1]जम्बालजालादिति । इयं दमयन्ती जम्बूद्वीपस्य जम्बूवृक्षस्य [2]फलरसनद्या जम्बालजालात् कर्दमसमूहात् किं न अकर्षि आकृष्टा[3] । किं [4]भूता ? । हारिद्रेण हरिद्रायुक्तेन निभा सदृक् प्रभा यस्याः सा तथा ।[5] हारिद्रं सुवर्णं वा । यत्[6] [7]अत्राऽस्यां दमयन्त्यां[8] दन्तुरता विषमता न उन्नीयते न ज्ञायते न दृश्यते । किं भूता ? । अङ्गयुग्मस्याऽवयवद्वयस्य सङ्गः संयोगः तस्य चिह्नमपि । यत्र यत्र वैषम्यं तत्र तत्राऽङ्गद्वयसङ्गः[9] । [10]कर्दमात् यथाऽऽकृष्यते वेगेन, तत्र विषमोन्नतत्वं न भवति[11] ।।१३।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

सत्येव साम्ये सदृशाऽदशेषाद्गुणान्तरेणोच्चकृषे यदङ्गैः ।
अस्यास्ततः स्यात्तुलनाऽपि नाम वस्तु त्वमीषामुपमापमानः ।।१४।।

सत्येव[1] साम्य इत्यादि । अस्या भङ्गैर्मुखपाणिपादचक्षुःप्रभृतिभिः अशेषात् सदृशात्[2] [3]चन्द्ररक्तोत्पलपद्मनीलोत्पलादेर्वस्तुनः[4] सकाशात् यद् गुणान्तरेण अधिकेन [5]विशेषाह्लादकत्वविशिष्टसौरभ्यादिना गुणेन [6]असाधारणेनैव केनाऽपि गुणविशेषेण उच्चकृषे उत्कृष्टैर्यज्जातं तत्तावत् साम्ये सत्येव उच्चकृषे । यत् आह्लादकत्वमात्रेण साधारणेन गुणेन उभयोरपि साम्यमस्ति । विशिष्टेनोत्कर्षः । अपिशब्दो रुचौ । नामशब्दोऽभ्युपगमे । ततः[7] कारणात् अमीषामङ्गानां सदृशेन वस्तुना सह तुलनाऽपि स्यात् भवतु । यत्किल यस्मादुत्कृष्टं भवति तत्[8] प्रथमं कियद्भिर्गुणैः समतां प्राप्य पश्चादुत्कृष्टं भवति । यथा वेगवत् अश्वद्वयं कतिचित् कालं[9] समं जवं विधाय पश्चादेको हीयते[10] । अपर उत्कृष्यते । यथा षड्संख्या पञ्च यावत् समा, एकेनाऽधिका च[11] । तु पुनः अमीषां वस्तुसदृशं चन्द्रादिकम् उपमा उपमानं यत् स अपमानः[12] । उत्कृष्टस्य व्यतिरेके सति निकृष्टम् उपमानम् अपमानः । यतः प्रसिद्ध[सा]धर्म्यादप्रसिद्धस्य साधनमुपमानं; [13]प्रसिद्धं तत् यदुत्कृष्टं निकृष्टमप्रसिद्धम्[14] ।।१४।।

पुराकृतिस्त्रैणमिमां विधातुमभूद्विधातुः खलु हस्तलेखः ।
येयं भवद्भाविपुरन्ध्रिसृष्टिः साऽस्यै यशस्तज्जयजं प्रदातुम् ।।१५।।

[1]पुराकृतीत्यादि । खलु इत्यहं मन्ये । विधातुः [2]ब्रह्मणः [3]पुराकृति पूर्वसृष्टं स्त्रैणं स्त्रीसमूहः उमां दमयन्तीं विधातुं हस्तलेखः[4] हस्तोलकोऽभूत् । तेन हि अभ्यासो भवति । [5]पुराकृतस्त्रैणेति पाठान्तरम् । या पुनरियं भवतीनां वर्तमानानां भाविनीनां भविष्यन्तीनां[6] पुरन्ध्रीणां सृष्टिः सा अस्यै दमयन्त्यै [7]तज्जयजं तासां सर्वासां स्त्रीणां जयाज्जातं यशः प्रदातुम्[8] ।।१५।।

भव्यानि हानीरगुरेतदङ्गाद्यथा यथाऽनर्ति तथा तथा तैः ।
अस्याऽधिकस्योपमयोपमाता दाता प्रतिष्ठां खलु तेभ्य एव ।।१६।।

[1]भव्यानीत्यादि । भव्यानि चन्द्रादीनि एतदङ्गात्[2] एतस्या दमयन्त्या[3] अङ्गात् मुखादेर्यथा[4] यथा हानीर्निकृष्टताम् अगुः प्रापुः,

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

तथा[5] तथा तैर्भव्यैः अनर्ति । खलु यस्मात् अस्य[6] अङ्गस्याऽधिकस्य उपमया[7] उपमां[8] कृत्वा उपमाता पुरुषः तेभ्यश्चन्द्रादिभ्य एव प्रतिष्ठां दाता । अन्यस्य जगति उपमानस्याऽभावात् । उत्कृष्टं निकृष्टेन यदा उपमीयते तदा हीनस्य[9] महती प्रतिष्ठा[10] ॥१६॥

नाऽस्पर्शि दृष्टाऽपि विमोहिकेयं दोषैरशेषैः स्वभियेति मन्ये ।
अन्येषु तैराकुलितस्तदस्यां वसत्यसम्बाधसुखी गुणौघः ॥१७॥

[1]नाऽस्पर्शीत्यादि । अहमिति मन्ये—इयं दमयन्ती अशेषैरपि दोषैः[2] दौर्भाग्यादिभिः स्वस्याऽऽत्मनो भिया भयेन[3] नाऽस्पर्शि न स्पृष्टा । यत् इयं दृष्टाऽपि सती विमोहिका[4] विशेषमोहकारिणी[5] । अतः भयम् । तत्तस्मात् अस्यां विषये गुणानां लावण्यादीनामोघः समूहः असम्बाधेन दोषाणामसङ्करत्वेन[6] सुखी सन् वसति । किं भूतः ? । अन्येषु [7]पुरुषेषु तैर्दोषैर्मात्सर्यादिभिराकुलितः । तत्र गुणा अल्पा, दोषा बहवः[8] ॥१७॥

औज्झि प्रियाङ्गैर्घृणयेव रूक्षा न वारिदुर्गात्तु वराटकस्य ।
न कण्टकैरावरणाच्च कान्तिर्धूलीधृता[1] काञ्चनकेतकस्य ॥१८॥

औज्झि[2] प्रियाङ्गैरिति । प्रियाया अङ्गैः वराटकस्य पद्मबीज-कोशस्य कान्तिगौरता औज्झि त्यक्ता[3] । [4]बीजकोशे सरोजस्य कपर्देऽपि वराटकः । उत्प्रेक्षते—घृणया इव जुगुप्सया इव । यतो रूक्षा अस्निग्धा, न तु वारिदुर्गात् त्यक्ता । जलदुर्गे प्रतिष्ठां भणित्वा न तु त्यक्ता । [5]रौक्षादिति पुस्तकान्तरपाठे[6] रूक्षस्य भावो रौक्षं तस्मात् । तथा प्रियाङ्गैः काञ्चनकेतकस्य कान्तिः न कण्टकैरावरणात् त्यक्ता । किन्तु धूलिभिर्धृता[7] व्याप्ता । [8]क्वचिच्च धूलिभृता इति पाठे केतकस्य[9] विशेषणम् । कान्तिस्ताभ्यां सकाशात् रम्या[10] ॥१८॥

प्रत्यङ्गमस्यामभिकेन रक्षां कर्तुं मघोनेव निजास्त्रमस्ति ।
वज्रं च भूषामणिमूर्तिधारि नियोजितं तद्द्युति कार्मुकं च ॥१९॥

[1]प्रत्यङ्गमित्यादि । अस्यां [2]दमयन्त्यां विषये प्रत्यङ्गं मघोना इन्द्रेण अभिकेन सकामेन सता निजास्त्रं वज्रं कार्मुकं च नियोजितम् अस्ति । किं भूतं वज्रम् ?। [3]भूषार्थं ये [4]मणयस्तेषां मूर्तिं[5] धरतीत्येवंशीलम् ।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

कार्मुकं किं भूतम् ?। तेषां हीरकाणां[6] द्युतिर्यत्र तत्तथा। अथवा, ततो[7] द्युतिरेव। कार्मुकम् ऐन्द्रं[8] धनुः[9] ।।१९।।

अस्याः सपक्षैकविधोः कचौघः स्थाने मुखस्योपरि वासमाप।
पक्षस्थतावद्बहुचन्द्रकोऽपि कलापिनां येन जितः कलापः ।।२०।।

अस्या[1] इत्यादि। इदानीं केशादारभ्य[2] नखान्तं वर्णयति। अस्याः कचौघः केशपाशः मुखस्योपरि यद्वासम् आप तत्स्थाने युक्तम्। किं भूतस्य मुखस्य ?। सपक्ष एको विधुश्चन्द्रो यस्य तस्य तथा। चन्द्रनिभस्य। येन केशपाशेन कलापिनां मयूराणां कलापो जितः। किं भूतः ?। पक्षेषु पिच्छेषु स्थिताः तावन्तो[3] बहवश्चन्द्रका यत्र[4] स तथा। अथ[5] च मुखस्य एको विधेः सपक्षः सहायः केशपाशस्य[6] बहवः पक्षे पक्षपाते स्थिताश्चन्द्राः। बहुव्रीहौ कः। अतः तस्य उपरि वासं निर्वासम्[7]। अथवा[8], आवासं प्रयाणं ददौ[9] ।।२०।।

अस्या यदास्येन पुरस्तिरश्च तिरस्कृतं शीतरुचान्धकारम्।
स्फुटस्फुरद्भङ्गकचच्छलेन तदेव पश्चादिदमस्ति बद्धम् ।।२१।।

अस्या[1] इत्यादि। अस्या आस्येन शीतरुचा चन्द्रेण पुरः अग्रे तिरश्च[2] वामदक्षिणपक्षे च यदन्धकारं तिरस्कृतं तदेव इदमन्धकारं पश्चाद्भागे [बद्धं] सम्बद्धम् अस्ति। केन ?। स्फुटं स्फुरत् भङ्ग.[3] कुटिलता येषां ते तथा। ते च [4]कचास्तेषां छलेन धम्मिलव्याजेन[5] ।।२१।।

अस्याः कचानां शिखिनश्च किं नु विधिं कलापौ विमतेरगाताम्।
तेनाऽयमेभिः किमपूजि पुष्पैरभर्त्सि दत्त्वा स किमर्धचन्द्रम् ।।२२।।

अस्या[1] इत्यादि। अस्याः कचानां कलापः[2] शिखिनो मयूरस्य च कलापः[3] उभा[वपि] केशकलापभारौ[4] विमतेः[5] विरोधात् कलहात्[6] नु वितर्के किं[7] विधिं ब्रह्माणम्[8] अगातां [9]जग्मतुः। [10]तेन ब्रह्मणा[11] अयं[12] केशकलापः[13]. एभिः पुष्पैः किमपूजि। स पुनः[14] मयूरकलापः [15]किमर्द्धचन्द्रं [16]गले हस्तं दत्त्वा अभर्त्सि निष्कासितः[17]। अथ[18] च मयूरपिच्छेषु[19] अर्द्धचन्द्रका भवन्ति[20] ।।२२।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

केशान्धकारादथ दृश्यभालस्थलार्धचन्द्रा स्फुटमष्टमीयम् ।
एतां यदासाद्य जगज्जयाय मनोभुवा सिद्धिरसाधि साधु ।।२३।।

[1]केशेत्यादि । स्फुटमियं दमयन्ती [2]साक्षादष्टमी तिथिः । किं भूता ? । केशा एव अन्धकारं तस्मात् अथ अनन्तरं दृश्यं भालस्थलमेव अर्द्धचन्द्रो[3] यस्याः । अथ[4] च कृष्णाष्टम्याम् अर्द्धरात्रेरन्धकारादनन्तरम् अर्द्धचन्द्रो दृश्यते । यत् यस्मात्[5] एनां दमयन्तीलक्षणाम् अष्टमीमासाद्य मनोभुवा कामेन जगतो जयाय साधु सम्यक् सिद्धिरसाधि । अष्टम्यां हि साधका[6] सिद्धिमवाप्नुवन्ति[7] ।।२३।।

पुष्पं धनुः किं मदनस्य दाहे श्यामीभवत्केसरशेषमासीत् ।
व्यधाद्विधेशस्तदपि क्रुधा किं भैमीभ्रुवौ येन विधिर्व्यधत्त ।।२४।।

[1]पुष्पमित्यादि । किं [2]वितर्के । पुष्पं धनुर्मदनस्य कामस्य[3] दाहे श्यामीभवत् कृष्णं[4] सत् केसरशेषमासीत्[5] । मध्यगता केसरा [6]एवाऽवशिष्टा यत्र[7] ते चार्द्धदग्धत्वात् कालवर्णाः । तदपि [8]केसरशेषं धनुः ईशो महेश्वरः किं क्रुधा कोपेन[9] द्विधा व्यधात् बभञ्ज । येन धनुषा[10] खण्डद्वयेन विधिर्ब्रह्मा[11] भैम्या भ्रुवौ व्यधत्त[12] ।।२४।।

भ्रूभ्यां प्रियाया भवता मनोभूचापेन चापे घनसारभावः ।
निजां यदप्लोषदशामवेक्ष्य सम्प्रत्यनेनाऽधिकवीर्यताऽर्जि ।।२५।।

[1]भ्रूभ्यामित्यादि । [2]मनोभूचापेन [3]कामधनुषा प्रियाया भ्रूभ्यां भवता सता [4]घनसारभावश्च आपे प्राप्तः दृढभावोऽधिगतः । यत् अनेन भ्रूद्वयलक्षणेन धनुषा निजामप्लोषदशां पूर्वाम् अदाहावस्थाम् अवेक्ष्य[5] अपेक्ष्य[6] सम्प्रति दाहेऽपि अधिकवीर्यता आर्जि अर्जिता । दमयन्तीभ्रूदर्शने कामपरवश्यता भवति । अथ च–कर्पूरो घनसारः स्यात् (हला° II. 390) । कर्पूरश्च दग्धः सन् शक्तिमान्[7] भवति । अदग्धावस्थायाः सकाशात्[8] ।।२५।।

स्मारं धनुर्यद्विधुनोज्झिताऽस्या याऽऽस्येन भूतेन च लक्ष्मलेखा ।
एतद्भ्रुवौ जन्म तदाप युग्मं लीलाचलत्वोचितबालभावम् ।।२६।।

[1]स्मारमित्यादि । स्मरस्य कामस्येदं स्मारम् । यत् स्मारं कामस्य[3] धनुः तथा[4] अस्या दमयन्त्या[5] आस्येन[6] भूतेन सता विधुना

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

चन्द्रेण च या लक्ष्मलेखा [7]लाञ्छनलेखा उज्झिता त्यक्ता[8]। मुखचन्द्रो हि निष्कलङ्कः। यत्[9] युग्मं धनुःकलङ्कयुगलम्[10] एतस्य भ्रुवौ जन्म आप भ्रूरूपं जातम्। किं भूतम्?। लीलाचलत्वस्य उचितो बालभावो [11]यत्र। [12]केशत्वं यस्य भ्रुवोः केशाः हेलया चलन्ति। अथ च [13]लीलास्वभावेन चलो बालभावो यस्य। बालः किल चपलो भवति। पुनर्जातित्वाद् बालभावः[14] ।।२६।।

इषुत्रयेणैव जगत्त्रयस्य विनिर्जयात् पुष्पमयाशुगेन।
शेषा द्विबाणी सफलीकृतेयं प्रियादृगम्भोजपदेऽभिषिच्य ।।२७।।

[1]इषुत्रयेणेत्यादि। पुष्पमयाशुगेन कामेन शेषा द्वयोर्बाणयोः समाहारः द्विबाणी प्रियाया दृशौ एवाम्भोजं तस्य पदे स्थाने अभिषिच्य सफलीकृता। कस्मात्?। इषुत्रयेणैव [2]बाणत्रयेणैव जगत्त्रयस्य [3]त्रिभुवनस्य विनिर्जयात्[4] ।।२७।।

सेयं मृदुः कौसुमचापयष्टिः स्मरस्य मुष्टिग्रहणार्हमध्या।
तनोति नः श्रीमदपाङ्गमुक्तां मोहाय या दृष्टिशरौघवृष्टिम् ।।२८।।

[1]सेयमित्यादि। सा इयं [2]मृदुर्दमयन्ती स्मरस्य कामस्य[3] कौसुमचापयष्टिः[4] पुष्पमयधनुर्लता[5]। किं भूता?। मुष्टेर्ग्रहणस्य अर्हं योग्यं मध्यम् उदरं यस्याः। धनुः किल मुष्टिना[6] मध्ये ध्रियते। यतोऽस्माकं मोहाय श्रीमता अपाङ्गेन मुक्तां दृष्टयो[7] नेत्राणि एव [8]शरौघाः तेषां वृष्टिं तनोति[9] ।।२८।।

आघूर्णितं पक्ष्मलमक्षिपद्मं प्रांशुद्युति श्वैत्यजितामृतांशु।
अस्या इवाऽस्याश्चलदिन्द्रनीलगोलामलश्यामलतारतारम् ।।२९।।

[1]आघूर्णितमित्यादि। अस्या अक्षिपद्मं [2]नेत्रकमलम् अस्या दमयन्त्या इव अन्यदुपमानं नास्ति जगति। अतस्तेनैवोपमीयते[3]। अनन्वयोपमा[4]। किं भूतम्?। आ ईषद् घूर्णितं तथा पक्ष्मयुक्तं नयनगतरोमयुक्तं[5] तथा प्रांशुः उच्चैः द्युतिर्यस्य तत्तथा। तथा श्वैत्येन श्वेततया जितोऽमृतांशुश्चन्द्रो येन। पुनः किं भूताम्?। चलन्ती इन्द्रनीलगोलवत्[6] इन्द्रनीलमणिगुटिकावत् अमला श्यामला तारा उज्ज्वला तारा कनीनिका यस्य तत्तथा[7] ।।२९।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

कर्णोत्पलेनाऽपि मुखं सनाथं लभेत नेत्रद्युतिनिर्जितेन ।
यद्येतदीयेन ततः कृतार्था स्वचक्षुषी किङ्कुरुते कुरङ्गी ।।३०।।

[1]कर्णोत्पलेनेत्यादि । कुरङ्गी हरिणी यदि एतस्याः सत् तेन[2] । केन ? । कर्णोत्पलेनाऽपि । सनाथं संयुक्तं स्वं मुखं लभेत ततः कृतार्था सती स्व आत्मीये चक्षुषी किं कुरुते[3] किमपि[4] न करोति । अथवा[5] किङ्करमात्रे दासमात्रे[6] कुरुते । किं भूतेन ? । अस्या नेत्रद्युतिना[7] निर्जितेन[8] ।।३०।।

त्वचः समुत्तार्य दलानि रीत्या मोचत्वचः पञ्चषपाटनायाम् ।
सारैर्गृहीतैर्विधिरुत्पलौघादस्यामभूदीक्षणरूपशिल्पी ।।३१।।

त्वच[1] इत्यादि । विधिर्ब्रह्मा मोचत्वचः कदलीत्वचः सकाशात् तथा[2] उत्पलौघाच्च सारैर्गृहीतैः अस्यां विषये ईक्षणरूपस्य नेत्ररूपस्य शिल्पी कर्ता अभूत् । किं कृत्वा ? । रीत्या क्रमेण रम्भायाः त्वचः समुत्तार्य कमलदलानि चोत्तार्य । कस्यां सत्याम् ? । पञ्चषपाटनायां[3] पञ्च षट् त्वचो दलानि च परित्यज्य । कदल्या धवलत्वम् । उत्पलदलकालिमानं[4] च[5] गृहीत्वेत्यर्थः[6] ।।३१।।

चकोरनेत्रैणदृगुत्पलानां निमेषयन्त्रेण किमेष कृष्टः ।
सारः सुधोद्गारमयः प्रयत्नैर्विधातुमेतन्नयने विधातुः ।।३२।।

[1]चकोरेत्यादि । विधातुर्ब्रह्मणः [2]प्रयत्नैरुपक्रमैः कर्तृभिः किं चकोरनेत्राणाम् [3]चन्द्रोत्सङ्गगतैणदृशोश्च अथवा सामान्येन एणानां हरिणानां[4] दृशां च उत्पलानां च सुधोद्गारमयः सारः धवलिमादिः[5] एष किं निमेषयन्त्रेण कृष्टः आकृष्टः[6] । किं कर्तुम् ? । एतस्या नयने विधातुम् । चकोरा अमृतं [7]पिबन्ति । [8]अथ चकोराणां नेत्रम् एणानां दृक् एणदृक्, पश्चात् समाहारः । उत्पलेन सह चकोरनेत्राणाममृतम् । नेत्राणां[9] मेषोन्मेषश्च, एणस्य चन्द्रोत्सङ्गस्थत्वात्[10] । तद् दशाममृत-पानं निमेषश्च । उत्पलानि सोमवंश्यानि रात्रौ अमृतं पिबन्ति, विकासं सङ्कोचं [11]चानुभवन्ति । [12]निष्ठ्यूतोद्गीर्णवान्तादिगौणवृत्तिव्यपाश्रयम् । अति सुन्दरमन्यत्र ग्राम्यकक्षां विगाहते (का° द. I. 95) इति वचनात् । उद्गारशब्दस्य [13]चारुत्वम् । [14]यतो चकोरनेत्रे अमृतत्वं चन्द्रोत्सङ्ग-त्वात् । मृगनेत्रेऽमृतत्वम् । सोमवंशत्वादुत्पलेऽप्यमृतत्वम् । तत् एतेभ्यो

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

निकृष्य दमयन्तीनयने सृष्टे विधिनेत्यर्थः। यदा[15] सामान्येन हरिणा उच्यन्ते, तदा सुधोद्गारशब्देन शोभातिशयो लक्ष्यते[16] ।।३२।।

ऋणीकृता किं हरिणीभिरासीदस्याः सकाशान्नयनद्वयश्रीः।
भूयोगुणेयं सकला बलाद्यत्ताभ्योऽनयाऽलभ्यत बिभ्यतीभ्यः ।।३३।।

[1]ऋणीकृतेत्यादि। अस्याः सकाशात् किं हरिणीभिर्नयनद्वयश्रीः [2]ऋणीकृता आसीत्[3] व्याजेन गृहीता[4]। यत्[5] अनया दमयन्त्या[6] ताभ्यो हरिणीभ्य[7] इयं नेत्रलक्ष्मीर्बिभ्यतीभ्यः सकाशात् भूयोगुणा द्वि त्रि [8]चतुः–पञ्चषड्गुणादिका[9] अतोऽप्यधिका अलभ्यत[10] सकला। [11]तदुक्तम्— अशीतिभागो वृद्धिः स्यान्मासि मासि सबन्धके। वर्णक्रमाच्छतं द्वित्रिचतुः पञ्चकमन्यथा। कान्तारगास्तु दशकं सामुद्रा[12] विंशकं शतम्। [13]दद्युर्वा स्वकृतां वृद्धिं [14]सर्वे सर्वासु जातिषु।। [15]सन्ततिस्तु पशुस्त्रीणां रसस्याऽष्टगुणा परा। वस्तुधान्यहिरण्यानां चतुस्त्रिद्विगुणा परा।। (याज्ञ॰ III. 37-39) ।। तथाकालिका [16]कारिता चक्रवृद्धिरित्यादिप्रकारैर्भूयोगुणा। [17]तथा बलात्कारेणाऽर्जिता इत्यर्थः। येन [18]किलाधमर्ण्येनोत्तमर्ण्यादृणं कृतं तस्मात्स सव्याजं सकलं [19]बलादादत्ते[20] ।।३३।।

दृशौ किमस्याश्चपलस्वभावे न दूरमाक्रम्य मिथो मिलेताम्।
न चेत्कृतः स्यादनयोः प्रयाणे विघ्नः श्रवःकूपनिपातभीत्या ।।३४।।

[1]दृशावित्यादि। अस्याश्चपलस्वभावे[2] दृशौ किं मिथः परस्परं[3] [4]दूरमतिशयेनाऽऽक्रम्याऽऽगत्य न मिलेताम्। अपि तु मिलिष्यतामेव। चेत् अनयोर्दृशोः प्रयाणे सति श्रवसी कर्णाविव कूपौ तत्र निपातभीत्या विघ्नो न कृतः स्यात्। तत्र गत्वा [5]विश्रान्ते[6] ।।३४।।

केदारभाजा शिशिरप्रवेशात् पुण्याय मन्ये मृतमुत्पलिन्या।
जाता यतस्तत्कुसुमेक्षणेयं यतश्च तत्कोरकदृक्चकोरः ।।३५।।

[1]केदारभाजेत्यादि। अहमेवं मन्ये। उत्पलिन्या[2] पुण्याय मृतं मरणं प्राप्तं केदारं क्षेत्रं भजते या तया तथा। कस्मात्?। शिशिरप्रवेशात्। तत्र किल हिमेन सा दह्यते। यतः पुण्यादियं[3] दमयन्ती तस्याः उत्पलिन्याः कुसुमान्येव ईक्षणानि यस्याः तथाविधा

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

जाता । [4]यतश्च पुण्यात्[5] चकोरोऽपि तस्या उत्पलिन्याः कोरकाकारौ[6] दृशौ यस्य[7] स तथाविधो जातः । यः किल श्रीकेदारं नमस्कृत्य शिशिरं हिमं प्रविश्य म्रियते, स तेन जन्मान्तरमुत्कृष्टं लभते[8] ।।३५।।

नासाऽदसीया तिलपुष्पतूणं जगत्त्रयव्यस्तशरत्रयस्य ।
श्वासानिलामोदभरानुमेयां दधद्द्विबाणीं कुसुमायुधस्य ।।३६।।

[1]नासेत्यादि । अमुष्या इमं अदसीया नासा नासिका तिलपुष्पतूणं भस्त्रा । किं [2]कुर्वत् ?। कुसुमायुधस्य द्विबाणीं दधत् । किंभूताम् ?। श्वासानिलस्याऽऽमोदभरेण अनुमिताम् नासिकासञ्चारिणः प्राणस्य पुष्पपरिमलतुल्यत्वात् । किं विशिष्टस्य ?। जगत्त्रये व्यस्तं विविधं क्षिप्तं[3] शरत्रयं येन तस्य तथा । पञ्चबाणत्वात् शेषद्वयं[4] तूणेऽस्ति[5] ।।३६।।

बन्धूकबन्धूभवदेतदस्या मुखेन्दुमानेन सहोज्जिहानाम् ।
रागश्रिया शैशवयौवनीयां स्वमाह सन्ध्यामधरोष्ठलेखा ।।३७।।

[1]बन्धूकेति । अस्या [2]अधरोष्ठलेखा एतत् स्वम् आत्मानं शैशवस्य यौवनस्य सम्बन्धिनीं [3]सन्ध्याम् आह । [4]वयःसन्धौ भवत्वात् सन्ध्या ।[5] अथवा आदौ एकारस्य वृद्धत्वात्, वृद्धाच्छ (पा° IV. ii. 114) इति छप्रत्ययः । कया ?। रागश्रिया । किंभूतम् ?। [6]स्वं स्वरूपम् अधरं [7]बन्धूकबन्धूभवत् । रागेण सदृशीम् । किंभूताम् ?। अनेन मुखेन्दुना सह उज्जिहानाम् । मुखे[8] ओष्ठस्य विद्यमानत्वात् । सन्ध्या अपि [9]रक्ता । इन्दुना च समुद्गच्छति[10] ।।३७।।

अस्या मुखेन्दावधरः सुधाभूर्विम्बस्य युक्तः प्रतिबिम्ब एषः ।
तस्याऽथ वा श्रीर्द्रुमभाजि देशे सम्भाव्यमानाऽस्य तु विद्रुमे सा ।।३८।।

[1]अस्या इति । अस्या [2]मुखेन्दौ मुखचन्द्रे अधर ओष्ठः सुधाया अमृतस्य भूः स्थानं तत एष बिम्बस्य पदार्थस्य प्रतिबिम्बो युक्तः । यत्रोदकस्थानं तत्र बिम्बं प्रतिबिम्ब्यते । अथ च बिम्बीफलस्य रक्तत्वात् प्रतिबिम्बः सदृशः । [3]अथ वा तस्य फलस्य श्रीः शोभा द्रुमभाजि देशे सम्भाव्यमाना । वनमध्ये बिम्बीलता जायते । अस्यौष्ठस्य तु

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

पुनर्लक्ष्मीर्विद्रुमे द्रुमरहिते देशेऽस्ति । अथ च विद्रुमे प्रवाले[4] ओष्ठस्य बिम्बादपि[5] सरागता भवति[6] ।।३८।।

जानेऽतिरागादिदमेव बिम्बं बिम्बस्य तु व्यक्तमितोऽधरत्वम् ।
द्वयोर्विशेषावगमाक्षमाणां नाम्नि भ्रमोऽभूदनयोर्जनानाम् ।।३९।।

[1]जानेऽतिरागादित्यादि । अहमेवं जाने । अतिरागात् [2]अतिलोहि[त]त्वात् इदमेव बिम्बम् ओष्ठो न भवति, तु [पुनः] बिम्बस्य इत ओष्ठात् व्यक्तं [3]स्फुटम् अधरत्वं निकृष्टत्वम् । अध इयर्तीति अधरः इति अधरनिरुक्तम् । तथा[4] च [5]यास्काचार्येणोक्तम्—अधरः अधो [6]अरः[7] न धावतीत्यूर्ध्वगतिः प्रतिषिद्धा (नि° II. 11) इति ।[8] यस्मात्[9] जनानां लोकानाम् अनयोर्द्वयोर्नाम्नि विषये भ्रमो भ्रान्तिरभूत् । किं भूतानाम् ? ।[10] [11]बिम्बस्याऽधरस्य चोभयोर्विशेषो भेदस्तस्याऽवगमे ज्ञानेऽक्षमाणाम् [12]असमर्थानाम् । [13]बिम्बस्य सन्मुखमधरं वदन्ति[14] । अधरस्य बिम्बतात्पर्येणाऽहम् ओष्ठस्य बिम्बं, बिम्बस्याऽधरत्वं मन्ये ।।३९।।

मध्योपकण्ठावधरोष्ठभागौ भातः किमप्युच्छ्वसितौ यदस्याः ।
तत्स्वप्नसम्भोगवितीर्णदन्तदंशेन किं वा न मयाऽपराद्धम् ।।४०।।

[1]मध्योपकण्ठावित्यादि । यदस्या अधरस्यौष्ठस्य भागौ किमपि उच्छ्वसितौ भातः [2]शोभेते । किं[3] विशिष्टौ ?। मध्यस्याऽन्तरालस्योपकण्ठौ समीपौ । ओष्ठो हि वामदक्षिणपक्षे मध्यभागात् किञ्चिदुन्नतो[4] भवति । तत् तत्राऽस्मिन्[5] ओष्ठे किं वा अथवा[6] किं नु मया नाऽपराद्धम् । अपि तु अपराद्धम् । किं भूतेन मया ?। स्वप्ने यः सम्भोगः तत्र वितीर्णो दन्तदंशो दन्तक्षतं येन तेन वा तथा । मम दन्तक्षतेन स्वप्नदत्तेन[7] ओष्ठस्य भागद्वयम् उन्नतमिव[8] ।।४०।।

विद्या विदर्भेन्द्रसुताधरोष्ठे नृत्यन्ति कत्यन्तरभेदभाजः[1] ।
इतीव रेखाभिरपश्रमस्ताः सङ्ख्यातवान् कौतुकवान् विधाता ।।४१।।

[2]विद्या विदर्भेन्द्रेति । विधाता कौतुकवान् [3]सन् ओष्ठरेखाभिः कृत्वा ता विद्याः सङ्ख्यातवान् । किं भूतः ?। अपश्रमः । अधरयोः किल बह्व्यो रेखा भवन्ति । कथम् ? । इतीव । इतीति किम् ? ।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

विदर्भेन्द्रसुताया अधरोष्ठे अन्तर्मध्ये कति सङ्ख्या विद्या नृत्यन्ति स्फुरन्ति। किं भूता: ?। अभेदम् ऐक्यं भजन्ते [4]तास्तथा। अथवा, अन्तरे मध्ये भेदं भजन्ते[5]। दमयन्ती किल सर्वा: कला जानाति। [6]अन्तरलाभभाज इति पाठे [7]अन्तरवस्थिता इति व्याख्या[8] ।।४१।।

सम्भुज्यमानाऽद्य मया निशान्ते स्वप्नेऽनुभूता मधुराधरेयम्।
असीमलावण्यरदच्छदेत्थं कथं मयैव प्रतिपद्यते वा ।।४२।।

[1]सम्भुज्यमानेत्यादि। इयमद्य मया निशान्ते स्वप्ने सम्भुज्यमाना सती मधुराधरा अनुभूता। वा[2] अथवा आश्चर्ये। मयैव कथम् इत्थम् अधुना इयम् असीम सीमरहितं लावण्यं लवणरसो यत्र एवंविधो रदच्छद ओष्ठो यस्या: सा तथाविधा प्रतिपद्यते ज्ञायते। यस्या: किलाऽधररसो[3] मधुरो भवति, तस्या: कथं स[4] एव लवण: स्यात्। अथ च लावण्यं सौन्दर्यम्[5] ।।४२।।

यदि प्रसादीकुरुते सुधांशोरेषा सहस्रांशमपि स्मितस्य।
तत्कौमुदीनां कुरुते तमेव निर्मथ्य[1] देव: सफलं स जन्म ।।४३।।

[2]यदि [3]प्रसादीत्यादि। यदि एषां सुधांशो: स्मितस्य सहस्रम् अंशं निजहास्यसहस्रभागमपि प्रसादीकुरुते, [4]तत् स देव: [5]तं [6]स्मितस्यांऽशं [7]निर्मथ्य [8]कौमुदीनां [स्वं]जन्म सफलं कुरुते[9]। एतावता तस्य सफलत्वम्[10] ।।४३।।

चन्द्राधिकैतन्मुखचन्द्रिकाणां दरायतं तत्किरणाद्घनानाम्।
पुर:सरस्रस्तपृषद्द्वितीयं रदावलिद्वन्द्वति बिन्दुवृन्दम् ।।४४।।

[1]चन्द्राधिकेत्यादि।[2] चन्द्रादप्यधिका[3] या एतस्या मुखचन्द्रिका ज्योत्स्ना: तासामेव घनानां मेघानां बिन्दुवृन्दं रदानां दन्तानामावलिद्वन्द्वमिवाचरति। किं भूतम् ?। पुर:सरो बिन्दुपतनादनन्तरम् उपरि द्वितीयो लग्न एव दृश्यते सर्वत्र।[4] अग्रेतन: स्रस्त: पतितो य: पृषद्बिन्दु: स द्वितीयो यस्योपरितनपतितुकामबिन्दुवृन्दस्य तत्तथा। एका अधो दन्तपङ्क्तिर्द्वितीया उपरा। किं भूतम् उपरितनं बिन्दुवृन्दम् ?। तस्याऽग्रेतनस्रस्तबिन्दो: किरणात् [5]क्षरणात् दरम् ईषत् आयतं[6] दीर्घम्। [7]अथ च घनानां निबिडानाम्[8] ।।४४।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

सेयं मदेतद्विरहार्तिमूर्च्छातमीविभातस्य विभाति सन्ध्या ।
महेन्द्रकाष्ठागतरागकर्त्री द्विजैरमीभिः समुपास्यमाना ।।४५।।

[1]सेयमित्यादि । [2]सेयं दमयन्ती मम एतस्या विरहार्तिस्तया मूर्च्छा मोहः सैव तमी रात्रिस्तस्या विभातस्य सन्ध्यारूपा विभाति प्रतिभासते । एतद्दर्शनान्मूर्च्छाऽऽगता । किं भूता ?। महेन्द्रस्य काष्ठा-गतस्य परमप्रकर्षप्राप्तस्य [3]रागकर्त्री । तथा अमीभि [4]र्द्विजैः दन्तैः समुपास्यमाना । सन्ध्याऽपि इन्द्रकाष्ठा पूर्वा दिक् तस्यां रागं रक्तत्वं कुरुते । द्विजैर्ब्राह्मणैश्च उपास्यते प्रात.[5] ।।४५।।

राजौ द्विजानामिह राजदन्ताः संबिभ्रति श्रोत्रियविभ्रमं यत् ।
उद्वेगरागादिमृजावदाताश्चत्वार एते तदवैमि मुक्ताः ।।४६।।

राजौ[1] द्विजानामित्यादि । इह द्विजानां दन्तानां राजौ श्रेण्यां राजदन्ता[2] मुख्यदन्ताश्चत्वारो दन्ता [3]यत् श्रोत्रियविभ्रमं[4] शुक्लत्वं संबिभ्रति । श्रोत्रियः किल [5]अप्रतिग्राहित्वात् शुक्ल उच्यते । मुख्य-दन्ताश्च श्वेता वर्ण्यन्ते[6] । दन्तानां राजा राजदन्ता इति[7] राजदन्तादिषु परम् (पा° II. ii. 31) इति पूर्वनिपाते प्राप्ते, उपसर्जनं परं प्रयोक्तव्यम् । तदहमवैमि[8] शङ्के । एते चत्वारो दन्ता शुक्ला मुक्ताफलानि । किं भूता ? । उद्वेगस्य पूगीफलस्य रागादीनां च ताम्बूलादिकृतानां या मृजा मार्जनं घर्षणं तया अवदाता उज्ज्वलाः[9] । अथ च श्रोत्रियाणां[10] द्विजानां ब्राह्मणानां पङ्क्तौ ये भवन्ति ते[11] मुक्तिं प्राप्नुवन्ति । वैराग्यात् क्रमेण तेऽपि उद्वेगेन संसारवैरस्येन या रागादीनां दोषाणां मृजा अपनयनं तेनाऽवदाताः । शमदमादिसाधनचतुष्टय-संपत्त्या इहामुत्रार्थं [फलोप]भोगविरागेण च अतीतानागतवर्त्तमानानां कर्मणां ब्रह्मसंपत्त्या दग्धत्वात् प्रारब्धात्[12] प्रारब्धस्य प्रवृत्तफलस्य च कर्मणो भोगेन क्षीणत्वात् । यावद्देहपातं चक्रभ्रमवत् कार्मुकमुक्तेषुवच्च पूर्वसंस्कारेण वर्त्तमानाः शास्त्राचार्यप्रसादात् ब्रह्मभावनकाले[13] अविद्या-निवृत्त्या अवदाताः[14] नित्यशुद्धबुद्धमुक्तस्वभावाः । तथा च श्रुतिः— तस्य तावदेव चिरं यावन्न[15] विमोक्ष्येऽथ संपत्स्ये[16] (छा° VI. xiv. 2) इति । विमोक्ष्येन संपत्स्यते इत्यर्थः[17] ।।४६।।

शिरीषकोशादपि कोमलाया वेधा विधायाऽङ्गमशेषमस्याः ।
प्राप्तप्रकर्षः सुकुमारसर्गे समापयद्वाचि मृदुत्वमुद्राम् ।।४७।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]शिरीषेत्यादि । वेधा ब्रह्मा[2] अस्या दमयन्त्या[3] अशेषम् अङ्गं विधाय [4]निर्माय सुकुमारसर्गे[5] कोमलसर्जने [6]प्राप्तप्रकर्षः पर्याप्तकल्पः सन् मृदुत्वमुद्रां वाचि वाण्यां समापयत् । कोमलत्वनिर्माणे शरीरमध्ये यत्किञ्चिद् रहस्यं गोपितमभूत् तन्मृदुत्वं [7]तत्र वाचि क्षिप्तम् । ईषदपरिसमाप्तः पर्याप्तः [8]पर्याप्तकल्पः समर्थकल्पः । किं भूतायाः ?। [9]शिरीषकोशात् कुड्मलात् अपि कोमलायाः[10] ॥४७॥

प्रसूनबाणाद्वयवादिनी सा काचिद्द्विजेनोपनिषत्पिकेन ।
अस्याः किमास्यद्विजराजतो वा नाधीयते भैक्षभुजा तरुभ्यः ॥४८॥

[1]प्रसूनेत्यादि । पिकेन द्विजेन पक्षिणा प्रसूनबाणस्य कामस्य[2] अद्वयम् अद्वैतं[3] वदतीत्येवंशीला सा[4] अपूर्वा काचित् अविज्ञेयस्वरूपा उपनिषत् कामरहस्यं [5]कामवेदभाष्यमस्या दमयन्त्या[6] आस्यमिव[7] द्विजराजश्चन्द्रः तस्मात् किं नाधीयते ? । अपि तु पठ्यते[8] । किं भूतेन ?। तरुभ्यो भैक्षं भिक्षाणां समूहं भुङ्क्ते तेन तथा । कोकिलोऽपि माधुर्यमेतन्मुखवाणीतः शिक्षतीत्यर्थः[9] । अथ च द्विजोऽपि[10] भैक्षभुक् पञ्चभिक्षाकारी, एकमेवाऽद्वितीयं ब्रह्म' (छा° VI. ii. 2) तिवादिनी-मुपनिषदं द्विजराजात् ब्रह्मविदः[11] सकाशादधीते[12] ॥४८॥

पद्माङ्कसद्मानमवेक्ष्य लक्ष्मीमेकस्य विष्णोः श्रयणात् सपत्नीम् ।
आस्येन्दुमस्या भजते जिताब्जं सरस्वती तद्विजिगीषया किम् ॥४९॥

[1]पद्माङ्कसद्मानमित्यादि । किं सरस्वती[2] देवी [3]अस्या आस्येन्दुं तस्या लक्ष्म्या विजिगीषया भजते ?। किं भूतम् ?। जितमब्जं कमलं येन [4]तत् तथा ।[5] मुखेन कमलं जीयते, इन्दुना च । किं कृत्वा ? । लक्ष्मीं देवीं पद्मस्य[6] अङ्कम् उत्सङ्गं सद्म यस्याः तां तथाविधामवेक्ष्य । किं भूताम् ?। एकस्य विष्णोः श्रयणात सपत्नीम् । लक्ष्मीः परमेश्वरस्य हृदये वसति, सरस्वती च[7] कण्ठे । अतः सापत्न्यात् तस्याः पद्मं गृहं दृष्ट्वा [8]उत्कृष्टं दमयन्तीमुखचन्द्रं सरस्वती भजते[9] ॥४९॥

कण्ठे वसन्ती चतुरा यदस्याः सरस्वती वादयते विपञ्चीम् ।
तदेव वाग्भूय मुखे मृगाक्ष्या. श्रोतुः श्रुतौ याति सुधारसत्वम् ॥५०॥

कण्ठे[1] इत्यादि । सरस्वती देवी[2] अस्या दमयन्त्याः[3] कण्ठे वसन्ती [4]चतुरा वीणावादनदक्षा यत् विपञ्चीं वीणां वादयते तदेव

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

वादनं मृगाक्ष्याः मुखे वाग्भूय[5] वाणीरूपं भूत्वा श्रोतुः पुरुषस्य[6] श्रुतौ कर्णे सुधारसत्वं याति। ऊर्यादिच्विडाचश्चे (पा° I. iv. 61)ति क्रियायोगे गतिसंज्ञा[यां] कुगतिप्रादय (पा° II. ii. 18) इति च्व्यन्तस्य नित्यं समासः। तत्पुरुषश्च समासो भवति। ततः समासे भाविनी (का° IV. vi. 55)ति ल्यबादेशः। अवाक्रूपं सद् वाग्भवतीति च्विप्रत्ययः। [7]वादयते, इति अणावकर्मकाच्चित्तवत्कर्तृकादि (पा° I. iii. 88)ति विहितस्य कर्त्रभिप्रायक्रियाफलविवक्षयाऽऽत्मनेपदापवादस्य परस्मैपदस्य, न पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवस (पा° I. iii. 89) इति प्रतिषेधे, णिचश्चे (पा° I. iii. 74) त्यात्मनेपदमेव भवति। सरस्वतीविपञ्च्या देवताधिष्ठितत्वाच्चेतनत्वविवक्षा। तथा च—सदैवतैः सततमथाऽनपायिभिर्निजाङ्गवन्मुरुजिदसेव्यतायुधैरिति। हेतिभिश्चेतनावद्भिरिति च हरेरायुधानां सदैवत्वं वर्णितम्। चित्तवत्त्वाविवक्षायां च दैवरक्ताः किंशुका अविवक्षितकर्मत्वाद्, गतिबुद्धी(पा° I. ii. 52)त्यादिना कर्मत्वम्[8] ॥५०॥

विलोकितास्या मुखमुन्नमय्य किं वेधसेयं सुषमासमाप्तौ।
धृत्युद्भवा यच्चिबुके चकास्ति निम्ने मनागङ्गुलियन्त्रणेव ॥५१॥

[1]विलोकितास्येत्यादि। [2]किं वेधसा सुषमायाः शोभायाः समाप्तौ परिपूर्णतायां सत्यां[3] मुखम् उन्नमय्य[4] विलोकितम् आस्यं यस्याः सा तथा। इयं दमयन्ती सञ्जाता। यत् चिबुके [5]मुखस्याऽधोभागे मनाक् स्तोकम् अङ्गुल्या यन्त्रणा इव गर्त्तरूपा चकास्ति। किं भूते?। निम्ने। किं भूता?। धृत्या [6]धारणेन उद्भवा [7]उत्पन्ना। पिता[8] किल अलङ्कृतमप्यपत्यं प्रीत्या चिबुके धृत्वा विलोकयति[9] ॥५१॥

प्रियामुखीभूय सुखी सुधांशुर्वसत्ययं[1] राहुभयव्ययेन।
इमां दधाराऽधरबिम्बलीलां तस्यैव बालं करचक्रवालम् ॥५२॥

[2]प्रियामुखीत्यादि। अयं सुधांशुः प्रियामुखीभूय[3] सुखी सन् [4]राहुसकाशात् भयव्ययेन भयाभावेन [5]वसति। [6]तस्यैव चन्द्रस्य[7] बालं करचक्रवालं किरणजालम् इमामधरबिम्बलीलां दधार। बालत्वात् रक्तम्। ओष्ठोऽपि रक्तः[8]। अन्योऽपि निर्भयत्वात् सुखी सन् वसति। तस्य स्थूलादिका गुणा भवन्ति, बालत्वादेः प्रभृति ॥५२॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

अस्या मुखस्याऽस्तु न पौर्णमास्यं पूर्णस्य जित्वा महिमा हिमांशुम् ।
भ्रू लक्ष्मखण्डं दधदर्धमिन्दुर्भालस्तृतीयः खलु यस्य भागः ।।५३।।

अस्या[1] मुखस्येत्यादि । अस्याः पूर्णस्य मुखस्य पौर्णमासीसम्बन्धिनं हिमांशुं जित्वा महिमा न अस्तु, मा भवतु[2] । यस्य मुखस्य तृतीयो भागो भालः[3] ललाटम् अर्द्धं इन्दुः चन्द्रार्धम् । किं कुर्वन्[4] इन्दुः ? । भ्रुवावेव लक्ष्मणः कलङ्कस्य खण्ड दधत् । किल प्रदेशमात्रत्वेन द्वादशाङ्गुलं मुखम् । तस्य तृतीयो भागो ललाटं चतुरङ्गुलम् । तत्र [5]आकारविशेषेण प्रत्यक्षेण तथा कलङ्कार्धलिङ्गेन[6] चन्द्रार्धत्वम् । पूर्णचन्द्रे पूर्णः कलङ्कः । अर्द्धे अर्द्धम् । मुखस्य भागद्वयेन पूर्णश्चन्द्रः एको भाग उद्गिरति । तेन चन्द्रान्महत्त्वम्[7] ।।५३।।

व्यधत्त धाता मुखपद्ममस्याः सम्राजमम्भोजकुलेऽखिलेऽपि ।
सरोजराजौ सृजतोऽदसीयां नेत्राभिधेयावत एव सेवाम् ।।५४।।

[1]व्यधत्तेत्यादि । अस्या मुखपद्मं धाता वेधा[2] अखिलेऽपि अम्भोजकुले सम्राजं व्यधत्त । राज्ञां मध्ये राजानं चक्रे । अत एव नेत्राभिधेयौ सरोजराजौ द्वौ अमुष्य मुखस्य सम्बन्धिनीं सेवां सृजतः । यः किल[3] सम्राट् भवति, स राजभिः सेव्यते[4] ।।५४।।

दिवारजन्यो रविसोमभीते चन्द्राम्बुजे निक्षिपतः स्वलक्ष्मीम् ।
आस्ये यदाऽस्या न तदा तयोः श्रीरेकश्रियेदं तु कदा न कान्तम् ।।५५।।

[1]दिवारजन्योरित्यादि । चन्द्रश्च [2]अम्बुजं च उभे दिवारजन्योः स्वलक्ष्मीं यदा अस्या आस्ये निक्षिपतः निक्षेपं कुरुतः । किं भूते चन्द्राम्बुजे ? । रवेः सोमाच्च भीते । दिवसे चन्द्रो रविभीतः । रजन्यामम्बुजं[3] सोमाद्भीतम् । तदा तयो [र्द्वयो]र्विषये श्रीर्न भवति । इदं मुखं तु पुनः द्वयोर्मध्यादेकस्य[4] श्रिया कदा कान्तं न भवति । अपि तु सर्वदा कान्तम्[5] ।।५५।।

अस्या मुखश्री प्रतिबिम्बमेव जलाच्च तावन्मुकुराच्च मित्रात् ।
अभ्यर्थ्य धत्तः खलु पद्मचन्द्रौ विभूषणं याचितकं कदाचित् ।।५६।।

अस्या[1] मुखेत्यादि । खलु[2] पद्मचन्द्रौ अस्या मुखश्रियः प्रतिबिम्बमेव [3]जलात् तातात् पितुः सकाशात् [4]मित्रान्मुकुरात् आदर्शाच्च

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

याचित[कं] [5]प्रार्थितं विभूषणं कदाचित् अभ्यर्थ्य धत्तः । पद्मं तातात्[6] जलात्, चन्द्रो मित्रात् आदर्शान्[7] याचेते[8] ।।५६।।

अर्काय पत्ये खलु तिष्ठमाना भृङ्गैर्मितामक्षिभिरम्बुकेलौ ।
भैमीमुखस्य श्रियमम्बुजिन्यो याचन्ति विस्तारितपद्महस्ताः ।।५७।।

[1]अर्कायेत्यादि । [2]खलु शङ्के अम्बुजिन्यः भैमीमुखस्य श्रियं शोभां याचन्ति । किं भूताः ?। विस्तारिताः [3]विस्तारीकृताः पद्मान्येव हस्ताः करा[4] याभिः तास्तथा । पुनः किं भूताः ?। अर्काय पत्ये तिष्ठमानाः । स्वाभिप्रायं [5]कामाविर्भावं प्रकाशयन्त्यः । [6]श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमान (पा° I. iv. 34) इति सम्प्रदानम् । प्रकाशनस्थेयाख्ययोश्चे (पा° I. iii. 23) त्यात्मनेपदम् । कौमारे तु प्रतिज्ञानिर्णयप्रकाशनेषु स्थाः (III. ii. 42.13) इत्यात्मनेपदं प्रकाशनेऽर्थे । किं भूतां श्रियम् ?। अम्बुकेलौ जलकेलिकाले भृङ्गैरेव [7]भ्रमरैरेव अक्षिभिर्नयनै[8] मितां दृष्टाम् । कामिनी भर्तृसन्निधौ [9]परविभूषणेनाऽपि शृङ्गारवती भवति[10] ।।५७।।

अस्या मुखेनैव विजित्य नित्यस्पर्द्धि मिलत्कुङ्कुमरोषभासा ।
प्रसह्य चन्द्रः खलु नह्यमानः स्यादेव तिष्ठन् परिवेषपाशः ।।५८।।

अस्या[1] मुखेनेति । खलु चन्द्रः अस्या मुखेनैव विजित्य प्रसह्य [2]बलात्कारेण नह्यमानः वध्यमानः सन् तिष्ठन् परिवेष एव पाशो[3] बन्धनं यस्य स तथाविधः स्यादेव । यतः[4] नित्यस्पर्द्धी अयं परिवेषो न भवति । किन्तु बन्धनपाशः । किं भूतेन ? । मिलत् यत्[5] कुङ्कुमं तदेव रोषभा यस्य तेन तथा[6] ।।५८।।

विधोर्विधिर्बिम्बशतानि लोपं लोपं कुहूरात्रिषु मासि मासि ।
अभङ्गुरश्रीकमिमं किमस्या मुखेन्दुमस्थापयदेकशेषम् ।।५९।।

[1]विधोरित्यादि । विधिर्ब्रह्मा मासि मासि कुहूरात्रिषु अमावास्या[2] निशासु विधोः बिम्बशतानि लोपं लोपं विलुप्य विलुप्य किम्[3] अस्या मुखेन्दुम् अभङ्गुरश्रीकं निश्चलशोभम् इमम्[4] एकमेव शेषम् अस्थापयत् । [5]कुहूशब्देन नष्टचन्द्रत्वमुच्यते । सरूपाणामेकशेष एकविभक्तौ (पा° I. ii. 64)[6] ।।५९।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

कपोलपत्रान्मकरात् सकेतुर्भ्रूभ्यां जिगीषुर्धनुषा जगन्ति ।
इहाऽवलम्ब्याऽस्ति रतिं मनोभू रज्यद्वयस्यो मधुनाधरेण ।।६०।।

[1]कपोलपत्रादित्यादि । मनोभूः इह दमयन्त्यां रतिमवलम्ब्य क्रीडां प्राप्य अस्ति । अथ च रतिं कामवधूम् । किं भूतः ?। कपोले पत्रात् [2]पत्रवल्लीभूतात् मकरात् सकेतुः सध्वजमकरः । भ्रूभ्यामेव धनुषा जगन्ति[3] जिगीषुः । तथा मधुना मधुतुल्यस्वादेन अधरेण ओष्ठेन रज्यन् वयस्यो मित्रं यस्य स तथा । मधुर्वसन्तः अधरो अधरितः अनुचरः अनुरागयुक्तश्चास्य । ओष्ठोऽपि रक्तः[4] । कुषिरजोः[5] प्राचां श्यन् परस्मैपदं चे[6](पा° III. i. 90)ति परस्मैपदम् । तथा श्यन् विकरणः । [7]अन्ये तु अस्ति रतिरित्यपि पठन्ति[8] ।।६०।।

वियोगबाष्पाञ्चितनेत्रपद्मच्छद्मार्पितोत्सर्गपयःप्रसूनौ ।
कर्णौ किमस्या रतितत्पतिभ्यां निवेद्यपूपौ विधिशिल्पमीदृक् ।।६१।।

[1]वियोगेत्यादि । किम्[2] अस्याः[3] कर्णौ [4]रत्यै तस्याः पत्ये कामाय च उभाभ्याम् अर्थे निवेद्यौ च तौ पूपौ च । निवेद्यार्थं पूपकौ इति[5] । ईदृक् विधेर्ब्रह्मणः शिल्पमिदं निर्माणं यथा शास्त्रेषु आदित्यादिग्रहेभ्यो विधिना पूपके नैवेद्यानि निर्मितानि । तथा आभ्यामपि पूपौ । किं [6]भूतौ ?। वियोगबाष्पैरञ्चिते पूजिते[अङ्किते]ये नेत्रपद्मे तयोः छद्मना अर्पितम् उत्सर्गपयः सङ्कल्पोदकं प्रसूने पुष्पद्वयं च ययो— स्तौ तथा ।[7] अपूपोपरि उदकं पुष्पं[8] च मुच्यते । कर्णान्तविश्रान्तत्वात् कर्णयोरेवमुत्प्रेक्षा[9] ।।६१।।

इहाविशद्येन पथाऽतिवक्रः शास्त्रौघनिष्यन्दसुधाप्रवाहः ।
सोऽस्याः श्रवः पत्रयुगे प्रणालीरेखेव [1]धावत्यभिकर्णकूपम् ।।६२।।

[2]इहाविशदित्यादि । इहाऽस्यां दमयन्त्यां विषये येन पथा मार्गेणाऽतिवक्रः वक्रोक्तिभिर्विषमः शास्त्रौघस्य यो निष्यन्दः सारः[3] स एव सुधाप्रवाहः अविशत् प्रविष्टः । स प्रवाहमार्गः अस्या दमयन्त्याः[4] श्रवः[5]पत्रयुगे पर्पटयुगले प्रणालीरेखा इव अभिकर्णकूपं धावति । प्रणाल- मार्गोऽपि वक्रो भवति । सोऽपि कूपं गर्तं प्रति धावति[6] ।।६२।।

अस्या यदष्टादश संविभज्य विद्याः श्रुती दध्रतुरर्धमर्धम् ।
कर्णान्तरुत्कीर्णगभीरलेखः किं तस्य सङ्ख्यैव न वा नवाङ्कः ।।६३।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]अस्या यदित्यादि। [2]यदस्या श्रुती कर्णौ अष्टादश विद्याः संविभज्यार्धम् अर्धं दध्रतुः। चत्वारो वेदाः, षडङ्गानि, पुराणं, न्यायो, मीमांसा, धर्मशास्त्रम्, आयुर्वेदो, नाटयवेदो[3] [4]धनुर्वेदोऽर्थशास्त्राणि नीतिप्रभृतीनि। किं तस्य [5]अर्द्धस्य सङ्ख्या एव अयं नवसङ्ख्याङ्कः वा अथवा न भवति। अपि तु स एव। किं भूतः?। कर्णपुटस्य[6] अन्तर्मध्ये [7]उत्कीर्णा उल्लिखिता गभीरा लेखा यत्र स तथा। यादृशी नवाङ्कस्य रेखा भवति, तादृशी कर्णद्वयमध्ये रेखाऽस्ति[8] ।।६३।।

मन्येऽमुना कर्णलतामयेन पाशद्वयेन च्छिदुरेतरेण।
एकाकिपाशं वरुणं विजिग्येऽनङ्गीकृतायासततो रतीशः ।।६४।।

[1]मन्येऽमुनेत्यादि। अहम् एवं मन्ये। रतीशः कामः अमुना कर्णलतामयेन पाशद्वयेन छिदुरेतरेण[2] अत्रुटनशीलेन वरुणं विजिग्ये। यतः एकाकी एक एव पाशो यस्य तं तथा। किं भूतः?। अनङ्गीकृता आयासस्य ततिः परम्परा येन स तथा। अनायासेनैवेत्यर्थः। एकादाकिनिच्चासहाय[3] (पा॰ V. iii. 53) इत्याकिप्रत्ययः। विपराभ्यां जेः (पा॰ I. iii. 19) इत्यात्मनेपदम्[4] ।।६४।।

आत्मैव तातस्य चतुर्भुजस्य जातश्चतुर्दोरुचितः स्मरोऽपि।
तच्चापयोः कर्णलते भ्रुवोर्ज्ये वंशत्वगंशौ चिपिटौ किमस्याः ।।६५।।

[1]आत्मैव तातस्येत्यादि। स्मरोऽपि उचितः युक्तं चतुर्दोः चतुर्भुजो जातः। किं भूतः?। तातस्य पितुश्चतुर्भुजस्य[2] श्रीकृष्णस्य आत्मैव जातः। आत्मा वै जायते पुत्रः इति श्रुतेः। अतोऽस्याः कर्णलते कर्णलालिकाद्वयं तस्य कामस्य [3]द्वयोश्चापयोर्भ्रुवोः[द्वे]ज्ये मौर्व्यौ। [4]कामस्य भ्रूचापयोः कर्णलालिके ज्ये इत्यर्थः। किं भूते?।[5] चिपिटौ[6] लालिकापृथुलौ भागौ तौ[7] किं वंशस्य त्वचः[8] अंशौ भागौ। वंशत्वक् तक्षित्वा तक्षित्वा चिपिटा क्रियते। धनुषो मौर्वी[9] चतुर्भुजत्वाच्चापद्वयम्। [10]अथवा अस्याः कर्णलते एव तच्चापयोः चिपिटौ वंशत्वगंशौ कर्णलालिके कामस्य धनुषोऽपि चिपिटौ वंशबिम्बफाडिके अस्या भ्रुवौ ज्ये भ्रूलते मौर्व्ये इति। तदा भ्रुवो ज्ये इति पाठः[11] ।।६५।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

ग्रीवाद्भुतैवाऽवटुशोभिताऽपि प्रसाधिता माणवकेन सेयम् ।
आलिङ्ग्यतामप्यवलम्बमाना सुरूपताभागखिलोर्ध्वकाया ।।६६।।

[1]ग्रीवाद्भुतैवेत्यादि । सा इयं ग्रीवा अद्भुतैव । यतः अवटुना कृकाटिकया शोभिताऽपि माणवकेन हारेण प्रसाधिता । या किल[2] न बहुना शोभिता भवति सा कथं माणवकेन बटुना प्रसाध्यते इति विरोधादाश्चर्यम् । तथा आलिङ्ग्यताम् । अवलम्बमाना [3]तथा सुरूपतां शोभनरूपताम् । अकारप्रश्लेषेऽसुरूपतां प्राणरूपतां भजते । अखिल ऊर्ध्वकायो यस्याः सा तथा । [4]ग्रीवैकदेशे कायशब्दः । [5]अथ च आलिङ्ग्यं नाम[6] तथा ऊर्ध्वकं नाम वाद्यभेदः । या किलाऽऽलिङ्ग्यतामालम्बते सा कथं सुरूपताभाक् । अखिलम् ऊर्ध्वकं यस्याः सा तथा । [7]अखिलोर्ध्वका या इति भिन्नं पदम् । अथ वा सुरूपताभाक् अखिल ऊर्ध्वकस्य वाद्यस्य आय आगमनं यत्र सा तथाविधा कथं[8] भवति । आलिङ्ग्यं वाद्यम् अन्यत्[9], ऊर्ध्वकं वाद्यमन्यत् इति विरोधाभासादाश्चर्यम् । [10]आलिङ्गितामिति पाठे आलिङ्गिनमालिङ्गः सोऽस्याऽस्तीति इन्प्रत्ययः[11] ।।६६।।

कवित्वगानप्रियवादसत्यान्यस्या विधाता [1]व्यधिताऽधिकण्ठम् ।
रेखात्रयन्यासमिषादमीषां वासाय सोऽयं विबभाज सीमाः ।।६७।।

[2]कवित्वगानेत्यादि । विधाता अस्या अधिकण्ठं कवित्वं गानं प्रियवादं सत्यं च एतानि व्यधित । कण्ठे व्यधितेति अनेन तुल्ये वाचकत्वे अव्ययीभावश्च । अस्ति कश्चिद्विशेषः यश्चम[त्कार]कारी ततश्चामीषां चतुर्णां पृथक् पृथक् वासाय सोऽयं विधाता सीमाः[3] विबभाज विभक्तवान् । कस्मात् ? । रेखात्रयस्य न्यासमिषात् । यदाह—
रेखात्रयाङ्किता ग्रीवा कम्बुग्रीवेति कथ्यते (हला° II. 362) [इति] । यत्र चत्वारः प्रदेशा विभज्यन्ते तत्र[4] त्रयः [5]मेढ्रका भवन्ति[6] ।।६७।।

बाहू प्रियाया जयतां मृणालं द्वन्द्वे जयो नाम न विस्मयोऽस्मिन् ।
उच्चैस्तु तच्चित्रममुष्य भग्नस्याऽऽलोक्यते निर्व्यथनं यदन्तः ।।६८।।

बाहू[1] प्रिया इत्यादि । प्रियाया बाहू मृणालं जयताम् । नाम अभ्युपगमे । अस्मिन्नर्थे न विस्मयः यत् द्वन्द्वे जयः द्वाभ्यामेको जीयते । तु पुनस्तदुच्चैश्चित्रम् । यदमुष्य भग्नस्य[2] मृणालस्य जितस्य अन्तर्मध्ये

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

निर्व्यथनं व्यथाया अभावो [3]विलोक्यते । अथ च [4]मृणालखण्डभङ्गेऽन्तर्निर्व्यथनं छिद्रम् आलोक्यते[5] ।।६८।।

अजीयताऽऽवर्त्तशुभंयुनाभ्यां दोर्भ्यां मृणालं किमु कोमलाभ्याम् ।
निःसूत्रमास्ते घनपङ्कमृत्सु मूर्त्तासु नाऽकीर्तिषु तन्निमग्नम् ।।६९।।

[1]अजीयतेत्यादि । आवर्त्तः पयसां भ्रमस्तद्वत् शुभंयुः शुभसंयुता नाभिः यस्याः[2] तथाविधायाः तस्या दोर्भ्यां बाहुभ्यां कोमलाभ्यां किमु[3] मृणालम् अजीयत । [4]अथवा अस्या आभ्यां दोर्भ्यां मृणालम् अजीयत । किं विशिष्टाभ्यां दोर्भ्याम् ? । आवर्त्तशुभंयुना आविष्टलिङ्गत्वात् एकत्वम् । तन्मृणालं घनस्य [5]पङ्कस्य मृत्सु मृत्तिकास्वेव [6]मूर्त्तासु अकीर्तिषु निमग्नं किं न आस्ते ?। अपि तु जितत्वादकीर्तिमग्नम् । किंभूतम् ?। [7]निःसूत्रम् । जितत्वान्निःशब्दम् । निभृतम् । अथ मृणालं पङ्कस्थितं सूत्ररहितं भवति । बहिराकृष्य भग्नं सत् सूत्रतन्तुव्याप्तं [8]भवति[9] ।।६९।।

रज्यन्नखस्याङ्गुलिपञ्चकस्य मिषादसौ हैङ्गुलपद्मतूणे ।
हेमैकपुङ्खास्ति विशुद्धपर्वा प्रियाकरे पञ्चशरी स्मरस्य ।।७०।।

[1]रज्यन्नित्यादि । प्रियायाः करे एव हैङ्गुलं रक्तं पद्मं[2] तदेव तूणम् । हिङ्गुलेन रक्तं हैङ्गुलम् । हिङ्गुलपद्मतूणे इति पाठे मध्यपदस्य रक्तस्य लोपः । तस्मिन् [3]हस्ततूणे अङ्गुलिपञ्चकस्य मिषात् असौ स्मरस्य पञ्चानां शराणां समाहारः पञ्चशरो अस्ति विद्यते । किं विशिष्टस्य ?। रज्यन्तो नखा [4]यस्य [5]तस्य तथा । किं भूता ?। हैमः[6] सौवर्णं एकः पुङ्खो यस्यां सा[7] तथा । नखानां रागात् पुङ्खसादृश्यम् । तथा [8]विशुद्धानि पर्वाणि यस्यां सा तथा । अङ्गुलिपर्वाणि च शुद्धानि ऋजूनि शराश्च[9] ।।७०।।

अस्याः करस्पर्द्धनगर्द्धि[1]तर्द्धिर्बालत्वमापत्खलु पल्लवो यः ।
भूयोऽपि नामाधरसाम्यगर्वं कुर्वन् कथं वाऽस्तु न स प्रवालः ।।७१।।

अस्याः[2] करेत्यादि । यः[3] खलु पल्लवः बालत्वम् आपत् । किं भूतः ?। अस्याः करस्य हस्तस्य स्पर्द्धनेन गर्द्धिता अभिलषिता ऋद्धिर्येन स तथा । [4]गर्द्धिऋद्धिरिति पाठान्तरे दमयन्ती [5]हस्तस्पर्द्धायाम् अहमपि

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

प्रतिष्ठां लभे इति दुराशया[6]। अथ च बालपल्लवस्य करसाम्यं नाम अहो स भूयोऽपि पल्लवोऽधरेण साम्यस्य गर्वं कुर्वन् कथं वा[7] प्रवालो नाऽस्तु। तस्य प्रवाल इति संज्ञा। अथ च प्रकृष्टो बाल:[8] ।।७१।।

अस्यैव सर्गाय भवत्करस्य सरोजसृष्टिर्मम हस्तलेख:।
इत्याह धाता हरिणेक्षणायां किं हस्तलेखीकृतया तया स्याम् ।।७२।।

[1]अस्यैवेत्यादि। किं धाता[2] ब्रह्मा अस्यां हरिणेक्षणायां हस्ते लेखीकृतया रेखारूपया। अथ च हस्ते[3] लेखीकृतया [4]हस्तोलकीकृतया तया[5] सरोजसृष्ट्या[6] इति आह। इतीति किम्?। मम सरोजानां सृष्टि: अस्यैव भवत्या: करस्य सर्गाय हस्तलेख: हस्तोलक:[7] ।।७२।।

किं नर्मदाया मम सेयमस्या दृश्याभितो बाहुलतामृणाली।
कुचौ किमुत्तस्थतुरन्तरीपे स्मरोष्मशुष्यत्तरबाल्यवार: ।।७३।।

किं [1]नर्मदाया इत्यादि। किम् [2]इयम् अस्या दमयन्त्या मम नर्म परिहासकेलिं[3] ददातीति नर्मदा तस्यास्तथाविधाया अभित उभयत: बाहुलता[4] एव मृणाली दृश्या। नर्मदायां नद्यां किल मृणाली वर्ण्यते। किम् अस्या:[5] कुचौ एव अन्तरीपे द्वीपे उत्तस्थतु:। [6]द्व्यन्तरूपसर्गेभ्योऽप ईत् (पा° VI. iii. 97) इतीत्वम्। किं भूताया:?। स्मरोष्मणा शुष्यत्तरं बाल्यमेव वा: पानीयं यस्या: तस्यास्तथा। वारशब्दोऽयं व्यञ्जनान्त:। नर्मदाया अपि यथा यथा वारि शुष्यति तथा तथा द्वीपमुत्तिष्ठति[7] ।।७३।।

तालं प्रभु स्यादनुकर्तुमेतावुत्थानसुस्थौ पतितं न तावत्।
परं च नाश्रित्य तरुं महान्तं कुचौ कृशाङ्ग्या: स्वत एव तुङ्गौ ।।७४।।

[1]तालं प्रभु स्यादिति। [2]तावद्भूमौ पतितं तालफलम् एतौ कुचौ अनुकर्तुं न प्रभु स्यात् न समर्थं स्यात्[3]। यत् उत्थानेन उद्गमेन[4] सुस्थौ। इदं पतितं स्तनौ चोत्थितौ तत: क्व साम्यम्?। परमन्यत् महान्तम् उच्चैस्तरुं[5] तालं वृक्षम् आश्रित्य। पराश्रयेण बलवत् वृक्षोपरि स्थितं तालं [6]च न[7] एतौ उपमातुं प्रभु[8]। यत: कृशाङ्ग्या: कुचौ स्वत एव पराश्रयव्यतिरेकेणैव तुङ्गौ[9] उन्नतौ[10] ।।७४।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

एतत्कुचस्पर्द्धितया घटस्य ख्यातस्य शास्त्रेषु निदर्शनत्वम् ।
तस्माच्च शिल्पान्मणिकादिकारी प्रसिद्धनामाजनि कुम्भकारः ।।७५।।

[1]एतत्कुचेत्यादि । घटस्य शास्त्रेषु तर्केषु मीमांसादिषु[2] यन्निदर्शनत्वम् अन्वयेन व्यतिरेकेण [च] दृष्टान्तत्वं तत्[3] एतस्याः कुचयोः स्पर्द्धितया ख्यातस्य लोके शास्त्रे [च] प्रसिद्धस्य सतः । अनित्यः शब्दः । कृतकत्वात् । घटवदिति नैयायिकाः । नित्यः शब्दः । अकृतत्वात् । यन्नित्यं न भवति तदकृतमपि न भवति यथा घट इति मीमांसकाः । किञ्च तस्मादेव प्रख्यातघटकरणलक्षणात् शिल्पात् कर्मणः विज्ञानात् सकाशात्[4] हेतोः [5]लोकेऽपि यो [6]मणिकघटीकरकशरावादिकारी । आदिशब्दात् घटकरकशरावादिकारी तत्करणशीलः स कुम्भकारः इति प्रसिद्धनामाऽजनि । दमयन्तीकुचस्पर्द्धि तया आख्यातत्वात्[7] ।।७५।।

[1]गुच्छावलीस्वच्छतमोदबिन्दुवृन्दाभमुक्ताफलफेनिलाङ्के ।
माणिक्यहारस्य विदर्भसुभ्रूपयोधरे रोहति रोहितश्रीः ।।७६।।

[2]गुच्छावलीत्यादि । विदर्भसुभ्रूपयोधरे [3]माणिक्यस्य हारस्य रोहितश्रीः लोहिता शोभा रोहति [4]प्रादुर्भवति । माणिक्यानां सरागत्वात् । किं भूते ?। गुच्छावल्यां हारे[5] स्वच्छतमानि उदबिन्दुवृन्दाभानि यानि मुक्ताफलानि तैः फेनिलः फेनयुक्त इव अङ्को मध्यं यस्य तत्र तथा । [6]उदकस्योद (पा॰ VI. iii. 57) इत्यधिकारे, मन्थोदनसक्तुबिन्दुवज्रभारहारवीवधगाहेष्वि (पा॰ VI. iii. 60)ति उदादेशः । फेनादिलच्चे (पा॰ V. ii. 99)ति इलच् । मौक्तिकमयगुच्छावलिसहितो[7] माणिक्यहारोऽस्तीत्यर्थः । अथ वा मणिमध्ये[8] मौक्तिकग्रथनात् । अथ च पयोधरेऽपि[9] मेघे[10] रोहितस्य ऋजुनः इन्द्रधनुषः शोभा भवति[11] । [12]बिन्दवः फेनं च ।।७६।।

निःशङ्कसङ्कोचितपङ्कजोऽयमस्यामुदीतो मुखमिन्दुबिम्बः ।
चित्रं तथापि स्तनकोकयुग्मं न स्तोकमप्यञ्चति विप्रयोगम् ।।७७।।

[1]निःशङ्केत्यादि । अयम् [2]अस्यां मुखं मुखलक्षण इन्दुबिम्बः उदीतः उत्पन्नः । किं भूतः ?। निःशङ्कं सङ्कोचितानि [3]पङ्कजानि येन स तथा । एतत् पुनश्चित्रम् आश्चर्यम् । यत् तथाऽपि चन्द्रोदयेऽपि

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

स्तनावेव[4] कोकौ[5] तयोर्युग्मं[6] मिथुनं स्तोकमपि विप्रयोगम् अन्तरं भेदं विरहं वा न अञ्चति न प्राप्नोति[7] ।।७७।।

आभ्यां कुचाभ्यामिभकुम्भयोः श्रीरादीयतेऽसावनयोर्न ताभ्याम् ।
भयेन गोपायितमौक्तिकौ तौ प्रव्यक्तमुक्ताभरणाविमौ यत् ।।७८।।

[1]आभ्यामित्यादि । आभ्यां कुचाभ्याम् इभस्य हस्तिनः[2] कुम्भयोः [3]श्रीर्लक्ष्मीरादीयते । न[4] तु वैपरीत्यं किमित न स्यादित्याह । सा तु[5] शोभा तयोः कुम्भ[स्थल]योः क्व वर्त्तते । अपि[6] तु न [7]कुत्राऽपि । [8]यत्तौ हस्तिकुम्भौ[9] ताभ्यां [10]कुचाभ्यां सकाशात् भयेन गोपायितानि निगूढीकृतानि मौक्तिकानि [11]याभ्यां तौ[12] तथा । इमौ कुचौ पुनः प्रव्यक्तानि मुक्ताभरणानि हारादीनि यत्र तौ तथा । भद्रजातीयस्य हस्तिनः कुम्भस्थले मौक्तिकानि मांसमध्ये गुप्तानि भवन्ति । अतः [13]कवेरुत्प्रेक्षा ।।७८।।

कराग्रजाग्रच्छतकोटिरर्थी ययोरिमौ तौ तुलयेत् कुचौ चेत् ।
सर्वं तदा श्रीफलमुन्मदिष्णु जातं वटीमप्यधुना न लब्धुम् ।।७९।।

[1]कराग्रेत्यादि । ययोः कुचयोः कराग्रे जाग्रत् शतकोटिः वज्रं यस्य स तथाविध इन्द्रो अर्थी [2]याचकः [3]चेत् यदि श्रीफलं बिल्वफलम् इमौ प्रत्यक्षौ तौ कुचौ तुलयेत् कुचाभ्यां समानं[4] भवेत् । तदा सर्वं श्रीफलम् उन्मदिष्णु उन्मत्तं सगर्वं भवतु । अधुना पुनः कुचाभ्यां हीनत्वे सति वटीमपि लब्धुं न जातम् । कणिकामात्रमपि न लभते । [5]स्तनाग्रो भागः वटी उच्यते । ययोः कुचयोः[6] किल हस्ताग्रे प्रत्यक्षदर्शितसुवर्णकोटिशतमूल्यदाता[7] अर्थी ग्राहकः । तौ चेच्छ्रिया लक्ष्म्या फलं वस्तु तुलयेत् तुलायां धारयेत् तदा श्रियः फलं सर्वम् उन्मत्तं परं [8]तत्राऽस्ति । श्रीफलस्य तु[9] वटीमपि दातुं न कोऽपि अर्थी । [10]अथवा वटीमपि कुचचूचुकमपि लब्धुं [11]तुलयितुं बिल्वं न जातम् । तेनाऽपि साम्यं न लभते[12] ।।७९।।

स्तनान्तरे चन्दनपङ्किलेऽस्या जातस्य यावद्युवमानसानाम् ।
हारावलीरत्नमयूखधाराकाराः स्फुरन्ति स्खलनस्य लेखाः ।।८०।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]स्तनान्तरे इत्यादि । अस्या दमयन्त्याः[2] चन्दनेनाऽपि[3] पङ्किले कर्दमिले स्तनान्तरे[4] हारावलीरत्नानां मयूखास्तेषां [धाराः] श्रेणयस्तदाकारा यावन्तोऽसङ्ख्या युवानस्तेषां मानसानां [5]जातस्य [6]स्खलनस्य [7]लेखाः स्फुरन्ति । यथा [8]पङ्किलप्रदेशे चरणास्खलनरेखाः भवन्ति, तथा दमयन्तीस्तनयोः[9] यूनां मनांसि स्खलितानि पतितानि । अथ च तत्र [10]लाभो न लब्ध इत्यर्थः[11] ।।८०।।

क्षीणेन मध्येऽपि सतोदरेण यत्प्राप्यते नाक्रमणं वलिभ्यः ।
सर्वाङ्गशुद्धौ तदनङ्गराज्यविजृम्भितं भीमभुवीह चित्रम् ।।८१।।

[1]क्षीणेनेत्यादि । यन्मध्ये क्षीणेन कृशेनाऽपि सता[2] उदरेण वलिभ्यो वलित्रयादाक्रमणं न प्राप्यते । तत्[3] इह भीमभुवि दमयन्त्याम् अनङ्गराज्यस्य कामराज्यस्य विजृम्भितं चित्रम् आश्चर्यकारि । किं भूतायाम् ?। सर्वेष्वङ्गेषु शुद्धिर्निर्मलत्वं यस्यास्तस्यां[4] तथा । यत्किल उदरेण [5]उदासीनेन मध्ये सता मध्यस्थेन क्षीणेन दुर्बलेनाऽपि बलिभ्यो बलवद्भ्यो नाऽऽक्रमणं प्राप्यते तद्भीमस्य भयानकस्य राज्ञो भुवि भूमौ सर्वेषाम् अङ्गानां राज्याङ्गानां स्वाम्यमात्यादीनां शुद्धौ निर्दोषत्वे चित्रम् आश्चर्यम् । अनङ्गस्याऽङ्गरहितस्य राज्यस्य विलसितम् । यत्र सर्वाङ्गशुद्धिः तत्र कथमनङ्गत्वम् । तथा भीमस्य भुवि[6] अनङ्गस्य कामस्य राज्यं कथं भवति । अन्यभूमौ अन्यराज्याभावात् । तथा योऽनङ्गः तस्य एवंविधः प्रभावः कुतः स्यात् । अतश्चित्रम्[7] ।।८१।।

मध्यं तनूकृत्य यदीदमीयं वेधा न दध्यात् कमनीयमंशम् ।
केन स्तनौ सम्प्रति यौवनेऽस्याः सृजेदनन्यप्रतिमाङ्गदीप्तेः ।।८२।।

मध्यं [1]तनूकृत्येत्यादि । यदि अस्या इदम् इदमीयं मध्यम् उदरं तनूकृत्य[2] कृशं कृत्वा वेधाः कमनीयम् अंशं सुन्दरं भागं न दध्यात् । न क्वाऽपि धृत्वा मुञ्चेत् । तदा सम्प्रति यौवने ब्रह्मा केन सौन्दर्यांशेन अस्याः स्तनौ सृजेत् । किं [3]भूतायाः ?। अनन्यप्रतिमा असाधारणा अङ्गस्य दीप्तिर्यस्याः [4]तस्याः तथा[5] ।।८२।।

गौरी च पत्या सुभगा कदाचित् कर्त्तेयमप्यर्द्धतनूसमस्याम् ।
इतीव मध्ये निदधे विधाता रोमावलीमेचकसूत्रमस्याः ।।८३।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]गौरी चेत्यादि । विधाता अस्या मध्ये रोमावली एव मेचकं कृष्णवर्णवपुर्विलक्षणं[2] [3]सूत्रं निदधे । कथम् ? । [4]इतीव । इतीति किम् ? । इयमपि कदाचिद्गौरी च पार्वती च पत्या सह अर्द्धतन्वाः[5] अर्द्धशरीरस्य समस्यां संक्षेपम् एकशरीरत्वं कर्त्री [6]करिष्यति । कर्त्रीति पाठे करोति चेत् [7]तदा अनेन सूत्रेण सुखेनाऽर्द्धं भवति । यतः[8] सुभगा[9] ॥८३॥

रोमावलीरज्जुमुरोजकुम्भौ गम्भीरमासाद्य च नाभिकूपम् ।
मद्दृष्टितृष्णा विरमेद्यदि स्यान्नैषां बतैषा सिचयेन गुप्तिः ॥८४॥

[1]रोमावलीत्यादि । रोमावलीमेव रज्जुम् आसाद्य उरोजौ स्तनावेव कुम्भौ आसाद्य गम्भीरं नाभिमेव कूपम् आसाद्य मम दृष्टेस्तृष्णा दर्शनेच्छा विरमेत् । [2]व्याङ्परिभ्यो रम (पा° I. iii. 86) इति परस्मैपदम् । बत खेदे । यदि एषां त्रयाणामपि सिचयेन वस्त्रेण गुप्तिः[3] रक्षा आच्छादनं [4]न स्यात् । अथ च रज्जुकूपघटप्राप्तौ[5] पिपासा निवर्त्तते । यदि ते [6]तेषामसीनां खङ्गानां चयेन समूहेन गुप्तिः रक्षा न स्यात् । यदा जलस्य अप्राप्तौ खङ्गैराकृष्टैर्जलं रक्ष्यते । तदा [7]तृष्णा न विरमति[8] ॥८४॥

उन्मूलितालानबिलाभनाभिश्छिन्नस्खलच्छृङ्खलरोमदामा ।
मत्तस्य सेयं मदनद्विपस्य प्रस्वापवप्रोच्चकुचास्तु वास्तु ॥८५॥

[1]उन्मूलितेत्यादि । सा इयं [2]मत्तस्य मदनद्विपस्य वास्तु[3] शालास्तु । किंभूता ?। उन्मूलितं यदालानं गजबन्धनस्तम्भस्तस्य बिलं गर्त्तः छिद्रं तदाभा नाभिर्यत्र सा तथा। छिन्नं स्खलत् [4]पतितं यत् शृङ्खलं त्रुटितं [5]चरणसदृशं तत्सदृशं रोमदाम[6] रोमावली यत्र सा तथा। किं भूता ?। प्रस्वापार्थं वप्रं तटं [7]मृत्तिकारूपं तद्वत् उच्चौ कुचौ[8] यत्र स तथा[9] ॥८५॥

[1]रोमावलीभ्रूकुसुमैः स्वमौर्वीचापेषुभिर्मध्यललाटमूर्ध्नि ।
व्यस्तैरपि स्थास्नुभिरेतदीयैर्जैत्रः स चित्रं रतिजानिवीरः ॥८६॥

[2]रोमावलीत्यादि । एतच्चित्रं यत् स [3]रतिजानिवीरः कामः एतस्याः[4] सकैः रोमावलीभ्रूकुसुमैरेव [5]स्वमौर्वी च चापं च[6] इषवश्च

CC-0. ORI. Digitized by Sri Muthulakshmi Research Academy

तैर्यथासङ्ख्यं मध्ये च ललाटे च मूर्ध्नि च व्यस्तैरपि परस्परं भिन्नदेश-स्थैरपि जैत्रः जयनशीलः। किंभूतैः ?। [7]स्थास्नुभिः स्थिरत्वादेकत्र [8]मेलयितुमशक्यैः। अत आश्चर्यम्। [9]द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम् (पा॰ II. iv. 2) इत्येकवद्भावः। जायाया निङ्[10] (पा॰ V. iv. 134) इति निङ्प्रत्ययः ।।८६।।

[1]पुष्पाणि बाणाः कचमण्डनानि भ्रुवौ धनुर्भालमलङ्करिष्णुः ।
रोमावलिर्मध्यविभूषणं ज्या तथाऽपि जेता रतिजानिरेतैः ।।८७।।

[2]पुष्पाणि बाणा इत्यादि। पुष्पाणि बाणाः अस्याः कचानां [3]मण्डनानि केशेषु स्थिराणि तथा भ्रुवावेव कामधनुर्भालं अलङ्करिष्णुः। न लोकाव्ययनिष्ठाखलर्थतृनामि (पा॰ II. iii. 69) ति षष्ठीप्रतिषेधः। रोमावलिरेव ज्या मध्यस्य उदरस्य विभूषणं[4] तथापि रतिजानिरेतैर्जेता[5] ।।८७।।

अस्याः खलु ग्रन्थिनिबद्धकेशमल्लीकदम्बप्रतिबिम्बवेषात् ।
स्मरप्रशस्ती रजताक्षरेयं पृष्ठस्थलीहाटकपट्टिकायाम् ।।८८।।

[1]अस्याः खल्वित्यादि। अस्याः पृष्ठस्थली एव हाटकपट्टिका तस्याम् इयं रजताक्षरा [2]रौप्यमयाक्षराः स्मरस्य प्रशस्तिः[3] वर्णनरूपा। कस्मात् ?। ग्रन्थौ निबद्धा ये केशा धम्मिलप्रायाः तत्र[4] मल्लीकदम्बं [5]विचकिलपुष्पसमूहस्तस्य प्रतिबिम्बवेषात्[6] व्याजात्। श्वेताक्षरेषु पीत-वर्णा प्रशस्तिपट्टिका [7]भाति[8] ।।८८।।

चक्रेण विश्वं युधि मत्स्यकेतुः पितुर्जितं वीक्ष्य सुदर्शनेन ।
जगज्जिगीषत्यमुना नितम्बमयेन किं दुर्लभदर्शनेन ।।८९।।

[1]चक्रेणेत्यादि। मत्स्यकेतुः कामः अग्रतनेन पितुः[2] श्रीकृष्णस्य सुदर्शनेन नाम्ना चक्रेण[3] युधि विश्वं जितं वीक्ष्य अमुना नितम्बमयेन चक्रेण किं जगज्जिगीषति ?। अयं [4]तु विशेषः [5]तत्सुखेन दृश्यते। इदं तु दुर्लभदर्शनं [6]दुर्लभं दर्शनं यस्य तेन तथा[7] ।।८९।।

रोमावलीदण्डनितम्बचक्रे गुणं च लावण्यजलं च बाला ।
[1]लावण्यमूर्तेः कुचकुम्भकर्तुर्बिभर्ति शङ्के सहकारिचक्रम् ।।९०।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[2]रोमावलीत्यादि । इयं बाला [3]लावण्यमूर्तेः कुचयोरेव कुम्भयोः[4] कर्तुः [5]लावण्यस्यैव कुम्भकारस्य सहकारिकारणानाम् असमवायिकारणानां चक्रं समूहं बिभर्त्ति इति शङ्के । किं किमित्याह रोमावली एव दण्डः नितम्ब एव चक्रं ते द्वेऽपि तथा गुणं सौन्दर्यादिकं गुणं दोरकं बिभर्ति । लावण्यमेव जलम्[6] ।।९०।।

अङ्गेन केनाऽपि विजेतुमस्या गवेष्यते किं चलपत्रपत्रम् ।
न चेद्विशेषादितरच्छदेभ्यस्तस्यास्तु कम्पस्तु कुतो भयेन ।।९१।।

अङ्गेन[1] केनापीत्यादि । अस्याः केनाप्यवाच्येन स्मरमन्दिरलक्षणेन अङ्गेन किं चलपत्रस्य अश्वत्थस्य पत्रं पलाशं विजेतुं गवेष्यते अन्विष्यते । पिप्पलपलाशं कामशास्त्रे वराङ्गस्योपमानम्[2] । चेत् यदि एवं न [3]ततः कुतः कस्माद्भयेन तस्याऽश्वत्थपत्रस्य इतरच्छदेभ्यः [4]अन्यवृक्षपत्रेभ्यः सकाशात् तु[5] पुनः विशेषतः कम्पोऽस्तु । वायौ वाति सति विशेषात्[6] पिप्पलपलाशं कम्पते[7] ।।९१।।

भ्रूश्चित्रलेखा च तिलोत्तमाऽस्या नासा च रम्भा च यदूरुसृष्टिः ।
दृष्टा ततः पूरयतीयमेकानेकाप्सरःप्रेक्षणकौतुकानि ।।९२।।

[1]भ्रूश्चित्रलेखेत्यादि । ततः कारणादियम् एकाऽपि दृष्टा सती अनेकासामप्सरसां प्रेक्षणस्य कौतुकानि पूरयति । [2]यतोऽस्याः भ्रूश्चित्रलेखा नाम देवाङ्गना । अथ च चित्रा रमणीया लेखा रेखा यस्याः सा तथा । [3]तथाऽस्या नासा नासिका तिलोत्तमा नाम स्वर्गस्त्री । अथ[4] च तिलपुष्पादप्युत्तमा । [5]अस्या ऊर्वोः सृष्टिः रम्भा नामाऽप्सरसः । अथ च कदली । अतो युक्तम् इयम् अनेकाप्सरसोमयी[6] ।।९२।।

रम्भाऽपि किं चिह्नयति प्रकाण्डं न चात्मनः स्वेन न चैतदूरू ।
स्वस्यैव येनोपरि सा ददाना पत्राणि जागर्त्यनयोर्भ्रमेण ।।९३।।

[1]रम्भापीत्यादि । रम्भाऽपि कदली किमात्मनः प्रकाण्डं स्तम्भखण्डं न चिह्नयति[2] चिह्नं नोपलक्षयति । तथा स्वेनाऽऽत्मना च एतस्या अहम् ऊरू इति च न चिह्नयति किम् ?। [3]येन सा रम्भा [4]अनयोरूर्वोर्भ्रमेण भ्रान्त्या स्वस्यैवोपरि पत्राणि ददाना सती जागर्ति स्फुरति । पत्रावलम्बनं किल वादिन उपरिदीयते । रम्भायाश्चेति विस्मृतम् ।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

यदहमेव ऊरुः । ततश्च [5]ऊरुभ्रान्त्या [6]कदली स्वोपरि [7]पत्राणि [8]ददाति । अथ च कदल्याः पत्राणि उपरि भवन्ति । उपरिशब्दस्य[9] छलम्[10] ।।९३।।

विधाय मूर्धानमधश्चरं[1] चेन्मुञ्चेत्तपोभिः स्वमसारभावम् ।
जाड्यं च नाञ्चेत् कदली बलीयस्तदा यदि स्यादिदमूरुचारुः ।।९४।।

[2]विधायेत्यादि । चेत् यदि कदली अधश्चरं मूर्धानं विधाय तपोभिः स्वमसारभावं [3]निःसारभावं मुञ्चेत् । तथा यदि बलीयः प्रबलं जाड्यं [4]जडत्वं शैत्यं न अञ्चेत् न प्राप्नुयात् । तदा यदि इदमूरुचारुः स्यात् । अस्या ऊरू इदमूरू तद्वत् चारुः[5] चार्वी कदली यदि कथञ्चित् स्यात् । एतदूरू [6]संसारे [7]निरन्तरशीतलत्वलक्षणजडत्वरहिते च । यः किल गाढं तपः कुरुते, स उपरिचरणः [8]अधोमस्तकः तपस्यति[9] ।।९४।।

ऊरुप्रकाण्डेन खलु प्रियायाः करः पराजीयत वारणीयः ।
युक्तं ह्रिया कुण्डलनच्छलेन गोपायति स्वं मुखपुष्करं सः ।।९५।।

[1]ऊरुप्रकाण्डेनेत्यादि । खलु प्रियायाः ऊरुप्रकाण्डेन ऊरुदण्डेन [2]वारणस्य हस्तिनः [3]अयं वारणीयः करः शुण्डादण्डः पराजीयत[4] । अथ वारयतीति वारणः तत्सम्बन्धी [5]वृद्धाच्छ (पा॰ IV. ii. 114) इति छप्रत्ययः । ईय्[6] । ततो युक्तं स करः स्वं [7]स्वं [8]मुखपुष्करम् अग्रं ह्रिया लज्जया गोपायति रक्षति । न दर्शयति । केन ?। कुण्डलनच्छलेन[9] ।।९५।।

अस्यां मुनीनामपि मोहमूहे भृगुर्महान्यत्कुचशैलशीली ।
[1]नानारदाह्लादि मुखं श्रितोरुर्व्यासो महाभारतसर्गयोग्यः ।।९६।।

[2]अस्यामित्यादि । [3]अहमस्यां विषये मुनीनामपि मोहमूहे वितर्कयामि । मुनयोऽपि मूढाः । यस्याः कुचौ एव शैलौ तौ शीलयते सेवते । महान् [4]भृगुर्महात्मा भृगुर्मुनिः ।[5] अथ च भृगुस्तटं कुचौ परिचिनोति । [6]महान् तत्सदृशत्वात् । मुखं न अनारदाह्लादि[7] । अपि तु नारदं मुनिमाह्लादयति । अथ च नानाप्रकारै रदैर्दन्तैराह्लादयति । व्यासः श्रीकृष्णद्वैपायनः श्रिते ऊरू येन स तथा । किंभूतः ?। श्रीमहाभारतस्य सर्गयोग्यः । अथ च व्यासो विस्तारः श्रितोरुः । किंभूतः ?। महाभा[8]

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

महती भा दीप्तिर्यस्य स महाभाः। तथा रतसर्गस्य सुरतप्रवृत्ते-र्योग्यः[9] ।।६६।।

क्रमोद्गता पीवरताधिजङ्घं वृक्षाधिरूढं विदुषी किमस्याः।
अपि भ्रमीभङ्गिभिरावृताङ्गं वासो लतावेष्टितकप्रवीणम् ।।६७।।

[1]क्रमोद्गतेत्यादि। किम् [2]अस्या अधिजङ्घं क्रमेण उद्गता[3] ऊर्ध्वं [4]गता [5]अधिजङ्घं कृता क्रमेण कृतवेष्टना च पीवरता वृक्षाधिरूढं [6]नामाऽऽलिङ्गनविशेषः तद्विदुषी। किं [7]तज्जानाति। वृक्षोऽपि लतयाऽ-क्रान्तो [8]वेष्टितश्चाधिरूढो भवति। [9]तथा वासो वस्त्रमपि। लतावेष्टितकं नामाऽऽलिङ्गनम् तत्र[10] प्रवीणम्। किं भूतम्?। भ्रमीभङ्गिभिरावृताङ्गम्। यथा लता भ्रमन्ती-भ्रमन्ती वृक्षं वेष्टयति। सादृशम् आलिङ्गनम्। वासोऽपि भ्रमीभिर्गात्रं वेष्टयति। देशविदेशेषु तथा परिधीयते वस्त्रं लतावेष्टितमिव[11] ।।६७।।

अरुन्धतीकामपुरन्ध्रिलक्ष्मीजम्भद्विषद्दारनवाम्बिकानाम्।
चतुर्दशीयं [1]तदिहोचितैव गुल्फद्वयाप्ता यददृश्यसिद्धिः ।।६८।।

अरुन्धतीत्यादि। इयं अरुन्धत्याः कामपुरन्ध्रेः रतेः लक्ष्म्याश्च जम्भद्विषतो दाराः [2]इन्द्राणी तथा[3] [4]नवाम्बिकास्तासां सर्वासां दुर्गाणां च इयं चतुर्दशी चतुर्दशानां पूरणी। [5]त्रयोदश एताः स्त्रियः। एतासां [6]सकलगुणैरियं सदृशी। तदिहाऽस्यां विषये उचिता एव अदृश्यसिद्धिः यत् गुल्फद्वयेन आप्ता। गुल्फौ मग्नौ वर्णनीयौ। [7]अतश्च न[8] दृश्यौ। चतुर्दश्यां किलाऽदृश्यसिद्धिः साधकानाम्[9] ।।६८।।

अस्याः पदौ चारुतया महान्तावपेक्ष्य सौक्ष्म्याल्लवभावभाजः।
जाता प्रवालस्य महीरुहाणां जानीमहे पल्लवशब्दसिद्धिः[1] ।।६९।।

[2]अस्याः पदावित्यादि। वयं जानीमहे महीरुहाणां वृक्षाणां प्रवालस्य पल्लव इति शब्दस्य सिद्धिः प्राप्तिर्जाता। लब्धिरिति पाठान्तरम्। किं भूतस्य?। अस्याः [3]चारुतया महान्तौ [4]पदौ चरणा-वपेक्ष्य लवभावं लेशभावं भजते। [5]कस्मात्[6]?। सौक्ष्म्यात्। [7]पदो लवः पल्लवः। दमयन्तीचरणलेशमात्रमल्पत्वेन सूक्ष्मत्वम्[8] ।।६९।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

जगद्वधूमूर्द्धसु रूपदर्पाद्यदेतयाऽदायि[1] पदारविन्दम् ।
तत्सान्द्रसिन्दूरपरागरागैर्ध्रुवं प्रवालप्रबलारुणं तत् ।।१००।।

[2]जगदित्यादि । यत् एतया जगतो[3] वधूनां मूर्द्धसु [4]पदारविन्दं रूपस्य दर्पाद् अदायि तत्तस्मात्कारणात्तेषां वधूमस्तकानां सान्द्रैः सीमन्तसिन्दूर[5]—परागस्य रागैः तत्पदद्वयं प्रवालवत् प्रबलं[6] गाढमरुणम्[7] ।।१००।।

रुषाऽरुणा सर्वगुणैर्जयन्त्या भैम्याः पदं श्रीः स्म विधेर्वृणीते ।
ध्रुवं स तामच्छलयद्यतः सा भृशारुणैतत्पदभाग्विभाति ।।१०१।।

[1]रुषेत्यादि । भैम्याः पदं स्थानं विधेः सकाशात् रुषा[2] अरुणा सती श्रीर्लक्ष्मीर्वृणीते स्म । [3]दमयन्त्या अतिसुन्दरीत्वात् । श्रियः कोपः मां[4] भैमीस्थाने कुरु । स ब्रह्मा ध्रुवं तां श्रियम् अच्छलयत् । यतः कारणान् सा श्रीर्भृशारुणं यत् एतस्याः पदं चरणः [5]तं भजते एवंविधा विभाति[6] । अथ [7]च भृशारुणा एतत्पदभागिति भिन्ने पदे, तया अरुणया सत्या पदं स्थानं याचितम् । ततः स्थानं न दत्तं, चरणो दत्तः छलेन[8] ।।१०१।।

यानेन तन्व्या जितदन्तिनाथौ पादाब्जराजौ परिशुद्धपार्ष्णी ।
जाने न शुश्रूषयितुं स्वमिच्छू नतेन मूर्ध्ना कतरस्य राज्ञः ।।१०२।।

[1]यानेनेत्यादि । अहमिति न जाने । यत् तन्व्याः [2]पादावेवाऽब्जराजौ पदसम्राजौ कतरस्य राज्ञः [3]मूर्ध्ना स्वमात्मानं शुश्रूषयितुमिच्छू । अस्याः पदयोः को राजा पतिष्यतीति न[4] जाने । किं भूतौ ?। यानेन गमनेन कृत्वा जितो दन्तिनाथो[5] याभ्यां तौ तथा । गजपतित्वात् । तथा परिशुद्धे पार्ष्णी ययोः तौ तथा । अथ च यो राज्ञा यानेनैव प्रयाणेन[6] दन्तिनाथं गजपतिं[7] राजानं जयति, तथा प्रयाणे परिशोधितः वशीकृतः पार्ष्णिभूतो राजा येन, स कश्चिद्राजानं स्वचरणयोः [8]पातयितुमिच्छति । तन्न ज्ञायते[9] ।।१०२।।

कर्णाक्षिदन्तच्छदबाहुपाणिपादादिनः स्वाखिलतुल्यजेतुः ।
उद्वेगभागद्वयताभिमानादिहैव वेधा व्यधित द्वितीयम् ।।१०३।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]कर्णाक्षीत्यादि । वेधा:[2] कर्णस्याऽक्ष्ण:[3] दन्तच्छदस्य ओष्ठस्य[4] बाहो: पाणे [5]पादस्य च इत्येवमादेरवयवस्य द्वितीयं वस्तु कर्णादिकं [6]पश्चाद्व्यधित । किंभूत: ?। अद्वयताया: अभिमानात् उद्वेगभाक् । यथा [7]यथा एतेषां सौन्दर्याद्वैताहङ्कार:, तथा तथा ब्रह्मणो महानुद्वेग: । तत इहैवास्यां[8] दमयन्त्यां तस्य तस्य द्वितीयमकृत । किं विशिष्टस्य ?। [9]स्वस्याऽऽत्मनोऽखिलं [10]तुल्यं पद्मादिकं तत् जेतु: जयनशीलस्य कर्णादे:[11] ।।१०३।।

तुषारनि:शेषितमब्जसर्गं विधातुकामस्य पुनर्विधातु: ।
पञ्चस्विहाऽस्याङ्घ्रिकरेष्वभिख्याभिक्षाऽधुना माधुकरीसदृक्षा ।।१०४।।

[1]तुषारनि:शेषितमित्यादि । अधुना विधातु: तुषारेण हिमेन नि:शेषितं [2]दग्धम् अब्जानां कमलानां सर्गं सृष्टिं पुनरपि विधातुकामस्य पञ्चसु आस्ये अङ्घ्र्यो: करयोश्च विषये या [3]अभिख्याया: [4]कान्ते: भिक्षा[5] याच्या सा माधुकरी नाम पञ्चगृहभिक्षा संन्यासिनां, तस्या: सदृक्षा[6] यथा मधुकर: पुष्पेषु रसं गृह्णाति, तथा अपीड्यन [7]यति: भिक्षामादत्ते[8] ।।१०४।।

एष्यन्ति यावद्गणनाद्दिगन्तान्नृपा: स्मरार्त्ता: शरणे प्रवेष्टुम् ।
इमे पदाब्जे विधिनाऽपि सृष्टास्तावत्य एवाऽङ्गुलयोऽत्र रेखा: ।।१०५।।

एष्यन्तीत्यादि । विधिना[1] अपि तु वितर्के । तावत्य एव अङ्गुलयो रेखा: किं सृष्टा: यावद्गणनात् यावत्सङ्ख्यात् दिगन्तात्[2] स्मरेण आर्त्ता: [3]सन्तो नृपा इमे पदाब्जे द्वे अपि चरणकमले [4]शरणे प्रवेष्टुमेष्यन्ति ।[5] दश दिशां[6] दशाऽङ्गुलय एव अत्र रेखा:[7] ।।१०५।।

प्रियानखीभूतवतो यदेदं व्यधाद्विधि: साधुदशत्वमिन्दो: ।
एतत्पदच्छद्मसरागपद्मसौभाग्यभाग्यं कथमन्यथा स्यात् ।।१०६।।

प्रियेत्यादि । विधिर्यदा प्रियाया: नखीभूतवत् इन्दो: साधु सम्यक् दशत्वं[1] व्यधात् । [2]इत्थं साध्वी दशाऽवस्था यस्य स साधुदश: तस्य भावस्तत्त्वं व्यधात् । रुचिरावस्थात्वं व्यधात् । साधुशब्दत्वमित्यावृत्या[3] व्याख्येयम् । यदेदमिति च पूर्ववाक्ये यदाशब्द: [4]तदपेक्षया उत्तरवाक्ये इदं शब्द: । [5]मुदेदमिति पाठे[6] दैवरक्ता: किंशुका: । [7]कथमन्यथाऽस्य

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

एतस्याः पदयोच्छद्मना यत् सरागं पद्मं तत्र सौभाग्यं [8]प्रीतिस्तस्य भाग्यम्। इन्दोः पद्मेन सह प्रीतिः। एतत् साधुदशाभावे कुतः ?।[9] ।।१०६।।[10]

यशः पदाङ्गुष्ठनखौ मुखं च बिभर्ति पूर्णेन्दुचतुष्टयं या।
कलाचतुःषष्टिरुपैतु वासं तस्यां कथं सुभ्रुवि नाम नास्याम् ।।१०७।।

यश इत्यादि। या यशश्चन्द्रं [1]पदाङ्गुष्ठनखौ चन्द्रौ मुखं चन्द्रम् इत्थं पूर्णेन्दुं च चतुष्टयं च बिभर्ति। तस्यां सुभ्रुवि कथं नाम कलानां चतुःषष्टिः [2]कलाचतुःषष्टिर्वासं न उपैतु। एकैकस्मिन् चन्द्रे षोडश कलाः। अथ च कला नृत्यगीतादिकाः वात्स्यायनीयकामशास्त्रे [3]सांप्रयोगिके द्वितीयेऽधिकरणे प्रथमाध्याये [4]प्रमाणभावकालेभ्यो रतमवस्थाप्य कालस्वरूपाभ्यां प्रीतिं व्यवस्थाप्य तत् व्यतिरेकेण [5]अन्यांश्च प्रीतिविशेषानुक्त्वा संप्रयोगाङ्गमित्यादिना द्वितीयाध्यायादौ [6]निर्दिश्य पाञ्चालिकी चतुःषष्टिरुक्ता। साधारणे च प्रथमेऽधिकरणे विद्यासमुद्देशे तृतीये प्रकरणे तृतीयाध्याये प्रपञ्चितमिदम्। शास्त्रान्तरे च[7] चतुःषष्टिर्मूलकला उक्ताः।

तत्र कर्माश्रयाश्चतुर्विंशतिस्तद्यथा-नृत्यं, गीतं, वाद्यं[8], लिपिज्ञानं, वचनकौशलं, चित्रविधिः पुस्तकर्म, पत्रच्छेद्यं, माल्यविधिः[9], आस्वाद्यविधानं, रत्नपरीक्षा[10], सीव्यं, [11]रञ्जनज्ञानम्, उपकरणक्रिया, [मानविधिः], आजीवज्ञानं, तिर्यग्योनिचिकित्सितं मायाकृतं पाखण्डिसमयज्ञानं क्रीडाकौशल[12] [लोकज्ञानं], वैचक्षण्यं, संवाहनं[13], शरीरसंस्कारः [विशेष] कौशलं[14] चेति। [15]द्यूताश्रया विंशतिश्चेति। तत्र निर्जीवाः पञ्चदश तद्यथा-[16]आयुःप्राप्तिः, अक्षविधानं, रूपसङ्ख्या, क्रियामार्गम्[17], बीजग्रहणं, नयज्ञानं, करणादानं, चित्राचित्रविधिः, गूढराशिः, तुल्याभिहारः, क्षिप्रग्रहणम्, [18]अनुप्राप्तिलेखास्मृतिः[19] अग्निक्रमः, छलव्यामोहनं, ग्रहणादानश्चेति। सजीवाः पञ्च तद्यथा-उपस्थानविधिः, युद्धं, [20]रुतं, गतं, नृत्तं चेति। शयनोपचारिका षोडश तद्यथा-पुरुषभावग्रहणं, स्वरागप्रकाशनं, [प्रत्यङ्गदानं], नखदन्तयोर्विचारौ, नीवीस्रंसनं, गुह्य[स्य सं]स्पर्शानुलोम्यं, परमार्थकौशलं, हर्षणं, समानार्थताकृतार्थता अनुप्रोत्साहनं, मृदुक्रोधप्रवर्तनं, [सम्यक्क्रोधनिवर्त्तनं], क्रुद्धप्रसादनं, [21]सुप्तपरित्यागः, चरमस्वापविधिः, गुह्यगूहनमिति। चतस्रः

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

उत्तरकलाः यथा-साश्रुपातं रमणस्य शापनं, [22]स्वशपथक्रिया, प्रस्थितानुगमनं, [पुनः] पुनर्निरीक्षणं चेति चतुःषष्टिर्मूलकला[:]। [23]आस्वेवाऽन्तरनिविष्टानाम् अन्तरकलानाम् अष्टादशाधिकानि पञ्चशतान्युक्तानि (वा° का° सू° I. iii.)[24] ।।१०७।।[25]

सृष्टाऽतिविश्वा विधिनैव तावत्तस्याऽपि नीतोपरि यौवनेन ।
वैदग्ध्यमध्याप्य मनोभुवेयमवापिता वाक्पथपारमेव ।।१०८।।

[1]सृष्टेत्यादि। तावत् विधिनैव इयं दमयन्ती विश्वमतिक्रान्ता [2]अतिविश्वा सृष्टा। यौवनेन तस्याऽपि विश्वजयस्याऽपि उपरि सौन्दर्यान्नीता[3]। [4]अमुना मनोभुवा इयं वैदग्ध्यं दक्षतामध्याप्य वाक्पथस्य प[ा]रमेव अवापिता। सौन्दर्ये वचनस्याऽविषयमेव गमिता[5] ।।१०८।।[6]

इति स चिकुरादारभ्यैनां नखावधि वर्णयन्
हरिणरमणीनेत्रां चित्राम्बुधौ त्तरदन्तरः ।
हृदयभरणोद्वेलानन्दः सखीवृतभीमजा-
नयनविषयीभावे भावं बभार भुवो विभुः ।।१०९।।

इति स इत्यादि। स भुवो विभुः सखीवृताया भीमजाया नयनविषयीभावे भावम् अभिप्रायं बभार[1]। दमयन्ती मां पश्यतु इति भावं दध्रे। किं कुर्वन् ?। एनां [2]हरिणरमणीनेत्राम्। [3]सप्तम्युपमानपूर्वस्योत्तरपदलोपश्च (वा° under पा° II. ii. 24) इति बहुव्रीहिरुत्तरपदलोपश्च। इति चिकुरात् केशात् आरभ्य नखावधि वर्णयन्। किं भूतः ?। चित्राम्बुधौ आश्चर्यसमुद्रे[4]तरत् अन्तरं यस्य स तथा। पुनः किं भूतः ?। हृदयभरणेन उद्वेलः [6]अमर्याद आनन्दो यस्य स तथा। आनन्दो [7]हृदयं भृत्वा उद्वेलितः। इत्यानन्दाङ्कम्। हरिणरमणीत्युपक्षेपेण[8] [9]हरिणीवृत्तमपि[10] सूच्यते[11] ।।१०९।।

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
गौडोर्वीशकुलप्रशस्तिभणितिभ्रातर्ययं तन्महा-
काव्ये चारुणि नैषधीयचरिते सर्गोऽगमत्सप्तमः ।।११०।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

श्रीहर्षमित्यादि । तस्य [1]कवेर्महाकाव्ये सप्तमः सर्गोऽगमत् समाप्तः । किं भूते ?। गौडोर्वीशस्य [2]गौडदेशनृपतेः कुलस्य [3]या प्रशस्ति-वर्णना [4]तत्र या भणितिरुक्तिः तस्याः भ्रातरि । साऽपि प्रशस्तिरनेन कृतेत्यर्थः ।।११०।।

इति [1]धवलकवास्तव्य-महापण्डित श्रीचाण्डूविरचितायां नैषधदीपिकायां टीकायां सप्तमः [2]सर्गः [3]समाप्तः ।।७।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

टिप्पण

सर्ग—७

1 B इदानीं सप्तमः सर्गः प्रारभ्यते । and om. पूर्वसर्गे.........प्रति (VII. 2) 2 P1 नलेन 3 P2 om. °पुर° 4 P2 om. इन्द्रदूत्योपलक्षणेन

1 P1 अथ । 2 P1 राजपुत्र्यां दमयन्त्यां 3 P1 om. विलोकनेनैव 4 P1 om. प्रायः.........तत्पुरुष° 5 P2 om. अत्र 6 P1 om. न 7 P2 om. पल्लवित°.........भवेत् 8 P1 om. च 9 P1 add. अत्र हीनं विलोकनम् आसादनशीलनादिमनोरथपूर्णतालक्षणं गुरुकार्यकारीति, विपुलेन सागरशयस्य कुक्षिणे (का° प्र° X. 541) त्यादिवद्विषमः उपजातिवृत्तम् । उपमा च ।।१।।

1 B प्रतीकमिति ।; P1 प्रति । 2 B नलस्य 3 P1P2 om. दृष्टी 4 P1P2 om. पूर्वं 5 B प्रियायां विषये aft. पश्चात् 6 B प्रत्यङ्गम् अङ्गमङ्गं प्रति 7 B आनन्दसुधासमुद्रे अन्तरा मध्ये ममज्जतुः 8 B तदनन्तरं 9 P1P2 om. यः 10 P1P2 तदनन्तरम् ।।२।।

1 P1 ब्रह्मा ।; P2 ब्रह्माद्वयस्येति ।। 2 B om. एव अग्रे; P1 om. अग्रभागे एव अग्रे 3 P1P2 om. विषये 4 B दृशोर्यो 5 P1P2 om. °निरीक्षणात् 6 B अस्या 7 P1P2 om. तन्मयत्वात् but add. तथा 8 P2 अन्वभूत् 9 P2 औचित्यम् औचिती 10 B यो देशः 11 B °द्वैतानां 12 B महानन्दो 13 P1P2 om. अनुभवात्; B om. तावान् 14 P2 om. सर्वे.........अत इत्थं य° 15 P1 °दर्शने 16 P1 om. अद्वैत° and ब्रह्मानन्द.........एव दृष्टे 17 P1 add. एतस्यैं[वा]नन्द[स्या]न्यानि भूतानि मात्रामुपजीवयन्ती(बृ° IV. iii. 32)ति श्रुतेः समस्तानन्दाश्रयस्य ब्रह्मानन्द द्वैतस्य महत्त्वे तदपेक्षया तनोरपि । स्मराद्वैतानन्दस्य महीयस्त्वमित्यधिकम् । द्वितीयव्याख्याने तु रोमाग्रमात्रनिरीक्षणकारे स्वल्पब्रह्मानन्दानुभवस्य गुरुत्वमिति विषममेव । पूर्वव्याख्याने विषममधिकं च । अनुप्रासोऽपि ।।३।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 वेला ।; P2 वेलामतिक्रम्येति । 2 P1 add. मुखेन्दोरारभ्य पदपर्यन्तं दमयन्तीदर्शनं समासेन प्रक्रमे; P2 अस्याः 3 P1 प्रवृद्धे; P2 ववृधे 4 P1P2 om. सति 5 B om. किं कृत्वा 6 B om. पृथु 7 P1 add. सति 8 P1 add. श्लेषो रूपकमतिशयोक्तिश्च ।।४।।

1 B मुग्धा सुधाया°; P1 मग्ना ।; P2 मग्ना सुधायामिति । 2 P1 कथं भूतम् ?। 3 B om. पतनात् 4 P2 add. इति 5 P2 स्थिरं 6 B om. अतश्च............लग्ना स्थिता 7 B °तासीत् 8 P2 यतः 9 P1 om. तत् 10 B तदव° 11 B पद° 12 P1 om. अधिक° 13 B तथाऽपि 14 B °दुदरमध्ये; P1 तन्मध्यं तदुदरमथापि 15 B om. भयात् 16 P1 add अनुप्रास उत्प्रेक्षा रूपकं च हेतुरपि ।।५।।

1 P1 प्रियाङ्गेत्यादि ।; P2 प्रियाङ्गपान्थीति । 2 B add. तस्य 3 B णमिति 4 P1 om. यो 5 P1 om. तमः 6 P1 add. रूपकमुत्प्रेक्षा ।।६।।

1 P1 विभ्रम्य । 2 B om. ऊरू 3 P1 om. तौ 4 P1 add. अनुप्रासो रूपकमुत्प्रेक्षा पर्यायश्च । करेणेति श्लिष्टम् ।।७।।

1 P1 वासः ।; P2 वासः परमिति । 2 B P2 दृष्टिः aft. पयात 3 B P1 पादयोः 4 P1 इति किम् ?। 5 P1 add. अहम् 6 P1 om. तु 7 P1 om. अपि 8 P2 add. मया 9 P2 om. यथा............आलिङ्गतु । 10 P1 om. नेत्रस्य 11 B om. नितम्बोरु at both the places 12 P1 उरःप्रभृतिकम् 13 B om. कर्त्तरि 14 P1 add. उत्प्रेक्षाऽनुमानपि । नेत्रं पपातेति श्लिष्टम् । पदयोः पपात वा प्रणता च ।।८।।

1 P1 दृशो ।; P2 दृशोर्यथाकाममिति । 2 P2 om. नयनयोः 3 P1 add. अनुप्रासः समुच्चयोऽपि । प्रेयस्यालिकुलयोः प्रमोदाद्भुताभ्यां चेति क्रमेण समन्वयस्तदा यथासङ्ख्यमपि ।।९।।

1 P1 पदे विधातुः ।; P2 पदे विधातुरिति । 2 B P2 अद्‌भुतं 3 P1 घटते 4 P2 अपिः 5 P1 घटते 6 P1 मनोरथस्य 7 P2 तथा 8 B om. न; P1 घटते न 9 P1 add. अनुप्रासोऽतिशयोक्तिः ।।१०।।

1 P1 तरं ।; P2 तरङ्गिणीति । 2 P1 भूभृतो 3 P1 add. प्रभूता 4 P1P2 शृङ्गाररसस्य 5 P2 अस्यां 6 B गर्जना 7 B P2 om. अथवा.... ....इत्युपादानम् 8 B यथा 9 P1 प्रसूता या 10 P1 घनेन here and add. मेघेन 11 P1 add. च । रूपकमतिशयोक्तिश्च । श्लेषोऽपि ।।११।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 अस्यां ।; P2 अस्यां वपुरिति । 2 P2 तरां 3 P1 प्रत्यङ्गसङ्गेन 4 B om. अस्यां..............साधनत्वम्; P2 om. अस्यां द्योतितायां 5 P2 °विद्यायाः साध्यत्वं 6 B यस्य 7 P1 add. नवामवाप्ता यामिति पाठे लावण्यसीमा अस्यां नवामवाप्तां वपुर्व्यूहविधानविद्यां किं प्रकटीचकार । यत् लावण्यसीमा इमां दमयन्तीमुपास्ते । कीदृगित्याह-प्रत्यङ्गसङ्गस्फुटलब्धभूमा-इदं विद्याप्रकटनविशेषणं दमयन्त्यां वपुर्व्यूहविधानविद्यां द्योतयामासेति लावण्यसीमामुपास्त इति वचनम् । अनुमानमनुप्रासश्च ।।१२।।

1 P1 जम्बाल । 2 B om. फलरसनद्या 3 P2 add. अपि त्वाकृष्टा 4 P1 किं भूतेन ?। 5 P1 add. हरिद्राखण्डं वा लक्षण्या 6 B यतः 7 P1 om. अत्र 8 P1P2 om. दमयन्त्यां 9 P1P2 °संयोगः 10 P1 add. यत् 11 P1 add. अनुप्रासोऽनुमानं च ।।१३।।

1 P1 सत्ये ।; P2 सत्येव साम्य इति । 2 P2 om. सदृशात् 3 P1 om. चन्द्र 4 P1P2 °पलादिवस्तुनः 5 B विशेषकादङ्गान्तरत्वमात्रेण सौरभ्यादिना 6 P1 साधारणेनैव 7 P2 तत् 8 B om. तत्............... °दुत्कृष्टं भवति 9 P1P2 कालकालाः 10 B ह्रियते 11 P1 अपि 12 P1 add. उपमाया अपमान इति वा 13 P1 om. प्रसिद्धम् 14 P1 add. अनुप्रासः प्रतीपं च ।।१४।।

1 P1 पुरा ।; P2 पुराकृतीति । 2 P1P2 om. ब्रह्मणः 3 B पुराकृतः 4 P1 अभूत् हस्तोलको बभूव 5 B om. पुराकृतस्त्रैणेति पाठान्तरम्; P1 यतः स्त्रैणेति 6 P2 भविष्यानां 7 P1P2 om. तज्जयजं 8 P1 add. अनुप्रासः उत्प्रेक्षा च ।।१५।।

1 P1 भव्या ।; P2 भव्यानि हानीति । 2 P1P2 om. एतदङ्गात् 3 P1P2 om. दमयन्त्या 4 B यथा once 5 B तथा once 6 B तस्य 7 P1 उपमाय 8 P1P2 om. उपमां कृत्वा 9 B om. हीनस्य 10 P1 add. हानिगमनवर्तनविरोधैः क्रिययोः । काव्यलिङ्गानुप्रासोऽपि ।।१६।।

१ P1 नास्पर्शि ।; P2 नास्पर्शीति । 2 B om. दोषैः 3 P1P2 om. भयेन 4 P1P2 om. विमोहिका 5 B विमोह° 6 P1 add. असापत्न्येनेति पाठे सपत्न्यराहित्येन 7 P1 om. पुरुषेषु; P2 पुष्पेषु 8 P1 add. काव्यलिङ्गमुत्प्रेक्षा। विरोधोऽपि ।।१७।।

1 P2 text °भूतः 2 P1 औज्झि ।; P2 औज्झीति । 3 P2 त्यक्तः । 4 B om. बीज°.........वराटकः and P1 aft. सकाशात् रम्या 4 P1 नु

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

वराटकस्येति पाठे नु इति वितर्के। 5 P2 रौक्ष्या° 6 P1 पुस्तकान्तरे 7 P1P2 भृता 8 B om. क्वचिच्च 9 P1P2 केतकविशे° 10 P1 add. अनुप्रासः तुल्ययोगिता उत्प्रेक्षा हेतुश्च ।।१८।।

1 P1 प्रत्यङ्ग ।; P2 प्रत्यङ्गमस्यामिति । 2 P1P2 om. दमयन्त्यां 3 B भूषणार्थं 4 B मेणय° 5 B धारयन्ती° 6 P1 मणीनां 7 B तत् 8 P1P2 इन्द्रधनुः 9 P1 add. इति समस्तं पदम् । मणिद्युतिर्हि इन्द्रधनुः सदृशी भवति । इन्द्रधनुश्च वज्रादुदेति । तथा च कालिदासः—प्रशमादर्चिषा-मेतदनुद्गीर्णसुरायुधम् । वृत्रस्य हन्तुः कुलिशं कुण्ठिता श्रीव लक्ष्यते (कु° II. 20) इति ।। सापह्नवोत्प्रेक्षा हेतुस्तुल्ययोगिता च समुच्चयश्च ।।१९।।

1 P1 अस्या ।; P2 अस्यां इति । 2 P1 नखान्तं केशादारभ्य 3 BP1 om. तावन्तो 4 P2 यस्य 5 P2 अप्यस्य 6 P1 कलापस्य 7 B स्थानम् 8 P2 अथ च 9 P1 add. युक्तम् । साम्प्रतमिति स्थाने । अव्ययम् । सपक्षैकविधोरिति भाषितपुंस्कत्वात् पुंवद्भावः । प्रतीपं हेतुः । सपक्षः चन्द्रपक्षः शब्दाः श्लिष्यः । अनुप्रासो विरोधश्च ।।२०।।

1 P1 अस्या ।; P2 अस्या इति । 2 P1 तिरश्चि 3 B भङ्गि 4 B केशा° 5 P1 add. अथ च यस्तिरस्क्रियते स वध्यते । अनुप्रासो रूपक-मपह्नुतिर्बद्धमिति श्लिष्टम् ।।२१।।

1 P1 अस्याः ।; P2 अस्या इति । 2 B om. कलापः 3 B कलापौ 4 P1P2 om. केशकलापभारो 5 P1P2 परस्परविरोधात् and P2 add सकाशात् 6 P1 om. नु वितर्के · 7 P2 नु here 8 P1 सृष्टिंकर्तारम् 9 P2 om. जग्मतुः 10 P1 add. अथ पश्चात् 11 B हेतुना; P2 विधिना 12 P1 om. अयं; P2 add. रम्यत्वात् 13 P1P2 °पाशः किम् । 14 B om. पुनः 15 P2 om. किम् । 16 B om. गक्ते हृस्तं 17 P1P2 om. निष्कासितः 18 B om. अथ च·········भवन्ति । 19 P1 मयूरपक्षं पिच्छे 20 P1 add. उत्प्रेक्षा प्रतीपम् अर्द्धचन्द्रमिति श्लिष्टम् ।।२२।।

1 P1 लेशा ।; P2 केशान्धकारादिति । 2 P1P2 om. साक्षाद् 3 P1 add. भालस्थले अर्द्धचन्द्रस्तिलकाकारो वा यस्याम् 4 B तथा 5 P1 add. कारणात् 6 P1 add. गुटिकादि 7 P1 add. अनुप्रासो रूपकमुत्प्रेक्षा श्लेषोऽपि ।।२३।।

1 P1 पुष्पं धनुरि ।; P2 पुष्पमिति । 2 P1P2 om. वितर्के 3 P1P2 om. कामस्य 4 P1P2 om कृष्णं 5 P1 add. श्यामीभवदिति

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

समस्तं केसरविशेषणं वा 6 P1 इव विशिष्टा 7 P1P2 om. यत्र 8 P1P2 om. केशरशेषं 9 P1P2 om. कोपेन 10 B धनुः 11 P1P2 om. ब्रह्मा 12 P1 add. अनुप्रास उत्प्रेक्षाऽतिशयोक्तिः ।।२४।।

1 P1 भ्रूभ्यां प्रियायाः ।; P2 भ्रूभ्यामिति । 2 P1P2 मनोभुवः 3 P1P2 om. कामधनुषा 4 P2 °सारश्च 5 P1 अपेक्ष्य अवेक्ष्य 6 B उपेक्ष्य 7 P1 शक्तिभान् भवति aft. सकाशात् 8 P1 add. अनुप्रासोऽतिशयोक्तिश्चानुमानं श्लेषश्च ।।२५।।

1 P1 स्मारं धनुः ।; P2 स्मारं धनुरिति । 2 P1P2 om. स्मरस्य···· स्मारं 3 P1 om. कामस्य 4 P1P2 om. तथा ; and या च विधुना here 5 P1P2 om. दमयन्त्या 6 P1 आस्यभूतेन 7 P1P2 om. लाञ्छनलेखा 8 P1P2 om. त्यक्ता 9 P1P2 तत् 10 P1 °कला° 11 P1P2 om. यत्र 12 B om. केशत्वं····भवति 13 P2 लीलया 14 P1 add. अनुप्रासोतिशयोक्तिश्चानुमानं श्लेषश्च ।।२६।

1 P1 इषुत्रये ।; P2 इषुत्रयेणेति । 2 P1P2 om. बाणत्रयेणैव 3 P1P2 om. त्रिभुवनस्य 4 P1 add. अत्र हीनेनाऽपि पुष्पमयेषु त्रयेण जगत्त्रयजयलक्षणगुरुकार्यंकारणात्, विपुलेन सागरशयस्ये (का° प्र °X. 541) त्यादिवत् विषमो रूपकमतिशयोक्तिश्च ।।२७।।

1 P1 सेयं मृदुः ।; P2 सेयं मृदुरिति । 2 P1P2 दमयन्ती मृदुः 3 P1P2 om. कामस्य 4 P1 कौसुमचापस्य; P2 कौसुमस्य चापस्य 5 P1P2 om. पुष्पमयधनुर्लता । 6 P1P2 मध्ये मुष्टिना 7 BP2 नेत्राणि दृष्टयः 8 P1 add. अथवा दर्शनान्येव । 9 P1 add. अत्र दृष्टिशब्दो नेत्रव्यापारेषु वर्तते । दर्शनपर्यायो वा । या किल शरौघवृष्टिः सा अपाङ्गेन मुच्यते । अनुप्रासो रूपकमनुमानमपि । मध्यशब्दः श्लिष्टः ।।२८।।

1 P1 आघूर्णितं ।; P2 आघूर्णितमिति । 2 P1P2 om. नेत्रकमलं 3 P1P2 om. एव 4 P1 add. रुद्रटमते 5 P1P2 om. नयनगतरोमयुक्तं 6 BP1 °गोलक° 7 P1P2 om. इन्द्र·········वत् 7 P1 add. अनुप्रासः परिकरो रूपकमुपमा व्यतिरेकोऽनन्वयश्च ।।२९।।

1 P1 कर्णौ ।; P2 कर्णोत्पलेनेति । 2 BP1P2 om. तेन; edr. add. तेन 3 P1 add. अपि तु 4 P2 om. किमपि 5 P1 add. नेत्रयोः किङ्कररूपे 6 P2 om. दासमात्रे 7 P1P2 °द्युत्या 8 P1 add. अनुप्रासो व्यतिरेकोऽतिशयोक्तिश्च । काव्यलिङ्गं वा ।।३०।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 त्वच: ।; P2 त्वच: समुत्तार्थेति । 2 P1 om. तथा 3 P1 add. सत्यां 4 P2 °कालि° 5 P1P2 om. च 6 P1 add. यथासङ्ख्यमतिशयोक्तिश्च ॥३१॥

1 P1 चकोर ।; P2 चकोरनेत्रेति । 2 P1 om. प्रयत्नै:; P1P2 om. उपक्रमै: कर्तृभि: 3 B om. चन्द्रो°.......सामान्येन 4 P1 om. हरिणानां 5 P1P2 add. उत्कर्ष: 6 P2 add. सारशब्द: पुंलिङ्ग: 7 P1P2 चरन्ति 8 P1P2 om. अथ..........°नेत्राणाममृतम् । 9 B om. नेत्राणां 10 B om. °स्थ° 11 P1 वाऽ° 12 B निष्ठ्यूतो 13 B वाचकत्वम् 14 P1P2 om. यतो........विधिनेत्यर्थ: । 15 B om. यदा 16 P1 add. इक्षुप्रभृतीनां नार: किल यन्त्रेणाऽऽप्यते । अनुप्रासो रूपकमुत्प्रेक्षाऽतिशयोक्तिश्च ॥; P2 add. here अशीतिभागो वृद्धि: स्यान्मासि मासि सम्बन्धके । वर्णक्रमाच्छतं द्वित्रिचतु:पञ्चकमन्यथा ॥ कान्तारगास्तु दशकं सामुद्रा विंशकं शतम् । दद्युर्वा स्वकृतां वृद्धिं सर्वे सर्वासु जातिषु ॥ (याज्ञ° III. 37-38) ॥ सन्ततिस्तु [पशु] स्त्रीणां रसस्याऽष्टगुणा परा । वस्त्रधान्यहिरण्यानां चतुस्त्रिद्विगुणा परा (याज्ञ° III. 39) ॥३२॥

1 P1 ऋणी ।; P2 ऋणीकृतेति । 2 B ऋण° 3 P2 om. आसीत्........गृहीता; P1 add वृद्धया 4 P1 add अर्यते स्म । ऋणम् उत्तमर्णादुद्धारत्वेन ग्रहणम् । ऋणमाधमर्ण्ये (पा° VIII. ii. 60) । 5 P2 येन 6 B om. दमयन्त्या 7 P1P2 मृगीभ्य: 8 B om. °त्रि°; P1 om. °चतु:° 9 P2 om. °षड्° 10 P1 सकला बलात्कारेण अलभ्यत अर्जिता इत्यर्थ: । 11 P2 तदुक्तम्.....°द्विगुणा परा in VII. 32. 12 B °दिशतं 13 B दद्याद्वा 14 B उक्तो वासव° 15 P1 सन्ततेस्तु 16 B कालिता 17 P1 om. तथा....इत्यर्थ: 18 P1P2 om किल 19 P2 om. बलात् 20 P1 add. अनुप्रास: सोत्प्रेक्षमनुमानं समासोक्ति: ॥३३॥

1 P1 दर्शौ ।; P2 दर्शौ किमस्या इति । 2 P1 add. हेतुगर्भं विशेषणम् 3 P1P2 om. परस्परं 4 P1P2 om. अतिशयेन 5 B विश्रान्त:; P2 विश्रान्ते: 6 P1 add. तेनाऽतिदीर्घत्वं चञ्चलं च प्रतिपादितम् । चपल: किल दीर्घमुत्प्लवमानोऽपि कूपपतनभयान्निवर्तते । उत्प्रेक्षा काव्यलिङ्गं रूप[कं] समासोक्तिश्च ॥३४॥

1 P1 केदारभाजा ॥; P2 केदारभाजेति । 2 P2 उत्पलिन्या: 3 P1 पुण्यात् कारणात् 4 P1 ततश्च 5 B पुण्या; P1 add. कारणात् 6 BP2 °कारा P1 °कारे edr. °कारौ 7 B यस्या: 8 P1 add. उत्प्रेक्षा समासोक्तिश्च ॥३५॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 नासा ।; P2 नासादसीयेति । 2 B om. कुर्वत् 3 B क्लृप्तं 4 P1P2 शेषं द्वयं 5 P1 add कुसुमायुधस्येति साभिप्रायम् । एतेन दमयन्त्याः पद्मिनीत्वमुक्तम् । तथा रतिरहस्ये-तिलकुसुमसमानां बिभ्रती नासिकां च (रतिर° I. 12) इत्यादि । रूपकमनुमानम् ।।३६।।

1 P1 बन्धूक ।; 2 B om. अधरोष्ठ°.........स्वरूपम् 3 P1 om. सन्ध्याम् 4 P2 वयः°.........भवत्वात् aft. रागश्रिया 5 P1 add. तथा ओष्ठमध्ये निम्नसन्धौ भवत्वात् । 6 P1 om. स्वं 7 P2 बन्धूकपुष्पस्य 8 P2 add. च 9 B om. अपि; P2 रक्ता च 10 P1 add उपमानं सहोक्तिः । सन्ध्या इति श्लिष्टम् । रूपकमतिशयोक्तिरनुप्रासश्च ।।३७।।

1 B om. अस्या इति । P1 अस्या । 2 B P1P2 om. मुखेन्दौ मुखचन्द्रेः edr. add. मुखेन्दौ मुखचन्द्रे 3 P1 add. पूर्वोक्तमाक्षिपति 4 P1P2 add. सा श्री 5 P1P2 add. विद्रुमे 6 P1 add. अनुप्रासो रूपकमतिशयोक्तिर्व्यतिरेक आक्षेपश्च । विद्रुम इति श्लिष्टम् ।।३८।।

1 P1 जाने ।; P2 जाने इति । 2 P1P2 om. अतिलोहितत्वात् 3 P1P2 om स्फुटं 4 B अथ 5 P1P2 यास्काचार्यः 6 P2 om. अरः 7 B add. अधरः निरुक्तत्वात् सलोपः । किन्तु ऊर्ध्वौ 8 P1 add. अधो अर इत्यधरनिर्वचनप्रसक्तस्य अधःशब्दस्य न धावती[ति] निर्वचनम् । ऊर्ध्वगतिप्रतिषिद्धेति निकृष्टत्वमित्यर्थः । 9 P1P2 यत् 10 P1 add. द्वयोः 11 P1 बिम्बाधरस्य 12 P1P2 om असमर्थानाम् 13 P1 ओष्ठस्य 14 P1 add. निकृष्टं बिम्बमिति वदन्ति । रागो लौहित्यमनुरागश्च । बिम्बस्य चेति पाठान्तरम् । रूपकव्यतिरेके भ्रान्तिमान् हेतुः । अतिरागादिति श्लिष्टम् ।; P2 add. ओष्ठं बिम्बमिति वदन्ति ।।३९।।

1 P1 मध्ये ।; P2 मध्योपेते । 2 P1P2 om. शोभेते 3 P1 om. किं विशिष्टौ ? । 4 P1P2 om. किञ्चित् 5 P1P2 om. अस्मिन् ओष्ठे 6 P1P2 om. अथवा 7 P2 om. स्वप्नदत्तेन 8 P1 add. उत्प्रेक्षा ।।४०।।

1 P2 text °लाभ° 2 P1 विद्या ।; P2 विद्येति । 3 P2 om. सन् 4 B om. तास्तथा.........भजन्ते 5 P1 add. तास्तथा 6 B om. अन्तर°.........व्याख्या 7 P1 अन्तर्लाभभाज 8 P1 add. अनुप्रास उत्प्रेक्षा हेतुश्च ।।४१।।

1 P1 सम्मुज्य ।; P2 सम्मुज्येति । 2 P1P2 om. वा 3 P1P2 मधुररसो अधरः 4 P1P2 स एव कथं 5 P1 add. अनुप्रासो विरोधश्च ।।४२।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P2 text निमिच्छ्य 2 P1 यदि प्रसादी ।; P2 यदीति । 3 B प्रसीदेति । 4 B तत: 5 P2 तस्य 6 P1 स्मितांशं 7 P2 निमिच्छ्य 8 P1 om. कौमुदीनां 9 P2 add. निजा: कौमुदी: स्मितस्योपरि उत्तार्य त्यजति । अथवा कौमुदीनां देव: तत्स्मितांशं निर्मच्छ्यं स्वं जन्म सफलं कुरुते । 10 P1 add. अतिशयोक्ति ।।४३।।

1 P1 चन्द्राधिकं ।; P2 चन्द्राधिकेति । 2 P1 add. चन्द्राधिकस्यैतन्मुखच्छायाश्चन्द्रिका: अथवा 3 P2 om. अपि 4 B om. सर्वत्र; P1 add. अत: पुर:सराणि स्रस्तानि पृषन्ति बिन्दवो द्वितीयानि यस्य उपरितन° 5 P2 om. क्षरणात् 6 B दीर्घम् आयतम् 7 P1 add. अत्र वक्ष्यमाणस्याऽपि पुर:सरस्रस्तपृषदित्यस्य व्याख्यावशात् पूर्ववच्छब्दस्य पूर्ववस्तुपरामर्शत्वम् । ताभ्यश्चन्द्रिकादिति व्याख्या । 8 P1 add. स्निग्धत्विष: शितशिखा नाऽतिदीर्घखर्वा रागस्पृश: समघना दशना: प्रशस्ता: (रतिर° IV. 1) । अनुप्रासो रूपकमतिशयोक्तिर्घनानामिति श्लिष्टम् ।।४४।।

1 P1 सेयम् ।; P2 सेयं मदेतदिति । 2 P1P2 सा इयं 3 B P1P2 om. राग°; edr. add. राग° 4 B om. द्विजैः 5 P1 add. अनुप्रासो रूपकं श्लेषश्च ।।४५।।

1 P1 राजौ ।; P2 राजौ द्विजानामिति । 2 P1 राजमुख्या दन्ता° 3 P1 यत् दन्ता: 4 P1 add. श्रोत्रियविलासं 5 B om. अप्रति°……… इत्यर्थ: ।।४६।। 6 P1 add. श्रोत्रिय: छन्दोऽधीते 7 P1 पूर्वनिपाते प्राप्ते here. 8 P2 अवैमि 9 P1 add. पूग: क्रमुकद्रू(गू)वाकौ तस्योद्वेग:(गं) पुन: फलम् (अ° चि° IV. 220) । 10 P2 श्रोत्रिया: 11 P1 किं 12 P1 om. प्रारब्धात् 13 P1 ब्रह्मभावनया यत्तस्मिन् काल एव 14 P1 om. अवदाता: 15 P1 यावताऽपि 16 P1 संपत्स्यते 17 P1 add. अनुप्रासो निदर्शना रूपकं श्लेषश्च समासोक्ति: ।।४६।।

1 P1 शिरी ।; P2 शिरीषेति । 2 P1P2 om. ब्रह्मा 3 P1P2 om. दमयन्ती 4 P1P2 om. निर्माय 5 P1 सुकोमल° 6 P1P2 om. प्राप्तप्रकर्ष: 7 B तस्य; P1 om. तत्र 8 B om. पर्याप्तकल्प: 9 B P1 शरीष°; P1 शरीषपुष्पस्य; P2 °कुसुमस्य 10 P1 add. प्राप्त [प्रकर्षं] इति पाठान्तरम् । अनुप्रासोऽतिशयोक्ति: परिसङ्ख्याऽपि ।।४७।।

1 P1 प्रसू ।; P2 प्रसूनबाणेति । 2 P2 om. कामस्य 3 P1P2 om. अद्वैतं 4 P1 om. सा 5 P1P2 om. कामवेदभाव्यं 6 P1P2 om. दमयन्त्या 7 P1 °मेव 8 P1 add. वाशब्द: संभावनायाम् 9 P1

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

शिक्षते; P1P2 om. इत्यर्थः 10 P1P2 om. अपि 11 B °वादिनां 12 P1 add. अनुप्रासो रूपकं समासोक्तिर्व्यतिरेकोऽपि ।।४८।।

1 P1 पद्माङ्क ।; P2 पद्माङ्केति । 2 P1 देवी सरस्वती 3 P1 लक्ष्मीं......अवेक्ष्य here. 4 P1 स 5 B कमलं येन मुखेन न जीयते 6 P2 om. किं भूताम् ?। 7 P1P2 om. च 8 P1P2 add. ततोऽपि 9 P1 add. अनुप्रासो रूपकं समासोक्तिरुत्प्रेक्षा च ।।४६।।

1 P1 कण्ठे ।; P2 कण्ठे वसन्तीति । 2 P1P2 om. देवी 3 P1P2 om. दमयन्त्याः 4 P2 चातुरी 5 P1 वाग्रूपं 6 P1P2 om. पुरुषस्य 7 B om. वादयते............कर्मत्वम् ।।५०।। 8 P1 add. अनुप्रासोऽतिशयोक्तिश्च ।; P2 add. द्वितीया विभक्तिः ।।५०।।

1 P1 विलो ।; P2 विलोकितास्येति । 2 P1 इयं दमयन्ती here. 3 P2 om. सत्यां 4 P2 उन्नमज्य 5 P1 मुखेऽधरस्याऽधोभागे 6 P2 धरणेन 7 P1P2 om. उत्पन्ना 8 B om. पिता 9 B add. सर्वः कोऽपि । P1 add. लेपपुत्रिकादि हस्तेन निमज्य निरीक्ष्यते । तत्राऽङ्गुलियन्त्रणं भवति । अनुप्रासोऽनुमानमुत्प्रेक्षा च ।।५१।।

1 P2 text जयत्ययं 2 P1 प्रियामुखी ।; P2 प्रियामुखीति । 3 P2 add. दमयन्तीवदनं भूत्वा 4 P2 add. जयति । केन ?। 5 P1 add. सुखी सन् 6 P1 add. जयति 7 P1 om. चन्द्रस्य 8 B om. श्रोष्ठोऽपि रक्तः; P1P2 om. अन्योऽपि ......प्रभृति ।; P1 add. अनुप्रासोऽतिशयोक्तिर्व्यतिरेको निदर्शना च ।।५२।।

1 P1 अस्याः ।; P2 अस्या इति । 2 P1 add. इति काक्वा अपि तु भवति 3 B ललाटं भालः; P1 om. भालः 4 P1 add. भालोर्धम् 5 B om. आकार°.........तथा 6 P1 °कार्धेन 7 P1 add अनुप्रासो रूपकमतिशयोक्तिर्हेतुः समासोक्तिश्च ।।५३।।

1 P1 व्यध ।; P2 व्यधत्तेति । 2 P1P2 om. वेधा 3 P1P2 om. किल 4 P1 add. स्थानेऽयमर्थः । यस्य भागद्वयं चन्द्रः तस्य सम्पूर्णस्य चन्द्रान्महिमा किमु वक्तव्यः । अथवा न काकुव्याख्या । पूर्णस्य मुखस्य चन्द्रजये महिमा न अस्तु । मा भवत्विति निषेध एवाऽर्थः । यतो यस्य भागद्वयेन चन्द्रस्तस्य पूर्णस्य चन्द्रजयेन को महिमा । अपि तु न कोऽपि । प्रियं दृष्ट्वा सुखं स्यादित्यादिवद्भिन्नकर्तृकतायामपि क्त्वा । अनुप्रासोऽतिशयोक्तिर्व्यतिरेकः प्रतीपं वा रूपकं च ।।५४।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 दिवा ।; P2 दिवारजन्योरिति । 2 P1 °श्चन्द्राम्बुजं 3 P1 add. च 4 P1 °देकश्रिया 5 P1 add. अनुप्रासो यथासङ्ख्यमतिशयोक्ति-र्व्यतिरेकः प्रतीपं वा ।; P2 add. भीतेरिति पाठान्तरम् ।।५५।।

1 P1 अस्या मुख ।; P2 अस्या मुखेति । 2 B om. खलु पद्मचन्द्रौ 3 P1 जल° 4 P2 om. मित्रात् 5 P1 प्रार्थितकं 6 B om. तातात् 7 P1 add. रात्रौ 8 P1P2 याचते; P1 add. याच्यया आप्तं याचितकम् । अपमित्ययाचिताभ्यां कक्कनौ (पा° IV. iv. 21) यथासङ्ख्य मुत्प्रेक्षा समासोक्तिरतिशयोक्तिश्च ।।५६।।

1 P1 अर्क ।; P2 अर्काय पत्ये इति । 2 B P2 खलु शङ्के aft. पुनः किं भूताः ?। 3 P1P2 om. विस्तारीकृताः 4 P1P2 om. करा 5 P1 स्वाविर्भावं 6 B om. श्लाघ°.........कौमारे तु 7 P1P2 om. भ्रमरैरेव 8 P1P2 om. नयनैः 9 P1 परभूषणे° 10 P1 add. अर्काय पत्ये तिष्ठ-माना इति विज्ञपयितुमुद्यता । अर्कं भैमीमुखश्रियं याचन्तीत्यन्यः । रूपकमुत्प्रेक्षा समासोक्तिश्च ।।५७।।

1 B अस्या मुखेत्यादि ।; P1 अस्याः ।; 2 P1P2 om. बलात्कारेण 3 P1 पाश आबन्धनं 4 P1 om. यतः; P2 यत्ततः 5 P2 add. यत् 6 P1 add. अनुप्रासो रूपकमुत्प्रेक्षा समासोक्तिरतिशयोक्तिश्च ।।५८।।

1 P1 विधोः; P2 यिधोर्विधिरिति । 2 B P2 अमावास्यायां 3 B om. किम् 4 B om. इमम् 5 P2 om. कुहू°...........°मुच्यते । 6 P1 add. अनुप्रासोऽतिशयोक्तिर्व्यतिरेक उत्प्रेक्षा च ।।५९।।

1 P1 कपो ।; P2 कपोलेति । 2 P1 om. पत्रवल्लीभूतात्; P2 °रूपात् 3 P1 add. भुवनानि 4 P2 परित्यक्तः 5 B कुषिरजिभ्यां 6 B om. चेति परस्मैपदम् 7 B om. अन्ये.........पठन्ति 8 P1 add रूपकमति-शयोक्ति रिति । रज्यत् मधुरशब्दः श्लिष्टः ।।६०।।

1 P1 वियोग ।; P2 वियोगेति । 2 B om. किं; P1 किं aft. कर्णौ 3 B अस्य 4 P2 रतेः 5 P1P2 om इति 6 P2 किं भूतम् ?। वियोग-बाष्पैरञ्चितं पूजितम् अङ्कितं यन्नेत्रपद्मद्वयं तस्य etc. 7 B पूपयोरपि 8 P1 om. पुष्पं 9 P1 add. अनुप्रासश्च रूपकम् ।।६१।।

1 P2 text °त्यधि° 2 P1 इहा ।; P2 इहाविशदिति । 3 P1 add. अथवा निर्झरः 4 P1P2 om. दमयन्त्याः 5 P1 श्रवसे; P2 श्रवसोः 6 P1 add. रूपकमपह्नुतिरतिशयोक्तिर्वा उपमा उत्प्रेक्षा च ।।६२।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 B अस्या यदिस्यादिदि ।; P1 अस्या ।; P2 अस्या इति । 2 P1 दमयन्त्या: 3 P1 धनुर्वेदो नाट्यवेदो 4 P2 धर्मवेदो 5 B अर्धं° P2 अर्द्धस्याऽर्द्धस्य 6 P1P2 °पर्पटस्य 7 P1 om. उत्कीर्णा 8 P1 add. अनुप्रास उत्प्रेक्षा । पूर्वश्लोकापेक्षया आक्षेपोऽपि ।।६३।।

1 P1 मन्ये ।; P2 मन्य इति । 2 P1 add. छिदुराऽदितर: तेन छिदुरेतरेण 3 P1 °तिचा° 4 P1 add. अनुप्रासोऽपह्नुतिर्व्यतिरेक: ।।६४।।

1 P1 आत्मै ।; P2 आत्मैवेति । 2 P2 om. चतुर्भुजस्य 3 P2 om. चापयो: 4 P1P2 om. कामस्य········किं भूते ?। 5 P1P2 add. यौ 6 B चिविदौ 7 P2 om तौ 8 P2 त्वक् अंशो भागो 9 P1 add. प्रान्ते 10 P1P2 om. अथवा········इति पाठ: । 11 P1 add. काव्यलिङ्ग-मुत्प्रेक्षा रूपकं च ।।६५।।

1 P1 ग्रीवाद्भु ।; P2 ग्रीवेति । 2 B किल बहु 3 B om. तथा········सुरूपतां 4 P1 ग्रीवाख्ये कार्यैकदेशे कायशब्द: । 5 P2 om. अथ च 6 P1 add. वाद्यभेद: 7 P1P2 om. अखिलोर्ध्वका 8 P1 add. न 9 B om. अन्यत् ऊर्ध्वकं 10 B om. आलिङ्गिता°···········प्रत्यय: 11 P1 add. विरोध: ।।६६।।

1 P2 text न्यधिता° 2 P1 कवि: ।; P2 कवित्वेति । 3 P1 सीमां सीममर्यादा° 4 P1P2 add. मध्ये 5 B शेहका; P1 सेठका; P2 मेढका; edr. मेठ्का 6 P1 add. अनुप्रासोऽपह्नुतिश्च ।।६७।।

1 P1 बाहू ।; P2 बाहू इति । 2 P1 भग्नमृणालस्य 3 B व्यलो° 4 B अपि अति° 5 P1 add. अनुप्रासो व्यतिरेक: समासोक्ति: श्लेषश्च ।।६८।।

1 P1 अंजीयता ।; P2 जयतेति । 2 P1 तथास्तथाविधाया:; P2 यथास्तस्य तथाविधाया: 3 B किन्तु 4 P1P2 om. अथवा········एकत्वम् । 5 P2 om. पङ्कस्य 6 P1 मूर्त्तिका° 7 P2 om. नि:सूत्रम् 8 B क्रियते 9 P1 add. अनुप्रासो व्यतिरेक उपमा रूपकं समासोक्ति: श्लेषश्च ।।६९।।

1 B this verse aft. अस्या कर° VII. 71. etc; P1 रज्य ।; P2 रज्यन्निति । 2 P1 पद्ममिव; P2 °मेव 3 P1 हस्ते तूणे 4 B P2 यत्र 5 P1 om. तस्य 6 B सौवर्ण हैम: 7 P1 om. सा 8 P1 शुद्धानि 9 P1 add. अपह्नुति[:] रूपकम् ।।७०।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P2 text °ऋद्धि° 2 P1 अस्या ।; P2 अस्याः करेति । 3 P1P2 खलु यः 4 B om. गर्द्धि°……पाठान्तरम्; P2 aft. करसाम्यं 5 P1 हस्तस्य 6 B इत्याशया 7 P1P2 बाल: 8 P1 add. अनुप्रास उत्प्रेक्षा समासोक्तिः ।।७१।।

1 P1 अस्यै ।; P2 अस्यैवेति । 2 B ब्रह्मा धाता वेधा 3 P2 हस्तीकृतया 4 P2 om. हस्तोलकीकृतया 5 B P1 om. तथा 6 B P2 दृष्टया 7 P1 add. तयेति प्रक्रान्तविषयः तच्छब्दः । उत्प्रेक्षाऽतिशयोक्तिश्च । हस्तलेखीकृतयेति श्लिष्टम् ।।७२।।

1 P1 किं नर्मदा ।; P2 किं नर्मेति । 2 P1 om. इयम्; P2 इत्थम् 3 B om लि……नद्यां किल 4 P1 बहुलता 5 P1 add. दमयन्त्याः 6 P1 om. द्वयन्त°……तीरत्वम् । 7 P1 add. अनुप्रास उत्प्रेक्षा रूपकम् । नर्मदाया इति च श्लिष्टम् ।।७३।।

1 P1 तालं ।; P2 तालमिति । 2 B तावत्……चोत्थितौ at the end. 3 B भवेत् 4 P2 उद्गमनेन 5 P1P2 °तरं 6 B च तालं 7 P1 न aft. उपमातुं 8 B P1 add. विसर्गः 9 P2 उन्नतौ तुङ्गौ 10 P1 add. पतितः पापी किल उत्थानसुस्थं धार्मिकमनुकर्तुं न प्रभुः । काव्यलिङ्गं समासोक्तिर्व्यतिरेकश्च ।।७४।।

1 P1 एतत् ।; P2 एतदिति । 2 P2 add. च 3 P1 तदेव तस्याः 4 P2 om. सकाशात् 5 B यः कोऽपि 6 B मणिवादिकारी 7 P1 add. काव्यलिङ्गमतिशयोक्तिश्च ।।७५।।

1 P2 text गुच्छालय° 2 P1 गुच्छावली ।; P2 गुच्छेति । 3 P1 माणिक्य°; P2 om. माणिक्यस्य……°गुच्छावलिसहितो 4 P1 om. प्रादुर्भवति 5 P1 add. गुच्छालयेति पाठे गुच्छालयानि 6 P1 उदस्यो° 7 P1 °संयुक्तो 8 B °बन्धो 9 P1P2 om. अपि 10 B मध्ये 11 B P2 भवन्ति 12 P1 add. उदबिन्दुवृन्दफेनिलोऽङ्कश्च । अनुप्रास उपमा श्लेषश्च ।।७६।।

1 P1 निशं ।; P2 निःशङ्केति । 2 P1 अस्या 3 P1 पद्मानि 4 P2 नवैव 5 P1 कोकयोः 6 P1 मिथुनं युग्मं 7 P1 add. अनुप्रासो रूपकं विशेषोक्तिश्च ।।७७।।

1 P1 आम्याम् ।; P2 आम्यामिति । 2 P2 om. हस्तिनः 3 P2 om लक्ष्मीः 4 B om. न तु……°दित्याह; P2 aft. हस्तिकुम्भौ and

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

add. म्यन्तं नाभ्यामिति चैकं वाचकम् अर्द्धान्तरवाक्यगतं प्रत्यक्षविषयोऽपि प्रज्ञा (?)। तत्कथं कल्पनामृत्वाऽऽशीर्वा कुचविमयं पञ्चम्यन्तं व्याचक्ष्यते। 5 P1P2 च 6 P1P2 om. अपि तु 7 P1 क्वाऽपि 8 P2 om यत् 9 P2 add. ताभ्यां कुम्भाभ्यामनयोः कुचयोरसौ श्रीः क्वाऽऽदीयते। न क्वचित्। तत्र हेतुर्भयेनेत्यादि। केचित् सा च तयोरिति पाठं पश्यन्तः सप्त। 10 P2 कुम्भाभ्यां 11 P2 om. याभ्यां.........मौक्तिकानि 12 P1 om. तौ 13 P1 इदमनुमानम् ॥७८॥

1 P1 करा।; P2 कराग्रेति। 2 P1P2 om. याचकः 3 edr. add. चेत् 4 B सामान्यं भवेत् 5 P1P2 om. स्तनाग्रो............उच्यते 6 B किल कुचयोः 7 P1 °मपि 8 B तन्नाऽस्ति; P2 नास्ति 9 P1 om. तु 10 P1 om. अथवा.........कुच° 11 P1 om. तुलयितुं 12 P1 add. अतिशयोक्तिः। शतकोटि श्रीफलमिति च श्लिष्टम् ॥७९॥

1 P1 स्तना।; P2 स्तनान्तरे इति। 2 P1P2 om. दमयन्त्याः 3 P1P2 om. अपि 4 P1 स्तनातटे 5 P2 जनस्य 6 B मदनस्य; P2 पतनस्य 7 B रेखाः 8 P1 पङ्क्लिे तटप्रदेशे 9 P1 °स्तनतटे 10 P1P2 लागो 11 P1 add. इदानीमन्तरे जाताः पर्वताः सरितो द्रुमाः। अनयोर्ग्रामयोरन्तरे तापसः प्रतिवसति। अस्मिन्नन्तरे शीतान्युदकानि इत्यादिषु मध्यवचनत्वेन प्रयुक्तोऽन्तरशब्दः। अत्र हि न तथा चमत्कारोऽस्तीति परीक्ष्यम्। स्तनातटेऽन्यत्राऽऽतटशब्देन तटमुच्यते। तदुक्तं हैमनाममालायाम्—प्रपातस्त्वतटो भृगुः (अ° चि° IV. 98)। तथा च माघः–वव्रपुर्व्वंष[नादिनो]नदीनां प्रतटारोपितवारि वारिवाहा (शिशु° XX. 70)। इतः स्तनान्तरे इति पाठे स्तनमध्ये इत्यर्थः। स तु विचार्यः। अनुप्रासोऽपह्नुतिः समासोक्तिः ॥८०॥

1 P1 क्षीणेन।; P2 क्षीणेनेति। 2 P1 add. शोभनेन 3 B P1 तत 4 P1 तस्यास्तथाविधा 5 P1 add. अप्यल्पेन and उदासीनेन aft. मध्यस्थेन 6 P1 add. कथम् अनङ्गस्य राज्यमपि भीमभुवि। 7 P1 add. उदर इत्यस्याप्यल्प इत्यर्थः। तथा च श्रुतिः–अथ तस्मिन्नुदरमन्तरं कुरुते (तै° उ° II. 7) इति। अथ एतस्मिन् ब्रह्मणि उत उदपि अरम् अल्पम् अन्तरं भेदं कुरुते इत्यर्थः। विरोधः समासोक्तिश्च ॥८१॥

1 P1 मध्यम्।; P2 मध्यमिति। 2 P1 add. कृशकृत्य 3 P2 किं भूतयोः ?। 4 B om. तस्याः 5 P1 add. अनुमानम् ॥८२॥

1 P1 गौरी।; P2 गौरीति। 2 P1 °वर्णं वपुर्वर्णविलक्षणं 3 P1 om. सूत्रं 4 P2 om. इतीव 5 P2 om. अर्द्धतन्वाः 6 B om.

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

करिष्यति…… पाठे; P2 कर्त्री करोति चेत् । कर्त्तेति पाठे कर्त्ता करिष्यति । 7 P1 यत: सुभगा here 8 P2 तत: 9 P1 add. अनुप्रास उपमा हेतुरुत्प्रेक्षा रूपकं च ॥८३॥

1 P1 रोमा ।; P2 रोमेति । 2 P2 om. व्याङ्°………°पदम् 3 P1 गुप्ति 4 B om. न 5 B °समाप्तौ 6 P1 तेषाममी 7 P1 लानगंज 8 P1 add अनुप्रासो रूपकं श्लेषश्च ॥८४॥

1 P1 उन्मूलिता ।; P2 उन्मूलितेति । 2 P2 om. मत्तस्य 3 B वासु शालासु 4 P1 त्रुटितं 5 P1 om. चरणसदृशं 6 B °दामा 7 P1 om. मृत्तिकारूपं; P2 मृत्तिकाकूटं 8 P2 om. कुचौ 9 P1 add. अनुप्रासो रूपकं च ॥८५॥

1 P2 text रोमावलि° 2 P1 रोमा ।; P2 रोमेति । 3 B °जानि: 4 B सूक्तै: 5 B स्वम्° 6 P2 om. च 7 P2 स्थाणु° 8 P2 मेलयित्वाम° 9 P2 om. द्वन्द्वश्च………निङ्प्रत्यय: । 10 P1 समासान्त: स च निङ् । त्वादन्तस्य लोपो भवति । लोपो व्योर्वली (पा° VI. i. 66) ति यलोप: । अनुप्रासो रूपकं यथासङ्ख्यं विषमो व्यतिरेकश्च ॥८६॥

1 P2 om. text & Com. 2 P1 पुष्पा । 3 B मण्डलानि 4 P1 add. मण्डनादीनां विकृतत्वम् । 5 P1 add. रूपकं विषमो व्यतिरेकश्च । केचिदिमं श्लोकं न पठन्ति ॥८७॥

1 P1 अस्या ।; P2 अस्या इति । 2 P1 om. रौप्यमयाक्षरा: 3 P2 om. विसर्ग: 4 P1 बकुल° 5 B विचि° 6 P1 °मिषात् 7 P2 भवति 8 P1 add. अनुप्रास[:]सापह्नुतिरुत्प्रेक्षा रूपकं च ॥८८॥

1 P1 चक्रेण ।; P2 चक्रेणेति । 2 P1 श्रीकृष्णस्य पितु: 3 P1 add. आयुधेन 4 B om. तु 5 P1 तत्सुतेन 6 P2 om. दुर्लभदर्शनं 7 P1 add. उत्प्रेक्षा व्यतिरेक: सुदर्शनेनेति च श्लिष्टम् ॥८९॥

1 P2 text तारुण्य° 2 P1 रोमा ।; P2 रोमेति । 3 P1P2 तारुण्य 4 P1 add. एव 5 P1 तारुण्यस्यैव 6 P1 add. रूपकमपह्नुतिरुत्प्रेक्षा । गुणमिति च श्लिष्टम् ॥९०॥

1 P1 अङ्गे ।; P2 अङ्गेनेति । 2 P1 add. वर्ण्यते । तदुक्तम्—विपुलपिप्पलपत्रसमाकृतेरवयवस्य शिरस्तलमाश्रितम् । सकलकामशिरासुखचुम्बितं निगदितं मदनातपवारणम् ॥ 3 P2 तत् 4 P2 om. अन्यवृक्षपत्रेभ्य:

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

5 edr. add. तु 6 P1 पिप्पलपत्रं विशेषतः 7 P1 add. अनुप्रासोऽनुमानं च ।।६१।।

1 P1 भ्रू शिच ।; P2 भ्रू शिचत्रेति 2 P1 यद° 3 B om. तथा° ....°प्युत्तमा; P1 add. अथवा चित्रस्य रेखा अतिसूक्ष्मा 4 P1 अपि तु 5 B तथा 6 P1 add. अनुप्रासो रूपकं श्लेषोऽतिशयोक्तिश्च ।।६२।।

1 P1 रम्भा ।; P2 रम्भापीति । 2 B om. चिह्नैर्नोपलक्षयति; P1 add. न जानाति 3 B येनेयं 4 P1 om. अनयोः 5 P2 om. ऊरु° 6 B कदल्या; P2 om. कदली........अथ च 7 P1 om. पत्राणि 8 B दत्तानि 9 P1 °शब्दश्च 10 P1 add. सोत्प्रेक्षमनुमानम् । भ्रान्तिमानतिशयोक्तिः । उपरीति श्लिष्टम् ।।६३।।

1 P2 text °मद° 2 P2 विधायेति । 3 B om. निःसारभावं 4 P1 जलत्वं 5 B P2 om. विसर्गः 6 B असारे; P1 संसारो 7 B °शीतलत्वात् च रहिते 8 P1 अधोमस्तक उपरि° 9 P1 add. अतिशयोक्तिः । रुद्रटस्योत्पाद्योपमा । अद्भुतोपमेति दण्डी ।।६४।।

1 P1 ऊरु ।; P2 ऊर्विति । 2 B वारु° 3 B P2 om. अयं वारणीयः 4 P1 add. प्रशंसावचनैश्चे (पा° II. i. 66)ति तत्पुरुषः समासः । 5 P2 om. वृद्धा°.... ..ईय् 6 P1 आयनेयीनि(नी)यिय (पा° VII. i. 2) इत्यादिना ईय् 7 P2 सं° 8 P1 °मुखस्य 9 P1 add. उत्प्रेक्षाऽपह्नुतिः समासोक्तिश्च ।।६५।।

1 P2 text °दद° 2 P1 अस्याम् ।; P2 अस्यामिति । 3 P2 अस्यां विषयेऽहं 4 B om. भृगुर्महात्मा 5 P1 add. महन् 6 P1 om. महान् 7 P1 °ह्लादयति 8 B om. महात्मा 9 P1 add. अनुप्रास उत्प्रेक्षा श्लेषश्च ।।६६।।

1 P1 क्रमो ।; P2 क्रमोद्गतेति । 2 P2 तस्या 3 P2 om. उद्गता 4 P2 गता aft. वेष्टना च 5 B om. अधि°........वेष्टना च 6 B om. नामा........°वेष्टितकं 7 P2 न 8 P2 °तत्वा° 9 P1 add. वृक्षाधिरूढमिति पाठान्तरम् । 10 B om. तत्र........आलिङ्गनम् 11 B om. लतावेष्टितमिव; P1 लतावेष्टिकम् and add. प्राकृतौ कन् । अनयोश्च लक्षणं रतिरहस्ये प्रतिपादितम् । यथा—रमणचरणमेकेनाङ्घ्रिणाऽऽक्रम्य खिन्नः श्वसितमपरपादेनाऽऽश्रयन्ती तदूरुम् । अथ निजभुजमेकं पृष्ठतोऽस्याऽपर्यन्ती पुनरपरभुजेन प्राञ्चयन्ती तदंसम् ।। रतिर° VI. 6 ।। तरुमिव कमितारं

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

चुम्बनार्थं विरोढुं यदभिलषति नारी तच्च वृक्षाधिरूढम् । प्रियमनुकृतवल्ली-विभ्रमां वेष्टयन्ती द्रुममिव सरलाङ्गी मन्दशीत्का तदीयम् ।। VI. 7 ।। वदनमुदितखेदा क्रन्दना चुम्बनार्थं नमयति विनताङ्गी यल्लतावेष्टितं तत् । VI. 5 Cd । तथा च वात्स्यायनीये कामशास्त्रे साम्प्रयोगे द्वितीयेऽधिकरणे द्वितीयाध्याये आदितः सप्तमे—चुम्बनादीनामालिङ्गनपूर्वकत्वात् प्रथमोपदेष्टे कालरूपविशिष्टेष्वालिङ्गनविचारेष्वष्टमे प्रकरणे यथा—लता शालमावेष्टते तद्वन्नायिका नायकमूर्ध्नि स्थितमभिमुखं कक्षयोर्वै कक्षयोः कण्ठे बाहुप्रतिलताभ्याम् आवेष्टते । तत्र च नायिका एव प्रयोक्त्री । अस्य च चातुर्विध्यं चुम्बनम् । अपरं च फलम् । रागजननं वर्द्धनं मौलम् । स्वेन चरणेन चरणं नायकस्याऽऽक्रम्य द्वितीयेन चरणेनोरुदेशमित्यादिद्वाभ्यां तु यदाक्रमणमूर्वोर्वेष्टनं च तदुभयमपि वृक्षार्द्धाधिरूढमत्रैवाऽन्तर्गतमि(वा° का° सू° II. ii. 1-7)त्यादि दर्शितम् । उत्प्रेक्षा श्लेषोऽपि ।।९७।।

1 P2 text °ह्रौचितीत्थं 2 P2 इन्द्राण्या 3 B P1 तस्या 4 P1P2 नवानामम्बिकानां 5 B om. त्रयोदश 6 B om. सकल° 7 P1 अथ च 8 B सदृशौ; P2 °दृशौ 9 P1 add. रूप[कं]हेतुरपि ।।९८।।

1 P2 text °लब्धिः 2 P1 अस्याः । P2 अस्या इति । 3 B om. चारुतया महान्तौ 4 B P1P2 पादौ; edr. पदौ 5 P1 add. अणुभावं 6 B सौख्यभाक् । कस्मात् ?। 7 P1 पायो 8 P1 add. पादः समानार्थः पच्छब्दः । उत्प्रेक्षाऽतिशयोक्तिश्च ।।९९।।

1 P2 text °धायि 2 P1 जगद्वधू ।; P2 जगदिति । 3 P1 जगद्वधू° 4 B P1 पादा° 5 B सिन्दूरस्य तत् only 6 B P2 प्रबालं 7 P1 add. प्रवालः पल्लवो विद्रुमश्च । अनुप्रासो हेतुरतिशयोक्तिः ।।१००।।

1 P1 रुषारुणे ।; P2 रुषेति । 2 P1 add. कोपेन 3 B दमयन्ती 4 P1 भैमीस्थाने मां 5 P1 om. तं 6 P1 भवति 7 P1 वा 8 P1 add. उत्प्रेक्षा ।।१०१।।

1 P1 याने ।; P2 याने इति । 2 B P2 पदा° 3 B P2 मूर्द्धा 4 P1 om. न 5 P1 add. विशिष्टः कश्चिद् गजः ऐरावत एव 6 P1 add. एव 7 P1 add. गौडेश्वरं 8 B पातितु° 9 P1 add. अनुप्रासो रूपकं श्लेषश्च ।।१०२।।

1 P1 कर्णा ।; P2 कर्णेति । 2 P1 om. वेधाः 3 P1 °क्ष्णोर्दन्त° 4 P2 add. च 5 P2 पदस्य 6 P1 om. पश्चात् 7 P2 om. यथा

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

8 P2 यस्यां 9 P2 om. स्वस्य 10 B P1 om. तुल्यं 11 P1 add. व्यतिरेकः काव्यलिङ्गं पर्यवसितोऽन्वयश्च ॥१०३॥

1 B तुषारविश्लेषित°; P1 तुषार ।; P2 तुषारेति । 2 B om. दग्धं 3 P2 आख्यायाः 4 P1 add. शोभायाः 5 P1 add. या 6 P1 add. यथा—काव्यभिख्या तयोरासीद् (रघु° I. 46) इति । तथा—काप्य-भिक्षा(ख्या) विरजसोः सूर्याचन्द्रमसोरभूत् । दाशरथ्योस्तथैवासीदयोगोपहता रुचिः ॥ इति च प्रयोगः । 7 B om. यतिः; P2 अति । 8 P1 add. अभिख्या नामशोभयोः (अमर° III. iii. 156) कीर्तौ च । अनुप्रास उपमा च ॥१०४॥

1 P2 विधुना 2 P2 °द्गणना यत्सङ्ख्याका दिगन्ता° 3 B सतो 4 B om. शरणे; P1 शरणं 5 B इच्छन्ति 6 P1P2 दिशः 7 P1 add. अत्र रेखा इति पाठान्तरम् । उत्प्रेक्षा ॥ 8 P2 103 ॥१०५॥

1 P1 add. दशसङ्ख्यत्वं 2 P1 om. इत्थं·······व्यधात् 3 P2 °मित्याख्येयम् 4 P1P2 तदपेक्ष्य 5 B om. मुदेद°·······किंशुकाः 6 P1 add. एकत्र वाक्ये 7 P2 add. तदा च एकवाक्यत्व(त्वे) 8 B प्रति तस्य 9 P1 add. अनुप्रासः । श्लेषोऽनुमानमतिशयोक्तिश्च । 10 P2 104.— ॥१०६॥

1 B P2 पद्मा° 2 P1 om. कलाचतुःषष्टिः 3 B om. वात्स्या°·······°न्युक्तानि ॥१०७॥; P2 om. नां° 4 P2 प्रणाम° 5 P2 कन्याश्च 6 P1 निर्विश्य 7 P1 om. च 8 P1P2 add. नाटयं 9 P1 add. गन्धयुक्तिः; P2 add. गन्धभुक्तिः 10 P2 स्त्राप्यं 11 Ori. रङ्ग° 12 P2 °कौशलकं 13 P1 संवाहकनं 14 P2 कौशल्यं 15 P2 om. द्यूताश्रया विंशतिश्चेति । 16 P1 आयः प्राप्तिः; P2 आयासस्तोर्ण्य and read रक्षाविधानं·······तद्यथा पुरुषभा° under VII. 109. 17 P1P2 विमर्शः 18 P1P2 °अन्तः प्राप्तिः 19 P1P2 °स्मृत्यनु° 20 P1P2 नसं 21 P1P2 सुप्ता° 22 P1P2 स्वयं 23 P1P2 आस्वेवं ते निर्विष्टा° 24 P1 add. अतिशयोक्तिः श्लेषश्च । 25 P2 105— ॥१०७॥

1 B स्पष्टे° 2 P2 अतिविश्वं 3 P2 °दुपनीता 4 P2 अधुना 5 P2 add. अस्याश्चानुर्य वक्तुं न शक्यते । 6 P2 106— ॥१०८॥

1 P1 add. दधार 2 B om. हरिण°·······°रुतर पदलोपश्च 3 P1 सप्तम्यु°·······°पदलोपश्च at the end. Ori. सप्तम्युपमानपूर्वपदस्य

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

बहुव्रीहिरुत्तरपदलोपश्च । 4 P2 आश्चर्ये तरत् 5 B °तरणेन- 6 B उत्कृष्ट 7 P1 हृदये 8 B °रमणीयरुहप° 9 P2 हरिणीय प्राप्तिः and add. portion of VII. 107 10 P2 °वृत्तमित्यपि 11 P1 add. अनुप्रास उपमाऽतिशयोक्तिश्च ॥१०६॥

1 B काव्ये 2 P2 om. गौडदेश° 3 B यावत् 4 B तयात्र — ॥११०॥

1 P1 om. धवलकवास्तव्य° 2 P2 om. सर्गः । 3 P1 om समाप्त ।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

सर्ग—८

[1]पूर्वसर्गे अदृश्यस्यैव नलस्य मुखेन कन्यान्तःपुर[2] वर्तिनीं [3]दमयन्तीं देवीं नखादारभ्य केशपर्यन्तमेकैकमवयवं प्रति नवनवैरुक्तिविशेषैरुपवर्णितां कृत्वा नलमनसि आत्मनो दृश्यत्वाभिप्राय [4]सङ्कल्पविकल्पनमुपकल्प्य दमयन्तीदृग्गोचरं [5]वैरसेनिं प्रति प्रतीकं वर्णयिष्यन् [6]कविरष्टमं सर्गमारभते ।

अथाऽद्भुतेनाऽस्तनिमेषमुद्रमुन्निद्रलोमानममुं युवानम् ।
दृशा पपुस्ताः सुदृशः समस्ताः सुता च भीमस्य महीमघोनः ।।१।।

[1]अथाऽद्भुतेनेत्यादि । ताः समस्ताः सभामध्यगताः[2] सुदृशः स्त्रियः अमुं युवानं नलम् उन्निद्रलोमानं रोमाञ्चितं दृशा पपुः । तथा महीमघोनो भीमस्य नृपस्य च[3] सुता दमयन्ती तं दृशा पपौ । कथम् ?। यथा भवति अद्भुतेन अस्ता गता निमेषमुद्रा यत्र दर्शने निमेषरहितं पपुः । अथ वा[4] दमयन्तीदर्शनात् निर्निमेषमिति नलविशेषणम् । [5]उपजातिवृत्तम्[6] ।।१।।

कियच्चिरं दैवतभाषितानि निह्नोतुमेनं प्रभवन्तु[1] नाम ।
पलालजालैः पिहितः स्वयं हि प्रकाशमासादयतीक्षुडिम्भः ।।२।।

[2]कियच्चिरमित्यादि । नाम अहो दैवतानि भाषितानि एनं नलं निह्नोतुं [3]कियच्चिरं कियन्तं कालं प्रभवन्तु[4] । देवतानामिमानि दैवतानि । अथ वा दैवतानि पुंसि[5] वेति आम्नातस्याऽपि नपुंसक एव प्रयुज्यमानस्य दैवतशब्दस्य षष्ठ्याम् । दैवतानां भाषितानीति समासः । देवैरदृश्यमानत्वं दत्तम् । कियत्कालम्[6] अपलपन्तु एनम् । [7]यत इक्षोर्डिम्भः प्ररोहः पलालजालैस्तृणगोमयादिभिः [8]मिश्रैः पिहितोऽपि स्वयमेव प्रकाशं [9]प्राकट्यमासादयति । हि यस्मात्[10] [11]तथाऽयमपि दृश्योऽभूत्[12] ।।२।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

**अपाङ्गमप्याप दृशोर्न रश्मिर्नलस्य भैमीमभिलष्य यावत् ।
स्मराशुगः सुभ्रुवि तावदस्यां प्रत्यङ्गमापुङ्खशिखं ममज्ज ।।३।।**

[1]अपाङ्गमित्यादि । यावन्नलस्य दृशोः रश्मिः भैमीमभिलष्य अपाङ्गमपि न आप तावत् स्मरस्य आशुगो बाणोऽस्यां सुभ्रुवि दमयन्त्याम् आपुङ्खशिखं प्रत्यङ्गं ममज्ज[2] ।।३।।

**यदक्रमं विक्रमशक्तिसाम्यादुपाचरद्द्वावपि पञ्चबाणः ।
कथं न वैमत्यममुष्य चक्रे शरैरनर्द्धार्द्धविभागभाग्भिः ।।४।।**

[1]यदक्रममित्यादि । पञ्चबाणः यत् यस्मात् द्वावपि दमयन्तीनलौ अक्रमं युगपदुपाचरत् [2]आरराध । कस्मात् ?। विक्रमशक्तेः साम्यात् । दमयन्त्यां नले च समां विक्रमशक्तिं प्रयोज्य परस्परानुरागं तुल्यं चक्रे । तत् [3]इत्यध्याहारः कथं पञ्चभिर्विषमैः शरैः अमुष्य वैमत्यं कामस्य विरुद्धमतित्वं न[4] चक्रे । यतः किं भूतैः ?। न अर्द्धार्द्धं[5] विभागं भजन्ते विषमत्वात् तैः[6] । भजोण्विः (पा° III. ii. 62) । [7]यदि दमयन्त्यां त्रयो बाणाः क्षिप्यन्ते, [8]तदा नले च द्वौ शरौ । अथ वा[9] वैपरीत्येन[10] नले त्रयो, भैम्यां [11]तदा द्वौ । अतो यतो वैमत्येन जातं तन्न विद्मः । उत्तरवाक्ये यत्तच्छब्दप्रयोगाय केचिदर्द्धद्वयं[12] वैपरीत्येन पठन्ति, तत्किं न वैमत्यम् ? [13]इत्यन्ये ।।४।।

**तस्मिन्नलोऽसाविति साऽन्वरज्यत् क्षणं क्वेह स इत्युदास्त ।
पुनः स्म तस्यां वलतेऽस्य चेतः पुनश्च दूत्येन बलान्न्यवर्ति ।।५।।**

[1]तस्मिन्नित्यादि । सा[2] तस्मिन् विषये इति अन्वरज्यत् । कथम् ?। असौ नल[3] इति क्षणं पश्चात् तत् क्षणमेव स इह क्व इत्युदास्ते उदासीनाऽभूत् । अस्याऽपि नलस्य चेतः[4] पुनस्तस्यां देव्यां वलते स्म । पुनश्च दूत्येन दूतत्वेन [5]बलात् चेतो न्यवर्ति । [6]°दूतात् या (सि° है° व्या° VII. i. 63) इति[7] सूत्रेण यः ।।५।।

**तं वीक्ष्य काचित्कुलजा ललज्जे कयाऽपि तद्भासि हृदा ममज्जे ।
स्मरन्तमाशङ्कत काऽपि कन्या भेजे मनोभूवशभूयमन्या ।।६।।**

[1]तमिति । [2]काचित् कुलजा स्त्री तं नलं वीक्ष्य[3] ललज्जे[4] । कयाऽपि । तद्भासि तस्य [5]भासि कमनीयतायां प्रौढया स्त्रिया हृाद

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

ममज्जे। काऽपि कन्या[6] मुग्धा तं स्मरमाशङ्कत। अन्या मध्या मनोभुवो वशभूयं भेजे। भुवो भावे (पा॰ III. i. 107) इति [7]कयाचिदालोक्य नलं ललज्जे इति वा पाठः[8] ।।६।।

कस्त्वं कुतो वेति न शक्नुवत्यस्तं प्रष्टुमप्यप्रतिभातिभारात्।
उत्तस्थुरभ्युत्तिथिवाञ्छयेव निजासनान्नैकरसाः कृशाङ्ग्यः ।।७।।

[1]क इत्यादि। कृशाङ्ग्य [2]स्त्रियो नैकरसाः सत्यः निजासनात् अभ्युत्थिते [3]रभ्युत्थानस्य वाञ्छया इव उत्तस्थुः[4] अभ्युत्थानं चक्रिरे। न तु अभ्युत्तिथितिवाञ्छया अभ्युत्थानं क्रियते। किमति चित्रं [5]सत्यतो न एकरसाः सत्य[:] किन्तु अनेकरसभाजः सत्य[:] अभ्युत्थानं कृतवत्योऽपि अभ्युत्तिथितिवाञ्छया इव। एतेन अभ्युत्थानं कृतमपि अजानन्तः अभ्युत्तिथितिवाञ्छया इव उत्तस्थुः। यत एकरसाः एक एव रसः शृङ्गारो यासां तास्तथा। यः किल एकरसभाक्, सोऽन्यकृताकृतं न जानाति। उदोऽनूर्ध्वकर्मणी (पा॰ I. iii. 24) ति ऊर्ध्वकर्मणो विशेषणार्थम् ईहायामि (वा॰ 622)ति वक्तव्यमुक्तम्। परं सत्यामपि [6]इहायामूर्ध्वविशिष्टक्रियावचनवदात्मनेपदाभावः। दुर्गसिंहोऽप्याह उदोऽनूर्ध्वचेष्टायामि (का॰ III. ii. 42·15)ति। किं कुर्वन्त्यः[7] ?। [8]अप्रतिभा अतिमौग्ध्यं तस्याः[9] अतिभारात् अतिभावात् तं नलम् इति प्रष्टुमपि अशक्नुवत्यः [10]असमर्थाः। कथम् ?। इतीति।[11] हे पुरुष कः [12]त्वम् ?। कुतः[13] वा कस्मादागतः[13] ?। [14]इति तद्दर्शनादेव मूकत्वं जातम्, [15]अप्रगल्भातिशयात् ।।७।।

स्वाच्छन्द्यमानन्दपरम्पराणां भैमी तमालोक्य किमप्यवाप।
महारयं निर्झरिणीव वारामासाद्य धाराधरकेलिकालम् ।।८।।

[1]स्वाच्छन्द्यमित्यादि। [2]भैमी तं नलम् आलोक्य किमपि वक्तुम् अशक्यम् [3]अनिर्वचनीयमानन्दपरम्पराणां स्वाच्छन्द्यम् [4]उद्रेकमवाप। यथा निर्झरिणी नदी धाराधरस्य मेघस्य केलिकालमासाद्य [5]वारां पानीयानां महारयं वेगं प्राप्नोति ।।८।।

तत्रैव मग्ना यदपश्यदग्रे नास्या दृगस्याङ्गमपास्यदन्यत्।
नादास्यदस्यै यदि बुद्धिधारां विच्छिद्य विच्छिद्य चिरान्निमेषः ।।९।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

तत्रैव[1] मग्नेत्यादि । अस्या दृग् दृष्टि: अग्रे यत् [2]अस्य नलस्य अङ्गं [3]प्रथममपश्यत् दृष्टवती । तत्रैवाङ्गे मग्ना सती दृष्टि: अन्यत् द्वितीयमङ्गं न अपास्यत् । अयास्यदिति पाठे न[4] अगमिष्यत् । [5]यदि निमेषो मेषोन्मेष: अस्यै दमयन्त्यै चिरात् पूर्वां [7]बुद्धिधारां विच्छिद्य विच्छिद्य अन्यदङ्गं नाऽदास्यत् । पूर्वार्द्धगतमेवाङ्गं कर्म । अथवा पूर्वां बुद्धिधारां [8]विच्छिद्य धारावाहीकज्ञानं विच्छिद्य विच्छिद्य[9] नवां [10]नवबुद्धिधारां बुद्धिप्रवाहं [11]न अदास्यत् । [12]निमेषे तु सति अन्यदङ्गं दृष्टवती, [13]दृष्टाऽपि ।।९।।

दृशाऽपि साऽऽलिङ्गितमङ्गमस्य जग्राह नाऽग्रावगताङ्गहर्षैः ।
अङ्गान्तरेऽनन्तरमीक्षिते तु निवृत्य सस्मार न पूर्वदृष्टम् ।।१०।।

[1]दृशापीत्यादि । सा [2]दमयन्ती दृशा दृष्टया आलिङ्गितमप्यस्य अङ्गं नव्यं न जग्राह न ददर्श । [3]नाऽनुबभूव । कै: ?। अग्रे प्रथमम् अवगतस्य गृहीतस्याऽङ्गस्य हर्षै: आनन्दै: । नूतनं न आददे । अनन्तरं पश्चात् चिरेण अङ्गान्तरे नूतनेऽङ्गे ईक्षिते गृहीते सति तु पुन: निवृत्य [4]व्यावृत्य पूर्वदृष्टम् अङ्गं न सस्मार । तदप्यतिरुचिरम् । तत:[5] पूर्वदृष्टं विस्मृतवती ।।१०।।

हित्वैकमस्याऽपधनं विशन्ती तद्दृष्टिरङ्गान्तरभुक्तिसीमाम् ।
चिरं चकारोभयलाभलोभात् स्वभावलोला गतमागतं च ।।११।।

[1]हित्वैकमित्यादि । तस्या [2]दमयन्त्या दृष्टिरस्य [3]नलस्य एकमपधनम् अङ्गं हित्वा त्यक्त्वा अङ्गान्तरस्य भुक्ते: सीमां [4]मर्यादां विशन्ती सती चिरं रत[5] मागतं च गमनागमनं[6] चकार । कुत: ?। उभयस्य पूर्वदृष्टस्य द्रक्ष्यमाणस्य चाङ्गस्य [7]लाभलोभात् । यत: स्वभावलोला । लोलशब्द: श्लिष्ट:[8] ।।११।।

निरीक्षितं [1]चाङ्गमवीक्षितं च दृशा पिबन्ती रभसेन तस्य ।
समानमानन्दमियं दधाना विवेद भेदं न विदर्भसुभ्रू: ।।१२।।

[2]निरीक्षितमित्यादि । इयं विदर्भसुभ्रू: रभसेन दृशा कृत्वा निरीक्षितं चाङ्गम् अवीक्षितं [3]च तस्याऽङ्गं पिबन्ती सती उभयोरङ्गयोर्भेदं न विवेद । किं कुर्वाणा ?। समानमानन्दं [4]दधाना । अङ्गमिदं पूर्वदृष्टम् [5]इदं द्रक्ष्यमाणम् इति भेदम् नाऽजानात् । तुल्येनैवाऽऽनन्देन[6] ।।१२।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

सूक्ष्मे घने नैषधकेशपाशे निपत्य निःस्पन्दतरीभवद्भ्याम् ।
तस्यानुबन्धं न विमोच्य गन्तुमपारि तल्लोचनखञ्जनाभ्याम् ।।१३।।

सूक्ष्मे [1]इत्यादि । तस्या[2] लोचने एव खञ्जनौ पक्षिविशेषौ ताभ्यां तस्य[3] केशपाशस्य अनुबन्धं विमोच्याऽनुगतं सम्बन्धं विमोच्य गन्तुं न अपारि न शेके । किं कुर्वद्भ्याम् ?। सूक्ष्मे घने निबिडे नैषधस्य केशपाशे निपत्य [4]निःस्पन्दतरीभवद्भ्याम् । अथ च दृढे सूक्ष्मत्वाददृश्ये केशानां पाशे [5]बन्धने पतितौ निश्चलीभूतौ [6]पक्षिणौ तस्य अनुबन्धं पाशबन्धं मोचयित्वा [7]गन्तुं न शक्नुतः[8] ।।१३।।

भूलोकभर्तुर्मुखपाणिपादपद्मैः परीरम्भमवाप्य तस्य ।
दमस्वसुर्दृष्टिसरोजराजिश्चिरं न तत्याज सगन्धबन्धम् ।।१४।।

[1]भूलोकभर्तुरित्यादि । दमस्वसुर्दृष्टिरेव सरोजराजिः चिरं सगन्धस्य सगोत्रस्य बन्धं [2]सम्बन्धं न तत्याज । किं कृत्वा ?। तस्य भूलोकभर्तुर्मुखेन पाणिभ्यां[3] च पादाभ्यां च एतैः पद्मैः सह परीरम्भम्[4] अवाप्य । मुखादिसम्बन्धभेदेन व्यापारभेदात् दृष्टेरत्र राजित्वम् ।।१४।।

तत्कालमानन्दमयी भवन्ती भवत्तरानिर्वचनीयमोहा ।
सा मुक्तसंसारिदशारसाभ्यां द्विस्वादमुल्लासमभुक्त मृष्टम् ।।१५।।

[1]तत्कालमित्यादि । सा मृष्टम् उल्लासम् आनन्दम् अभुक्त । किंभूतम् ?। मुक्तानां दशा अवस्था तथा[2] संसारिणां दशा[3] [4]उभयो रसाभ्यां [5]द्विस्वादं द्विविधः स्वादो यस्य आनन्दस्य तं तथा । किंभूता ?। तत्कालम् आनन्दमयी भवन्ती । इयं मुक्तदशा । तथा [6]भवत्तरः अनिर्वचनीयः मोहो यस्याः सा तथा । [7]इयं संसारिदशा । तद्दर्शनात् क्षणेन[8] [9]आनन्दः क्षणेन मोहश्च[10] ।।१५।।

दूते नलश्रीभृति भाविभावा कलङ्किनीयं जनि मेति नूनम् ।
न स व्यधान्नैषधकायमायं विधिः स्वयं दूतमिमां प्रतीन्द्रम् ।।१६।।

दूते [1]नलेत्यादि । नूनम् इत्यहं मन्ये । स विधिः इमां दमयन्तीं प्रति इन्द्रं स्वयमेव साक्षादेव [2]नैषधकायस्य नलशरीरस्य माया यस्य स तथा नैषधकर्मकः कायमायां[3] कृत्वा दूतं न व्यधात् । स्वयं च[4] दूत इति [5]नायं भेदः नैषधशरीरस्य माया यस्य तं तथा । कथम् ?। इति

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

कारणात् । [6]इतीति किम् ?। इयं दमयन्ती नलश्रीभृति दूते भाविभावा सती । [7]भावी भविष्यन् भावो यस्याः सा तथा । सकामा सती[8] इन्द्रे [9]वर्त्तमाना[10] कलङ्किनी[11] कलङ्कयुक्ता मा जनि मा भवतु[12] ।।१६।।

पुण्ये मनः कस्य मुनेरपि स्यात् प्रमाणमेनस्यपि दृश्यवृत्ति ।
तच्चिचन्ति चित्तं परमेश्वरस्तु भक्तस्य हृष्यत्करुणो रुणद्धि ।।१७।।

पुण्ये[1] इत्यादि । कस्य मुनेरपि मनः पुण्ये प्रमाणं स्यात् । [2]अपि तु न कस्याऽपि । [3]यतः किं भूतम् ?। एनस्यपि पापेऽपि दृश्यवृत्ति दृष्ट-व्यापारम् । तु पुनः परमेश्वरः श्रीपुराणपुरुषः[4] भक्तस्य सेवकस्य चित्तं[5] मनः तच्चिचन्ति [6]पापचिन्ति । तत्पापं चिन्तयन्तीत्येषं शीलं तत् तच्चिचन्ति सत् [7]पापचिन्तनपरं [8]सत् रुणद्धि निवारयति । [9]पापानीति पाठे भक्तस्य चित्तं पापानि रुणद्धि । अकथितं चे(पा॰ I. iv. 51)ति चित्तस्य कर्मसंज्ञा[10] । किंभूतः ?। हृष्यत्करुणः भक्तेषु दयापरः । तस्माद् दमयन्ती-चित्तं पुण्यकारित्वात् इन्द्रे दूते सति सकामं न भविष्यतीति न मन्तव्यम् । यतो मुनीनामपि मनः पापं करोति । किं पुनस्तस्याः ? ।।१७।।

साऽलीकदृष्टे मदनोन्मदिष्णुर्यथाऽऽप शालीनतया न मौनम् ।
तथैव तथ्येऽपि नले न लेभे मुग्धेषु कः सत्यमृषाविवेकः ।।१८।।

[1]साऽलीकदृष्टे इत्यादि । यथा साऽलीकदृष्टे नले शालीनतया सलज्जतया[2] मौनं न आप । शालीनकौपीने अधृष्टाकार्ययोः (पा॰ V. ii. 20) । यतो मदनेन उन्मदिष्णुः [3]ग्रथिला । ततो लज्जा गता[4] । तथैव तस्मिन् नले तथ्येऽपि सत्येऽपि पुरोवर्तिनि सति मौनं न लेभे । यतो मुग्धेषु विषये इदं सत्यं इयं मृषा इति विवेको नास्त्येव । तस्माद् वक्तुं प्रारेभे । [5]शालीनतमेति पाठान्तरम ।।१८।।

अथ स्वरेणैव विभावयन्ती भावं निजं सा मृदुगद्गदेन ।
सखीचये साध्वसबद्धवाचि स्वयं तमूचे नमदाननेन्दुः ।।१९।।

[1]अथ स्वरेणेत्यादि । अथ सा स्वयं [2]तं नलम् ऊचे किं भूता ?। लज्जावशात् नमत् आननमेव इन्दुर्यस्याः सा तथा । क्व सति ?। सखीनां चये साध्वसेन बद्धवाचि मौनिनि सति । किं कुर्वती ?। स्वरेणैव निजं भावमभिलाषं विभावयन्ती [3]ज्ञापयन्ती । किं भूतेन ?। मृदुना गद्गदेन च ।।१९।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

नत्वा शिरोरत्नरुचाऽपि पाद्यं सम्पाद्यमाचारविदातिथीनाम् ।
उक्त्याऽपि युक्ता मधुपर्कतृप्तिर्न तद्गिरस्त्वादृशि धृष्टता मे ।।२०।।

नत्वा[1] शिर इत्यादि । आचारविदा जनेन अतिथीनां शिरसो रत्नानां रुचा कान्त्याऽपि नत्वा प्रणामपूर्वकं[2] पाद्यं [3]पादशौचोदकं च सम्पाद्यम्[4] । तथा उक्त्या मधुरालापेनाऽपि मधुपर्कस्याऽपि तृप्तिर्युक्ता कर्तुमुचिता । तत्तस्मात् त्वादृशि विषये मे [5]मम गिरो वाण्या न धृष्टता न[6] प्रागल्भ्यम् । [7]तथा चोक्तम्-तृणानि भूमिरुदकं चतुर्थी वाक् च सूनृता । एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन ।। (मनु° III. 101) ।। एषामभावेऽपि एभिरेतदर्थः कार्यः इत्यर्थः । तथा अप्रणोद्योऽतिथिः सायमपि वाग्भूतृणोदकैरि (आचार° 107)ति [8]याज्ञवल्क्यस्मृतेः ।।२०।।

स्वात्माऽपि शोलेन तृणं विधेयं देया विहायाऽऽसनभूर्निजाऽपि ।
आनन्दबाष्पैरपि कल्प्यमम्भः पृच्छा विधेया मधुभिर्वचोभिः ।।२१।।

[1]स्वात्मापीत्यादि । शीलेन सत्स्वभावेन कृत्वा स्वात्माऽपि आत्मशरीरं सुजनेन तृणप्रायं विधेयं [2]तथा विहाय त्यक्त्वा[3] निजाऽपि आसनस्य [4]भूर्भूमिर्देया । किञ्च दर्शनात् जातैरानन्दबाष्पैरप्यम्भोऽर्थोदकं कल्प्यम्[5] । [6]मधुभिर्मधुतुल्यैर्वचोभिः स्वागतादिपृच्छा अतिथेः [7]विधेया । यतः [8]तृणानि भूमिरित्यादि स्मरणात् ।।२१।।

पदोपहारेऽनुपनम्रताऽपि सम्भाव्यतेऽपां त्वरयाऽपराधः ।
तत्कर्तुमर्हाञ्जलिसञ्जनेन स्वसम्भृतिः प्राञ्जलताऽपि तावत् ।।२२।।

[1]पदोपहारे इत्यादि । अतिथेः [2]पदयोरुपहारनिमित्तं प्रक्षालनार्थं त्वरया अपां पानीयानां या अनुपनम्रता अनुपढौकनं साऽपि अपराधः सम्भाव्यते । तत्तस्मात् साधुना स्वस्याऽऽत्मनः [3]सम्भृतिरुपढौकनं तया कृत्वा प्राञ्जलताऽपि कर्तुम् अर्हा योग्या तावत् । केन[4] ?। अञ्जलिसञ्जनेन अञ्जल्याः सञ्जनं बन्धनं तया कृत्वा आत्म[नः] उपढौकनं प्राञ्जलत्वं कर्तुम् अर्हा । तेन पुरुषेण तावत् कर्तव्या एव । सहर्षत्वं दर्शनोयमेव । केन ?। अञ्जलेः करसम्पुटस्य [5]सञ्जनेन संयोजनेन [6]प्राञ्जलो मधुरवागुरवागुच्यते । अथ [7]च [8]आत्मनोपढौकनेन प्रकृष्टोऽञ्जलिर्यस्य स प्राञ्जलिस्तस्य भावः तत्ता । [9]राजादेराकृति-

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

गणत्वाददन्तता । अत्र [10]प्राञ्जलशब्दैकदेशरूपेणाऽपि [11]जलादिसम्पत्तिः कार्येत्यर्थः ।।२२।।

पुरा परित्यज्य [1]मयाऽत्यसर्जि स्वमासनं तत्किमिति क्षणं न ।
अनर्हमप्येतदलङ्क्रियेत प्रयातुमीहा यदि [2]चाऽन्यतोऽपि ।।२३।।

[3]पुरेत्यादि । मया पुरा[4] प्रथमं [5]स्वमासनं परित्यज्य तुभ्यमत्यसर्जि दत्तम्[6] । तत्किमिति एतदनर्हमपि [7]तथाऽनुचितमपि । अथ वा[8] स्त्रीसम्बन्धित्वेन अयोग्यमपि[9] न अलङ्क्रियेत[10] । त्वया यदि वा [11]यदि च तवाऽन्यतोऽपि अन्यत्र प्रयातुम् ईहा इच्छा वर्त्तते तथाऽपि क्षणमुपविश ।।२३।।

निवेद्यतां हन्त समापयन्तौ शिरीषकोषम्रदिमाभिमानम् ।
पादौ कियद्दूरमिमौ प्रयासे निधित्सते तुच्छदयं मनस्ते ।।२४।।

[1]निवेद्यतामिति । हन्त[2] खेदे । निवेद्यतां कथ्यतां[3] ते तव तुच्छदयं [4]निःकृपं मनः इमौ पादौ कियद्दूरं [5]प्रयासे [6]निधित्सते निधातुमिच्छति । किं [7]कुर्वन्तौ ?। शिरीषपुष्पस्य[8] [9]कोषो [10]मुकुलस्तस्य म्रदिम्नो अभिमानं समापयन्तौ जायन्तौ । भवता[11] कियद्दूरं गन्तव्यम् ।।२४।।

अनायि देशः कतमस्त्वया स वसन्तमुक्तस्य दशां वनस्य ।
त्वदाप्तसङ्केततया कृतार्था श्रव्याऽपि नाऽनेन जनेन संज्ञा ।।२५।।

[1]अनायीत्यादि । त्वया स कतमो देशः वसन्तेन मुक्तस्य वनस्य दशां दुरवस्थाम् अनायि ?। कुतः त्वमागतः ?। वसन्तरहितं वनं विच्छायं भवति । किञ्च अनेन मल्लक्षणेन जनेन संज्ञाऽपि नामाऽपि किं न[2] श्रव्या न श्रोतुं योग्या[3] । किं भूता ?। त्वयि विषये आप्तः सङ्केतो यया सा तथा तस्या भावस्तत्ता तया कृत्वा कृतार्था । यन्नाम त्वयि सङ्केतितं तदेव कृतार्थम् । स्वं नामं कथयेत्यर्थः । [4]सङ्केतश्च यद्यपि अर्थक्रियाकारितया प्रवृत्ति [5]निवृत्ति योग्या व्यक्तिरेव । तथाप्यानत्याद्[6] व्यभिचारात् तत्र सङ्केतं[7] कर्तुं न युज्यते । गौः शुक्लश्चलति डित्थ इत्यादीनां [8]विषयविभागो न प्राप्नोतीति[9] [10]तदुपाधावेव सङ्केतः । उपाधिश्च वस्तुधर्मो [11]वक्तृयदृच्छासंनिवेशितश्च । वस्तुधर्मो द्विविधः- पदार्थः[12] प्राणपदत्व[13] विशेषाधानहेतु[14] स्वरूपो जातिगुणरूपः ।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

सिद्ध[:]पूर्वापरीभूत क्रियारूपः। साध्यः डित्थादिशब्दानां [15]संहृतक्रम-स्वरूपम् अन्त्यबुद्धिनिग्राह्यं वक्त्रा यदृच्छया डित्थादिष्वर्थेषूपाधित्वेन निवेश्यते। स संज्ञारूपयदृच्छात्मक इति गौः शुक्लश्चलति डित्थ [16]इत्यादौ चतुष्टयी शब्दानां प्रवृत्तिरि (P 19)ति महाभाष्यकारः। इत्यादिना [17]प्रदर्शितः। सङ्केतितः चतुर्भेदो जात्यादि रि(का॰ प्र॰ II. 10)ति मतम्। एतेन ग्रन्थकारेण सूत्रितम्। तत्रैव [18]हि संज्ञासङ्केतविषयः, जातिरेव वा (का॰ प्र॰ II. 10) इति तु मते संज्ञाशब्देन संज्ञात्वं लक्ष्यते। तत्र हि मते क्रियागुण[19]द्रव्य[20] यदृच्छास्वपि जातिरेव सङ्केत-विषय इति[21] ॥२५॥

तीर्णः किमर्णोनिधिरेव नैष सुरक्षितेऽभूदिह यत्प्रवेशः।
फलं किमेतस्य तु साहसस्य न तावदद्यापि विनिश्चिनोमि ॥२६॥

[1]तीर्ण इत्यादि। त्वया किम् एष[2] अर्णोनिधिः समुद्र एव न तीर्णः?। यत् इह सुरक्षिते प्रदेशे प्रवेशोऽभूत्। तु पुनरेतस्य [3]तव साहसस्य किं फलं भविष्यतीति तावदद्याप्यहं न [4]वि-निश्चिनोमि ॥२६॥

तव प्रवेशे सुकृतानि हेतुर्मन्ये मदक्ष्णोरपि तावदत्र।
न लक्षितो रक्षिभटैर्यदाभ्यां जितोऽसि तन्वा जितपुष्पधन्वा ॥२७॥

तव[1] प्रवेशे इत्यादि। तत्राऽत्र प्रवेशे [2]ममाक्ष्णोः सुकृतान्यपि [3]तावत् हेतुः कारणम्। लक्ष्यः विचार्यः। एकमिदमपि कारणं [4]हेतुर्मन्ये। [5]मध्ये इति पाठान्तरम्। [6]मन्ये इत्युत्प्रेक्षाव्यञ्जकम्[7]। अथ स्वमतदाढ्र्योपपादनाय[8] प्रयुक्तं वाक्यान्तरमतो गर्भितमपि[9] वाक्यगुण [10]एवेति। यत् त्वम् आभ्यां नेत्राभ्यां रक्षिभिर्भटैर्न लक्षितः। अदृष्ट एव सन् पीतोऽसि दृष्टः। किं भूतः?। तन्वा शरीरेण जितः पुष्पधन्वा येन[11] स तथा। धनुषश्च[12] (पा॰ V iv. 132) इत्यनङ्। स च, ङिच्चे (पा॰ I. i. 53)ति अलोऽन्त्यस्य भवति। अतिसुन्दरो हि अन्तःपुरान्तर्हन्यते एव ॥२७॥

यथाकृतिः काचन ते यथा वा दौवारिकान्धंकरणी च शक्तिः।
रुच्यो रुचीभिर्जितकाञ्चनाभिस्तथासि पीयूषभुजां सनाभिः ॥२८॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]यथाकृतिरित्यादि। यथा ते तव काचन अपूर्वा आकृतिः यथा वा दौवारिकाणां प्राहरिकाणाम् अन्धंकरणी[2] च[3] अदृश्य त्व कारिका च शक्तिः। तथा तेन[4] त्वं कोऽपि पीयूषभुजां देवानां सनाभिः सगोत्रः। किं भूतः?। जितं काञ्चनं याभिस्ताभिस्तथाविधाभिः[5] [6]रुचीभिः कान्तिभिः रुच्यः मनोज्ञः[7] ॥२८॥

न मन्मथस्त्वं स हि नास्ति मूर्तिर्न चाश्विनेयः स हि नाद्वितीयः।
चिह्नैः किमन्यैरथवा तवेयं श्रीरेव ताभ्यामधिका विशेषः ॥२९॥

न[1] मन्मथ इत्यादि। त्वं तावन्मन्मथो न भवसि। हि यस्मात् स नास्ति अविद्यमाना मूर्तिर्यस्य स तथा। अनङ्गः। [2]अस्तिक्षीरादिषु वचनमि (वा° under पा° II ii. 24)ति बहुव्रीहिः। तथा [3]आश्विनेयोऽपि त्वं न। हि यतः सः न[4] अद्वितीयः। एकाकी न चरति। अश्विनीकुमारौ मिलितावेव सञ्चरतः। अथवाऽन्यैश्चिह्नैर्लक्षणैः किं कार्यम्?। तव इयं ताभ्यां कन्दर्पाश्विनोकुमाराभ्यां सकाशात् अधिका श्रीरेव शोभैव विशेषः ॥२९॥

आलोकतृप्तीकृतलोक ! यस्त्वामसूत पीयूषमयूखमेनम्।
कः स्पर्द्धितुं धावति साधु सार्द्धमुदन्वता नन्वयमन्ववायः ॥३०॥

[1]आलोकेत्यादि। हे आलोकेन दर्शनेन तृप्तीकृता लोका येन तस्य सम्बोधनम्। योऽन्ववायो वंशः एनं त्वां पीयूषमयूखं चन्द्रमसूत सोऽयं कः अन्ववायः [2]साधु सम्यक् ननु प्रश्ने उदन्वता समुद्रेण सार्धं [3]स्पर्द्धितुं धावति। चन्द्रोऽपि [4]आलोकेनोद्योतेनाऽभिनन्दितो लोकः ॥३०॥

इतीरयन्ती नलसुन्दरं तं मत्वाऽमरं रक्षिजनाक्षिबन्धात्।
आतिथ्यचाटून्युपदिश्य तत्स्थां श्रियं प्रियस्यास्तुत वस्तुतः सा ॥३१॥

[1]इतीरयन्तीत्यादि। सा [2]तं नलवत्सुन्दरं रक्षिणां जनानाम् अक्षिबन्धात् अदृश्यतया अमरं देवं मत्वा इति पूर्वोक्तम् ईरयन्ती सती[3] आतिथ्यार्थं चाटूनि प्रियवाक्यानि उपदिश्य व्याजेन [4]तम् अस्तुत। पुनः सा वस्तुतः परमार्थतस्तु[5] तस्मिन् नलसदृशे[6] स्थितां प्रियस्यैव नलस्य श्रियं शोभाम् अस्तौत्। अतिथिः किल चाटुवाक्यैरानन्दनीयः। [7]अथवा तममरं मत्वा ईरयन्तीति पूर्वार्द्ध एव तमिति पदं योजयित्वा

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

आतिथ्यचाटुव्याजेन वस्तुतस्तत्स्थां प्रियस्य श्रियमस्तुतेत्येकवाक्यतया व्याख्येयम् ।।३१।।

वाग्जन्मवैफल्यमसह्यशल्यं गुणाद्भुते वस्तुनि मौनिता चेत् ।
खलत्वमल्पीयसि जल्पितेऽपि तदस्तु बन्दिभ्रमभूमितैव ।।३२।।

[1]वाग्जन्मेत्यादि । चेत् यदि गुणैः सौन्दर्यादिभिरद्भुते वस्तुनि दृष्टे सति मौनिता क्रियते तदा वाचो जन्मनो यद् वैफल्यम् असह्यं [2]तच्छल्यं चेति कर्मधारयः । अथवा बहुव्रीहिः—असह्यं शल्यं यस्य तत्तथा [3]भवति । ब्रह्मणा तर्हि मुखे वाणी विफला [4]किमर्था सृष्टा इति शल्यं तथा अल्पीयसि स्तोके जल्पितेऽपि खलत्वं दुर्जनत्वं भवति । तत्तस्मात् [5]बन्दिनो मागधस्य [6]भ्रान्ते[7]र्भ्रमस्य भूमिता एवाऽस्तु । ममाऽपि इयं बन्दिनी काचित् या इत्थं वर्णनं कुरुते इति भ्रान्तेः[8] स्थाने अहं भवामि[9] ।।३२।।

कन्दर्प एवेदमविन्दत त्वां पुण्येन मन्ये पुनरन्यजन्म ।
चण्डीशचण्डाक्षिहुताशकुण्डे जुहाव यन्मन्दिरमिन्द्रियाणाम् ।।३३।।

[1]कन्दर्प एवेत्यादि । अहमेवं[2] मन्ये । कन्दर्प एव त्वां [3]त्वल्लक्षणम् [4]इदं पुनः अन्यजन्म जन्मान्तरम् अविन्दत अलभत । पुण्येन अतीत-जन्मार्जितेन कामदेवकृतेन । तदेव पुण्यं दर्शयति यदिन्द्रियाणां मन्दिरं शरीरं चण्डीशस्य [5]श्रीमहादेवस्य चण्डं यदक्षि [6]तृतीयनयन तदेव [7]हुताशकुण्डं तत्र[8] जुहाव । तेन त्वं[9] काम एव जातः ।।३३।।

शोभायशोभिर्जितशैवशैलं करोषि लज्जागुरुमौलिमैलम् ।
दस्रौ हठश्रीहरणादुदस्रौ कन्दर्पमप्युज्झितदर्परूपम् ।।३४।।

[1]शोभायशोभिरित्यादि । हे पुरुष ! त्वम् [2]ऐलं पुरुरवसम् इलायाः पुत्रं लज्जाभरेण गुरुमौलिर्यस्य तं तथाविधं, जितत्वान्नम्रशिरसं करोषि । किं भूतम् ?। शोभायाः सौन्दर्यस्य यशोभिर्जितः शैवशैलः कैलासो येन तं तथा । त्वं दस्रौ [3]अश्विनीकुमारौ अपि हठेन श्रियः शोभायाः हरणात् उत्कृष्टान्यस्राणि ययोस्तौ तथा करोषि । यस्य श्रीर्गृह्यते स रोदिति । तथा[4] कन्दर्पमपि त्वम् उज्झितो[5] रूपस्य दर्पो येन तं तथा करोषि । एभ्यः सर्वेभ्योऽपि सकाशात्त्वं रम्यः[6] ।।३४।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

अवैमि हंसावलयो बलाकास्त्वत्कान्तिकीर्तेश्चपला: पुलाका: ।
उड्डीय युक्तं पतिता: स्रवन्तीवेशन्तपूरं परित: प्लवन्ते ।।३५।।

[1]अवैमीत्यादि । अहमवैमि जाने । हंसानामा[2] वलयस्तथा बलाकाश्च तव कान्ते: कमनीयताया: कीर्ते: ख्यातेश्चपला: सूक्ष्मा: पुलाका: तुषकणा: । पुलाकं भक्तसिच्छेऽपि (V. 43) इति भट्टहलायुध-स्मरणात् । ततो युक्तम् उड्डीय [3]स्रवन्तीनां वेशन्तानां च पूरं परित: [4]पतिता: प्लवन्ते तरन्ति[5] । कर्मणि द्वितीये (पा° II. iii. 2) त्यत्र [6]उभसर्वतसो: कार्या धिगुपर्यादिषु त्रिषु । द्वितीयाऽऽम्रोडितान्तेषु ततोऽन्यत्राऽपि दृश्यते ।।—(वा° 136) इत्यत्रान्यत्राऽपि इति, अभित: परित: समया निकषा हा प्रति योगेपि (पा° 137) च दृश्यते इति वचनात् परित: शब्दयोगे पुरमिति द्वितीया ।[7] केचित्तु व्याचक्षते— उड्डीय विश्वमध्ये पतिता: सन्त: [8]परित: प्लवन्ते[9] तरन्ति । किं कृत्वा ? । स्रवन्तीर्नदीर्वेशन्तान् तडागान्[10] च पूरयित्वा । स्रवन्तीवेशन्तानां प्रमाणं प्लवनेन पूरयन्तीत्यर्थ: । तदा[11] प्लवनस्य वर्षत्वमुपचर्य, वर्षप्रमाण [12]ऊलोपश्चास्यान्यतरस्याम् (पा° III. iv. 32) इति [13]णमुलप्रत्यय: । [14]तव च रमणीयताप्रसिद्धेरवयवा[15] धवलपक्षिण: ये तुषकणा: उड्डीय जलमध्ये पतितास्तरन्ति । [16]अवैमीति अस्य हंसावलय इत्यादिवाक्यस्याऽर्थ:[17] कर्म । अतोऽत्र प्रथमा । यथा— पश्यैते पशुबन्धवेदिवलयैरौदुम्बरीदन्तुरैर्नित्यव्यञ्जितगृह्यतन्त्रविधयो रम्या गृहस्थाश्रमा इति । हंसावलय इत्याद्युड्डीयेत्यादिना एकमेव वाक्यम् ।।३५।।

भवत्पदाङ्गुष्ठमपि श्रिता श्रीर्ध्रुवं न लब्धा कुसुमायुधेन ।
रतीशजेतु: खलु चिह्नमस्मिन्नर्धेन्दुरास्ते नखकैतवेन ।।३६।।

[1]भवत्पदेत्यादि । ध्रुवं कुसुमायुधेन भवत: [2]पदाङ्गुष्ठमपि श्रिता श्री: शोभा न लब्धा । अत: खलु अस्मिन्नङ्गुष्ठे रतीशस्य[3] कामस्य जेतु: श्रीमहादेवस्य चिह्नं लक्षणम् अर्धेन्दु: अर्द्धचन्द्र: नखस्य कैतवेन आस्ते । यत्र तत्र अर्द्धचन्द्र: स स कामस्य जेता । यथा श्रीमहादेव: । तथाऽङ्गुष्ठोऽपि कामस्य जेता । नखलक्षणार्द्धचन्द्राङ्कितत्वादित्यनुमानं प्रमाणम् । अर्द्धचन्द्रो गलहस्तता च ।।३६।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

राजा द्विजानामनुमासभिन्नः पूर्णां तनूकृत्य तनूं तपोभिः ।
कुहूषु दृश्येतरतामिषेण [1]सायुज्यमाप्नोति भवन्मुखस्य ।।३७।।

[2]राजेत्यादि । द्विजानां राजा[3] चन्द्रः कुहूषु अमावास्यासु दृश्येतरताया अदृश्यत्वस्य मिषेण भवन्मुखस्य सायुज्यम् [4]आप्नोति । तव मुखे लीनो भवतीत्यर्थः[5] । किं कृत्वा ?। पूर्णां तनूं तपोभिस्तनूकृत्य । किं भूतः ?। अनुमासं [6]मासं मासम् अनु लक्षीकृत्य भिन्नः पृथक् अन्यः । अग्रेतनश्चन्द्रस्तपसा कृशीभूय तव मुखे सायुज्यलक्षणामुक्ति प्राप्नोति ।[7] तदनु द्वितीयमासे पुनरप्यन्यश्चन्द्रो मुक्तिं प्राप्नोति । एवं भिन्नो भिन्नो[8] भवति सायुज्यं [9]चाप्नोति । अन्योऽपि विप्रराज एवं परमेश्वरेण ऐक्यं गच्छति ।।३७।।

विधाय चित्रे तव [1]वीर ! नेत्रे किं कृष्णसारस्य दृशोर्मृगस्य ।
अदूरजाग्रद्द्विरदप्रणालीच्छलादयच्छद्विधिरर्द्धचन्द्रम् ।।३८।।

विधाय[2] चित्रे इत्यादि । हे वीर[3] ! [4]विधिः तव चित्रे रुचिरे नेत्रे विधाय कृष्णसारस्य [5]मृगस्य दृशोः किम् अर्द्धचन्द्रं गलहस्तताम् अयच्छत् ददौ । कस्मात् ?। अदूरे दृशोः समीपे जाग्रती विद्यमानाया[6] द्विरदरेखा द्वयगर्त्ताकारा प्रणाली तस्याः छलात् । पशूनां [7]चक्षुष उपरि गर्त्तरूपा ईषद्वक्रा रेखा भवन्ति ।।३८।।

मुग्धः स मोहात् सुभगान्न देहाद्ददद्भ्रुवद्भ्रूरचनाय चापम् ।
भ्रूभङ्गजेयस्तव यन्मनोभूरनेन रूपेण यदा तदाऽभूत् ।।३९।।

मुग्धः[1] स मोहादित्यादि । स कामो भवतो भ्रुवो रचनाय विधेश्चापं [2]दददर्पयन् सन् [3]मोहान्मुग्ध इति प्रसिद्धिर्मूढत्वात्, न तु[4] सुभगात् देहात्[5] हेतोर्मुग्धो मनोज्ञः । सुन्दरोऽपि किल मुग्ध उच्यते । यत् यस्मात्तवाऽनेन[6] रूपेण मनोभूः यदा तदा [7]यदा कदाऽपि भ्रूभङ्गेणैव जेयोऽभूत् भ्रूक्षेपमात्रेण जीयते । अथ भ्रुवौ चाप कामस्य यदा [8]भज्यते, तदा जीयत एव ।।३९।।

मृगस्य नेत्रद्वितयं तवाऽऽस्ये विधौ विधुत्वानुमितस्य दृश्यम् ।
तस्यैव चञ्चत्कचपाशवेषः [1]पुच्छे स्फुरच्चामरगुच्छ एषः ।।४०।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

मृगस्य[2] नेत्रेत्यादि । हे पुरुष ! तवाऽऽस्ये विधौ मृगस्य नेत्रद्वितयं दृश्यम् । किं भूतस्य ?। विधुत्वेनाऽनुमितस्य । यत्र यत्र चन्द्रस्तत्र तत्र मृग इत्यनुमानम् । [3]एष तस्यैव मृगस्य पुच्छे[4] स्फुरन् चामररूपो [5]गुच्छो गुलुञ्छः ।. किं भूतः ?। [6]चञ्चन् दीप्रः कचपाशो धम्मिल एव वेषो यस्य स[7] तथा ।।४०।।

आस्तामनङ्गीकरणाद्भवेन दृश्यः स्मरो नेति पुराणवाणी ।
तवैव देहश्रितया श्रियेति नवस्तु वस्तु प्रतिभाति वादः ।।४१।।

[1]आस्तामनङ्गीत्यादि । इति पुराणवाणी पुराणस्य[2] वाणी अथ च जीर्णवाक् आस्तां दूरे तिष्ठतु । भवेन[3] श्रीमहादेवेनाऽनङ्गीकरणात्[4] अङ्गरहितीकृतत्वात् स्मरो न दृश्यः । तु पुनः अयम् इति[5] नवो नूतनो वादः वस्तुभूतः रम्यः प्रतिभाति । इतीति किम् ?। तवैव देहे श्रितया[6] श्रिया[7] शोभया अनङ्गीकरणात्[8] अस्वीकृतत्वात् । लज्जया स्मरो न दृश्यते । सा वाणीमात्रं जीर्णा च[9] । अयं तु नवः तथा वादः विमृश्य । पक्षप्रतिपक्षपरिग्रहो वादः । [10]तदुक्तम्—यत्र वीतरागो वीतरागेणैव सह तत्त्वनिर्णयाय[11] स्वसाधनोपालम्भौ करोति । सा वीतरागकथा वादसंज्ञैवोच्यते [12]इति । अक्षपादसूत्रमपि—प्रमाणतर्क-साधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वाद (न्या॰ सू॰ I. ii. 1) इति । तं प्रतिपक्षहीनमपि वा कुर्यात् । प्रयोजनार्थितत्त्वेन यथा शिष्यो गुरुणा सह प्रश्नद्वारेणैवेत्यर्थं [13]इति ।।४१।।

त्वया जगत्युच्चितकान्तिसारे यदिन्दुनाऽशीलि शिलोञ्छवृत्तिः ।
आरोपि तन्माणवकोऽपि मौलौ स यज्वराज्येऽपि महेश्वरेण ।।४२।।

[1]त्वयेत्यादि । यत् त्वया उच्चितः[2] गृहीतः कान्तेः [3]सारो यस्य तत्र तथाविधे जगति सति इन्दुना शिलोञ्छवृत्तिः अशीलि कृता । पतितमञ्जरीग्रहणं शिलं, कणग्रहणम् उञ्छः । कान्तेः[4] कणोच्चयनं कृतम्[5] । यत् तत् स[6] महेश्वरेण माणवकोऽपि बटुमात्रोऽपि मौलौ आरोपि । तथा यज्वनां राज्येऽपि आरोपि । यः[7] किल माणवको हारः स कथं [8]मस्तके आरोप्यते । महता ईश्वरेण च यज्ञकर्तॄणा-मधिपतिश्चन्द्रः तेन तपसा कृतः । द्विजराजत्वात् ।।४२।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

आदेहदाहं कुसुमायुधस्य विधाय सौन्दर्यकथादरिद्रम् ।
त्वदङ्गशिल्पात् पुनरीश्वरेण चिरेण जाने जगदन्वकम्पि ।।४३।।

[1]आदेहेत्यादि । अहं जाने । ईश्वरेण तवाऽङ्गशिल्पात् चिरेण पुनरपि जगत् अन्वकम्पि । किं कृत्वा ?। कुसुमायुधस्याऽऽदेहदाहं [2]दाहात्प्रभृति सौन्दर्यकथाया दरिद्रं जगद्विधायेदानीं त्वां सृष्ट्वा[3] दया कृता । सौन्दर्यसारत्वात् ।।४३।।

मही कृतार्था यदि मानवोऽसि जितं दिवा यद्यमरेषु कोऽपि ।
कुलं त्वयाऽलङ्कृतमौरगं चेन्नाऽश्वोऽपि कस्योपरि नागलोकः ।।४४।।

[1]महीकृतार्थेति । हे सुभग ! यदि [2]त्वं मानवोऽसि, तदा मही कृतार्था । यदि त्वममरेषु [3]मध्ये कोऽपि, तदा दिवा स्वर्गेण जितम् । चेत् त्वया उरगाणां सम्बन्धि कुलमलङ्कृतं तर्हि नागानां लोको अधोभागे वर्त्तमानोऽपि कस्य लोकस्योपरि वर्ती न भवति । अपि तु [4]भूरादीनामुपरि । अधोऽपि सर्वोपरि पाठान्तरम् । [5]अत्र नवीकृतत्वम्[6] ।।४४।।

सेयं न धत्तेऽनुपपत्तिमुच्चैर्मच्चित्तवृत्तिस्त्वयि चिन्त्यमाने ।
ममौ स भद्रं चुलुके समुद्रस्त्वयात्तगाम्भीर्यमहत्त्वमुद्रः ।।४५।।

सेयं[1] नेत्यादि । सेयं मम चित्तवृत्तिः त्वयि चिन्त्यमाने ईदृशीमनुपपत्तिम् [2]अघटमानतामुच्चैरति[3]शयिनीयमपि न धत्ते । यतस्त्वया आत्ता गृहीता गाम्भीर्यस्य[4] महत्त्वस्य च मुद्रा सर्वस्वं यस्य[5] स तथाविधः सन् समुद्रो यत् अगस्त्यस्य चुलुके[6] ममौ, तद् भद्रं युक्तम् । यः[7] सह मुद्रया वर्त्तते तस्य मुद्राग्रहणे महत्त्वं गाम्भीर्यमपि गच्छति । ततः स चक्षुषि क्षेपणसदृशो भवति । हस्ते [8]माति स्म इति किं वाच्यम् ?। ततः का अघटमानता, घटते एवेदम् ।।४५।।

संसारसिन्धावनुबिम्बमत्र जागर्ति जाने तव वैरसेनिः ।
बिम्बानुबिम्बौ हि विहाय धातुर्न जातु दृष्टाति सुरूपसृष्टिः ।।४६।।

[1]संसारसिन्धावित्यादि[2] । अहं जाने । अत्र संसारसिन्धौ वैरसेनिर्नलः तवाऽनुबिम्बं प्रतिबिम्बयुक्त[3] जागर्त्ति । हि यस्मात्

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

बिम्बानुबिम्बौ विहाय जातु कदाचिद् धातुर्ब्रह्मणः अतिसुरूपाणां[4] सृष्टिर्न दृष्टा । बिम्बस्य सदृशं प्रतिबिम्बमेव दृश्यते, नान्यत् ।।४६।।

इयत्कृतं केन महीमहेन्द्रमहो महीयः सुकृतं जनेन ।
पादौ यमुद्दिश्य तवाऽपि पद्मारजःसु पद्मस्रजमारभेते ।।४७।।

[1]इयत्कृतमित्यादि । हे महीमहेन्द्रव [2]नलवत् महस्तेजो यस्य स तथा तस्य सम्बोधनम् । हे नलसदृश ! इयत् महीयः सुकृतं केन जनेन कृतम् । भूमौ यमुद्दिश्य तवाऽपि पादौ पद्यायाः[3] मार्गस्य रजःसु पद्मस्रजम् [4]आरभेते । भवता क्व गम्यत इत्यर्थः । पदपङ्क्तिः[5] कमलानां मालासदृशी । मही [6]जगत्यामहो इति पाठे, महीविष्टपे अहो इति व्याख्येयम् । जगतीशब्दो जगद्वाचकः ।।४७।।

ब्रवीति मे किं किमियं न जाने सन्देहदोलामवलम्ब्य संवित् ।
कस्याऽसि धन्यस्य गृहातिथिस्त्वमलीक सम्भावनयाऽथवाऽलम् ।।४८।।

[1]ब्रवीतीत्यादि । इयं मे[2] मम संवित् [3]अस्मच्चित्तवृत्तिः सन्देह-दोलाम् अवलम्ब्य । ते [4]इति पाठे ते तव त्वत्सम्बन्धि किं [5]किं ब्रवीति किमपि सम्भावयति इत्यहं न जाने । त्वं कस्य धन्यस्य गृहातिथिरसि । कथं ममैव धन्याया अतिथिरिति व्यङ्ग्यम् ।[6] अथवा अनया अलीकया [7]व्यर्थया अनुपपद्यमानया सम्भावनया चिन्तया[8] अलं पूर्यताम् ।।४८।।

प्राप्तैव तावत्तव रूपसृष्टिं निपीय दृष्टिर्जनुषः फलं मे ।
अपि श्रुती नामृतमाद्रियेतां तयोः प्रसादीकुरुषे गिरं चेत् ।।४९।।

[1]प्राप्तैवेत्यादि । तावत् मे मम दृष्टिः तव रूपसृष्टिं निपीय, जनुषो जन्मनः फलं प्राप्तैव । ततः श्रुती [2]अपि अमृतं नाद्रियेताम् । कथं मां [3]पिबेताम् ?। तयोर्यदि त्वं स्वकीयां गिरं प्रसादीकुरुषे । आलापं करोषि[4] ।।४९।।

इत्थं मधूत्थं रसमुद्गिरन्ती तदोष्ठबन्धूकधनुर्विसृष्टा ।
कर्णात् प्रसूनाशुगपञ्चबाणी वाणीमिषेणाऽस्य मनो विवेश ।।५०।।

[1]इत्थमित्यादि । तस्या दमयन्त्या ओष्ठ एव बन्धूककुसुमधनुः तस्मात् विसृष्टा मुक्ता वाण्या मिषेण प्रसूनाशुगस्य पञ्चबाणी[2]

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[3]शरसमाहारः कर्णात् श्रवणं[4] प्राप्य अस्य नलस्य मनो विवेश । किं कुर्वंती ?। मधुनः सकाशात् उत्थम् [5]उत्थितं रसम् उद्गिरन्ती । मधुतुल्यस्वादम् । कुसुमादपि मकरन्द उद्भवति । कथम् ?। इत्थम् । तथा शरोऽपि कर्णान्तं गत्वा लक्ष्यं विध्यति । आत्माऽपि विषयचतुष्टय-संयोगात् [6]क्वाऽपि त्रयसंयोगात् क्वाऽपि द्वयसंयोगात् गृह्णाति । प्रथममात्मा मनसा [7]संयुज्यते । ततो मनश्चक्षुषा, ततश्चक्षू रूपेणेति[8] चतुष्टयम् ।। तथात्मा मनसा, मनः श्रोत्रेण[9], तत्र च शब्दः समवेतः । ततोऽत्र वाणीश्रवणे त्रयसंयोगः । यतः श्रोत्रं नाम कर्णशष्कुल्यवच्छिन्नो [10]नभोभागः । तत्रैव च[11] समवेतः [12]शब्दोऽस्ति । पृथक् योगो नास्ति । क्वाप्यात्मा मनसा [13]संयुज्यते, तत [14]आत्मनि समवेतत्वात् सुखादि-ज्ञानम्, अत्र द्वयसंयोगः ।।५०।।

[1]आमज्जदाकण्ठमसौ सुधासु प्रियं प्रियाया वदनान्निपीय ।
द्विषन्मुखेऽपि स्वदते स्तुतिर्या तन्मृष्टता मेष्टमुखेऽस्त्वमेया ।।५१।।

[2]अ[।]मज्जदित्यादि । असौ नलः प्रियाया वदनात् [3]प्रियं वचनं निपीय आमज्जत्[4] आकण्ठमिति पाठे आकण्ठं सुधासु अमृतेषु [5]आमज्जत् । या स्तुतिर्द्विषतोऽपि मुखे वर्त्तमाना स्वदते, तस्याः स्तुतेर्मृष्टता स्वादुता इष्टस्य प्रियालक्षणस्य मुखे वर्तमाना या अमेया निरतिशया किं मास्तु मा भवतु । अपि तु युक्तम् ।।५१।।

पौरस्त्यशैलं जनतोपनीतां गृह्णन् यथाऽह्नपतिरर्घ्यपूजाम् ।
तथातिथेयीमथ स प्रतीच्छन् प्रियार्पितामासनमाससाद ।।५२।।

[1]पौरस्त्येत्यादि । यथा अह्नां पतिः श्रीसूर्यः [2]जनताभिरुपनीताम् [3]अर्घ्यलक्षणां पूजां गृह्णन् सन् पौरस्त्यशैलमुदयाद्रिम् [4]आसीदति । अथ स नलस्तथा तेन प्रकारेण [5]प्रिययाऽर्पिताम् आतिथेयीं [6]प्रतीच्छन् सन् आसनम् आससाद । पथ्यतिथिवसतिस्वपतेर्ढञ् (पा° IV. iv. 104), आयनेयीनीयियः[7] फढखछघां प्रत्ययादीनामि (पा° VII. i. 2)ति ढस्य [8]एयादेशः ।।५२।।

अयोधि तद्धैर्यमनोभवाभ्यां तामेव [1]भैमीमवलम्ब्य भूमीम् ।
आह स्म यत्र स्मरचापमन्तश्छिन्नं भ्रुवौ तज्जयभङ्गवार्त्ताम् ।।५३।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[2]अयोधीत्यादि । [3]तस्य नलस्य धैर्येण तथा मनोभवेन चोभाभ्यां तामेव भैमीं भूमीमवलम्ब्याऽयोधि । यत्र[4] यस्यां भूमौ [5]भ्रुवावेव स्मरचापम् अन्तर्मध्ये छिन्नं [6]सत्तयोर्जयस्य[7] भङ्गस्य च वार्त्तामाह स्म । दमयन्त्यां दूतधर्ममाश्रित्य नलस्य [8]धैर्येण जितम् । कामस्य धनुर्भङ्गेन पराजयो जातः इति वदति स्म[9] । भ्रू लक्षणं धनुः[10] ।।५३।।

अथ स्मराज्ञामवधीर्य[1] धैर्यादूचे स तद्वागुपवीणितोऽपि ।
विवेकधाराशतधौतमन्तः सतां न कामः कलुषीकरोति ।।५४।।

अथ[2] स्मराज्ञामित्यादि । अथ स नलस्तस्या वाचा[3] [4]उपवीणितोऽपि उपस्तुतोऽपि स्मरस्याऽऽज्ञां धैर्यात् अवधीर्य ऊचे । यतः सतां महात्मनां विवेक एव धारा जलप्रवाहास्तासां[5] शतेन धौतं सत् अन्तर्हृदयं कामो न [6]कलुषीकरोति ।।५४।।

हरित्पतीनां सदसः प्रतीहि त्वदर्थमेवातिथिमागतं माम् ।
वहन्तमन्तर्बहुनाऽऽदरेण[1] प्राणानिव स्वःप्रभुवाचिकानि ।।५५।।

[2]हरित्पतीनामित्यादि । त्वं [3]हरित्पतीनां दिक्पालानां मां सदसः[4] सभायाः सकाशात् त्वदर्थमेवागतम्[5] अतिथिं [6]प्रतीहि विद्धि । किं कुर्वन्तम् ?। अन्तर्मध्ये स्वःप्रभोरिन्द्रस्य[7] वाचिकानि सन्देशान् प्राणानिव[8] बहुना आदरेण वहन्तम् । [9]स्वप्रभुवाचिकानीति पाठे [10]स्वकीये प्रभुवाचिकानीति व्याख्या ।।५५।।

विरम्यतां भूतवती सपर्या निविश्यतामासनमुज्झितं किम् ।
दूत्यं हि यन्नः फलितं विधेयं सैवातिथेयी पृथुरुद्भवित्री ।।५६।।

[1]विरम्यतामित्यादि । हे दमयन्ति । त्वया विरम्यताम् । सपर्या[2] भूतवती पूजा जाता । आसनं[3] निविश्यताम् । त्वया किमुज्झितम् ?। [4]इदानीं हि यस्मात् यन्नोऽस्माकं[5] दूत्यं फलितं सफलं विधेयम् । सैवातिथेयी पृथुः उद्भवित्री । पथ्यतिथी (पा॰ IV. iv. 104) त्यादिना ढञ् । या[6] दूतता नः फलिता विधेयेति पाठान्तरम् ।।५६।।

कल्याणि ! [1]कल्यानि तवाङ्गकानि कच्चित्तमां चित्तमनाविलं ते ।
अलं विलम्बेन गिरं मदीयामाकर्णयाकर्णतटायताक्षि ! ।।५७।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[2]कल्याणीत्यादि । हे कल्याणि ! तवाङ्गकानि [3]कल्यानि नीरोगाणि वर्त्तन्ते । कच्चित्प्रश्ने[4] । तरप्तमपौ घ (पा° I. i. 22) इति तमप्[5] प्रत्ययस्य घसंज्ञायां, किमेत्तिङव्ययधादा[6]म्वद्रव्यप्रकर्षे (पा° V. iv. 11) इति आम् । अतस्तमाम् अतिशयेन [7]ते तव चित्तम् अनाविलं वर्त्तते । तथा विलम्बेनाऽलम् । हे आकर्णतटम् आयते अक्षिणी [8]यस्यास्तस्याः सम्बोधनम् । त्वं मदीयां गिरमाकर्णय ।।५७।।

कौमारमारभ्य गणा गुणानां हरन्ति ते भैमि ! दिशामधीशान् ।
सुराधिराजं सलिलाधिपं च हुताशनं चार्यमनन्दनं च ।।५८।।

[1]कौमारमित्यादि । हे भैमि ! [2]ते तव गुणानां गणाः कौमारमारभ्य दिशामधीशान् हरन्ति । सुराणामधिराजमिन्द्रं हरन्ति । तथा सलिलाधिपं वरुणं हुताशनं [3]चार्यम्णो [4]नन्दनं यमं च ।।५८।।

चरच्चिरं शैशवयौवनीयद्वैराज्यभाजि त्वयि खिद्यतेऽद्य ।
तेषां रुचश्चौरतरेण चित्तं पञ्चेषुणा लुण्ठितधैर्यवित्तम् ।।५९।।

[1]चरच्चिरमित्यादि । अद्य[2] हे दमयन्ति ! तेषां दिक्पालानां चित्तं त्वयि विषये [3]चिरं चरत् सत् खिद्यते । किं विशिष्टायां [4]त्वयि ?। शैशवस्य यौवनस्य च सम्बन्धि यद् वैराज्यं वयः सन्धिः तद्भाजि [5]भजन्त्याम् । किं [6]भूतम् ?। तेषामेव रुचः [7]कान्त्याश्चौरतरेण पञ्चेषुणा कामेन[8] लुण्ठितम् अपहृतं धैर्यमेव वित्तं यस्य तत्तथा । कमनीयता अग्रे चोरिता । अधुना धैर्यं चोरितम् । यदा भूम्यां[9] राजद्वयं[10] भवति, तदा यस्य[11] चोरस्य पञ्चाऽपि बाणा भवन्ति, सोऽपि दिक्पालानां वित्तं हरति । खिद्यते च लोकः । यथा इदानीं महामात्येन[12] श्रीमाधवदेवेन श्रीउदय[राजे] राजनि राज्यं[13] कर्तुमारब्धे सति महाराजश्रीकर्णदेवस्य भूमौ गूर्जरधरित्र्यां सर्वत्र सर्वजनानां वित्ते अपह्रियमाणे द्वैराज्यात् लोकविरक्तिरजनि ।।५९।।

तेषामिदानीं किल केवलं सा हृदि त्वदाशा विलसत्यजस्रम् ।
आशास्तु नासाद्य तनूरुदाराः पूर्वादयः पूर्ववदात्मदाराः ।।६०।।

[1]तेषामित्यादि । इदानीं तेषां [2]दिक्पालानां हृदि केवलं[3] [4]तव आशा किल अजस्रं विलसति । सा मनोरथरूपा । तु पुनः पूर्वादय

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

आशा दिशः पूर्ववदात्मनो दारा [5]भार्या न विलसन्ति न रोचन्ते । किं कृत्वा ?। उदारा मनोज्ञास्तनूः शरीराणि आसाद्य । यतः शरीराणि आसां [6]दिशां विरमणीयानि सन्ति[7] ।।६०।।

अनेन सार्धं तव यौवनेन कोटिं परामच्छिदुरोऽध्यरोहत् ।
प्रेमाऽपि तन्वि ! त्वयि वासवस्य गुणोऽपि चापे सुमनःशरस्य ।।६१।।

[1]अनेनेति । हे तन्वि ! तवाऽनेन यौवनेन सार्धं त्वयि विषये वासवस्य [2]प्रेमाऽपि परां कोटिं [3]परमप्रकर्षमध्यरोहत् । तथा सुमनःशरस्य कामस्य चापे [4]गुणोऽपि [5]मौर्वी परां कोटिं [6]द्वितीयामटनिम् अग्रभागमध्यरोहत् । किं भूतः ?। अच्छिदुरः अत्रुटनशीलः । स्नेहोऽपि तथाविधः[7] । यथा यथा यौवनं परमप्रकर्षं प्राप्नोति, तथा तथा कामेन देवाः पीड्यन्ते । [8]त्वय्यनुरक्तत्वात्[9] ।।६१।।

प्राचीं [1]प्रयातो विरहादयं ते तापाच्च रूपाच्च,शशाङ्कशङ्की ।
परापराधैर्निदधाति भानौ रुषारुणं लोचनवृन्दमिन्द्रः ।।६२।।

[2]प्राचीमिति । अयमिन्द्रस्तव विरहात् प्राचीं प्रयातः सन् । भानुविशेषणत्वेन वा[3] मूल पाठः [4]उदयप्राप्ते इत्यर्थः । भानौ[5] विषये रुषा अरुणं लोचनानां वृन्दं सहस्रं श्रीसूर्यं[6] निदधाति । कै ?। परस्य चन्द्रस्य अपराधैः । किं भूतः ?। [7]तापाच्च तथा रूपाच्च[8] । मण्डलाकारमयात् पाठान्तरे अरुणत्वाच्च शशाङ्कं शङ्कते इत्येवंशीलः त्वद्विरहात् चन्द्रेण तप्यते ।[9] त्वच्छङ्कया रविमपि कुपितः पश्यति ।।६२।।

त्रिनेत्रमात्रेण रुषा कृतं यत्तदेव योऽद्यापि न संवृणोति ।
न वेद रुष्टेऽद्य सहस्रनेत्रे गन्ता स कामः खलु कामवस्थाम् ।।६३।।

[1]त्रिनेत्रेति । श्रीमहादेवेन त्रिनेत्रमात्रेणैव[2] [3]सता रुषा यत्कृतम् अद्यापि यस्तदेव न संवृणोति । न अनङ्गत्वं प्रतिकरोति । अहमिति न वेद न जाने । अद्य सहस्रनेत्रे रुष्टे [4]सति स खलु [5]कामः कामवस्थां [6]गन्ता गमिष्यति ?। अनङ्गत्वादप्यधिकतामिन्द्रस्य सहस्रनेत्रतया[7] ।।६३।।

पिकस्य वाङ्मात्रकृतादृव्यलीकान्न स प्रभुर्नन्दति नन्दनेऽपि ।
बालस्य चूडाशशिनोऽपराधान्नाराधनं शीलति शूलिनोऽपि ।।६४।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]पिकस्येत्यादि । इदानीं विभावानुभावव्यभिचारिणो धर्मानाह । अत्र वर्णनीयो विप्रलम्भशृङ्गारो हि तैर्जायते । स प्रभुरिन्द्रः पिकस्य कोकिलस्य वाङ्मात्रेण कृतात् व्यलीकात् [2]ध्वनिकृतादपराधात् नन्दने वनेऽपि आनन्ददायिन्यपि न नन्दति इति दैन्यम् । तथा बालस्य चूडाशशिनोऽपराधात् शूलिनोऽपि [3]आराधनं न शीलति नाचरति । इत्यालस्यम् । चन्द्रभयात् । यस्य हस्ते शूलं तमाराधयतां[4] कुतो भयम् ?। वाङ्मात्रदोषात् पुत्रेऽपि न नन्दति । बालापराधात् शूलिनमपि नाराधयतीति विरोधः ।।६४।।

तमोमयीकृत्य दिशः परागैः स्मरेषवः शक्रदशां दिशन्ति ।
[1]कुहूरुतश्चञ्चुपुटं द्विजस्य राकारजन्यामपि सत्यवाचम् ।।६५।।

[2]तमोमयीति । स्मरस्य इषवः शक्रस्य दशां कुहूरुतो [3]द्विजस्य कुहूशब्दकारिणः पक्षिणः कोकिलस्य चञ्चुपुटं मुखं राकारजन्यामपि पूर्णिमारात्रावपि [4]सत्यवाचं दिशन्ति । किं कृत्वा ?। दिशः सर्वा अपि परागैः इषुपुष्परेणुभिस्तमोमयीकृत्य[5] । इन्द्रस्य तव विरहात् मोहलक्षण[6]-व्यभिचारिभावात् पूर्णिमायामपि अमावास्यायामिव [7]सर्वत्रान्धकारे जाते कुहूशब्दवचनमर्थतोऽपि सत्यं जातम् ।।६५।।

शरैः प्रसूनैस्तुदतः स्मरस्य स्मर्तुं स किं नाऽशनिना करोति ।
अभेद्यमस्याऽहह वर्म न स्यादनङ्गता चेद्गिरिशप्रसादः ।।६६।।

[1]शरैरिति । स[2] इन्द्रः[3] प्रसूनैः शरैस्तुदतः स्मरस्य स्मर्तुम् अशनिना वज्रेण किं न करोति किं न[4] शक्नोति ?। शकधृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थे तुमुन् (पा° III. iv. 65) इति सूत्रेण शक्नोत्यर्थस्य कृञः प्रयोगे क्त्वास्थाने तुमुन्प्रत्ययः । अपि तु सर्वं शक्नोति । चेत् यदि अस्य स्मरस्याऽनङ्गतालक्षणः गिरिशस्य प्रसादो न स्यात् । किं विशिष्टः प्रसादः ?। अभेद्यं वर्म सन्नाहः । यः [5]अङ्गरहितस्तस्य वज्रेण क्व[6] प्रहारः क्रियते ?। अहह इति अशक्तौ स्मरणार्थकर्मणः स्मरस्य षष्ठी । दैन्यं भावः ।।६६।।

धृताधृतेस्तस्य भवद्वियोगादन्यान्यशय्यारचनाय लूनैः ।
अप्यन्यदारिद्र्यहराः प्रवालैर्जाता दरिद्रास्तरवः सुराणाम् ।।६७।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]धृताधृतेरित्यादि । सुराणामपि तरवः कल्पवृक्षाः प्रवालैः पल्लवैः दारिद्रा [2]रहिता जाताः । किं भूताः ?। अन्येषां [3]दारिद्र्यहरा अपि । किं भूतैः ?। तस्येन्द्रस्य अन्यस्याः [4]अन्यस्याः शय्याया रचनाय लूनैः [5]नित्यच्छिन्नैः । किं भूतस्य ?। भवत्या वियोगात् धृता[6] अधृतिरधैर्यं येन तस्य तथा । परितापाधैर्ययोर्व्यभिचारिणोः[7] सङ्करः ।।६७।।

रवैर्गुणास्फालभवैः स्मरस्य स्वर्णाथकर्णौ बधिरावभूताम् ।
गुरोः शृणोतु स्मरमोहनिद्राप्रबोधदक्षाणि किमक्षराणि ।।६८।।

[1]रवैरित्यादि । स्मरस्य गुणास्फालभवै रवैर्धनुष्टङ्कारैः स्वर्णाथस्येन्द्रस्य कर्णौ बधिरौ अभूताम् । ततः स गुरोर्बृहस्पतेः स्मरमोह एव निद्रा तस्याः प्रबोधार्थमपनयनार्थं [3]दक्षाणि समर्थानि अक्षराणि वाक्यानि किं शृणोतु, न कथञ्चित् । [4]जाड्यं नाम भावः ।।६८।।

अनङ्गतापप्रशमाय तस्य कदर्थ्यमाना मुहुरामृणालम् ।
मधौ मधौ नाकनदीनलिन्यो वरं वहन्तां शिशिरेऽनुरागम् ।।६९।।

[1]अनङ्गतापेति । नाकनद्या आकाशगङ्गाया नलिन्यो वरं शिशिरे ऋतौ अनुरागं [2]वहन्तां वहन्ते । तासां शिशिरो हिमक्लेश करोऽपि वरम् । न पुनर्वसन्तः कमलपोषकोऽपि । यतः । किं भूताः ?। तस्येन्द्रस्याऽनङ्गतापप्रशमाय[3] मुहुरामृणालं कदर्थ्यमानाः । क्व[4] ?। मधौ मधौ वसन्ते वसन्ते । कामज्वरो[5] भावः ।।६९।।

दमस्वसः ! सेयमुपैति तृष्णा जिष्णोर्जगत्यग्रिमलेख्यलक्ष्मीम् ।
दृशां यदब्धिस्तव नाम दृष्टेस्त्रिभागलोभार्तिमसौ बिभर्ति ।।७०।।

[1]दमस्वसरिति । हे दमस्वसः । सेयं जिष्णोरिन्द्रस्य तृष्णा जगति अग्रिमलेख्यलक्ष्मीमुपैति प्रथमा गण्यते । नाम अहो [2]यत् असाविन्द्रः स्वयं दृशाम् अब्धिः समुद्रोऽपि सहस्रदृक्त्वात्[3] तव[4] दृष्टेः तृतीयभागस्य लोभार्तिं बिभर्ति । अथ च कटाक्षलोभं कुरुते[5] ।।७०।।

अग्न्याहिता शश्वदुपासते यां देदीप्यमानां तनुमष्टमूर्तेः ।
आशापतिस्ते दमयन्ति ! सोऽपि स्मरेण दासीभवितुं न्यदेशि ।।७१।।

[1]अग्न्याहिता इति । यामष्टमूर्तेः [2]श्रीमहादेवस्य तनुं हुताशन लक्षणां मूर्तिं शाश्वत् अग्न्याहिता आहिताग्नयोऽग्निहोत्रेण उपासते[3]

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

आराधयन्ति । निष्ठे (पा° II. ii. 36)ति [4]पूर्वनिपाते प्राप्ते, वाहिताग्न्यादिषु (पा° II. ii. 37) इति विकल्पवचनात् परत्वम् । हे दमयन्ति ! सोऽपि आशापतिः आग्नेयकोणदिक्पालः स्मरेण ते तव दासीभवितुं न्यदेशि [5]आदिष्टः । किं भूताम् ?। देदीप्यमानां हविर्भिर्दीप्ताम्[6] ।।७१।।

त्वद्गोचरस्तं खलु पञ्चबाणः करोति सन्ताप्य तथा विनीतम् ।
स्वयं यथाऽऽस्वादिततप्तभूयः परं न सन्तापयिता स भूयः ।।७२।।

[1]त्वद्गोचर इति । हे दमयन्ति ! त्वद्गोचरः त्वद्विषयः पञ्चबाणः कामः[2] खलु तं वह्निं सन्ताप्य तथा विनीतं करोति, यथा भूयः परमन्यं स वैश्वानरः न[3] [4]सन्तापयिता सन्तापयिष्यति । किं विशिष्टः ?। स्वयमास्वादितं तप्तभूयं तप्तभवनं येन स[5] तथा[6] । स्वयं कामतापमनुभूय पुनरस्याऽग्नितापं न करिष्यति । आसादित° इति पाठे, आसादितं[7] तप्तभवनं येनेत्यर्थः ।।७२।।

अदाहि यस्तेन दशार्धबाणः पुरा पुरारेर्नयनालयेन ।
स निर्दहंस्तं भवदक्षिवासी न वैरशुद्धेरधुनाधमर्णः ।।७३।।

[1]अदाहीति । पुरा पूर्वं यो दशार्धबाणः कामः तेन[2] वह्निना पुरारेः[3] श्री महादेवस्य नयनालयेन तृतीयनेत्रस्थितेन सता अदाहि । स कामस्तं वह्निं भवत्या अक्षिवासी चक्षुषि कटाक्षद्वारेण निर्दहन् सन्[4] अधुना न[5] अधमर्णः न[5] ऋणधारी । कस्याः ?। वैरशुद्धेः सकाशात् । वैरं शोधयित्वाऽऽत्मनः अधमर्णत्वं स्फेटितवान् ।।७३।।

सोमाय कुप्यन्निव विप्रयुक्तः स सोममाचामति हूयमानम् ।
नामाऽपि जागर्त्ति हि यत्र शत्रोस्तेजस्विनस्तं कतमं सहन्ते ।।७४।।

[1]सोमायेति । सोऽग्निः सोमवल्लीलक्षणं हविर्यज्ञेषु अध्वर्युभिर्हूयमानम् [2]आचामति भक्षयति । उत्प्रेक्षते सोमाय चन्द्रमसे कुप्यन्निव । [3]यतो विप्रयुक्तः विरही । अथ च विप्रैर्युक्तः[4] । हि यस्मात् यत्र शत्रोर्नामाऽपि जागर्ति तेजस्विनः पुरुषाः तं [5]कतमं सहन्ते । अपि तु न मृश्यन्ति । [6]कतमे इति पाठान्तरम् ।।७४।।

शरैरजस्रं कुसुमायुधस्य कदर्थ्यमानस्तरुणि ! त्वदर्थे ।
अभ्यर्चयद्भिर्विनिवेद्यमानादप्येष देवः कुसुमाद्बिभेति ।।७५।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]शरैरिति । हे तरुणि ! एष देवोऽग्निः त्वदर्थे कुसुमायुधस्य शरैरजस्रं कदर्थ्यमानः सन् कुसुमादपि बिभेति । किं भूतात् ?। अभ्यर्चयद्भिः पूजापरैः[2] पुरुषै[र्वि]निवेद्यमानादपि । तु[3] कुसुमायुधस्येति साभिप्रायम् ।।७५।।

स्मरेन्धने वक्षसि तेन दत्ता संवर्त्तिका शैवलवल्लिचित्रा ।
चकास्ति चेतोभवपावकस्य धूमाविला कीलपरम्परेव ।।७६।।

[1]स्मरेन्धने इति । तेन वह्निना स्मरस्य[न्ध]नभूते [2]स्ववक्षसि दत्ता संवर्त्तिका कमलिनीनवदलानि चकास्ति शोभते । किं भूता ?। शैवलवल्लिभिश्चित्रा । उत्प्रेक्षते--चेतोभवपावकस्य कामाग्नेः कीलानां [3]ज्वालानां परम्परा इव । किं भूता ?। धूमेनाऽऽविला[4] मिश्रा ।।७६।।

पुत्री सुहृद्येन सरोरुहाणां यत्प्रेयसी चन्दनवासिता दिक् ।
धैर्यं विभुः सोऽपि तवैव हेतोः स्मरप्रतापज्वलने जुहाव ।।७७।।

[1]पुत्री सुहृदिति । हे भैमि ! येन कृत्वा सरोरुहाणां सुहृत् श्रीसूर्यः [2]पुत्री पुत्रवान् प्रशस्यपुत्रम् । इन्ननेकस्वराश्चात् इतीन् । तथा यस्य प्रेयसी चन्दनवासिता दिक् । दक्षिणस्यां मलयपर्वते चन्दनाः । सोऽपि विभुः यमः तवैव[3] हेतोः स्वधैर्यं [4]स्मरप्रतापज्वलने[5] जुहाव । कमलानि चन्दनाश्च शीतलास्तथापि [6]यमस्य विरहो न शमितः ।।७७।।

तं दह्यमानैरपि मन्मथैधं हस्तैरुपास्ते मलयः प्रवालैः ।
कृच्छ्रेऽप्यसौ नोज्झति तस्य सेवां सदा यदाशामवलम्बते यः ।।७८।।

तं [1]दह्यमाने[2]रिति । मलयाचलस्तं यमं दह्यमानैरपि प्रवालैरेव हस्तैरुपास्ते आराधयति । किं भूतम् ?। मन्मथस्य [3]एधमिन्धनभूतम् । यस्मात् यः पुरुषः सदा यस्याऽऽशाम् अवलम्बते । असौ सः कृच्छ्रेऽप्यागते सति तस्य सेवां नोज्झति । तस्य च स्वस्य च कृच्छ्रम[प्य]ङ्गीकृत्य सेवते । आशा आकाङ्क्षा मल[य]श्च[4] यमस्याऽऽशां दक्षिणां दिशमाश्रयति ।।७८।।

स्मरस्य कीर्त्यैव सितीकृतानि तद्दोःप्रतापैरिव तापितानि ।
अङ्गानि धत्ते स भवद्वियोगात् पाण्डूनि चण्डज्वरजर्जराणि ।।७९।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]स्मरस्य कीर्त्येति । स यमः [2]भवद्वियोगात् अङ्गानि पाण्डूनि धत्ते । तथा [3]चण्डेन कामज्वरेण [4]जर्जराणि । उत्प्रेक्षते-स्मरस्य कीर्त्या इव[5] सितीकृतानि तथा[6] तस्य कामस्य दोष्णोर्भुजयोः प्रतापैः तापितानीव[7] ॥७९॥

यस्तन्वि ! भर्त्ता घुसृणेन सायं दिशः समालम्भनकौतुकिन्याः ।
तुभ्यं तदा स प्रजिघाय चित्तं गतो यदाऽऽयाति पुनर्न पान्थः ॥८०॥

[1]यस्तन्वीति । हे तन्वि ! यः सायं सन्ध्यायां घृसृणेन कुङ्कुमेन समालम्भनमुद्वर्त्तनं तत्र कौतुकिन्या दिशः पश्चिमाया भर्त्ता वरुणो वर्त्तते । स तदा तुभ्यं त्वदर्थे तस्मिन् मुहूर्ते चित्तं प्रजिघाय यदा काले गतः [2]पन्थिः पुनर्गृहं नाऽऽयाति । वरुणस्य [3]मनस्त्वयि [4]स्थितमेव ॥८०॥

तथा न तापाय पयोनिधीनामश्वामुखोत्थः क्षुधितः शिखावान् ।
निजः पतिः सम्प्रति वारिपोऽपि यथा हृदिस्थः स्मरदाहदुःस्थः ॥८१॥

[1]तथा नेति । [2]अश्वामुखं पातालं तस्मादुत्थ[3] उत्थितः [4]उत्थानं यस्येति । वास्थास्नापिबतिव्याधिहनिभ्यः कः (दुर्ग° IV. v. 66) शिखावान् वडवानलः हृदिस्थः क्षुधितः पयोनिधीनां तथा न तापाय बभूव ।[5] यथा सम्प्रति त्वद्विरहे निजः पतिर्वरुणः वारि पातीति वारिपः वारिपतिरपि हृदिस्थः चित्ते तापाय वर्त्तते । यतः स्मरदाहेन दुःस्थः तप्तः । अथ [6]चायं वारि पिबति । वाडवः क्षुधितः । [7]यद्यत्र वडवाशब्द एव प्रयोक्तुमर्हः तथापि, तुरङ्गकान्ताननहव्यवाहे[8] त्यादि प्रयोगदर्शनात् अश्वापदेन परिवृत्तिः [9]कृता ॥८१॥

यत्प्रत्युत त्वन्मृदुबाहुवल्लिस्मृतिस्रजं गुम्फति दुर्विनीता ।
ततो विधत्तेऽधिकमेव तापं तेनाऽऽश्रिता[1] शैत्यगुणान्मृणाली ॥८२॥

[2]यत्प्रत्युतेति । यत् प्रत्युत हस्तात् तव[3] मृद्वी या बाहुवल्लिः[4] तस्या स्मृतिस्रजं स्मरणैरन्तर्यं गुम्फति । यतो दुर्विनीता । तेन वरुणेन शैत्यगुणात् [5]आश्रिता मृणाली ततः कारणात् तापम्[6] अधिकमेव विधत्ते । ततो विरहतापं कुरुते इत्यर्थः ॥८२॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

न्यस्तं ततस्तेन मृणालदण्डखण्डं बभासे हृदि तापभाजि ।
तच्चित्तमग्नैर्मदनस्य बाणैः कृतं शतच्छिद्रमिव क्षणेन ।।८३।।

[1]न्यस्तं तत इति । तेन वरुणेन ततो[2] विरहात् हृदि न्यस्तं मृणालदण्डस्य खण्डं [3]बभासे । यतस्तापभाजि तप्ते । उत्प्रेक्षते-तस्य चित्ते [4]मग्नैर्मदनस्य बाणैः क्षणेन शतच्छिद्रमिव कृतम् । [5]तत्र स्वभावादेव बहूनि छिद्राणि [6]भवन्ति ।।८३।।

इति त्रिलोकीतिलकेषु तेषु मनोभुवो विक्रमकामचारः ।
अमोघमस्त्रं भवतीमवाप्य मदान्धतानर्गलचापलस्य ।।८४।।

इति[1] त्रिलोकीति । इति अमुना प्रकारेण तेषु त्रिलोकीतिलकेषु देवेषु विषये[2] मनोभुवः कामस्य भवतीम् अमोघम्[4] अस्त्रम् अवाप्य[5] विक्रमस्य[6] कामचारो यथेष्टचेष्टा वर्त्तते । किं भूतस्य ?। मदान्धतया अनर्गलं चापलं यस्य[7] तस्य तथा ।।८४।।

सारोऽथ धारेव सुधारसस्य स्वयंवरः श्वो भविता तवेति ।
सन्तर्पयन्ती दमयन्ति ! तेषां श्रुतिः श्रुती नाकजुषा मयासीत् ।।८५।।

सारोऽथ[1] धारेवेति । हे दमयन्ति ! अथाऽनन्तरं तेषां नाकजुषां देवानां श्रुती कर्णौ इति श्रुतिः वार्त्ता [2]अयासीत् । किं कुर्वन्ती ?। सन्तर्पयन्ती । उत्प्रेक्षते—सुधारसस्य अमृतस्य सार [3]उत्कृष्टा धारेव । सारशब्द उत्कर्षे पुंलिङ्गः । न्याया[र्था]दनपेते (सिं॰हैं॰ VII. i. 13)[4] नपुंसकम् । यथा नैतत्सारम् । धारा इव अमृतप्रवाह इव । [5]इतीति किम् ?। [6]श्वः आगामिनि दिने तव स्वयंवरो [7]भविता भविष्यतीति[8] श्रुत्वा इन्द्रादयः आनन्दिताः सन्ति ।।८५।।

समं सपत्नीभवदुःखतीक्ष्णैः स्वदारनासापथिकैर्मरुद्भिः ।
अनङ्गशौर्यानलतापदुःस्थैरथ प्रतस्थे हरितां मरुद्भिः ।।८६।।

समं [1]सपत्नीति । अथ हरितां मरुद्भिरिन्द्रादिभिर्दिशां देवैरनङ्ग-शौर्यम् एवाऽनलस्तस्य तापेन दुःस्थैः सद्भिः प्रतस्थे स्वयंवरे चलितम् । कैः समम् ?। स्वकीयानां दाराणां [2]हरितामिन्द्राणीप्रभृतीनां[3] नासाया नासिकायाः पथिकैर्मरुद्भिर्निश्वासवायुभिः[4] समम् । किं भूतैः[5] ?। सपत्न्याः सकाशात् [6]भवदुःखं तेन तीक्ष्णैः तप्तैः । अस्माकं सपत्नी

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

भविष्यतीति दुःखात् तासां निःश्वासा[7]श्चलिताः[8]। कार्यकारणभावेन सहोक्तिः ॥८६॥

अपास्तपाथेय सुधोपयोगैस्त्वच्चुम्बिनैव स्वमनोरथेन ।
क्षुधं च निर्वासयता तृषां च स्वादीयसाऽध्वा गमितः सुखं तैः ॥८७॥

[1]अपास्तेति । तैर्देवैः सुखं सुखेनैव [2]अध्वा मार्गो [3]गमितः नीतः[4]। केन[5]?। त्वां चुम्बतोत्येवंशीलेन स्वेन मनोरथेनैव । किं भूतेन ?। [6]अमृतादपि स्वादीयसा [7]क्षुधं च तृषां पिपासां च[8] निर्वासयता[9] स्फेटयता । अत एवाऽपास्तः त्यक्तः पाथेयार्थं पथिगतशम्बलार्थं सुधाया अमृतस्य उपयोगो यैः [10]तैस्तथा । सिद्धमन्नं मार्गे न[11] गृहीतम्[12] ॥८७॥

त्वच्चुम्बिनैव स्वमनोरथेन स्वादीयसाऽस्तङ्गमितक्षुधेन ।
[1]अपार्थपाथेय सुधोपयोगैरध्वा भुवस्तैरयमत्यवाहि ॥८८॥

[2]त्वच्चुम्बिनैवेत्यादि । तमेवोक्तमर्थम्[3] अधिकविवक्षया पुनराह । तैर्देवैरयं भुवः पृथिव्या अध्वा अत्यवाहि अतिक्रान्तः । किं [4]भूतैः ?। त्वच्चुम्बिनैव तव प्राप्ति मनोरथेन स्वेन स्वादुतरेणाऽपार्थो निरर्थकः पाथेयः सुधोपयोगो येषां तैः तथा । किं [5]भूतेन ?। अस्तङ्गमिता [6]क्षुधा बुभुक्षा येन तेन तथा[7] ॥८८॥

देवीं मनोभूशरदावदाहे दिवं तवाऽर्थादथ मज्जयद्भिः ।
[1]सुराधिनाथैः क्रियतेऽधुना तैः पादार्पणानुग्रहभूरियं भूः ॥८९॥

[2]देवीमिति । हे भैमि ! अथाऽनन्तरम्[3] अधुना तैः सुराधिनाथैरियं[4] भूः पृथ्वी पादार्पणस्य अनुग्रहभूमिः क्रियते । देवानां चरणा भूमौ न[5] लगन्ति । परं सोऽपि[6] तैः तस्याः प्रसादः कृत इति । किं कुर्वद्भिः ?। तवाऽर्थात् तव [7]कारणात् देवीं . देवीभावं गमिताम् । दैवीमिति क्वचित्पाठे विषयत्वेन देवानां सम्बन्धिनीं दिवं स्वर्गम् । मनोभुवः शरा एव दावदाहो दवाग्निस्तत्र मज्जयद्भिः त्रोडयद्भिः[8] ॥८९॥

अलङ्कृतासन्नमहीविभागैरयं जनस्तैरमरैर्भवत्याम् ।
अवापितो जङ्गमलेखलक्ष्मीं निक्षिप्य सन्देशमयाक्षराणि ॥९०॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]अलङ्कृतेति । अयं मल्लक्षणो जनः अहं तैरमरैः भवत्यां त्वयि विषये जङ्गमस्य[2] चलतो लेखस्य लक्ष्मीं शोभाम् अवापितः । अन्यत् लिखितं स्थावरम् अचेतनं भवति । अहं[3] चेतनवान् लेखः । किं कृत्वा ?। सन्देशमयानि अक्षराणि निक्षिप्य । किं [4]भूतः ?। अलङ्कृत आसन्नो निकटो महीविभागो यैस्तैस्तथा । अत्रैव नगरभूमौ स्थित्वा । [5]सन्देशनमक्षराणि इति पाठान्तरम्[6] ।।६०।।

प्रत्येकमेते परिरभ्य पीनस्तनोपपीडं त्वयि सन्दिशन्ति ।
त्वं नः प्रसूनाशुगभल्लशल्यजुषां विशल्यौषधिवल्लिरेधि ।।६१।।

[1]प्रत्येकमिति । हे तन्वि ![2] एते देवाः त्वयि प्रत्येकं सन्दिशन्ति । किं कृत्वा ?। पीनस्तनयोः त्वाम् उपपीडय, अथवा पीनाभ्यां [3]स्तनाभ्यां उपपीडय । आत्मानं तत्स्वान्तेन परिरभ्य आलिङ्ग्येत्यर्थः । उपपीड-रुधकर्षश्चे(का° IV. vi. 34)ति [4]णम् । सप्तम्यां चोपपीडरुधकर्ष (पा° III. iv. 49) इति पाणिनीयम् । त्वं नोऽस्माकं विशल्या शल्याभावकरणी[5] ओषधिवल्लिः एधि भव । किं [6]भूतानाम् ?। प्रसूनाशुगस्य कामस्य भल्लानि बाणा एव शल्यानि तज्जुषां तद्विदानाम् । [7]त्वं मूर्च्छतां नः स्मरभल्लशल्यैर्मुदे इति पाठान्तरम्[8] ।।६१।।

त्वत्कान्तिमस्माभिरयं पिपासन्मनोरथाश्वासनयैकयैव ।
निजः कटाक्षः खलु विप्रलभ्यः कियन्ति यावद्भण वासराणि ।।६२।।

[1]त्वत्कान्तिमित्यादि । त्वं भण वद । खलु[2] अस्माभिरयं निजः कटाक्षः तव कान्तिं पिपासन्[3] कियन्ति वासराणि यावत् विप्रलभ्यः प्रतारणीयः । कया ?। एकया निराधारया मनोरथस्यैवाऽऽश्वासनया । वासराणीति कालाध्वनोरत्यन्तसंयोगे(पा° II. iii. 5)इति द्वितीया । फलप्राप्तेरभावात्, अपवर्गे तृतीये(पा° II. iii. 6)ति न तृतीया । अत्र भण इति वाक्ये[न] औत्सुक्यद्योतनात् गर्भितत्वं गुणः । यथा—

तुमि अवहत्थिअरेहो[4] णिरंकुसो[5] अह विवेअरहिओ वि ।
सिविणे वि[6] तुमम्मि पुणो[7] पत्तिहि भत्तिं ण पसुमरामि[8] ।।

(का. प्र° VII. 320) इत्यत्र प्रतीहि भक्तिमिति दृढप्रत्ययोत्पादनार्थं गर्भितत्वं गुणः[9] ।।६२।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

अनुग्रहोऽस्मासु यदि त्वदीयस्तदेहि देहि द्रुतमङ्कपालीम् ।
चार्वङ्गि ! निर्वापय तापमङ्गैरनङ्गलीलालहरीतुषारैः ।।९३।।

[1]अनुग्रह इति । यदि त्वदीयोऽस्मासु अनुग्रहो वर्त्तते, तत् एहि आगच्छ । [2]द्रुतं शीघ्रम् अङ्कपालीमालिङ्गनं देहि । हे चार्वङ्गि ! अनङ्गस्य लीला विलासास्तासां लहरीभिः तुषारैः शीतलैरङ्गैस्तापमस्मदीयं निर्वापय शमय[3] ।।९३।।

दयस्व किं घातयसि त्वमस्माननङ्गचण्डालशरैरदृश्यैः ।
भिन्ना वरं तीक्ष्णकटाक्षबाणैः प्रेमस्तव प्रेमरसात्पवित्रैः ।।९४।।

दयस्व[1] किमिति । त्वं दयस्व[2] दयां कुरु । किमस्मान् अनङ्ग एव चण्डालस्तस्य [3]शरैरदृश्यैर्घातयसि [4]कथं मार[य]सि ?। हे भीरु[5] ! वयं तव प्रेमरसात् पवित्रैः कटाक्षबाणैः भिन्नाः सन्तः यत्[6] प्रेमः[7] प्रेता भवामः, तत् वरं [8]रुचिरम् । न तु चण्डालेन हताः । इण् (1120) गतौ, प्रपूर्ववर्त्तमानोत्तमबहुवचने मस् । प्रियेति [9]क्वचित्पाठोऽस्ति, सहृदया । पुनराद्गुरयं [10]पाठः उपपन्नः । प्रिये इति पाठोऽनुपपन्न इति[11] ।।९४।।

त्वदर्थिनः सन्तु परस्सहस्राः प्राणास्तु नस्त्वच्चरणप्रसादः ।
विशङ्कसे कैतवनाटितं चेदन्तश्चरः पञ्चशरः प्रमाणम् ।।९५।।

[1]त्वदर्थिन इति । हे तन्वि ! [2]परः सहस्राः पुरुषाः सहस्रेभ्योऽपि परे त्वदर्थिनः सन्तु[3] । परः[4] शतादेरि(सि°है° III. i. 75)ति सुट् आगमः । तु पुनः नोऽस्माकं प्राणाः जीवितं तव चरणयोरेव प्रसादः । त्वदायत्ता एव चेत्[5] यदि इदमस्मद्वचनं कैतवनाटितं छद्मनो विलसितं विशङ्कसे । ततः[6] अन्तश्चरः अस्मदन्तर्वर्ती पञ्चशरः[7] प्रमाणं साक्षी । [8]सोऽपि शरायुधत्वात् भयाभावात्[9] साक्ष्यं न वदति । अन्तश्चरो देवः सर्वत्र साक्षी ।।९५।।

अस्माकमध्यासितमेतदन्तः प्रिये ! भवत्या हृदयं चिराय ।
बहिस्त्वयाऽलङ्क्रियतामिदानीमुरो मुरं विद्विषतः श्रियेव ।।९६।।

[1]अस्माकमिति । हे [2]प्रिये ! भवत्या त्वया एतदस्माकम् अन्तर्हृदयमध्ये चिराय अध्यासितम् । इदानीं बहिरपि आलिङ्गनेन

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

उरो हृदयदेशोऽयं त्वयाऽलङ्क्रियताम् । यथा श्रिया[3] मुरं विद्विषतः[4] श्रीकृष्णस्य उरः अलङ्कृतम् ।।९६।।

दयोदयश्चेतसि चेत्तवाऽभूदलङ्कुरु द्यां विफलो बिलम्बः ।
क्ष्मामेव देवालयतां नयामो भूमौ रतिश्चेत्तव जन्मभूमौ ।।९७।।

दयोदय[1] इति । चेत् तव चेतसि दया[या] उदयः अभूत् तत् द्यां स्वर्गमलङ्कुरु । विलम्बो विफलः । चेत् यदि तव जन्मभूमित्वात् भूमौ[र]तिर्वर्त्तते । ततो वयं क्ष्मां पृथ्वीमेव देवालयतां नयामः स्वर्गत्वं प्रा[प]यामः । पृथिवीमेव श्रयामः[2] । स्व[र्गं]भोगानत्रैव कुर्मः[3] । भुवः स्वरादेशमथाऽऽचरामो भूमौ धृतिं यासि यदि स्वभूमौ इति पाठान्तरम् ।।९७।।

[1]स्वर्णैर्वितीर्णैः करवाम वामनेत्रे भवत्या किमुपासनासु ।
अङ्ग ! त्वदङ्गानि निपीतपीतदर्पाणि पाणिः खलु याचते नः ।।९८।।

[2]स्वर्णैर्विती[र्णैरि]ति ।[3] हे वामे प्रधाने नेत्रे यस्याः [4]तस्याः सम्बोधनम् । वयम् उपासनासु पूजाकाले[5] भवत्या वितीर्णैर्दत्तैः [6]सुवर्णपुष्पादिभिः [7]स्वर्णैः किं करवाम । अपि तु न कार्यम् । अङ्ग ! अहो नोऽस्माकं पाणिः खलु त्वदङ्गानि याचते । किं भूतानि ?। निपीतो [8]जितः [9]पीतवर्णस्य सुवर्णादिवर्णस्य दर्पो यैस्तानि तथा ।।९८।।

धिनोति नास्माञ्जलजेन पूजा त्वयाऽन्वहं तन्वि ! वितन्यमाना ।
तव प्रसादोपनते तु मौलौ पूजाऽस्तु नस्त्वत्पदपङ्कजाभ्याम् ।।९९।।

[1]धिनोतीति । हे तन्वि ! [2]त्वया अन्वहं वितन्यमाना जलजेन[3] पूजा अस्मान् न धिनोति न प्रीणयति[4] । तु पुनस्तव प्रसादाय [5]उपनते [6]नम्रे नोऽस्माकं मौलौ मस्तके तव पदपङ्कजाभ्यां पूजा अस्तु ।।९९।।

वयं कलादा इव दुर्विदग्धं त्वद्गौरिमस्पर्द्धि दहेम हेम ।
प्रसूननाराचशरासनेन सहैकवंशप्रभवभ्रु ! बभ्रु ।।१००।।

[1]वयमिति । हे प्रसूननाराचस्य [2]कामस्य शरासनेन सह एकस्मिन् वंशे अन्वये [3]प्रभवा उत्पन्ना [4]भ्रूर्यस्यास्तस्याः सम्बोधनम् । कामधनुर्भ्रूर्जिष्णु भ्रूलते !। अथ च वंशो वेणुः । [5]सुभ्रु ! इति वक्तव्ये अयं

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

व्यासश्चमत्कारकारी। वयं हेम सुवर्णं दहेम। यस्तव गौरिमगुणस्य स्पर्द्धाकरम्। अत एव दुर्विदग्धम् अनभिज्ञम्। के इव ?। कलादा इव। यथा सुवर्णकारा दुष्टं[6] विदग्धम् अदग्धकलां वर्णिकां ददाना:[7] आरोपयन्त: सन्तो दहन्ति। [8]कलां दत्ते आदत्ते वा कलाद:[9]। किं भूतम् ?। बभ्रु कपिलं पिङ्गलम्। त्वं तु गौराङ्गी ।।१००।।

सुधासरस्सु त्वदनङ्गतापः शान्तो न नः किं पुनरप्सरस्सु।
निर्वाति तु त्वन्ममताक्षरेण सूनाशुगेषोर्मधुशीकरेण ।।१०१।।

[1]सुधासरस्सु इति। हे तन्वि ! नोऽस्माकं तव अनङ्गताप: सुधाया अमृतस्य सर:सु कुण्डेषु न शान्त:। किं पुनर्वाच्यम् ?। यत् अपां सरस्सु न शान्त:। तु पुन: तव ममताक्षरेण स कामतापो निर्वाति। किं भूतेन ?। [2]सूनाशुगस्य कामस्य इषोर्बाणस्य [3]मधुन: शीकरेण। मकरन्दशीतलेन। मदीयोऽयम् [4]इति चेत् अक्षरं त्वं वदसि, तदा[5] शाम्यति[6] ।।१०१।।

खण्डः खलु त्वद्गिर एव खण्डः किं शर्करा तत्पथशर्करैव।
कृशाङ्गि ! तद्भङ्गिरसोत्थकच्छतृणं न दिक्षु प्रथितं तदिक्षुः ।।१०२।।

[1]खण्ड: खलु इति। [2]खलु खण्ड[:] खण्डशर्करा त्वद्गिर: तव [3]वाण्येव खण्ड: शकलम्। तथा किं शर्करा तस्या: त्वद्वाच: पथि शर्करा वालुका एव। तत्पथ इति, ऋक्पूरब्धू:पथामानक्ष (पा° V. iv. 74) इति [4]अ:। नु इति वितर्के। हे[5] कृशाङ्गि ! इक्षु: तस्या: [6]वाण्या: भङ्गीनाम् उक्तिविशेषाणां यो रस: तस्मात् उत्थ उत्पन्न:, [7]तस्मादुत्थ उत्थानं यस्या[8] एवंविधो य: कच्छस्तीरं तस्य तृणं भणित्वा दिक्षु प्रथितम्। तत् सरसमिक्षुरिति[9] प्रसिद्धम्। [10]रसोत्थमिति तृणविशेषणं च। एते मधुरा: पदार्था: तत्र वाच: एकदेश प्रमुखसम्बन्धि-मात्रा:[11] ।।१०२।।

ददाम किं ते सुधयाऽधरेण त्वदास्य एव स्वयमास्यते हि।
विधुं विजित्य स्वयमेव भावि भवन्मुखं तन्मखभागभोजि ।।१०३।।

[1]ददामेति। हे भैमि ! 'वयं' ते तुभ्यं किं ददाम[2]। हि यतस्तव आस्ये एव अधरेण ओष्ठरूपया सुधयाऽऽस्यते स्थीयते स्वयमपि। अथ च अधरीरूपया[3] जितया [4]सुधया स्थीयते। अस्मदीयेऽमृतं परमकोटि।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

तत्त्वादेशकारि । किं च भवत्या मुखं विधुं विजित्य स्वयमेव च[5] तस्य चन्द्रस्य यो [6]मखे यागे भागः तस्य [7]भोजि भोजनशीलं भावि भविष्यति । [8]यागभागदानं यत् तदपि अस्मदीयेऽस्ति[9] परं निरर्थकम्[10] ।।१०३।।

प्रिये ! वृणुष्वाऽमरभावमस्मदिति त्रपाकृद्वचनं न किं नः ।
त्वत्पादपद्मे शरणं प्रविश्य स्वयं वयं येन जिजीविषामः ।।१०४।।

[1]प्रिये ! वृणुष्वेति । हे प्रिये ! त्वमस्मत्[2] सकाशात् अमरभावं [3]वृणुष्व इति वचनं नोऽस्मदीयं किं न त्रपाकरम्[4] ?। येन [5]कारणेन वयं स्वयं तव पादावेव पद्मे शरणं प्रविश्य जिजीविषामः[6] ।।१०४।।

नाऽस्माकमस्मान्मदनापमृत्योस्त्राणाय पीयूषरसायनानि ।
सुधारसादप्यधिकं प्रयच्छ प्रसीद वैदर्भि ! निजाधरं नः ।।१०५।।

[1]नाऽस्माकमस्मादिति । अस्माकमस्मात् मदन एव अपमृत्युः तस्मात् पीयूषाण्यमृतानि[2] रसायनानि [3]त्राणाय न जायन्ते । सुधार-सादप्यधिकं नोऽस्माकं [4]निजमधरं प्रयच्छ । हे वैदर्भि ! प्रसीद प्रसादं कुरु । प्रसादस्यात्यन्तमपेक्षितत्वात् । प्रसीदेति वाक्येन गर्भितत्वं गुणः ।।१०५।।

प्लुष्टः स्वैश्चापरोपैः सह स हि मकरेणाऽऽत्मभूः केतुना-
ऽभूद्धत्तां नस्त्वत्प्रसादादथ मनसिजतां मानसो नन्दनः सन् ।
भ्रूभ्यां ते तन्वि ! धन्वी भवतु तव सितैर्जैत्रभल्लः स्मितैः
स्तादस्तु त्वन्नेत्रचञ्चत्तरशफरयुगाधीनमीनध्वजाङ्कः ।।१०६।।

[1]प्लुष्ट इति । आत्मभूः कामः हि निश्चितं स स्वैः अग्रेतनैः चापेन रोपैर्बाणैः[2] सह तथा मकरेण केतुना च सह प्लुष्टो दग्धोऽभूत् । अथाऽधुना त्वत्प्रसादात् नोऽस्माकं [3]मानसो नन्दनः पुत्रः सन् [4]मनसिजतां मनसिजत्वं[5] धत्ताम्[6] । अग्रे आत्मन एव भूतः । इदानीं मानसः । अथ च[7] नन्दनः तव[8] लाभात् हर्षकरो[9] [10]मानसः । हे तन्वि ! ते[11] तव भ्रूभ्यां धन्वी धनुष्मान् भवतु । तव सितैः [12]स्मितैः जैत्रा जयनशीला भल्ला[13] बाणा यस्य एवंविधः स्तात् । तथा त्वन्नेत्रे एव चञ्चत्तरं चपलं यत् [14]शफरयुगं मत्स्यद्वयं तस्य [15]अधीनो मीनध्वज इति अङ्कश्चिह्नं यस्य स[16] तथाविधोऽस्तु भवतु । [17]इत्यादि नवीकृतम् । [18]स्रग्धरावृत्तम्[19] ।।१०६।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

स्वप्नेन प्रापितायाः प्रतिरजनि तव श्रीषु मग्नः कटाक्षः
श्रोत्रे गीतामृताब्धौ त्वगपि ननु तनूमञ्जरीसौकुमार्ये ।
नासा श्वासाधिवासेऽधरमधुनि रसज्ञा [1]चरित्रे च चित्तं
तन्नस्तन्वङ्गि ! कंश्चिन्न करणहरिणैर्वागुरा लङ्घितासि ।।१०७।।

[2]स्वप्नेन प्रापिताया इति । हे तन्वङ्गि ! [3]तत् तस्मान्नोऽस्माकं कंश्चिदपि करणानि इन्द्रियाणि एव [4]हरिणा तैः[5] त्वं वागुरा त्वल्लक्षणा मृगजालिका न लङ्घितासि [6]नाऽतिक्रान्ता । तथा हि स्वप्नेन प्रापि-[7]तायास्तव श्रीषु शोभासु प्रतिरजनि रात्रौ [8]रात्रौ कटाक्षो [9]मग्नः । चक्षुर्बद्धम् । श्रोत्रे तव गीतामृताब्धौ[10] मग्ने त्वगिन्द्रियं ननु[11] तव तनूमञ्जर्याः सौकुमार्ये मग्नम् । किं च[12] नासा घ्राणेन्द्रियं तव श्वासस्याऽधिके वासे परिमले मग्ना[13] । अधरस्य मधुनि रसज्ञा रसनेन्द्रियं मग्ना[14] । तव चरित्रे च [15]चित्तहरिणो मग्नः । [16]स्रग्धरा-वृत्तम् ।।१०७।।

इति [1]भृतसुरसार्थवाचिकस्रङ्निजरसनातलपत्रहारकस्य ।
सफलय मम दूततां वृणीष्व त्वमनुविमृश्य दिगीशमेकमेषु ।।१०८।।

इति[2] भृतसुरेति । त्वं मम दूततां सफलय । एषु मध्यात् अनुक्रमेण विमृश्य एकं दिगीशं वृणीष्व । किं भूतस्य मम ?।[3] इति इत्थं भृता धृता सुरसार्थस्य वाचिकानां सन्देशानां स्रक् माला यत्र तत्तथा एवंविधं यन्निजाया रसनायास्तलमेव पत्रं तस्य हारकस्य आनयनशीलस्य मम । [4]पुष्पिताग्रावृत्तम् ।।१०८।।

आनन्दयेन्द्रमथ मन्मथमग्नमग्निं
केलीभिरुद्धर तनूदरि ! नूतनाभिः ।
आसादयोदितदयं शमने मनो वा
नो वा यदीत्थमथ तद्वरुणं वृणीथाः ।।१०९।।

[1]आनन्दयेन्द्रमिति । हे तनूदरि ! [2]त्वम् इन्द्रम् आनन्दय । इत्यानन्दाङ्कत्वं सूच्यते । अथ वा मन्मथमग्नम् अग्निं नूतनाभिः केलीभिरुद्धर । वा[3] अथवा उदिता दया यत्र एवंविधं मनः शमने यमे आसादय । यदि वा इत्थं नो[4] घटते । अथ पश्चात्त[5] द्वरुणं वृणीथाः । [6]वसन्ततिलकावृत्तम् ।।१०९।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
तस्याऽगादयमष्टमः कविकुलादृष्टाध्वपान्थे महा-
काव्ये चारुणि नैषधीयचरिते[2] सर्गो निसर्गोज्ज्वलः[3] ।।११०।।

[4]श्रीहर्षमिति । तस्य कवेर्महाकाव्येऽयमष्टमः सर्गोऽगात् । किंभूते ?। कवीनां कुलैः अदृष्टः योऽध्वा मार्गस्तत्र पान्थे सञ्चरणशीले । अपूर्वा[र्थं]रचना[5] चेति । [6]शार्दूलविक्रीडितं वृत्तम् ।।११०।।

श्रीमानालिगपण्डितः स्वसमयाविर्भूतसर्वाश्रम[1]–
श्चाण्डूपण्डितसंज्ञितं प्रसुषुवे श्रीगौरिदेवी[2] च यम् ।
स्थापत्यं क्रतुना वृहस्पतिसवेनेष्टवा स्तुवन् दीक्षित–
श्चक्रे व्याकृतिमेष नैषधमहाकाव्यस्य सर्गेऽष्टमे ।।१।।

किमपि मुकुटरत्नं नागरश्रोत्रियाणां
प्रतिनिधिरिव तेजःसद्मनः पद्मयोनेः ।
विधुरुपशमसिन्धोरालिगो नाम धीमानिह
समजनि पत्नी [3]गौरिदेवीति चास्य ।।२।।

प्रत्यहं प्रथितपञ्चपावकोपासनप्रणयपुण्यसम्पदः ।
अर्प्यतेऽस्य चरितं सदा सदाचारसञ्चरविचारचारुभिः ।।३।।

तदात्मजस्तात्हणनामधेयो विशारदः शारदचन्द्रकीर्तिः ।
महाक्रतौ ज्योतिषि कर्मकाण्डं क्रमाच्चतुः संस्थतया प्रयोक्ता ।।४।।

[4]संगार्हपत्योऽग्निचिदग्रजन्माऽग्रगण्यचाण्डूजनुषोऽनुजन्मा ।
त्रैविद्यवृद्धार्चितसर्वदेवो बुधाग्रजन्मा महनीयजन्मा ।।५।।

श्रीवैद्यनाथाभिधसूक्तदेवीपदप्रसादोपचितप्रसादैः ।
पदैरुदाराकृतिभिः प्रक्लृप्तां क्वचित्क्वचित्शोधयति स्म टीकाम् ।।६।।

इति [1]श्रीचाण्डूपण्डितविरचितायां
नैषधदीपिकायां टीकायां
[2]निसृष्टार्थनैषधो नाम
अष्टमः सर्गः समाप्तः ।।[3]

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

टिप्पण

सर्ग—८

1 B add. इदानीमष्टमः सर्गः आरभ्यते ।; P1 ॐ नमः श्रीगणेशाय ॥ 2 B om. पुरः 3 P1P2 देवीं दमयन्तीं 4 B om. °संङ्कल्प° 5 P2 वैनसेनि 6 B om. कविः ॥

1 P2 अथाद्भुतेनेति । 2 B °मध्ये° 3 B om. च P1 च aft. दमयन्ती 4 B om. वा 5 B om. उपजातिवृत्तम् 6 P1 add. पपुरित्यत्यन्ततिरस्कृतवाच्यो गुणीभूतभावोदयोऽनुप्रासः ॥१॥

1 P2 text खलु शक्नुवन्तु 2 P1 कियच्चिरम् ।; P2 कियच्चिरमिति । 3 P2 om. कियच्चिरं 4 B भवन्तु 5 B om. पुंसि वेति 6 B add. तत् 7 B यथा 8 B मिथ्या 9 B प्राकाश्य° 10 P1P2 यतः 11 P1 °यमदृश्योऽ° 12 B add. इति ।; P1 add. एनं लघु शक्नुवन्तु पाठान्तरम् । दृष्टान्तः ॥२॥

1 P1 अपाङ्ग ॥; P2 अपाङ्गमपीति । 2 P1 add. अतिशयोक्तिः ॥३॥

1 P1 यद ।; P2 यदक्रममिति । 2 P1P2 om. आरराध 3 B om. इत्यध्याहारः 4 P2 तत् 5 B अर्द्धार्धभागं 6 B om. तैः 7 P1P2 om. यदि 8 P1P2 om. तदा 9 B om. वा 10 P1P2 वैपरीत्यं 11 P1P2 om. तदा 12 P1 पदद्वयं 13 B om. इत्यन्ये; P1 add. अनुप्रासः ॥४॥

1 P1 तस्मिन्न ।; P2 तस्मिन्नलोऽसाविति । 2 P2 असौ 3 P1 add. क्षणम् 4 P1 चित्तं 5 B om. बलात् 6 P2 add. here उदोऽनूर्ध्वंकर्मणि°..........चेष्टायामिति from verse no. 7. 7 P1 add. पाणिनीयेऽति (तु) दूतवणिग्भ्यां यदि(वा° 434)ति वक्तव्यम् । औत्सुक्यमत्योरौत्सुक्यधृतेश्च शबलता ॥५॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 कयाचि ।; P2 तं वीक्ष्येति । 2 B P1 कया नलम् आलोक्य ललज्जे 3 B P1 आलोक्य 4 B भुवो भावे इति क्यप् here 5 B om. भासि कमनीयतायां 6 B om. मुग्धा; P2 om. कन्या 7 B om. कया ......ललज्जे; P1 तं वीक्ष्य काचित्कुलजा ललज्जे 8 P1 add. अनुप्रासो जातिर्भावोदयश्च ।।६।।

1 P1 कस्त्वम् ।; P2 कस्त्वं कुतो वेति । 2 B अचणुकोदर्यः 3 B om. अभ्युत्थानस्य 4 P1P2 om. अभ्युत्थानं............न जानाति 5 B सत्यतोः 6 B °विशिष्टं 7 P2 कुर्वत्यः 8 P1P2 अप्रतिभाया; and om. अतिमौग्ध्यं 9 B तस्याऽ° 10 P1P2 om. असमर्था: 11 P1P2 add. किम् 12 P1P2 त्वं कः B वा कु[तः] 13 P1P2 om. कस्मात् 14 P1P2 om. इति 15 P1 अप्रगल्भातिशयोक्तिः ।।७।।

1 P1 स्वाच्छं ।; P2 स्वाच्छन्द्यमिति । 2 B भैमि 3 P1P2 om. अनिर्वचनीयम् 4 P1P2 om. उद्रेकम् 5 B वारं ।।८।।

1 P1 तत्रैव ।; P2 अत्रैव मग्नेति । 2 P1 om. अस्य 3 B om. प्रथम°; P1 प्रथमं aft. तत्रैवाङ्गे 4 B om. अयास्यदिति पाठे न; P1 add. अयस्यात् 5 P1 यत् 6 P1P2 om. मेषोन्मेषः 7 B om. बुद्धिद्वारां.......अथवा पूर्वां 8 P1 om. विच्छिद्य विच्छिद्य 9 P2 om. विच्छिद्य 10 B P1 नवनवां 11 B om. न 12 B मेषे 13 P1 om. दृष्टाऽपि— ।।९।।

1 P1 दशा ।; P2 दशाऽपि सेति । 2 P1P2 om. दमयन्ती 3 B om. नाऽनुबभूव 4 B निवृत्य; P2 om. व्यावृत्य 5 B ततः at the end. — ।।१०।।

1 P1 हित्वै ।; P2 हित्वैकमस्येति । 2 P1P2 om. दमयन्त्या 3 P2 om. नलस्य 4 P1P2 om. मर्यादां 5 B गतागतं and om. च 6 P1P2 om. गमनागमतं 7 B लाभा° 8 P1 add. अनुप्रासो जातिः पर्यायः काव्यलिङ्गं च ।।११।।

1 P2 text स्वाङ्ग° 2 P1 निरीक्षि ।; P2 निरीक्षितमिति । 3 P1 om. अवीक्षितं च 4 B दधती 5 P1 om. इदं 6 P1 add. अनुप्रासोऽतिशयोक्तिः काव्यलिङ्गं च ।।१२।।

1 P1 सूक्ष्मे ।; P2 सूक्ष्मे घने इति । 2 P1 तस्या........ ....किं कुर्वन्भ्रूयाम ?। aft. °भवद्भ्रूयाम् । 3 P2 om. केशपाशस्य.......नैषधस्य

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

4 B निष्पन्द° 5 B बन्धने पाशे 6 P1 add. खञ्जनौ 7 B om. गन्तुं 8 add. नि:स्पन्दतराभ्यामिति पाठान्तरम् । रूपकं श्लेषश्च ।।१३।।

1 P1 भूलो ।; P2 भूलोकभर्तुरिति । 2 P1 सम्बन्ध बन्धं 3 P1 पादाभ्यां पाणिभ्यां च 4 B परि° 5 P1 add. मुखपाणिपादमेव पद्मानि । अनुप्रासो रूपकं समासोक्तिश्च ।।१४।।

1 P2 तत्कालमिति । 2 P1 om. तथा 3 P1 add. अवस्था 4 P1 तयो:; P2 om. उभयो:·········मुक्तदशा । 5 B om. द्विस्वादं 6 B om. भवत्तर: 7 P1P2 om. इयं संसारिदशा 8 P1 क्षण एव । तस्मिन्नानन्दक्षणे मोहश्च । 9 P2 om. आनन्द: क्षणेन 10 P1 add. भावोदयोऽतिशयोक्तिश्च ।।१५।।

1 P1 दूते नले ।; P2 दूते नलश्रीति । 2 B नैषधस्य; P1P2 om. नैषध°·········नैषधकर्मक: 3 B P2 °मायं 4 P1P2 om. च 5 P1P2 नायक° 6 P1 इति किम् ?। 7 P1P2 om. भावी············स तथा 8 P1P2 om. सती 9 B इन्द्र°; P1 om. इन्द्रे 10 P1 add. सती 11 P1P2 om. कलङ्किनी 12 P1 add. संन्यधादिति पाठे इन्द्रस्य स्वयं दूतत्वविधानं नाकार्षीत् । निदर्शनमुत्प्रेक्षानुप्रासोऽपि ।।१६।।

1 P1 पुण्ये ।; P2 पुण्ये नमे इति । 2 P1P2 om. अपि············ कस्याऽपि । 3 P1P2 om. यत: 4 P1P2 शास्ता 5 P2 om. मन···· चित्तं 6 P1P2 om. पाप°············°शीलं तत् 7 B om. पापचिन्तन° 8 B om. सत् 9 B om. पापानि············कर्म संज्ञा 10 P2 add. तस्निन्तीति (?) पाठे सक्तस्य चित्तं तच्चिन्ति सत् पापचिन्तनपरं सत् रुणद्धि निवारयति ।।१७।।

1 P1 सोली ।; P2 सालीकण्ठे इति । 2 P2 गलज्जया 3 P2 अहिला 4 P2 शालीनतमेति पाठान्तरम् here. 5 B om. शालीनतमेति पाठान्तरम् ।।१८।।

1 P1 अथ ।।; P2 अथ स्वरेणैवेति । 2 P1 om. तं 3 P2 om. ज्ञापयन्ती — ।।१९।।

1 P1 नत्वा ।; P2 नत्वा शिर इति । 2 P1 °पूर्विकया; P2 °पूर्वकया 3 B om. पाद° 4 P2 add. सम्पादनीयम् 5 P2 om. मे 6 P2 om. न प्रागल्भ्यम् 7 P1 om. तथा चोक्तम्·········इत्यर्थ: ।; P2 om. तथा चोक्तम्············याज्ञवल्क्यस्मृते: । 8 P1 स्मरणम् । and add.

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

प्रियाक्षरालीरसधारयाऽपि वैधी विधेया मधुपर्कतृप्तिरिति पाठान्तरम् ।; P2 add. °तृप्तिरिति पाठान्तरम् ।।२०।।

1 P1 स्वात्मा ।; P2 स्वात्मापीति । 2 P2 यथा 3 P2 मुक्त्वा 4 B om. भू: 5 B कल्पम् 6 P2 om. मधुभि: 7 B विधेया अतिथे: 8 P1P2 स्मृति: तृणानि ।।२१।।

1 B पादोप°; P1 पदे ।; P2 पदोपहारे इति । 2 B पादयो°; P1 add. उभयो: 3 P1 सम्भृति 4 P1P2 om. केन ?।.........तावत् 5 P1 सर्जनेन 6 P2 om. प्राञ्जलो.........अत्र 7 B वा 8 P1 चात्मोप° 9 B राजादि° 10 B प्राञ्जलि° 11 P1P2 जलसम्पत्ति:— ।।२२।।

1 P2 text व्यसर्जि 2 P2 text वान्यतोऽपि 3 P1 पुर: ।; P2 पुरा परित्यज्येति । 4 P1 पुर: 5 B स्वासनं 6 P1 add. पुर: पाठान्तरम् । 7 B तया 8 B च 9 P1 अपोढ°; P2 योग्य° 10 B P1 °क्रियते 11 B om. यदि— ।।२३।।

1 P1 निवेद्य । 2 P1 add. इति । 3 P2 om. कथ्यतां 4 B °कृतं 5 B प्रायासे 6 B om. निधित्सते 7 P2 कुर्वतौ 8 P2 कुसुमस्य 9 B कोशो; P2 om. कोप: 10 P1 कुडमल° 11 P1 om. भवता— ।।२४।।

1 P1 अना ।; P2 अनायि देश इति । 2 B om. न श्रव्या 3 B योग्यम् 4 B om. सङ्केतश्च 5 B om. निवृत्ति 6 B °प्यानन्त्यव्यभि° 7 B सङ्केत:; P2 सङ्केत 8 P1 °भागो 9 P1 om. इति 10 P2 तदुपाध्या° 11 B विप्रकृष्टो 12 P2 पादार्थं° 13 B om. पदत्व° 14 B om. हेतु° 15 B संहत°; B P1P2 °कमं; edr. °क्रम° 16 P1 इत्यादि° 17 B प्रदर्श्य 18 P2 om. हि 19 P1P2 गुणक्रिया° 20 P1P2 om. °द्रव्य° 21 P2 इव ।।२५।।

1 P1 तीर्णा ।; P2 तीर्ण: किमर्णोनिधिरेव । 2 B P1 एषो° 3 P2 न च 4 B निश्चिनोमि ।।२६।।

1 P1 तव प्रवेशे ।; P2 तव प्रवेशे इति । 2 P1 मद° 3 B om. तावत् 4 B om. हेतु°.....°गुण एवेति 5 P1 मन्ये 6 P1P2 om. मन्ये; edr. add. मन्ये 7 P1 °व्यञ्जनम् 8 P1 °पपादानाय 9 P2 om. अपि वाक्य° 10 P1 om. एवेति 11 B एन 12 B om. घनुपश्च..... °न्त्यस्य भवति ।; P1 ङितत्वादलोपोऽन्त्यस्य घनुपश्च इति अनङ् ।।२७।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 B यथाकृतीत्यादि ।; P1 यथाकृ । 2 P1 अन्ध° 3 P1 वा 4 P1 add. प्रकारेण; P2 add. कारणेन 5 P2 om. तथा 6 B रुचिभिः 7 B मनोन्यः ॥२८॥

1 P1 न मन्मथः ।; P2 न मन्मथ इति । 2 B om. अस्तिक्षीरा°.... तथा 3 B आश्विनोयो 4 B om. न....इयं ताभ्यां— ॥२९॥

1 B अलोक्य°; P1 आलो ॥; P2 आलोकेति । 2 B P2 साधु.... प्रश्ने aft. धावति 3 B स्पर्द्धयितुं 4 B °नोत्पद्यते जनानामानन्दम् ॥३०॥

1 P1 इतीर ।; P2 इतीरयन्तीति । 2 B P2 तु 3 P1 अस्तुत here 4 B om. तम् 5 P1P2 om. तु 6 P1 °सन्निभे B om. अथवा ....व्याख्येयम् 7 ॥३१॥

1 P1 वाग्जन्म ।; P2 वाग्जन्म वैफल्यमिति B om. तत् 3 P1 om. भवति 4 P1 क्रिमिति 5 P1 बन्दि 6 P1 add. स्तावकस्य 7 P1 om. रेफ 8 P1 add. विभ्रमस्य वा 9 P1 add. अनुप्रासः काव्यलिङ्गं च ॥३२॥

1 P1 कन्दर्प ।; P2 कन्दर्प एवेति । 2 P1P2 om. एवं 3 P2 om. त्वत्° 4 P1 om. इदं 5 B श्री महेशस्य 6 B तृतीयं 7 P1 हुताशन° 8 B om. तत्र 9 P2 कामस्त्वमेव ॥३३॥

1 P1 शोभा ।; P2 शोभायशोभिरिति । 2 B एनं 3 P1P2 अश्विनावपि 4 B om. तथा 5 P1 उज्झितरूपस्य 6 P1 add. शोभेति निपातनात शुभिर्भिदादेशकृतिगणत्वात् । अङ्गसिद्ध एवं गुणप्रतिषेधाभावस्तु निपात्यते ॥३४॥

1 P1 अवै ।; P2 अवैमीति । 2 B °मालय° 3 P2 श्रवन्तीनां 4 B om. पतिताः प्लवन्ते 5 P1 add. विशन्ति मज्जन्ति अस्मिन् वेशन्तः अनुपस्वलं 6 P1P2 add. सूत्रे 7 P1 add. तु 8 B om. परितः 9 P1 प्लवन्ति 10 B तडागानि 11 P1 om. तदा 12 B तुलोप°; P1 कुलोप°; P2 उल्लोप° 13 B णम् 14 P1 add. तथा वा 15 P1 रमणीयताया 16 B om. अवैमीति....वाक्यम् ॥ 17 P2 °वाक्यार्थः ॥३५॥

1 P1 भवत्प ।; P2 भवत्पदाङ्गुष्ठेति । 2 B पादा° 3 P1P2 रतीशं कामं ॥३६॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P2 text सायोज्य° 2 P1 राजा ।; P2 राजा द्विजानामिति । 3 B राजः and om. चन्द्रः 4 P2 प्राप्नोति 5 P1P2 om. इत्यर्थः 6 P1P2 om. मासं.....°कृत्य 7 P1 om. तदनु.....प्राप्नोति 8 P2 om. भिन्नो 9 P1 वाप्नोति; P2 प्राप्नोति ॥३७॥

1 P2 text धीर 2 P1 विधा ।; P2 विधाय चित्रे इति 3 P1 add. धीर 4 B om. विधिः 5 B om. मृगस्य 6 B om. या 7 B चक्षूषि ॥३८॥

1 P1 मुग्धः ।; P2 मुग्धः स मोहादिति । 2 P1P2 ददन°; P1 अर्थयन् 3 P1 om. मोहात् 4 P1 om. तु; P2 तत् 5 P2 om. देहात् 6 P1P2 अनेन त्वं 7 B om. यदा; P2 om. यदा कदा 8 B मुज्यते ॥३९॥

1 P2 text पुच्छः 2 P1 मृगस्य ।; P2 मृगस्य नेत्रेति । 3 B एतस्यैव P1 om एष तस्य 4 P2 add. एषः 5 B गुञ्छः 6 P1 चञ्चलः; P2 चञ्चत् 7 P2 om. स ॥४०॥

1 P1 आस्ताम् ।; P2 आस्तामनङ्गीति । 2 P2 om. पुराणस्य वाणी 3 B भवने 4 P1 °करणत्वात् 5 P1 om. इति 6 P2 आश्रितया 7 B om. श्रिया 8 P1 °करणत्वात् 9 P1 वा 10 B om. तदुक्त.....°द्वारेणैवेत्यर्थ 11 P1 निर्णयार्थः साधनो° 12 P1 om, इति 13 P1 om. इति ॥४१॥

1 P1 त्वया ।; P2 त्वया जगतीति । 2 B उच्चितं गृहीतं 3 B सारं तस्य 4 P1 add. मञ्जरी° 5 B om. कृतम्; P1 add. समस्तं व्यस्तं विपर्यस्तं चैतत् । वृत्तिषु ऋतमुच्यते । तथा च मनुः—ऋतमुञ्छशिलं ज्ञेयम् (IV. 5) इत्यादि । and om. यत् 6 B om. स 7 B om. यः क्लिक्त.... तपसा कृतः । 8 मस्तके कथं ॥४२॥

1 B आदहेत्यादि ।; P1 आदेहदाहम् ।; P2 आदेहदाहमिति । 2 P1 add, देह° 3 P2 दृष्ट्वा ॥४३॥

1 P1 मही कृ । 2 P1 मानवो ऽसि त्वम्; P2 त्वं यदि 3 B om. मध्ये 4 B स्वादी° 5 B om. अत्र नवीकृतम् 6 B 45 ॥४४॥

1 P1 सेयम् ।; P2 सेयं न धत्ते इति । 2 B °मानमुच्चै° 3 B °शयनी°; P1 °शायिनी° 4 P1 add. च 5 P2 om. यस्य... महत्त्वं 6 P1 चलुके 7 B सः 8 P1 नावि ॥४५॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 संसार: । 2 B °सन्धा°; P2 °सन्धाविति । 3 P2 om. प्रतिबिम्ब° 4 P2 °सरुपा° ।।४६।।

1 P1 इयत्कृतम् ।; P2 इयत्कृतमिति । 2 P2 om. नलवत् 3 B पद्मा रजः सु; पाद्याया 4 B P1 आरभते 5 B किल; P2 कमल° 6 P2 मही इति पाठे ।।४७।

1 B अब्रवी° ।; P1 ब्रवीती ।; P2 ब्रवीति मे इति । 2 B om. मे मम 3 P1 om. अस्मत् 4 B om. इति पाठे ते 5 P1 कं 6 P1 add. कस्याऽपीति पाठान्तरम् । 7 B व्यर्थम् 8 P1 चिन्तनया ।।४८।।

1 P1 प्राप्तैव ।; P2 प्राप्तैव तावदिति । 2 P2 om. अपि 3 P1 मा पिबाताम्; P2 मा पिदत्तां 4 B 89. ।।४९।।

1 P1 उत्थं मधूत्थम् ।; P2 इत्थं मधूत्थमिति । 2 P1 add. पञ्चमहा° 3 B शरः; P1 शराः 4 B प्रविष्टा 5 B om. उत्थितं....कथम् इत्थं 6 P1 क्वचित् 7 P1P2 युज्यते 8 P1 om. इति 9 P1 add, इति 10 B नभप्रदेशः 11 P2 om. च 12 P1 शब्दः समवेतोऽस्ति 13 P1 मनसंयुतः; P2 युतः 14 B तवात्मानं ।।५०।।

1 P2 text °मामज्ज्द° 2 P1 आमज्ज ।; P2 आमज्जमामज्जदिति । 3 P1 om. प्रियं 4 B om. आमज्जत्....पाठे; P2 आमज्जम् 5 B अमज्जत् ।।५१।।

1 P1 पौरस्त्य ।; P2 पौरस्त्येति । 2 P1 जनतोप° 3 P1 सर्वं° 4 B आसादयति 5 B प्रियाया पि 6 B संप्रती° 7 P1 आयनेयीनियः ठकजपां 8 B घस्येयादेशः ।।५२।।

1 P2 text भूमीमवलम्ब्य भैमीम् । 2 P1 अयो ।; P2 अयोधीति । 2 B om. तस्य 4 P2 यस्यां यत्र 5 B भ्रुवौ च 6 B तत् 7 P2 तयोर्यस्य 8 P1 अधैर्येण 9 P1 om. स्म 10 P1 add. भूमीभैमीशब्दस्य व्यत्ययेन पाठान्तरम् ।।५३।।

1 P2 text °धूय° 2 P1 अथ स्म ।; P2 अथ स्मराज्ञामिति । 3 B वच 4 B उपवीतोऽपि 5 B °प्रवाहस्तस्यां 6 P1P2 कलुषं ।।५४।।

1 P2 text °गुंरुणा° 2 P1 हरि ।; P2 हरित्पतीनामिति । 3 P1P2 मां here 4 B सदशः 5 P1 add. त्वदीयमेवा° 6 B P2

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

विद्धि प्रतीहि 7 P1P2 add. स्वःप्रभूणां 8 P2 add. बहुलादरेण 9 B om. स्वप्रभु°....व्याख्या 10 P1 add. स्व° ॥५५॥

1 P1 विरम्य ।; P2 विरम्यतामिति । 2 B सपर्यया 3 P1 निविश्यतामासनम् 4 B om. इदानीं 5 B दूत्यम् अस्माकं 6 B om. या.... पाठान्तरम् ॥५६॥

1 P2 text कल्यानि कल्याणि 2 P1 कल्याणि ।; P2 कल्याणि कल्यानीति 3 B तवाङ्ककल्यानि; P2 कल्याणि 4 BP2 क्वचित् 5 P1 तरप्° 6 P2 °दात्वद्रव्यकर्षे 7 P1 om. ते 8 P2 add. सा ॥५७॥

1 P1 कौमार ।; P2 कौमारमारभ्येति । 2 B om. ते 3 P1 om. च 4 P1 add. अरुणस्य ॥५८॥

1 P1 चरच्चिरम् ।; P2 चरच्च(च्चि)रमिति । 2 P1 om. अद्य 3 B om. चिरं, P2 aft. सत 4 P1 om. त्वयि 5 B om. भजन्त्याम् 5 B भूतानाम् 7 B P2 om. विसर्गः 8 B P1 add. लुञ्चितं 9 B मैम्यां 10 B द्वैराज्यं 11 B तस्य 12 P1P2 महामात्यश्री° 13 P1 om. राज्यं ॥५९॥

1 P1 तेषाम् ।; P2 तेषामिदानीमिति । 2 P2 दिक्पतीनां 3 P1 केवला 4 B किल आशा तव 5 B om. भार्या 6 B om. दिशां 7 P1 add. आशास्तु नासाद्येति पाठान्तरम् ॥६०॥

1 P1 अने ।; P2 अनेन सार्धमिति । 2 B प्रेम्णा° 3 B द्वितीया-मटनिम् अग्रभागम् here and om. परमप्रकर्ष°; P1 om. परां....तथा 4 P1 add. धनुषि 5 P1 om. मौर्वी 6 P1 कोटिं परमप्रकर्षमध्यरोहत् । 7 B विधेयः 8 B °सक्तत्वात् 9 P1 add. प्रेमशब्दः पुंसि नपुंसके च ॥६१॥

1 P2 text प्रयाते 2 P1 प्राचीम् ।; P2 प्राचीं प्रयाते इति । 3 B om. वा मूल° 4 P1 उदयं 5 P1 add. श्री सूर्यं° 6 P1 om. श्रीसूर्य 7 P2 चापाच्च 8 P1P2 om. च 9 B P1 तत्— ॥६२॥

1 P1 त्रिनेत्र ।; P2 त्रिनेत्रमात्रेति । 2 P1P2 om. एव 3 B om. सता 4 P1P2 om. सति 5 P2 om. कामः 6 B om. गन्ता 7 B °नेत्रत्वात् ॥६३॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 पिकस्य ।; P2 पिकस्य वाङ्मात्रेति । 2 B धन्वि° 3 P2 °राघनेन 4 B °राधयेत्— ।।६४।।

1 P2 text °गिर° 2 P1 तमो ।; P2 तमोमयीकृत्येति । 3 P1 add. कुहूगिरः 4 P1 add. सत्या वाक् यस्य तं 5 B °मयीं कृत्वा 6 P2 °लक्षणस्य 7 P1 सर्वान्ध°— ।।६५।।

1 P1 शरैः प्र ।; P2 शरैः प्रसूनैरिति । 2 P1 om. स 3 B इन्द्रस्य 4 P1 शक्नोति न 5 B om. यः and read °सहितस्तस्य 6 P1 प्रहारः कः; P2 add. क्रियते क्व— ।।६६।।

1 P1 धृता ।; P2 धृताधृतेरिति । 2 B रहिजाताः 3 P1 दरिद्र° 4 B P1 om. अन्यस्याः 5 B °छिन्नौ; P1 नित्यं 6 B कृता 7 P2 अभिचारिणोः— ।।६७।।

1 P1 रवैर्गुणास्फालन ।; P2 रवैर्गुणास्फालेति । 2 B °नभे 3 P1 दक्षिणा 4 P2 om. °इयं — ।।६८।।

1 P1 अनङ्ग । 2 B वहन्तम् and om. वहन्ते; P1 वहताम् 3 P1 °प्रशमनाय 4 P1 क्व क्व ?। 5 B °ज्वरोद्भावः ।।६९।।

1 P1 दमस्वसः । 2 B om. यत् 3 B सहस्रदृगपि 4 P1 om. तव; P2 भव 5 P1 अनुप्रासः । सम्पूर्णस्याऽपि अत्यल्पे प्रयत्नपरत्वात् विषमत्वं च । यथा—विपुलेन सागरशयस्ये (का° प्र° x. 541)ति हीनेन गुरुकार्यकरणात् ।।७०।।

1 P1 अग्न्या । 2 B महेश्वरस्य 3 B P2 आराधयन्ति aft. °परत्वम् 4 P1 वचनकलपात् 5 B om. आदिष्टः 6 P2 °दीप्तिम्; P1 add. पदार्थे वाक्यवचनम् ओजः ।।७१।।

1 P1 त्वद्गो । 2 P1 add. स 3 B om. न 4 B P1P2 om. सन्तापयिता; edr. add. सन्तापयिता 5 B P1 om. स तथा 6 P2 add. इत्यर्थः 7 P2 add. अनुभूयं(तं)— ।।७२।।

1 P1 अदाहि ।; P2 अदाहि य इति । 2 B नव 3 B पुरा महादेवस्य 4 P2 om सन् 5 B om. न— ।।७३।।

1 P1 सोमा ।; P2 सोमाय कुप्यन्निवेति । 2 P1P2 आचमति 3 P1 ततो 4 P1 विप्रयुक्तो 5 B कतमे 6 B om. कतमे········ पाठान्तरम् ।।७४।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 शरैरजस्रम् ।; P2 शरैरजस्रमिति । 2 P2 om. पूजापरैः 3 B om. तु………साभिप्रायम्— ॥७५॥

1 B स्मरे ।; P1 स्मरेन्वने । 2 P1 om. रच°; B om. वक्षसि 3 B P2 ज्वालानां कीलानां 4 B °विल— ॥७६॥

1 P1 पुत्री । 2 B P2 om. पुत्री 3 B तथैव 4 B स्मरतप्र° 5 B °ज्वालने 6 P1 स्मरस्य— ॥७७॥

1 P1 तं दह्य । 2 B °मानेति । 3 P2 एवेन्धन° 4 P1 मलयः स्वयमप्याशां-- ॥७८॥

1 P1 स्मरस्य ।; P2 स्मरस्य कीर्त्येवेति । 2 P2 त्वत्° 3 P2 चन्द्रेण 4 B om. जर्जराणि । उत्प्रेक्षते 5 B कीर्त्यं इव 6 B om तथा 7 P2 तापिनीव ॥७६॥

1 P1 यस्तन्वि ।; P2 यस्तन्वि भर्त्तेति । 2 P2 om. पान्थः 3 B मनोऽपि रहितामेव; 4 P2 रहितमेव ॥८०॥

1 B तया नेति ।; P1 तथा ।; P2 तथा न तापायेति । 2 B P2 ध्रुव° 3 P1 उत्थितं 4 B om. उत्थानं….कः 5 P1 add. अश्वामुखः संक्षुभितः पाठान्तरम् । 6 P1 बाऽयं 7 B om. यद्यत्र…………कृता ॥ 8 P2 °मुख° 9 P2 om. कृता ॥८१॥

1 P2 text श्रिता 2 P1 यत्प्रत्युत । 3 B त्वत् 4 B °वल्ली 5 B om. आश्रिता 6 P2 अधिकमेव तापं धत्ते— ॥८२॥

1 P1 न्यस्तम् ।; 2 P1 add. पूर्वश्लोकोक्तशैत्यगुणादथवा वर्ण्यमानत्वेन प्रकान्तात् ततो 3 P2 च भासते 4 B मग्ने 5 B ततः 6 P1 वर्त्तन्ते ॥८३॥

1 P1 इति त्रि । 2 P2 विषयेषु 3 P2 भवन्ती 4 P2 add. सफलं 5 B अध्याप्य 6 B add. कामबाण° and om. कामचारो; P2 कामचारो विक्रमस्य 7 P2 स तस्य— ॥८४॥

1 P1 सारो । 2 P2 आयासीत् 3 B उत्कृष्टं 4 P1 add. न 5 P1 इवेति किम् ?। 6 P1 श्रिव 7 B P1P2 om. भविता; edr. add. भविता 8 P2 om. इति— ॥८५॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 समम् । 2 B om. हरितां 3 P1 add. च 4 P1 श्वास° 5 P2 किं भूते ?। 6 P1 मयं; P2 भवं यत् 7 P1P2 निःश्वासश्चलितः । 8 P1 add. हरितां तापदुःस्थमरुतां हरितां दुःखतीक्ष्णैर्मरुद्भिः समं प्रस्थानं प्रयुक्तमेव— ।।८६।।

1 P1 अपा ।; P2 अपास्तपाथेयेति । 2 B om. अध्वा 3 B नमितः 4 P1 यातः 5 B om. केन·····°रथेनैव 6 B om. अमृतादपि स्वादीयसा 7 P1 add. दमयन्तीं प्राश्याम इति बुद्धया । किं भूतेन ?। 8 P1P2 om. च 9 B निर्वापयता 10 P1 om. तैः 11 P2 मार्गेण 12 P1 add. तद्विषयमनोरथेन सुधाकार्यकरणादतिशयोक्तिः ।।८७।।

1 P2 text अपास्त° 2 P1 त्वच्चुम्बि । 3 P1 add. तैरित्यस्य विशेषणेनाऽतिव्यवहितत्वं माभूदिति 4 P2 किं भूतेन ?। 5 B कीदृशेन ?। 6 B P1 क्षुत्; P2 add. क्षुत् 7 P1 add. अतिशयोक्तिः ।।८८।।

1 P2 text स्वर्लोकनाथैः 2 P1 देवीम् ।; P2 देवीं मनोभूशरेति । 3 B P2 अथाऽनन्तरं at the end 4 P1 add. स्वर्लोकनाथैः 5 P2 लगन्ति न 6 P1P2 तैः सोऽपि 7 P1P2 कारणेन 8 P1 add. अनुप्रासोऽतिशयोक्तिः । इव मज्जयद्भिरिति पाठे उत्प्रेक्षाऽपि ।।८९।।

1 P1 अलङ्कृ ।; P2 अलङ्कृतासन्नेति । 2 B चलन्तो; P2 om. चलतो··········सन्देश° 3 P1 add. तु 4 B कीदृशैः ?। 5 B om. सन्देशन°····· ···पाठान्तरम् ।। 6 P1 add. अनुप्रासो रूपकं च ।।९०।।

1 P1 प्रत्येकम् ।; P2 प्रत्येकमेते इति । 2 P1P2 एते देवाः हे तन्वि ! 3 P2 om. स्तनाभ्यां 4 B णमुल् 5 B °कारिणी 6 B कीदृशानाम् ?। 7 B om. त्वं····पाठान्तरम् 8 P1 add. अनुप्रासो रूपकं च । P2 add. शल्यजुषामिति च ।।९१।।

1 P1 त्वत्कां ।; P2 त्वत्कान्तिमस्माभिरिति । 2 B om. खलु; P1 add. वाक्यालङ्कारे 3 B पिपासात्; P1 पिपासुः सन् 4 B P1P2 °यरेहो 5 B P1P2 °कुशो 6 B मन्तु बंपि 7 B विणो; P1 इणो; P2 चिणो 8 B पुंसि मि; P1 पम्मुसिमि; P2 पुषकुसुमि 9 P1 add. समासोक्तिः ।।९२।।

1 P1 अनुग्रह इत्यादि । 2 B om. द्रुतं शीघ्रं 3 P1 add. अनुप्रासः ।।९३।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 B दयस्य; P1 दय । 2 B दयस्थ 3 P1 प्रह्वैः 4 P1 om. कथं 5 P2 भैमि ! 6 P1 यतः 7 P1 add. क्रियापदं 8 B om. रुचिरम् 9 B पाठे; P1 पाठोऽपि 10 B om. पाठः‥‥‥प्रिये इति; P1 add. एव 11 P1 add. अनुप्रासो रूपकमतिशयोक्तिश्च ॥९४॥

1 P1 त्वदर्थि । 2 P1 परं 3 P2 om. सन्तु 4 P2 om. परः 5 B P1P2 यदि चेत्; edr. चेत् यदि 6 P1P2 तत् 7 B पञ्चबाणः 8 P1 om. सोऽपि‥‥‥साक्षी ॥ 9 P2 add. कूट°— ॥९५॥

1 P1 अस्माकम् । 2 B हे स्त्रि !— 3 P2 श्रिता 4 P1 द्विपतः — ॥९६॥

1 P1 दयोदय । 2 P1 आश्रयामः 3 B om. भुवः‥‥पाठान्तरम्; P1 add. जन्मभूमिरित्यस्य गुह्यार्थत्वेन व्रीडादप्यश्लीलत्वं नाशङ्कनीयम् । इह हि लक्षणया गुह्यार्थं, न तु स्वशक्त्येति । तथा च वामनः—असभ्यार्थान्तरम-सभ्यस्मृतिहेतुश्चाऽश्लीलम् (का° सू° II. i. 14) । यथा वर्ज्यं इति तेजो विष्टार्थम् । यथा कृकाटिका इत्यश्लीलं दोषमभिधाय, न गुह्य(प्त)लक्षित-संवृतानी(का° सू° II. i. 15)त्यपवादमाह स्म । तत्राऽप्रसिद्धासभ्यमुक्तम् । यथा सम्बाध इति सङ्कटार्थं न गुह्यार्थं लाक्षणिकासभ्यं लक्षितम् । जन्मभूमिः लोकसंवीतं संवृतम् । सुभगा भगिनीत्यादि । अतो लक्षितत्वाद्दोषाभावः ॥९७॥

1 P2 text only धिनोति‥‥98, स्वर्णे‥‥99. 2 P1 स्वर्णैः । 3 P1 om. हे 4 B om. तस्याः 5 P2 °कालेषु 6 B सुवर्णादिपुष्पैः 7 B सुवर्णैः 8 B P2 यतः 9 B पीतबाणस्य सुवर्णादिबाणस्य— ॥९८॥

1 P1 धिनोति ।; P2 धिनोति नास्मानिति । 2 P1 om. त्वया 3 B जलन; P2 add. कमलेन 4 P2 प्रीणाति 5 B उपमते 6 B न च; P2 om. नम्रे— ॥९९॥

1 P1 वयम् ।; P2 वयं कलादा इवेति । 2 B om. कामस्य 3 B प्रभावं 4 B भ्रू° 5 B om. सुभ्रु‥‥‥°त्कारकारी 6 P1 दुर्विदग्धम् 7 B दहान 8 B om. कलां‥‥‥कलादः 9 P1 add. सुवर्णं माद्यति आखण्डयति वा— ॥१००॥

1 P1 सुधासर । 2 B सुनाशुकस्य 3 B न पुनः 4 B om. इति 5 B तद्यथा 6 P1 add. अनुप्रासो रूपकं विरोधोऽतिशयोक्तिः ॥१०१॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 खण्ड: खलु। 2 P2 om. खलु 3 P1 वाच एव; P2 वाण्या एव 4 P1P2 उच् 5 B om. हे····वाण्याः 6 P2 त्वद्वाण्या 7 B om. तस्मा°····°विधौ 8 P2 add. वास्थास्नापवतिब्यधिहृनिभ्य: क: (दुर्ग° IV. v. 66)। 9 P1 इक्षुरिति प्रसिद्धम् aft. तृणविशेषणं च। 10 B om. रसोत्थं°····च। 11 P1 add. अनुप्रास उत्प्रेक्षा च ॥१०२॥

1 B ददाम इति। P1 ददामेत्यादि।; P2 ददाम किं ते सुधयाऽधरेणेति। 2 B P2 ददाम: 3 P1P2 °भूतया 4 B om. सुधया 5 P1P2 om. च 6 B om. मखे यात्रे 7 B P1P2 om. भोजि; edr. add. भोजि 8 B om. यागभागदानं यत् 9 B om. अस्ति 10 P1 add. अनुप्रासा रूपकमतिशयोक्ति: ॥१०३॥

1 P1 प्रिये वृणु। 2 B अस्मात् 3 P1 वृणु 4 P1 add. लज्जाकरम्। त्रयोदञ्चि वच इति पाठान्तरम। 5 B प्रकारेण 6 B add. इति; P1 add. अनुप्रास: काव्यलिङ्गं रूपकमतिशयोक्तिश्च ॥१०४॥

1 P1 नास्माक। 2 B P2 पीयूषान्यमृ° 3 B वाणा 4 B तवाधरं— ॥१०५॥

1 P1 प्लुष्ट:।; P2 प्लुष्ट: स्वैश्चापरोपैरिति। 2 P1 om. बाणै: 3 B मनसो 4 B P1 om. मनसिजतां 5 P2 °सिजवत्त्वं 6 B धत्ते 7 P2 om. च 8 B वलाभावात्; P1 लोभात् 9 P1 °कारो 10 P2 मनस: 11 B P1P2 om. ते; edr. add. ते 12 B श्वेतै: 13 B भल्लो 14 B सकर°; P1 °युग्मं 15 B om. अधीनो 16 B तत्; P1 om. स 17 P2 स्रग्धरावृत्तम् here. 18 B om. स्रग्धरावृत्तम् ॥ 19 P1 add. पूर्वान्तवत् स्वरसन्धौ क्वचिदेव परादिवत्। पूर्वपरयोरेकदेश: स्वर: सन्धौ विधीयमान: क्वचित्पूर्वान्तवद्भवति। क्वचिच्च परादिवत्। तथा च पाणिने: स्मरणम्। अन्तादिवच्चे (पा° VI. i. 85)ति पराक्षिवद्भावे च व्यञ्जनमपि तद्भक्तत्वात्तदादिवद्भवति। क्वचित्पदमध्येऽपि समुद्रादौ यतिर्भवेत्। यदि पूर्वापरौ भागौ न स्यातामेकवर्णकौ इति पूर्वश्लोकोक्त: पूर्वापरभागयोरेकवर्णकत्वं प्रतिषेध:। अन्तादिवद्भावविधावपि सम्बध्यते। तेन तस्या, आताम्रमजितपूर्णेन्दुशोभं भातीत्येवंविधा यतिर्न भवति। अतश्च युगाधीनेतिमरात्मभूरित्यन्तादिवद्भाव: ॥१०६॥

1 P2 text चरित्रेषु 2 P1 स्वप्नेत्यादि। 3 P1 om. तत् 4 B हिरण्ण 5 P2 om. तै: 6 P2 नाक्रान्ता 7 B °तया 8 B रात्रौ once 9 B add. बद्ध: 10 B om. °अमृत°; P2 °म्भोनिधौ 11 P1 तु

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

12 P1 न 13 B P2 मग्नं 14 B P2 मग्नं 15 P1 om. च 16 B om. स्रग्धरा वृत्तम् ॥१०७॥

1 P2 text वृत॰ 2 P1 इति भृत ।; P2 इति धृतसुरेति । 3 P1 om. इति 4 B om. पुष्पिताग्रा वृत्तम्— ॥१०८॥

1 P1 आनन्द । 2 B om. त्वं 3 P2 om. वा 4 B P1P2 न; edr. नो 5 P1 om. तत 6 B om. वसन्ततिलकावृत्तम् ॥१०९॥

1 P2 text तदेवाद्धर्म 2 P2 text वैरसेनि॰ 3 P2 text add. निसृष्टार्थनैषधो नाम 4 P1 श्रीहर्षमित्यादि । 5 P1P2 वेति 6 B om. शार्दूलविक्रीडितं वृत्तम्— ॥११०॥

1 P2 ॰श्रमा॰ 2 P2 ॰गौर॰ 3 P2 गौर॰ 4 P2 सम्राट्स्थपत्यग्नि॰— ॥५॥

1 P1 महापण्डितश्री॰; P2 om. चाण्डूपण्डित॰ 2 B निसृष्टार्थनैषधो नाम at the end. 3 B add. ग्रन्थसङ्ख्या— ५००॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

सर्ग—९

पूर्वसर्गे नलस्यात्मीयादृश्यत्वेच्छां दर्शयित्वा तद्दर्शनानन्तरं तदीयरूपलावण्यगाम्भीर्यमाहात्म्यादिभिर्गुणैः सर्वासामन्तःपुरपुरन्ध्रीणाम्[1] अद्भुतस्मिततापूर्वकमप्रागल्भ्यं दर्शयित्वा दमयन्त्या एव प्रागल्भ्यवशात् नलसंवादपूर्वं केशादिनखपर्यन्तं तामेव निर्वर्ण्य इन्द्रादिदिक्पालानां सन्देशकथनेन दूतधर्मं निर्व्याजं व्यञ्जयित्वा, इदानीं नलस्य कुलनामप्रश्नस्य प्रतिवचनमुखेन क्रमेण नलमपि प्रकटं चिकीर्षुः उभयोरप्युद्भ्रान्तिं विवर्णयिषुः श्रीहर्षमहाकविर्नवमं सर्गमारभते ।

इतीयमक्षिभ्रुवविभ्रमेङ्गितस्फुटामनिच्छां [2]सुतनुर्विवृण्वती ।
तदुक्तिमात्रश्रवणेच्छयाऽशृणोद्दिगीशसन्देशगिरां न गौरवात् ॥१॥

[3]इतीयमक्षिभ्रुवेति । इयं दमयन्ती सुतनुः [4]इत्येवंप्रकारां दिगीशानां सन्देशगिरां तस्य नलस्य उक्तिमात्रश्रवणस्य इच्छया श्रुतिसुखेच्छया अशृणोत्, न इन्द्रादीनां गौरवात् । किं कुर्वन्ती ?। अनिच्छां विवृण्वती । विवरीतुमुत्सुका इति पाठान्तरम् । किं भूताम् ?। अक्षिणी च भ्रुवौ अक्षिभ्रुवं तस्य विभ्रमेङ्गितेन अक्षिभ्रूसंज्ञादिचेष्टाभिः स्फुटां प्रकटाम् अनिच्छाम् । [5]अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्वनड्हर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीव [6]पदष्ठीव नक्तन्दिवरात्रिन्दिवाह [7]दिवसरजसनिः श्रेयसपुरुषायुषद्वयायुषत्र्यायुषर्ग्यजुषजातोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वा (पा॰ V. iv. 77)इति पाणिनिप्रणीत[8]द्वन्द्व[नि]पातेनाऽदन्तता ।[9] वष्टि भागुरिरल्लोपमि(वा॰– पा॰ II. iv. 82)त्यादिना टापो विधानात् गिराशब्दः । [10]गिरमिति पाठान्तरम् । वंशस्थवृत्तम् ॥१॥

तदर्पितामश्रुतवद्विधाय तां दिगीशसन्देशमयीं सरस्वतीम् ।
इदं तमुर्वीतलशीतलद्युतिं जगाद वैदर्भनरेन्द्रनन्दिनी ॥२॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

तदर्पितामिति । सा वैदर्भनरेन्द्रस्य नन्दिनी देवी तम् उर्वीतलस्य शीतलद्युति चन्द्रं नलम् इदं जगाद । किं कृत्वा ?। तेन[1] दूतेन अर्पितां[2] तां दिगीशानां सन्देशमयीं सरस्वतीं वाणीम् अश्रुतवत् अनाकर्णितामिव विधाय । तत्प्रकृतवचने मयट् (पा° V. iv. 21)[3] ।।२।।

मयाङ्ग ! पृष्ट: कुलनामनी भवानमू विमुच्यैव किमन्यदुक्तवान् ।
न मह्यमत्रोत्तरधारयस्य किं ह्रियेऽपि सेयं भवतोऽधमर्णता ।।३।।

[1]मयाङ्ग ! पृष्ट इति । अङ्ग [2]इत्यहो । मया त्वं त्वत्सम्बधिनी कुलं च नाम च ते पृष्ट: सन् अमू द्वेऽपि विमुच्य परित्यज्यैव किमन्यत् किमपि[3] उक्तवानसि ?। किं [भ]वत[4] इयं सा अधमर्णता ऋणप्रतिदानं ह्रियेऽपि लज्जायै न भवति । अपि तु तथा । किं भूतस्य तव ?। मह्यम् अत्र [5]प्रश्ने उत्तरं प्रतिवचनमेव ऋणं धारयतीति उत्तरधारय: तस्य तथा । [6]अनुपसर्गाल्लिम्पविन्दधारि[7]पारिवेद्युदेजिचेतिसातिसाहिभ्यश्चे (पा° III. i. 138)ति श: । [8]कात्यायनीये तु, [9]साहिसातिवेदी (iv. ii. 54) त्यादिना धारे: श: प्रत्यय: । धारेरुत्तमर्ण (पा° I. vi. 35) इति सम्प्रदानम् । [10]द्वयेऽपि सेयमिति पाठद्वयेऽप्यत्र अधमर्णतैव इति व्याख्या ।।३।।

अदृश्यमाना क्वचिदीक्षिता क्वचिन्ममानुयोगे भवत: सरस्वती ।
क्वचित्प्रकाशां क्वचिदस्फुटार्णसं सरस्वतीं जेतुमना: सरस्वतीम् ।।४।।

[1]अदृश्यमानेति । इय भवत: सरस्वती वाणी सरस्वतीं [2]नाम्नीं सरस्वतीं नदीं जेतुमना वर्त्तते । किं भूता ?। क्वचित् मम अनुयोगे कुलनामप्रश्ने अदृश्यमाना । तथा क्वचित् इन्द्रादिसन्देशे ईक्षिता दृष्टा । किं भूताम् ?। क्वचित् कुरुक्षेत्रे मोक्षतीर्थादौ च प्रकाशां प्रकटाम् । तथा क्वचिच्च प्रयागे विनशनादौ अस्फुटम् अप्रकटम् अर्ण: पानीयं यस्या: तां तथा[3] ।।४।।

गिर: श्रुता एव तव श्रव:सुधा: श्लथा भवन्नाम्नि तु न श्रुतिस्पृहा ।
पिपासुता शान्तिमुपैति वारिजा न जातु दुग्धान्मधुनोऽधिकादपि ।।५।।

गिर:[1] श्रुता एव[इति] । तव श्रवसो: कर्णयो: सुधारूपा गिर: श्रुता एव । तु पुनर्भवतो नाम्नि श्रुते: श्रवण[स्य] स्पृहा न[2] श्लथा

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

वर्त्तते । [3]अभवदिति भवतेर्लङि क्रियापदं वा । यतः वारिणः उदकाज्जाता पिपासुता पानेच्छा [4]जातु कदाचिदपि[5] उदकापेक्षया अधिकादपि दुग्धान्मधुनश्च [6]न शाम्यति । केचिदाहुः—मधुनः सकाशादधिकादपि दुग्धात् न शान्तिम् उपैति, किन्तु वारिण एव ।।५।।

बिभर्ति वंशः कतमस्तमोपहं भवादृशं नायकरत्नमीदृशम् ।
तमन्यसामान्यधियावमानितं त्वया महान्तं बहु मन्तुमुत्सहे ।।६।।

[1]बिभर्ति वंश इति । कतमो वंशः अन्वयः ईदृशं भवादृशं नायकरत्नं स्वामिनं तेजसा तमोपहं [2]पापहन्तारं बिभर्ति ?। कस्मिन् वंशे[3] जातः ?। हारमध्यस्थरत्नं[4] नायकाख्यं[5] वंशमध्येऽपि उत्पद्यते । तदपि अन्धकारं हन्ति । अहं तम् अन्वयं त्वया कृत्वा[6] महान्तं भणित्वा बहु मन्तुम् उत्सहे । [7]तत्र बहुमानं करोमि । यतः पूर्वम् अन्येषाम् अन्वयानां सामान्यधिया समानबुद्ध्या अव[8] मानितम् अवगणितम् ।।६।।

इतीरयित्वा विरतां स तां पुनर्गिराऽनुजग्राहतरां नराधिपः ।
विरुत्य विश्रान्तवतीं तपात्यये घनाघनश्चातकमण्डलीमिव ।।७।।

[1]इतीरयित्वेति । [2]स नराधिपः तां देवीम् इति ईरयित्वा विरतां सतीं पुनरपि गिरा अनुजग्राहतराम् उवाच । यथा घनाघनः तपस्य ग्रीष्मस्य अत्यये वर्षागमे विरुत्य शब्दं कृत्वा विश्रान्तवतीं चातकमण्डलीं वृष्ट्या कारणभूतया गिरा गर्जितेन अनुगृह्णाति ।।७।।

अये ममोदासितमेव जिह्वया द्वयेऽपि तस्मिन्ननतिप्रयोजने ।
गरौ गिरः पल्लवनार्थलाघवे मितं च सारं च वचो हि वाग्मिता ।।८।।

अये ! [1]ममेति । अये आमन्त्रणे । मम जिह्वया तस्मिन् कुलस्य[2] नाम्नश्च[3] द्वयेऽपि प्रश्नविषये उदासीतमेव उदासीनया जातम् । यतः किं भूते ?। न अतिशयेन प्रयोजनं यत्र तस्मिंस्तथा निष्कार्ये । यस्मात् गिरो वाण्याः पल्लवनं बहुभाषिता अर्थस्य लाघवं च [4]स्वल्पार्थकथनं च उभयमपि गरौ विषसदृशौ । किन्तु सा वाग्मिता प्रशस्तवक्तृता यन्मितं स्वल्पपदं सारं महार्थं च वचः । वाचो ग्मिनि (पा॰ V. ii. 124) रिति [5]ग्मिनिः ।।८।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

वृथा कथेयं मयि वर्णपद्धतिः कयाऽऽनुपूर्व्या समकेति केति च ।
क्षमे समक्षव्यवहारमावयोः पदे विधातुं खलु युष्मदस्मदी ।।९।।

वृथा[1] कथेयमिति । तावत् इयं कथा इति कथनं वृथा व्यर्थम् । यत् मयि विषये का[2] वर्णानां पद्धतिः ?। नाम्नि के वर्णाः ?। तथा सा पद्धतिः [3]कया आनुपूर्व्या केन क्रमेण समकेति सङ्केतिता ?। [4]अयमभिसन्धिः—नलनाम्नि तावत् नकाराकारल[5]कारा वर्णाः । तत्र च लः प्रथमं नकारः पश्चात् । अथ नः पूर्वं लकारः पश्चादिति च कथा व्यर्था । खलु यतः आवयोः समक्षं प्रत्यक्षं व्यवहारं[6] वार्त्तां युष्मच्च अस्मच्च एते द्वेऽपि पदे विधातुं क्षमे समर्थे ।[7] परोक्षव्यवहारे हि नामग्रहणपूर्वकं वार्त्ता क्रियते । प्रत्यक्षं तु 'त्वं गच्छ', अहं करोमि । इत्यादिनैव भवति[8] ।।९।।

यदि स्वभावान्मम नोज्ज्वलं कुलं ततस्तदुद्भावनमौचिती कुतः ।
अथाऽवदातं तदहो विडम्बना [1]तथा कथा [2]प्रेष्यतयोपसेदुषः ।।१०।।

यदि[3] स्वभावादिति । यदि मम कुलं स्वभावादेव उज्ज्वलं न भवति । किन्तु सकलङ्कं स्यात् । ततः तस्य कुलस्य उद्भावनं कथनं मम कुत औचिती नोचितम् । अथ अवदातं निर्मलं मम कुलं तत् अहो तथा तादृशी कुलकथनरूपा कथा विडम्बना विगोपकः । यतः किं भूतस्य ?। मम [4]प्रेष्यतया [5]भृत्यतया दूतत्वेन उपसेदुषः लज्जाकरत्वात् । [6]कथाप्रेष्य इति समस्तं वा पदम् । कथाप्रेष्यो दूतः[7] ।।१०।।

इति प्रतीत्यैव मयावधीरिते तवाऽपि निर्बन्धरसो न शोभते ।
हरित्पतीनां प्रतिवाचिकं प्रति श्रमो गिरां ते घटते हि साम्प्रति ।।११।।

[1]इति प्रतीत्येति । इति [2]प्रतीत्यैव विचार्य मया अवधीरितेऽवगणिते त्वत्प्रश्ने तवाऽपि निर्बन्धरसः आग्रहो न शोभते[3] । हि यस्मात् हरितां दिशां पतीनां[4] प्रतिवाचिकम् उत्तरदानं प्रति साम्प्रति ते तव गिरां श्रमो घटते । [5]अभितःपरितःसमयानिकषाहाप्रतियोगेषु[6] दृश्यते (वा° 137) इति वचनाद् द्वितीया[7] ।।११।।

तथाऽपि निर्बध्नति ! तेऽथवा स्पृहामिहानुरुन्धे मितया न किं गिरा ।
हिमांशुवंशस्य करीरमेव मां निशम्य किं नासि फलेग्रहिग्रहा ।।१२।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]तथापि निर्बध्नतीति[2]। अथ वा हे तथापि[3] निर्बध्नति ! आग्रहपरे ! अहं मितया संक्षिप्तया गिरा वाचा ते[4] तव स्पृहां किं न अनुरुन्धे ?। अपि तु पूरयामि। त्वं [5]मां हिमांशुवंशस्य[6] करीरम् अङ्कुरमेव निशम्य श्रुत्वा फलेग्रहि ग्रहा[7] सफलग्रहनिर्बन्धो[8] यस्याः सा तथाविधा किं नाऽसि न [9]भवसि ?। वंशे हि करीरेण भवितव्यम्[10]। शमो (876) दर्शने। [11]नाऽनुबन्धत्वम्। सोमवंश्यं मां मत्वा सफलाग्रहा [12]भव[13] ।।१२।।

[1]महाजनाचार परम्परेदृशी स्वनाम नामाऽऽददते न साधवः ।
अतोऽभिधातुं न तदुत्सहे पुनर्जनः किलाऽऽचारमुचं विगायति ।।१३।।

[2]महाजनाचारेति। ईदृशी महाजनानामाचारपरम्परा। यत्[3] साधवः स्वं नाम नाऽऽददते न कथयन्ति। [4]अत्रोत्तरश्लोके च, आङो दोऽनास्यविहरणे (पा° I. iii. 20) इत्यात्मनेपदम्। नामे[त्य]भ्युपगमे। अतः पुनरहं [5]तत् स्वं नाम अभिधातुं नोत्सहे[6]। किल यतः[7] जनः आचारमुचं [8]निराचारं विगायति ।।१३।।

अदोऽयमालप्य शिखीव शारदो बभूव तूष्णीमहितापकारकः ।
अथाऽस्य रागस्य दधा पदे पदे वचांसि हंसीव विदर्भजाऽऽददे ।।१४।।

[1]अदोऽयमालप्येति। अयं नलः अदो वचः आलप्य तूष्णीं बभूव। किं भूतः ?। अहितानां शत्रूणामपकारकः। तथा [2]शारं शत्रुं हिंसां[3] ददातीति। यथा शरत्कालसम्बन्धी शिखी मयूरः अहीनां सर्पाणां तापकरः। वर्षासु आलप्य तूष्णीं भवति। अथ विदर्भजा अस्य नलस्य पदे पदे रागस्य प्रीतेः दधा[4] कर्त्री सती वचांसि आददे। सुप्तिङन्तं पदम् (पा° I. iv. 14)। का इव ?। हंसीव। यथा मयूरानन्तरं शरदि हंसाङ्गना वचांसि मधुराणि नदति। किं भूता ?। पदे पदे चरणे [5]चरणे आस्यस्य मुखस्य यो रागो रक्तत्वं तस्य दधा[6] धारयित्री। हंसानां मुखं चरणौ च रक्तौ। [7]ददातिदधात्योर्विभाषे (पा° III. i. 139) ति शः[8] ।।१४।।

सुधांशुवंशाभरणं भवानिति श्रुतेऽपि नाऽपैति विशेषसंशयः ।
कियत्सु मौनं वितता कियत्सु वाङ् महत्यहो वञ्चनचातुरी तव ।।१५।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]सुधांशुवंशेति । भवान् सुधांशोः सोमस्य वंशे आभरणभूतः इति श्रुतेरपि विशेषस्य संशयः सन्देहो न अपैति । कस्त्वम् ?। इति [2]सन्देहो न याति । अहो तव महती [3]वञ्चनचातुरी [4]विप्रलम्भचतुरता । यतः[5] कियत्सु प्रश्नेषु[6] मौनं कृतम् । कियत्सु च वाग्वितता[7] उत्तरं [8]दत्तम्[9] ।।१५।।

मयाऽपि देयं प्रतिवाचिकं न ते स्वनाम मत्कर्णसुधामकुर्वते ।
परेण पुंसा हि ममापि संकथा कुलाबलाचारसहासनासहा ।।१६।।

[1]मयापि देयमिति । मयाऽपि हे[2] दूत ! ते[3]. तुभ्यं प्रतिवाचिकं न देयम् । किं भूताय ?। [4]स्वं नाम मम कर्णयोः सुधाम् अमृतम् अकुर्वते । हि यतो ममाऽपि परेण पुंसा सह संकथा कुलाबलानाम् आचारेण सह या आसना एकस्थानोपवेशनं[5] [6]तत्र असहा असमर्था । कुलस्त्रीणामाचारः परपुरुषवार्त्ता च एकत्र न तिष्ठतः[7] ।।१६।।

हृदाभिनन्द्य प्रतिबन्द्यनुत्तरः प्रियागिरः सस्मितमाह स स्म ताम् ।
वदामि वामाक्षि ! परेषु मा क्षिपस्त्वमीदृशं माक्षिकमाक्षिपद्वचः ।।१७।।

[1]हृदाभिनन्द्येति । स तां[स]स्मितम् आह स्म । किं कृत्वा ?। प्रिया[या]गिरो वाणी हृदा अभिनन्द्य स्तुत्वा[2] । किं भूतः ?। प्रतिबन्द्या संमुखेन वादेन अनुत्तरः । त्वं यदि नाम न भाषसे ततो ममापि गदितुम् आचारो नास्ति इति प्रतिबन्दीम् उक्त्वा उत्तररहित[ः] कृतः । तादृशमेव प्रतिवचनं यत्र वादिनं प्रतिक्रियते[3] । सा प्रतिबन्दी नाम उत्तरजातिः । हे वामाक्षि ! [4]प्रधाननेत्रे ! अहं वदामि । त्वं स्वम् ईदृशं वचः परेषु विषये मा क्षिप[ः]मा वादीः[5] । अहं तु तव परो न भवामि । त्वदीय एवाऽहम् । किं भूतं वचः ?। माक्षिकं मधु आक्षिपत् मधुरत्वेन निर्जयत्[6] ।।१७।।

करोषि नेमं फलिनं मम श्रमं दिशोऽनुगृह्णासि न कञ्चन प्रभुम् ।
त्वमित्थमर्हाऽसि सुरानुपासितुं रसामृतस्नानपवित्रया गिरा ।।१८।।

[1]करोषि नेममिति । त्वं मम[2] इमं श्रमं फलिनं सफलं किं न[3] करोषि ?। यतः दिशः प्रभुम् इन्द्रादिमध्यात् कञ्चन[न] अनुगृह्णासि ।[4] त्वम् इत्थं रसो माधुर्यादि[ः] स एवामृतं तस्य स्नानेन पवित्रया गिरा सन्देशरूपया सुरान् उपासितुम् अर्हासि योग्याऽसि[5] ।।१८।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

सुरेषु सन्देशयसीदृशीं बहुं रसस्रवेण स्तिमितां न भारतीम् ।
मदर्पिता दर्पकतापितेषु सा प्रयाति दावार्द्दितदाववृष्टिताम् ।।१६।।

सुरेषु[1] सन्देशयसीति । त्वम् ईदृशीं रसस्य [2]स्रवेण क्षरणेन न स्तिमिताम् आर्द्रां बहुं [3]महार्थां भारतीं सुरेषु[4] न किं [5]सन्देशयसि ?। [6]सा त्वद्वाणी दर्पकेण कामेन तापितेषु तेषु विषये मया अर्पिता सती दावानलेन अर्द्दिते दावे कानने वृष्टिरूपतां प्रयाति[7] ।।१६।।

यथा यथेह त्वदुपेक्षयाऽनया निमेषमप्येष जनो विलम्बते ।
रुषा शरव्यीकरणे दिवौकसां तथा तथाऽद्य त्वरते रतेः पतिः ।।२०।।

[1][य]था यथेति । [य]था यथा इह तव उपेक्षया औदासीन्येन एष मल्लक्षणो जनः [2]निमेषमपि विलम्बते ।[3] त्वदपेक्षयेति पाठे त्वयि अपेक्षया अर्थित्वेनेति व्याख्येयम् । तथा तथा[4] अद्य रतेः पतिः कामः रुषा दिवौकसां शरव्यीकरणे वेधने त्वरते[5] ।।२०।।

इयच्चिरस्याऽवदधन्ति मत्पथे किमिन्द्रनेत्राण्यशनिर्न [1]निर्ममे ।
धिगस्तु मां सत्वरकार्यमन्थरं स्थिरः परप्रेष्यगुणोऽपि यत्र न ।।२१।।

[2]इयच्चिरस्येति ।[3] इन्द्रस्य नेत्राणि [4]किम् अशनिर्वज्रं न निर्ममे वज्रेण घटितानि ?। किं कुर्वन्ति ?। मत्पथे इयत् अधिकतरं चिरस्य[5] अवदधन्ति । मम मार्गं विलोकयन्ति सन्ति[6] । [मां] पुनः धिगस्तु, [7]अहं तु निन्द्यः । उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु । द्वितीयाऽऽम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते (वा° 136) इति वचनात् धिग्योगे द्वितीया । किं भूतम् ?। सत्वरे कार्ये कर्त्तव्ये मन्थरं चिरकारिणम् । यत्र मयि विषये परप्रेष्यगुणोऽपि स्थिरो न स्थितः[8] । [9]परस्य प्रेष्यो दूतोऽहं दूतत्वमपि मयि [10]नाऽस्ति[11] ।।२१।।

इदं निगद्य क्षितिभर्त्तरि स्थिते तयाऽभ्यधायि स्वगतं विदग्धया ।
अधिस्त्रि तं दूतयतां भुवः स्मरं मनो दधत्या नयनैपुणत्यये ।।२२।।

[1]इदं निगद्येति । इदं[2] निगद्य क्षितिभर्त्तरि नले स्थिते सति तया[3] विदग्धया इति स्वगतं मनसि अभ्यधायि[4] । किं कुर्वत्या[5] ?। तेषां देवानां नयनैपुण्यं नीतौ प्रावीण्यं तस्य व्यये अभावे मनो दधत्या । किं[6]

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

कुर्वताम् ?। तं भुवः पृथिव्या स्मरं कामं नलम् अधिस्त्रि स्त्रियं प्रति दूतं कुर्वताम् । एकान्ते मां प्रति ये इमं सुन्दरं[7] दूतं प्रस्थापयन्ति ते नीतिं न[8] जानन्ति । अव्ययं विभक्ति [9]समीपवृद्धयर्थाभावात्ययासम्प्रति-शब्दप्रादुर्भावपश्चाद्यथानु[10]पूर्व्ययौग[11]पद्य[12]सादृश्यसंपत्तिसाकल्यान्तवच-नेष्विव (पा° II. i. 6)ति विभक्तिवचनमव्ययं समस्यतेऽव्ययीभाव-श्च ।।२२।।

जडाधिपस्त्वामदिशन्मयि ध्रुवं परेतराजः प्रजिघाय स स्फुटम् ।
मरुत्वतैव प्रहितोऽसि निश्चितं नियोजितश्चोर्ध्वमुखेन तेजसा ।।२३।।

[1]जडाधिप इति । यस्त्वां मयि दूतमदिशत् स [2]ध्रुवं जडानामधिपः । अथ च [3]वरुणो जलपतिः । तथा यः त्वां स्त्रियं[4] प्रजिघाय स[5] स्फुटं न्यायेन परेतानां राजा । प्रेताः किमप्युचितं न जानन्ति । अथ च यमः । त्वं च निश्चितं मरुत् विद्यते यस्य स मरुत्वान् [6]वायुस्तेन प्रहितोऽसि । यः इति [7]न जानाति । [8]यत् स्त्रीपार्श्वे सुभगो दूतो न प्रहीयते । अथ च इन्द्रेण । तसौ मत्वर्थे (पा° I. iv. 19) इति तकारः । तथा ऊर्ध्वमुखं यस्य तेन सबलेन[9] तेजसा वह्निना त्वं[10] नियोजितः । अथ [11]च वह्निस्तेज ऊर्ध्वं प्रसिद्धम् ।।२३।।

अथ प्रकाशं निभृतस्मिता सती सतीकुलस्याभरणं किमप्यसौ ।
पुनस्तदाभाषणविभ्रमोन्मुखं मुखं विदर्भाधिपसम्भवा [1]दधे ।।२४।।

[2]अथ प्रकाशमिति । असौ विदर्भा [3]धिप सम्भवा मनसो मध्ये इति विचिन्त्य अथ प्रकाशं प्रकटं पुनरपि किमपि तस्य[दू]तस्य[4] आभाषणार्थं विभ्रमेण विलासेन उन्मुखं अभिमुखं[5] स्वमुखं दधे । परं निभृतं गुप्तं स्मितं हास्यं यस्याः सा तथाविधा सती । तथा सतीनां कुलस्य [6]किमप्यनिर्वचनीयमाभरणमाभरणरूपा स्वयम् ।।२४।।

वृथापरीहास इति प्रगल्भता न नेति च त्वादृशि वाग्विगर्हणा ।
भवत्यवज्ञा च भवत्यनुत्तरादतः प्रदित्सुः प्रतिवाचमस्मि ते ।।२५।।

[1]वृथापरीहास इति । अहो दूत ! अहं ते तव अतः प्रतिवाचं प्रदातुमिच्छुरस्मि । यतो वृथा वचनात् परीहासो वृथापरीहासः इति मध्यमपदलोपः[2] । अयमर्थः—यदि वृथा वदति दूतोऽयम्, इति कृत्वा

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

परीहासमात्रमेव क्रियते, [3]तदा प्रगल्भता[4] धृष्टता दोषो मम भवति । [5]तथा त्वादृशि पुरुषे चेत्, न न इति च प्रतिषेधवाक् उच्यते । तदा विशिष्टा गर्हणा मम निन्दा तथा भवति त्वयि विषये [6]उत्तरस्याऽ[7]दानात् अवज्ञा [8]च भवति । ततः प्रत्युत्तरं दास्यामि, न त्वङ्गीकारः ।।२५।।

कथं नु तेषां कृपयाऽपि वागसावसावि मानुष्यकलाञ्छने जने ।
स्वभावभक्तिप्रवणं प्रतीश्वराः कया न वाचा मुदमुद्गिरन्ति वा ।।२६।।

[1]कथं नु तेषामिति । तेषां देवानां मानुष्यकं[2] लाञ्छनं कलङ्को यस्य एवंविधे मल्लक्षणे जने कृपया दययाऽपि कथं [3]नु असौ कलत्र-भावपरा वाक् असावि प्रसूता । ते देवाः, अहं तु न[4] । कीदृशी ?। अतिप्रसिद्धत्वेन पूर्वोक्तमर्थमाक्षिपति । अथवा को विरोधः ?। ईश्वराः स्वामिनः स्वभावादेव भक्तिप्रवणं सेवकं जनं प्रति कया वाचा मुदम् आत्मीयां प्रीतिं न उद्गिरन्ति ?। अपि[5] त्वयं हर्ष एव देवानां मयि । [6]उद्गिरन्तीति गौणवृत्तिव्यपाश्रयम् । तदुक्तं—निष्ठ्यूतोद्गीर्णवान्तादि[7] गौणवृत्तिव्यपाश्रयम् । अतिसुन्दरमन्यत्र ग्राम्यकक्षां विगाहते (का° द° 1. 95) इति ।। उभसर्वतसोरि (वा° 136)त्यत्र ततोऽन्यत्रापीति । अभितःपरितःसमयानिकषाहाप्रतियोगेषु च दृश्यते (वा° 137) इति वचनात् प्रतियोगे द्वितीया[8] ।।२६।।

अहो महेन्द्रस्य कथं मयौचिती सुराङ्गनासङ्गमशोभिताभृतः ।
ह्रदस्य हंसावलिमांसलश्रियो बलाकयेव प्रबला विडम्बना ।।२७।।

अहो[1] महेन्द्रस्येति । अहो महेन्द्रस्य मया भार्यया कथम् औचिती योग्यता ?। किं भूतस्य ?। सुराङ्गनानां[2] सङ्गमेन शोभितां बिभर्तीति तस्य तथा । किं [3]तु प्रबला विडम्बना विगोपकः । यथा हंसानामाव-लिभिः[4] मांसला प्रचुरा [5]श्रीर्यस्य एवंविधस्य ह्रदस्य[6] [7]बलाकया प्रबला जुगुप्सा[8] ।।२७।।

पुरः सुरीणां भण केव मानवी न यत्र तास्तत्र तु साऽभिशोभिका ।
अकाञ्चनेऽकिञ्चननायिकाङ्कके किमारकूटाभरणेन न श्रियः ।।२८।।

पुरः[1] सुरीणामिति । त्वं भण वद । सुरीणां रम्भादीनां पुरः [2]मानवी का इव । अपि तु न [3]काऽपि । केनेति पाठे केन गुणेन मानवी

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

स्त्री [6]अभिशोभिका । तु पुनर्यत्र ता[5] देवाङ्गना न भवन्ति[6] । तत्र पृथिव्यां सा मानुषी अभिशोभिका । [7]साऽपीति पाठान्तरम् । यतः[8] अकिञ्चनस्य दरिद्रस्य पुरुषस्य नायिकायाः अङ्के [9]शरीरदेशे अकाञ्चने सुवर्णालङ्काररहिते किम् आरकूटस्य रीतिपित्तलप्रभृतेराभरणेन श्रियः शोभा न भवन्ति ?। अपि तु भवन्त्येव[10] ।।२८।।

यथा तथा नाम गिरः किरन्तु ते श्रुती पुनर्मे बधिरे तदक्षरे ।
पृषत्किशोरी कुरुतामसङ्गतां कथं मनोवृत्तिमपि द्विपाधिपे ।।२९।।

[1]यथा तथा नामेति । नाम ते देवाः यथा तथा[2] गिरः वाक्यानि किरन्तु क्षिपन्तु । मे मम पुनः श्रुतो कर्णौ तेषां देवानाम् [3]अक्षरे अक्षरमात्रश्रवणेऽपि बधिरे । यतः पृषत्किशोरी मृगी कथं द्विपाधिपे [4]हस्तिनि मनसो वृत्तिम् इच्छामपि कुरुताम् । किं भूताम् ?। असङ्गताम् असम्बद्धाम्[5] ।।२९।।

अदो निगद्यैव नतास्यया तया श्रुतौ लगित्वाऽभिहिताऽऽलिरालपत् ।
प्रविश्य यन्मे हृदयं ह्नियाऽऽह तद्विनिर्यदाकर्णय सन्मुखाध्वना ।।३०।।

[1]अदो निगद्यैवेति । आलिर्दमयन्त्याः सखी आलपत् उवाच । किं भूता ?। अदः निगद्यैव तया देव्या श्रुतौ कर्णे[2] लगित्वा अभिहिता उक्ता सती । किं भूतया[3] ?। नतम् आस्यं यस्याः लज्जानम्रया । इयं[4] दमयन्ती[5] ह्रिया लज्जया मे मम हृदयं प्रविश्य त्वां प्रति यदाह-हे दूत ! तत्त्वं[6] मम मुखाध्वना मम वदनमार्गेण विनिर्यत् निर्गच्छत् भैमीवचनम् आकर्णय । इयं लज्जया मम पार्श्वात् वादयति[7] ।।३०।।

बिभेमि चिन्तामपि कर्तुमीदृशीं चिराय चित्तार्पितनैषधेश्वरा ।
मृणालतन्तुच्छिदुरा सतीस्थितिर्लवादपि त्रुटयति चापलात् किल ।।३१।।

बिभेमि[1] चिन्तामिति । अहम् ईदृशीं[2] इन्द्रादिवरणलक्षण-[3] चिन्तामपि कर्तुं बिभेमि । किं भूता ?। चिराय चित्तेऽर्पितो[4] नैषधेश्वरो[5] नलो यया सा तथा । यतः सतीनां स्थितिराचारः किल लवादपि स्तोकादपि चापलात् त्रुटयति । किं भूता ?। मृणालतन्तुवत् छिदुरा त्रुटनशीला । मनसाऽपि परपुरुषः साध्व्या न धार्यः[6] ।।३१।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

**ममाशयः स्वप्नदृशाज्ञयाऽपि वा नलं विलङ्घ्येतरमस्पृशद्यदि ।
कुतः पुनस्तत्र समस्तसाक्षिणी निजैव बुद्धिर्विबुधैर्न पृच्छ्यते ।।३२।।**

ममाशय[1] इत्यादि [2]यदि हे दूत ! मम [3]आशयश्चित्तं स्वप्नदशाया आज्ञयाऽपि[4] आदेशेनाऽपि वा अथवा नलं विलङ्घ्याऽतिक्रम्य[5] इतरं पुरुषं चेत् अस्पृशत् ततस्तत्रार्थे[6] विबुधैर्देवैः अथ [7]च विद्वद्भिः सभ्यैर्निजैव बुद्धिः समस्तस्य लोकवृत्तान्तस्य साक्षिणी कुतः कथं पुनः[8] न पृच्छ्यते ?। देवाः किल सर्वेषां चित्तस्थितं स्वयमेव जानन्ति[9] ।।३२।।

**अपि स्वमस्वप्नमसूषुपन्नमी परस्य दाराननवैतुमेव माम् ।
स्वयं दुरध्वार्णवनाविकाः कथं स्पृशन्तु विज्ञाय हृदाऽपि तादृशीम् ।।३३।।**

[1]अपि स्वमस्वप्नमिति । हे दूत ! अमी देवाः स्वमात्मानम् अस्वप्नमपि निद्रारहितमपि असूषुपन्[2] स्वापितवन्तः । किं कर्तुम् ?। मां[3] परस्य दारान् नलस्य कलत्रम् अनवैतुमेव अपरिज्ञातुमेव । देवाः किल अस्वप्नाः परं मां नलपरिग्रहाम्[4] अज्ञातुं तेऽपि निद्रालवो बभूवुः । तथापि तादृशीं[5] माम् इदानीं मम कथनानन्तरमपि[6] परिग्रहं परिज्ञाय ते[7] कथं स्पृशन्तु । यतः स्वयं दुष्टो[8] अध्वा [9]दुराचार एवाऽर्णवः तस्य नाविकाः । कर्णधाराः अर्णवस्य दुष्टमार्गे पतितम् उद्धरन्ति । स्वयं कथम् अनयं कुर्वन्ति । अथ च सामुद्रो नाविकोऽस्पृश्यो भवति । नौद्व्यचष्ठन् (पा॰ IV. iv. 7) इति [10]ठन् ।।३३।।

**अनुग्रहः केवल एव मादृशे मनुष्यजन्मन्यपि यन्मनो जने ।
स चेद्विधेयस्तदमी तमेव मे प्रसद्य भिक्षां वितरीतुमीशताम् ।।३४।।**

[1]अनुग्रह इति । यत् मादृशे मनुष्यजन्मन्यपि [2]मानुषमात्रेऽपि जने देवानां मनो वर्त्तते स केवलोऽनुग्रहः[3] एव । चेत् देवैः स अनुग्रहो विधेयः, तर्हि अमी [4]प्रसद्य मे मह्यं तमेव नलं भिक्षां वितरीतुं [5]दातुम् ईशताम् ईश्वरा भवन्तु ।।३४।।

**अपि द्रढीयः शृणु मत्प्रतिश्रुतं स पीडयेत्पाणिममुं[1] न चेन्नृपः ।
हुताशनोद्बन्धनवारिकारितां निजायुषस्तत्करवै स्ववैरिताम् ।।३५।।**

अपि[2] द्रढीय इति । त्वं [3]द्रढीयः दृढतरं[4] मदीयं प्रतिश्रुतं प्रतिज्ञातम् अपि अधुना शृणु । चेत् यदि न नृपो नलः अमुं मम पाणिं न पीडयेत् ।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

तत्तस्मात् अहं निजस्य आयुषः हुताशनेन कारितां उद्बन्धनेन कारितां वारिणा कारितां च। वह्नि उद्बन्धनं जले च प्रवेशित्वं स्वेन [5]स्वस्य वैरितां [6]आत्मनैव वैरिभावं शत्रुत्वं करवै करवाणि[7]। तस्य भावे [त]ल् प्रत्ययः। [8]ममायुषः शत्रून्[9] हतान् पदार्थान् करिष्यामि ।।३५।।

निषिद्धमप्याचरणीयमापदि क्रिया सती नावति यत्र सर्वथा ।
घनाम्बुना राजपथेऽतिपिच्छिले क्वचिद्बुधैरप्यपथेन गम्यते ।।३६।।

[1]निषिद्धमपीति। यत्र सती। श्रुतिस्मृतिविहिता सदाचारान्विता क्रिया आपदि सत्यां सर्वथा न अवति आत्मानं न रक्षति। तत्र पुरुषेण आपद्धर्माभिप्रायेण निषिद्धमपि [2]आत्महननादिकम् आचरणीयम् [3]अविचिकित्स्यव्याध्यादिना उपसृष्टस्य भृगु-अग्नि-अनशनाम्बुभिर्मरणं विहितम्। तथा नलं विना दुःसहकामसन्तप्तया मया निषिद्धमपि कर्त्तव्यम्। [हि] यतो घनानाम् अम्बुना राजपथे[4] अतिपिच्छिले कर्दमिलत्वेन दुःसञ्चारे क्वचित्प्रदेशे बुधैरपि[5] अपथेन [6]प्रतिषिद्धन[7] उन्मार्गेण गम्यते। [8]लोमादिपामादिपिच्छादिभ्यः शनेलच् (पा° V. II 100) इतीलच्। [9]राजपथे हीति पाठान्तरम्। राजपथे इति ऋक्पूरब्धूःपथामानक्षे (पा° V. iv. 74) इत्यप्रत्ययः[10] ।।३६।।

स्त्रिया मया वाग्मिषु तेषु शक्यते न जातु सम्यग्वितरीतुमुत्तरम् ।
तदत्र मद्भासितसूत्रपद्धतौ प्रबन्धृतास्तु प्रतिबन्धृता न ते ।।३७।।

[1]स्त्रिया मया इति। मया स्त्रिया तेषु वाग्मिषु देवेषु विषये जातु सम्यक् उत्तरं वितरीतु न शक्यते। तदत्र अस्यां मम [2]भाषितमेव उत्तरदानमेव सूत्रं तस्य पद्धतौ मार्गे ते तव प्रबन्धृता प्रबन्धकर्तृता अस्तु। न तु प्रतिबन्धृता[3], प्रतिबन्धकर्तृता तव मा भवतु। [4]सूत्रं हि पद्धत्या[5] प्रबध्यते। इदमेवोत्तरं मदीयं, त्वं विचित्रैर्विवरणैः समर्थय[6] ।।३७।।

निरस्य दूतः स्म तथा विसर्जितः प्रियोक्तिरप्याह कदुष्णमक्षरम् ।
कुतूहलेनेव मुहुः कुहूरवं विडम्ब्य डिम्भेन पिकः प्रकोपितः ।।३८।।

[1]निरस्य दूत इति। [2]स दूतः प्रियोक्तिरपि प्रियंवदोऽपि तथा [3]तथा निरस्य विसर्जितः सन् कदुष्णम् ईषदुष्णम्[4] अप्रियम्[5] अक्षरं

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

वाक्यम् आह [स्म]। यथा पिकः कोकिलः डिम्भेन बालेन [6]मुहुः कुतूहलेन कुहू कुहू कुहू इति रवं विडम्ब्य अनुकृत्य अनुवदता सता प्रकर्षेण कोपितः सन् प्रियवचनोऽपि कदुष्णम् [7]अमधुरं [8]वदति ॥३८॥

अहो मनस्त्वामनु तेऽपि तन्वते त्वमप्यमीभ्यो विमुखीति कौतुकम् ।
क्व वा निधिर्निर्धननेति किञ्च तं स वा [1]कवाटं घटयन्निरस्यति ॥३९॥

[2]अहो [3]मनस्त्वामिति। अहो आश्चर्यं ते देवाः अपि सन्तः त्वां मानुषीम् अनुलक्ष्य मनस्तन्वते। त्वमपि अमीभ्यः देवेभ्यः[4] विमुखी पराङ्मुखीति कौतुकम्। वा अथवा निधिः शङ्खपद्माद्यभिधो[5] निर्धनं दरिद्रं प्रति क्व एति। किञ्चाऽन्यत् स दरिद्रः तं निधिम् आगच्छन्तं [6]कवाटं कपाटं घटयन् द्वारं पिदधत् सन् निरस्यतीति क्व वा[7] दृष्टम् ?। अपूर्वमेतत् तव[8] [9]देवानामनङ्गीकरणम्[10] ॥३९॥

सहाऽखिलस्त्रीषु वहेऽवहेलया महेन्द्ररागाद् गुरुमादरं त्वयि ।
त्वमीदृशि श्रेयसि सम्मुखेऽपि तं पराङ्मुखी चन्द्रमुखि ! न्यवीवृतः ॥४०॥

[1]सहाऽखिलस्त्रीष्विति। अहं त्वयि विषये महेन्द्रस्य रागात् गुरुम् [2]आदरं वहे। कया समम् ?। अन्यासु अखिलास्वपि स्त्रीषु अवहेलया सह। तासु अवज्ञां कुर्वे। त्वं तु हे चन्द्रमुखि। ईदृशि श्रेयसि इन्द्रार्थित्वलक्षणे सम्मुखेऽपि सति पराङ्मुखी सती तम्[3] आदरं न्यवीवृतः। [4]केचिद्वयाचक्षते—तम् इन्द्रं न्यवीवृतः निषिद्धवती[5] ॥४०॥

दिवौकसं कामयते न मानवी नवीनमश्रावि तवाननादिदम् ।
कथं न वा दुर्ग्रहदोष एष ते हितेन सम्यग्गुरुणाऽपि [1]शाम्यते ॥४१॥

[2]दिवौकसमिति। मानवी स्त्री दिवौकसं देवं न कामयते। इदं तव आननात् नवीनम् अपूर्वं मया अश्रावि। वा अथवा एष ते तव[3] दुष्टो ग्रहः [4]आग्रह एव दोषः सम्यक् हितेन गुरुणाऽपि[5] पित्राऽपि कथं न [6]शाम्यते। अथ च दुष्टस्य शनैश्चरादिग्रहस्य दोषः आवेशो हितेन गुरुणा [7]अनुकूलेन बृहस्पतिना शाम्यते। अथवा [8]उपशाम्यते शान्तिकादिना[9] ॥४१॥

अनुग्रहादेव दिवौकसां नरो निरस्य मानुष्यकमेति दिव्यताम् ।
अयोविकारे स्वरितत्वमिष्यते कुतोऽयसां सिद्धरसस्पृशामपि ॥४२॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]अनुग्रहादिति । नरो मनुष्यः दिवौकसाम् अनुग्रहमात्रादेव मानुष्यकं निरस्य त्यक्त्वा दिव्यताम् एति । अयसां लोहानां सिद्धरसस्पृशां रसस्पर्शेन सुवर्णभूतानामपि कुतः कथम् अयोविकारे[2] स्वरितत्वं लोहविकारशब्दवाच्यत्वम् इष्यते । अपि तु सुवर्णमेव भण्यते, न तु लोहम् ।।४२।।

हरिं परित्यज्य नलाभिलाषुका न लज्जसे वा विदुषिब्रुवा कथम् ।
उपेक्षितेक्षोः करभाच्छमीरतादुरुं वदे त्वां करभोरु ! भो इति ।।४३।।

[1]हरिं परित्यज्य इति । वा अथवा [2]त्वं हरिम् इन्द्रं परित्यज्य नले[3] अभिलाषुका सती कथं न लज्जसे । किं भूता ?। विदुषीमात्मानं ब्रूषे विदुषिब्रुवा । [4]अस्यन्तविहिताया नद्याः, [5]ऋदुदि त्तरतमरूप[6]-कल्पचेलड्ब्रुवगोत्रमतहतेषु वा ह्रस्वः [च] (सि॰ है॰ III. ii. 63) । [7]घरूपकल्पचेलड्ब्रुवे (पा॰ VI. iii. 43)त्यादि[8] पाणिनीयम् । अथवा निन्द्या विदुषी विदुषिब्रुवा । हे [9]भोः करभोरु इति कारणात् अहं त्वां करभादुष्ट्रादपि उरुं गुरुतरां मूर्खां वदे ज्ञानपूर्वकं वदामि । [10]अथवा करभादुरुं त्वां करभोरु भो[11] इति वदे । इतिशब्देन करभोरु[12] इति एतदनुक्तम् । अतो विभक्त्यभावः । किं भूतात् ?। शमीपप्रेषु[13] रतात् भक्षणप्रवृत्तात् तथा उपेक्षित इक्षुदण्डो येन [14]तस्मात्तथा । मधुरभिक्षुरसं त्यक्त्वा यः कटुतरां[15] [16]कण्टकिनीं शमीमत्ति । अतः करभादुरुः । मणिबन्धकनिष्ठिकयोर्मध्यविभागेऽपि करभः स्यात् । करभवत् ऊरू यस्याः तस्याः सम्बोधनम्[17] । ऊरूत्तरपदादौपम्य (पा॰ IV. i. 69) इत्यूङ् । हे करभोरु ! अनुक्रमवर्तुलोरु । इत्थमुपमानेन अन्यासु स्त्रीषु करभोरुशब्दः कविभिः प्रयुज्यते । त्वयि तु पूर्वोक्तेनाऽभिप्रायेणाऽहं प्रयुञ्जे । ज्ञानयत्नोपच्छन्दनेषु वद[18] (का॰ III. ii. 42)इति वदेरात्मनेपदम् । [19]भासनोपसम्भाषाज्ञानयत्नविमत्युपमन्त्रणेषु वद (पा॰ I. iii. 47) इति पाणिनीयम् ।।४३।।

विहाय हा सर्वसुपर्वनायकं त्वया [1]धृतः किं नरसाधिमभ्रमः ।
मुखं विमुच्य श्वसितस्य धारया वृथैव नासापथधावनश्रमः ।।४४।।

विहाय[2] हा सर्वेति । हा इति खेदे । त्वया सर्वेषां सुपर्वणां देवानां नायकम् इन्द्रं विहाय किं नरे[3] मानुषे साधिम्नः साधुत्वस्य भ्रमः

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

भ्रान्तिः धृतः ?। कथं कृतः ?। यथा श्वसितस्य निःश्वासस्य धारया प्रवाहेण मुखं विमुच्य वृथा नासाया[4] नासिकाया पथा मार्गेण धावनस्य[5] वहनस्य श्रमः ध्रियते। मुखं पिधाय नासिकाद्वारेण[6] वृथा श्वासं यथा कश्चिन्मुञ्चति तादृशं तव चेष्टितम् इति। आदृत इति वा पाठः ।।४४।।

तपोनले जुह्वति सूरयस्तनूर्दिवे फलायाऽन्यजनुर्भविष्णवे ।
करे पुनः कर्षति सैव विह्वला बलादिव त्वां वलसे न बालिशे ।।४५।।

[1]तपोनले इति। सूरयो विद्वांसः तनूः शरीराणि तप एवाऽनलो वह्निस्तत्र जुह्वति तपस्यन्ति। किमर्थम् ?। दिवे स्वर्गलक्षणाय [2]फलाय। किं भूताय ?। अन्यस्मिन् जनुषि जन्मान्तरे भविष्णवे[3]। सैव द्यौः पुनः त्वां विह्वला सती [4]बलादिव बलात्कारेण करे हस्ते कर्षति। अस्मिन्नेव जन्मनि आकारयति। त्वं हे बालिशे ![5] मूर्खे ! न वलसे [6]न व्यावर्त्तसे। अथ च त्वं तपोरूपे धर्मात्मनि नले शरीरं ददासि। तत्राऽपि पतिव्रताफलं[7] स्वर्गः। स तु तव इहैवाऽस्ति। तपः परं कृतयुगे (मनु° I 86) इति तपः प्रधानत्वात् तस्य, इति लेशमात्रः[8] ।।४५।।

यदि [1]स्वमुद्बन्धुमना विना नलं भवेर्भवन्तीं हरिरन्तरिक्षगाम् ।
दिवि स्थितानां प्रथितः पतिस्ततो हरिष्यति न्याय्यमुपेक्षते हि कः ।।४६।।

[2]यदि स्वमुद्बन्धुमना इति। यदि त्वं नलं विना स्वम् उद्बन्धुमना भवेः उद्बन्धनेन[3] मर्तुमिच्छसि। ततः भवन्तीम् अन्तरिक्षगां जायमानां हरिरिन्द्रो हरिष्यति। यतः स दिवि आकाशे स्थितानां सर्वेषां प्रथितः[4] प्रसिद्धः पतिः[5]। हि यस्मात् न्यायादागतं वस्तु कः उपेक्षते। उद्बन्धनमरणे हि भूमौ चरणस्पर्शाभावात् आकाश एव स्थितिः। धर्मपथ्यर्थन्यायादनपेते (पा° IV. iv. 92) इति यः[6] ।।४६।।

निवेक्ष्यसे यद्यनले नलोज्झिता सुरे तदस्मिन्महती दयाऽऽदृता ।
चिरादनेनार्थनयाऽपि[1] दुर्लभं स्वयं त्वयैवाऽङ्ग ! यदङ्गमर्प्यते ।।४७।।

निवेक्ष्यसे[2] इति। यदि त्वं नलेन उज्झिता सती अनले वह्नौ नि[3]वेक्ष्यसे। तत् अस्मिन् [4]सुरे कृशानुलक्षणे त्वया महती दया आदृता।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[5]यत् यस्मात् त्वयैव स्वयम् अङ्गमर्प्यते । किं भूतम् ?। चिरात् अनेन वह्निना अर्थनयाऽपि[6] दुर्लभम्[7] । अङ्ग[8] ! हे! । नेर्विश (पा° I. iii. 17) इत्यात्मनेपदम् । न लोकाव्यये (पा° II. iii. 69) त्यादिना षष्ठी-प्रतिषेधः ।।४७।।

जितं जितं तत्खलु पाशपाणिना विना नलं वारि यदि प्रवेक्ष्यसि ।
तदा त्वदाख्यान् बहिरप्यसूनसौ पयःपतिर्वक्षसि वक्ष्यतेतराम् ।।४८।।

[1]जितं जितमिति । खलु तत् पाशपाणिना वरुणेन जितं [2]जित यदि त्वं नलं विना वारि प्रवेक्ष्यसि, तदा असौ पयसां पतिः त्वदाख्यान् असून् प्राणान् बहिरपि आलिङ्गनादिना [3]वक्षसि हृदये वक्ष्यतेतरां [4]धारयिष्यते । त्वमेव तस्य जीवितम् अन्तर्गतं पश्चाद्बहिरपि साक्षा-द्देवत्वम् ।।४८।।

करिष्यसे यद्यत एव दूषणादुपायमन्यं विदुषीति[1] मृत्यवे ।
प्रियाऽतिथिः स्वेन गता गृहात् कथं न धर्मराजं चरितार्थयिष्यसि ।।४९।।

करिष्यसे इति । यदि त्वम् अत एव इन्द्रानलवरुणवरणभयात्[2] दूषणात् मृत्यवे अन्यं कञ्चित्[3] उपायं करिष्यसे । कथम् ?। इति । इतीति किम् ?। यतस्त्वं विदुषी उपायज्ञा । विदुषी [4]तु इति पाठान्तरम् । ततः कथं त्वं धर्मराजं [5]न चरितार्थयिष्यसि[6] ?। किं भूता ?। स्वेनै वात्मनैव[7] प्रिया अतिथिः सती तस्य गृहात् गता । सर्वोपायैर्मरणे यमगृहप्राप्तिर्भवति । इत्थं तस्य वृण्वतो दूषणमपि नास्ति, धर्मराज-त्वात् ।।४९।।

निषेधवेषो विधिरेष तेऽथवा [1]तथैव युक्ता खलु वाचि वक्रता ।
विजृम्भितं यस्य किल ध्वनेरिदं विदग्धनारीवदनं तदाकरः ।।५०।।

[2]निषेधवेष[3] इति । अथवा ते [4]तव एष निषेधवेषो विधिः निषेधद्वारेण इन्द्रादीनामङ्गीकरणविधिः खलु यस्मात् वाचि विषये वक्रता वक्रोक्तिः । [5]तथैव विधिप्रधाना[6] एव युक्ता । [7]तवैवेति पाठान्तरम् । किल यस्मात् यस्य ध्वनेर्व्यङ्ग्यस्य इदं निषेधे वाच्ये विधिरूपं विजृम्भितं तस्य निषेधद्वारकविधेः विलसितस्य विदग्धाया नार्या वदनम् आकरः[8] खनिः । त्वयि विदग्धत्वात् एतत्सम्भवति ।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

यथा—निःशेषच्युतचन्दनं स्तनतटं [9]निर्मृष्टरागोऽधरो नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेय[10] तनुः। मिथ्यावादिनि ! दूति ! बान्धवजनस्याऽज्ञातपीडागमे[11] वापीं स्नातुमितो गताऽसि[12] न पुनस्तस्याऽधमस्याऽन्तिकम् (अमरु°—61)। अत्र तदन्तिकमेव रन्तुं गताऽसीति [13]व्यज्यते (का° प्र° I. 3) केचित्तु एवमप्याहुः—त्वं सुन्दरो न[14] इत्युक्ते निषेधः[15]। त्वं [16]किं न सुन्दर इत्युक्ते ध्वनिविशेषेणाऽपि[17] तु सुन्दरः इति प्रतीतिर्वक्रोक्त्या ।।५०।।

भ्रमामि ते भैमि ! सरस्वतीरसप्रवाहचक्रेषु निपत्य कत्यदः ।
त्रपामनादृत्य मनाक्कुरु स्फुटं कृतार्थनीयः कतमः सुरोत्तमः ।।५१।।

[1]भ्रमामि ते इति। हे भैमि ! अहं ते तव सरस्वतीरसप्रवाहचक्रेषु वाण्या रसो माधुर्यादिः तस्य प्रवाहो नैरन्तर्यं तस्य चक्रेषु वक्रोक्तिषु निपत्य कति कियत् [2]यावत् भ्रमामि। कतीति क्रियाविशेषणम्। कालाध्वनोरत्यन्तसंयोगे (पा° II. iii. 5) द्वितीया इति[3]। अथ च सरस्वतीनदीजलप्रवाहावर्ते पतितः को न भ्राम्यति [4]चक्रवत्। त्वं त्रपाम् अनादृत्य त्यक्त्वा मनाक् स्फुटं प्रकटम् अदः कुरु वद[5]। त्वया कतमः सुरोत्तमः कृतार्थनीयः[6] ।।५१।।

मतः किमैरावतकुम्भकैतवप्रगल्भपीनस्तनदिग्धवस्तव ।
सहस्रनेत्रान्न पृथग्मते मम त्वदङ्गलक्ष्मीमवगाहितुं क्षमः ।।५२।।

मतः[1] किमैरावतेति। तव किम् ऐरावतस्य कुम्भयोः कैतवेन प्रगल्भौ कठिनौ [2]पीनौ च स्तनौ यस्या दिशः तस्या धवो भर्त्ता पूर्वदिक्पालो महेन्द्रो मतः ?। [3]मतिबुद्धिपूजार्थेभ्यः क्तः (पा° III. iii. 1), क्तस्य च वर्त्तमान (पा° II. iii. 67) इति षष्ठी। यतो[म]म मते सहस्रनेत्रात् पृथक् अन्यः कश्चित् तव अङ्गानां लक्ष्मीम् अवगाहितुं द्विनेत्रो न क्ष[मः] इति ममाभिप्रायः[5] ।।५२।।

प्रसीद तस्मै दमयन्ति ! सन्ततं त्वदङ्गसङ्गप्रभवैर्जगत्प्रभुः ।
पुलोमजालोचनतीक्ष्णकण्टकैस्तनुं घनामातनुतां स कण्टकैः ।।५३।।

[1]प्रसीद तस्मै इति। हे दमयन्ति ! त्वं तस्मै इन्द्राय प्रसीद। स जगतां प्रभुः। [2]सन्ततं तव अङ्गानां सङ्गात् प्रभवैः कण्टकैः रोमाञ्चैः

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

तनुं शरीरं घनां निबिडाम् आतनुताम्। किं भूतैः?। पुलोमजाया इन्द्राण्याः लोचनयोः तीक्ष्णकण्टकसदृशैः। प्रथमश्लोके [3]पीनस्तनदिक्-नामग्रहणात्, अत्र च पुलोमजाभिधानाच्च गूढं सपत्नीसूचनम्[4] ।।५३।।

अबोधि तत्त्वं दहनेऽनुरज्यसे स्वयं खलु क्षत्रियगोत्रजन्मनः ।
विना तमोजस्विनमन्यतः कथं मनोरथस्ते वलते विलासिनि ! ।।५४।।

[1]अबोधि तत्त्वमिति। मया तत्त्वं परमार्थस्तवाऽबोधि ज्ञातः। त्वं [2]स्वयं खलु निश्चितं दहने वह्नौ अनुरज्यसे। कस्मात्?। [3]क्षत्रियगोत्रजन्मनः उत्पत्तितः सकाशात् हेतोः। हे विलासिनि! तम्[4] ओजस्विनमग्निं विना अन्यतः अन्यस्मिन् पुरुषे ते मनोरथः कथं[5] वलते[6] ।।५४।।

त्वयैकसत्या तनुतापशङ्कया ततो निवर्त्यं न मनः कथञ्चन ।
हिमोपमा तस्य परीक्षणक्षणे सतीषु वृत्तिः शतशो निरूपिता ।।५५।।

त्वयैकसत्या[1] इति। त्वया एकया एव सत्या साध्व्या तनोः शरीरस्य तापशङ्कया ततो दहनात् कथञ्चन मनो न निवर्त्यम्। यतः तस्य वह्नेः शतशः अनेकवारं सतीषु पतिव्रतासु [2]परीक्षणक्षण[3] सहगम-[4]नानुगमनकालेषु च हिमोपमा शीतला वृत्तिः निरूपिता। तदाग्नेः शैत्यं दृष्टम्। अत्राऽपि दहनपदेन सूचितम् औष्ण्यं केवलम् अनभिमतं सूचयति ।।५५।।

स धर्मराजः खलु धर्मशीलया त्वयाऽस्ति चित्तातिथितामवापितः ।
ममाऽपि साधुः प्रतिभात्ययं क्रमश्चकास्ति योग्येन हि योग्यसङ्गमः ।।५६।।

स [1]धर्मराज इति। खलु त्वया स[2] धर्मराजः[3] चित्तस्याऽतिथिताम् अवापितः। यतो धर्मशीलया[4] त्वया अयं क्रमो ममाऽपि साधुर्युक्तः प्रतिभाति। हि यतः योग्येन सह[5] योग्यस्य सङ्गमः[6] सम्बन्धश्चकास्ति। अथ च तस्य [7]धर्मप्रधानत्वात् कामप्रधानायास्तव अनभिरुचिरिति सूचयति ।।५६।।

अजातविच्छेदलवैः स्मरोत्सवैरगस्त्यभासा दिशि निर्मलत्विषि ।
[1]धुतावधिं कालममृत्युशङ्किता निमेषवत्तेन नयस्व केलिभिः ।।५७।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

²अजातविच्छेदेति । त्वं तेन मृत्युना सह धुतो निषिद्धोऽवधिर्मर्यादा यस्य कालस्य तं तथाविधम् आचन्द्रार्कं कालं निमेषवत् क्षणमिव स्मरोत्सवैः केलिभिः क्रीडाभिर्नयस्व । किं भूता ?। न मृत्योः शङ्किता मरणभयरहिता । किं भूतैः स्मरोत्सवैः ?। न जातो विच्छेदस्य वियोगस्य लवो लेशोऽपि येषु ³तैस्तथा । क्व ?। अगस्त्यस्य भासा निर्मलत्विषि दिशि । ⁴स्वरितमितः कर्त्रभिप्राये क्रियाफल (पा° I. iii. 72) इत्यात्मनेपदम् । सम्माननं (पा° I. iii. 36) त्यादिषु नरकर्त्र-भिप्रायार्थ आरम्भः ।⁵ दक्षिणाशापतित्वात् यमस्य सपत्नीसूचनम् । लोकमारकत्वं⁶ च ।।५७।।

शिरीषमृद्वी वरुणं किमीहसे पयःप्रकृत्या मृदुवर्गवासवम् ।
विहाय सर्वान् वृणुते स्म किं न सा निशाऽपि शीतांशुमनेन हेतुना ।।५८।।

¹शिरीषमृद्वीति । त्वं किं वरुणम् ईहसे । यतः ²शिरीषकुसुमवत् मृद्वी³ कोमला त्वम् । किं भूतं तम्⁴ ?। पयसः प्रकृत्या⁵ समस्तस्य मृदुवर्गस्य⁶ कोमलपदार्थव्रजस्य वासवम् अधिपतिम् । वरुणो हि पयसां प्रकृतिभूतः, पतित्वात्⁷ । कोमलं च सर्वं पयसः उत्पद्यते । अतः साक्षात् परम्परया च⁸ स एवेश्वरः । वरुणलोके हि सर्वाण्यपि शरीराणि अयोनिजानि⁹ । द्रवैकस्वभावाभिरुपादानकारणभूताभिरद्भिरारब्धा-न्यतिमृदूनि, निमित्तकारणस्य ¹⁰पार्थिवावयवानां संयोगाच्चो¹¹पभोग-समर्थानि । तदुक्तं—तत्र ¹²शरीरमयोनिजमेव वरुणलोके । पार्थिवा-वयवोपष्टम्भाच्चो¹³पभोगसमर्थम् इति । ¹⁴तत्रेति शरीरेन्द्रियविषयसंज्ञ-कोपकार्यत्रये इत्यर्थः ।¹⁵ अथवा¹⁶ प्रकृतित्वेन पयो मृदुवर्गस्य वासव¹⁷-मिति पयस एव विशेषणम् । वरुणस्य च¹⁸ पयसः पतित्वात् किं वाच्यं मृदुत्वम् ?।

किं सा¹⁹ निशापि अनेनैव हेतुना सर्वान् सुन्दरानपि विहाय शीतांशुं चन्द्रं न वृणुते स्म । अथ ²⁰चात्राऽपि केवलं शैत्यमेवाऽस्ति । न पित्तगन्धोऽस्ति । कामीव पित्तप्रधानो नारीणां रुचितो भवतीति । निशाशब्दः णिशि (1097) चुम्बने धातोः²¹ चुम्बनप्रधानायाः शैत्य-मेवाऽभिमतं, न तु सुरतप्रधानायाः । स च शीतकिरणः : अत्र यद्यपि ²²दूतधर्मे स्थितो नलो बुद्धिपूर्वकं न वदति । परं भवितव्यतावशात्

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

तन्मुखात् ईदृशैः अनभिरुचिव्यञ्जकैः शब्दैः बलाद्वाणी निर्गच्छति इति कविरपि अलङ्कारमुखेनाऽभिप्रायं सूचितवान् ।।५८।।

असेवि यस्त्यक्तदिवा दिवानिशं श्रियः प्रियेणानणुरामणीयकः ।
सहाऽमुना तत्र पयः पयोनिधौ कृशोदरि ! क्रीड यथामनोरथम् ।।५९।।

[1]असेवि य इति । हे कृशोदरि ! त्वम् अमुना वरुणेन सह तत्र पयसो दुग्धस्य पयोनिधौ[2] यथामनोरथं क्रीड । यथाऽसादृश्य (पा° II. i. 7) इति अव्ययीभावः । यथार्थे यदव्ययमिति सिद्धे सादृश्यप्रतिषेधार्थं वचनम् । योग्यतावीप्सापदार्थानतिवृत्तिः सादृश्यं चेति यथार्थाः । यः समुद्रः दिवानिशं श्रियः प्रियेण श्रीकृष्णेन त्यक्तदिवा[3] त्यक्तद्युलोकेन असेवि । किं भूतः ?। अनणु प्रचुरं रामणीयकं यस्य स तथा[4] ।।५९।।

इति स्फुटं तद्वचसस्तयाऽऽदरात् सुरस्पृहारोपविडम्बनादपि ।
कराङ्कसुप्तैककपोलकर्णया श्रुतं च तद्भाषितमश्रुतं च तत् ।।६०।।

इति [1]स्फुटमिति । तया इति स्फुटम्[2] अहं मन्ये । तस्य नलस्य वचसः आदरात् तस्य दूतस्य भाषितं श्रुतं च । [3]तथा तत् अश्रुतं च । तेषामनङ्गीकरणात् । कस्मादश्रुतं च ?। सुरेषु विषये यः स्पृहाया आरोपः तस्य विडम्बनादपि विगोपकाच्च अश्रुतं च । किं [4]भूतया ?। कराङ्के हस्ततले सुप्तः एक[:] कपोल[:] कर्णश्च यस्याः तया तथा ।।६०।।

चिरादनध्यायमवाङ्मुखी मुखे ततः स्म सा वासयते दमस्वसा ।
कृतायतश्वासविमोक्षणाऽथ तं क्षणाद्बभाषे करुणं विचक्षणा ।।६१।।

[1]चिरादनध्यायमिति । ततः सा दमस्वसा निजमुखे चिरादनध्यायं मौनं वासयते स्म । [2]अण्यन्तकर्तुः अनध्यायस्य चित्तवत्ताभावे, अणाव-कर्मकाच्चित्त[3]वत्कर्तृकादि (पा° I. iii. 88)त्यादिना[4] परस्मैपदाप्राप्ते[5], [6]णिचश्चे (पा° I. iii. 74)त्यात्मनेपदम् । न [7]पादम्याङ्‌यमि (पा° I. iii. 89)त्यादि न वाच्यम् । अवाक् अधो मुखं यस्याः सा तथा । किं भूता ?। कृतम् आयतस्य श्वासस्य विमोक्षणं यया सा तथा । [8]उद्दण्डे वायौ वाति[9] सति तात्कालिकोऽनध्यायः स्मृतिशास्त्रे दृष्टः । अथ श्वासनिवृत्तौ [10]सत्यां क्षणात् करुणं दीनं बभाषे । यतः विचक्षणा ।।६१।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

विनिन्दता दुष्कृतिनीं मम श्रुतिं दिगिन्द्रदुर्वाचिकसूचिसञ्चयैः ।
प्रयातजीवामिव मां प्रति स्फुटं कृतं त्वयाप्यन्तकदूततोचितम् ।।६२।।

[1]विनिन्दतेति । हे दूत ![2] त्वयाऽपि अन्तकस्य यमस्य दूतताया उचितं कृतम् । कां प्रति ?। मां प्रति । किं भूताम् ?। प्रयातो गन्तुमारब्धो जीवो यस्याः तां तथाभूतामिव [3]प्रमृतामिव । किं कुर्वता ?। दिगिन्द्राणां यानि दुष्टानि वाचिकानि सन्देशास्ते एव सूचिसञ्चयास्तैः [4]दुष्कृतिनीं जन्मान्तरदुष्कृतयुक्तां मम श्रुतिं कर्णेन्द्रियं वि [5]निन्दता । यमदूतोऽपि आकारयन् श्रवणकठोरं वदति । मानुषं गतसत्त्वं च कुरुते । स्फुटं शङ्के ।।६२।।

त्वदास्यनिर्यन्मदलीकदुर्यशोमषीमयं सल्लिपिरूपभागिव ।
श्रुतिं ममाविश्य भवद्दुरक्षरं सृजत्यदः कीटवदुत्कटा रुजः ।।६३।।

[1]त्वदास्यनिर्यदिति । अदः भवदीयं दुर्वाचिकाक्षरं मम श्रुतिम् आविश्य कीटवत्[2] उत्कटा रुजः पीडाः सृजति । ननूच्चरितप्रध्वंसित्वेनाऽक्षरस्याऽस्थायित्वात् कथं पीडाकर्तृत्वमित्याह—किं भूतम् ?। त्वदास्यात् निर्यत् निर्गच्छत् यत् मदीयम् अलीकम् अविद्यमानं दुर्यशः अकीर्तिः तदेव मषी तन्मयम् । उत्प्रेक्षते—सत् प्रधानं विद्यमानं लिपेर्लेखनस्य रूपं भजते तद्भाक् इव मूर्तिवदिव । तत्कर्णप्रविष्टं पीडां कुरुते । [3]सम्प्रोदश्च कटच् (पा॰ V. ii. 29) इति कटच्[4] ।।६३।।

तमालिरूचेऽथ विदर्भजेरिता प्रगाढमौनव्रतयैकया सखी ।
त्रपां समाराधयतीयमन्यया भवन्तमाह स्वरसज्ञया मया ।।६४।।

[1]तमालिरूचे इति । अथ विदर्भजया[2] ईरिता सती काचिदालिः सखी तं दूतम् ऊचे—इयमस्माकं सखी दमयन्ती एकया निजया रसज्ञया जिह्वया त्रपां समाराधयति । अन्यया मया द्वितीयया स्वस्य रसज्ञया जिह्वया, अथ च स्वभावज्ञया च भवन्तम् आह । मम पार्श्वात् त्वां वादयति ।।६४।।

तदर्चितुं मद्वरणस्रजा नृपं स्वयंवरः सम्भविता परेद्यवि ।
ममाऽसुभिर्गन्तुमनाः पुरःसरैस्तदन्तरायः पुनरेष वासरः ।।६५।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]तमर्चितुं मदिति। परेद्यवि[2] परस्मिन्नहनि तं नृपं नलं मम वरणस्रजा। [3]तदिति पाठे तस्य वरणाय स्रक् तद्वरणस्रक् तया [4]मालया अर्चितुं स्वयंवरः [5]सम्भविता सम्भविष्यति। पुनः एष अद्यतनो वासरः तस्य अन्तरायः विघ्नरूपः। किं भूतः[6] ?। मम असुभिः सह गन्तुमनाः। किं भूतैः ?। पुरःसरैः। मम प्राणैः सह अयं दिवसो गन्ता। सद्यः [7]परुत्परार्यैषमःपरेद्यव्यद्य[8] (पा॰ V. iii. 22) इत्यादिना निपातः ॥६५॥

तदद्य विश्रम्य दयालुरेधि मे दिनं निनीषामि भवद्विलोकिनी।
नखैः किलाऽऽख्यायि विलिख्य पक्षिणा तवैव रूपेण समः स मत्प्रियः ॥६६॥

[1]तदद्य विश्रम्येति। तत् त्वम् अद्य विश्रम्य स्थित्वा मे मम दयालुः एधि भव। अहं भवन्तं[2] विलोकयन्ती सती अद्यतनं दिनं निनीषामि। स मम प्रियः किल पक्षिणा [3]हंसेन तवैव रूपे[ण] समः सदृशः नखैर्विलिख्य लिखित्वा आख्यायि। त्वत्सदृश एव नलः कथितः [4]तुल्यार्थैरि (पा॰ II. iii. 72) [5]त्यादिना तृतीया ॥६६॥

दृशोर्द्वयी ते विधिनाऽस्ति वञ्चिता मुखस्य लक्ष्मीं तव यन्न वीक्षते।
असावपि श्वस्तदिमां नलानने विलोक्य साफल्यमुपैतु जन्मनः ॥६७॥

[1]दृशोर्द्वयी ते [इ]ति। ते तव दृशोर्द्वयी विधिना वञ्चिताऽस्ति। [2]यत् तव मुखस्य लक्ष्मीं न[3] वीक्षते। चक्षुषा स्वमुखं कोऽपि न पश्यति। [4]तत् तस्मात्कारणात् असावपि दृशोर्द्वयी श्वः आगामिनि दिने इमां [5]त्वन्मुखलक्ष्मीं [6]स्वयंवरे नलस्य आनने विलोक्य जन्मनः साफल्यम् उपैतु। नलाननं त्वन्मुखसदृशमेव[7] ॥६७॥

ममैव पाणौकरणेऽग्निसाक्षिकं प्रसङ्गसम्पादितमङ्ग ! सङ्गतम्।
न हा सहाधीतिधृतः स्पृहा कथं तवाऽऽर्यपुत्रीयमजर्यमर्जितुम् ॥६८॥

ममैव[1] पाणाविति। तव ममैव पाणौकरणे विवाहे अङ्ग अहो नलेन सङ्गतं मैत्रीप्रसङ्गेन [2]सम्पादितं [3]देवगत्या जातम्। किं भूतम् ?। अग्निसाक्षिकम्। मैत्र्यपि वह्निप्रत्यक्षा समीचीना भवति। हा इति खेदे। तव आर्यपुत्रस्य नलस्य सक्तम्[4] अजर्यं सौहार्दं अर्जितुं कथं न स्पृहा ?। किं भूतस्य तव ?। सहाधीतिं सादृश्यं [5]धृतः चरतः[6]।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

अथ वा अर्द्धद्वयेनैकमेव वाक्यम्। तदा सङ्गतमजर्येण[7] विशिष्यते। [8]सङ्गतशब्देन युक्तार्थेनाजर्यं वा[9] ॥६८॥

दिगीश्वरार्थं न कथञ्चन त्वया कदर्थनीयाऽस्मि कृतोऽयमञ्जलिः।
प्रसद्यतां[1] नाऽद्य निगाद्यमीदृशं दृशौ[2] दधे बाष्परयास्पदे भृशम् ॥६९॥

[3]दिगीश्वरार्थमिति। त्वया अहं दिगीश्वराणामर्थे कथञ्चन। न कदर्थनीया। मया अयम् अञ्जलिः कृतः[4] बद्धः[5]। त्वया प्रसद्यतां प्रसन्नेन भूयताम्। [6]अद्य ईदृशं न निगाद्यं न वाच्यम्। अहं बाष्परयस्य आस्पदे स्थानकीभूते द्वेऽपि दृशौ दधे। ममाश्रुधोरणिसरणी प्रसरतः[7] ॥६९॥

वृणे दिगीशानिति का कथा तथा त्वयीति नेक्षे नलभामपीहया।
सतीव्रतेऽग्नौ तृणयामि जीवितं स्मरस्तु किं वस्तु तदस्तु भस्म यः ॥७०॥

[1]वृणे दिगीशानिति[2]। अहं दिगीशान् वृणे वरयामि इति का कथा का वार्त्ता ?। तथा ईह[या]दिगीशदूतोऽयमितीच्छया त्वयि वर्तमानां नलस्य भां शोभामपि न ईक्षे। अथवा या अहम् [3]इह त्वयि[4] तिष्ठन्तीं नलभां न विलोके सा कथं तां न[5] वृणे ?। उत्तरवाक्यगतो यच्छब्दः पूर्वत्र तच्छब्दं नापेक्षते। किन्तु सतीव्रतमेवाऽग्निस्तत्र जीवितं [6]तृणयामि तृणं करोमि। न तु इत्थं कृते कामस्तां पीडयिष्यतीत्याशङ्क्याऽऽह —तु पुनः स्मरः किं वस्तु अस्तु। न [को]पि पदार्थः। [7]यस्तत् प्रसिद्धं भस्म। अथवा[8] तदिति पूर्ववाक्यगतमेव वस्तुनो विशेषणम्। [9]तथा [10]च न सङ्कीर्णता। तस्मात्तस्य बाधा [11]मम न [12]शङ्क्या ॥७०॥

न्यवेशि रत्नत्रितये जिनेन यः स धर्मचिन्तामणिरुज्झितो यया।
कपालिकोपानलभस्मनः कृते तदेव भस्म स्वकुले स्तृतं तया ॥७१॥

[1]न्यवेशि रत्नेति। यो धर्मः जिनेन जिनधर्मप्रणेत्रा ज्ञानदर्शनचारित्र्याख्ये रत्नत्रितये न्यवेशि [2]रत्नत्रयमध्ये गणितः। यया स्त्रिया स धर्म एव चिन्तामणिः उज्झितः त्यक्तः। किमर्थम् ?। कपालिनः श्रीमहादेवस्य [यः] कोपानलः तस्य भस्म कामः तस्य कृते। स्मरपीडावशात् पतिव्रतात्वं त्यक्तं यया तया स्त्रिया तदेव भस्म स्वस्मिन् कुले[3]

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

स्तृतं विस्तारितम् । [4]अथवा जिनशब्देन विष्णुरुच्यते[5] । एके रत्न[6] त्रयं पदं वाक्यं प्रमाणं [7]चेति वदन्ति । यथा — पदे वाक्ये प्रमाणे च यस्य न स्खलिता गतिः । स एष मण्डनो याति लोकत्रितयमण्डनः ।। इति त्रिकाण्डीमीमांसायां ग्रन्थकारस्य पथि सञ्चरतः पुरतः पटहध्वनिः । अन्ये तु धर्मशास्त्रं मन्वादि, अर्थशास्त्रं चाणक्यादि[8], कामशास्त्रं [9]भरतवात्स्यायनादि[10] रत्नत्रितयम् आहुः । [11]इत्थं जिनेनाऽपि धर्मो रत्नत्रितये[12] स्वसमये सम्प्रतिपन्नः ।।७१।।

निपीय पीयूषरसौरसीरसौ गिरः स्वकन्दर्पहुताशनाहुतेः ।
कृतान्तदूतं न तया यथोदितं कृतान्तमेव स्वममन्यताऽदयम् ।।७२।।

[1]निपीय पीयूषेति । असौ नलः तस्याः पीयूषरसस्य औरसीः सुधार[स]पुत्रीभूता तस्माज्जाता गिरो वाणीर्निपीय यथा येन प्रकारेण[2] तया दमयन्त्या उदितं प्रोक्तं [3]स्वम् आत्मानं कृतान्तस्य यमस्य दूतं न अमन्यत । किन्तु स्वं कृतान्तमेव साक्षादन्तकमेव अदयं दयारहितम् अमन्यत । किं विशिष्टायास्तस्याः ?। स्वस्याऽऽत्मनो नलरूपस्य कन्दर्पहुताशनस्य आहुते[रु]द्दीपिकायाः[4] ।।७२।।

स भिन्नमर्माऽपि तदर्तिकाकुभिः स्वदूतधर्मान्न विरन्तुमैहत ।
शनैरशंसन्निभृतं विनिःश्वसन् विचित्रवाक्चित्रशिखण्डिनन्दनः ।।७३।।

स[1] भिन्नवर्मेति । स नलः तस्याः [2]अर्तियुक्तैः काकुभिः दीनवचनैर्भिन्नमर्माऽपि स्वस्मात् दूतधर्मात् विरन्तुं न ऐहत । दूतधर्मं त्यक्त्वा [3]स्वयंवरीतुं नैच्छत् ।[4] ततः शनैः[5] शनैः अशंसत् उवाच । परं निभृतं गुप्तं कामपीडया विशेषेण निःश्वसन् । किं विशिष्टः[6] ?। विचित्रायां वाचि वचनविषये[7] चित्रशिखण्डिनन्दनो बृहस्पतिः[8] ।।७३।।

दिवो धवस्त्वां यदि कल्पशाखिनं कदापि याचेत निजाङ्गणालयम् ।
कथं भवेरस्य न जीवितेश्वरा न मोघयाच्ञः स हि भीरु ! भूरुहः ।।७४।।

[1]दिवो धव इति । हे दमयन्ति ! यदि [2]त्वां दिवो धवो भर्त्ता इन्द्रः कदापि कल्पशाखिनं याचेत । द्विकर्मकः । किं [3]भूतम् ?। निजाङ्गणे आलयो यस्य तं तथा । सदा तत्रस्थम्[4] । ततः कथं त्वम् अस्य [5]नलस्य जीवितेश्वरा भार्या न भवेः ?। अपि तु [6]भवसि ।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

हे भीरु ! हि यतः स भूरुहः कल्पवृक्षः [7]न मोघा याच्ञा प्रार्थना यस्य स तथा नास्त्येव । किन्तु प्रार्थितप्रदः ।।७४।।

शिखी विधाय त्वदवाप्तिकामनां स्वयं हुतस्वांशहविः स्वमूर्तिषु ।
क्रतुं विधत्ते यदि सार्वकामिकं कथं स मिथ्याऽस्तु विधिस्तु वैदिकः ।।७५।।

[1]शिखी विधायेति । शिखी वह्निः यदि तव अवाप्तिमेव कामनां विधाय सार्वकामिकं सर्वकामप्रापकं [2]क्रतुं विधत्ते । किं भूतः ?। स्वयम् आत्मना स्वासु मूर्तिषु आहवनीयादिषु हुतः [3]स्वांशः स्वभागलक्षणं हविर्येन स तथा । अग्निरपि देवानां मध्ये स्थितो भागं मुख्यं [4]लभते । स्वयमेव होता [5]मानुषात् होतुः पूर्वोऽन्ये होतृषदने उपविश्य मानुषेण होत्रा [6]स्वरवर्णहीनत्वादिना विनाशितं मन्त्रवर्णादिकं संधत्ते । [7]यथाविध्यपराधो न भवति । तथा च मन्त्रः—यत्पाकत्रा मनसा दीनदक्षा न यज्ञस्य [8]मन्वते मर्त्यासः । [9]अग्निष्टद्धोता क्रतुविद्विजानन् यजिष्ठो देवाँ ऋतुशो [10]यजाति ।। (Rv. X. ii. 5) यतः मर्त्यासः मरणधर्माणो मानुषा होतारः यज्ञस्य पाकत्रा यज्ञस्य परिपाकं स्वरवर्णादियाथात्म्यं मनसा न [11]मन्वते न जानन्ति । [12]ततः सर्वम् अज्ञातम् । अग्निर्देवो होता [13]क्रतुवित् सन् विजानन् विशेषेण ज्ञानवान् यजिष्ठो यजनशीलः ऋतुशः काले काले देवान् [14]यजाति ज्ञानपूर्वकं यजति । लेट् । विभक्तिश्छन्दसां, लेटोऽडाटौ (पा° III. iv. 94) इति आट् आगमः ।।

[15]स्वीय एव हविर्भागः स्वयमेव हविष[16] आधारः च । ततः स वैदिको विधिः[17] तु पुनः कथं मिथ्याऽस्तु । [18]स्वांशः प्राप्नोत्येवेत्यर्थः । [19]कथं तु इति पाठान्तरम् । अथवा स्व[20] एकोंऽशः एकदेशोऽग्निः[21] हविःस्वरूपो भवति[22] । अग्नौ [23]प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते[24] । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ।। (मनु° III. 76) इति स्मरणात् । पशुव्रीहियवादिकं[25] हविरग्नेरंशः । अत्र च स्वयमेवाऽग्निर्होता [26]तथा हव्यमपि । अग्नेरुत्पन्नत्वात्तदंश एव । [27]अथवा स्वोंऽश प्रयाजानुयाजधृतपुरुषादि वा रूपो देवैर्दत्तः । तथा [28]शातपथी श्रुतिः आख्यायिकया [29]एतमर्थमाह—पूर्वं यागेषु देवेभ्यो हविर्वहन् अतिश्रमान्नष्ट्वा[30] अपां मध्ये वह्निः प्रविष्टः । ततश्च देवैर्विलोक्यमानो[31] यमेन वरुणेन च कथञ्चित् तत्र स्थितो ज्ञात्वा देवेभ्यो

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

निवेदितः । पुनश्च[32] देवैरनुनीयमानो हव्यवहनं वरदानेन अङ्गीकारितः । प्रयाजा अनुयाजाश्च नाम ये यागविशेषा[:]ते तवैव भागाः एकस्यैव भवन्तु, नान्यस्य । तथा च मन्त्राः एतस्मिन्नर्थे ऋग्वेदे सन्ति ।।

चतुःषष्ठ्यां सप्तपञ्चाशत्तमेऽध्याये देवानाम् अग्नेश्च संवादे नवर्च्चं सूक्तं, सप्तगुः ऋषिः, त्रिष्टुप् छन्दः । महत्तदुल्बं स्थविरं तदासीद्येनावेष्टितः प्रविवेशिथापः । विश्वा अपश्यद्बहुधा तेऽग्ने जातवेदस्तन्वो देव एकः ।। X. 51.1 ।।

हे अग्ने ! तत् महत् उल्बं गर्भवेष्टनं तव स्थविरं दृढम्[33] आसीत् । येनाऽऽवेष्टितः[34] सन् त्वम् अपः प्रविवेशिथ । हे जातवेदः ! [35]अग्ने ! तव विश्वाः तन्वः शरीराणि बहुधा नानारूपाणि घोराणि शान्तानि पवमानपावकशुचीनि [36]गुणविशिष्टानि शरीराणि एको देवोऽपश्यत् । पयःप्रविष्टं त्वाम् अजानात् ।। इति श्रुत्वाऽथ अग्नेर्वाक्यम् ।

को मा ददर्श कतमः स देवो यो[37] मे तन्वो बहुधा पर्यपश्यत् ।
क्वाह मित्रावरुणा ! क्षियन्त्यग्नेर्विश्वाः समिधो देवयानीः ।।2।।

हे मित्रावरुणौ ! मां को देवो ददर्श ?। तथा स कतमो देवो यो मे तन्वो गात्राणि पर्यपश्यत ?। मम अग्नेः विश्वाः[38] देवयानीः समिधः देवान् प्रति गमनशीलाः समिद्धाः तन्वः क्वाह[39] इति प्रश्ने । क्षियन्ति निवसन्ति ।। इत्यग्निनोक्ते देवैरुक्तम् ।

ऐच्छाम[40] त्वा बहुधा जातवेदः प्रविष्टमग्ने अप्स्वोषधीषु ।
तं [41]त्वा यमो अचिकेच्चित्रभानो दशान्तरुष्यादतिरोचमानम् ।।3।।

अग्ने ! [हे] जातवेदः ! [व]यं त्वा त्वाम् अप्सु ओषधीषु प्रविष्टं बहुधा ऐच्छाम अन्वेषितवन्तः । तं त्वा यमो देवः अचिकेत् जज्ञौ । हे चित्रभानो ! दीप्तकिरण !। किं भूतं त्वाम् ?। दशसङ्ख्यात् अन्तरुष्यात्[42] अन्तरवासात् अतिक्रम्य रोचमानम् । यावता मार्गेण दश आन्तरवासा भवन्ति तावन्तं बहुयोजनं मार्गमतिक्रम्य देदीप्यमानम् ।।

होत्रादहं वरुण[43] ! बिभ्यदायं नेदेव[44] मा युनजन्नत्र देवाः ।
तस्य मे तन्वो बहुधा निविष्टा एतमर्थं न चिकेताहमग्निः ।।4।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

हे वरुण ! अहं होत्रात् होतृकर्मणो हव्यवह्नलक्षणात् आयम्[45] [46]आगच्छं नष्टः । अत्र कर्मणि देवा मा मां नेत्[47] एव युनजन् मा मां निजोक्षुः (नियोक्षुः) । प्रविष्टा तस्य मे तन्वः बहुधा निविष्टाः । अहम् अग्निः एतं हविर्वहनम् अर्थं न चिकेता न जाने । नेत् शब्दो[48] भयवाचको माशब्दस्यार्थे । यदाह यस्काचार्यः[49]—अथापि नेत्येष [इ]दित्येतेन युज्यते [50]परिभये । यथा—हविर्भिरेके स्वरितः सचन्ते सुन्वन्त एके [51]सवनेषु सोमान् । शचीर्मदन्त[52] उत दक्षिणाभिर्नेज्जिह्मायन्त्यो नरकं पताम इति (निरुक्त° I. 3) । किल नारदेन विप्रलभ्यमानानाम् असुरस्त्रीणां वचनम् । एके इतः पृथिव्या ह[वि]र्भिः स्वः सचन्ते । एके सवनेषु [सोमान्] सुन्वन्तः । केचन दक्षिणाभिः कर्मसु देवान् मादयन्तः । वयं तु त्वद्वचसा पापं कुर्वन्त्यो नेत् नरकं पतामः । भर्तुशुश्रूषैव[53] स्त्रीणां धर्मः । नरकं न्यरकं [54]नीचैर्गमनम् ।। अत्र युनजन् मा मां नियोक्षुः । तस्य मे तन्वः बहुधा निविष्टाः । अहमग्निः एतं हविर्वहनम् [55]अर्थं न चिकेत न जाने ।

एहि मनुर्देवयुर्यज्ञकामोऽरंकृत्या तमसि [56]क्षेष्यग्ने ।
सुगान् पथः कृणुहि देवयानान् वह हव्यानि सुमनस्यमानः ।।5।।

हे अग्ने ! एहि आगच्छ । किं भूतः ?। मनुर्देवयुर्यज्ञकाम[57] इत्यग्निविशेषणानि । मनुवंशप्रसूतत्वान्मनुः । तथा—चन्द्रमच्छषलूना अग्निश्चाक्षुषश्चाक्षुर्मानवो मनुरासव(?) इति ऋचा । अथवा मनुः यज्ञकामो[58] वर्त्तते । देवयुः देवगमनकांक्षी । त्वम् आत्मानं तमसि गूढस्थानम् [अरम्] अतिशयेन कृत्वा[59] क्षेषि निवससि । [60]क्षिधातुर्निवासे । देवयानान् पथो मार्गान् सुगान् कृणुहि त्वं सुमनस्यमानो हृष्टः सन् हव्यानि वह ।।

अग्नेः पूर्वे भ्रातरो अर्थमेतं रथीवाऽध्वानमन्वावरीयुः ।
तस्माद्भिया वरुण ! दूरमायं गौरो न क्षेप्नोरविजे ज्यायाः ।।6।।

[हे देवा ! मम अग्नेः] सौचीकस्य पूर्वे भ्रातरो ज्येष्ठा वैश्वानरगृहपतियविष्ठपावकाख्या [61]एतं हविर्वहनम् अर्थम् अन्वावरीयुः । अनुक्रमेण निषिद्धवन्तः । पूर्वे [62]प्रार्थ्यमानाः सन्तः इति । शतपथे, यतस्ते हविर्वहन्तः सन्तो वषट्कारेण वज्रेण वृक्णाश्छिन्नाः[63]

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[64]दग्धास्ततो नाङ्गीकृतवन्तः इति। ऋग्वेदानुक्रमण्याम्, तथा च वषट्कारेण वृक्णेषु भ्रातृषु [65]सौचीकोऽग्निरपः प्रविश्य देवैः समवदुत्तरैस्त्रिभिर्महत्तन्नव तत्र युजोऽग्निवाक्यं विश्व इत्युत्तरं वषट्कमयुजो देवानां यामेच्छामेत्युत्तरं चैकादशकमिति (X. 150)। वृद्धाचार्योऽप्याह बृहद्देवतायाम् ॥

वैश्वानरे गृहपतौ यविष्ठे अग्नौ च पावके।
वषट्कारेण [66]वृक्णे अग्नौ च [67]सहसः स्तुतौ ॥VII. 62॥

अप[च]काम[68][देवेभ्यः]सौचीकोऽग्निरिति[69] श्रुतिः ॥VII. 63॥

स [70]प्राविशदपक्रम्य ऋतूनपो [71]वनस्पतीन्।
ततोऽसुराः प्रादुरासन्नष्टेऽग्नौ हव्यवाहने ॥64॥

[तेऽ]ग्निमेवान्ववैक्षन्त देवा हत्वाऽसुरान् युधि।
तन्तु [72]दूराद्यमश्चैवं वरुणश्चान्वपश्यताम् ॥65॥

[73]उभावेवं समादाय देवानेवाऽभिजग्मतुः[74]।
दृष्ट्वा देवास्त्वेनमूचुरग्ने हव्यानि नो वह ॥66॥

[75]वरान् गृहाण [76]वाऽस्मत्तश्चित्रभानो भजस्व नः।
प्रत्युवाच[77] तदाग्निस्तान् विश्वे ब्रूत यथा नु माम् ॥67॥

तत्करिष्ये [78]जुषन्तां तु होत्रं पञ्च जना मम।
शालामुख्यः प्रणीतश्च पुत्रो गृहपतेश्च यः ॥68॥

उत्तरो दक्षिणश्चाग्निरेते पञ्च जनाः स्मृताः।
मनुष्याः पितरो देवा [79]असुरा राक्षसास्तथा ॥69॥

[80]यस्को यमश्च तानेतानाहतुः पञ्च वै जनान्।
निषादपञ्चमान् वर्णान् मन्यते शाकटायनः[81] ॥70॥

ऋत्विजो यजमानं च शाकपूणिस्तु मन्यते।
आयुरस्तु च मे दीर्घं हवींषि विविधानि च ॥71॥

अरिष्टिः पूर्वजानां च भ्रातॄणामध्वरेऽध्वरे।
प्रयाजाश्चानुयाजाश्च घृतं सोमे [82]पयः पशुः ॥72॥

मद्दैवत्यानि[83] वै सन्तु यज्ञो मद्दैवतोऽस्तु च ॥73ab॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

तस्य त्रीणि सहस्राणि तथा[84] त्रीणि शतानि च ।
[85]त्रिंशतिश्चैव देवानां सर्वानितान्[86] वरान् ददुः ।।74।।

ततोऽग्निः सुमनाः प्रीतो विश्वैर्देवैः पुरस्कृतः ।
विधूयाऽङ्गानि यज्ञेषु चक्रे होत्रमतन्द्रितः ।।75।।

भ्रातृभिः सहितः प्रीतो दिव्यात्मा हव्यवाहनः ।।76ab।।

रोमाणि काशाः[87] केशास्तु[88] कुशाश्चर्म[89] [90]नखास्तथा ।।77cd।।

अन्त्राणि चैव[91] बाष्पं च मज्जा [92]सिकतशर्कराः ।
असृक् पित्तं च विविधा[93] धातवो गैरिकादयः ।।78।।

एवमग्निश्च देवाश्च सूक्तैर्महदिति त्रिभिः ।
समूदिरे परे [94]तस्मादैन्द्रे सूक्ते तु तां सुते ।।79।।

[इति] ।। यथा रथी महाशकटम् अध्वानम् आवृणोति रुणद्धि । तस्मात् [95]कारणात् भिया हे वरुणाऽहं दूरं नष्ट्वा आयम् आगतः । यतोऽहमपि अविजे बिभेमि[96] । न शब्द इवार्थे । यथा गौरो हरिणः क्षेप्नोः [97]ज्याया धनुषो मौर्व्या बिभेति ।।

कुर्मस्ते[98] आयुरजरं यदग्ने ! यथा युक्तो जातवेदो ! न रिष्याः ।
अथा वहासि सुमनस्यमानो भागं देवेभ्यो हविषः सुजात[99] ।।7।।

हे अग्ने ! वयं[100] ते तव यत् आयुस्तत् अजरम् अविनश्वरं वरदानेन कुर्मः । यथा त्वं हविषि युक्तः सन्न रिष्याः न[101] पीडयसे । रिष[102] (1311) हिंसायाम् । अथ पश्चात्[103] सुमनस्यमानः सन् हविषो भागं देवेभ्यो वहासि । [वहसि/हे सुजात ?] ।।

[104]प्रयाजान् मे अनुयाजांश्च केवलान् ऊर्जस्वन्तं हविषो दत्त भागम् ।
घृतं [105]चाऽपां पुरुषं चौषधीनामग्नेश्च दीर्घमायुरस्तु देवाः[106] ।।8।।

हे देवाः ! मम प्रयाजान् यागविशेषान् अनुयाजांश्च केवलान् ऊर्जस्वन्तं हविषो दत्त[107] [तथा] अन्यस्याऽपि हविषो[108] ऊर्जस्वन्तं बलवन्तं[109] भागं मम[110] दत्त । तथा अपां द्रवद्रव्याणाम् ओषधीनां पुरुषं सारं घृतं च मम दत्त । [मे] ममाऽग्नेश्च दीर्घमायुरस्तु ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

तव प्रयाजा अनुयाजाश्च केवल ऊर्जस्वन्तो हविषः सन्तु भागा:[111] ।
तवाऽग्ने यज्ञोऽयमस्तु सर्वस्तुभ्यं नमन्तां प्र दिशश्चतस्रः ।।9।।

हे अग्ने ! तव केवले असाधारणा एव प्रयाजा अनुयाजाश्च तथा हविषा ऊर्ज[स्व]न्तो भागा:[112] सन्तु । किं बहुना ?। हे अग्ने ! तव सर्वोऽयं यज्ञोऽस्तु । तथा तुभ्यं चतस्रोऽपि दिशः प्रनमन्ताम् । सर्वं तवैव प्रणं भवतु । त्वं होत्रं कुरु । तदनन्तरं स्विष्टकृल्लक्षणो भागः सर्वंहविर्मध्यादग्नेरसाधारण एव ।।

इत्थं नवानाम् ऋचाम् अर्थेन देवानामग्नेश्च संवाद:[113] इत्थं यदा अग्निः स्वयमेव होता भूत्वा स्वयं च स्वं भागं हविः स्वासु[114] मूर्तिषु जुहोति तदा त्वां प्राप्नोति ।।७५।।

सदा तदाशामधितिष्ठतः करं वरं प्रदातुं [1]चलिताद्बलादपि ।
मुनेरगस्त्याद् वृणुते स धर्मराड् यदि त्वदाप्तिं भण का तदा गतिः ।।७६।।

[2]सदा तदाशामिति । स धर्मराड् यमः अथ च न्यायवान् यदि तव आप्तिमगस्त्यात् मुनेः सकाशात् वृणुते याचते । किं भूतात् ?। बलादपि वरमभिलाष[3] करं दण्डं प्रदातुं चलितात् प्रवृत्तात्[4] । यतः सदा तस्य यमस्याऽऽशां [5]दक्षिणामधितिष्ठतः । परभूमौ किल मुधा न [6]वस्तव्यम् । [7]कर्मणां क्रिया[या]ः किमपि भाटकं बलादपि संमुखं भणित्वा भूमिस्वामिनो दातव्यम् । अथ च यो [8]यस्याऽऽशां बिभर्ति स तस्य काञ्चिदिच्छां करोति । ततस्त्वदाप्तिं[9] याचते चेत् धर्मराज:[10] धर्मेणैव, ततस्तदा तव का गतिः । त्वं तस्य पत्नी भवस्येव ।।७६।।

क्रतोः कृते जाग्रति वेद[1] कः कति [2]पतेरपां वेश्मनि कामधेनवः ।
त्वदर्थमेकामपि याचते स चेत् प्रचेतसः पाणिगतैव वर्तसे ।।७७।।

[3]क्रतोः कृते इति । अपां पतेर्वरुणस्य वेश्मनि क्रतोः [4]कृते यागहविरर्थे [5]कति कामधेनवो जाग्रति विद्यन्ते ?। इति को वेद ?। न कोऽपि सङ्ख्यां जानाति । स निरन्तरं यागदीक्षापर एव । यदि स त्वदर्थमेकामपि[6] कामधेनुं याचते, ततस्त्वं प्रचेतसः पाणिगता एव वर्त्तसे ।।७७।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

न सन्निधात्री यदि विघ्नसिद्धये पतिव्रता पत्युरनिच्छया शची ।
स एव राजव्रजवैशसात् [1]कुतः परस्परस्पर्द्धिवरः स्वयंवरः ।।७८।।

[2]न सन्निधात्रीति । यदि शची इन्द्राणी विवाहविघ्नसिद्धये पत्युरिन्द्रस्याऽनिच्छया न सन्निधात्री सन्निहिता न भवित्री[3] । यतः पतिव्रता । ततस्तव स[4] स्वयंवर एव कुतः[5] भविष्यति ?। कस्मात् ?। राज्ञां व्रजस्य समूहस्य वैशसात् मरणात् । [6]यतः परस्परस्पर्द्धिनो वरा यत्र स तथा । सर्वत्रेन्द्राणीसन्निधानात् विघ्नो [7]न भवति । [8]विवाहे तु [9]शच्या असन्निधानात् तु[10] ते परस्परयुद्धात् तव हेतोर्मरिष्यन्ति ।।७८।।

निजस्य वृत्तान्तमजानतां मिथो मुखस्य रोषात् परुषाणि जल्पतः ।
मृधं किमच्छत्रकदण्डताण्डवं भुजाभुजि क्षोणिभुजां दिदृक्षसे ।।७९।।

[2]निजस्य वृत्तान्तमिति । त्वं किं क्षोणिभुजां युद्धं दिदृक्षसे ?। कथम् ?। यथा भवति । अच्छत्रकाश्छत्ररहिता ये [3]दण्डास्तेषां ताण्डवं [4]नृत्तं यत्र । छत्रदण्डैर्युध्यमानानां तथा भुजैश्च प्रहृत्य युद्धं वृत्तं भुजाभुजि । केचिद् बाहुयुद्धेन केचिच्च दण्डयुद्धेन [6]योत्स्यन्ते । किं भूतानाम् ?। [7]मिथो रोषात् [8]निजस्य परुषाणि[9] जल्पतो मुखस्य वृत्तान्तम् अजानताम् । कोलाहलेन सङ्कुलयुद्धे अहं[10] किमपि वदन्नस्मीति शुद्धिर्नास्ति ।।७९।।

अपार्थयन्याजकफूत्कृतिश्रमं ज्वलेद्रुषा चेद्वपुषा तु[1] नाऽनलः ।
अलं नलः कर्तुमनग्निसाक्षिकं विधिं विवाहे तव सारसाक्षि ! कम् ?।।८०।।

अपार्थयन्निति । तु पुनश्चेदनलो वह्निः वपुषा शरीरेण न ज्वलेत् रुषा कोपेन । किं कुर्वन् ?। [2]याजकस्योपाध्यायस्य फूत्कृतिश्रमम् अपार्थयन् वृथा कुर्वन् । [3]स वारंवारं मुखेन फूत्करोति, परं न ज्वलति । ततो हे सारसाक्षि ! तव विवाहे नलः अनग्निसाक्षिकं विधिं कर्तुम् [4]अलं समर्थः । ज्वालां विना होमो न भवति । होमं विना अग्निः साक्षी न भवति ।।८०।।

पतिंवरायाः कुलजं वरस्य वा यमः कमप्याचरितातिथिं यदि ।
कथं न गन्ता विफलीभविष्णुतां स्वयंवरः साध्वि ! समृद्धिमानपि ।।८१।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]पतिंवराया इति। यदि यमः पतिंवराया दमयन्त्याः कुले जातं गोत्रिणं वा अथवा वरस्य गोत्रजं [2]कमप्यतिथिम् [3]आचरिता स्वगृहं नेष्यति। हे साध्वि! समृद्धिमानपि स्वयंवरः कथं विफलीभविष्णुतां न [4]गन्ता। निष्फलो न भविष्यति[5] ॥८१॥

[1]अपः प्रति स्वामितयाऽपरः सुरः स ता निषेधेद्यदि नैषधक्रुधा।
नलाय लोभाततपाणयेऽपि ते पिता कथं त्वां वद सम्प्रदास्यते? ॥८२॥

[2]अपः प्रतीति। अपरः सुरः अपः पानीयानि प्रति स्वामितया वरुणः स यदि ताः अपः नैषधक्रुधा निषेधेत्। [3]नलसम्प्रदानसमर्थने सर्वं व्याप्यसामर्थ्यं व्यञ्जनेन वदेत्यनेन गर्भितत्वं गुणः। तत् ततो वद तव पिता त्वां [4]नलाय कथं सम्प्रदास्यते[5]?। किं भूताय?। लोभेनाऽऽततः पाणिर्येन तस्मै तथाविधायाऽपि। उदकं विना सङ्कल्पो न भवति। [6]अभितःपरितःसमयानिकषाहाप्रतियोगेषु दृश्यते (वा° 137) इति द्वितीया ॥८२॥

इदं [1]महत्तेऽभिहितं [2]हितं मया विहाय मोहं दमयन्ति! चिन्तय।
सुरेषु विघ्नैकपरेषु को नरः करस्थमप्यर्थमवाप्तुमीश्वरः ॥८३॥

[3]इदं महत्ते इति। हे दमयन्ति! इदं ते तव मया महत् हितम् [4]अभिहितम्। त्वं मोहं विहाय चिन्तय। सुरेषु [5]विघ्नैकपरेषु सत्सु को नरः करस्थमपि अर्थम् अवाप्तुमीश्वरः? ॥८३॥

इमा गिरस्तस्य विचिन्त्य चेतसा तथेति सम्प्रत्ययमाससाद सा।
निवारितावग्रहनीरनिर्झरे नभोनभस्यत्वमलम्भयद् दृशौ ॥८४॥

[1]इमा गिर इति। सा दमयन्ती तस्य दूतस्य[2] इमा गिरो विचिन्त्य चेतसा सम्यक् प्रत्ययं[3] प्रतीतिमा [4]ससाद आप। कथम्?। तथेति। मम नलावाप्तिर्न भविष्यति[5]। ततः स्वदृशौ नभोनभस्यत्वं श्रावणभाद्रपदत्वम् अलम्भयत्। किं भूतेन?। नि[6] वारितोऽवग्रहेण वृष्टिनिरोधेन नीरनिर्झरो [य]योः ते तथा। अथ च कस्याऽप्यवग्रहेण बाष्पनिवारणं न [7]कृतम्। रुरोदेत्यर्थः। [8]अपारितावग्रहेति पाठे न पारितः पर्याप्तोऽवग्रहो [9]ययोस्तौ अपारितावग्रहौ नीरनिर्झरौ [10]यत्र ते तथा ॥८४॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

स्फुटोत्पलाभ्याममलिदम्पतीव तद्विलोचनाभ्यां कुचकुड्मलाशया ।
निपत्य बिन्दू हृदि कज्जलाविलौ मणीव नीलौ तरलौ विरेजतुः ।।८५।।

[1]स्फुटोत्पलाभ्यामिति । तस्य[ा]विलोचना[भ्या]मेव स्फुटाभ्यां [2]विकसिताभ्यामुत्पलाभ्यां सकाशात् द्वौ कज्जलेनाविलौ मिश्रौ बाष्पबिन्दू नीलौ [3]तरलौ चञ्चलौ [4]च हृदि निपत्य। नीलौ मणी[5] इन्द्रनीलमणीव विरेजतुः विलेसतुः । हारमध्यस्थं नायकरत्नं तरलम् । काविव ?। अलिनो दम्पतीव[6] ! कया निपत्य ?। कुचावेव कुड्मलौ तयोराशया । भ्रमरो हि पुष्पात् पुष्पान्तरं सञ्चरति । मणीवादिनामुपसङ्ख्यातमि (वा° पा° I. i. 11)ति मणीव दम्पतीवेत्यत्र, द्विवचनमनौ (का° I. iii. 2) [7]इति सन्धिनिषेधो न भवति । [8]तदुक्तम्—[9]ईदादिप्रगृह्यत्वे मणीवादीनां प्रतिषेधो वक्तव्यः । मणीवोष्ट्रस्य लम्बेते प्रियौ वत्सतरौ मम । दम्पतीव रोदसीव (काशिका-I. i. 11) । [10]श्रीमहाभारते [11]मङ्क्युपाख्याने (शान्ति° XII. 171 12ab) प्रयोगोऽयम्[12] ।।८५।।

धुता पतत्पुष्पशिलीमुखाशुगैः शुचेस्तदासीत् सरसी रसस्य सा ।
रयाय बद्धादरयाऽश्रुधारया सनालनीलोत्पलनीललोचना ।।८६।।

धुता[1] पतत्पुष्पेति । सा तदा शुचेः शोक[स्य] रसस्य[2] सरसी [3]आसीत् [4]सशोकाऽभूत् । किं भूता ?। पतद्भिः पुष्पशिलीमुखस्य कामस्याऽऽशुगैर्बाणैर्धुता[5] । किं भूता ?। रयाय वेगाय [6]बद्धादरया अश्रूणां धारया कृत्वा सनालं यन्नीलोत्पलं तद्वत् नीले तदनुकारिणी लोचने यस्याः । अश्रुधारा एव नालद्वयम् । अथ शुचेर्ग्रीष्मस्य सरसी [7]पतन्तः पुष्पेभ्यः शिलीमुखा भ्रमरा येभ्यः एवं [8]विधैराशुगैर्वायुभिः [9]धुता । तत्र काले उद्दण्डा वायवो वान्ति । सनालनीलोत्पला च शुष्कजलत्वान्नालदण्डाः [10]प्रकटा भवन्ति ।।८६।।

अथोद्भ्रमन्ती रुदती गतक्षमा ससम्भ्रमा लुप्तरतिः स्खलन्मतिः ।
व्यधात् प्रियप्राप्तिविघातनिश्चयान्मृदूनि दूना परिदेवितानि सा ।।८७।।

[1]अथोद्भ्रमन्तीति । अथ सा प्रियस्य नलस्य प्राप्तेर्विघातस्याऽभावस्य निश्चयात् मृदूनि दूना सती परिदेवितानि रुदितानि व्यधात् । किं भूता ?। उद्भ्रमन्ती ग्रथिला [2]रुदती गता क्षमा यस्याः । ससम्भ्रमा [3]सभया । लुप्ता रतिः प्रीतिर्यस्याः । स्खलन्ती [4]मतिर्मननं यस्याः ।।८७।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

**त्वरस्व पञ्चेषुहुताशनात्मनस्तनुष्व मद्भस्ममयं यशश्चयम् ।
विधे ! परेहाफलभक्षणव्रती पताद्य तृप्यन्नसुभिर्ममाफलैः ।।८८।।**

[1]त्वरस्व पञ्चेति । हे पञ्चेषुहुताशन ! हे[2] कामाग्ने ! त्वं त्वरस्व । मां दग्ध्वा मम भस्ममयमात्मनो यशसः कीर्तेः चयं समूहं तनुष्व लोके विस्तारय । तथा हे विधे ! हे दैव ! त्वमद्य ममाऽफलैः निष्फलैरसुभिः प्राणैः तृप्यन् सन् पत पतितो भव, मां मारयन् । किं भूतः ?। परस्याऽन्यस्य ईहाया वाञ्छायाः फलस्य भक्षणमेव व्रतं यस्य तव स तथा । परस्याऽभीष्टं न[3] करोषि । अथ च यस्य फलभक्षण-व्रतं [स] [4]अफलानि भक्षयन् व्रतात् च्युतः पतितो भवति ।।८८।।

**भृशं वियोगानलतप्यमान[1] ! किं विलीयसे न त्वमयोमयं यदि ।
स्मरेषुभिर्भेद्य ! न वज्रमप्यसि ब्रवीषि न स्वान्त ! कथं न दीर्यसे ।।८९।।**

[2]भृशं वियोगेति । हे स्वान्त ![3] हे मानस ! [4]भृशं वियोगानलेन [5]तप्यमान ! त्वं यद्ययोमयं लोहमयं वर्त्तसे । किं न विलीयसे ?। वह्नितप्तं [7]लोहं तद्विलीनं जायते । [8]क्षुब्धस्वान्तध्वान्तलग्नम्लिष्ट-विरिब्धफाण्टबाठानि[9] मन्थमनस्तमःसक्ताविस्पष्टस्वरानायासभृशेशु (पा॰ VII. ii. 18) इडभावः[10] । [11]क्षुभिवाहीत्यादि (IV. VI. 93) कात्यायनः । किं [12]त्वं न ब्रवीषि ?। त्वं वज्रमपि[13] वज्रमयमपि नाऽसि न [14]भवसि । यतः हे स्मरस्य[पि] इषुभिर्भेद्य !। वज्रं हि केनाऽपि न भिद्यते । ततस्त्वं कथं न[15] दीर्यसे । [16]विदीर्यसे इति पाठान्तरम् । वज्रशब्दः पुंनपुंसकः ।।८९।।

**विलम्बसे जीवित ! किं द्रव द्रुतं ज्वलत्यदस्ते हृदयं निकेतनम् ।
जहासि नाद्यापि मृषा सुखासिकामपूर्वमालस्यमहो तवेदृशम् ।।९०।।**

[1]विलम्बसे इति । हे जीवित ! त्वं किं विलम्बसे ?। द्रुतं शीघ्रं द्रव गच्छ । ते तव जीवितस्य निकेतनं गृहम् अदः हृदयं ज्वलति[2] । अहो आश्चर्यम् । [3]तवेदृशमपूर्वमालस्यं यद्गृहे दीप्तेऽपि अद्याऽपि मृषा व्यर्थं[4] सुखासिकां सुखेनाऽऽसनं न जहासि न त्यजसि ।।९०।।

**दृशौ ! [1]महापातकिनो मनोरथाः कथं पृथू वामपि विप्रलेभिरे ।
प्रियश्रियः प्रेक्षणघाति पातकं स्वमश्रुभिः क्षालयतं शतं समाः ।।९१।।**

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[2]दृशौ महा इति। हे दृशौ ! [3]महापातकयुक्ता मम मनोरथाः कथं वामपि युवामपि[4] विप्रलेभिरे विप्रतारितवन्तः ?। किं भूते युवाम् ?। पृथू विस्तीर्णे। ततो युवां प्रियस्य नलस्य श्रियः शोभायाः प्रेक्षणघाति दर्शनविघ्नकरं[5] [6]पातकं पापं स्वमात्मकृतं[7] शतं समा वर्षाणि यावत् अश्रुभिः कृत्वा क्षालयतम्। [8]नलदर्शनं विना चिरं रोदनमेव युवयोरित्यर्थः। [9]मृषापातकिन इति पाठे अलभ्याशंसनेन मृषापातकयुक्ता इति व्याख्येयम् ॥९१॥

प्रियं [1]च मृत्युं न लभे तवेप्सितं तदेव न स्यान्मम यत्त्वमिच्छसि।
वियोगमेवेच्छ मनः ! प्रियेण मे तव प्रसादान्न भवत्वसौ मम ॥९२॥

[2]प्रियं च मृत्युमिति। हे मनः अहं तवेप्सितं प्रियं च[3] नलम्[4] अथवा मृत्युं [च] त्वदीप्सितं तावन्न लभे [5]न प्राप्नोमि। यतः [6]यत् त्वं मम इच्छसि तदेव न स्यात्। तत्प्रियावाप्तिप्रभृतिकं न भवेदेव इति तावद् दृष्टम्। ततः कारणात् हे चित्त ! मम त्वं प्रियेण नलेन सह वियोगमेवेच्छ[7] अभिलष। तव प्रसादात् ममाऽसौ वियोगो न भवतु ॥९२॥

न काकुवाक्यैरतिवाममङ्गजं द्विषत्सु याचे पवनं तु दक्षिणम्।
दिशापि मद्भस्म किरत्वसौ तया प्रियो यया वैरविधिर्वधावधिः ॥९३॥

न[1] काकुवाक्यैरिति। अहं द्विषत्सु मध्ये अङ्गजं कामं काकुवाक्यैर्दीनवाक्यैर्न[2] याचे। [3]यतोऽतिशयेन वामं प्रतिकूलं तु पुनः पवनमनिलं [4]याचे। यतः दक्षिणम् अनुकूलम्। अथ च दक्षिणानिलम्। अङ्गाज्जातः पुत्रोऽपि[5] प्रतिकूलो[6] न प्रार्थ्यते। द्विषन्नप्यनुकूलः प्रार्थ्यते। असौ दक्षिणानिलो मां हत्वा मम भस्म तया दिशा किरतु यया दिशा मम प्रियो नलो वर्तते। यतो वैरविधिर्वध एवाऽवधिर्यस्य स तथा। मारणानन्तरं विरहिणामनिलेन सह वैरं शान्तम्। ततः [7]प्रार्थितं स करिष्यति[8] ॥९३॥

अमूनि गच्छन्ति युगानि न क्षणः कियत् सहिष्ये न हि मृत्युरस्ति मे।
न मां तु कान्तः स्फुटमन्तरुज्झिता न तं मनस्तच्च न कायवायवः ॥९४॥

[1]अमूनि गच्छन्तीति। ममाऽयं क्षणो न गच्छति, किन्त्वमूनि दीर्घाणि युगानि गच्छन्ति। अहमद्याऽपि कियत् सहिष्ये। मे मम

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[2]मृत्युर्न ह्यस्ति। तु पुनः स्फुटं निश्चितं कान्तो नलो माम् अन्तर्नोज्झिता न त्यक्ष्यति। मनः कर्तृ[3] तं नलं न त्यक्ष्यति[4]। कायस्य वायवः प्राणादयः तच्च मनो न त्यक्ष्यन्ति।

कार्यकारणसङ्घातोपाधिक[5] आत्मा शरीरेषु क्षेत्रज्ञः तमन्नः[6] स्थूलशरीरमध्ये स्थितमहंशब्दवाच्यं नलो नोज्झति। अहं[7] नलं न मुञ्चामि। नलं [8]च मनो न मुञ्चति। नलो मनो न मुञ्चति। [9]मनोऽपि कायवायवो न मुञ्चन्ति। पुर्यष्टकाख्यस्य[10] लिङ्गशरीरस्योपलक्षणं मनः बुद्धीन्द्रियाणि खलु पञ्च। तथाऽपराणि कर्मेन्द्रियाणि, मनआदि चतुष्टयं च। प्राणा हि पञ्च। अथो वियदादिकं च कामश्च कर्म च तमः पुनरष्टमी भूः [इति] पुर्यष्टकम्। बुद्धिकर्मेन्द्रियाणि। मनोबुद्ध्यहङ्कारतद्वृत्तयः। प्राणापानसमानव्यानोदानाः[11]। पृथिव्यादिपञ्चकम्। कामः। कर्म शुभाशुभम्। तमोऽविद्या। मनश्च लिङ्गशरीरं यावत् तावत् स्थूलशरीरं न त्यजति। जीवे उत्क्रामति इन्द्रियाण्युत्क्रामन्ति। लिङ्गे उत्का[म]ति स्थूलशरीरं षाट्कौशिकं विच्छिद्यते। तथा च श्रुतिः—

तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राण—
मनुत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति (बृ°IV.iv.2)

[13]कान्तस्य चान्तःस्थितत्वे ममशब्दवाच्यस्य क्षेत्रज्ञस्योत्क्रमणाभावात् सर्वेषामनूत्क्रमणाभावः[14]। ततो[15] मम मरणं नास्ति ॥९४॥

मदुग्रतापव्ययशक्तशीकरः सुराः! स वः केन पपे कृपार्णवः।
उदेति कोटिर्न मुदे मदुत्तमा किमाशु सङ्कल्पकणश्रमेण वः[1] ॥९५॥

[2]मदुग्रतापेति। हे सुराः! स वो युष्माकं कृपाया अर्णवः केन [3]पपे क्व गतः?। किं भूतः?। ममोग्र[स्य] तापस्य व्यये प्रशमने शक्ताः शीकरा यस्य स तथा। किमाशु वो युष्माकं सङ्कल्पकणस्य श्रमेण इच्छामात्रेण मत्सकाशादुत्तमा अधिका स्त्रीणां कोटिर्नोदेति नोत्पद्यते[4]। किमर्थम्?। मुदे हर्षाय ॥९५॥

ममैव वाऽर्हदिवमश्रुदुर्दिनैः प्रसह्य वर्षासु ऋतौ प्रसज्जिते।
कथं [1]न शृण्वन्तु सुषुप्य देवता भवत्वरण्येरुदितं न मे गिरः ॥९६॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

ममेव[2] वा इति । वा अथवा देवता [3]मम वाक्यं कथं न शृण्वन्तु । [4]किं कृत्वा ?। सुषुप्य अत्यर्थं निद्रां कृत्वा । क्व सति ?। ममैवाऽश्रूणां दुर्दिनैर्वृष्टिभिरहर्दिवं प्रतिदिनं प्रसह्य वर्षासु ऋतौ वर्षाकाले प्रसञ्जिते सति[6] । देवतानामुत्तरायणं दिवसः । दक्षिणायनं रात्रिः [7]वर्षाः । तस्मान्मम गिरोऽरण्ये रुदितं[8] न भवतु । अपि तु भवतु । अचतुरविचतुरे[9] (पा° V.iv.77) त्यादिनाऽहर्दिवमिति निपातः[10] ।।९६।।

इयं न ते नैषध ! दृक्पथातिथिस्त्वदेकतानस्य जनस्य यातना ।
ह्रदे ह्रदे हा न कियद् गवेषितः स वेधसाऽगोपि खगोऽपि वक्ति यः ।।९७।।

[1]इयं न ते इति । हे[2] नैषध ! इयं ते तव त्वयि विषये एकतानस्य एकचित्तस्य जनस्य मल्लक्षणस्य यातना पीडा[3] । याचनेति क्वचित्पाठे[4] याचना प्रार्थना [5]न दृक्पथस्य अतिथिः त्वं न पश्यसि । हा कष्टं मया स खगो हंसः ह्रदे ह्रदे कियत् न गवेषितः[6] बहु [7]विचितः । परं वेधसा सोऽपि अगोपि क्वाऽपि गोपितः । यो[8] नैषधस्याग्रे पक्षी ममाऽऽर्तिं वक्ति ।।९७।।

ममाऽपि किं नो दयसे [1]दयाधनस्त्वदङ्घ्रिमग्नं यदि वेत्थ मे मनः ।
निमज्जयन् सन्तमसे पराशयं विधिस्तु वाच्यः क्व तवागसः कथा ?।।९८।।

[2]ममाऽपि किमिति । हे नल ! त्वं दयाधनः सन्[3] ममाऽपि किं नो दयसे दयां न कुरुषे । यदि त्वं मे मनः त्वदङ्घ्रिमग्नं तव चरण-स्मरणपरं वेत्सि । अथवा अत्रार्थे तु पुनर्विधिर्दैवं वाच्यः[4] सापवादः । तव [5]आगसः कथा [6]क्व ?। [7]तवापराधवार्त्ता नाऽस्ति । किं कुर्वन् विधिः ?। परस्याऽऽशयं चित्तं सन्तमसे निमज्जयन् । त्वदीयं मनो मोहेऽज्ञाने ब्रोडयन् । [8]अधीगर्थदयेशां (पा° II. iii. 52) मिति षष्ठी[9] ।।९८।।

कथावशेषं तव सा कृते गतेत्युपैष्यति श्रोत्रपथं कथं न ते ?।
दयाणुना मां समनुग्रहीष्यसे तदाऽपि तावद्यदि नाथ ! नाऽधुना ।।९९।।

[1]कथावशेषमिति । हे नल ! सा दमयन्ती तव कृते त्वदर्थे कथावशेषं गता मरणं प्राप्ता इति वार्त्ता कथं तव श्रोत्रपथं नोपैष्यति ?। अपि तु उपैष्यत्येव[2] । हे नाथ ! यद्यधुना तावद् दयां न कुरुषे तदापि

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

मरणश्रवणानन्तरं मां त्वं दयाया अणुना लेशमात्रेण समनुग्रहीष्यसे ।।९९।।

ममादरीदं विदरीतुमान्तरं तदर्थिकल्पद्रुम ! किञ्चिदर्थये ।
भिदां हृदि द्वारमवाप्य मैव मे हतासुभिः प्राणसमः समं गमः ।।१००।।

[1]ममादरीद [म] इति । इदं ममाऽऽन्तरं हृदयं विदरीतुमादरि स्फुटितु सादरम् । तत् हे अर्थिकल्पद्रुम ! त्वां किञ्चित् अहं अर्थये [2]अहं याचे । त्वं मे मम हृदि भिदां विदारणं द्वारम् अवाप्य हतैर्निन्द्यैर्ममाऽसुभिः प्राणैः समं चित्तात् मैव गमः मा निःसर । यतस्त्वं प्राणसमः[3] तत्तुल्यः ।।१००।।

इति प्रियाकाकुभिरुन्मिषन्भृशं दिगीशदूत्येन हृदि स्थिरीकृतः ।
नृपं स योगेऽपि वियोगमन्मथः क्षणं तमुद्भ्रान्तमजीजनत्पुनः ।।१०१।।

[1]इति प्रियेति । स[2] वियोगो विप्रलम्भः शृङ्गारः तेन मिश्रो मन्मथः योगेऽपि दमयन्त्या सह योगेऽपि सन्निधावपि तं नृपं नलं पुनः क्षणमुद्भ्रान्तं ग्रथिलचित्तं अजीजनत् । शाकपार्थिवादिदर्शनात् मध्यपदलोपः । किं कुर्वन् ?। [3]इति प्रियायाः काकुवाक्यैर्भृशमुन्मिषन् [4]दीप्यमानः । तथा दिगीशानां दूत्येन हृदि स्थिरीकृतः [5]स्थैर्येण संवृतः[6] ।।१०१।।

महेन्द्रदूत्यादि समस्तमात्मनस्ततः
स विस्मृत्य मनोरथस्थितैः ।
क्रियाः प्रियाया ललितैः करम्बिता
विकल्पयन्नित्थमलीकमालपत् ।।१०२।।

[1]महेन्द्रदूत्यादीति । [2]ततः स नलः इत्थमलीकं [3]मिथ्या [4]आलपत् अज्ञानात् प्रलापं चक्रे । किं कुर्वन् ?। प्रियाया ललितैः [5]विलासैः करम्बिता मिश्रिताः क्रियाः चेष्टाः विकल्पयन् [6]विविधाः कल्पयन् । किं कृत्वा ? आत्मनः समस्तं महेन्द्रस्य[7] दूत्यादि दूतत्वादिकं विस्मृत्य । अहं दूतो न भवामि, किन्तु नलोऽहमिति मन्वानः । किं विशिष्टैः ?। मनोरथेषु पूर्वं स्थितैः मनसि चिन्तितैर्ललितैः ।।१०२।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

अपि प्रिये ! कस्य कृते विलप्यते विलिप्यते हा मुखमश्रुबिन्दुभिः ।
पुरस्त्वयालोकि नमन्नयं न किं तिरश्चलल्लोचनशीलया[1] नलः ।।१०३।।

[2]अपि प्रिये इति । हे प्रिये ! [3]अपि त्वया कस्य कृते [4]किमर्थं विलप्यते [5]विलापः क्रियते ?। हा कष्टम् अश्रुबिन्दुभिः मुखं विलिप्यते । त्वया अयं नलः पुरोऽग्रे नमन् सन् [6]अर्हंलक्षणः किं नालोकि ?। किं भूतया ?। तिरश्चलत् कटाक्षपरं लोचनयोः शीलं स्वभावो यस्याः[7] तया तथा । [8]तिरः पश्यन् हि पुरःस्थितं न पश्यति ।।१०३।।

चकास्ति बिन्दुच्युतकातिचातुरी घनाश्रुबिन्दुच्युतिकैतवात्तव[1] ।
मसारतारक्षि ! ससारमात्मना तनोषि संसारमसंशयं ततः ।।१०४।।

[2]चकास्तीति । हे प्रिये ! तव घनानामश्रुबिन्दूनां च्युतेः पतनस्य कैतवात् व्याजात् । बिन्दुच्युतकं नाम [3]काव्यालङ्कारग्रन्थेषु चित्र-विशेषः । तस्याऽति [4]चातुरी अतिचातुर्यं चकास्ति । तत्वं जानासि । हे मसारो नाम मणिविशेषः [5]तद्वत्तारे उज्ज्वले अक्षिणी यस्यास्तस्याः सम्बोधनम् । [6]त्वं ततः कारणात् [7]असंशयम् आत्मना संसारं सह सारेण वर्त्तते तथाविधं तनोषि । संसारशब्दस्य यदा बिन्दुरनुस्वारः च्याव्यते लुप्यते, तदा ससारशब्दो भवति । [8]अथवाऽश्रुबिन्दुच्युतिवशात् अभ्यासचातुर्यं जातम् । बिन्दुसंयुक्तः शब्दोऽन्यमर्थं दत्ते । [9]बिन्दुरहित-श्चाप्यन्यमर्थं दत्ते । [10]तद्विन्दुच्युतकं नाम[11] ।।१०४।।

अपास्तपाथोरुहि शायितं करे करोषि लीलानलिनं किमाननम् ।
तनोषि हारं कियदश्रुणः स्रवैरदोषनिर्वासितभूषणे हृदि ।।१०५।।

[1]अपास्तपाथोरुहीति । त्वं [2]किमाननं स्वमुखं करे शायितं सत् लीलानलिनं करोषि ?। किं भूते हस्ते ?। अपास्तं दुःखेन निराकृतं[3] पाथोरुट्[4] कमलं येन तस्मिन् तथा । गल्लहस्तेन किं चिन्तयसि । किञ्च [त्वम्] अश्रुणः स्रवैः बिन्दुभिः हृदि कियत् यावत् हारं तनोषि । किं [5]भूते ?। अदोषेण दोषं विनाऽपि[6] निर्वासितानि निरस्तानि भूषणानि येन [7]तत्र तथा । यः किल निर्वास्यते स [8]दोषमुद्भाव्य [9]निष्कास्यते । त्वया [10]तु [11]दुःखेनैव भूषणं त्यक्तम्[12] ।।१०५।।

दृशोरमङ्गल्यमिदं मिलज्जलं करेण तावत्परिमार्जयामि ते ।
अथापराधं भवदङ्घ्रिपङ्कजद्वयीरजोभिः सममात्ममौलिना ।।१०६।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]दृशोरमङ्गल्यमिति। तावत् अहमिदं ते तव दृशोर्मिलदश्रुजलम् [3]अमङ्गल्यरूपं करेण परिमार्जयामि। [4]अथ पश्चादहमात्मापराधम् आत्मनो मौलिना कृत्वा भवत्या अङ्घ्रिपङ्कजद्वयीसम्बन्धिरजोभिः[5] समं मार्जयामि। नमस्कारेण [6]स्वापराधं चरणरेणुं च स्फेटयामि ॥१०६॥

मम त्वदच्छाङ्घ्रिनखामृतद्युतेः किरीटमाणिक्यमयूखमञ्जरी।
उपासनामस्य करोतु रोहिणी त्यज त्यजाऽकारणरोषणे ! रुषम् ॥१०७॥

मम[1] त्वदच्छेति। हे प्रिये ! मम किरीटस्य मुकुटस्य[2] माणिक्यानां मयूखा एव मञ्जरी रोहिणी रक्तवर्णा तव अच्छा[3] अङ्घ्रिनखा[4] एवाऽमृतद्युतिस्तस्याऽस्य[5] उपासनां सेवां करोतु। नमस्कारेण कृत्वा हे अकारणरोषणे ! रुषं त्यज त्यज[6]। सम्भ्रमे यावद्बोधमिति द्विर्वचनम्। अथ च रोहिणी चन्द्रस्योपास्ति कुरुते ॥१०७॥

तनोषि मानं मयि चेन्मनागपि त्वयि श्रये तद्बहुमानमानतः।
विनम्य वक्त्रं यदि वर्त्तसे कियन्नमामि ते चण्डि ! तदा पदावधि ॥१०८॥

[1]तनोषि मानमिति। चेत् त्वं मयि विषये मनागपि मानं तनोषि, तदहम् [2]आ सामस्त्यभावेन नतः सन् त्वयि बहुमानं श्रये। [3]बहुमताऽभीष्टा त्वं मम[4] यदि लज्जया [5]वाऽन्यथा वा कियत् वक्त्रं विनम्य वर्त्तसे। हे चण्डि ! तदा ते तव पदावधि पादौ यावन्नमामि ॥१०८॥

प्रभुत्वभूम्नाऽनुगृहाण वा न वा
प्रणाममात्राधिगमेऽपि कः श्रमः।
क्व याचतां कल्पलताऽसि मां प्रति
क्व दृष्टिदाने तव बद्धमुष्टिता ? ॥१०९॥

[1]प्रभुत्वभूम्नेति। त्वं मां प्रभुत्वस्य ऐश्वर्यस्य भूम्ना बाहुल्येन अनुगृहाण वा [2]प्रसीद वा न वा अनुगृहाण मा वा[3] प्रसन्ना भूः। परं[4] प्रणाममात्रस्य अधिगमेऽपि ग्रहणेऽपि तव कः श्रमः ?। त्वम् अन्येषां याचताम्[5] अर्थिनां क्व[6] कल्पलताऽसि कल्पवल्ली वर्त्तसे ?। तव मां प्रति तु दृष्टेर्दानेऽपि बद्धमुष्टिता क्व कर्दयता क्व[7] ?। क्वशब्दो[8] महत्यन्तरे[9] ॥१०९॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

स्मरेषुमाथं सहसे मृदुः कथं हृदि द्रढीयःकुचसंवृते तव ।
निपत्य वैसारिणकेतनस्य वा व्रजन्ति बाणा विमुखोत्पतिष्णुताम् ।।११०।।

[1]स्मरेषुमाथमिति । त्वं मृदुः अतिमृद्वी सती[2] स्मरस्य इषूणां माथं मथनं [3]कथं सहसे ?। अथ वा, तव हृदि द्रढीयोभ्यां कुचाभ्यां संवृते वैसारिणो मत्स्यः केतनं यस्य कामस्य बाणा निपत्य विमुखाः सन्त उत्पतिष्णुतां व्रजन्ति । वा[4] अथवा ततः पीडां न कुर्वन्ति । [5]विसारिणो मत्स्ये (पा° V. iv. 16) इत्यण् ।।११०।।

स्मितस्य सम्भावय सृक्वणा कणान् विधेहि लीलाचलमञ्चलं भ्रुवः ।
अपाङ्गरथ्यापथिकीं च हेलया प्रसद्य सन्धेहि दृशं ममोपरि ।।१११।।

[1]स्मितस्येति । हे दमयन्ति ! त्वं सृक्वणा ओष्ठपर्यन्तेन स्मितस्य कणान् सम्भावय हास्यमात्रं कुरु[2] । तथा [3]भ्रुवः अञ्चलं प्रान्तं लीलाचलं विधेहि । तथा मम उपरि हेलया दृशं[4] दृष्टिं अपाङ्ग एव रथ्या मार्गः तत्र [5]पथिकीं प्रसद्य प्रसादं कृत्वा सन्धेहि । प्रसह्य इति पाठे बलात्कारेण कटाक्षं मयि धेहि ।।१११।।

समापय प्रावृषमश्रुविप्रुषां स्मितेन विश्राणय कौमुदीमुदः ।
दृशावितः खेलतु खञ्जनद्वयी विकासि पङ्केरुहमस्तु ते मुखम् ।।११२।।

[1]समापयेति । त्वम् अश्रुविप्रुषां बिन्दूनां प्रावृषं[2] वर्षाकालं समापय निवारय । स्मितेन कृत्वा कौमुदी ज्योत्स्ना तस्या मुदः[3] विश्राणय [4]देहि । इतो मयि विषये [5]दृशावेव खञ्जनद्वयी खेलतु क्रीडतु । ते [6]तव मुखं [7]विकासि पङ्केरुहं पद्मम् [8]अस्तु भवतु । वर्षानन्तरं शरदि ज्योत्स्ना भवन्ति । [9]खञ्जनाश्चागच्छन्ति । कमलानि च[10] विकसन्ति ।।११२।।

सुधारसोद्वेलनकेलिमक्षरस्रजा सृजान्तर्मम कर्णकूपयोः ।
दृशौ मदीये मदिराक्षि ! कारय स्मितश्रिया पायसपारणाविधिम् ।।११३।।

[1]सुधारसेति । मम कर्णकूपयोः अन्तः अक्षरस्य स्रजा वाक्यमालया सुधारसस्य उद्वेलनकेलिं सृज । अमृतं बहिर्निर्गमय । हे मदिराक्षि ! निर्मलनेत्रे ! मदीये दृशौ स्मितस्य श्रिया धवलया पायसस्य क्षीरोदनस्य पारणाया भोजनस्य विधिं कारय ।।११३।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

ममासनार्द्धे भव मण्डनं न न प्रिये ! मदुत्सङ्गविभूषणं भव ।
भ्रमाद् भ्रमादालपमङ्ग ! मृष्यतां विना ममोरः [1]कतरस्तवासनम् ।।११४।।

[2]ममासनेति । त्वं मम आसनस्याऽर्द्धे मण्डनं भव उपविश । अथवा एवं [3]न एवं न । निषेधद्वयमादरार्थम् । प्रिये ! मम उत्सङ्गस्य विभूषणं भव । अथवा अहं [4]भ्रमात् भ्रमात् भ्रान्त्या [5]भ्रान्त्या आसनार्द्धमुत्सङ्गं [6]च बहिरङ्गम् उपवेशनम् [7]आलपं प्रलापं चकार । अङ्ग अहो मृष्यताम् । त्वया [8]सह्यतामपराद्धद्वयम् । तव मम [9]उरःस्थलं [10]विना [11]कतरदन्यदासनम् ।।११४।।

अधीतपञ्चाशुगबाणवञ्चने ! स्थिता मदन्तर्बहिरेषि चेदुरः ।
स्मराशुगेभ्यो हृदयं बिभेतु न प्रविश्य तत्त्वन्मयसंपुटे मम ।।११५।।

[1]अधीतपञ्चाशुगेति । [2]हे अधीतं पञ्चाशुगस्य [3]बाणवञ्चनं यया तस्याः [4]सम्बोधनम् । तथा त्वं मम अन्तर्मध्ये स्थिता सती बहिर्भागे चेत् उरः [5]एषि हृदयम् [6]आसनीकृत्य आगच्छसि । तत् [7]ततो मम हृदयं [8]त्वन्मयं यत् सम्पुटं [9]तत्र प्रविश्य [10]स्मरस्य आशुगेभ्यो बाणेभ्यो न बिभेतु । मा भैषीत् । त्वया तावन्ममान्तः प्रविश्य कामबाणाः वञ्चिताः । अहमपि मध्ये बहिश्च त्वामेव सम्पुटं प्राप्य तेभ्यो न बिभेमि ।।११५।।

परिष्वजस्वानवकाशबाणता स्मरस्य लग्ने हृदयद्वयेऽस्तु नः ।
दृढा मम त्वत्कुचयोः कठोरयोरुरस्तटीयं परिचारिकोचिता ।।११६।।

[2]परिष्वजस्वेति । त्वं मां परिष्वजस्वेति[3] नोऽस्माकं [4]हृदयद्वये लग्ने सम्मिलिते तव मम च हृदि स्मरस्य अनवकाशबाणताऽस्तु । अनवकाशबाणा यस्य स[5] तथा तस्य भावस्तत्ता[6] । इयं मम उरस्तटी कठोरयोस्तव कुचयोः परिचारिका शुश्रूषापरा उचिता । यतो दृढा[7] ।।११६।।

तवाधराय स्पृहयामि यन्मधुस्रवैः श्रवः साक्षिकमाक्षिका गिरः ।
अधित्यकासु स्तनयोस्तनोतु ते ममेन्दुलेखाभ्युदयाद्भुतं नखः ।।११७।।

[1]तवाधरायेति । अहं तव अधराय स्पृहयामि । यस्य मधुनः स्रवैः तव गिरः श्रवसः[2] साक्षिकं कर्णप्रत्यक्षं माक्षिकं मधु यासां तास्तथाविधा

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

वर्तन्ते। यस्मात् ओष्ठात् [3]स्रुतेन मधुरत्वेन तव वाणीनां मधुभिः [4]तृप्तकर्णयोः। किञ्च तव स्तनयोः अधित्यकासु [5]उपरितनभूमिषु मम नखः इन्दुलेखाया अभ्युदयस्य अद्भुतम् आश्चर्यं करोतु। पर्वतोपरि चन्द्रस्य लेखा नखसदृशी भवति[6] ॥११७॥

न वर्तसे मन्मथनाटिका कथं प्रकाशरोमावलिसूत्रधारिणी।
तवाङ्ग हारे रुचिमेति नायकः शिखामणिश्च द्विजराड्विदूषकः ॥११८॥

[1]न वर्तसे इति। त्वं मन्मथनाटिका कथं न वर्तसे ?। अपि तु कामदेवनाटिका कामं[2] न वर्तयसि[3]। किं भूता ?। प्रकाशा प्रकटा[4] रोमावलिरेव सूत्रं तत् [5]धारयसीत्येवंशीला ! अथ च नाटके सूत्रधारो नाटकाचार्यो भवति। अङ्ग ! तव हारे नायको महामणिः रुचिं शोभां एति [6]प्राप्नोति[7]। [8]तथा शिखायां मुकुटे तव मणिश्च रुचिम् एति। किं भूतः ?। द्विजराजः चन्द्रस्य विशेषेण दूषकः दोषोत्पादकः। अथ च नाटके [9]कथानायकः अङ्गहारे नृत्ये रुचिम् अभिलाषं[10] प्राप्नोति। तथा द्विजानां राजा प्रधानो ब्राह्मणः विदूषको नाम नायकस्य मित्रं भवति[11] ॥११८॥

शुभाष्टवर्गस्त्वदनङ्गजन्मनस्तवाधरे लिख्यत यत्र लेखया।
मदीयदन्तक्षतराजिरञ्जनैः स भूर्जतामर्जतु बिम्बपाटलः ॥११९॥

[[1]………………… ………….… ……………………] ॥११९॥

गिरानुकम्पस्व दयस्व चुम्बनैः प्रसीद शुश्रूषयितुं मया कुचौ।
निशेव चान्द्रस्य करोत्करस्य यन्मम त्वमेकासि नलस्य जीवितम् ॥१२०॥

[1]गिरानुकम्पस्वेति। त्वं गिरा[2] [3]नुकम्पस्व। त्वं गिरा अनुकम्पां कुरु। चुम्बनैरनुगृहाण। मया कुचौ शुश्रूषयितुं प्रसीद। यत् यस्मात् असि त्वम् एकैव नलस्य [4]जीवितम्। यथा निशा चान्द्रस्य [5]कराणाम् उत्करस्य जीवितं भवति। रात्रिं विना चन्द्रकिरणो [6]त्करा न [7]भवन्ति[8] ॥१२०॥

मुनिर्यथात्मानमथ प्रबोधवान् प्रकाशयन्तं स्वमसावबुध्यत[1]।
अपि प्रपन्नां प्रकृतिं विलोक्य तामवाप्तसंस्कारतयाऽसृजद्गिरः[2] ॥१२१॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[3]मुनिर्यथेति । असौ नलोऽथ पश्चात् प्रकृष्टबोधयुक्तः[4] मोहविनाशे सति स्वम्[5] आत्मानं नलत्वं [6]प्रकाशयन्तम् अबुध्यत । मया उद्भ्रान्त्या दूतधर्मो नाशितः इति [7]नलोऽजानात् । ततश्च अवाप्त [8]संस्कारतया पूर्वसंस्कारेण ताम् आत्मनः प्रकृतिं [9]स्वाभाविकीम् [10]अवस्थां प्रपन्नां [11]प्राप्तां विलोक्य गिरो वाणीः असृजत् उवाच । नलः क इव ?। यथा मुनिर्ब्रह्मवित् अनेकजन्मार्जितनित्याग्निहोत्रादि[12]कर्माभ्यासेन प्रत्यवायपरिहारेण [13]काम्यनिषिद्धकर्मपरित्यागेन च नूतनकर्माभावात् अन्तःकरणशुद्धया भोगेन वर्त्तमानदेहारब्धे[14] शुभाशुभे [15]क्षपयित्वा शमदमादिसाधनचतुष्टयसम्पत्त्या शास्त्राचार्यप्रसादात् प्रकृष्टबोधयुक्तो[16] ब्रह्मज्ञानवान् आत्मानं स्वप्रकाशं [17]नित्यशुद्धबुद्धमुक्तस्वभावं[18] बुध्यते । श्रवणमनननिदिध्यासनैरहं ब्रह्मास्मी(बृ I. iv. 10)ति [19]प्रतिपद्यते । तथा जन्मान्तरीयसंस्काराभ्यासेन च तां प्रसिद्धां प्रकृतिं सत्त्वरजस्तमसां साम्यावस्थां मायाम् अनादिमविद्यां [20]प्रपन्नां पृथग्भूतां विलोक्याऽहं [21]मनुरभवं सूर्यश्चाहं कक्षीवान् ऋषिरस्मि [22]विप्रः । अहं [23]कुत्स-मार्जुनेयं न्यृञ्जेऽहं कविरुशना [24]पश्यता मा ।। इत्यादि ऋग्वेद (IV. 26.1) प्रसिद्धा ऋचः । वामदेवऋषिवन्मुक्तः सन् पश्यन् वदति[25] ।।१२१।।

अये ! मयात्मा किमनिह्नुतीकृतः
किमत्र मन्ता स तु मां शतक्रतुः ।
पुरः स्वभक्त्याऽथ नमन् ह्रियाऽऽविलो
विलोकिताहे न तदिङ्गितान्यपि ।।१२२।।

[1]अये मयात्मेति । अये ! मया आत्मा किम् अनिह्नुतीकृतः प्रकटीकृतः ?। मोहेनात्मानमहं किं प्रकटितवान् ?। अत्रार्थे तु पुनः स[2] शतक्रतुरिन्द्रः मां किं मन्ता ?। कुत्सितं कीदृशं वा ज्ञास्यति । अहं दूतधर्मं त्यक्त्वा पुरः [3]प्रथमं स्वभक्त्या प्रणामादिप्रह्वीभावेन नमन् सन् अथ पश्चात् अकृतकार्यत्वात् ह्रिया आविलः कलुषितः नमन् तस्येन्द्रस्य इङ्गितान्यपि कुपितादिचेष्टितान्यपि न विलोकिताहे[4] ।।१२२।।

स्वनाम यन्नाम मुधाभ्यधामहो महेन्द्रकार्यं महदेतदुज्झितम् ।
हनूमदाद्यैर्यशसा मया पुनर्द्विषां हसैर्दूत्यपथः सितीकृतः ।।१२३।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]स्वनाम यन्नामेति । यदहं स्वनाम मुधा वृथा अभ्यधाम् । दमयन्त्यग्रेऽवोचम्[2] । [3]नाम अहो एतत् महत् महेन्द्रस्य कार्यम् उज्झितम् । पूर्वं हनूमत्प्रभृतिभिर्दूतैर्दूत्यस्य पन्थाः यशसा सितीकृतः । मया पुनर्द्विषां द्वेषपराणां हसैः दूतत्वमार्गो धवलितः ।।१२३।।

धियात्मनस्तावदचारु[1] नाचरं परस्तु तद्वेद स यद्वदिष्यति ।
जनावनायोद्यमिनं जनार्दनं क्षये जगज्जीवपिबं शिवं वदन् ।।१२४।।

[2]धियात्मन इति । तावदहम् आत्मनो धिया बुद्धया बुद्धिपूर्वकं अचारु देवानामनिष्टं न आचरम् । एवं सति स परो लोकः यत् विरूपं वा [3]अन्यद्वा वदिष्यति तत्पर एव वेद जानाति । किं कुर्वन् ?। परः शत्रुर्वा लोको वा जनानाम् अवनाय पालनाय उद्यमिनं देवं[4] श्रीकृष्णं जनानाम् अर्द्दनं पीडाकरं वदन् तस्य जनार्दन इति नाम कृतम् । परः[5] पुनः किं कुर्वन् ?। परः क्षये कल्पान्ते जगतां जीवानां प्राणानां पिबं[6] रुद्रं संहारकारकं शिवं नाम्ना वदन्[7] कल्याणकरं वदन् । [8]पाघ्राध्माधेट्दृशः श (पा॰ III. i. 137) इति शप्रत्ययः[9] ।।१२४।।

स्फुटत्यदः किं हृदयं त्रपाभराद्यदस्य शुद्धिर्विबुधैर्विबुध्यताम् ।
विदन्तु ते तत्त्वमिदन्तु दन्तुरं जनानने कः करमर्पयिष्यति ।।१२५।।

[1]स्फुटत्यदः किमिति । [2]अदो मम हृदयं किं[3] त्रपा[या] भरात् स्फुटति दीर्यते ?। यत् यस्मात् अस्य मनसः शुद्धिर्विबुधैर्देवैः अथ च दक्षैः विशेषेण बुध्यताम् । तु पुनः इदं[4] दन्तुरं विषमं दुर्ज्ञेयं तत्त्वं सत्यं परमार्थं ते देवाः विदन्तु जानन्ति । जनानाम् आनने कः करं हस्तम् अर्पयिष्यति ।[5] देवाः सर्वज्ञत्वात् मम निरपराधतां जानन्तु । लोकं परापवादिनं[6] को मुखं पिधाय [7]वारयिता ।।१२५।।

मम श्रमश्चेतनयाऽनया फली बलीयसाऽलोपि च सैव वेधसा ।
न वस्तु दैवस्वरसाद्विनश्वरं सुरेश्वरोऽपि प्रतिकर्तुमीश्वरः ।।१२६।।

[1]मम श्रम इति । मम श्रमः आयासः दूतत्वम् अनया चेतनया फली सफलो भवति ।[2] वेधसा दैवेन बलीयसा मम सैव चेतना अलोपि [3]च लुप्ता । ग्रथिलोऽहं कृतः । यतो दैवस्य स्वरसात् स्वभावात् विनश्वरं वस्तु सुरेश्वरोऽपीन्द्रोऽपि प्रतिकर्तुं स्थापयितुं न ईश्वरः न समर्थः[4] ।।१२६।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

इति स्वयं मोहमहोर्मिनिर्मितं प्रकाशनं शोचति नैषधे निजम् ।
तथा व्यथामग्नतदुद्दिधीर्षया दयालुरागाल्लघु हेमहंसराट् ।।१२७।।

[1]इति स्वयमिति । इति अमुना प्रकारेण [2]नैषधे नले स्वयं मोहमहोर्मिनिर्मितं [3]निजं प्रकाशनम् आत्मप्रकटनं शोचति सति । लघु शीघ्रं दयालुर्दयावान् [4]हैमो सौवर्णो हंसराट् स एव आगात् । कया ?। तथा[5] तेन प्रकारेण व्यथायां मग्नस्य तस्य नलस्य उद्दिधीर्षया उद्धर्तुमिच्छया[6] ।।१२७।।

नलं स तत्पक्षरवोर्ध्ववीक्षिणं स एष पक्षीति भणन्तमभ्यधात् ।
नयाऽदयैनामति मा निराशतामसून् विहातेयमतः परं परम् ।।१२८।।

[1]नलं स तत्पक्षेति । स हंसः नलम् अभ्यधात् उवाच । किं [2]भूतम् ?। तस्य हंसस्य[3] पक्षरवेण ऊर्ध्वं वीक्षिणम्[4] । तथा एष स एव [5]पूर्वोपकारी [6]पक्षी इति भणन्तम् । हे अदय ! एनां दमयन्तीम् अतिशयेन निराशताम् आशारहितत्त्वं मा नय मा प्रापय । अतः परम् इयं परं केवलम् असून् प्राणान् [7]विहाता त्यक्ष्यति[8] ।।१२८।।

सुरेषु पश्यन्निजसापराधतामियत्प्रयस्याऽपि तदर्थसिद्धये ।
न कूटसाक्षीभवनोचितो भवान् सतां हि चेतःशुचितात्मसाक्षिका ।।१२९।।

[1]सुरेषु पश्यन्निति । भवान् कूटसाक्षीभवनोचितो [2]नास्ति । किं कुर्वन् ?। सुरेषु निजस्याऽऽत्मनः सापराधतां पश्यन् । किं कृत्वा ?। तेषामर्थसिद्धये इयत् एतावत् घनतरं प्रयस्य प्रयास कृत्वाऽपि । हि यस्मात् [3]सतां महात्मनां [4]चेतःशुचिता [5]मनसो निर्दोषत्वम् आत्मसाक्षिका । न परसाक्षिका । तस्मात्तव साक्षित्वं[6] कूटं न [7]भवति । [8]त्वं मा भैषीः[9] । तथा च स्मृतिः—यमो वैवस्वतो देवो यस्तवैष हृदि स्थितः । तेन [10]चेदविवादस्ते मा गङ्गां मा कुरून् गमः (मनु॰ VII. 92) ।। इति । तव चित्तं निर्मलं देवा एव जानन्ति । कथं जनानने कः करमर्पयिष्यती(IX. 125)ति वदसि । तथा 'परस्तु तद्वेद स यद्वदिष्यती(IX. 124)त्यपि न वाच्यम्[11] ।।१२९।।

इतीरणाऽऽपृच्छ्य नलं विदर्भजामपि प्रयातेन खगेन सान्त्वितः ।
मृदुर्बभाषे भगिनीं दमस्य स प्रणम्य चित्तेन हरित्पतीन्नृपः ।।१३०।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]इतीरणापृच्छ्येति। स [2]नृपो नलः चित्तेन हरितां दिशां पतीन् देवान् प्रणम्य मृदुः सन् दमस्य भगिनीं भैमीं बभाषे। किं भूतः?। इति ईरणा उक्तवता खगेन हंसेन सान्त्वितः [3]प्रियमुक्तः। किं भूतेन?। नलं विदर्भजामपि उभयम् आपृच्छ्य [4]प्रयातेन प्रयातुमारब्धेन[5] ।।१३०।।

ददेऽपि तुभ्यं कियतीः कदर्थनाः सुरेषु रागप्रसवावकेशिनीः।
अदम्भदूत्येन भजन्तु वा दयां दिशन्तु वा दण्डममी ममाऽऽगसा ।।१३१।।

[1]ददेऽपि तुभ्यमिति। अहं हे भैमि! तुभ्यमपि कियतीर्बह्वीः कदर्थनाः उक्तिप्रयुक्तिरूपाः ददे दत्तवान्। किं भूताः?। सुरेषु विषये रागोऽनुरागः सह[व] प्रसवः कुसुमं तत्र अवकेशिनीः फलरहिताः। यथा त्वं रागं कुरुषे तथा मयोक्तं परं निष्फलं जातम्[2]। ततोऽदम्भेन [3]दम्भरहितदूत्येन [4]अमी देवा दयां [5]वा भजन्तु। वा अथवा मम आगसा अपराधेन दण्डं वा दिशन्तु[6] ।।१३१।।

अयोगजामन्वभवं न वेदनां हितास मेऽभूदियमुन्मदिष्णुता।
उदेति दोषादपि दोषलाघवं कृशत्वमज्ञानवशादिवैनसः ।।१३२।।

[1]अयोगजामिति। मम इयम् उन्मदिष्णुता ग्रथिलता[2] हिताय प्रियार्थम् अभूत्। यतोऽहं [3]तव संयोगे अयोगाद्विरहाज्जातां वेदनां पीडां न अन्वभवम्। युक्तोऽयमर्थः। दोषादपि [4]मोहलक्षणात् दोषस्य[5] [6]विरहदुःखस्य लाघवम् अल्पत्वम् उदेति। कस्येव?। एनस इव। यथा अज्ञानवशात् कृतस्य एनसः पातकस्य कृशत्वं स्वल्पत्वं भवति। बुद्धिपूर्वकं कृतं पातकं द्विगुणेन प्रायश्चित्तेन शुध्यति। अबुद्धिपूर्वकम् एकगुणेन [7]प्रायश्चित्तेन शुध्यति। अज्ञानात् दोषात् पापस्य [8]दोषस्य लाघवं प्रायश्चित्तलघुत्वं भवति। [9]तथा च ब्रह्महत्या—प्रायश्चित्तम् अकामाद् ब्राह्मणं हत्वा द्वादशवर्षाणि आत्मनः पापं प्रकाशयन् कपालभिक्षाशी अन्यैश्च नियमैर्नियतेन्द्रियः शुध्यति। कामात्तु हत्वा द्विगुणेन प्रायश्चित्तेन शुध्यति वा न वा। [10]तदुक्तम्—प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं भवेत्। कामतो व्यवहार्यस्तु वचनादिह जायते (याज्ञ॰ प्राय॰ 226)[11] ।।१३२।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

न वेत्त्ययोगस्मरपावकोऽपि मे कदर्थनात्यर्थतयाऽगमद्दयाम् ।
प्रकाशमुन्माद्य यदद्य कारयन्मयात्मनस्त्वामनुकम्पते स्म सः ।।१३३।।

[1]न वेत्त्ययोगेति । अयोगस्मरपावकोऽपि वियोगानलोऽपि मे मम इति [2]कदर्थनाया अत्यर्थतया दयां न वा किम् अगमत् ।[3] वा अथवा दयां न चकार[4] । यत् अद्य माम् उन्माद्य [5]मया आत्मनः प्रकाशं कारयन् मम पार्श्वादात्मानमेव प्रकटं कारयन् [6]सन् स विरहस्मराग्निर्माम् अनुकम्पते स्म[7] ।।१३३।।

अमी समीहैकपरास्तवाऽमरा
स्वकिङ्करं मामपि कर्तुमीशिषे ।
विचार्य कार्यं सृज मा विधान्मुधा
कृतोऽनुतापस्त्वयि पार्ष्णिविग्रहम् ।।१३४।।

[1]अमी इति । अमी अमरास्तव समीहायाम् इच्छायाम् एकपराः एकनिष्ठाः त्वत्कामुकाः । त्वमपि मां स्वकिङ्करं निजं भृत्यं कर्तुम् ईशिषे ?।[2] त्वं विचार्य कार्यं मदङ्गीकारलक्षणं सृज[3] कुरु । पश्चात्त्वया कृतोऽनुतापः[4] पश्चात्तापः त्वयि विषये मुधा वृथा पार्ष्णिविग्रहं मा विधात् मा कार्षीत् । [5]मयि वृते सति पार्ष्णिग्राहो विग्रहकारी पश्चात्तापस्तव यथा[6] न [7]भविष्यति ।।१३४।।

उदासितेनेव मयेदमुच्यसे[1] भिया न तेभ्यः स्मरतानवान्नवा ।
हितं यदि स्यान्मदसुव्ययेन ते तदा तव प्रेमणि शुद्धिलब्धये ।।१३५।।

[2]उदासितेनेति । मया त्वम् उदासितेन इव उदासीनेन[3] इदम् उच्यसे[4] । न तेभ्यो देवेभ्यो भिया । न वा स्मरस्य तनुत्वात् [5]कृशत्वात् अभाववशाद्वा मया त्वं नोच्यसे[6] । यदि ते तव मम असूनां प्राणानां[7] व्ययेन त्यागेन हितं स्यात् । [8]तदा तव प्रेमणि स्नेहे [9]शुद्धेः लब्धये भवति । त्वदनुरागस्याऽऽनृण्यं[10] [11]भवति ।।१३५।।

इतीदृशैर्नैषधसूनृतामृतैर्विदर्भजन्मा भृशमुल्ललास सा ।
ऋतोरधिश्रीः शिशिरानुजन्मनः पिकस्वरैर्दूरविकस्वरैर्यथा ।।१३६।।

[1]इतीदृशैरिति । सा विदर्भजन्मा दमयन्ती इति ईदृशैर्नैषधस्य सूनृतामृतैः प्रियवचनैः भृशम् उल्ललास । यथा शिशिरानुजन्मनो

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

वसन्तस्य ऋतोः अधिश्रीः अधिका शोभा दूरम् अतिशये[न] विकस्वरैः पिकानां[2] कोकिलानां स्वरैः भृशमुल्लसति ।।१३६।।

नलं तदावेत्य तमाशये निजे घृणां विगातं च मुमोच भीमजा ।
जुगुप्समाना हि मनो धृतं तदा सतीधिया दैवतदूतधावि सा ।।१३७।।

[1]नलं तदेति । भीमजा[2] घृणां जुगुप्सां विगानं च आत्मनो[3] निन्दां च मुमोच । तं तदा नलं निजे[4] आशये अवेत्य । हि यस्मात् तदा सा आत्मीयं मनः जुगुप्समाना अभूत् । किं भूतम् ?। दैवतदूतं भणित्वा धावतीत्येवंशीलम् । किं भूतं मनः ?। [6]सतीधिया धृतं पतिव्रताबुध्या अवस्थितम् । अहं सती देवदूतं प्रति मम मनो गतम् इति आत्मानं निन्दन्ती नलोऽयमिति मत्वा सहर्षा जाता ।।१३७।।

मनोभुवस्ते भविनां मनः पिता निमज्जयन्नेनसि तन्न लज्जसे ।
अमुद्रि सत्पुत्रकथा त्वयेति सा स्थिता सती मन्मथनिन्दिनी धिया ।।१३८।।

[1]मनोभुव इति । सा दमयन्ती इति प्रकारेण [2]मन्मथं निन्दती सती स्थिता । कया ?। धिया बुध्या कृत्वा[3] हे मन्मथ ! ते तव भविनां संसारिणां मनः पिता तस्मात्त्वमुत्पद्यसे । किं विशिष्टस्य ?। मनोभुवः चेतसो[4] जातस्य । त्वं तन्मनः एनसि [5]पातके [6]देवदूतकामुकत्वलक्षणे निमज्जयन् [7]सन् किं न लज्जसे ?। ततस्त्वया हे स्मर ! सत्पुत्रकथा अमुद्रि नाशिता । सत्पुत्राः पितरं पापे न मज्जयन्ति । इत्थं निनिन्द ।।१३८।।

प्रसूनमित्येव तदङ्गवर्णना न सा विशेषात् कतमत्तदित्यभूत् ।
तदा कदम्बं तदवर्णि लोमभिर्दृगम्बुना[1] प्रावृषि हर्षमागतैः ।।१३९।।

[2]प्रसूनमितीति । पूर्वं तस्या अङ्गस्य वर्णना इत्येव[3] एतावती एवाऽभूत् यत् [4]दमयन्त्या अङ्गं प्रसूनं पुष्पसदृशमिति सा वर्णना इति विशेषान्नाऽभूत् । इतीति किम् ?। यत् कतमत् पुष्पं तस्याः अङ्गम् इति विशेषो न लब्धः । परं तदा तदङ्गं लोमभिः [5]रोमाञ्चेन कदम्बं तत्सदृशम् अवर्णि । किं[6] भूतैः ?। दृशोः अम्बुना अश्रुणा कृत्वा[7] प्रावृषि [8]जातायां हर्षं रोमाञ्चमागतैः । वर्षासु किल कदम्बाः पुष्पन्ति ।।१३९।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

**मयैव सम्बोध्य नलं व्यलापि यत् स्वमाह मद्बुद्धमिदं विमृश्य तत् ।
असाविति भ्रान्तिमसाद्दमस्वसुः स्वभाषितस्वोद्भ्रमविभ्रमक्रमः ।।१४०।।**

मयैवेति[1] स्वेन नलेन भाषितो यः स्वकीय उद्भ्रमस्य चित्तवैकल्यस्य विभ्रमो विलासस्तस्य क्रमः परिपाटी[2] दमस्वसुः इति भ्रान्तिम् असात्[3] अपनिनाय । षोऽ(1222) न्तकर्मणि । असादिति पाठे असात निरस्यति स्म । शो (1220) तनूकरणे । अद्यतनी (सिं°है° V.ii.4) । घ्राशाच्छासाधेटां वा वक्तव्यमि (दुर्ग °का° III.iv.93) ति सिचो लोपः[4] । इतीति किम् ?। मयैव यत् नलं सम्बोध्य नलनाम गृहीत्वा व्यलापि । असौ नलः तत् विमृश्य स्वम् आत्मान[5]—मिदं नलरूपम् आह । किं विशिष्टम् ?। मत्सकाशात् बुद्धम् ज्ञातम् । इति भ्रान्ति दमयन्ती निराचकार । अयं देवदूतो नलो न[6] भवति [7]इति शङ्का अपगता । यतोऽयं नलो न स्यात् । तत्कथमधुना मम प्रत्यक्षं विरहेण उद्भ्रमविभ्रमवशात् इत्थं [8]ग्रथिलो भवेत् । किन्तु नलानुरक्तां मां बुध्वा आत्मानं नलं कथयति । तस्मान्नल एवाऽयमिति ।।१४०।।

**विदर्भराजप्रभवा ततः परं त्रपासखी वक्तुमलं न सा नलम् ।
पुरस्तमूचेऽभिमुखं यदत्रपा ममज्ज तेनैव महाह्लदे ह्रियः ।।१४१।।**

[1]विदर्भराजेति । ततः परं सा[2] विदर्भराजप्रभवा नलं वक्तुम् अलं समर्था नाऽभूत् । किं भूता[3] ?। त्रपासखी लज्जायुक्ता । किञ्च यत्[4] पुरः[5] पूर्वं [6]प्रथमं देवदूतोऽयमिति मत्वा अत्रपा निर्लज्जा सती [7]अभिमुखं स्थिता [8]यदूचे उक्तवती तेनैव ह्रियो लज्जाया महाह्लदे दमयन्ती[9] ममज्ज । अग्रेतनं यदुक्तं तस्य महान् पश्चात्तापोऽभूत् ।।१४१।।

**यदाऽपवार्याऽपि न दातुमुत्तरं शशाक सख्याः श्रवसि प्रियाय सा ।
विहस्य सख्येव तमब्रवीत्तदा ह्रियाऽधुना मौनधना भवत्प्रिया ।।१४२।।**

[1]यदाऽपवार्याऽपि [इति] । यदा सा दमयन्ती अपवार्य सर्वजन-प्रत्यक्षं कृत्वाऽपि सख्याः श्रवसि कर्णे लगित्वा प्रियाय नलाय उत्तरं दातुं न शशाक । तदा सखी एव विहस्य तम् अब्रवीत्—इयं भवतः प्रिया अधुना ह्रिया कृत्वा मौनधना मौनिनी वर्त्तते ।।१४२।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]पदातिथेयांल्लिखितस्य ते स्वयं वितन्वती लोचननिर्झरानियम् ।
जगाद यां सैव मुखान्मम त्वया प्रसूनबाणोपनिषन्निशम्यताम् ।।१४३।।

[2]पदातिथेयानिति । इयं दमयन्ती [3]लिखितस्य ते तव पदयोः आतिथेयान् [4]अतिथिपूजारूपान् लोचनयोर्निर्झरान् अश्रुप्रवाहान् वितन्वती सती यां काम [स्य] उपनिषदं रहस्यभूतां सारभूताम् [5]उपालम्भगर्भगिरां जगाद । सैव प्रसूनबाणस्य उपनिषत् [6]उद्दीपिका कामाद्वैतप्रतिपादिका उपालम्भ [7]गर्भवचनपरम्परा[8] मम मुखात् निशम्यतां श्रूयताम् ।।१४३।।

असंशयं स त्वयि हंस एव मां शशंस न त्वद्विरहाप्तसंशयाम् ।
क्व चन्द्रवंशस्य वतंस ! मद्वधान्नृशंसता सम्भविनी भवादृशे ।।१४४।।

[1]असंशयमिति । असंशयं स सौवर्णो हंस एव मां त्वयि विषये तव विरहात् [2]आप्तप्राणसंशयां न शशंस । हे चन्द्रवंशस्य वतंस ! मुकुटभूत ! भवादृशे पुरुषे मम [3]वधात् नृशंसता क्रूरता क्व सम्भविनी न सम्भवति । तस्मात् हंसो न कथितवान् ।।१४४।।

जितस्त्वयाऽऽस्येन विधुः स्मरः श्रिया कृतप्रतिज्ञौ [1]मम तौ वधे कुतः ?।
तवेति कृत्वा यदि तज्जितं मया न मोघसङ्कल्पधराः किलाऽमराः ।।१४५।।

[2]जितस्त्वयेति । त्वया आस्येन विधुर्जितः श्रिया कृत्वा स्मरश्च[3] जितः । ततो द्वावपि चन्द्रकामौ मम वधे कुतः कथं[4] कृतप्रतिज्ञौ ?। मया किं तयोर्विनाशितम्[5] । यदि तव सक्ता सम्बन्धिनी अहं तिष्ठामि इति कृत्वा मां पीडयतः[6], तत् मया जितम् । किल अमरा देवाः न[7] मोघं निष्फलं स[8] ङ्कल्पं धरन्ति । एतौ च देवौ एताभ्यां च[9] सक्ताऽहं चित्ते[10] धृता[11] । ततो जितं मयेति । अकर्मकेन जयति । वा[12] दमयन्त्या अनियत उत्कर्षः प्रतिपाद्यते ।।१४५।।

निजांशुनिर्दग्धमदङ्गभस्मभिर्मुधा विधुर्वाञ्छति लाञ्छनोन्मृजाम् ।
त्वदास्यतां यास्यति तावताऽपि किं वधूवधेनैव पुनः कलङ्कितः ।।१४६।।

[1]निजांशुनिर्दग्धेति । विधुर्निजैः अंशुभिः निर्दग्धं [2]यत् मदङ्गं तस्य भस्मभिर्मुधा आत्मीयस्य लाञ्छनस्य उन्मृजाम् अपनयनम्[3]

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

उज्जालनं वाञ्छति। तावताऽपि कृतेन किम्[4] अयं चन्द्रः तव आस्यतां वक्त्रतां यास्यति। पुनः पुनरपि यतः [5]वधूनां वधेनैव कलङ्कितः ।।१४६।।

प्रसीद यच्छ स्वशरान् मनोभुवे स हन्तु मां तैर्धुत कौसुमाशुगैः ।
त्वदेकचित्ताऽहमसून् विमुञ्चती त्वमेव भूत्वा तृणवज्जयामि तम् ।।१४७।।

[1]प्रसीद यच्छेति। हे नल! त्वं प्रसीद स्वकीयान् शरान् मनोभुवे कामाय यच्छ अर्पय। स कामः [2]तैस्त्वद्बाणैः मां हन्तु। किं[3] भूतैः ?। धुताः कौसुमा आशुगा बाणाः [4]यैस्तैस्तथा। प्रथमान्तपाठे धुता कौसुमा आशुगा बाणा येन स तथा त्यक्तपुष्पबाणः। अहं त्वयि विषये एकचित्ता सती असून् प्राणान् विमुञ्चती सती त्वमेव[5] भूत्वा तं कामं जयामि। किंवत् ?। तृणवत्। यथा तृणं निःसारं तथा कामोऽपि निःसारः। यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेवरम्। तं तमेवैति[6] कौन्तेय! सदा तद्भावभावितः।। (गी° VIII. 6) इति [7]श्रीकृष्ण-वाक्यस्य वेदव्यासस्मरणात्।[8] तं यथा यथा उपासते तदेव [9]भवतीति श्रुतेश्च। तव बाणैः त्वच्चित्ता[हं] प्राणत्यागं कुर्वती त्वमेवाऽहं[10] जाता। ततो यथा त्वया कामो जीयते तथा मया तद्भूतया सुखेनैव जीयते ।।१४७।।

श्रुतिः सुराणां गुणगायिनी यदि त्वदङ्घ्रिमग्नस्य जनस्य किं ततः ?।
स्तवे रवेरप्सु कृताप्लवैः कृते न मृद्वती जातु भवेत्कुमुद्वती ।।१४८।।

[1]श्रुतिः सुराणामिति। यदि श्रुतिः वेदः सुराणां देवानां [2]गुणगायिनी गुणस्तुतिपरा। ततः[3] तव अङ्घ्रिमग्नस्य[4] चरणैकपरस्य[5] मल्लक्षणस्य जनस्य किं वेदो देवेष्वनुरक्तः ?। अहं तु त्वय्यनुरागपरा। यतः अप्सु मध्ये कृताप्लवैः[6] कृतस्नानैः पुरुषैः [7]रवे[:]स्तवे स्तुतौ कृते सति जातु कुमुद्वती मृद्वती हर्षयुक्ता न भवेत्। तस्याश्चन्द्रेऽनु-रागात् ।।१४८।।

कथासु शिष्ये वरमद्य न ध्रिये
ममाऽवगन्तासि न भावमन्यथा ।
त्वदर्थमुक्तासुतया सुनाथ! मां
प्रतीहि जीवाभ्यधिकस्त्वदेकिकाम् ।।१४९।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[2]कथासु शिष्ये इति। अहं [3]वरं कथासु वार्त्तामात्रेषु शिष्ये अवशेषा भवामि। प्रिये! वरम्[4] अद्य पुनः न ध्रियेे [5]नाऽवतिष्ठे न जीवामि। अन्यथा मम भावं [6]चित्ताभिप्रायं त्वं नाऽवगन्तासि न ज्ञास्यसि। हे [7]सुनाथ! त्वं मां जीवादप्यभ्यधिकः[8]। त्वमेव एको यस्याः तां तथाविधां प्रतीहि जानीहि। कया?। त्वदर्थं मुक्ता असवः प्राणा यया तस्याभावस्तत्ता तया[9] ।।१४९।।

महेन्द्रहेतेरपि रक्षणं भयाद्यदर्थिसाधारणमस्त्रभृद्व्रतम्।
प्रसूनबाणाशुगतोऽपि मामवत् क्षतं तदुच्चैरवकीर्णिनस्तव ।।१५०।।

[1]महेन्द्रहेतेरपि [इति]। यत्ते तव अस्त्रभृतां व्रतम्। किं भूतम्?। सर्वेषाम् अर्थिनां साधारणं यत् महेन्द्रस्य हेतेरायुधाद्वज्रादपि[2] भयात् रक्षणं तव व्रतं वर्त्तते। अन्यानपि अर्थिनो भीतान् रक्षति। तत्तव व्रतं क्षतं भ्रष्टं त्यक्तं [3]त्वया। हे प्रसूनबाणाशुगतोऽपि[4] मामवत्! सम्बोधने चे (पा॰ III. ii. 125) ति लट्। शतृ। अरक्षत (?) इत्यर्थः। अवदिति लक्षणया व्रतविशेषणम्। किं कुर्वत् व्रतम्?। मां प्रसूनबाणस्य कामस्य आशुगतोऽपि [5]बाणतोऽपि [6]नाऽवत् न रक्षत्। किं भूतस्य?। उच्चैरतिशयेन अवकीर्णिनः क्षतव्रतस्य ।।१५०।।

तवाऽस्मि मां घातुकमप्युपेक्षसे मृषामरं हाऽमरगौरवात् स्मरम्।
अवेहि चण्डालमनङ्गमङ्ग! तं स्वकाण्डकारस्य मधोः सखा हि सः ।।१५१।।

[1]तवाऽस्मि मामिति। हे[2] नल! अहं तव सक्ता अस्मि। हा कष्टं त्वं [3]स्मरं मां प्रति घातुकं हननशीलमपि अमरगौरवात् देवोऽयमिति कृत्वा उपेक्षसे। किं भूतम्?। मृषा वृथा अमरम् अङ्ग। हे! त्वम् अनङ्गं [4]तं चण्डालम् अवेहि[5]। हि यतः स कामः मधोर्वसन्तस्य सखा। किं भूतस्य?। स्वस्य कामस्य काण्डकारस्य बाणकर्तुः। [6]तस्य शराः पुष्पाणि किल वसन्ते जायन्ते। यश्च बाणान् घटयते स चण्डालो भवति [7]न लोकाव्ययनिष्ठाखलर्थतृनामि (पा॰ II. iii. 69) ति षष्ठीप्रतिषेधः[8] ।।१५१।।

लघौ लघावेव पुरः परे बुधैर्विधेयमुत्तेजनमात्मतेजसः।
तृणे तृणेठि ज्वलनः खलु ज्वलन् क्रमात्करीषद्रुमकाण्डमण्डलम् ।।१५२।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

अथवा योऽहिर्नागः शेषः दिशः[4] पतिः महीगौरवस्य[5] सासहिः। [6]महीमहिः सासहिरस्ति कोऽहीति पाठान्तरम् ।।१५।।

[1]स्वयं विमृश्यैव स धर्मशास्त्रं स्वयंवरं प्रास्थित न स्वयंभूः ।
व्यलोकि लोके मुनिभिः श्रुतो वा समं विवाहः क्व पितामहेन ।।१६।।

[2]स्वय[मिति]। स स्वयंभूर्ब्रह्मा ऊर्ध्वलोकपालः स्वयं धर्मशास्त्रं विमृश्यैव स्वयंवरे न प्रास्थित[3]। यतो लोके पितामहेन समं विवाहः क्व मुनिभिर्व्यलोकि। क्व वा श्रुतः।[4] समवप्रविभ्यः स्थ (पा॰ I. iii. 22)[5] इत्यात्मनेपदम्। ययौ विमृश्योर्ध्वदिशः [पतिर्न] स्वयंवरं वीक्षितधर्मशास्त्रः। व्यलोकि लोके श्रुतिष्विति पाठान्तरम्। लोके न दृष्टः श्रुतिषु च न श्रुतः इत्यर्थः ।।१६।।

[1]श्रुत्वा निजं भीमजया निरासं दूतीमुखादिन्द्रमुखा दिगीशाः ।।
स्यदे मुखेन्दौ च वितत्य मान्द्यं चित्तस्य ते राजसमाजमायुः ।।१७।।

[2]श्रुत्वा [इति]। इन्द्रमुखास्ते दिगीशाः दूतीनां मुखात् भीमजया[3] निजं निरासं निराकरणम् आत्मनः श्रुत्वा राज्ञां समाजम् सभामायुः।[4] निरस्तमिति पाठे निरसनम्। निरस्तमिति, नपुंसके भावे क्तः (पा॰ III. iii. 114)। ते इत्यत्र तमिति पाठान्तरम्। किं कृत्वा ?। स्यदे वेगे मुखेन्दौ च चित्तस्य मान्द्यं वितत्य। वेगेन [5]गमने चित्तं [6]मन्दं तथा मुखमपि कलुषम्। भैमीनिरस्तं स्वमवेत्य दूत्या मुखात्किलेन्द्रप्रमुखा इति। सभां [स] मीयुरिति च[9] पाठान्तरम्। [10]पशुभ्योऽन्येषां वृन्दं समाजः ।।१७।।

नलभ्रमेणाऽपि [1]वृणोति भैमी कदाचिदस्मानिति शेषिताशा ।
अभून्महेन्द्रादिचतुष्टयी सा चतुर्नली काचिदलीकरूपा ।।१८।।

नले[ति] सा महेन्द्रादीनां चतुष्टयी काचित् अपूर्वा अलीकरूपा[2] चतुर्णां नलानां समाहारश्चतुर्नली अभूत। किं भूता ?। इतीदृशी शेषिता आशा यया सा तथा। इतीति किम् ?। नलस्य भ्रमेण भ्रान्त्याऽपि कदाचिद् भैमी अस्मान् वृणोति। भजेत इति पाठान्तरम्। अनया आशया चत्वारो दिक्पाला न[ला] बभूवुः ।।१८।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

प्रयस्यतां तद्भवितुं सुराणां [1]पृष्टेन दृष्टेन परस्परेण ।
नैवानुमेने नलसाम्यसिद्धिः स्वाभाविकात्कृत्रिममन्यदेव ।।१९।।

प्रयस्यताम् [इति]। सुराणामिन्द्रादीनां परस्परेण नलस्य साम्यं तस्य सिद्धिर्नैवाऽनुमेने। किं भूतेन ?। पृष्टेन दृष्टेन च। एकेन तेषां मध्यादपरः पृष्टः अहं नलसदृशो जातः किम् ?। द्वितीयेन दृष्टः। [2]स आह न त्वं नलसदृशः। इत्थं सर्वैरपि नाऽनुज्ञातम्।[3] किं कुर्वताम् ?। असः सन् स नलो भवति तद्भवति। च्वि प्रत्ययः। तद्भवितुं नलीभवितुं प्रयस्यतां प्रयासं कुर्वताम्। युक्तोऽयमर्थः। स्वाभाविकात् नलरूपात् कृत्रिमं नलरूपम् अन्यदेव विरूपमेव। [4]इति हेतोर्वाक्यार्थता सामान्येन वा समर्थनेऽर्थान्तरन्यासः। ड्वितः[5] क्त्रिः (पा° III: iii. 88)। क्त्रेर्मम्नित्यमि (वा° 15/0)ति कृत्तद्धितौ। कात्यायनीये तु कृदेव। तद्वैतसिद्धिर्ननु जातु मेने इति पाठान्तरम्। [6]अनुप्रासोऽर्थान्तरन्यासः पक्षे, हेतुरपि ।।१९।।

पूर्णेन्दुमास्यं विदधुः पुनस्ते पुनर्मुखीचक्रुरनिद्रमब्जम् ।
स्ववक्त्रमादर्शतलेऽथ दर्शं दर्शं बभञ्जुर्न तथाऽतिमञ्जु ।।२०।।

[1]पूर्णेन्दुम् [इति] ते इन्द्रादयः पुनः पुनः[2] पूर्णेन्दुमास्यं[3] [4]विदधुः चक्रुः। [पुनरपि च अनिद्रं विकसितमब्जं मुखीचक्रुः]। अथ स्ववक्त्रम् आदर्शतले दर्शं दर्शं दृष्ट्वा [दृष्ट्वा] बभञ्जुः। कुतः ?। न तथा नलप्रकारेणाऽतिमञ्जु अतिमनोज्ञं न।[5] आभीक्ष्ण्ये णमुल्च (पा° III. iv. 22) इति णमुल्। [6]अनुप्रासो जातिरतिशयोक्तिश्च ।।२०।।

तेषां तदा लब्धुमनीश्वराणां श्रियं निजास्येन नलाननस्य ।
नालं तरीतुं पुनरुक्तदोषं बर्हिर्मुखानामनलाननत्वम् ।।२१।।

तेषाम्[1] [इति]। तेषां [2]बर्हिर्मुखानां बर्हिर्वैश्वानरो मुखं येषां तेषां[3] देवानामनलाननत्वं [4]कर्तृ पुनरुक्तिदोषं[5] तरीतुं नाऽलं [[6]न] समर्थं बभूव। किं भूतानाम् ?। तदा। तथेति पाठान्तरम्। नलाननस्य। नलाननीयामित्यपि पाठः। नलाननस्य[7] सम्बन्धिनीं श्रियं निजास्येन लब्धुमनीश्वराणाम्। अग्रेऽनलो[8] वह्निरान[9] येषां तेषां भावस्तत्त्वम्। इदानीं नलस्याऽऽननत्वं जातम्। अतः पुनरुक्तिदोषः ।।२१।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

प्रियावियोगज्वरितात्[1] किमैलाच्चन्द्राच्च राहुग्रहपीडितात्ते ।
ध्मातादृगृहीतैर्मदनाच्च सारैरकल्पयन्त स्वनलानुकल्पम् ।।२२।।

[3]प्रिये[ति] । ते सर्वे ऐलात्[4] पुरूरवसः सकाशात् इव सारैर्गृहीतैः स्वमात्मानं नलस्याऽनुकल्पं हीनकल्पं किञ्चित्सदृशम् अकल्पयन्ता किं भूतात् ?। प्रियाया उर्वश्या वियोगेन ज्वरितात् । यदा स पीडितः तदा तथाविधात्[5] कस्मात् अचेतनात् सौन्दर्यं गृहीतम् ?। तथा राहुग्रहेण[6] पीडिताच्चन्द्रादिव गृहीतैः सारैः । तथा ध्मातात् दग्धात् मदनात् [च] सारैर्गृहीतैः । ध्माताद्ध्रुवेन स्मरतोऽपि सारैः स्वं कल्पयन्ति स्म नलानुकल्पमिति पाठान्तरम् । मुख्यकल्पेन नलः, अनुकल्पे उक्तविशेषणविशिष्टैलादिसारनिर्मितं[9] तेषां रूपम् ।।२२।।

नलस्य पश्यत्वियदन्तरं तैर्भैमीति भूपान् विधिराहृताऽस्यै ।
स्पर्द्धां दिगीशानपि कारयित्वा तस्यैव तेभ्यः प्रथिमानमूचे[1] ।।२३।।

[2]नलस्य [इति] । विधिर्धाता अस्यै दमयन्त्यर्थम्[3] इति कारणात् [4]भूपानाहृत[5] । भैमी नलस्य तैः सह इयद् अन्तरं[6] भेदं[7] विशेषं पश्यतु । तथा विधिर्दिगीशान् अपि स्पर्द्धां कारयित्वा तेभ्यः सकाशात् तस्यैव नलस्य प्रथिमानमूचे आख्यत् ।।२३।।

सभा नलश्रीयमकैर्यमाद्यैर्नलं विनाभूद्धृतदिव्यरत्नैः ।
भामाङ्गणप्राघुणके चतुर्भिः कल्पद्रुमैद्यौरिव पारिजाते ।।२४।।

[2]सभे[ति] यमाद्यैश्चतुर्भिर्नलं विना सा सभा द्यौरिव स्वर्ग इवाऽभूत् । [3]न[ल]स्य[4] [श्रि]यः[5] शोभायाः यमकैः सदृशैः । तथा [धृ]तानि दिव्यरत्नानि यैस्तैस्तथा । यथा [6]पारिजाते कल्पद्रुमे व्यक्तिविशेषे भामायाः सत्यभामायाः श्रीकृष्णप्रियायाः अङ्गणे प्राघुणके[7] गते सति पाश्चात्यैश्चतुर्भिः कल्पद्रुमैर्देवद्रुमैर्मन्दारहरिचन्दन-कल्पवृक्षसन्तानाख्यैर्द्यौः शोभितवती । तैरपि [8]धृतदिव्यरत्नैर्निःश्रीको[9] बभूवेत्यर्थः । कल्पद्रुमशब्दोऽत्र कल्पद्रुमजातिवाचक । अयं देवद्रुमेषु पञ्चस्वपि वर्त्तमानो जातिवचनस्तथा च, कल्पद्रुमाणामिव पारिजातः (रघु॰ VI. 7) इति, कल्पद्रुमात्परिमला इवेति च । व्यक्तिविशेषे च सर्वत्र दृश्यते एव । देवद्रुमैरिति पाठान्तरम् । [10]अनुप्रास उपमा च ।।२४।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

तत्राऽऽगमद्वासुकिरीशवासभस्मोपदेहस्फुटगौरदेहः[1] ।
फणीन्द्रवृन्दप्रणिगद्यमान प्रसीद जीवाद्यनुजीविवादः ।।२५।।

[2]तत्र [इति]। तत्र वासुकिरागमत्[3]। किं भूतः ?। ईशस्य वासा [त्]भस्मनोपदेहेनोपलेपेन[4] स्फुटं गौरो देहो यस्य स तथा। अग्रेऽपि गौरः। शम्भुदेहभस्मना पुनरपि गौरः।[5] ईशभूषा भस्म इति पाठान्तरम्। अनुपसर्गो वा गमि। ईशवासादित्यनेनैव [च] सम्बध्यते। ईश्वरदेहादागच्छदित्यर्थः। किं भूतः ?। फणीन्द्रवृन्दैः प्रकर्षेण निगद्यमानः प्रसीद जीव जय इत्यादि अनुजीविनां[7] वादो यस्य स[8] तथा। यत् प्रसीदेत्यादि वदन्ति तत्फणीन्द्रैः [9]उच्यमानः। नेर्गदनदपत [प[10]]दे (पा॰ VIII. iv. 17)ति णत्वम्। [12]अनुप्रासः ।।२५।।

द्वीपान्तरेभ्यः पुटभेदनं तत् क्षणादवापे सुरभूमिभूपैः ।
तत्कालमालम्बि न केन यूना स्मरेषु पक्षानिलतूललीला ।।२६।।

[1]द्वीपा[न्तरेभ्य इति] सुरभूमेर्मनुष्यागोचरतया[2] देवानामेव प्रचारगोचरतया [च] स्वर्ग[स]दृश्यभूमेर्भूपै[3] राजभिः द्वीपान्तरेभ्यस्तत् पुटभेदनं नगरं क्षणादवापे प्राप्तम्। यतस्तत्कालं केन यूना स्मरस्येषूणां पक्षानिलस्य पक्षवातस्य पक्षवातं प्रति तूलस्य[4] लीला[5] नालम्बि। अपि तु सर्वेऽपि [6]स्मरेषु वायौ सति [7]तूलवत् वेगादागताः। [8]अन्यस्य लीला कथमन्येनाऽऽलम्ब्रत इति। तत्सदृशीत्युपमायां पर्यवसानम्। पर्यायः काव्यलिङ्गं निदर्शना चातिशयोक्तिरनुप्रासोऽपि ।।२६।।

[1]सपर्यया कुण्डिननाकनाथः शस्तेषु पस्त्येषु निवेशनेन ।
प्रियोक्तिदानादरनम्रताभिरुपाचरच्चारु स राजचक्रम् ।।२७।।

[2]सपर्यया [इति]। स कुण्डिनस्य नाकनाथो[3] राज्ञां चक्रं चारु यथा [तथा] उपाचरत्। कया ?। सपर्यया। तथा शस्तेषु [4]प्रशस्तेषु पस्त्येष्वावासेषु निवेशनेन। तथा[5] प्रियस्योक्त्या दानेन आदरेण नम्रतया च[6] ताभिः। नम्रताद्यैरिति पाठान्तरम्। उपचचार। रम्येषु हर्म्येषु इति पाठे [7]प्रथमद्वितीयपादयोर्व्यत्यासः। [8]अनुप्रासः समुच्चयश्च ।।२७।।

चतुः समुद्रीपरिखे नृपाणामन्तःपुरे वासितकीर्तिदारे ।
[1]दानं दया सूनृतमातिथेयी चतुष्टयी रक्षण सौविदल्ला ।।२८।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[2]चतुः[समुद्रीति]। [3]यतो नृपाणाम् वासिता कीर्तिरेव दारा [4]यत्र [5]तथा चतुर्णां समुद्राणां समाहारः सैव परिखा यत्र तत्र [तथा] एवंविधेऽन्तःपुरे इयं चतुष्टयी चतुष्टये[6] रक्षणार्थं सौविदल्लाः [7]महल्लका जालंधराः। का सा इत्याह—एकं तावद्दानम् अपरा दया तथा सूनृतं चतुर्थी आतिथेयी अतिथिपरिचर्या। इयं चतुष्टयी कीर्तिं[8] रक्षति। पथ्यतिथिवसतिस्वपतेर्ढञ् (पा॰ IV. iv. 104)। [9]अन्तःपुररक्षणनियोगे पुंसोऽनधिकाराद्दानमित्यादिनपुंसकत्वेन स्त्रीत्वेन च निर्देशः। रूपकं पूर्वश्लोकोक्तो विशेषोऽन्येन सामान्येन [10]धर्मेण समर्थ्यते इति श्लोकद्वयेनाऽर्थान्तरन्यासश्च ॥२८॥

अभ्यागतैः कुण्डिनवासवस्य परोक्षवृत्तेष्वपि तेषु तेषु।
जिज्ञासितस्वेप्सितलाभलिङ्गं स्वल्पोऽपि नाऽवापि नृपैर्विशेषः ॥२९॥

[1]अभ्या[गतैरिति]। परस्परं [परोक्षवृत्तेष्वपि] [2]अननुभूताचरणेष्वपि तेषु तेषु राजसु मध्ये नृपैर्जिज्ञासितो ज्ञातुमिष्टो यः [3]स्वस्य ईप्सितस्य [दमयन्ती] लाभस्य लिङ्गं चिह्नं भूतः। स स्वल्पोऽपि विशेषो नाऽवापि। कैः?। कुण्डिनवासवस्याऽभ्यागतैः कृत्वा लक्षणया पूर्वोक्तैर्भोजनाच्छादनाद्युपचारैः सर्वेषामप्युत्कृष्टैरुपचारैः कस्याऽपि राज्ञश्चित्ते इति नाऽभूत्। यत् ममैवाऽनेन विशेषोपचारलिङ्गेन दमयन्ती भविष्यति। अथवाऽभ्यागतैरिति नृपविशेषणम्। अथवा कुण्डिनवासवस्येति काकाक्षिन्यायेन कुण्डिनवासवस्य परोक्षवृत्तेष्वपि [4]अज्ञाताचरणेष्वपि तेषु तेषु राजसु मध्ये नृपैर्जिज्ञासितस्वेप्सितलाभलिङ्गं स्वल्पोऽपि विशेषो नावापि। कैः?। कुण्डिनवासवस्याऽभ्यागतैः [5]भीमनृपस्याऽप्रत्यक्षेष्वपि उपचारव्यवहारेषु विशेषो नावापि। इति चाऽतिशयोक्तिः ॥२९॥

अङ्के विदर्भेन्द्रपुरस्य शङ्के न संममौ नैष तथा समाजः।
यथा पयोराशिरगस्त्यहस्ते यथा जगद्वा जठरे मुरारेः ॥३०॥

अङ्के[1] [विदर्भ इति]। अहमिति शङ्के। एष राज्ञां समाजो विदर्भेन्द्रपुरस्य अङ्के तथा न [न] संममौ[2] [अपि तु संममौ।] यथा पयोराशिः अगस्त्यहस्ते ममौ। यथा [वा] मुरारेर्जठरे जगन्ममौ। अतिसावकाशमित्यर्थः। [3]अनेन पुरस्य विस्तीर्णता प्रदर्शिता। अनुप्रास उपमा उत्प्रेक्षाधिकं च ॥३०॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

पुरे पथिद्वारि गृहाणि तत्र चित्रीकृतान्युत्सववाञ्छयैव ।
नभंयु[1] किर्मीरमकारि तेषाँ महीभुजामाभरणप्रभाभिः ।।३१।।

[2]पुरे [पथीति] । तत्र पुरे गृहाणि [3]उत्सववाञ्छयैव [4]चित्रीकृतानि [विचित्रितानि] । किं भूतानि ?। पथि मार्गे द्वारो [ये] षा तानि[5] पथिद्वारि । द्वार्शब्दोऽयं व्यञ्जनान्तः । तेषां महीभुजाम् आभरण-प्रभाभिर्नानाविधाभिः नभंयु[6] न नभस्तु । नभोऽपि इति[7] पाठे आकाशमपि किर्मीरं चित्रि [त]मकारि । पथि द्वारि इति व्यस्तं[8] सप्तम्यन्तं पदद्वयम् । मार्गे द्वारदेशे च चित्रीकृतानीत्यर्थः इत्यन्ये । [9]द्वारगृहाणीति पाठे तस्मिन् पुरे मार्गे द्वारगृहाणि । प्रवेशगृहाणीति । पथिद्वारगृहाणीति बहुव्रीहिगर्भः समानाधिकरणस्तत्पुरुषो वा । अतिशयोक्तिः ।।३१।।

विलासवैदग्ध्यविभूषणश्रीस्तेषां [1]तथाऽऽसीत्परिचारकेऽपि ।
[2]विजानते येन विदर्भजा अमी तथा स्म तं नायकमेव भृत्यम् ।।३२।।

[3]विलासे(ति) । तेषां राज्ञां परिचारकेऽपि[4] भृत्यमात्रेऽपि विलासस्य वैदग्धस्य [5]विभूषणानाम् अलङ्करणानां च श्रीः शोभा तथा आसीत्[6] अभूत् । येन[7] विदर्भजा अमी लोकाः तमपि भृत्यमपि नायकमेव विजानते स्म । नायकमेव कञ्चिदिति पाठान्तरम् । तथा [8]अज्ञासिषुः स्त्रीशिशुबालिशास्तं यथागतं नायकमेव कञ्चिदिति पाठः ।।३२।।

[1]न स्वेदिनश्चामरमारुतेन निमेषमात्राः प्रतिचित्रपार्श्वैः ।
म्लानस्रजो नातपवारणेन देवा नृदेवा बिभिदुर्न तत्र ।।३३।।

[2]न स्वेदिन [इति] । तत्र देवा नृदेवाश्च राजानो न बिभिदुः[3] भेदं विशेषं न प्रापुः । तथा [4]चामराणां मारुतेन [5]न [6]स्वेदिनः स्वे[द]युक्ताः । तथा सर्वत्र चित्रैराश्चर्यकरैः [7]पार्श्वैर्न निमेषमात्राः । तथा आतपवारणेन छत्रेण न म्लाना ग्लानाः[8] शुष्काः [9]स्रजो येषां ते तथा । देवानां स्वेदराहित्यम् अनिमिषता अम्लानकुसुमता स्वभावतः एवाऽस्ति । अस्वेदगात्राश्चलचामरोघैरमीलनेत्राः प्रतिवस्तु-चित्रैः । अम्लानमाला विपुलातपत्रैर्देवा नृदेवाश्च भिदां न भेजुः इति

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

पाठान्तरश्लोकः। [10]देवादिति तु पाठे जात्याख्यायामेकवचनम्। देवेभ्य इत्यर्थः। अतिशयोक्तिः सामान्यं च हेतुरपि ।।३३।।

अन्योन्यभाषानवबोधभीतेः संस्कृत्रिमाभिर्व्यवहारवत्सु।
दिग्भ्यः समेतेषु नरेषु वाग्भिः स्वर्गीयवर्गो न जनैरचिह्नि ।।३४।।

[1]अन्योन्ये[ति]। दिग्भ्यः समेतेषु [नरेषु[2]] मनुष्येषु राजवर्गेषु मध्ये स्वर्गीयवर्गोऽपि वाग्भिः कृत्वा जनैर्लोकै न अचिह्नि अनुमानेन [न[3]] ज्ञातः। किं भूतेषु नरेषु?।[4] संस्कृत्रिमाभिः संस्कृतवाणीभिर्व्यवहारवत्सु [5]व्यवहारं कुर्वत्सु ब्रुवत्सु। व्यवहारवत्स्विवति पाठान्तरम्। कुतः?। अन्योन्यं भाषाया अनवबोधस्तस्माद्भीतेर्भयात्। गौडद्रविडमलयजमहाराष्ट्रगूर्जरमालवादिलोकानां परस्परप्राकृतभाषावबोधाभावात् संस्कृतेन [वदतां] देवानां [6]मानुषाणां च देव्या वाण्या भेदाभावः। [7]अतिशयोक्तिः सामान्यं हेतुरपि। अनुप्रासश्च ।।३४।।

ते तत्र भैम्याश्चरितानि चित्रे चित्राणि पौरैः पुरि लेखितानि।
निरीक्ष्य निन्युर्दिवसं निशां च तत्स्वप्नसम्भोगकलाविलासैः ।।३५।।

[1]ते तत्र[इति]। ते [रा]ज्ञानस्तत्र पुरि भैम्याश्चरितानि चित्राणि नानाप्रकाराणि पौरैश्चित्रे[2] लेखितानि निरीक्ष्य दिवसं निन्युः। तथा निशां च तस्याः स्वप्ने ये सम्भोगकलानां [3]वात्स्यायनोक्तानां गीतनृत्यादीनां[च] विलासास्तैश्च निन्युः। अन्यस्तु न स्वप्नेति पठित्वा[5] ।।३५।।

सा विभ्रमं स्वप्नगताऽपि तस्यां निशि स्वलाभस्य ददे यदेभ्यः।
तदर्थिनां भूमिभुजां वदान्या सती सती पूरयति स्म कामम् ।।३६।।

[1]सा विभ्रममिति। सा तस्यां निशि स्वप्नगताऽपि यदेभ्यो राजभ्यः स्वलाभस्य विभ्रमं विलासम् अथ च भ्रान्तिं ददे[2]। तदर्थिनां भूमिभुजां वदान्या सती सा सती पतिव्रता कामं पूरयति स्म। [3]अथवा वदान्या भैमी सती सती साध्वी सती कामं पूरयति स्म। या किल भ्रान्त्या [4]लाभं दत्ते सा कथं वदान्या। कथं [5]वाऽर्थिनां काममभिलाषं पूरयति। या च निशि स्वप्ने शयने स्वलाभस्य विलासं दत्त्वा अर्थिनां

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

कामं कन्दर्पं पूरयति तर्पयतीति[6]। सा कथं सती भवतीति विरोधाभास: [7]अनुप्रासश्च ।।३६[8]।।

विदर्भदूतानुनयोपहूतैः शृङ्गारभङ्गीरनुभावयद्भिः ।
स्वयंवरस्थान जनाश्रयस्तैर्दिनेऽपरत्राऽलमकारि वीरैः ।।३७।।

[1]विदर्भे [ति]। तैर्वीरैरपरत्र दिने स्वयंवरस्थाने जनाश्रयो मण्डपोऽलमकारि भूषितः। किं भूतैः!। विदर्भदूतैः अनुनयेन भक्त्योपहूतैः तथा शृङ्गारस्य भङ्गीर्विलासाननुभावयद्भिः ज्ञापयद्भिः ।।३७।।

भूषाभिरुच्चैरपि संस्कृते यं वीक्ष्याऽकृत प्राकृतबुद्धिमेव ।
प्रसूनबाणे विबुधाधिनाथस्तेनाऽथ साऽशोभि सभा नलेन ।।३८।।

भूषाभिः [इति]। अथ तेन नलेन [1]सा सभाऽशोभि। यं वीक्ष्य विबुधाधिनाथो महेन्द्रः प्रसूनबाणे कामे प्राकृतस्य पामरस्य बुद्धिमेवाऽकृत। किं भूते?। उच्चैर्भूषाभिः संस्कृतेऽपि। अथ च यत् संस्कृतं भवति तत्कथं प्राकृतं [2]विबुधानां स्यादिति विरोधः ।।३८।।

धृताङ्गरागे कलितद्युशोभां तस्मिन् सभां चुम्बति राजचन्द्रे ।
गता बताऽक्ष्णोर्विषयं विलङ्घ्य क्व क्षत्रनक्षत्रकुलस्य कान्तिः ।।३९।।

[1]धृताङ्गे [ति]। तस्मिन् राजचन्द्रे नले सभां चुम्बति सति। बत इत्याश्चर्ये। क्षत्राण्येव नक्षत्राणि तेषां कुलस्य कान्तिरक्ष्णोर्विषयं विलङ्घ्य क्व गता[2]?। किं भूते?। धृतोऽङ्गरागो येन तस्मिंस्तथा। किं भूतां सभाम्?। [3]कलिता दिव आकाशस्य शोभा यया तां तथा। धृतशरीररक्तत्वे चन्द्रे दिवि उदिते सति नक्षत्राणि चक्षुर्विषयं नाक्रामन्ति ।।३९।।

द्राग्दृष्टयः क्षोणिभुजाममुष्मिन्नाश्चर्यपर्युत्सुकिता निपेतुः ।
अनन्तरं दन्तुरितभ्रुवां तु नितान्तमीर्ष्याकलुषा [1]दृगंशाः ।।४०।।

[2]द्राग्दृष्टय इति। क्षोणिभुजां दृष्टयो द्राक् [3]शीघ्रममुष्मिन्नस्मिन्नले आश्चर्येण पर्युत्सुकिताः सत्यो निपेतुः। प्राक् दृष्टय इति पाठान्तरे पूर्वम् अनन्तरमिति व्याख्या। अनन्तरं[4] दन्तुरिता [5]विषमिता भ्रुवो

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

यैस्तेषां तथाविधानां सतां राज्ञां दृशाम् अंशाः अन्ताः[6] कटाक्षा निपेतुः। किं भूताः ?। नितान्तमीर्ष्ययाऽसहनत्वेनकलुषाः। [8]दन्त उन्नत उरच् (पा° V. ii. 106)। अनुप्रासो जातिरसूयोदयः। कणभक्षपक्षपातिनाम् अवयवालयविनोः प्रतिभासभेदात् भेदविवक्षायां पर्यायोऽपि ।।४०।।

सुधांशुरेष प्रथमो भुवीति स्मरो द्वितीयः किमसाविती मम् ।
दस्रस्तृतीयोऽयमिति क्षितीशाः स्तुतिच्छलान्मत्सरिणो निनिन्दुः ।।४१।।

[1]सुधांशु[रिति]। क्षितीशाः इमं नलं स्तुतिच्छलान्मत्सरिणः सन्तो निनिन्दुः[2] बभत्सुं:। कथम्?। इति एष किं भुवि प्रथमः सुधांशुः। तथा किमसौ द्वितीयः स्मरः[3]। किमयं[4] तृतीयो दस्रः अश्विनीकुमारः। [5]प्रथमद्वितीयतृतीयं इति शब्दःक्रमवैचित्र्यमेवमेव-मुत्तरत्राऽपि। यथा—आत्मा प्रजानां नयने नृपस्य त्रयीमयज्योतिषि बद्धभक्तिः चातुर्यभूः पञ्चशरस्य जेता [षण्णां] गुणानामपि सम्प्रयोक्ता। सप्ताङ्गराज्यस्य ललामभूतः प्रकामलब्धाष्टतनुप्रसादो नवग्रहानुग्रहगौरवेण[6] भूयादसौ चारुदशानुबन्धी। इति। मयूरोऽपि, एक ज्योतिरि (सू°श° 13)त्यादि बबन्ध। ससन्देहोऽपह्नुतिर्व्याजेन चेयं स्तुतिर्वस्तुवृत्त्या निन्दैवेति। व्याजस्तुतिरपि ।।४१।।

आद्यं विधोर्जन्म स एष भूमौ द्वैतं युवाऽसौ रतिवल्लभस्या ।
नासत्ययोर्मूर्तितृतीयताऽयमिति[1] स्तुतस्तैः कृतमत्सरैः सः ।।४२।।

[2]आद्यं विधोरिति। तैः राजभिः कृतमत्सरैः स इति स्तुतः स एष नलः भूमौ आद्यं विधोः जन्म। असौ युवा रतिवल्लभस्य द्वैतं द्वितीयाभावः[3]। तथाऽयं नासत्ययोर्मूर्तिस्तृतीयता[4]। किल[5] मत्सरै-रित्यपि पाठः[6]। व्याजस्तुतिः ।।४२।।

[1]मायानलोदाहरणान्मिथस्तैरूचे समाः सन्त्यमुना कियन्तः ।
आत्मापकर्षे किल मत्सराणां द्विषः [2]परस्पर्द्धनया समाधिः ।।४३।।

[3]माया[नलेति] तै राजभिर्मायानलानाम् उदाहरणात् दृष्टान्तात् मिथ इति ऊचे। अमुना समाः[4] कियन्तः सन्ति ?। बहवः तावद् दृश्यन्ते [5]नलास्ते[6]। कथमित्थं[7] वितर्कः कृत इत्याह-किल यस्मादात्म-नोऽपकर्षे हीनतायां सत्यां [8]मत्सराणां मत्सरयुक्तानां द्विषः शत्रोः

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

परस्पर्द्धनया[9] समाधिः । तेषां नलो द्वेष्यः, रूपेणाऽधिकत्वात् । ततश्च मत्सरेणेन्द्रादीन् [नलान् तत्समान्] [10]नलत्वेन दृष्टान्तीकृत्याऽऽत्मनां हीनत्वात् समाधानं चक्रुः । [11]अथवा आत्मापकर्ष[12] इति विषयसप्तमी । तदा आत्मापकर्षे समाधिरिति योज्यम् । अन्ये तु द्विषो द्वेष्टुरात्मापकर्षे सति द्वेष्यमत्सरैः स्पर्द्धनया मत्सराणां समाधिः । मत्सराणामिति वहुवचनेन मात्सर्यातिशयः कथ्यते । [13]अतो मायानलदृष्टान्तेन मात्सर्यं पुपुषुः । इहेदृशाः सन्ति कतीति दुष्टैर्दृष्टान्तितालीकनलावली तैः इति पाठान्तरम् । जातिरथन्तिरन्यासश्च ।।४३।।

गुणेन केनाऽपि जनेऽनवद्ये दोषान्तरोक्तिः खलु तत्खलत्वम् ।
रूपेण तत्संसददूषितस्य सुरैर्नरत्वं यददूषि तस्य ।।४४।।

[1]गुणेन [केनेति] खलु तत्खलत्वं यत् केनाऽपि गुणेन सौन्दर्यादिना अनवद्ये प्रशस्ते जने दोषान्तरस्य प्रकृतानुपयोगिनोऽन्यदोषस्योक्तिर्य-[2]त्सुरैस्तस्य नरत्वं मनुष्यत्वम् अदूषि । किं भूतस्य[3] ?। तस्यां संसदि अदूषितस्य । अथ च दृश्रुतेर्नलश्रुतिरिति न्यायेन नलत्वमदूषि । [4]अनवद्य इत्यत्राऽधर्मानृतापांशुलानवमेत्यादिवत् नञ् तद्विरुद्धे वर्त्तते । दोषान्तरोक्तिरित्युक्तेऽपि तत्खलत्वमिति तदित्यनेन परस्य लिङ्गं गृहीतम् । यमकम् । विशेषणसामान्यस्य साधर्म्येण समर्थनादर्थान्तरन्यासः ।।४४।।

मिथ्यानलांस्तथ्यनलो द्विपार्श्वीकृतोपवेशानवदत्सुवेषान् ।
उभौ किमैलश्च न दर्पकश्च भवन्ति नासत्ययुतौ भवन्तः[1] ।।४५।।

मिथ्यानलानित्यादि[2] । तथ्यनलो मिथ्यानलान् सुवेषान् अवदत्[3] अवादीत् । किं भूतान् ?। द्वयोः पार्श्वयोः समाहारः द्विपार्श्वी तत्र कृतोपवेशान् नलम्[4] अभित उपविष्टान् भवन्तः । उभौ किमैलः पुरूरवा दर्पकः कामश्च न भवन्ति । किं [5]भूतौ ?। नासत्याभ्याम् अश्विनीभ्यां[6] युतौ । एते चत्वारो यूयं किम् ?। नलानसत्यानवदत्स सत्यः कृतोपवेशान् सविधे सुवेषान् । नोभाविलाभूः [7]किमिति पाठान्तरम् । [8]अनुप्रासः ।।४५।।

अमी[1] तमीदृग्जगुरत्र मध्ये कस्याऽपि नोत्पत्तिरभूदिलायाम् ।
अदर्पकाः स्मः सविधे स्थितास्ते नासत्यतां नात्र बिभर्ति कश्चित् ।।४६।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

²अमी तमीदृगिति । अमी नलास्तं सत्यं नलम् ईदृग् जगु:³ ऊचु: । अत्राऽमीषां मध्ये कस्याऽपि इलायां बुधपत्न्याम् उत्पत्तिर्नाभूत् । अथ च इलायां पृथिव्यां⁴ देवत्वात् । [तथा वयं ते तव सविधे समीपे स्थिताः सन्तः अदर्पकाः ⁵न कन्दर्पाः भवामः । अथ च अदर्पका दर्परहिताः स्मः] । तथाऽत्र कश्चिदपि नासत्यतां दस्रतां न⁶ बिभर्ति । [अथ च] ⁷असत्यतां ⁸न बिभर्ति । अपि तु बिभर्ति । ⁹वक्रोक्तिः ।।४६।।

तेभ्यः परान्नः परिकल्पयस्व श्रिया विदूरीकृतकामदेवान् ।
अस्मिन् समाजे बहुषु भ्रमन्ती भैमी किलाऽस्मासु घटिष्यतेऽसौ ।।४७।।

¹तेभ्यः इति । हे नल ! त्वं नोऽस्मान् तेभ्यः ऐलदर्पकाश्विभ्यः³ परान् अन्यान् परिकल्पयस्व परिभावयस्व । किं भूतान् ?। श्रिया विदूरीकृतकामदेवो⁵ यैस्तांस्तथा⁶ । किल इत्याशायाम् । अस्मिन् समाजे बहुषु भ्रमन्ती सर्वानपि यूनः परीक्ष्यमाणाऽसौ⁷ भैमी अस्मासु⁸ घटिष्यते । अथ च हे श्रिया विदूरीकृतकाम ! नः देवान् परिभावयस्व । बहु[षु] सदृशेषु पञ्चसु नलेषु भ्रान्तिपरा असौ⁹ भैमी अस्मासु घटिष्यते ।।४७।।

असाम यन्नाम तवेह रूपं स्वेनाऽधिगम्य श्रितमुग्धभावाः ।
तन्नो धिगाशायतितान्नरेन्द्र ! धिक्चेदमस्मद्विबुधत्वमस्तु ।।४८।।

²असामे[ति] । हे नरेन्द्र ! यत् स्वेन ³तवात्मना रूपं ⁴तवाऽधिगम्य प्राप्य⁵ दृष्ट्वा । अथ च कृत्वा नाम अहो वयं श्रितमुग्धभावा इह समाजे असाम भवामः । पञ्चम्यु (का° III. i. 26) त्तमपुरुषबहुवचनम् । ⁶अस (1141) भुवि धातुः । मुग्धो मनोहरः । अथ च मुग्धो मूढः । तन्नोऽस्मान्⁷ आशा इच्छा⁸ तया आपतितान् विबुधत्वं दक्षित्वं च धिक् । अथ च नोऽस्मान् आशाभ्यो दिग्भ्यः पतितान् आगतान् धिक् । अथ च नोऽस्माकम् आशापतितां दिक्पतित्वं धिक् । ⁹इदम् अस्माकं विबुधत्वं धिक् अस्तु¹⁰ ।।४८।।

सा वागवाज्ञायितमां नलेन तेषामनाशङ्कितवावछलेन ।
स्त्रीरत्नलाभोचितयत्नमग्नमेतं हि न स्म प्रति भाति किञ्चित् ।।४९।।

सा¹ वा[गवेति] । नलेन सा तेषां वाक् ²अवाज्ञायितमाम् अवज्ञाता । किं भूतेन ?। तेषाम् अनाशङ्कितं वावछलं येन तेन तथा ।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

हि यस्मात् [3]एतं नलं प्रति किञ्चित् वाक्छलादिकं न [4]भाति स्म न स्फुरितम् । किं भूतम् ?। स्त्रीरत्नस्य यो लाभः तस्योचिते यत्ने प्रयत्ने मग्नम् ।।४९।।

यः स्पर्द्धया येन निजप्रतिष्ठां लिप्सुः स एवाऽऽह तदुन्नतत्वम् ।
कः स्पर्द्धितुः स्वाभिहितस्वहानेः स्थानेऽवहेलां बहुलां न कुर्यात् ।।५०।।

यः[1] स्पर्द्धया [इति]। यो येन सह स्पर्द्धया निजस्याऽऽत्मनः प्रतिष्ठां लिप्सुर्भवति स एव तस्योन्नतत्वमाह। इन्द्रादयो नलेन सह स्पर्द्धमाना एव नलस्योन्नतत्वमाहुः। अतः कः स्पर्द्धितुः उपरि स्थाने युक्तं बहुलाम् [2]अवहेलां न कुर्यात्। [3]युक्तार्थे स्थाने इत्यव्ययम्। किं भूतस्य ?। स्वेनाऽऽत्मना अभिहिता स्वस्य हानिर्येन तस्य तथा। अतो नलेन तद्वाक्ये अवज्ञा [4]स्थाने कृता ।।५०।।

गीर्देवता गीतयशः प्रशस्तिः श्रिया तडित्त्वल्ललिताभिनेता ।
मुदा तदाऽवैक्षत केशवस्तं स्वयंवराडम्बरमम्बरस्थः ।।५१।।

[1]गीर्देवता [इति]। केशवः श्रीपुरुषोत्तमः [2]तदा मुदा हर्षेण[3] तं स्वयंवरस्याऽऽडम्बरमवैक्षत। अम्बरे आकाशे तिष्ठ[ति यः स तथा। तथा किं भूतः ?। गीर्देवतया[4] भारत्या गीता यशसः प्रशस्तिः[5] कीर्तिवर्णना यस्य स तथा। तथा श्रिया ल]क्ष्म्या हृदयस्थया तडित्त्वतो विद्युता[6] युक्तस्य मेघस्य ललितं विलसितं तस्याऽभिनेता। लक्ष्म्याः सुवर्णवर्णत्वात् देवस्य कृष्णवर्णत्वात्[7] मेघसादृश्यम्। [8]सामान्योपादाने तडित्त्वतः कृष्णवर्णत्वमेवेति कविसमयः। अनुप्रास उपमा च ।।५१।।

अष्टौ तदाष्टासु हरित्सु दृष्टीः सदो दिदृक्षुर्निदिदेश देवः ।
लैङ्गीमदृष्ट्वाऽपि शिरःश्रियं यो दृष्टौ मृषावादितकेतकीकः ।।५२।।

[1]अष्टौ [तदेति]। स देवो ब्रह्मा तदा अष्टासु हरित्सु दिक्षु अष्टौ दृष्टीः चक्षूंषि निदिदेश। किं भूतः ?। [2]सदः सभां [3]दिदृक्षुः। यो लैङ्गीं लिङ्गस्थ श्रीमहादेवस्य [4]शिरसः श्रियं प्रान्तमदृष्ट्वाऽपि दृष्टौ दर्शननिमित्तं मृषा असत्यं वादिता केतकी येन स तथा। ब्रह्मणा परमेश्वरशिरसः पतन्ती केतकी उक्ता[5] त्वया इति भणितव्यम्। यदहं ब्रह्मणा मस्तकादानीता। एतदसत्यं तया[6] उक्तम्। अतः शापेन मस्तकान्निराकृता। [7]अत्र ओजो गुणोऽनुप्रासो यथासंख्यं च[8] ।।५२।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

एकेन पर्यक्षिपदात्मनाऽद्रिं चक्षुर्मुरारेरभवत् परेण ।
तैर्द्वादशात्मा दशभिस्तु शेषैर्दिशो दशाऽऽलोकत लोकपूर्णाः ।।५३।।

[1]एकेन [इति]। द्वादशात्मा श्रीसूर्यः[2] एकेनाऽऽत्मनाऽद्रिं मेरुं पर्यक्षिपत्, [3]परेणाऽपरेणाऽऽत्मना [4]मुरारेश्चक्षुरभवत्। तै शेषैर्दशभिरात्मभिस्तु लोकैर्लोकानां[5] वा पूर्णा दश दिश[6] आलोकत। [7]अनुप्रासो यथासङ्ख्यं च ।।५३।।

प्रदक्षिणं दैवतहर्म्यमद्रिं सदैव कुर्वन्नपि शर्वरीशः ।
[1]द्रष्टा महेन्द्रानुजदृष्टिमूर्त्या न प्राप तद्दर्शनविघ्नतापम् ।।५४।।

[2]प्रदक्षिणमिति। शर्वरीशश्चन्द्रो दैवतानां [हर्म्य]मद्रिं मेरुं सदैव प्रदक्षिणं कुर्वन्नपि तस्य स्वयंवर[स्य] दर्शनविघ्नस्य तापं पश्चात्तापं न प्राप। किं भूतः?। [3]महेन्द्रानुजस्य श्रीकृष्णस्य दृष्टिश्चक्षुः तन्मूर्त्या [4]द्रष्टा। चन्द्रो द्वितीयं चक्षुः श्रीकृष्णस्य ।।५४।।

आलोकमाना वरलोकलक्ष्मीं तात्कालिकीमप्सरसो रसोत्काः ।
जनाम्बुधौ तत्र निजाननानि वितेनुरम्भोरुहकाननानि ।।५५।।

[1]आलोकमानेति। अप्सरसस्तत्र जनाम्बुधौ स्वयंवरे निजान्याननानि अम्भोरुहाणां काननानि वितेनुः। अम्बुधौ जलाशये किल कमलानि भवन्ति। किं कुर्वाणाः[2]?। तात्कालिकीं वरलोकस्य। [3]नरलोकस्येति पाठान्तरम्। लक्ष्मीमालोकमानाः[4] तथा रसेन विलोकनरसेन उत्काः उत्कण्ठिताः ।।५५।।

न यक्षलक्षैः किमलक्षि नो वा सिद्धैः किमध्यासि सभा सशोभा ।
सा किन्नरैः किं न रसादसेवि नाऽदर्शि हर्षेण महर्षिभिर्वा ।।५६।।

न यक्ष[लक्षैरिति]। सा [स]शोभा [1]आप्तशोभा [सभा] किं यक्षाणां लक्षैर्नालक्षि?। किं वा सिद्धैर्नाऽध्यासि?। तथा किन्नरैश्च[2] रसादादरात् किं नाऽसेवि?। तथा महर्षि[भि]र्वा हर्षेण नाऽदर्शि। अपि तु सर्वैरपि वीक्षिता। [3]अलक्षीत्यात्यादिना[4] वीक्षिता ।।५६।।

वाल्मीकिरश्लाघत तामनेकशाखत्रयीभूरुहराजिभाजा ।
क्लेशं विना कण्ठपथेन यस्य दैवी दिवः प्राऽभुवमागमद्वाक् ।।५७।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]वाल्मीकिरिति । वाल्मीकिस्तां सभाम् अश्लाघत । यस्य कण्ठपथेन दैवी[2] देवी वाक् क्लेशं विना दिवः स्वर्गात् प्राक् पूर्वं [3]पद्यरूपा भुवं [द्राक्[4] शीघ्रम्] आगमत । किं भूतेन ?। अनेका शाखा यत्र स[ा] तथा। एतदुक्तं भवति-कण्ठपथेन[5] बह्वृचादिशाखाभिः एकविंशदधिकएकादशशत(1121)सङ्ख्याभिर्युक्ता [6]या त्रयी वेदत्रयी सैव भूरुहाणां वृक्षाणां राजि[:] तां भजते तेन[7] तथा। अन्यत्राऽपि यत्र मार्गे अनेकशाखा वृक्षा भवन्ति तत्र सुखेन[8] गम्यते। [9]मुखमाग[म] द्गोरिति पाठान्तरम्। तदा 'मा निषादे त्यादिरूपा गीरिति व्याख्या। रूपकं श्लेषश्च ।।५७।।

प्राशंसि संसद्गुरुणाऽपि चार्वी चार्वाकतासर्वविदूषकेण ।
आस्थानपट्टं रसनां यदीयां जानामि वाचामधिदेवतायाः ।।५८।।

[1]प्राशंसि [इति]। संसद्गुरुणा बृहस्पतिनाऽपि प्राशंसि चार्वी। किं भूतेन ?। चार्वाकतया[9] नास्तिकमतेन सर्वस्य सर्वलोकस्य विदूषकेण। [3]गुरुणा दैत्यानां धर्मात् च्यावनार्थं लोकायतमतं कृतम्। अहं यदीयां रसनां[4] वाचाम् अधिदेवतायाः सरस्वत्या आस्थानपट्टं सिंहासनं जानामि[5]। [6]अनुप्रासो रूपकमुत्प्रेक्षा च। विरोधोऽपि ।।५८।।

नाकेऽपि दीव्यत्तमदिव्यवाचि वचःस्रगाचार्यकवित्कविर्यः ।
दैतेयनीतेः पथि सार्थवाहः काव्यः स काव्येन सभामभाणीत् ।।५६।।

[1]नाकेऽपि [इति]। स काव्यः शुक्रः काव्येन कविकर्मणा [2]वक्ष्यमाणे सभामभाणीत् तुष्टाव। किं [3]भूतः ?। दैतेयनीतेरौशनस्याः पथि सार्थवाहः मुख्यो यो[4] नाकेऽपि[5] कविरिति प्रसिद्धः। किं भूते ?। दीव्यत्तमा दिव्या संस्कृता वाक् यत्र [6]तत्तथा। यत्र सर्वैरपि[7] संस्कृतवाचा क्रीडन्ति। तत्र वचसां स्रजो वचनमालाया आचार्यकं वेत्ति। [8]अनुप्रासोऽतिशयोक्तिः ।।५६।।

[1]तदेव काव्यं दर्शयति।—

अमेलयद्भीमनृपः परं न नाकर्षदेतान् दमनस्वसैव ।
इदं विधाताऽपि विचिन्त्य यूनः स्वशिल्पसर्वस्वमदर्शयन्न[2] ।।६०।।

अमेल[3][यदिति] भीमनृप एव केवलं [परम्] एतान् यूनो नाऽमेलयत्। तथा दमनस्वसैव [4]एतान्[5] नाकर्षत्। किन्तु इदं

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

स्वयंवरस्थानं विचिन्त्य प्रस्तावं भणित्वा विधाताऽपि एतान् यूनः स्वस्य [6]शिल्पस्य विज्ञानस्य सर्वस्वं नादर्शयत्।[7] अथवा विचिन्त्य विचार्य इदं स्वशिल्पसर्वस्वं नादर्शयत्। [अत्र काक्वाक्षिप्तत्वेनाऽदर्शयदेवेति व्यङ्ग्यम्। वाच्यनिषेधसहभावेन[8] स्थितम्। तेनाऽयमर्थः सिद्धो भवति। किं न अदर्शयत्?]। अपि तु दर्शयति स्म। काकुवैशिष्टयाद्धि अर्थस्याऽन्यार्थधीहेतुत्वमुक्तम्। यथावक्तृबोद्धव्यकाकूनामि (का॰प्र॰ III. i. 2) त्यादि। [9]नोऽदर्शयन्निति सविसर्गपाठे, अदर्शि सङ्गोप्य कदाप्यवीक्षितो रहस्यमस्याः स महन्महीपतिः(नै॰ I. 40) इत्यादिवत्। षष्ठी शेषे (पा॰ II. iii. 50) इति शेषविवक्षायां बद्ध्वा विधाता नः अस्माकमपि[10] [अ]दर्शयदिति व्याख्या। अभिवादिदृशोरात्मनेपद उपसङ्ख्यानमि (पा॰ 134)ति आत्मनेपद एव विभाषया कर्मोपसङ्ख्यानादत्र च तदभावान्न तु द्वितीया[11]। अतिशयोक्तिरुत्प्रेक्षा च ।।६०।।

एकाकिभावेन पुरा पुरारिर्यः[1] पञ्चतां पञ्चशरं निनाय।
तद्भीसमाधानममुष्य कायनिकायलीलाः किममी युवानः ।।६१।।

[2]एकाकि [इति]। यः पुरारिः पुरा पञ्चशरं कामम् एकाकिभावेन पञ्चतां निनाय मरणं प्रापयत्[3]। अथ यः[4] एकाकी भवति स्म[5], स पञ्चभावं प्रापितः। किम् अमी बहवो युवानः अमुष्य कामस्य कायनिकायः शरीरसमूहस्तल्लीलाः[6] तत्सदृशाः। किम्?। तस्मात् श्रीमहादेवात् भीर्भयं तस्याः समाधानं सिद्धान्तः। [7]पूर्वमहमनेनैकाकी सन् पञ्चतां प्रापितः। इदानीं बहूनि रूपाणि कृतवानस्मि। ततो मम भयं नास्ति[8] इति पञ्चशराशयः। पञ्चतामिति पाठे तस्य पञ्चश[र]स्य भीः समाधानमिति व्याख्यानम्। अनुप्रास उत्प्रेक्षा च ।।६१।।

पूर्णेन्दुबिम्बाननुमासभिन्नानस्थापयत् क्वापि निधाय वेधाः।
तैरेव शिल्पी निरमादमीषां मुखानि लावण्यमयानि मन्ये ।।६२।।

[1]पूर्णेन्दुबिम्बानीति। वेधा अनुमासं भिन्नान् नवनवान् पूर्णेन्दुबिम्बान् क्वाऽपि निधाय अस्थापयन्। अहमेवं मन्ये। तैरेव चन्द्रबिम्बैरयं [2]शिल्पी ब्रह्मा लावण्यमयानि अमीषां मुखानि निरमात्[3]। [4]एकशिल्पीति[5] पाठान्तरम् ।।६२।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

मुधार्ऽपितं मूर्द्धसु रत्नमेभिर्यन्नाम तानि स्वयमेत एव ।
स्वतःप्रकाशे परमात्मबोधे बोधान्तरं न स्फुरणार्थमर्थ्यम् ।।६३।।

[1]मुधाऽर्पितमिति । एभिः[2] राजभिर्मूर्द्धसु रत्नं मुधा अर्पितम् । यन्नाम अहो तानि रत्नानि स्वयमेत एव राजान एव । यतः स्वतः प्रकाशे परमात्मनो[3] बोधे [4]सति ज्ञाने सति [5]अन्यद्बोधान्तरं [6]ज्ञानान्तरं स्फुरणार्थमात्मावबोधार्थं नार्थ्यं न प्रार्थनीयम् ।।६३।।

प्रवेक्ष्यतः सुन्दरवृन्दमुच्चैरिदं मुदा चेदितरेतरं तत् ।
न शक्ष्यतो लक्षयितुं विमिश्रं दस्रौ सहस्रैरपि वत्सराणाम् ।।६४।।

प्रवेक्ष्यत इति । यदि दस्रौ अश्विनौ मुदा इदमुच्चैः सुन्दराणां राज्ञां वृन्दं प्रवेक्ष्यतः । तत् परस्परं तैः सह विमिश्रं सत् दस्रौ वत्सराणां सहस्रैरपि लक्षयितुम् आत्मानं परस्परं ज्ञातुं न शक्ष्यतः[2] ।।६४।।

स्थितैरियद्भिर्युवभिर्विदग्धैर्दग्धेऽपि कामे जगतः क्षतिः का ।
एकाम्बुबिन्दुव्ययमम्बुराशेः पूर्णस्य कः शंसति शोषदोषम् ।।६५।।

[1]स्थितैः [इति] । इयद्भिर्बहुभिर्युवभिः स्थितैः । [कामे दग्धेऽपि जगतः का क्षतिः ?। किं भूतैः युवभिः ?। विदग्धैर्दक्षैः । अथ च विदग्धैरदग्धैः अथवा विगतो दग्धः] कामो येभ्यस्तैर्विदग्धैः । यतोऽम्बुराशेः पूर्णस्य[3] मध्यात् एकस्याऽम्बुबिन्दो[र्व्यय]मयं कः शोषस्य[4] दोषं शंसति । [5]तथा कामसदृशा बहवः सन्ति । अनुप्रासोऽतिशयोक्तिर्व्यतिरेकश्च दृष्टान्त[ः] श्लेषोऽपि ।।६५।।

इति स्तुवन् हुङ्कृतिवर्गणाभिर्गन्धर्ववर्गेण स गायतैव ।
ओङ्कारभूम्ना पठतैव वेदान् महर्षिवृन्देन तथाऽन्वमानि ।।६६।।

[1]इति स्तुवन्निति । स शुक्रः कविः इति सभां स्तुवन् गन्धर्ववर्गेण गायतैव सता हुङ्कृतिवर्गणाभिः हुङ्कृतिपरिपाटीभिः हुङ्कारवचनाभिरन्वमानि हुङ्कारेणाऽनुमतः । तथा महर्षिवृन्देन मुनिवर्गेण वेदान् पठतैव सता ओङ्कारस्य भूम्ना बाहुल्येन अन्वमानि । [4]सप्तभिः कुलकम् ।।६६।।

न्यवीविशत्तानथ राजसिंहान् सिंहासनौघेषु विदर्भराजः ।
शृङ्गेषु यत्र त्रिदशैरिवैभिरशोभि कार्तस्वरभूधरस्य ।।६७।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]न्यवीविशदिति । अथ तान् [2]राजसिंहान् सिंहासनानामोघेषु समूहेषु स विदर्भराजो न्यवीविशत् । [3]उपमितं व्याघ्रादिभिः सामान्याप्रयोगे (पा° II. i. 56) इति तत्पुरुषः समासः । सिंहासनमिति रूप्याश्रवणात् । राज्ञां सिंहासनेषु निवेशनमुचितमिति उपमा । सिंहानामासनं सिंहासनमिति योगसमाश्रयणेन सिंहासननिवेशनं रूपकपरिग्रहे साधनमस्तीति रूपकं वा । रूढिर्योगम् अपहन्ति [इति] उपमैव [4]तु न्याय्या । यत्रोपविष्टैरेभिर्नृपैरशोभि । [5]कैरिव ?। कार्तस्वरभूधरस्य शृङ्गेषु त्रिदशैरिव । उत्प्रेक्षते । कार्तस्वरभूधरस्य मेरोः शृङ्गेषु [6]स्थितैर्देवैरिव[7] इत्युत्प्रेक्षा वा । अनुप्रास[8] उपमा रूपकमुत्प्रेक्षाऽपि वा ।।६७।।

विचिन्त्य नानाभुवनागमाँस्तानमर्त्यसङ्कीर्त्यचरित्रगोत्रान् ।
कथ्याः कथङ्कारममी सुतायामिति व्यषादि क्षितिपेन तेन ।।६८।।

[1]विचिन्त्य [नानेति] । तेन क्षितिपेन [2]तान् यूनो[3] विचिन्त्येति व्यषादि । इतीति किम् ?। अमी[4] सुतायां स्वपुत्र्यां विषये कथङ्कारं कथ्याः कथनीयाः । किं विशिष्टान् ?। नानाप्रकारेभ्यो भुवनेभ्य आगमो येषां तान् तथा । [5]भुवनागतानिति पाठान्तरम् । तथा न मर्त्यैः सङ्कीर्त्यं चरित्रं गोत्रं च येषां तांस्तथा । [6]अन्यथैवङ्कथमित्थंसु सिद्धाप्रयोगश्चेत् (पा° III. iv. 27) इति णमुल् अनुप्रासो हेतुश्च ।।६८।।

श्रद्धालुसङ्कल्पितकल्पनायां कल्पद्रुमस्याथ रथाङ्गपाणेः ।
तदाकुलोऽसौ कुलदैवतस्य स्मृतिं ततान क्षणमेकतानः ।।६९।।

[1]श्रद्धालुसङ्कल्पितेति । अथाऽसौ भीमस्तदा आकुलः सन् कुले गोत्रे दैवतस्याऽधिष्ठातुः [2]कुलदेवतायाः रथाङ्गपाणेः क्षणमात्रम् एकतानः एकचित्तः स्मृतिं ततान । किं भूतस्य ?। श्रद्धालूनां पुरुषाणां सङ्कल्पितस्याऽभिलषितस्य कल्पनायां दाने कल्पद्रुमस्य । [3]अनुप्रासो रूपकं च ।।६९।।

तच्चिन्तनानन्तरमेव देवः सरस्वतीं सस्मितमाह स स्म ।
स्वयंवरे राजकगोत्रवृत्तवक्त्रीमिह त्वां करवाणि वाणि ! ।।७०।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]तच्चिन्तने [ति]। तस्य चिन्तनं स्मरणं तदनन्तरमेव स देवो विष्णुः सरस्वतीं सस्मितम् आह स्म। हे वाणि! अहं त्वाम् अस्मिन् स्वयंवरे राजकस्य राजसमूहस्य गोत्राणाम् अन्वयानां च नाम्नां[2] वृत्तानां चरित्राणां च वक्त्रीं करवाणि। गोत्रं नाम्नि तथाऽन्वये (हला V. 43)। गोत्रोक्षोष्ट्रोरभ्र[3] राजे (पा॰ IV. ii. 39) इत्यादिना वुञ्। [4]अनुप्रासः ॥७०॥

कुलं च शीलं च बलं च यूनां जानासि नानाभुवनागतानाम्।
एषामतस्त्वं भव वावदूका मूकायितुं कः समयस्तवाऽयम् ॥७१॥

[1]कुलं च शीलं चेति। हे वाणि! त्वम् एषां राज्ञां[2] कुलं च शीलं च बलं च नानाभुवनेभ्य आगतानाम् [4]एषां यूनां जानासि। अतस्त्वम् एषां[5] वावदूका भृशं [पुनः] पुनर्वा वदनशीला भव। तवाऽयं मूकायितुं[6] [कः] समयः।[7] अनुप्रासः काव्यलिङ्गम् उपमा च ॥७१॥

जगत्त्रयीपण्डितमण्डितेयं[1] सभा न भूता न च भाविनी च।
राज्ञां गुणज्ञापनकैतवेन सङ्ख्यावतः श्रावय वाङ्मुखानि ॥७२॥

[2]जगत्त्रयीति। इयं सभा एवं प्रकारेण जगत्त्रयीपण्डितैस्त्रिभुवनवर्त्तिविद्वद्भिः मण्डिता न[3] भूता च न[4] भाविनी च। ततो राज्ञां गुणानां[5] ज्ञापनकैतवेन त्वं सङ्ख्यावतः पुरुषान् वाङ्मुखानि[6] [7]निजवाग्विलासान् [8]श्रावय। [9]अनुप्रासो हेतुरपह्नुतिश्च ॥७२॥

इतीरिता तच्चरणात्परागं गीर्वाणचूडामणिमृष्टशेषम्।
तस्य प्रसादेन सहाऽऽज्ञयाऽसावादाय मूर्ध्नाऽऽदरिणी[1] बभार ॥७३॥

[2]इतीरिता [इति]। असौ सरस्वती [3]इति[ई]रिता तस्य चरणात् [4]परागं रेणुं तस्याऽऽज्ञया[5] आदेशेनैव प्रसादेन सह आदाय[6] आदरिणी सती मूर्ध्ना बभार। किंभूतं परागम्? गीर्वाणानां देवानां चूडामण[य]स्तैर्मृष्टं [7]प्रोञ्छितं तस्मात् शेषम्। [8]पर्यायः सहोक्तिश्च ॥७३॥

इदानीं सकलवाङ्मयशरीरां देवीं प्रतिपिपादयिषुः कविर्मुखादारभ्य चरणपर्यन्तं सर्वश्रुतिस्मृतिशास्त्रमयान्यङ्गानि वर्णयितुमुपक्रमते।—

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

मध्येसभं साऽवततार बाला गन्धर्वविद्याधरकण्ठनाला ।
त्रयीमयीभूतवलीविभङ्गा साहित्यनिर्वर्त्तितदृक्तरङ्गा ।।७४।।

[1]मध्येसभमिति । सा बाला परमेश्वरी सभायां मध्ये मध्येसभं गगनादवततार । किं भूता ?। गन्धर्वविद्यां [गानविद्यां[2]] धरतीति [3]एवंविधः कण्ठनालो यस्याः सा[4] तथा । गन्धर्वविद्यैव कण्ठः । तथा त्रयी वेदत्रयी तन्मयीभूता वलीनां विभङ्गा यस्याः [सा] तथा । [5]साहित्यविद्या काव्यनाटकादिस्तया निर्वर्त्तिता दृशोस्तरङ्गा यस्याः सा तथा । [6]अनुप्रासोऽतिशयोक्तिश्च ।।७४।।

आसीदथर्वा त्रिवलित्रिवेदीमूलाद्विनिर्गत्य वितायमाना ।
नानाभिचारोचितमेचकश्रीः श्रुतिर्यदीयोदरलोमलेखा[1] ।।७५।।

[2]आसीदिति । अथर्वा श्रुतिर्यदीयोदरलोमलेखा नवरोमराजिः आसीत् । किं भूता ?। तिस्रो वलय एव त्रिवेदी तन्मूलाद्विनिर्गत्य[3] वितायमाना । वेदत्रयमध्यादथर्वो वेदो निर्गतः । अभिचारकर्मबहुलश्च[4] । नाभिं प्रति चारश्चरणं गमनं तदुचिता मेचकश्रीर्यस्या रोमराज्याः सा तथा एवंविधा न भवति या सा अनाभिचारोचितमेचकश्रीः न[5] तथाविधा । अपि तु [ना] नाभिचारोचितमेचकश्रीः । [द्वौ हि नञौ प्रकृतमर्थं ब्रूतः । अथर्वा नानाप्रकाराभिचारस्य[6] [7]परद्रोहपरं वचनस्योचितमेचकश्रीः] । हिंसा कृष्णवर्णा भवति । [8]अनुप्रासो रूपकं श्लेषश्च ।।७५।।

शिक्षैव साक्षाच्चरितं यदीयं कल्पश्रियाकल्पविधिर्यदीयः ।
यस्याः समस्तार्थनिरुक्तिरूपैर्निरुक्तविद्या खलु पर्यणंसीत् ।।७६।।

[1]शिक्षैव [इति] । यदीयं यस्या देव्याश्चरितं [[2]साक्षात्] शिक्षैव । [3]आत्मा बुद्धया समेत्यार्थानि[4] (पा॰शिक्षा-6) त्येवमादिना क्रमेण स्वरव्यञ्जनाभिव्यक्तिलक्षणं पूर्वाह्णमध्यंदिनापराह्णेषु [च] यथाऽध्येयमधीतस्य स्वरसौष्ठवयुक्तस्य याज्ञकर्मणि प्रयोग इत्येवमाद्यर्थजातनिर्वचनपरं वेदाङ्गमेव[5] । अथ चोपदेशस्तथा । यदीय आकल्पविधेर्मण्डनं[6] कल्पस्य[7] सम्यगधीतस्य परिज्ञातछन्दसोऽमुष्मिन् कर्मणि विनियोग इति प्रवृत्तस्य, यथा इषे त्वे (शु. य. I. i. 1) ति

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

छिनत्ति, ऊर्जे त्वेत्यनुमार्ष्टि इति, दर्शपूर्णमास [8]आधानाग्निहोत्रादिक-[9]र्मकलापप्रतिपादकग्रन्थस्य[10] श्रौतस्य सूत्रस्य श्रिया शोभया विद्या[11]। यस्याः खलु इति मन्ये, निरुक्तग्रन्थविद्या सम[स्ता]र्थानां या निरुक्ति-र्निर्वचनं तद्रूपैः पर्यणंसीत् परिणता । यथा [12]सा देवी वाचा पदार्थानां निर्वचनं करोति वदतीत्यर्थः, [13]तच्च निरुक्तिवचनरूपेण परिणतम् । [14]पर्यणंसीत् इति वाक्यत्रये सम्बध्यत इत्यर्थः । तदा[15] तुल्ययोगिताऽपि । अनुप्रासोऽतिशयोक्तिश्च ।।७६।।

जात्या च वृत्तेन च भिद्यमानं छन्दो भुजद्वन्द्वमभूद्यदीयम् ।
श्लोकार्द्धविश्रान्तिमयीभविष्णुपर्वद्वयीसन्धिसुमध्यचिह्नम् ।।७७।।

[1]जात्या चेति । यस्या देव्या भुजद्वन्द्वं छन्दः [2]इयताक्षरकोशेन इयद्भिः पादैर्गायत्रीं इयद्भिस्त्रिष्टुबित्यक्षरकोशपादव्यवस्थालक्षणपरि-ज्ञानार्थं वेदाङ्गमभूत । किं भूतम् ?। जात्या[3] लसमुद्रागणः इत्यादिकया पिङ्गलोक्त्या । वृत्तं, सममर्द्धसमं[4] विषमं चे(बृ॰र॰ I. 13)ति तदुक्तेन वृत्तेन । वृत्तरत्नाकरे च द्वितीयाध्यायोक्त्या जात्या तृतीयचतुर्थपञ्च-मोक्तेन वृत्तेन भिद्यमानं[5] द्विधाऽभवत् । तदुक्तम्—पद्यं चतुःपदी तच्च वृत्तं जातिरिति द्विधा (का॰द॰ I. 11) इति । केचित्तु, मात्रा वृत्तानुपूर्वकमिति मात्रा छन्दसामपि वृत्तव्यवहारं पश्यन्तो व्याचक्षते । संज्ञारूपया[6] गोत्वादिवदनैकव्यक्त्याधारया जात्या गायत्र्युष्णिगाद्यया वृत्तेन [7]इन्द्रवज्रोपेन्द्रवज्राप्रभृतिना भिद्यमानम् । पुनः किं भूतम्[8] ?। श्लोकस्याऽर्द्धे या विश्रान्तिस्तन्मयीभविष्णुर्यः पर्वद्वयीसन्धिः[9] कूर्परप्रदेश-स्तेन [10]सुष्ठु भुजमध्यस्य चिह्नं यत्र तत्[11] तथा । [12]सुचिह्नमध्यमिति पाठान्तरम् । अतिशयोक्तिः ।।७७।।

असंशयं सा गुणदीर्घभावकृतां वधाना वितर्तिं यदीया ।
विधायिका शब्दपरम्पराणां किञ्चाऽरचि व्याकरणेन काञ्ची ।।७८।।

[1]असंशयमिति । [2]असंशयं निश्चितं किञ्च अन्यच्च सा यदीया काञ्ची मेखला व्याकरणेन [3]विभक्त्यादिपरिज्ञानार्थेन वेदाङ्गेन अरचि । किं [4]भूता ?। वृक्षादिशब्दपरम्पराणां विधायिका निष्पाद-यित्री । काञ्च्यपि शब्दायते । किं भूता ?। गुणानां दीर्घाणां भावप्रत्ययानां [5]कृतप्रत्ययानां वितर्तिं दधाना । व्याकरणे हि क्वापि

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[गुणः क्वापि] दीर्घः क्वापि भावः क्वचित् [6]कृत्प्रत्ययश्च । मेखला च गुणः कटिसूत्रं तस्य दीर्घभावेन कृतां विहितां विततिं दधाना । [7]अनुप्रासः श्लेषश्च ।।७८।।

स्थितैव कण्ठे परिणम्य हारलता बभूवोदिततारवृत्ता ।
ज्योतिर्मयी [1]तद्भजनाय विद्या मध्येऽङ्कमङ्केन भृता विशङ्के ।।७६।।

[2]स्थितैव कण्ठे इति । अहम् एवं [3]विशङ्के । कण्ठे परिणम्य स्थितैव ज्योतिर्मयी विद्या[4] श्रुतिचोदितकर्माङ्गभूतकालस्य प्राणिनां शुभाशुभकर्मफलविपाककालस्य च परिज्ञानार्थं वेदान्तविद्या हारलता बभूव । किं भूता ?। उदितम् उक्तं ताराणां नक्षत्राणां[5] वृत्तं चारो यया सा[6] तथा । किं भूता ?। तेषां[7] नक्षत्राणां भजनाय भागहरणाय मध्ये अङ्कम्[8] अङ्कमध्ये अङ्केन एकद्वित्र्यादिना भृता पूर्णा । ज्योतिषि[9] हि गुणाकारभागाहारैः[10] अङ्का ध्रियन्ते । [11]हारलताऽपि कण्ठे स्थिता उदितम् [12]उद्गतं ताराणां मौक्तिकानां[13] वृत्तं वर्तुलत्वं यस्याः सा तथा । अङ्कस्य वपुषो मध्ये अङ्केनोत्सङ्गेन ध्रियते । ज्योतिर्मयी च । तस्या भजनाय आश्रयणाय । [14]उत्प्रेक्षा श्लेषश्च ।।७६।।

अवैमि वादिप्रतिवादिगाढस्वपक्षरागेण विराजमाने ।
तौ पूर्वपक्षोत्तरपक्षशास्त्रे रदच्छदौ भूतवती यदीयौ ।।८०।।

[1]अवैमि वादीति । अहम्[2] अवैमि । तौ यदीयौ यस्या रदनच्छदौ ओष्ठौ[3] पूर्वपक्षशास्त्रं च [उत्तरपक्षशास्त्रं च]ते उभेऽपि भूतवती सञ्जाते[4] । किं भूते ?। वादिप्रतिवादिनोर्गाढो यः स्वपक्षे स्वस्वपक्ष-प्रतिपक्षप्रतिग्रहे[5] रागस्तेन विराजमाने । पूर्वपक्षकृद् वादी । उत्तरपक्षसमर्थयिता प्रतिवादी । ओष्ठावपि ताम्बूलादिरागेण शोभते । [6]अनुप्रासः श्लेषश्च ।।८०।।

ब्रह्मार्थकर्मार्थकवेदभेदाद् द्विधा विधाय स्थितयात्मदेहम् ।
चक्रे पराच्छादनचारु यस्या मीमांसया मांसलमूरुयुग्मम् ।।८१।।

[1]ब्रह्मार्थकर्मार्थकेति । यस्या ऊरुयुग्मं मीमांसया वेदवाक्यविचारेण मांसलं विशालं चक्रे । किंभूतम् ?। परस्य ईश्वरस्य आच्छादनं निराकरणं तेन चारु । मीमांसा हि ईश्वरं नाऽनुमनुते । ऊरुश्च

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[2]परेणोत्कृष्टेनाऽऽच्छादनेन वाससा चारु। किं भूतया?। ब्रह्मार्थ:[3] निवृत्तिमात्रपर:[4] कर्मार्थक:[5] प्रवृत्तिमार्गपरो[6] यो [7]वेदस्तस्य भेदात् द्विधा आत्मदेहं विधाय स्थितया। पूर्वमीमांसाया: उत्तरमीमांसाभेदात् द्विधा भूतयेत्यर्थ:। [8]अनुप्रास: श्लेषश्च ।।८१।।

उद्देशपर्वण्यपि लक्षणेऽपि द्विधोदितैः षोडशभिः पदार्थैः।
आन्वीक्षिकीं यद्दशनद्विमालीं तां मुक्तिकामाकलितां प्रतीमः ।।८२।।

[1]उद्देशपर्वणीति। यस्या दशनानां दन्तानां द्विमालीम् अधस्तनोपरितनश्रेणी[2] ताम् आन्वीक्षिकीं नैयायिकानाम् अध्यात्मविद्यां वयं प्रतीम:। मुक्तिकां[3] मौक्तिकमालाम् आकलितां[4] धृतामिव। अथ मुक्तिकामैराकलिताम्। कै: कृत्वा?। षोडशभि: पदार्थै:। किं भूतै:?। उद्देशपर्वणि सामान्येन कथने लक्षणेऽपि विशेषलक्षणकथने[5] च द्विधा उदितैरुक्तै:। तथा च न्याये अक्षपादाचार्यसूत्रम्-प्रमाण-प्रमेयसंशय-[6]प्रयोजनदृष्टान्तसिद्धान्तअवयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासछल-जातिनिग्रहस्थानानां तत्त्वज्ञानान्नि:श्रेयसाधिगम (न्या. सू. I. i. 1) इति। सामान्येनोद्देश:। सम्यगनुभवसाधनं प्रमाणम्। प्रमाणविषय: प्रमेयम् इत्यादिविशेषलक्षणानि [7]उत्प्रेक्षा श्लेषश्च ।।८२।।

तर्का रदा यद्वदनस्य तर्क्या वादेऽस्य शक्तिः क्व [1]तथाऽन्यथा तैः।
पत्रं क्व दातुं [2]गुणशालिपूगं क्व वादतः खण्डयितुं प्रभुत्वम् ।।८३।।

[3]तर्का रदा इति। यस्या वदनस्य रदा दन्तास्तर्का: प्रमाणानुग्राहका: [4]तर्क्या: शङ्क्यन्ते। अन्यथा यद्येवं न, उक्तव्यतिरेकेण अस्य वदनस्य तैस्तर्कै: कृत्वा वादे वादकथायां तथा तेन प्रकारेण क्व शक्ति: कुत: सामर्थ्यम्?। तथा तर्कैर्विना पत्रं दातुं पत्रालम्बनं[5] कर्तुं क्व प्रभुत्वम्?। तथा गुणशालिनां प्रतिवादिनां पूगं समूहं वादतो वादात् क्व तर्कैर्विना खण्डयितुं प्रभुत्वम्?। तथा दन्तैर्विना अस्य मुखस्य वादे जल्पने क्व शक्ति:?। तथा पत्रं नागवल्लीदलं दातुं खण्डयितुं दन्तैर्विना क्व प्रभुत्वम्?। गुणशालिपूगं क्रमुकम् अदतो भक्षयत: क्व वा खण्डयितुं प्रभुत्वम्?। अथवा अदतो दन्तरहितस्येत्यर्थ:। [6]अनुप्रास: उत्प्रेक्षा श्लेषश्च ।।८३।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

सपल्लवं व्यासपराशराभ्यां प्रणीतभावादुभयीभविष्णु ।
तन्मत्स्यपद्माद्युपलक्ष्यमाणं यत्पाणियुग्मं ववृते पुराणम् ।।८४।।

सपल्लव[मिति] । तन्मत्स्यपुराणपद्मपुराणप्रभृतिभिरुपलक्ष्यमाणं पुराणजातीयं यस्याः[2] तस्याः पाणियुग्मं[3] च[4] ववृते निष्पन्नम् । किं भूतम् ?। सपल्लवं सोपाख्यानम् । तथा च व्यासेन श्रीकृष्णद्वैपायनेन पराशरमुनिना च प्रणीतभावात् कृतत्वादुभयीभविष्णु[5] पाणियुगम् अङ्गुलिपल्लवैः सहितं मत्स्यपद्मादिलक्षणरेखाङ्कितं च । [6]रूपकं श्लेषश्च ।।८४।।

आकल्पविच्छेदविवर्जितो यः स धर्मशास्त्रव्रज एव यस्याः ।
पश्यामि मूर्द्धा श्रुतिमूलशालिकण्ठस्थितः कस्य मुदे न वृत्तः ।।८५।।

[2]आकल्पविच्छेदेति । यस्याः स धर्मशास्त्राणां मनुयाज्ञवल्क्य-प्रभृतिस्मृतीनां व्रजः समूह एव मूर्द्धा [3]मस्तकं मस्तकरूपेण वृत्तः सन् कस्य मुदे [4]वृत्तो नाऽभूत् । अहमिति पश्यामि शङ्के । किं भूतः ?। श्रुतिरेव स्मृतीनां मूलं तेन शाली कण्ठो येषां विदुषां तत्र स्थितः । शाली कण्ठेति पाठान्तरम् । य आकल्पं कल्पो [5]ब्रह्मदिवसः तं कल्पान्तं यावत् विच्छेदेन विवर्जितो वृद्धपरम्परया स्मर्यमाणो मूर्द्धा अपि श्रुतेः श्रोत्रस्य[6] मूलेन शाली यः कण्ठस्तत्र[7] स्थितः आकल्पो मण्डनं तस्य विच्छेदेन रहितो [8]वृत्तो वर्तुलश्च । उत्प्रेक्षा रूपकं श्लेषश्च ।।८५।।

भ्रुवौ दलाभ्यां प्रणवस्य यस्यास्तद्बिन्दुना भालतमालपत्रम् ।
तदर्धचन्द्रेण विधिर्विपञ्चीनिक्वाणनाकोणधनुः प्रणिन्ये ।।८६।।

[1]भ्रुवौ [इति] । यस्या भ्रुवौ प्रणवस्योङ्कारस्य दलाभ्यां द्वाभ्यां रेखारूपाभ्याम् अर्द्धाभ्यां प्रणिन्ये कृतवान्[2] । तस्य बिन्दुना अनुस्वारेण भाले ललाटपट्टे[3] तमालपत्रं तिलकं वर्त्तुलं [4]प्रणिन्ये । [5]तस्याऽर्द्धचन्द्रेण ऊर्ध्वप्रदे[शे]न विधिः[6] विपञ्च्या वीणाया[7] निक्वाणनार्थं [8]वादनार्थं कोणधनुः प्रणिन्ये । क्रियाफलस्य कर्त्रभि-प्रायत्वादात्मनेपदम् । [9]अकर्त्रभिप्रा[य]विवक्षायामपि [10]सम्मानन-विशेषेण विवक्षायां, [11]सम्माननोत्सञ्जने (पा° I. iii. 36) त्यादिना सिद्धमात्मनेपदम् । प्रणवदलाद् । भ्रूप्रभृतीनां निर्माणमेव सम्माननम्[12] । अनुप्रासोऽतिशयोक्तिस्तुल्ययोगिता च ।।८६।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

द्विकुण्डली वृत्तसमाप्तिलिप्याः कराङ्गुली काञ्चनलेखनीनाम् ।
कैश्यं मषीणां स्मितभाः कठिन्याः काये यदीये निरमायि सारैः ।।८७।।

[1]द्विकुण्डलीति । [2]यदीये काये शरीरे वृत्तानां श्लोकानां समाप्तौ[3] लिपि [4]स्तस्याः द्विकुण्डली वर्त्तुलाकारा पद्मसदृशी [निरमायि निष्पादिता । काञ्चनलेखनीनां सारैः कराङ्गुली तस्याः निरमायि निष्पादिता । [5]मषीणां] सारैः कैश्यं केशसमूहो निष्पादितः[6] । केशाश्वाभ्यां [7]यञ्छापन्यतरस्यामि (पा° IV. ii. 48)ति यञ्[8] । कठिन्याः खटिकायाः सारैः स्मितभा हास्यकान्तिर्निर्मिता । [9]तुल्ययोगिता अतिशयोक्तिश्च ।।८७।।

या सोमसिद्धान्तमयाननेव शून्यात्मतावादमयोदरेव ।
विज्ञानसामस्त्यमयान्तरेव साकारतासिद्धिमयाखिलेव ।।८८।।

या[2] सोमेति । या देवी सोमसिद्धान्तो नाम [3]कापालिकदर्शनशास्त्रं तन्मयम् आननं यस्याः[4] सा तथा । अथ च [सोमस्य चन्द्रस्य यः सिद्धान्तः[5] पूर्णत्वं तन्मयानना इव । तथा शून्यात्मतावादो माध्यमिकबौद्धानां शास्त्रं तन्मयम् उदरं यस्याः सा तथा । अथ च] सर्वथा[6] शून्यं नास्त्येव उदरं यस्याः तथाभूता इव, कृशत्वात् । तथा विज्ञानस्य सामस्त्यं नाम योगाचारबौद्धानां मतं सर्वं विज्ञानमयं विश्वं । तन्मयम् आन्तरं मनो[7] यस्याः तथाभूता इव । अथ चान्तरं विज्ञा[ना]नां सामस्त्येन निष्पन्नं, सर्वज्ञत्वात् । तथा अखिलाऽपि देवी साकारता[8] सिद्धिर्वाऽथ[9], केषाञ्चिन्मते सगुणा सालम्बना मुक्तिस्तन्मयी इव । अथ च मूर्त्तिमती सिद्धिस्तन्मयी इव । नदादेशकृतिगणत्वात् ईप्रत्ययाभावः । अथ वा साकारतासिद्धिमयमखिलं यस्या इति समस्तं पदम् । इत्थं समग्रं देव्याः शरीरं [10]शास्त्रमयं वर्णितम् । [11]उत्प्रेक्षा ।।८८।।

भीमस्तयाऽगद्यत मोदितुं ते वेला किलेयं तदलं विषद्य ।
मया निगाद्यं जगतीपतीनां गोत्रं चरित्रं च विचित्रमेषाम् ।।८९।।

[1]भीमस्तयेति । पूर्वेण[2] युग्ममिति कश्चित् । भीमो राजा तया अगद्यत । ते इयं किल [3]मोदितुं वेला । तस्माद्[4] वि[षद्य अलं विषादं त्यज । मया एषां जगतीपतीनां गोत्रं चरित्रं च विचित्रं[5] निगाद्यं

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

वक्तव्यम् । सोप]सर्गत्वात् यदभावे ण्यत् । कात्यायनस्य[6] च क्यबभावे द्वयण् । [7]अनुप्रासः ।।८९।।

विन्दत्यसव्ये मकरन्दलीलां मन्दाकिनी यच्चरणारविन्दे ।
अत्राऽवतीर्णा गुणवर्णनाय राज्ञां तदाज्ञावशगाऽस्मि काऽपि ।।९०।।

[1]विन्दति[इति] । [2]यस्याः असव्ये दक्षि[णे चर]णारविन्दे मन्दाकिनी मकरन्दस्य लीलां विन्दति प्राप्नोति । [3]अस्मि अहं काऽपि तस्य श्रीपुरुषोत्तमस्य आज्ञा [4]तस्या [5]वशगा सती अत्र राज्ञां गुणवर्णनायाऽवतीर्णाऽस्मि[6] । अस्मि इत्यव्ययमहमित्यर्थे । अन्यस्तु असत्ये इति पठति व्याचष्टे च । असत्येऽसद्रूपे । शून्ये यच्चरणे आकाशे इत्यर्थः । आकाशं हि विष्णुपदम् । तत्र च मन्दाकिनी । अनुप्रासो निदर्शना रूपकमतिशयोक्तिः उदात्तं च ।।९०।।

तत्कालवेद्यैः शकुनस्वराद्यैराप्तामवाप्तां नृपतिः प्रतीत्य ।
तां लोकपालैकधुरीण एष तस्यै सपर्यामुचितां दिदेश ।।९१।।

[1]तत्कालवेद्यैरिति । एष लोकपालैः सह एकधुरीणो[2]नृपतिस्तस्यै उचितां[3] सपर्यां दिदेश । किं कृत्वा[4] ?। ताम् आप्तां हितकारिणीं [5]मातृसमां काञ्चिदवाप्तां प्रतीत्य । कैः ?। तत्कालवेद्यैः ज्ञेयैः शकुनानां पक्षिणां स्वराद्यैः शब्दैः कपिञ्जलादिपक्षिशुभरुतैः । आदिशब्दात् [6]दक्षिणबाहुनेत्रस्फुरणादिभिः[7] । अथवा शकुनशब्देन सामान्यतः शकुनशास्त्रोक्ताः शकुना निर्दिश्यन्ते । °स्वराद्यैरिति [8]विशेषनिर्देशः । नृलोकपालैकधुरीण इति पाठान्तरम् । एकधुराल्लुक् चे (पा° IV. iv. 79) ति खः । [[9]खस्य च आयनेयी]नी (पा° VII. i. 2)त्यादिना ईन् ।।९१।।

दिगन्तरेभ्यः पृथिवीपतीनामाकर्षकौतूहलसिद्धविद्याम् ।
ततः क्षितीशः स निजां तनूजां मध्येमहाराजकमाजुहाव ।।९२।।

[1]दिगन्तरेभ्यः इति । ततः स[2] क्षितीशो निजां तनूजां [3]मध्येमहाराजकं राजमध्ये आजुहाव । किं भूताम् ?। दिगन्तरेभ्यः सकाशात् पृथिवीपतीनाम् आकर्षस्य आकृष्टेर्यत् [4]कौतूहलं तस्याः सिद्धविद्याम् । [5]गोत्रोक्षोष्ट्रोरभ्रराजे(पा° IV. ii. 39)त्यादिना वुञ् । पारे मध्ये

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

षष्ठ्या वे(पा° II. i. 12)ति षष्ठीसमासापवादो[6] विभाषया अव्ययीभावः। तत्सन्नियोगेन चैकारान्तत्वं निपात्यते[7] ।।९२।।

दासीषु नासीरचमूषु जातं स्फीतं क्रमेणाऽऽलिषु वीक्षितासु ।
स्वाङ्गेषु रूपोत्थमथाद्भुताब्धिमुद्वेलयन्तीमवलोककानाम् ।।९३।।

दासीषु नासीरेति। षोडशभिः कुलकम्। [2]राजराजिरिमां पपा(नै° V. 108)विति सम्बन्धः। किं भूताम्[3] ?। नासीरस्य अग्रप्रयाणस्य चमूषु सेनासु [4]दासीषु जातं प्रथमोत्पन्नम्। [5]अग्रदासीनां सेनां दृष्ट्वा उत्पन्नम्[6]। ततः क्रमेण आलिषु सखीषु वीक्षितासु स्फीतम्। अथ[7] स्वाङ्गेषु [8]स्वस्याऽवयवेषु [9]रूपोत्थम् अवलोककानाम्[10] अद्भुतस्याऽब्धिम् आश्चर्यसमुद्रम् उद्वेलयन्तीं वेलातिगं [11]कुर्वन्तीम्। ततो दमयन्तीं दृष्ट्वा आश्चर्यं निर्मर्यादं बभूवेत्यर्थः। [12]रूपकं पर्यायोक्तमतिशयोक्तिश्च ।।९३।।

स्निग्धत्वमायाजललेपलोपसयत्नरत्नांशुमृजांशुकाभाम् ।
नेपथ्यहीरद्युतिवारिवर्तिस्वच्छायसच्छायनिजालिमालाम् ।।९४।।

[1]स्निग्धत्वमायेति। पुनः किं भूताम् ?। स्निग्धत्वेन लेप उपदेहस्तन्मयत्वं मायाजलेन च [2]लोपस्तिरोधानम्। तौ यथासङ्ख्यं यस्यांऽशुकस्य तत्तथा। तथा सयत्नं लक्षणया सातिशयं रत्नांशुभिर्मणि-किरणैर्मृजांशुर्द्विलोके[3] स्खलितमिति प्रसिद्धिर्यस्य तच्च तत् अंशुकं वस्त्रं तेन आभा कान्तिर्यस्यास्तां तथा। अथवा स्निग्धत्वमायाजल-लेपलोपानां सयत्नरत्नांशूनां मृजा सा तद्वदंशुकाभा यस्याः [तां] तथा। [4]मृजामन्ने(?) रक्तं च मांसं बलं चेति मृजाशब्दः सारवचनः। तथा नेपथ्यानामलङ्करणानां ये हीरास्तेषां द्युतिरेव वारि पानीयं तद्वर्ति मध्यवर्ति स्वच्छायं [5]सच्छायं समानच्छायम् आत्मसमानं निजमालिजालं [सखी]कुलं यस्यास्तां तथा। विभाषा सेने (पा° II. iv. 25)त्यादिना छायान्तस्तत्पुरुषो वा नपुंसकम्। अतितेजसा अदृश्यामिव[6]। तथा सखीनां तस्याश्च भेदाभाव इत्यर्थः।[7] अनुप्रासो रूपकमुपमाऽति-शयोक्तिश्च ।।९४।।

विलेपनामोदमुदागतेन तत्कर्णपूरोत्पलसर्पिणा च ।
रतीशदूतेन मधुव्रतेन कर्णे रहः किञ्चिदिवोच्यमानाम् ।।९५।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]विलेपनामोदेति। किं भूताम् ?। रतीशस्य कामस्य दूतेन मधुव्रतेन कर्णे लगित्वा किञ्चिद्रहो रहस्यम् उच्यमानामिव। किं भूतेन ?। विलेपनस्याऽङ्गरागस्याऽऽमोदः परिमलः तन्मुदा आगतेन। तथा तस्याः कर्णपूरोत्पलं तत्र सर्पिणा[च] [2]भ्रमरेण। [3]रूपकमुत्प्रेक्षा च ॥९५॥

विरोधिवर्णाभरणाश्मभासां मल्लाजिकौतूहलमीक्षमाणाम्।
स्मरस्वचापभ्रमचालिते नु भ्रुवौ विलासाद्वलिते वहन्तीम् ॥९६॥

[1]विरोधिवर्णेति। किं भूताम् ?। विरोधिवर्णा पीतरक्तादिवर्णा आभरणानां [ये] अश्मानो मणयः तेषां भासां[2] कान्तीनां मल्लानाम् आजिर्नियुद्धं [3]परस्परं मिश्रीभावस्तस्य कौतूहलम् ईक्षमाणाम्[4]। यथा मल्ला युध्यन्ते तथा मणिकान्तयो मिलिता इत्यर्थः। पुनः किं कुर्वतीम् ?। विलासाद् वलिते[5] वक्रिते भ्रुवौ वहन्तीम्। नु इति वितर्के। स्मरेण कन्दर्पेण स्वचापभ्रमेण भ्रान्त्या[6] चालिते [इ]व ॥९६॥

सामोदपुष्पाशुगवासिताङ्गीं किशोरशाखाग्रशयालिमालाम्।
वसन्तलक्ष्मीमिव राजभिस्तैः कल्पद्रुमैरप्यभिलष्यमाणाम् ॥९७॥

[1]सामोदपुष्पेति। किं भूताम् ?। तै राजभिरभिलष्यमाणाम्। किं विशिष्टाम् ?। सामोदेन सहर्षेण पुष्पाशुगेन कामेन वासितम् अङ्गं यस्याः तां [2]तथा। तथा किशोरशाखाः कोमलाङ्गुलीकाः अग्रशया हस्ताग्राणि यस्या एवंविधा आलीनां सखीनां माला पङ्क्ति-र्यस्यास्तां तथाभूताम्। कोमलहस्तसखीवृतामित्यर्थः। [3]मुख्यार्थबाधे [4]तद्योग (का°प्र° II. 4) इत्यादिवचनात् अवयवावयविनोश्च सम्बन्धात्। अत्राऽवयवादग्रमात्रे अवयवे शयशब्दः[5]। उत्प्रेक्ष्यते-वसन्तलक्ष्मीमिव[6]। किं भूताम् ?। सामोदानां पुष्पाणामाशुगेन वायुना वासिताङ्गीम्। तथा कल्पद्रुमैरप्य[भि]लष्यमाणाम्। तथा किशोराणां नूतनानां शाखानाम् अग्रेशया स्थिता[8] अलिमाला[9] भ्रमरपङ्क्तिर्यत्र ॥९७॥

पीतावदातारुणनीलभासां देहोपदेहात् किरणैर्मणीनाम्।
गोरोचनाचन्दनकुङ्कुमैणनाभीविलेपान् पुनरुक्तयन्तीम् ॥९८॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]पीतावदातेति । किं भूताम् ?। मणीनां किरणैर्देहस्योपदेहात् व्याप्तत्वात् गोरोचनाया:[2] चन्दनस्य कुङ्कुमरयैणनाभ्या: कस्तूरिकायाश्च विलेपान्[3] अङ्गरागान् पुनरुक्तयन्तीम् । किंभूतानां मणीनाम् ?। पीताश्चावदाता: [5]शुभ्राश्चारुणाश्च नीलाश्च भासो येषां तेषां तथा । प्रथमं गोरोचनादेरङ्गरागस्ततश्च मणिकिरणै: पुन: [7]कृत: । [8]अनुप्रासो यथासङ्ख्यं च ।।९८।।

स्मरं प्रसूनेन शरासनेन जेतारमश्रद्दधतीं नलस्य ।
तस्मै स्वभूषादृषदंशुशिल्पं बलद्विष: कार्मुकमर्पयन्तीम् ।।९९।।

[1]स्मरं प्रसूनेनेति । किं कुर्वतीम् ?। प्रसूनेन [2]शरासनेन स्मरं नलस्य [3]जेतारम् अ[श्र]द्दधतीम् । अनेन धनुषा नलो[4] जीयतेइति चिन्तयन्तीम् । ततश्च तस्मै कामाय बलद्विष इन्द्रस्य [कार्मुकम् अर्पयन्तीम् । किं भूतम् ?। स्वभूषां दृषदां मणीनां ये अंशवस्तेषां शिल्पम् । मणिकिरणेभ्य: इन्द्रचापं भवति] । कर्मण उकञ् (पा° V. i. 103)[5] ।।९९।।

विभूषणेभ्योवरमंशुकेषु ततो वरं सान्द्रमणिप्रभासु ।
सम्यक् पुन: क्वाऽपि न राजकस्य पातुं दृशा धातृधृतावकाशाम् ।।१००।।

[1]विभूषणेभ्य इति । किं भूतात् ?। राजकस्य दृशा सम्यक् पातुं क्वाऽपि न धात्रा[2] विधिना [3]धृतोऽवकाशो यस्यां तां तथा । क्वचिद् विभूषणेभ्य: [4]सकाशात् वरमधिकम् । अंशुकेषु वस्त्रेषु न [5]दत्तावकाशाम् ततोऽपि[6] अधिकं सान्द्राणां मणीनां प्रभासु [7]सावकाशाम् । प्रथमं विभूषणैऽदृश्यमानां ततोंऽशुकै:[8] [9]ततो मणिप्रभाभिरित्यर्थ :।।१००।।

प्राक्पुष्पवर्षैर्वियत: पतद्भिर्द्रष्टुं न दत्तामथ तद्द्विरेफै: ।
तद्भीतिभुग्नेन ततो मुखेन विधोरहो वाञ्छितविघ्नयत्न: ।।१०१।।

[1]प्राक्पुष्पवर्षैरिति । किं भूताम् ?। प्राग् वियत: पतद्भि: पुष्पवर्षैर्द्रष्टुं न दत्ताम् । [अथ तेषां पुष्पाणां द्विरेफैर्द्रष्टुं न दत्ताम् ।] ततो मुखेन द्रष्टुं न दत्ताम् । किं भूतेन ?। तेषां भ्रमराणां[2] भीत्या भुग्नेन [3]वलितेन । अहो इत्याश्चर्ये । विधेर्महान्[4] वाञ्छितस्य तद्दर्शनस्य विघ्नयत्न: ।।१०१।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

एतद्व रंस्यामिति राजकेन मनोरथातिथ्यमवापिताय ।
सखीमुखायोत्सृजतीमपाङ्गात् कर्पूरकस्तूरिकयोः प्रवाहम् ।।१०२।।

[1]एतद्वरंस्यामित्यादि । किं कुर्वतीम् ?। सखीमुखाय अपाङ्गात् [2]नेत्रपर्यन्तात् श्वेतकृष्णरश्मिभिः[3] कर्पूरकस्तूरिकयोः प्रवाहम् उत्सृजतीम् । किं भूताय मुखाय[4] ?। इति राजकेन मनोरथस्याऽऽतिथ्यमवापिताय । कथम् अहं वरम् एतत्सखीमुखं स्या[म्] इति राजानो मनोरथान्[5] कुर्वन्ति ।।१०२।।

स्मितेच्छुदन्तच्छदकम्पकिञ्चिद्दिगम्बरीभूतरदांशुवृन्दैः ।
आनन्दितोर्वीन्द्रमुखारविन्दैर्मदं नुदन्तीं हृदि कौमुदीनाम् ।।१०३।।

[1]स्मितेच्छुदन्तेति । किं भूताम् ?। कौमुदीनां हृदि [2]मदं नुदन्तीम् । किं [3]भूताम् ?। स्मितेच्छू[4] हास्योन्मुखौ यौ दन्तच्छदौ ओष्ठौ तयोः कम्पेन स्फुरणेन किञ्चिद् दिगम्बरीभूता विवृता ये रदानां दन्तानामंशवः [5]किरणास्तेषां वृन्दैः । किं भूतैः ?। आनन्दितानि उर्वीन्द्राणां मुखारविन्दानि यैस्तैस्तथा । [6]कौमुदी किल कमलानि नाऽऽनन्दयति । अत[7] एव तासां गर्वोच्छेदः । अथ च अंशुशब्देन[8] सूर्य उच्यते । [9]स अरविन्दान्यानन्दयति । कौमुदीनां च हृदि [10]मदं नुदति । मुदमिति पाठान्तरम् ।।१०३।।

प्रत्यङ्गभूषाच्छमणिच्छलेन यल्लग्नतन्निश्चललोकनेत्राम् ।
हाराग्रजाग्रद्गरुडाश्मरश्मिपीनाभनाभीकुहरान्धकाराम् ।।१०४।।

[1]प्रत्यङ्गभूषेति । प्रत्यङ्गभूषार्थम् अच्छा निर्मला ये मणयस्तेषां छलेन यत्र लग्नानि तत्रैव निश्चलानि लोकानां नेत्राणि यस्यां तां तथा । हारस्याऽग्रे जाग्रतः[2] स्फुरन्तो ये गरुडाश्मानो नीला[3] मणयस्तेषां रश्मयस्तैः[4] पीनाभं [5]पूर्णाभं मेदुरकान्ति नाभीकुहरान्धकारं यस्यास्तां तथा । नाभ्याः स्वाङ्गत्वेन कुहरान्धका[रा]भाया अपि स्वाङ्गता । तमो नाम दशमं द्रव्यमिति औपनिषदं मतम् एतेनाऽभ्युपगतम्[6] । प्रकाशाभावस्तम इति तु वैशेषिक[म]ते[7] नवमम् । अतः प्राणिस्थत्वान्मूर्त्तत्वाच्च स्वाङ्गभावे [8]पीनादेशः । अन्ये तु पीनमिव पीनमित्याहुः ।।१०४।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

तद्गौरसारस्मितविस्मितेन्दुप्रभाशिरःकम्परुचोऽभिनेतुम् ।
विपाण्डुतामण्डितचामरालीनानामरालीकृतलास्यलीलाम् ।।१०५।।

[1]तद्गौरेति । विपाण्डुतया मण्डिताः या [2]चामराली सा एव नाना मराल्यो [3]हंस्यः हंसाङ्गना[:]ताभिः कृता लास्यस्य नृत्यस्य लीला यस्यां तां तथा । किं कर्तुम् ?। तस्या गौरसारं यत् स्मितं तेन विस्मिता या इन्दुप्रभा तस्याः शिरसः कम्पः तस्य रुचः शोभा[4] अभिनेतुमिव ।[5] तदा यत् स्मितविस्मिता किलेन्दुप्रभा शिरः कम्पं करोति ।।१०५।।

तदङ्गभोगावलिगायनीनां मध्ये निरुक्तिक्रमकुण्ठितानाम् ।
स्वयं धृतामप्सरसां प्रसादं ह्रियं हृदो मण्डनमर्पयन्तीम् ।।१०६।।

[1]तदङ्ग[इति] । किं [2]कुर्वन्तीम् ?। स्वयं धृतां ह्रियं[स्व]हृदो मण्डनमप्सरसां प्रसादमर्पयन्ती[म्] । किं [3]भूतानाम् ?। तस्या [4]अङ्गानां [5]भोगावलिर्बिरुदावली तस्या गायनीनाम् । पुनः किं भूतानाम् ?। मध्ये गीतमध्ये निरुक्तिक्रमे निर्वचनानुक्रमे कुण्ठितानाम्[6] । अत एव तासां लज्जा ।[7] मागधविरचितो[8] ग्रन्थो भोगावली । यदाह तस्य ग्रन्थो हि भोगावली भवेत् । तस्येति मागधः प्रकृतः ।।१०६।।

तारा रदानां वदनस्य चन्द्रं रुचा कचानां च नभो जयन्तीम् ।
आकण्ठभक्ष्णोर्द्वितयं मधूनि महीभुजः कस्य न भोजयन्तीम् ?।।१०७।।

[1]तारा[इति] । किं कुर्वंतीम् ?। रदानां[2] रुचा तारा जयन्ती[म्] । वदनस्य रुचा चन्द्रं जयन्तीम् । कचानां रुचा नभ आकाशं जयन्तीम् । तथा कस्य महीभुजोऽक्ष्णोर्द्वितयम् आकण्ठं मधूनि न भोजयन्ती[म्] ?। अपि तु भोजयन्ती [म्] । [3]मधूनि च, [गतिबु] [4]द्धिप्रत्ययवसानार्थ(पा॰ I. iv. 52) त्यादिना कर्म ।।१०७।।

अलङ्कृताङ्गाद्भुतकेवलाङ्गीं स्तवाधिकाध्यक्षनिवेद्यलक्ष्मीम् ।
इमां विमानेन सभां विशन्तीं पपावपाङ्गैरथ राजराजिः ।।१०८।।

[1]अलङ्कृतेति । अथ राज्ञां [राजिः] इमां विमानेन सभां विशन्तीं[2] [सतीम्] अपाङ्गैः [पपौ । किं भूताम् ?। अलङ्कृतादङ्गात्

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

अद्भुतं केवलम् अनलङ्कृतम् अङ्गं यस्याः तां तथा । तथा स्तवाद् वर्णनात् अधिका अध्यक्षेण][3] प्रत्यक्षेण निवेद्या लक्ष्मीर्यस्याः तां तथा । स्तुतेः सकाशात् प्रत्यक्षेण रमणीयाम् ॥१०८॥

आसीदसौ कोऽपि न तत्र भूपस्तन्मूर्तिरूपोद्भवदद्भुतस्य ।
उल्लेसुरङ्गानि मुदा न यस्य विनिद्ररोमाङ्कुरदन्तुराणि ॥१०९॥

[1]आसीदसाविति । तत्र स्वयंवरे असौ कोऽपि भूपो न आसीत् यस्याऽङ्गानि तस्या मूर्तेः रूपात् उद्भवतोऽद्भुतस्य मुदा हर्षेण [न] उल्लेसुः । किं भूता[नि] ?। [2]विनिद्रैः रोमाङ्कुरैर्दन्तुराणि [3]विषमाणि । तन्मूर्तीत्यादि यस्येत्यस्य विशेषणं वा । दन्त उन्नत उरच् (पा॰ V. ii. 106) ॥१०९॥

अङ्गुष्ठमूर्ध्नाऽवनिपीडिताग्रा मध्येन भागेन च मध्यमायाः ।
आस्फोटि भैमीमवलोक्य तत्र न तर्जनी केन जनेन नाम ?॥११०॥

[1]अङ्गुष्ठ[इति] । तत्र नाम [2]स्वयंवरे केन जनेन तर्जन्यङ्गु[ली[3] अङ्गु]ष्ठमूर्ध्ना मध्यामायाः अङ्गुल्या मध्यमेन च[4] भागेन भैमीमवलोक्य[5] नाऽऽस्फोटि ?। अपि तु [6]आस्फोटि । किं भूता ?। अवनिपीडितमग्रं यस्यास्तर्जन्याः सा तथा । अवनिपीडिताग्रमध्येनेति[8] प्रायिके पाठे अधस्तान्निपीडितमग्रं मध्यं च यस्येति भागविशेषणं समस्तम् [9]अङ्गुष्ठमूर्धा[10] चेति पाठान्तरम् । चापटीवादितेत्यर्थः ॥११०॥

समुच्चयेऽस्मिन् मनुजेश्वरेण तां खञ्जनाक्षीमवलोक्य केन ।
पुनः पुनर्लोलितमौलिना न [1]भ्रुवोरुदक्षेपितरां द्वयी वा ?॥१११॥

अस्मिन्[इति] । वा अथवा समुच्चयेऽस्मिन् समाजे केन मनुजेश्वरेण राज्ञा भ्रुवोर्द्वयी न उदक्षेपितराम् उत्क्षिप्ता । किं कृत्वा ?। [3]तां खञ्जनाक्षीम्[4] अवलोक्य । किं भूतेन ?। पुनः पुनर्लोलितो मौलिर्मस्तकं येन तेन तथा ॥१११॥

स्वयंवरस्याऽजिरमाजिहानां विभाव्य भैमीमथ भूमिनाथैः ।
इदं मुदा विह्वलचित्तभावादवादि खण्डाक्षरजिह्मजिह्वम् ॥११२॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]स्वयंवरस्येति । अथ भूमिनाथैः भैमीं स्वयंवरस्याऽजिरमाजिहानां [2]विभाव्य ज्ञात्वा मुदा इदम् अवादि । कथं यथा ?। खण्डैरर्घोक्तैरक्षरैर्जिह्वा जिह्वा यत्र तद्यथा भवति । कुतः ?। विह्वलचित्तस्य भावात् ।।११२।।

रम्भादिलोभात् कृतकर्मभिर्मा शून्यैव भूर्भूत्सुरभूमिपान्थैः ।
इत्येतयाऽलोपि दिवोऽपि पुंसां वैमत्यमत्यप्सरसा रसायाम् ।।११३।।

[1]रम्भादिलोभादिति । एतया दमयन्त्या दिवः पुंसामपि रसायां पृथिव्यां विषये वैमत्यं[2] [3]विरुद्धमतित्वम् इति कारणादलोपि । किं भूतया[4] ?। अतिक्रान्ता अप्सरसो यया [तया] तथा । इतीति किम् ?। कृतं कर्म यज्ञादिकं यैस्तैः सुरभूमेः पान्थैः सद्भिः भूः पृथिवी शून्यैव मा भूत् । कस्मात् ?। कृतकर्मभि[:] रम्भादीनां लोभात् । देवाः किल स्वर्गस्था भूमिं निन्दन्ति । ततस्ते भैमीलाभेन[5] भुवमागताः । अतोऽन्यस्याऽपि स्वर्गगमने औत्सुक्यं निवर्तताम् । विमतिशब्दस्य दृढादिपाठात्, वर्णदृढादिभ्यः ष्यञ्चे (पा॰ V. i. 123)ति ष्यञ्प्रत्यये [6]वैमत्यमिति ।।११३।।

रूपं यदाकर्ण्य जनाननेभ्यस्तत्तद्दिगन्ताद्वयमागमाम ।
सौन्दर्यसारादनुभूयमानादस्यास्तदस्माद्बहु नाकनीया ।।११४।।

[1]रूपमिति । वयं जनानामाननेभ्य [2]इति यत् रूपम् आकर्ण्य तस्मात् दिगन्तादागमाम[3] । [4]अद्यतने लुट् । अस्या दमयन्त्या अस्मात् प्रत्यक्षादनुभूयमानात् सौन्दर्यसारात् सकाशात् तत्[5] श्रूयमाणं रूपं बहु नाकनीयः अतिशयेन न्यूनम् अल्पम्[6] । युवाल्पयोः कनन्यतरस्यामि (पा॰ V. iii. 64)ति कन् । अन्यत्र किल दृष्टात् श्रुतं रमणीयम् । अत्र तु श्रुताद् दृष्टमधिकम् ।।११४।।

रसस्य शृङ्गार इति श्रुतस्य क्व नाम जागर्ति महानुदन्वान् ।
कस्मादुदस्थादियमन्यथा श्रीर्लावण्यवैदग्ध्यनिधिः पयोधेः ।।११५।।

[1]रसस्य इति । नाम अहो शृङ्गार इति श्रुतस्य प्रसिद्धस्य रसस्य महानुदन्वान् समुद्रः क्व जागर्ति ?। क्वाऽपि तिष्ठतीत्यर्थः । अन्यथा कस्मात् पयोधेरियं श्रीः[2] लक्ष्मीः उदस्थात् । किं भूता ?। लावण्यस्य[3] वैदग्धस्य [च] निधिः । कार्येण हि कारणमनुमीयते ।।११५।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

साक्षात्सुधांशुर्मुखमेव भैम्या दिवः स्फुटं लाक्षणिकः शशाङ्कः ।
एतद्भ्रुवौ मुख्यमनङ्गचापं पुष्पं पुनस्तद्गुणमात्रवृत्त्या ।।११६।।

[1]साक्षादिति । भैम्या मुखमेव साक्षात् अव्यवधानेन सङ्केतविषयो[2] मुख्यः सुधांशुः स्फुटमित्यहं मन्ये । [3]दिव[:] शशाङ्को, दिवि इति पाठे दिवि हि[4] यः [शशाङ्कः सलाक्षणिको लक्षणया सान्तरार्थनिष्ठया वृत्त्या, न तु अभिधया । अथ च लक्षणेन लाञ्छनेन निष्पन्नः ।] शशाङ्कत्वात् । तथा एतस्या भ्रुवौ मुख्यम् अनङ्गचापम् । भ्रुवो [5]हि मुखे भवत्वात् मुख्यत्वम् । मुखमिव हस्ताद्यवयवेभ्योऽर्थान्तरेभ्यः प्रथमं प्रतीयमानो मुख्योऽर्थः । तदुक्तम्-शब्दव्यापारतो यस्य प्रतीतिस्तस्य मुख्यता । अर्थात्[6] [7]पुनर्लक्ष्यमाण[त्व]मिष्यते लक्षणा भेदो गुणवृत्तिः[8] । यत्पुनस्तस्य पुष्पलक्षणं चापं तद्गुणमात्र-वृत्त्या गौण्या वृत्त्या । अथ यत् किल चापं भवति तद्गुणोऽपि [मौर्व्या [9]वर्त्तते] । अर्थान्तरवृत्तिः ।।११६।।

लक्ष्यं धृतं कुण्डलिके सुदत्या [1]ताटङ्कयुग्मं स्मरधन्विने किम् ।
सव्यापसव्यं विशिखा विसृष्टास्तेनाऽनयोर्यान्ति किमन्तरेव ।।११७।।

[2]लक्ष्यम् [इति] । किं सुदत्या दमयन्त्या ताटङ्कयुग्मं[3] कर्णाभरणं स्मर एव धन्वी तदर्थं द्वे कुण्डलिके[4] लक्ष्यं धृतम् । ततस्तेन स्मरेण सव्यापसव्यं वामदक्षिणतः उभयथा[5] विसृष्टा विशिखा एव[6] [अ]नयोः कुण्डलिकयोरन्तरे[व] मध्ये एव किं [7]यान्ति । अतस्तद्दर्शनं कामोद्दीपनम् ।।११७।।

तनोत्यकीर्तिं कुसुमाशुगस्य सैषा बतेन्दीवरकर्णपूरौ ।
यतः श्रवः कुण्डलिकापराद्धशरं खलः ख्यापयिता तमाभ्याम् ।।११८।।

तनोति इति । बत खेदे । [3]सैषेति परोक्षसमीपतरवर्तिनोस्त-देतच्छब्दयोर्जहदजहल्लक्षणया सामानाधिकरण्यम् । [4]सैषा दमयन्ती इन्दीवरकर्णपूरौ [5]नीलोत्पलकर्णावतंसौ कुसुमाशुगस्य कुसुमायुध-स्याऽकीर्तिं तनोति । [6]इन्दीवरकर्णपूराभ्यां कामस्याऽकीर्तिरारोप्यते । अत्र वाक्यार्थं कारकं हेतुमाह । यत आभ्याम् इन्दीवरकर्णपूराभ्यां साधनाभ्यां खलो दुर्जनस्तं कुसुमाशुगं श्रवसी[7] कर्णलते एवं कुण्डलिके

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

ताभ्यामपराद्धो लक्ष्यात् च्युतः[8] शरो यस्य तं[9] तथा [10]एवंविधं [11]ख्यापयिता [12]ख्यापयिष्यति। [13]श्रवःकुण्डलिकयोरुपरि इन्दीवर-कर्णपूरयोः सद्भावादपराद्धेषु च ख्यापनम् ॥११८॥

रजःपदं षट्पदकीटजुष्टं हित्वाऽऽत्मनः पुष्पमयं पुराणम्।
अद्याऽऽत्मभूराद्रियतां स भैम्या भ्रूयुग्ममन्तर्धृतमुष्टि चापम् ॥११९॥

[1]रजःपदमिति। [2]स आत्मभूः कामो [3]रजसः परागस्य पदं तथा षट्पदा एव कीटा घुणास्तैर्जुष्टं सेवितम् आत्मनः पुष्पमयं पुराणं चापं [हित्वा अद्य नूतनं भैम्या भ्रूयुग्मं चापं धनुराद्रियताम्। किं भूतम्[4] ?। अन्तर्धृता मुष्टिर्मुष्टिसंस्थानमाकृतिविशेषो येन सत्तथा। किल पुराणं चापं] रजःपदं घुणजुष्टं [5]हीयते। नूतनं चान्तर्धृत-मुष्टिराद्रियते[6]। [7]इहैकत्र क्रमेणाऽनेकवर्णनेऽपि आत्मभुवः पुराणनूतन-चापविषयगृहीतोपादानयोर्विवक्षितत्वात् परिवृत्तिरुक्ता भवति ॥११९॥

पद्मान् हिमे प्रावृषि खञ्जरीटान् क्षिप्नुर्यमादाय विधिः क्वचित्तान्।
सारेण तेन प्रतिवर्षमुच्चैः पुष्णाति दृष्टिद्वयमेतदीयम् ॥१२०॥

[1]पद्मानिति। विधिः [2]स्रष्टा ब्रह्मा तान्[3] प्रसिद्धान् अनुभूतान् वा हिमे हेमन्ते[4] पद्मान् प्रावृषि वर्षासु खञ्जरीटान् यं सारमादाय[5] क्वाऽपि क्षिप्नुः। क्षिपतितच्छीलादिषु क्नुः। तेन[6] सारेण[7] प्रतिवर्षं प्रतिवत्सरम्[8] उच्चैरतिशयेन एतदीयं दृष्टिद्वयं पुष्णाति।[9] अत एवाऽधिकाधिकशोभा खलु लक्ष्यते ॥१२०॥

एतद्दृशोरम्बुरुहैर्विशेषं भृङ्गौ जनः पृच्छतु तद्गुणज्ञौ।
इतीव धाताऽकृत तारकालिस्त्रीपुंसमाध्यस्थ्यमिहाक्षियुग्मे ॥१२१॥

एतदिति। धाता स्रष्टा[2] इह[3] [अक्षि]युग्मे इतीव इति कारणादिव तारके एव[4] कनीनिके एवाऽऽलिस्त्रीपुंसौऽभ्रमरमिथुनं तयोर्माध्यस्थ्यम् अन्तर्वर्तित्वम् [अकृत]। अथ च [5]औदासीन्यम् अपृच्छत्। अचतुरविचतुरे (पा॰ V. iv. 77) त्यादिना अच्। [6]इतीति किम् ?। जनो लोक एतस्या [10]दमयन्त्या [11]दृशोरम्बुरुहे [12]कमलैर्विशेषं भेदं [13]व्यतिरेकं भृङ्ग[14] च भृङ्गीं च भृङ्गौ पृच्छतु। किं भूतौ ?। तेषामम्बुरुहाणां गुणज्ञौ। पुमान्स्त्रिया (पा॰ I. ii. 67) इत्येकशेषः।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

भ्रमरो हि कमलगुणं जानाति। विवादे हि मध्यस्थ उदासीनः पृच्छ्यते ॥१२१॥

व्यधत्त सौधे रतिकामयोस्तद्भक्तं वयोऽस्या हृदि वासभाजोः।
तदग्रजाग्रत्पृथुशातकुम्भकुम्भौ न सम्भावयति स्तनौ कः ॥१२२॥

[1]व्यधत्तेति। वयो यौवनं [2]कर्तृ रतिकामयोः [3]सौधे प्रसादद्वयं व्यधत्त। रतिशब्दस्य, द्वन्द्वे [4]घि(पा॰ II. ii. 32)रिति पूर्वत्वम्। किं भूतम्?। तद्भक्तं रतिकामाश्रितम्। किं भूतयोः?। अस्या हृदि [5]वासं भजन्तीति [[6]एवंशीलयोः]। किल सेवको भक्तो भवति। स स्वामिनो रुचिरं स्थानं कुरुते। अत्राऽनुमानमाह—यतः इमौ स्तनौ कः पुमान् तयोः प्रसादयोरग्रे[7] जाग्रतौ पृथू शातकुम्भस्य सुवर्णस्य कुम्भौ कलशौ न सम्भावयति?। कलशदर्शनात्[9] सौधानुमानम् ॥१२२॥

अस्या भुजाभ्यां विजितादि्बसात् किं पृथक्करोऽगृह्यत तत्प्रसूनम्।
इहेक्ष्यते तन्न गृहाः श्रियः कैर्न गीयते वा कर एव लोकैः ॥१२३॥

[1]अस्या भुजाभ्यामिति। अस्या भुजाभ्यां विजितात् बिसात् किं तस्य बिसस्य[2] प्रसूनं कमलं पृथक् पृथक् [3]करो अगृह्यत[4] दण्डो [5]अगृह्यत। तत्कमलम् इह भुजद्वयाग्रे कैर्न ईक्ष्यते। किं भूतम्?। श्रियः शोभायाः गृहाः स्थानम्।[6] गृहाः पुंसिच [7]भूम्न्येव(अमर॰ II. ii. 5)। कैर्वा लोकैः कर एव न गीयते। यतो हस्तोऽपि कर उच्यते। कमलं लक्ष्म्याः सदनम् ॥१२३॥

छद्मैव तच्छम्बरजं बिसिन्यास्तत्पद्ममस्यास्तु भुजाग्रसद्म।
उत्कण्टकादुद्गमनेन नालादुत्कण्टकं शातशिखैर्नखैर्यत् ॥१२४॥

[1]छद्मैवेति। [2]बिसिन्याः सम्बन्धि तच्छम्बरजं पद्मं यदुच्यते तच्छद्मैव व्याजमात्रम्। शाम्बरी [3]माया विद्यते। अथ शम्बरादुदकाज्जातम्। तु पुनस्तत्पद्मं हस्तलक्षणं [4]पद्मम् अस्याः भुजाग्रसद्म। कारणानुगुणं हि कार्यम्। अतो यदुत्कण्ठकात् नालादुद्गमनेन कृत्वा[5] उत्कण्टकम्। कैः?। [6]शातशिखैस्तीक्ष्णाग्रैर्नखैः ॥१२४॥

जागर्ति मर्त्येषु तुलार्थमस्या योऽयेति योग्यानुपलम्भनं नः।
यद्यस्ति नाके भुवनेऽथ बाधस्तदा न कौतस्कुतलोकबाधः ॥१२५॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]जागर्तीति । अस्यास्तुलार्थं योग्या मर्त्येषु मनुष्येषु काऽपि जागर्ति विद्यते इत्यत्र नोऽस्माकं योग्यानुपलम्भनम् अभावः प्रमाणम् । यथा इह भूतले घटो नाऽस्ति । दर्शन[योग्यत्वे] सति[2] [3]अनुपलम्भात् । प्रत्यक्षानुमानोपमानागमार्थापत्तिलक्षणप्रमाणपञ्चकेनाऽज्ञायमानत्वात् । अतो मनुष्यलोकेऽन्या काचिन्नाऽस्त्येव । तर्हि लोकद्वये न[4] भविष्यतीत्याह । यदि नाके भुवने स्वर्गेऽथ वा अधो भुवने पाताले वा अस्ति योग्या, तदा कौतस्कुता लोकास्तेषां बाधोऽत्यन्तसम्मर्दो न स्यात् । कुतः कुतः स्थानादागताः कौतस्कुताः । अथवा अनुपलम्भनं नेत्यविसर्गपाठे[5] योग्यानुपलम्भनं न [6]इति काक्वाक्षिप्तत्वेन योग्यानुपलम्भनमेव व्यङ्ग्यं वाच्यनिषेधसहभावेन स्थितम् । तदयमर्थः—किं योग्यानुपलम्भनं न ?। अपितु योग्यानुपलम्भनमभाव एव । एवमभावमभिधायाऽनुमानमर्थापत्तिं वा दर्शयति । यदि नाकेऽधो भुवने [7]पाताले वा स्यात् तदा तेषां लोकानां[8] किं बाधा प्र[तिषेधः न]-स्यात् ?। अपि तु स्यात् । तेनाऽऽगच्छेयुः[9] अत्राऽपि बाधो न [10]इति [11]काक्वाक्षिप्तत्वेन [12]बाध एवेति व्यङ्ग्यं वाच्यनिषेधसहभावेन स्थितम् । कौतस्कुतशब्दस्य कस्कादिपाठात् । कस्कादिषु चे (पा॰ VIII. iii. 48)ति वीप्सायां सः ।।१२५।।

नमः करेभ्योऽस्तु विधेर्न वाऽस्तु स्पृष्टं धियाऽप्यस्य न किं पुनस्तैः ।
स्पर्शादिदं स्याल्लुलितं हि शिल्पं मनोभुवोऽनङ्गतयाऽनुरूपम् ।।१२६।।

[1]नभः इति । विधेः करेभ्यो नमोऽस्तु । वा अथवा न अस्तु मा भवतु । यतोऽस्य[2] ब्रह्मणो धियाऽपि दमयन्तीलक्षणमिदं[3] शिल्पं न स्पृष्टम् । किं पुनस्तैः करैः स्पृष्टम् ?। न स्पृष्टमित्यर्थः । हि यस्मात् इदं शिल्पं स्पर्शात् लुलितं मलिनं [4]चिपिटं वा स्यात् । इदं शिल्पं मनोभुवोऽनङ्गतया [5]अनुरूपं योग्यम् । [6]अनुप्रास आक्षेपोऽनुमानमतिशयोक्तिः ।।१२६।।

इमां न मृद्वीमसृजत्कराभ्यां वेधाः कुशाध्यासनकर्कशाभ्याम् ।
शृङ्गारधारां मनसा न शान्तिविश्रान्तिधन्वाध्वमहीरुहेण ।।१२७।।

[1]इमां नेति । वेधा इमां कुशानां दर्भाणाम् अध्यासनेन कर्कशाभ्यां कराभ्यां न असृजत् । यतो मृद्वीं कोमलाम् । तथा ब्रह्मा एनां मनसाऽपि

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

न असृजत् । यतः शृङ्गारस्य धारां वेणीम् । किं भूतेन ?। शान्तेरुपशमस्य विश्रान्त्यर्थं धन्वाध्वनि मरुदेशमार्गे महीरुहेण । यत्र शमविश्रमः तत्कथं शृङ्गारमयीं सृजति । [4]यत्र मरुमार्गवृक्षः तत्कथं धारां [3]सृजति । अनुप्रासो विषमं रूपकमतिशयोक्तिश्च ।।१२७।।

उल्लास्य धातुस्तुलिता करेण [1]श्रोणावियं किं स्तनयोर्गुरुर्वा ।
तेनाऽन्तरालैस्त्रिभिरङ्गुलीनामुदीतमध्यत्रिवलीविलासा ।।१२८।।

[2]उल्लास्येति । इयं धातुः करेण उल्लास्य उत्पाद्य तुलिता । किम्[3] इयं श्रोणौ कटिदेशे[4] गुरुरथ वा स्तनयोर्गुरुः इति । तेन कारणेन[5] चतसृणाम् अङ्गुलीनां त्रिभिरन्तरालैरुदीतो मध्ये उदरे तिसृणां वलीनां विलासो यस्यां सा तथा ।।१२८।।

निजामृतोद्यन्नवनीतजाङ्गीमेतां[1] क्रमोन्मीलितपीतिमानम् ।
कृत्वेन्दुरस्या मुखमात्मनाऽभून्निद्रालुना दुर्घटमम्बुजेन ।।१२९।।

[2]निजामृतेति । इन्दुरेतां कृत्वा अस्या आत्मना [3]मुखम् अभूत् । किं भूताम् ?। निजादमृतादुद्यदुत्पद्यमानं यत् नवनीतं [5]तस्माज्जातमङ्गं यस्यास्तां तथा । अत एव क्रमेण उन्मीलितः पीतिमा यस्यास्तां [6]तथा । नवनीतं पश्चात् पीतत्वं भजते । यतोऽस्या मुखं निद्रालुना अम्बुजेन दुर्घटम् ।।१२९।।

अस्याः स चारुर्मधुरेव कारुः श्वासं वितेने मलयानिलेन ।
अमूनि पुष्पैर्विदधेऽङ्गकानि चकार वाचं पिकपञ्चमेन ।।१३०।।

[1]अस्याः इति । अस्याः स[2] चारुर्मनोरमो[3] मधुर्वसन्त एव कारुः शिल्पी[4] मलयानिलेन श्वासं वितेने । तथा अमूनि अङ्गकानि स पुष्पैर्विदधे । तथा पिकस्य पञ्चमेन शब्देन वाचमस्याश्चकार ।।१३०।।

कृतिः स्मरस्यैव न धातुरेषा नाऽस्या हि शिल्पीतरकारुजेयः ।
रूपस्य शिल्पे वयसाऽपि[1] वेधा निर्जीयते स स्मरकिङ्करेण ।।१३१।।

[2]कृतिरिति । एषा स्मरस्यैव कृतिर्न धातुः । [3]हि यतोऽस्याः यः शिल्पी स इतरैः कारुभिर्जेयो न भवति । [4]यतो रूपस्य शिल्पे स वेधाः स्मरस्य किङ्करेण दासमात्रेण वयसा यौवनेनाऽपि [5]निर्जीयते । यौवनेन हि शरीरं कार्यं बाल्याद् विशिष्टं[6] [7]सृज्यते ।।१३१।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

गुरोरपी मां भणदोष्ठकण्ठं निरुक्तिगर्वच्छिदया विनेतुम् ।
श्रमः स्मरस्यैष[1] भवं विहाय मुक्तिं गतानामनुतापनाय ।।१३२।।

[2]गुरोरपीति । [3]एष स्मरस्य श्रमः[4] कृतिः । स्मरस्यैवेति क्वचित्पाठे इयं स्मरस्यैव कृतिः । किं कर्तुम् ?। गुरोर्बृहस्पतेरपि ओष्ठौ[5] च कण्ठं च । द्वन्द्वश्च प्राणितूर्यसेनाङ्गानामि (पा॰ II. iv. 25) ति प्राण्यङ्गानां समाहारत्वादेकत्वम् । ओष्ठकण्ठं विनेतुं शासितुम् । कया ?। निरुक्तौ वर्णने यो गर्वः तस्य च्छिदया लोपेन । किं कुर्वद् ओष्ठकण्ठम् ?। इमां दमयन्तीं भणद्[6] वर्णयत् । अस्याः [7]वर्णने बृहस्पतिरप्यशक्त इत्यर्थः । तथा भवं संसारं विहाय त्यक्त्वा[8] ये मुक्तिं गतास्तेषाम् अनुतापनाय स्मरस्य श्रमोऽयं कृतिरियम् । यथा तेषां[9] पश्चात्तापो भवति ।।१३२।।

आख्यातुमक्षिव्रजसर्वपीतां भैमीं तदेकाङ्गनिखातदृक्षु[1] ।
गाथासुधाश्लेषकलाविलासैरलं चकाराऽऽननचन्द्रमिन्द्रः ।।१३३।।

[2]आख्यातुमिति । इन्द्रो गाथा [3]काव्यान्येव सुधा तत्र [4]यः श्लेषः शब्दालङ्कारस्तस्य कलाया विलासैराननं चन्द्रम् अलंचकार । किं कर्तुम् ?। [5]तदेकाङ्गनिखातदृक्षु विलोकनपरेषु भैमीमाख्यातुं वर्णयितुम् । किं भूताम् ?। अक्षिव्रजैः सहस्रसङ्ख्यैः [6]सर्वामपि पीताम् । [7]निखातचक्षुरिति पाठे, किं भूत इन्द्रः ?। तस्या एकस्मिन् केवले अङ्गे वपुष्येव निखातानि चक्षूंषि येन स तथा । अथ चन्द्रः सुधाया आश्लेषेण [8]कलानां विलासैश्चालङ्क्रियते ।।१३३।।

स्मितेन गौरी हरिणी दृशेयं वीणावती सुस्वरकण्ठभासा ।
हेमैव कायप्रभयाऽङ्गशेषैस्तन्वी[1] मतिं क्रामति मेनकाऽपि ।।१३४।।

[2]स्मितेनेति । इयं दमयन्ती स्मितेन गौरी [3]अप्सरोविशेषः । अथ च गौरी गौरवर्णा । दृशा हरिणी नामाऽप्सरोविशेषः । अथ च हरिणी मृगी । [4]सुस्वरकण्ठभासा कान्त्या वीणावती नाम[5] अप्सरोरत्नम् । अथ च वीणावती परिवादिनी युक्ता । [6]कायस्य प्रभया हेमा [7]अप्सरोविशेषः मता । श्रिया एव । अथ च हेम एव [8]सुवर्णमेवाऽङ्गशेषैर्मेनकाऽपि [9]तन्वी अप्सरःश्रेष्ठा मतिं क्रामति बुद्धिस्था भवति । अथ च काऽपि तन्वी मे [10]मतिं [11]न क्रामति न

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

स्पृहणीया। तन्वीमतिक्रामतीति पाठे अङ्गशेषैर्मेनका [12]नामाऽप्सरसां वराऽपि इमां किम् अतिक्रामति ?। अपि तु न। अथ च इमां तन्वीं मे मम काऽपि न अतिक्रामति। [14]मेनकेति छान्दसमपि[15] प्रायः कविभिः कथ्यते। तथा छान्दसत्वं वार्तिककार आह—नशिमन्योरलिट्येत्वं[16] [17]छन्दस्यमिपचोरपि। [18]व्यनशन्मेनका चाऽस्य व्येमानं लिडिपे चरन् (पा॰ VI. iv. 120)। श्लेषोऽतिशयोक्तिश्च :।१३४।।

इति स्तुवानः सविधे नलेन विलोकितः शङ्कितमानसेन।
व्याकृत्य मर्त्योचितमर्थमुक्तेराखण्डलस्तस्य नुनोद शङ्काम् ।।१३५।।

[1]इति स्तुवान इति। [2]आखण्डलस्तस्य नलस्य शङ्कां नुनोद। किं भूतः ?। इति पूर्वोक्तश्लोकेन सविधे [3]स्तुवानः सन् [4]नलेन विलोकितः। किं भूतेन ?। किमयमिन्द्र इति शङ्कितमानसेन। किं कृत्वा नुनोद ?। उक्तेः[5] स्मितेन गौरी[6](नै॰ X. 134)ति [6]श्लोकोक्ते-र्मर्त्यानामुचितमर्थं व्याकृत्य। इयं गौरवर्णा हरिणी मृगी [7]वीणायुक्त-कण्ठी इत्यादिकमर्थं व्याख्याय।[8] न [9]पुनरिन्द्रोचितमर्थमप्सरसो[10] वाचकशब्दानामर्थं[11] व्याख्यातवानिन्द्रः।[12] अनुप्रासः ।।१३५।।

स्वं नैषधादेशमहो विधाय कार्यस्य हेतोरपि नानलः सन्[1]।
किं स्थानिवद्भावमधत्त दुष्टं तादृक्कृतव्याकरणः पुनः सः ।।१३६।।

[2]स्वं नैषधादेशमिति। अहो इत्याश्चर्ये। स इन्द्रः स्वम् आत्मानं नैषधरूपम् आदेशं विधाय नापि[3] मनुष्यः पुरुषः नलः सन् किं स्थानिवद्भावं दुष्टम् अधत्त। इन्द्रवद्भावं दोषसंयुक्तमकरोत्। कस्मात् ?। नैषधादेशं कृत्वा इत्याहकार्यस्य दमयन्तीप्राप्तिलक्षणस्य हेतोरपि। तर्हि कथं[4] दुष्टत्वमित्याह। पुनस्तादृक् मर्त्योचितं कृतं गौरीहरिणीवीणावतीत्यादिशब्दानां व्याकरणं व्याकृतम्[5] अर्थंकरणं येन स तथा। येनेन्द्रोचितम् अप्सरोऽर्थानां [6]कथनं कृतम्। अतः स्थानिवद्भावो दुष्टः। अथ च यः पुनस्तादृक्कृतव्याकरणस्तादृक्कृतम् ऐन्द्रं व्याकरणं येन स कथं स्थानिवद्भावं दुष्टमधत्त। अत्र वैयाकरण-[नि]कायस्य विचारः ।।

स्थानिवदादेशोऽनल्विधौ (पा॰ I. i. 56) इति पाणिनिसूत्रम्। अस्यार्थः—[7]आदेशः भूरादेशः[8] स्थानिवद्भवति अस्तिवद्भवति। ततो

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

धातुकार्याणि प्रत्ययादीनि तस्मादपि क्रियन्ते। [9]एवम् अङ्गकृत्तद्धिताव्ययसुप्तिङ्पदादेशाः। यथा केन काभ्यां कैः इत्यत्र के आदेशे कृतेऽङ्गाश्रयात् [10]इनदीर्घत्वभिसः; ल्यबादेशे, ह्रस्वस्य पिति कृति तुगि (पा॰ VI. i. 71) ति तुका; दाधिकम् अद्यतनं, कृतद्धितसमासाश्चे (पा॰ I. ii. 46)ति प्रातिपदिकसंज्ञा; प्रस्तुत्येत्यत्राऽव्ययादि (पा॰ II. iv. 82)ति [12]सुब्लुक् वृक्षाय[13]; अकरोत् अकुरुताम् अकुरुतम्, सुप्तिऽन्तं पदमि(पा॰ I. iv. 14)ति पदसंज्ञा। ग्रामो वः स्वम्, पदस्ये (पा॰ VIII. i. 16)ति रुत्वम्; [14]स्थानिशब्देनाऽऽदेशः प्रकृतिभूत उच्यते। आदेशशब्देन विकृतिभूतः[15]। क्व स्थानिवत् ?। अनल्विधौ। अल्शब्देन वर्णास्तत्र[16] सङ्केत्यन्ते। न अल् अनल् तस्य विधिः कार्यं तत्र न[17] वर्णकार्ये कर्त्तव्ये। स्थानिवद्भावः यथा—[18]दिव् पथिन् तद् इत्यादेशेषु लोपो[19] न भवति। तथा ब्रुवो[20] धातोर्वच्यादेशे कृते स्थानिवद्भावेन ब्रूत्वे सत्यपि अल्। [21]अकार्यत्वात् वचेर्वकारस्य[22] सार्वधातुके सम्प्रसारणे उकारे कर्त्तव्ये [23]वर्णकार्यकर्त्तव्ये वर्णकार्यत्वात् स्थानिवद्भावो न भवति। ततश्चेन्द्रोऽपि स्वं नैषधादेशं [24]विधाय। नामर्त्योऽनलः [25]कार्यस्य हेतोः सन् विद्यमानः। किं स्थानिवद्भावं दुष्टम् अधत्तेति विचारः। तस्मान्मनुष्योचितं व्याकरणमयुक्तं कृतम्। अनल्विधित्वस्य सम्भवात्। अत एव कविना नानलः कार्यस्याऽपि [26]ना इति [27]मनुष्यवाचकः। अकारप्रश्लेषेण अनल[इ]त्यवर्णस्येति वाचकम्। कार्यस्येति [28]विधिवाचकान्येतानि पदानि कुर्वता पाणिनिव्याकरणस्य सूत्रार्थो व्यञ्जितः॥१३६॥

इयमियमधिरथ्यं याति नेपथ्यमञ्जु
विशति विशति वेदीमुर्वशी सेयमुर्व्याः।
इति जनजनितैः सानन्दनादैर्विजघ्ने
नलहृदि परभैमीवर्णनाकर्णनाप्तिः॥१३७॥

[1]इयमिति। इति जनैर्जनितैः सानन्दैर्नादैर्नलहृदि परेषां लोकानां यद्भैमीवर्णनं तस्याऽऽकर्णनस्य,[2] परा उत्कृष्टा या भैमीवर्णना तस्या वा आकर्णनस्याऽऽप्तिः [3]विजघ्ने न श्रुता। इयम् इयं नेपथ्यैर्मञ्जुर्दमयन्ती रथ्यामधिकृत्य याति। सेयम् उर्व्याः पृथिव्या उर्वशी अप्सरोविशेषः वेदीं स्वयंवरभूमिकां विशति विशति। सम्भ्रमो

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

यावद्बोधमिति द्विर्वचनम् । [4]आनन्दाङ्कः । [5]मालिनीवृत्तम् । अनुप्रासो जातिर्भावोदयश्च ॥१३७॥

[1]श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
तर्केष्वप्यसमश्रमस्य दशमस्तस्य व्यरंसीन्महा—
काव्ये चारुणि [2]नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥१३८॥[3]

श्रीहर्षमिति । तस्य कवेरस्मिन्निषधेश्वरचरिते [5]महाकाव्ये दशमः सर्गो व्यरसीत् । किं भूतस्य ?। न केवलं [6]काव्येषु किन्तु तर्केषु [7]ग्रन्थेषु अपि असमो[8] निरुपमः श्रमोऽभ्यासो यस्य तस्य तथा ॥१३८॥

श्रीमानालिगपण्डितः स्वसमयाविर्भूतसर्वाश्रम—
श्चाण्डूपण्डितसंज्ञितं प्रसुषुवे श्रीगौरिदेवी च यम् ।
मत्वा व्याकरणं कुमारविश्रुतं श्रीमन्महादेवतः
काव्यस्यास्य स नैषधस्य दशमे सर्गेऽत्र टीकां व्यधात् ॥१३९॥

इति[1] महापण्डितश्रीचाण्डूविरचितायां[2] नैषधदीपिकायां टीकायां [3]स्वयंवराडम्बरो नामः दशमः सर्गः ॥१०॥[4]

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

टिप्पण

सर्ग—१०

1 P1 om. पूर्वसर्गे....क्व सति ?। [दिश्यै] दि°····X.4. 2 B om. कविर्दंशमं 1 P2 text °राजः 2 P2 रथैरिति । 3 B पथै: 4 P2 ग्रयुः जग्मुः 5 P2 add. ग्रापुरिति वा व्याख्येयम् । ग्रापुरिति पाठे ग्राप्तवन्त इत्यर्थः 6 P2 काम°— ॥१॥

1 P2 नाभूदिति । 2 B P2 om. राज्ञां; edr. add. राज्ञां 3 B P2 व्रजे वा 4 P2 राज्ञां 5 B P2 व्रजति सति 6 P2 नाम 7 B यथा 8 B P2 om. कणो; edr. add. कणो 9 B P2 om. नास्थात् न edr. add. नाऽस्थात् न ॥२॥

1 P2 text ग्रपरोद्धु° 2 P2 text स्वमात्रशेषा ककुभो वभूवुः । 3 P2 योग्यैरिति । 4 B om. परिकर्तुं; P2 परिहर्तुं— ॥३॥

1 P1 लोकैरिति । 2 B वा 3 P2 ग्रर्तिः 4 B P2 om. दिश्यैः; edr. add. दिश्यैः 5 P1 inf. lin. mg. (sec. m.) द्विर्लिखितम् ॥४॥

1 P2 text सैन्यैस्तथा राजपथा वभूवुः । 2 P1 तलम्; P2 तलमिति । 3 B महा°; P1 °महेन्द्रो 4 B °वायि 5 P2 एयुः 6 P1 राज 7 P2 om. सैन्यै ··· ·· पाठान्तरम् ॥५॥

1 P2 °पदाभिषेकं लब्ध्वा 2 B P1P2 कश्चित्; edr. कश्चन 3 P1 add. ग्रकृतार्थम् 4 B तत्पथो; P2 तत्पादं 5 P2 °पदे 6 B P1P2 om. प्रतिबद्धवर्त्मा; edr. add. प्रतिबद्धवर्त्मा 7 P2 om. पुरः स्थैः···· पाठान्तरम् । 8 B om. no. 6.— ॥६॥

1 P2 text °पूर्वी 2 P1 राज्ञाम् ।; P2 om. राज्ञां पथीति । 3 P2 om. °स्य 4 P2 om. राज्ञां 5 P1 om. °भाग° 6 P1 om.

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

आह्वान° 7 P2 अतिसंहननतया 8 B P1P2 ष्ट्यै स्त्यै 9 P2 om. संयोगादे°····स्त्रीत्वम् 10 B P1P2 हृह 11 B 6.— ॥७॥

1 P1 प्राग्भूय ।; P2 प्रागिति । 2 P2 गमनशीलं यत् 3 P2 om. राज्ञां 4 P2 om. समासा°····तदा 5 P2 सकलं 6 B श्वेतो twice 7 P2 °स्वर° 8 P1 om. विसर्गः 9 P2 om. अपि 10 P2 °मश्वनागः 11 P1 om. अनु° 12 P1 तत्रा°— ॥८॥

1 P1 आगच्छ । 2 B P1 वा 3 B P2 om. दशा 4 P1 om. अवस्था 5 B P2 आगच्छतो— ॥९॥

1 P2 text कृशानुः पाशीतिनाथैः ककुभां चतुर्भिः । 2 P2 दिग्महे° 3 P2 वद्धा° 4 P2 om. अथवा·········°तीत्यर्थः । 5 B P1 धारयतीति 6 B om. शिखावान्; P1 शिखायां 7 B P2 ययौ— ॥१०॥

1 P2 text विशति 2 P2 मन्त्रैः पुरमिति । 3 P2 रक्ष 4 P2 om. विशति 5 P2 तत्र— ॥११॥

1 P2 कतुं शशाकेति । 2 B तत्र 3 B °वहो 4 P2 यतः 5 P2 om. मृगं 6 P2 om. किं भूतः....स तथा 7 P1 नागतः ॥१२॥

1 P2 जातौ न चित्तो इति । 2 P1 स्वः 3 P2 om. स 4 P1 om. चित्तो····केवले प्रवणः । 5 P2 शौर्यदया° 6 B °दिकः— ॥१३॥

1 P2 text स्म 2 P2 text गिरिजात्मभर्तुः । तेनाऽव्रजन्त्या 3 P1 om. विसर्गः 4 P2 om. गिरिजात्मभर्तुरिति 5 P1 अयान्त्या 6 P2 om. यानाय 7 P1P2 न गच्छति ॥१४॥

1 B P1 नाम 2 B सर्वे 3 P2 om. निवेश्य····कस्मिन् भारं 4 P2 om. दिशः पतिः 5 P2 om. °स्य 6 P2 om. मही°····पाठान्तरम् ॥१५॥

1 P2 text ययौ विमृश्योर्ध्वदिशः पतिर्न स्वयंवरं वीक्षितधर्मशास्त्रः । व्यलोकि लोके श्रुतिपु 2 P2 स्वयं विमृश्येति । 3 P2 प्रास्थितः 4 P2 om. सम°....°त्यात्मनेपदम् । 5 P1 om. इति—॥१६॥

1 P2 text भैमीनिरस्तं स्वमवेत्य दूतीमुखात्किलेन्द्रप्रमुखा 2 P2 भैमीति । 3 B भीमजाया 4 P2 om. निरस्तमिति....पाठान्तरम् । 5 B P1 मनो 6 B मदं 7 B P1 दूती° 8 P2 किलेति 9 P2 om. च 10 P2 om. पशु°····समाजः ॥१७॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P2 text भजेत 2 P2 add. विसर्गः— ॥१८॥

1 P2 text दृष्टेन पृष्टेन 2 B किल 3 P1 किं twice 4 P2 om. इति....°न्यासः । 5 P1 द्वितः 6 P2 om. अनुप्रासो°....हेतुरपि ॥१६॥

1 P1 पूर्णेन्दुम् । 2 P2 पुनः once 3 P2 आस्यं पूर्णेन्दुं 4 B P1P2 om. विदधुः; edr. add. विदधुः 5 P2 कर्मणि दृशिविदोः साकल्ये (पा° III. iv. 29) इति णमुल् । 6 P2 om. अनुप्रासो........°शयोक्तिश्च ॥२०॥

1 P1 तेषाम् । 2 P1 बहि° 3 P2 ते 4 P2 om. कर्तृ° 5 P1 °रुक्त° 6 P1 om. न 7 P1P2 नलाननसम्व° 8 B °वले 9 B राननो— ॥२१॥

1 P2 text क्वथि° 2 P2 text क्ष्मातालृवेन....कल्पयन्ति स्म 3 P1 प्रिया 4 B ऐडात् 5 P2 तस्मात् 6 P2 °ग्रहणे 7 P2 om. क्ष्माता°........पाठान्तरम् । 8 P2 om. उक्तविशेषण°....°निर्मितं 9 B P1P2 °रादि°; edr. °लादि°— ॥२२॥

1 P2 text °माख्यत् 2 P1 नलस्य 3 B °यन्त्यर्थे 4 P2 भूपात् 5 B add. विसर्गः 6 B इतरं 7 P1 विशेषं भेदं— ॥२३॥

1 P2 text देव° 2 P1 सभा । 3 P2 add. किं भूतैः ?। 4 P1 om. श्रियः 5 P1 आशो° 6 P1 पारिजातके 7 B प्राघुणिके 8 P2 °रत्नदिव्यैः 9 P2 सश्रीको 10 P2 om. अनुप्रास उपमा च ॥२४॥

1 P2 text °भूषा° 2 P1 तत्र । P2 तत्राऽऽगादिति । 3 B °रगमत् 5 P2 भस्मन 5 P2 om. ईश°....°गच्छदित्यर्थः । 6 B °देवद°; 7 P2 °जीविनो 8 P2 om. स 9 B सेव्य° 10 P1 °पदघुमास्यनिहन्तिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिपु चेति 11 B पत्वम् 12 P2 om. अनुप्रासः ॥२५॥

1 P1 द्विपां । 2 P2 om. मनुष्या°....प्रचारगोचरतया 3 P2 om. भूमे° 4 B कूलस्य 5 P2 लीनान् आ° 6 P2 om. स्मरेषु 7 B मूल° 8 P2 om. अन्यस्य....प्रासोऽपि ॥२६॥

1 P2 text रम्येषु हर्म्येषु निवेशनेन सपर्यया कुण्डिननाकनाथः । 2 P1 सपर्य । 3 P2 add. इन्द्रः 4 P2 om. प्रशस्तेषु 5 B तस्मात्

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

6 P2 om. ताभिः····पाठान्तरम् 7 P2 °द्वितीययोः 8 P2 om. अनुप्रासः समुच्चयश्च ।।२७।।

1 P2 text औदार्यदाक्षिण्यदयादमानां 2 P1 चतु । 3 P2 यत् 4 B P1 पत्रं; P2 यत्र तत्र चतुर्णां तथा aft. रक्षति 5 P2 om. तथा 6 P2 om. चतुष्टये 7 B सह° 8 B कीर्ते 9 P2 om. अन्तःपुर°........ °न्यासश्च 10 P1 साधर्म्येण— ।।२८।।

1 P1 अभ्या । 2 B P1 अनु° 3 B P1 तस्य 4 B अन्यतो° 5 P2 om. मीम°····चातिशयोक्तिः ।।२९।।

1 P1 अङ्के । 2 P2 ममौ 3 P2 om. अनेन····°धिकं च ।।३०।।

1 P2 text नमोऽपि 2 P1 पुरे । 3 B उच्छव° 4 P1 विचित्री° 5 B P1 येषां ते 6 P1 नमः पुनर्न; P2 om. नभंयु न नभस्तु 7 P2 om. इति....मापि 8 B सप्तम्यन्तं व्यस्तं 9 P2 om. द्वार°····अतिशयोक्तिः ।।३१।।

1 P2 text यथासीत् 2 P2 text अज्ञासिषुः स्त्रीशिशुबालिशास्तं यथागतं नायकमेव कश्चित् । 3 P1 विलास । 4 P2 नायकमेव····°दिति पाठः here. 5 B P1P2 om. विभूषणानाम्; edr. add. विभूमणानाम् 6 P1 अभूत् आसीत्; P2 om. अभूत् 7 B तेन 8 P1 अन्या°; P2 आज्ञा°— ।।३२।।

1 P2 text अस्वेदगात्रा°·········मिदां न भेजुः । 2 P1 न स्वेदिनः । 3 P2 न here 4 P2 add. हि 5 P2 om. न 6 B P1P2 om. स्वेदिनः; edr. add. स्वेदिनः 7 P1P2 पदार्थेः 8 P2 om. ग्लानाः 9 B भ्रजो 10 P2 om. देवादिति····हेतुरपि ।।३३।।

1 P1 अन्योन्य । 2 P2 om. नरेषु मनुष्येषु 3 B P2 om. न 4 P2 om. संस्कृत्रिमाभिः 5 P2 om. व्यवहारं कुर्वत्सु 6 B मनुष्याणां 7 P2 om. अतिशयो°····अनुप्रासश्च ।।३४।।

1 P1 ते तत्र ।; P2 ते तत्र भैभ्या इति । 2 B °चित्र° 3 P2 om. वात्स्यायनोक्तानां 4 P2 om. अन्यस्तु····पठित्वा 5 B P1 incomplete verse. ।।३५।।

1 B P1 om. सा·········°गताऽपि 2 P2 ददौ 3 P2 om. अथवा ·········पूरयति स्म 4 B P1 लोभं 5 P2 चा° 6 P2 om. इति 7 P2 om. अनुप्रासश्च ।। 8 P1 35.— ।।३६।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 B P1 वैदर्भ ।; P2 वैदर्भेति— ॥३७॥

1 P1 सो शोभा 2 P2 बुधानां— ॥३८॥

1 P1 धृताङ्ग । 2 B P2 add. विसर्गः 3 P1 कल्पिता— ॥३९॥

1 P2 text दगन्ताः 2 B द्राग् । P1 द्राक् । 3 P2 om. अमुष्मिन् 4 P2 add. तु 5 P2 विषमिति 6 P2 om. अन्ताः 7 B अहस° 8 P2 om. दन्त·········पर्थायोऽपि ॥४०॥

1 P1 सुधांशुः । 2 P1 P2 बभस्तुं: निनिन्दुः 3 P2 मदनः 4 P2 तथाऽसो 5 P2 om. प्रथम°········व्याजस्तुतिरपि । 6 P1 गौरवेन— ॥४१॥

1 P2 text °तासाविति 2 B P1 आद्यम् । 3 B द्वितयी°; P1 द्विताया° 4 B P1 तृतीया 5 P2 om. किल·············°स्तुतिः । 6 B पाठे— ॥४२॥

1 P2 text इहेदशाः·············°वली तैः । 2 P2 text °स्पर्द्धितया 3 P1 माया । 4 B समाः 5 P2 नलः 6 P1 स्वैः 7 P2 om. इत्थं 8 P2 मात्सर्याणां 9 P2 °तया 10 P2 om. नलत्वेन 11 P2 om. अथवा·········°न्यासश्च ॥ 12 B आत्मो° 13 B अने मया— ॥४३॥

1 P1 गुणेन । 2 P2 °दोषोक्ति° 3 P2 तस्य रूपेण 4 P2 om. अनवद्य°··· ····°न्यासः ॥४४॥

1 P2 om. no. 45. 2 P2 मिथ्यानलेति । 3 P2 om. अवदत् 4 P2 नलस्य 5 P1 °भूमौ 6 P1 अश्विभ्यां; P2 om. अश्विनीभ्यां 7 P2 किमु इति 8 P2 om. अनुप्रासः ॥४५॥

1 P2 text तमाहुः स्म यदत्र 2 B P1 अमी । 3 P2 om. विसर्गः 4 P2 पृथ्व्यां 5 P1 कन्दर्पा न 6 P2 om. न 7 P1 अस— — 8 P1 न न 9 P2 om. वक्रोक्तिः ॥४६॥

1 B P1 तेभ्यः । 2 P2 add. अपि 3 P1 °दर्पका—भ्यः 4 B °भावेयस्य 5 P2 °कृतः 6 P1 तां— — 7 P2 om. असौ·········बहुषु 8 P1 अ— — 9 P2 om. असौ— ॥४७॥

1 P2 text °गत्याश्रित° 2 P1 असाम ।; P2 असाम यदिति । 3 B भवा°; P2 om. तव 4 P2 तव रूपं 5 P2 om. प्राप्य·········नाम

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

6 B P1P2 अस्तु; ori. अस 7 P2 °स्माकं; and changes the order as नोऽस्माकं·········धिक् ।; इदम्·········अस्तु ।; अथ च नोऽस्मान् ·········धिक् ।; अथ आशा इच्छा·········धिक् । 8 P2 om. इच्छा 9 B इह 10 P1 om. अस्तु ॥४८॥

1 P1 अस्तु । last word of X. 48 2 P1 अवज्ञाय° 3 P1 एनं 4 P2 add. प्रति— ॥४९॥

1 P2 यः स्पर्द्धयेति । 2 P2 हेलां 3 P2 युक्तार्थ° 4 P1 स्थानेऽवज्ञा; P2 om. स्थाने— ॥५०॥

1 P2 गीर्देवतेति । 2 P1— —; P2 om. तदा 3 P2 om. हर्षेण 4 P1 गीर्देव— — 5 P1 कीर्तिः प्रशस्तिः; P2 om. कीर्तिः 6 P1 — —ता 7 P1 °वर्ण·········मेघ° 8 P2 om. सामान्यो°·········उपमा च ॥५१॥

1 P1 — — 2 P2 om. सदः 3 P1 ददृक्षुः 4 P2 शिरः° 5 P2 add. यत् 6 B P1 तथा 7 P2 om. अत्र ·········यथासङ्ख्यं च । 8 P1 एकेन (X. 53) here.— ॥५२॥

1 P2 एकेनेति । 2 P2 तैः ⁝आलोकत here. 3 P2 om. परेण 4 B पुरा° 5 P2 om. लोकानां वा 6 P2 om. दिश 7 P2 om. अनुप्रासो यथासङ्ख्यं च ॥५३॥

1 P2 text दृष्ट्वा 2 B P1 प्रद । 3 B P1 महीन्द्रा° 4 P2 दृष्टा— ॥५४॥

1 B P1 आलोक । 2 P2 om. विसर्गः 3 P2 om. नरलोकस्येति पाठान्तरम् । 4 P2 om. विसर्गः— ॥५५॥

1 P2 om. आप्तशोभा 2 P2 किं here 3 P2 om. अलक्षी°····वीक्षिता । 4 B नवीकृता ॥५६॥

1 B P1 वाल्मीकिः । 2 P1 देवीं दैवी; P2 om. दैवी 3 P2 om. पद्यरूपा 4 P1 om. द्राक् शीघ्रम् 5 B P1 om. पथेन 6 P1 om. या 7 P2 न 8 P1 मुखेन 9 B सुख°; P2 om. मुख°····श्लेषश्च ॥५७॥

1 P2 प्राशंसीति । 2 P2 चार्वाकता नास्तिकता तया कृत्वा सर्वान् विदूषयतीति चार्वाकतासर्वविदूषकस्तेन । 3 P2 om. गुरुणा····अहं 4 P2 add. जिह्वां 5 B जानाति 6 P2 om. अनुप्रासो····विरोधोऽपि ॥५८॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P2 नाकेऽपीति । 2 P2 om. वक्ष्यमाणे 3 B P1 किं भूतौ ?। 4 B योऽनाकेऽपि 5 P2 add. कविः 6 P2 om. तत्तथा । यत्र सर्वैरपि 7 P2 add. तत्राऽपि 8 P2 om. अनुप्रासोऽतिशयोक्तिः ।।५६।।

1 B P1 तदेव····दर्शयति aft. अमेलयदिति ।; P2 om. तदेव········ दर्शयति । 2 P2 text. °न्न: 3 P1 आमल । 4 B P1 हृता 5 P2 add. न 6 P1 स्वल्पस्य 7 P2 om. अथवा········सर्वस्व° 8 P2 om. सह 9 P1 om. नो°; P2 om. नो°····रुत्प्रेक्षा च ।। 10 P1 om. अपि 11 B द्वितया— ।।६०।।

1 P2 text °र्यत् 2 P2 एकाकीति । 3 P2 प्रापत् 4 B P1 च 5 P2 स्मरः 6 P2 om विसर्गः 7 B °मनैनै° 8 P2 om. इति········ उत्प्रेक्षा च ।।६१।।

1 B P1 पूर्णेन्दु । 2 B शल्पी 3 B विरमात् 4 P2 om. एकशिल्पीति पाठान्तरम् । 5 °शल्पीति— ।।६२।।

1 B सुधा ।; P1 मुधा । 2 P1 om. विसर्गः 3 P2 परमात्मना 4 P2 om. सति 5 B अन्या° 6 P2 om. ज्ञानान्तरं— ।।६३।।

1 B P1 प्रवेक्ष्य । 2 B शिक्षतः ।; P1 शिष्यतः ।।६४।।

1 P2 स्थितैरियद्भिरिति । 2 P2 om. युवभिः 3 B पूर्वस्य 4 BP2 शेपस्य 5 P2 om. तथा····श्लेषोऽपि ।।६५।।

1 B P1 इति । 2 P2 °र्णाणा° 3 P2 om. हुङ्कृतिपरिपाटीभिः हुङ्कार° 4 P2 om. सप्तभिः कुलकम् ।।६६।।

1 B P1 न्यवी । 2 P2 om. °सिंहान् 3 P2 om. उपमितं········ तु न्याय्या । 4 B तुल्या 5 P2 om. कैरिव ?। ····त्रिदशैरिव । 6 P2 add. त्रिदशैः 7 P2 उपमा वा; and om. अनु°········वा । 8 B °प्रासो— ।।६७।।

1 P1 विच्यन्त्य । 2 B P1 दूतान् 3 P2 नृपान् 4 P2 add. नृपाः 5 P2 om. भुवना°········पाठान्तरम् । 6 P2 om. अन्यथैव°········ हेतुश्च ।।६८।।

1 B P1 श्रद्धालु । 2 P2 om. कुलदेवतायाः 3 P2 om. अनुप्रासो रूपकं च ।।६९।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P1 तच्चिन्तना । 2 P2 add. च 3 B °रभ्रेत्यादिना 4 P2 om. अनुप्रासः ॥७०॥

1 B P1 कुलं च । 2 P2 om. राज्ञां 3 P1 °विधे° 4 P2 नृपाणां 5 P2 om. एषां 6 P1 add. मूकीभवितुं 7 P2 om. अनुप्रासः········ उपमा च ॥७१॥

1 P2 text °तैषा 2 B P1 जगत्त्र । 3 P2 om. न 4 P1 न च 5 P2 add. च 6 B °मुखः नि; P1 वा मुखा° 7 P1 °वा विलासान्; P2 °वचो 8 B P1 आश्रावय 9 P2 om. अनु°····ह्यु तिश्च ॥७२॥

1 P2 text °दरणी 2 P2 इतीरितेति । 3 P2 om. इति 4 P2 om. षरागं 5 P2 om. आज्ञया 6 B P1 आज्ञया 7 P2 om. प्रोज्झितं 8 P2 om. पर्यायः सहोक्तिश्च ॥७३॥

1 B P1 मध्ये । 2 P2 नाग° 3 P2 om. एवंविधः 4 P2 om. सा 5 P1 om. साहित्य°·······सा तथा 6 P2 om. अनुप्रासोऽतिशयोक्तिश्च ॥७४॥

1 P2 text °रोमरेखा 2 B P1 आसी । 3 B P1P2 निर्गत्य; edr. विनिर्गत्य 4 P1 वहलश्च 5 P2 तथाविधा न 6 P2 °प्रकारस्य 7 P2 om. पर°····वचनस्यो° 8 P2 om. अनुप्रासो····श्लेषश्च ॥७५॥

1 P2 शिक्षैवेति । 2 P1 om. साक्षात् 3 P2 om. आत्मा······· °निर्वचनपरं 4 B P2 सामर्थ्या° P1 समर्था° 5 B add. च 6 P2 °विधिः 7 P2 om. सम्यग°....°मास आधाना° 8 P2 आधानः 9 P1 °कला° 10 P2 om. °प्रतिपादक° 11 P2 तथा 12 P2 om. सा 13 P2 तथा 14 P2 om. पर्यणंसीत्····°शयोक्तिश्च । 15 B तथाऽन्योयो°— ॥७६॥

1 B P1 जात्या । 2 P2 om. इयता°·········°ज्ञानार्थं 3 P1 लः 4 P1 सम् 5 P2 om. भिद्यमानं 6 B °रूपा° 7 P2 om. उपेन्द्रवज्रा 8 P1P2 विशिष्टम् 9 P2 om. विसर्गः 10 B P1 om. सुष्ठु 11 B तत्र 12 P1 सुविमध्य°; P2 om. सुचिह्नं·······अतिशयोक्तिः ॥७७॥

1 B P1 असं । 2 P2 असंशयं निश्चितं at the end. 3 P2 om. विभक्त्या°····परिज्ञानार्थेन 4 B भूया; P2 भृता 5 P2 om. कृतप्रत्ययानां 6 P1 कृत° 7 P2 om. अनुप्रासः श्लेषश्च ॥७८॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P2 text यद्° 2 B P1 स्थितैव । 3 B P1P2 शङ्के; edr. विशङ्के; P2 अहमेवं शङ्के bef. हारलता 4 P2 om. श्रुति°........ वेदाङ्गविद्या 5 P2 om. नक्षत्राणां 6 P2 स 7 P2 येषां 8 P2 om. अङ्गमङ्गमध्ये 9 P1P2 ज्योतिषे 10 P2 °भागाहारौ 11 P2 हर° 12 P2 om. उद्गतं 13 P1 वृतं मौक्तिकानां 14 P2 om. उत्प्रेक्षा श्लेषश्च ।।७९।।

1 B P1 अवैमि । 2 P2 om. अहमवैमि 3 P2 om. पूर्वपक्ष° ....प्रतिपक्ष° 4 B सञ्जाता 5 P2 °परिग्रहे 6 P2 om. अनुप्रासः श्लेषश्च ।।८०।।

1 B P1 ब्रह्मा । 2 P2 परणो° 3 P2 om. विसर्गः 4 P2 om. °पर 5 P2 add. च 6 P2 °मार्गः नपरो 7 B वेदं 8 P2 om. अनुप्रासः श्लेषश्च ।।८१।।

1 B P1 उद्देश । 2 P1 °श्रेणीं 3 P1 मौक्तिकां 4 P2 om. आकलितां 5 P2 add. नव 6 B °अवयवि° 7 P2 om. उत्प्रेक्षा श्लेषश्च ।।८२।।

1 P2 text विना° 2 P2 text गुणि° 3 B P1 तर्का । 4 B तर्काः 5 P1 add. दातु 6 P2 om. अनु°........ श्लेषश्च ।।८३।।

1 P2 °पुराणे 2 P2 om. यस्याः 3 B P1P2 °युगं 4 P1P2 om. च 5 B P1 add. विसर्गः 6 P2 om. रूपकं श्लेषश्च ।।८४।।

1 P2 text °शाली 2 B P1 आकल्प । 3 P2 om. मस्तकं 4 P2 om. वृत्तो 5 P2 om. ब्रह्म° 6 P2 श्रोतस्य 7 B तत्रा° 8 P2 om. वृत्तो........श्लेषश्च ।।८५।।

1 P1 भ्रुवो; P2 भ्रुवाविति । 2 P1 add. सम्मानि[त]वान् 3 P2 ललाटे 4 P2 om. प्रणिन्ये 5 P2 अस्य 6 P2 क्रियाफलस्य........ °पदम् here. 7 P2 वीणया 8 P2 वादार्थं 9 P2 om. अकत्रंभि° ....°योगिता च ।। 10 P1 सम्मान° 11 P1 सम्मानितोत्सञ्जिते° 12 P1 सम्मानितम्— ।।८६।।

1 B P1 द्विकुण्डली । 2 P2 ये 3 B P1 add. या 4 B P1P2 om. तस्याः; edr. add. तस्याः 5 P1 भिषीणां 6 P2 निर्मितः 7 P1 यइ 8 P2 om. तुल्ययोगिताऽतिशयोक्तिश्च ।।८७।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P2 text वा 2 B P1 या सोम। 3 P1 कापालिकं 4 P2 om. विसर्गः 5 P2 om. विसर्गः 6 B P1 सर्वथाऽन्यं 7 P2 om. मनो 8 P2 साकारका 9 P2 °नमि 10 P2 शास्त्रमयं शरीरं 11 P2 om. उत्प्रेक्षा ॥८८॥

1 B P1 भीम। 2 P2 om. पूर्वेण······कश्चित्। 3 P2 add. तव 4 B तस्मात्; P2 तत् 5 P2 om. विचित्रं 6 P2 °यनीये 7 P2 om. अनुप्रासः ॥८९॥

1 P2 विन्दत्यसव्ये इति। 2 B यस्य 3 P2 om अस्मि 4 P2 om. तस्याः 5 B P1 वशंगता 6 B °पि 7 P2 om. अस्मि········ उदात्तं च ॥९०॥

1 B P1 तत्काल। 2 P2 om. विसर्गः 3 B सपर्याम् उचितां 4 B भूताम् 5 P2 मात्रि 6 P1 दक्षण° 7 P2 °चक्षुः° 8 P2 शेषेण 9 P1 ·····················नी ॥९१॥

1 B P1 दिगन्त। 2 P2 क्षितीशः स 3 B P1 om. °महा° 4 B P1P2 कुतू°; edr. कौतू° 5 P2 om. °ष्ट्रो° 6 B °वाद° 7 P2 षोडशभिः कुलकम् (X. 93) here.— ॥९२॥

1 B P1 दासीषु। 2 P2 om. राज°·······सम्बन्धः 3 P2 भूतासु; and किं भूतां·······स्फीतम् aft. कुर्वन्तीम् 4 P2 om. दासीषु··· ····°त्पन्नं 5 P2 अग्रे 6 B उपपन्नं 7 P2 om. अथ 8 P2 om. स्वस्यावयवेषु 9 P1 रूपो 10 P2 अद्भुतस्याऽब्धिम् अवलोककानाम् 11 P1 कुर्वंती 12 P2 om. रूपकं········शयोक्तिश्च ॥९३॥

1 B P1 स्निग्धत्व। 2 P2 लेप° 3 B °मृजांशुद्धि° 4 B °मत्ति; P1 °मन्नि; P2 °ममि; edr. °मन्ने 5 B P1 सम°; P2 om. सच्छायं 6 P2 om. इव 7 P2 om. अनुप्रासो·······°शयोक्तिश्च ॥९४॥

1 B P1 विलेपना। 2 B भ्रमणोरगेन 3 P2 om. रूपकमुत्प्रेक्षा च ॥९५॥

1 B P1 विरोधि। 2 P2 भासा 3 P2 परस्पर° 4 P2 °माणम् 5 B वसिते 6 P1 वालिते— ॥९६॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 B P1 सामादे । 2 P2 om. तथा...... पङ्क्तिर्यस्यास्तां 3 P2 om. मुख्यार्थ°...... सम्बन्धात् 4 P1 बाधितयोग 5 P2 °शब्दाः 6 P2 om. °लक्ष्मीमिव...... नूत° 7 P1 °लक्ष° 8 P2 om. स्थिता 9 P2 चन्दनस्य कुला— ॥९७॥

1 B P1 पीता । 2 P2 om. विसर्गः 3 B P1 विलेपनात् 4 B P1 किं भूतां 5 P2 om. शुभ्रा 6 P2 om. °राग° 7 P2 क्लृप्ताः 8 P2 om. अनुप्रासो यथासङ्ख्यं च ॥९८॥

1 B P1 स्मरम् । 2 P2 om. शरासनेन 3 B जाता° 4 P1 add. न 5 P1 add. अतिशयोक्तिः ।; P2 add. इत्युकञ् ॥९९॥

1 B P1 विभू । 2 P1 धात्री 3 P1 हतो° 4 B P1 अवकाशात् 5 B °नकाशाम् 6 P2 om. अपि 7 P1 स्यव° 8 P2 वस्त्रैः 9 P2 तदनु — ॥१००॥

1 B P1 प्राक्पुष्प ।; P2 प्राक्पुष्पेति । 2 B P1 भ्रमरीणां 3 B विलि° 4 B महास्थितस्य— ॥१०१॥

1 B P1 एतद्वरं स्यादित्यादि ।; P2 एतदित्ति । 2 P2 नेत्रान्तात् 3 P2 °रश्मीन् 4 B सुखाय 5 P2 मनोरथं— ॥१०२॥

1 B P1 स्मितेच्छुदं । 2 B P1 मुदं 3 P2 om. किं भूतां...... रदानां; and add. कैः ?। हास्याभिलाषिणां 4 P1P2 स्मितेच्छौ 5 P2 om. विसर्गः 6 P2 कौमुद्यः 7 B P1 एत एव 8 P1 अंश° 9 P1 से 10 B P1 मुदं— ॥१०३॥

1 B P1 प्रत्यङ्ग ।; P2 प्रत्यङ्गेति । 2 B P1 स्फुरन्तो जाग्रतो 3 P2 मणयो नीला 4 P2 om. तैः 5 P2 पूर्णकान्ति नाभी° 6 P1P2 add एव 7 P1 °तनवमतम्; P2 °मतमवमतम् 8 B P1 पीरा°— ॥१०४॥

1 P1 तद्गौ । 2 P1 त्वम° 3 P2 om. हस्यः 4 P1 शोभाम् 5 B कम्पित°; P2 om. तदा यत्स्मितविस्मिता— ॥१०५॥

1 P2 तदङ्गेति । 2 P1 कुर्वतीम् 3 B P1 भूताम् 4 B अञ्जानां 5 P1P2 °वली° 6 B कुडिता° 7 P2 om. मागध°......प्रकृतः 8 P1 °विचारितो— ॥१०६॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P2 तारेति । 2 B रदनां 3 P2 om. मधूनि………………कर्म 4 B P1P2 द्विप्रत्यव°; edr. गतिबुद्धिप्रत्यव°— ॥१०७॥

1 B P1 अलं ॥ 2 P2 विसन्तीं 3 P2 om. प्रत्यक्षेण— ॥१०८॥

1 B P1 आसीद ।; P2 आसीदिति । 2 B विनिद्र° 3 B P1 दन्तुरितानि— ॥१०९॥

1 P2 अङ्गुष्ठेति । 2 B P1P2 सम्बोधने; edr. स्वयंवरे 3 P1 अन्त्याङ्गुली प्रदेशिनी 4 P1 भागेन च; P2 मध्यमभागेन 5 P2 चावलोक्य 6 P2 स्फोटिता 7 P2 अवनी° 8 P2 प्रापिकेन 9 P2 om. अङ्गुष्ठ°………पाठान्तरम् 10 B °मूर्ध्ना ॥११०॥

1 P2 text °पेक्षि° 2 P2 अस्मिन्निति । 3 P1 om. तां 4 B अञ्जना°— ॥१११॥

1 B P1 स्वयम् ।; P2 स्वयमिति । 2 P2 व्यभाव्य— ॥११२॥

1 B P1 रम्भादि ।; P2 रम्भादीति । 2 B वैषम्यं 3 P1 रुधिरमतित्वं 4 P1 भूता 5 P1 °लोलेन 6 P1 वैमित्य°— ॥११३॥

1 B P1 रूपम् ।; P2 रूपं यदेति । 2 P2 om. इति 3 B आजगाम; P2 अगमाम 4 P2 om. अद्यतने लुट् 5 B ततः 6 P2 om. अल्पम्— ॥११४॥

1 B P1 रसस्य ।; P2 रसस्येति । 2 P2 om. श्रीः 3 B लावण्यस्त— ॥११५॥

1 B P1 साक्षात् ।; 2 B °योन्मुखः 3 P2 om. दिवः………पाठे 4 P2 om. हि 5 P2 च 6 P2 वासयस्य 7 P1 °र्लक्ष° 8 P2 °वृत्तिय° 9 P1 वृत्तिः— ॥११६॥

1 P2 ताडङ्क° 2 P1 लक्षम् ।; P2 लक्ष्यमिति । 3 P1P2 ताडङ्क° 4 P1 कुण्डलके 5 B उभयत 6 P1P2 एव तयोः 7 P2 यान्तीति— ॥११७॥

1 P2 text °युधस्य 2 B P1 तनोति ।; P2 तनोतीति । 3 P2 om. सैषेति………सामानाधिकरण्यम् 4 P2 add. उत्प्रेक्ष्यते 5 P2 om. नीलो°………°शुगस्य 6 P2 om. इन्दीवर°………लक्ष्यात् 7 B श्रवती

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

8 P2 यत: 9 B P1 स तथा 10 P2 om. एवं 11 B P1 om. ख्यापयिता 12 P2 कथयिष्यति 13 P2 कर्णपूरो हि कर्णयोरुपरि भवतो, न तु मध्ये। अतः शरस्खलनं शशङ्के ।।११८।।

1 B P1 रज:। 2 P2 अद्य here. 3. P2 om. रजस:……… नूतनं 4 P1 कीदृक् 5 B दीयते 6 B °राध्रि° 7 P2 om. इहैकत्र……… भवति 8 P1 °विषयहीतां°— ।।११९।।

1 B P1 पद्मा। 2 P2 om. स्रष्टा 3 P2 om. तान्……… खञ्जरीटान् 4 B हिमन्ते 5 P2 add. हिमे सति हतान् पद्मान् क्वचित् क्षिप्नुः। तथा प्रावृषि सारमादाय खञ्जरीटान् क्वाऽपि निक्षिपति। न लोकाव्यय निष्ठाखलर्थतृनामि(पा° II. iii. 69)ति सूत्रात्। कौमारे च नुप्रत्ययस्य उदन्तत्वे निष्ठादिपाठात् कर्मषष्ठ्या अभावः। 6 P2 add. गृहीतेन 7 P2 add ब्रह्मा 8 P2 om. प्रतिवत्सरं 9 P2 om. अत……… लक्ष्यते ।।१२०।।

1 B P1 om. एतदिति। 2 P2 धर्मा 3 P2 add. अस्मिन् 4 P2 om. एव 5 P2 add. च 6 B P1 मध्य° 7 P2 °गंत° 8 P2 मध्यस्थतां सभ्यत्वम् अकृत; and om. अचतुर°… …अच् 9 B P1 इति किम्?। 10 P2 om. दमयन्त्या 11 B अनुरूपैः; P1 om. अम्बुरुहैः 12 P2 महत् 13 P2 om. व्यतिरेकं 14 P2 भृङ्गश्च— ।।१२१।।

1 B P1 व्यधत्त। P2 व्यधत्तेति। 2 B P1 om. कर्तृं 3 P1 संधे 4 P1 द्विरिति 5 P2 वासभाजोः 6 P2 om. एवं शीलयोः 7 P2 अग्रे तो 8 P1 पृथो 9 B om. °नात्………किं तस्य (X. 123)— ।।१२२।।

1 P1 अस्या। 2 P2 om. बिसस्य 3 B P1 करौ 4 B om. अगृह्यत दण्डो 5 B P1 स्पृह 6 B P1 गृहाः पुमांसो; P2 om. गृहाः… भूम्न्येव 7 P1 भूम्नेव— ।।१२३।।

1 B P1 छद्मैव। 2 B शिबिन्याः 3 P2 add. हि 4 P2 om. पद्मं 5 B P1 यतो 6 B P1 °शखं°— ।।१२४।।

1 B P1 जागर्ति। 2 B श्रुति 3 P1 उप° 4 B P1 om. न; P2 °स्ति नेत्याह 5 B add. विसर्गः 6 B P2 om. इति……… °लम्भनं न 7 P2 om. पाताले 8 P2 om. किं 9 B °गच्छेतुः B 10 P1 om. इति 11 B काक्षिशत्वेन 12 P2 वा— ।।१२५ ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 B P1 नमः । P2 नमः करेभ्य इति । 2 B °स्ये 3 P2 इदं दमयन्तीलक्षणं 4 P2 om. चिपिटं वा 5 B om. अनुरूपं 6 B अनुप्रास-नमति°; P2 om. अनु……°शयोक्तिः ।।१२६।।

1 B P1 इमाम् । 2 P1 यच्च; P2 om. यत्र……°शयोक्तिश्च । 3 P1 सृजन्ति— ।।१२७।।

1 P2 text श्रोणी किमेषा 2 B P1 उल्लास्य । 3 P2 इयं किं 4 P2 °प्रदेशे 5 P1 add. च तस्य— ।।१२८।।

1 P2 text °मेनां 2 B निजा । P1 om. निजामृतेति । 3 B मुख्यम् 4 B om. उद्यत् 5 B om. तस्मा°……नवनीतं 6 P2 om. तथा— ।।१२९।।

1 B P1 अस्या । 2 P1 om. स 3 P2 मनोज्ञो 4 P2 add. ततः— ।।१३०।।

1 P2 text विधाता 2 B P1 कृति । 3 B P1P2 om. हि; edr. add. हि 4 P2 om. यतो 5 B निजी° 6 P1 विसृष्टं 7 B युज्यते ।।१३१।।

1 P2 text स्मरस्यैव 2 B गुरो । P1 गुरौ । 3 P2 om. एष…… पाठे 4 P1 कृतिः श्रमः; P2 om. श्रमः 5 B ओष्ठकण्ठम् 6 P1P2 भणन् वर्णयन् 7 B वर्णने यो गर्व……अस्याः twice 8 P2 om. त्यक्त्वा 9 P2 om. तेषां— ।।१३२।।

1 P2 °चक्षु । 2 B P1 व्याख्यातुम् । 3 B कथान्येव 4 B om. यः श्लेषः शब्दा° 5 P2 om. तदेका°……°परेषु 6 B om. सर्वामपि पी°; P1 सर्वामपि तां 7 P2 om. निखात°……पाठे 8 P1 नलानां— ।।१३३।।

1 P2 text °मतिक्रामति 2 B P1 स्मितेन । 3 B P1 अप्सरसोऽथ 4 B P1 नुस्वर° 5 P2 om. नाम……वीणावती 6 P2 add. तथा 7 B अप्सरो; P2 अप्सरसः अथ च 8 P2 °विशेषै° 9 B om. तन्वी…… अङ्गशे° 10 P2 add. मम 11 P2 न मतिं 12 P1 add. अपि 13 B om. च 14 P2 om. मेनके……°शयोक्तिश्च 15 P1 °मभि° 16 B °लिप्ये° 17 B °स्यपि° 18 B °सन्— ।।१३४।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 B P1 इति। 2 P2 आखण्डलस्य 3 P1 सुवान: 4 B om. नलेन.........किं भूतेन ? 5 P1 उक्तो° 6 P2 om. इति 7 B P1 °युक्ता B om. °कण्ठी ....व्याख्या° 8 P2 ते 9 B हरिणी.............°युक्ता here, too. 10 P1 om. अर्थं 11 P2 om. अर्थं 12 P2 om. अनुप्रास: ॥१३५॥

1 P2 text स्यात् 2 B P1 स्वं नैषधा। 3 B P1 om. °पि.... पुरुष: 4 B P1 om. °यं........°त्याह 5 P2 व्याख्यानं 6 P1 कथं न 7 B P1 आदेशाच्च 8 B P1 °देशो 9 P2 om. एवम्..........त्वम् 10 B नदीर्घत्वमिस: P1 इनदीर्घ° 11 B °मिसे 12 P1 शुष्लुक् 13 B om. °य; P1 om. अकरोत् 14 P2 स्थानी° 15 B P1 om. °भूत ....°वत् 16 B सूत्र° 17 B P1 न aft. कर्त्तव्ये 18 P2 om. दिव् ....तथा 19 P1 space 20 P1 add. विसर्ग: 21 B P1 om. अकार्यत्वाव्दचे: 22 B P1 °विकार° 23 P2 om. वर्णकार्यकर्त्तव्ये 24 P1 विधायि 25 B P1 om. कार्यस्य हेतो: 26 B P1 om. ना इति 27 B P1 मनु आदेशवाचक: 28 P2 °कम् इत्ये°— ॥१३६॥

1 B P1 इय। 2 P2 om. °वर्णनस्य........तस्या वा 3 B P1 om. विजघ्ने........इयं 4 P1 incomp. henceforth, lecto. mg. sec. me. त्यक्त 5 P2 om. मालिनी°.........°दयश्च ॥१३७॥

1 P2 text अर्धं तदेव 2 P2 text वैरसेनि° 3 P2 add. स्वयंवराडम्बरो नाम 4 B श्रीहर्ष। 5 B P2 काव्ये; edr. महाकाव्ये 6 B काव्ये तर्केषु 7 B om. ग्रन्थेषु 8 B असमो श्रमो ॥१३८॥

1 P2 om. महा°.....°विरचितायां 2 B नैषधटीकायां; P2 add. श्री° 3 B om. स्वयंवराडम्बरो नाम 4 B ग्रन्थसङ्ख्या ७३०; P2 ग्रन्थसङ्ख्या।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

सर्ग–११

[1]पूर्वसर्गे स्वयंवरवर्णनपुरस्सरं देव्या:[2] श्रीवाग्देवताया वर्णनमभिधाय राजवर्णनं च सक्षेपत: कृत्वा कविर्जम्बूद्वीपान्तरस्थान् राज्ञो विवर्णयिषुरेकादशं सर्गमारभते ।

तां देवतामिव मुखेन्दुवसत्प्रसादा-
मक्ष्णा रसादनिमिषेण निभालयन्तीम् ।
लाभाय चेतसि धृतस्य वरस्य भीम-
भूमीन्द्रजा तदनु राजसभां बभाज ।।१।।

[1]तां देवताम् इति । तदनु राज्ञां स्वयंवरगमनानन्तरं भीमभूमीन्द्रजा चेतसि धृतस्य वरस्य लाभाय तां राजसभां बभाज । किं कुर्वतीं सभाम् ?। रसादनुरागात् [2]अनिमिषेण अक्ष्णा निभालयन्तीम् । पुन: किं भूतां सभाम् ?। मुखेन्दौ वसन् प्रसादो[3] यस्यास्तां तथा । प्रसन्नानामित्यर्थ: । उत्प्रेक्षते-देवतामिव । [4]उपमा वा देवताऽपि मुखे वसत्प्रसादो भवति । प्रसादोऽनुग्रह: वरस्याऽभिलषितस्य लाभाय भज्यते[5] च । भक्तिरूपाऽस्ति । तथा निर्निमेषेण चक्षुषा पश्यति । [6]वसन्ततिलका ।।१।।

तन्निर्मलावयवभित्तिषु तद्विभूषा-
रत्नेषु च प्रतिफलन्निजदेहदम्भात् ।
दृष्टया परं न हृदयेन न केवलं तै:
सर्वात्मनैव सुतनौ युवभिर्ममज्जे ।।२।।

[1]तन्निर्मलेति । तैर्युवभिस्तस्यां सुतनौ न परं न[2] केवलं दृष्ट्या ममज्जे[3] न केवलं हृदयेन कृत्वा तस्यां युवभिर्मग्नम् । किन्तु सर्वात्मनैव सकलैरपि तत्र ममज्जे । कस्मात् ?। तस्या निर्मला ये अवयवा:

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

कपोलहस्तपादादयस्त एव भित्तयस्तासु प्रतिफलन्तो ये निजदेहास्तेषां दम्भात्[4] व्याजात्। [तथा] तस्याः विभूषारत्नेषु च[5] प्रतिबिम्बितः स्वशरीरव्याजाच्च सकलैरपि तैर्मग्नम्[6] ।।२।।

द्यामन्तरा वसुमतीमपि गाधिजन्मा
यद्यन्यमेव निरमास्यत नाकलोकम्।
चारुः स यादृगभविष्यदभूद्विमानै-
स्तादृक् तदभ्रमवलोकितुमागतानाम् ।।३।।

[1]द्यामन्तरेति। यदि गाधिजन्मा विश्वामित्रो द्यां स्वर्गं वसुमतीं च अन्तरा मध्ये अन्यमेव नाकलोकं निरमास्यत। ततः स नूतनो देवलोको यादृक् चारुरभविष्यत्। अवलोकितुमागतानां विमानैस्तदभ्रमाकाशं तादृक् शोभमानमभूत्। अन्तरान्तरेण युक्ते[2](पा॰ II. iii. 4) इति[3] द्वितीया। अन्तराशब्दो मध्यमाधेयप्रधानमाचष्टे ।।३।।

कुर्वद्भिरात्मभवसौरभसम्प्रदानं
भूपालचक्रचलचामरमारुतौघम्।
आलोकनाय दिवि सञ्चरतां सुराणां
तत्रार्चनाविधिरभूदधिवासधूपैः ।।४।।

[1]कुर्वद्भिरिति। तत्र स्वयंवरेऽधिवास[धू]पैर्दिवि [2]आलोकनाय संचरतां सुराणाम् अर्चनाविधिरभूत्। देवाः किलयत्राऽऽगच्छन्ति तत्र पूज्यन्ते। किं कुर्वद्भिः धूपैः ?। भूपालचक्रस्य चलानां चामराणां ये मारुतास्तेषाम् ओघं समूहम् आत्मभवस्य सौरभस्य सं[प्र]दानं दानपात्रं कुर्वद्भिः। कर्मणा [3]यमभिप्रैति स सम्प्रदानम् (पा॰ I. iv. 32) मारुतं सुरभीकुर्वद्भिः ।।४।।

तत्राऽवनीन्द्रचयचन्दनचन्द्रलेप
नेपथ्यगन्धवहगन्धवहप्रवाहम्[1]।
आलीभिरापतदनङ्गशरानुसारी
संरुध्य सौरभमगाहत भृङ्गवर्गः ।।५।।

[2]तत्रावनीन्द्रेति। [3]भृङ्गवर्गः सौरभमगाह[त]तत्र। किं कृत्वा[4] ?। अवनीन्द्राणां राज्ञां चयस्य चन्दनस्य [5]चन्द्रस्य कर्पूरस्य च यो लेपो अङ्गरागस्तन्मयं नेपथ्यं तस्य गन्धः परिमलस्तं[6]

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

वहतीत्येवंविधस्य गन्धवहस्य[7] वायोः प्रवाहं संरुध्य । [8]गन्धमय-गन्धवहेति पाठान्तरम् । [काभिः ?।] आलीभिः [9]पङ्क्तिभिः । किं भूतो भृङ्गवर्गः ?। आपतन्तो ये अनङ्गशरास्तामनुसरतीत्येवंशीलः । कन्दर्पबाणानुकारी । शिराभिसारीति पाठान्तरम् ।।५।।

उत्तुङ्गमङ्गलमृदङ्गनिनादभङ्गी
सर्वानुवादविधिबोधितसाधुमेधाः ।
सौधस्रजः प्लुतपताकतयाऽभिनिन्यु-
र्मध्ये जनस्य निजताण्डवपण्डितत्वम् ।।६।।

[1]उत्तुङ्गेति । अहम् एवं [2]मन्ये । सौधानां धवलगृहाणां स्रजः पंक्तयः प्लुताः[3] पताका यासां तासां[4] भावस्तत्ता । तया चलत्पताकया जनस्य मध्ये निजस्याऽऽत्मनस्ताण्डवे नृत्यविषये पण्डितत्व प्रवीणत्वम् अभिनिन्युर्दर्शयन्ति स्म । किं भूताः[5] !। उत्तुङ्गो यो मङ्गलमृदङ्ग-निनादस्तस्य भङ्गी विचित्रता [6]यस्याः तस्या[7] यः सर्वानुवादविधिः प्रतिशब्दरुपस्तेन बोधिता साध्वी मेधा यासां तास्तथा । यः किल नृत्यति, स मृदङ्गनादं मनसो मध्ये अनूद्य[8] तत्तालानुसारेण नृत्यति । पताकालक्षणं हस्तकं प्लुतं कुरुते ।।६।।

संभाषणां[1] भगवती सदृशीं विधाय
वाग्देवता विनयबन्धुरकन्धरायाः ।
ऊचे चतुर्दशजगज्जनतानमस्या
तत्र श्रिता सदसि दक्षिणपक्षमस्याः ।।७।।

[2]संभाषणामिति । सा भगवती वाग्देवता तत्र सदसि अस्या भैम्या [दक्षिण]पक्षं श्रिता सती सदृशीं दमयन्त्या उचितां वत्से ! विदर्भे[न्द्र] पुत्रीत्यादिकां संभाषणां विधाय ऊचे उवाच । संभाषणमिति पाठः । किं भूतायाः ?। [विनयेन] बन्धुरा नम्रा कन्धरा यस्यास्तस्यास्तथा । किं भूता ?। चतुर्दश [3]जगता या जनता तस्या [4]नमस्या नमस्करणीया । [5]ग्रामजनबन्धुसहायेभ्यस्तल् (पा. IV. ii. 43) ।।७।।

अभ्यागमन्मखभुजामिह कोटिरेषा
येषां पृथक्कथनमब्दशतातिपाति ।
अस्यां वृणीस्व मनसा परिभाव्य कञ्चि-
द्यं चित्तवृत्तिरनुधावति तावकीना ।।८।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]अभ्यागमदिति । इह स्वयंवरे मखभुजां कोटिरेषा अभ्यागमत् । येषां[2] पृथक्भूतं कथनम् अब्दानां वर्षाणां शतानि अतिपततीत्येवं शीलम् [3]अशक्यम् । अस्या कोटिसङ्ख्यायां मनसा परिभाव्य तं कञ्चिद्देवं वृणीष्व हे दमयन्ति ! यं तावकीना चित्तवृत्तिरनुधावति । उत्तर-वाक्यगतो यच्छब्दः पूर्वत्र तच्छब्दोपादानं नापेक्षते[4] ।।८।।

एषां त्वदीक्षणरसादनिमेषतैषा
स्वाभाविकानिमिषतामिलिता यथाऽभूत् ।
आस्ये तथैव तव नन्वधरोपभोगै-
र्मुग्धे ! विधावमृतपानमपि द्विधाऽस्तु ।।९।।

[1]एषामिति । एषां देवानां यथा तवेक्षणे[2] रसादेषा अनिमेषता स्वाभाविक्या अनिमिषताया मिलिता [3]अभूत् । एतेन अनिमिषताया द्विधाभाव आक्षेपेण लब्धः । स्त्रियाः पुंवदि (पा. VI. iii. 34)त्यादिना प्राप्तस्य पुंवद्भावस्य, न कोपधायाः (पा॰ VI. iii. 37)इति, वृद्धि-निमित्तस्य च तद्धितस्याऽरक्तविकार (पा॰ VI. iii. 39)इति च प्रतिषेधे प्राप्ते, पुंवत्कर्मधारयजातीयदेशेष्वि (पा॰ VI. iii. 42)ति प्रसवः । अथवा वक्ष्यमाणं द्विधेत्यत्राऽपि सम्बध्यते । तदयमर्थः—यथा स्वाभाविकानिमिषता मिलिता सती द्विधाऽभूत् । तथैवैषां तवाऽऽस्ये विधौ अधरामृतस्य उपभोगैः कृत्वा । ननु[4] हे मुग्धे ! विधौ अमृतपान-मपि द्विधा अस्तु ।।९।।

एषां गिरेः सकलरत्नफलस्तरुः स
प्राग्दुग्धभूमिसुरभेः खलु पञ्चशाखः ।
मुक्ताफलं फलनसान्वयनाम तन्व-
न्नाभाति बिन्दुभिरिव [1]च्छुरितः पयोधेः ।।१०।।

[2]एषां गिरेः इति । खलु निश्चितं स[3] सकलरत्नफलस्तरुः कल्पवृक्षः एषां देवानां गिरेः मेरोः पञ्चशाखो हस्तः । किं भूतस्य ?। प्राक् पूर्वं दुग्धा भूमिरेव सुरभिर्येन [4]स तस्य तथा । स वृक्षो मुक्ताफलं तन्वन् सन् [5]पयोधेर्बिन्दुभिरिव च्छुरित आभाति । किं भूतम् ?। [6]फलनेन सान्वयं [7]सार्थकं नाम यस्य तत्तथा । मुक्ता मौक्तिकान्येव फलं मुक्ताफल [मित्य]न्वयः । ताम्रपर्ण्यादौ मुक्ताफलस्य निरवयवत्वम् । वृक्षोद्भवानां

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

सान्वयता । तथा [8]पुराणे-[9]शैलैश्च श्रूयते राजन् पुनर्दुग्धा वसुन्धरा । मेरुः किल दोग्धा [10]ततस्तस्य हस्तो [11]दुग्धबिन्दुभिः च्छुरित इव । अत एव पयोधिपदम् । कल्पवृक्षोऽपि मन्दारपारिजातादिभेदेन पञ्चधा अस्ति । अपरोऽपि वृक्षश्चतसृषु दिक्षु उद्धर्वायां च दिशि[स]शाखत्वात् पञ्चशाखः । अथवा स प्रसिद्धः सकलरत्नफलस्तरुराभाति । खल्वित्युत्प्रेक्षते । एषां गिरेः पञ्चशाखो हस्त [12]इत्येकमेव वाक्यम् ।।१०।।

वक्त्रेन्दुसंनिधिनिमीलदलारविन्द-
द्वन्द्वभ्रमक्षममथाञ्जलिमात्ममौलौ ।
कृत्वापराधभयचञ्चलमीक्षमाणा
सान्यत्र गन्तुममरैः कृपयान्वमानि ।।११।।

[1]वक्त्रेन्दुसन्निधीति । सा अमरैः कृपया अन्यत्र गन्तुम् अन्वमानि अनुज्ञाता । किं कुर्वाणा ?। अथ[2] आत्मनो मौलौ अञ्जलिं कृत्वा अपराधः अनङ्गीकारस्तस्माद्भयं तेन चञ्चलं विह्वलं यथा[तथा] इक्षमाणा[3] । किं भूतमञ्जलिम् ?। वक्त्रेन्दोः संनिधौ निमीलदलं संकुचत्[4] यदरविन्दद्वन्द्वं तस्य भ्रमो भ्रान्तिस्तस्य क्षमम् ।।११।।

तं तद्विरागमुदितं शिबिकाधरस्थाः
साक्षाद्विदुः स्म न मनागपि यानधुर्याः ।
आसन्ननायकविषण्णमुखानुमेय-
भैमीविरक्तचरितानुमया [1]तु जग्मुः ।।१२।।

तं [2]तद्विरागामिति । यानस्य धुर्या वाहकपुरुषास्तं तस्या विरागमुदितं साक्षात्प्रत्यक्षं मनागपि न विदुः स्म । यतः शिबिकाया विमानस्य [3]अधरभागस्थाः[अधरभागे] स्थिताः तु पुनर्जग्मुः । अन्यत्र सञ्चरिताः । कया ?। आसन्नो यो [4]नायकोऽवलोक्यमानस्तस्याऽनङ्गी-करणेन विषण्णं [5]विषादगतं यन्मुखं तेनाऽनुमेय[म्] [6]अनुमानेन ज्ञेयं [7]यद्भैम्या दमयन्त्या[8] विरक्तं चरितं[9] वैराग्यं तदेवाऽनु[मा अनुमानं] प्रमाणं तेन जग्मुः । जज्ञुरिति पाठान्तरम् । [10]यद्यपि प्रत्यक्षेण नयस्तथाप्यनुमानेन [11]जज्ञुः । धुरो यड्ढकौ(पा. IV. iv. 77) ।।१२।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

रक्षःसु रक्षणमवेक्ष्य[1] निजं निवृत्तो
विद्याधरेष्वधरतां वपुषैव भैम्याः ।
गन्धर्वसंसदि न गन्धमपि स्वरस्य
तस्या विमृश्य विमुखोऽजनि यानिवर्गः ।।१३।।

[2]रक्षःसु रक्षणमिति । यानिनां वाहकानां वर्गो रक्षःसु विषये निजं रक्ष[ण]मवेक्ष्याऽऽत्मरक्षामपेक्ष्य निवृत्तः । रक्षसां हि मनुष्यो भक्ष्यः । अन्येतु निजं रक्षसां सम्बन्धि रक्षणमवेक्ष्य निवृत्तः । मन्त्रै रक्षोघ्नैस्तत्र पुरे रक्षा बद्धा अस्ति । ततो रक्षसां प्रवेशाभावाद्विष-[3] योगमेव प्रति चिन्तैव न कृतेत्यर्थः । विद्याधरेषु भैम्याः सकाशात् अधरतां वपुषैव अवेक्ष्य निवृत्तः । तथा गन्धर्वाणां संसदि तस्या भैम्याः स्वरस्य गन्धमपि लेशमात्रमपि न विमृश्य यानिवर्गो विमुखोऽजनि[4] जातः ।।१३।।

दीनेषु सत्स्वपि कृताफलवित्तरक्षै-
र्यक्षैरदर्शि न मुखं त्रपयैव भैम्याः ।
ते जानते स्म सुरशाखिपतिव्रतां किं
तां कल्पवीरुधमधिक्षिति नावतीर्णाम्[1] ।।१४।।

दीनेषु[2] सत्स्विवति । यक्षैस्तस्या अग्रे मुखं त्रपया एव न अदर्शि । किं भूतैः ? । दीनेषु लोकेषु सत्स्वपि कृता अफला वित्तस्य रक्षा यैस्तैस्तथा ते [3]यक्षास्तां किं कल्पवीरुधं कल्पलताम् अधिक्षिति अवतीर्णां[4] [5]न जानते स्म । वीरुधं[6] विशिनष्टि-किं भूताम् ?। सुरशाखिनः कल्पवृक्षस्य पत्युर्व्रतं यस्यास्तां तथा पतिव्रतां पत्नीम् ।।१४।।

जन्यास्ततः फणभृतामधिपं सुरौघा—
न्माञ्जिष्ठमञ्जिमविगाहिपदोष्ठलक्ष्मीम् ।
तां मानसं निखिलवारिचयान्नवीना
हंसावलीमिव घना गमयांबभूवुः[1] ।।१५।।

जन्या[2] इति । ततः सुरौघात् देवेभ्यः सकाशात् जन्याः जनी वधूस्तस्यां वाहकास्तां फणभृतामधिपं वासुकिं गमयांबभुवुः । किं भूताम् ? । माञ्जिष्ठस्य [3]रक्तस्य मञ्जिमानं विगाहते इत्येवंशीला

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

पदयौरोष्ठयोश्च लक्ष्मोः शोभा यस्यास्तां तथा। रक्तचरणा रक्तोष्ठी च। यथा नवोना घना हंसावलीं निखिलवारिचयात् जलाशयेभ्यो मानसं गमयन्ति। किं भूताम्?। रक्तचरणां रक्तचञ्चुपुटां च। गतिबुद्धि प्रत्यवसानार्थशब्द[4]कर्माकर्मकाणामणि कर्ता स णावि (पा° I. IV. 52) ति कर्मसंज्ञा। तद्वा [ह] ती (पा° IV. iv. 76) त्यधिकारे, संज्ञायां जन्या (पा° IV. iv. 82) इति यत्। अन्यत्र तु जामातुर्वयस्येऽपि जन्यशब्दो यथा जन्ययात्रा ।।१५।।

यस्या विभोः [1]सकलवाङ्मयविस्तरोऽय-
माख्यायते परिणतिर्मुनिभिः पुनः सा।
उद्गत्वरामृतकरार्धपरार्ध्यभालां
बालामभाषत सभासततप्रगल्भा ।।१६।।

यस्या[2] विभोरिति। यस्या विभोर्वाग्देव्याः[3] [4]परिणतिः परिणामोऽयं सकलोऽपि वाङ्मयविस्तरो[5] मुनिभिराख्यायते। सा देवी पुनरपि बालामभाषत। किं भूताम्?। उद्गत्वरन् उदयन् योऽमृतकरस्तस्यार्द्धं खण्डं तद्वत् परार्ध्यं [6]शोभमानं भालं यस्यास्तां तथा। किं भूता देवी?। [7]सभासततप्रगल्भा ।।१६।।

आश्लेषलग्नगिरिजाकुचकुङ्कुमेन
यः पट्टसूत्रपरिरम्भणशोणशोभः।
यज्ञोपवीतपदवीं भजते स शंभोः
सेवासु वासुकिरयं प्रसितः सितश्रीः ।।१७।।

[1]आश्लेषलग्नेति। सोऽयं वासुकिर्यः शम्भोर्यज्ञोपवीतपदवीं भजते। किं भूतः?। सेवासु प्रसितः[2] तत्परः। तथा सिता शुभ्रा श्रीर्यस्य। उपवीतं हि[3] शुभ्रं भवति। तथा आश्लेषेण आलिङ्गनेन लग्नं यत् गिरिजायाः कुचयोः कुङ्कुमं तेन पट्टसूत्रस्य परिरम्भणवत् शोणा रक्ता शोभा यस्य[4] स तथा। उपवीतेऽपि प्रवराणां स्थाने रक्तपट्टसूत्रवेष्टनं भवति ।।१७।।

पाणौ फणी भजति कङ्कणभूयमैशे
सोऽयं मनोहरमणीरमणीयमुच्चैः।
कोटीरबन्धनधनुर्गुणयोगपट्ट-
व्यापारपारगममुं भज भूतभर्तुः ।।१८।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

पाणौ[1] इति। सोऽयं फणी ऐशे[2] ईशस्य सम्बन्धिनि पाणौ कङ्कणभूयं भजति। किं भूतम् ?। उच्चैरतिशयेन मनोहरा ये मणयस्तै[3] रमणीयम्। मणिशब्दस्य ह्रस्वस्य दीर्घतेति समासे दीर्घः। [4]मणीशब्दो[वा] मणिरिति वा भिन्नं पदं [5]फणिविशेषणत्वम्। अमुं भज। किं भूतम् ?। भूतभर्तुः कोटीरं मुकुटं तस्य बन्धनं तथा धनुषो गुणो मौर्वी तथा योगपट्टं चैतेषु व्यापारेषु पारगं दृष्टप्रत्ययम् ।।१८।।

धृत्वैकया रसनयाऽमृतमीश्वरेन्दो-
रप्यन्यया त्वदधरस्य रसं द्विजिह्वः।
आस्वादयन्युगपदेष परं विशेषं
निर्णेतुमेतदुभयस्य यदि क्षमः स्यात् ।।१९।।

[1]धृत्वेकयेति। एष[2] वासुकिः एकया रसनया ईश्वरेन्दोरमृतं धृत्वा तथा अन्यया द्वितीययाऽपि जिह्वया त्वदधरस्य रसं धृत्वा युगपदास्वादयन् सन्[3] एतस्योभयस्य अमृताधररसरुपद्वयस्य[4] परम् उत्कृष्टं विशेषं[5] भेदं निर्णेतुं यदि क्षमः स्यादथवा स[6] परं केवलं यदि क्षमस्तदायमेव। यतो दिजिह्वः ।।१९।।

आशीविषेण रदनच्छददंशदान-
मेतेन ते पुनरनर्थतया न गण्यम्।
बाधां विधातुमधरे हि न तावकीने
पीयूषसारघटिते घटतेऽस्य शक्तिः ।।२०।।

[1]आशीविशेणेति[2]। तत्त्वया पुनरेतेन आशीविषे[3] ण रदनच्छदे ओष्ठे दंशदानं दन्तक्षतम् अनर्थतया विषभयेन न गण्यम्। कृत्यानां कर्त्तरि वे(पा॰ II. iii. 71)ति षष्ठी। हि यस्मात् तावकीनेऽधरेऽस्याऽऽशीविषस्य [4]बाधां विधातुं शक्तिर्न घटते। किं भूते ?। पीयूषसारेण घटिते ।।२०।।

तद्विस्फुरत्कर्णविलोकनभूतभीतेः
कम्पं च वीक्ष्य पुलकं च ततोऽनु तस्याः।
सञ्जातसात्त्विकविकारधियः स्वभृत्या
न्नृत्यान्न्यषेधदुरगाधिपतिर्विलक्षः ।।२१।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]तद्विस्फुरदिति । उरगाधिपतिः स्वभृत्यान् सर्पान् [2]नृत्यान्न्य-षेधत्[3] । विलक्षः सन् । किं भूतान् ?। तस्याः कम्पं पुलकं च वीक्ष्य ततोऽनु संजाता सात्त्विकविकारस्य स्तम्भस्वेदरोमाञ्चादेर्धीर्येषां[4] तान् तथा । किं भूतायाः ?। [5]तस्य वासुकेर्विस्फुरन्तो ये फणास्तद्विलोकनेन भूता भीतिर्यस्यास्तथा । भूतभीतेरिति कर्मधारये पञ्चम्यन्तम् । वा दमयन्त्याः [6]फणाविलोकनेन भूता भीतिर्यस्यास्तस्याः दर्शनात् कम्पो रोमाञ्चश्च जातः । सर्पैरिति ज्ञातम् । यदस्या अस्मत्स्वामिनं दृष्टवा रागेण कम्पस्तथा रोमाञ्चो जातः । ततो नृत्यन्तोऽमी वासुकिना [7]निवारिताः ॥२१॥

तद्दर्शिभिः स्ववरणे फणिभिर्निराशै-
नि:श्वस्य तत्किमपि सृष्टमनात्मनीनम् ।
यत्तान् प्रयातुमनसोऽपि विमानवाहा
हा हा प्रतीपपवनाशकुनान्न जग्मुः ॥२२॥

[1]तद्दर्शिभिरिति । फणिभिर्वासुकिव्यतिरिक्तैस्तद्दर्शिभिस्तं वासुकिम् अनङ्गीकृतं पश्यद्भिरत एव स्वस्य वरणे निराशैः सद्भिर्निःश्वस्य तत्किमपि अनात्मनीनम् आत्मनो न[2] हितं यत्तत् [3]सृष्टं कृतं यत्तान् नागान् प्रति [4]प्रयातुमनसोऽपि सन्तो विमानवाहाः । हा हा इति खेदे । प्रतीपपवन एवाऽशकुनं तस्मान्न जग्मुः । निःश्वासेन तेषां सन्मुखो वायुर्बभूव स एवाऽपशकुनः । आत्मन्विश्वजनभोगोत्तर-पदात्ख(पा. V. i. 9) इति खः । तस्यायनेयीनी(पा. VII. i. 2) त्यादिना ईन् ॥२२॥

ह्रीसंकुचत्फणगणादुरगप्रधाना-
त्तां राजसङ्घमनयन्त विमानवाहाः ।
संध्यानमद्दलकुलात्कमलाद्विनीय[1]
कल्हारमिन्दुकिरणा इव हासभासम् ॥२३॥

[2]ह्रीसंकुचदिति । विमानवाहास्ताम्[3] उरगप्रधानादनन्तरं राज्ञां सङ्घम् अनयन्त । किं विशिष्टात् ?। ह्रिया संकुचन् फणानां गणो य[स्य त]स्मात् । यथा इन्दुकिरणा [4]हासस्य विकासस्य भासं कमलाद् विनीय अपनीय कल्हारं कुमुदं नयन्ति । [5]द्वितीयमिती वा

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

पाठः । एतच्चोपमेयेऽपि योज्यम् । विनीयेति ल्यपि । किं भूतात् ?। संध्यायां नमत् दलकुलं [6]यत् तस्मात्तथा ।।२३।।

देव्याऽभ्यधायि भव भीरु ! धृतावधाना
भूमीभुजस्त्यजत भीमभुवो निरीक्षाम् ।
आलोकितामपि पुनः पिबतां दृशैता-
मिच्छापि[1] गच्छति न वत्सरकोटिभिर्वः ।।२४।।

[2]देव्याभ्यधायीति । देव्या अभ्यधायि उक्तम् । हे [3]भीरु ! त्वं धृतावधाना भव । हे भूमीभुजः । हे राजानः । यूयं भीमभुवो निरीक्षां [4]त्यजत । यत एताम् आलोकितामपि दृशा पुनः पुनः पिबतां पश्यतां [5]सतां वो युष्माकम् इच्छा वत्सराणां कोटिभिरपि न[6] गच्छति । वचनश्रवणपरायणा भवतेत्यर्थः । भजतेति पुस्तकान्तरपाठोऽशुद्धः[7] ।।२४।।

लोकेशकेशवशिवानपि यश्चकार
शृङ्गारसान्तरभृशान्तरशान्तभावान् ।
पञ्चेन्द्रियाणि जगतामिषुपञ्चकेन
स क्षोभयन्वितनुतां वितनुर्मुदं वः ।।२५।।

[1]लोकेशकेशवेति । स वितनुः कामो वो[2] मुदं वितनुताम् । किं कुर्वन् ?। इषुपञ्चकेन जगतां पञ्च इन्द्रियाणि क्षोभयन् । यो लोकेशो ब्रह्मा केशवः शिवश्च एतानपि शृङ्गारेण सान्तरो मिश्रितः भृशम् आन्तरो मध्यवर्ती शान्तभावः शान्तरसो येषां तान् तथा एवंविधान् चकार ।।२५।।

पुष्पेषुणा ध्रुवममूनिषुवर्षजप्त-
हुङ्कारमन्त्रबलभस्मितशान्तशक्तीन् ।
शृङ्गारसर्गरसिकद्व्यणुकोदरि ! त्वं
द्वीपाधिपान्नयनयोर्नय गोचरस्त्वम् ।।२६।।

पु[1]ष्पेषुणा इति । हे शृङ्गार[र]सस्य सर्गे सृष्टौ रसिकं यत्तद् [2]द्व्यणुकं परमाणुद्वयसंयोगस्तद्वदुदरं यस्याः तस्याः[3] संबोधनम् । हे कृशोदरि ! त्वं द्वीपानाम्[4] अमून् अधिपान् नयनयोर्गोचरत्वं नय । किं भूतान् ?। ध्रुवं पुष्पेषुणा इषवर्षार्थं [5]जप्तो यो हुङ्कार एव

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

मन्त्रस्तस्य[6] बलेन भस्मिता शान्तेरुपशमस्य शक्तिर्येषां तांस्तथा। जपिवमिभ्यां वा(!) इति जपेर्निष्ठायाम् इडागमाभावः। वैशेषिकाणां [7]द्व्यणुकादिसृष्टिः ॥२६॥

स्वादूदके जलनिधौ सवनेन सार्द्धं
भव्या भवन्तु तव वारिविगाह[1] लीलाः।
द्वीपस्य तं पतिममुं भज पुष्करस्य
निस्तन्द्रपुष्करतिरस्करणक्षमाक्षिः ॥२७॥

[1]स्वादूदके इति। हे भैमि! तव स्वादु मृष्टमुदकं यत्र तत्र जलनिधौ [3]सवनेन राज्ञा सार्द्धं भव्या [4]वारिविगाहलीला जलकेलयो भवन्तु। हे निस्तन्द्रं विकसितं यत् पुष्करं कमलं तस्य तिरस्करणक्षमे अक्षिणी यस्यास्तस्याः सम्बोधनम्। त्वं[5] तममुं पुष्करस्य द्वीपस्य पतिं भज। पुष्करद्वीपं नाम [6]सर्वद्वीपप्रान्तस्तस्मादारभ्य पुराणोक्त-क्रमेणाऽभ्यन्तराभ्यन्तरद्वीपानि[7] समुद्रं राजानं देवतां वृक्षं च जम्बूद्वीपं च[8] सर्वाभ्यन्तरं यावत् वर्णयिष्यन् आत्मनो भुवनकोशप्रावीण्यं दर्शयति ॥२७॥

सावर्तभावभवदद्भुतनाभिकूपे!
स्वभौममेतदुपवर्तनमात्मनैव।
स्वाराज्यमर्जयसि न श्रियमेतदीया-
मेतद्गृहे परिगृहाणशची विलासम् ॥२८॥

[1]सावर्तभावेति। हे सह आवर्तेन लक्षणविशेषेण वर्तते सावर्त्त-स्तस्य भावस्तेन [2]भवदद्भुतोऽद्भुतयुक्तो नाभिकूपो यस्यास्तस्याः सम्बोधनम्। त्वम् एतदीयां श्रियमेव स्वाराज्यं [3]स्वर्गस्य राज्यं नार्जयसि। अपि त्वेवं तत एतस्य गृहे शच्या इन्द्राण्या विलासं परिगृहाण। यत एतस्य मानसोत्तरसंज्ञवर्षं वर्तते। विभक्तमहातवा-तर्कषडङ्गसंज्ञितवर्षद्वयविभागविशिष्टम्। उपवर्तनं राष्ट्रदेशे उपवर्त-न्तेऽस्मिन् उपवर्तनम्। उपावर्तनमिति कोऽन्यः। आत्मनैव भौमं भूमिसम्बन्धि स्वः स्वर्गरूपम्। [5]तदुक्तम्वर्षद्वयं तु मैत्रेय! भौमः स्वर्गोऽयमुत्तमः। सर्वत्र सुखदः कालो जरारोगविवर्जितः (वि॰ पु॰ II. iv. 84cd 85ab)इत्यादि। एतानि किल द्वीपानि दिव्यभोगत्वात् स्वर्गस्तत्र राज्यं [5]स्वाराज्यम् ॥२८॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

देवः स्वयं वसति तत्र किल स्वयंभू-
न्र्यग्रोधमण्डलतले हिमशीतले यः ।
स त्वां विलोक्य निजशिल्पमनन्यकल्पां[1]
सर्वेषु कारुषु करोतु करेण दर्पम् ।।२६।।

देवः[2] स्वयमिति । तत्र किल स्वयंभूर्देवो ब्रह्मा यः स्वयं वसति । क्व ?। न्यग्रोध एव मण्डपस्तस्य तले । किं भूते ?। हिमवच्छीतले । स ब्रह्मा [3]त्वां निजस्य शिल्पम् आत्मनिष्पादितम् अनन्यकल्पाम्[4] अनन्यसदृशीं विलोक्य स्वेन करेण [5]हस्तेन सर्वेषु कारुषु शिल्पिषु मध्ये दर्पं करोतु ।।२६।।

न्यग्रोधनादिव दिवः पतदातपादे-
र्न्यग्रोधमात्मभरधार मिवावरोहैः ।
तं तस्य पाकिफलनीलदलद्युतिभ्यां
द्वीपस्य पश्य शिखिपत्रजमातपत्रम् ।।३०।।

[1]न्यग्रोधनादिति । हे भैमि ! त्वं तं[2] न्यग्रोधं तस्य द्वीपस्य उपरि शिखिनो मयूरास्तेषां पत्रेभ्यः पिच्छेभ्यो जातम्[3] आतपत्रं [4]श्रीकरीसंज्ञं पश्य । काभ्याम् ?। पाकीनि पक्वानि फलानि तेषां द्युतिस्तथा नीलानां [5]दलानां द्युतिस्ताभ्यां कृत्वा । मयूरपिच्छेषु नीला रक्ताश्चन्द्रका[6] भवन्ति । किं भूतम् ?। दिव आकाशात् पतत् आतपशीतवृष्ट्यादेर्न्यक् नीचैर्रोधनादिव न्यग्रोधसंज्ञम् । तथा अवरोहैरधःप्ररोहैरात्मभरधारमिव[7] आत्मनो भरस्य भर्त्तारमिव ।।३०।।

न श्वेततां चरतु वा भुवनेषु राज-
हंसस्य न प्रियतमा कथमस्य कीर्तिः ।
चित्रं तु यद्विशदिमाद्वयमादिशन्ती
क्षीरं च नाम्बु च मिथः पृथगातनोति ।।३१।।

न[1] श्वेततामिति । अस्य राज्ञां हंसस्य राजा[2] चासौ हंसश्चेति कर्मधारयो वा राजप्रधानस्य प्रियतमा कीर्तिः कथं न श्वेततां चरतु[3] श्वेती भवतु । कथं वा भुवनेषु न चरतु । या किल हंसाङ्गना सा श्वेता भुवनेषु उदकेषु च चरति । तु पुनस्तच्चित्रं यद् विशदिम्नो

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

धवलत्वस्याऽद्वयम्[4] ऐक्यम् आदिशन्ती कुर्वन्ती [5]सती क्षीरं चाम्बु च मिथः पृथक् न आतनोति। सर्वं श्वेतत्वात् सदृशं जातम्। या किल हंसाङ्गना सा क्षीरं [6]नीरं च पृथक्कुरुते ।।३१।।

शूरेऽपि सूरिपरिषत्प्रथमार्चितेऽपि
शृङ्गारभङ्गि मधुरेऽपि कलाकरेऽपि ।
तस्मिन्नवद्यमियमाप तदेव नाम
यत्कोमलं किल न तस्य नलेति नाम ।।३२।।

[1]शूरेऽपीति। सा इयं दमयन्ती तस्मिन्नाम [2]अहो तदेव अवद्यं दोषम् आप। अवद्यपण्यवर्यागर्ह्यपणितव्यानिरोधेष्विव (पा° III. i. 101)ति निपातः। यत्किल तस्य कोमलं नल इति नाम न आसीत्। किं भूते ?। शूरेऽपि। तथा [3]सूरीणां विदुषां परिषदि सभायां प्रथमम् अर्चितेऽपि। तथा शृङ्गारस्य भाङ्गिभिर्मधुरेऽपि। तथा कलानां गीतादीनाम् आकरेऽपि ।।३२।।

भ्रू वल्लिवेल्लितमथाकृतिभङ्गमेषा[1]
लिङ्गं चकार तदनादरणस्य विज्ञा ।
राज्ञोऽपि तस्य तदलाभजतापवह्नि-
श्चिह्नीबभूव मलिनच्छविभूमधूमः ।।३३।।

भ्रूवल्लि[इति]। एषा [2]अथ आकृतेर्भङ्गां तस्याऽनादरणस्य लिङ्गं चकार। किं भूतम् ?। भ्रूवल्ल्या[3] वेल्लितं ज्ञापितम् अथवा भ्रूलतावेल्लितं भ्रूवः[4] प्रक्षितं [5]चालनमेव। आकृतेराकारस्य भङ्गां लिङ्गम् अकरोत् यतो विज्ञा विशेषज्ञा। °वेल्लितमयाकृतिभाङ्गी-मित्येकपदपाठे मयट् प्रत्ययः। तस्य राज्ञोऽपि [6]मलिनच्छवेः यो भूमा बाहुल्यं स एव धूमः तस्याऽलाभाज्जातो यस्ताप एव वह्निस्तस्य चिह्नीबभूव। यत्र धूमस्तत्र[7] वह्निरित्यन्वयव्यतिरेकित्वात् ।।३३।।

राजान्तराभिमुखमिन्दुमुखीमथैनां
जन्या जना हृदयवेदित्तयैव निन्युः ।
अन्यानपेक्षितविधौ न खलु प्रधान-
वाचां भवत्यवसरः सति भव्यभृत्ये ।।३४।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]राजान्तरेति। अथ जन्या वध्वा वोठारो जना एनाम् इन्दुमुखीं राजान्तरस्याऽन्यस्याऽभिमुखं निन्युः। कया?। हृदयं विन्दत्येवंशीलया[2] तया एव। खलु यतो भव्यभृत्ये सति प्रधानस्य स्वामिनो वाचामवसरो न[3] भवति। किं विशिष्टे भृत्ये?। [4]अन्यानपेक्षितोऽन्येषाम् अपेक्षारहितो[5] विधिः कार्यं यस्मिन् तथा। निरपेक्षमेव कार्याणि करोति ॥३४॥

ऊचे पुनर्भगवती नृपमन्यमस्यै
निर्दिश्य दृश्यतमतावमताश्विनेयम्।
आलोक्यतामयमये! कुलशीलशाली
शालीनतानतमुदस्य निजास्य बिम्बम् ॥३५॥

[1]ऊचे पुनरिति। भगवती अस्यै अन्यं नृप निर्दिश्य पुनरपि ऊचे। किं भूतम्?। दृश्यतमतयाऽतिसौन्दर्येणाऽवमतौ [2]आश्विनेयौ येन तं तथा। अये! हे[3] भैमि! अयं कुलशीलशाली राजा आलोक्यताम्। किं कृत्वा?। शालीनतया सलज्जत्वेन नतं निजास्यबिम्बम् उदस्य। शालीनकौपीने अधृष्टाकार्ययोरि (पा° V. ii. 20) ति खञ्। [4]आयनेयीनी (पा° VII. i. 2)त्यादिना ईनि [5]सति निपातः ॥३५॥

एतत्पुरः पठदपश्रमबन्दिवृन्द-
वाग्डम्बरैरनवकाशतरेऽम्बरेऽस्मिन्।
उत्पत्तुमस्ति पदमेव न मत्पदाना-
मर्थोऽपि नार्थपुनरुक्तिषु पातुकानाम् ॥३६॥

[1]एतत्पुर इति। एतस्य पुरः पठन्तोऽपश्रमा[2] ये बन्दिनस्तेषां वृन्दस्य वाग्डम्बरैरनवकाशतरे[3] व्याप्तेऽस्मिन्नम्बरे मम पदानां वचसाम् उत्पन्नं पदमेव स्थानकमेव[4] नाऽस्ति। शब्दो ह्यम्बरगुणः। तथा मम वचसाम् उत्पत्तुम् अर्थोऽपि[5] नाऽस्ति। किं भूतानाम् [6]अर्थानाम्?। पुनरुक्तिषु पातुकानाम्। सर्वेऽप्यर्था बन्दिभिरेव प्रथममुक्ताः ॥३६॥

नन्वत्र हव्य इति विश्रुतनाम्नि शाक-
द्वीपप्रशासिनि सुधीषु सुधीभवन्त्या।
एतद्भुजाबिरुदबन्दिजयाऽनयाऽपि
किं रागि राजनि गिराऽजनि नान्तरं ते ॥३७॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

नन्वत्र [इति]। पुष्करद्वीपं सप्तमं तस्मादर्वाक् षष्ठं शाकद्वीपम्। ननु अत्र[1] राजनि हव्य[2] इति [3]विश्रुतनाम्नि तथा शाकद्वीपप्रशासिनि विषयेऽनयाऽपि बन्दिनां गिरा वर्णनया किं ते तवान्तरं मनो [4]रागि नाऽजनि ?। किं भूतया ?। एतस्य भुजयोर्बिरुदावलीं वदन्ते [5]स्तुवन्ते इत्येवंशीला ये तेभ्यो जाता[6] तया। तथा सुधीषु विद्वत्सु प्रीणनेन सुधीभवन्त्या ॥३७॥

शाकःशुकच्छदसमच्छविपत्रमाल-
भारी हरिष्यति तरुस्तव तत्र चित्तम्।
यत्पल्लवौघपरिरम्भविजृम्भितेन[1]
ख्याता जगत्सु हरितो हरितः स्फुरन्ति ॥३८॥

शाकः[2] शुकेति। हे[3] तन्वि ! तत्र शाकस्तरुस्तव चित्तं हरिष्यति। किं भूतः ?। शुकानां छदाः पक्षाणि तत्समच्छवीनि हरितानि [4]पत्राणि तेषां मालां बिभर्तीत्येवं शीलः। इष्टकेषीकामालानां चित्ततूलभारीष्विव (पा॰ VI. iii. 65)ति। मालाशब्दाकारस्य[5] ह्रस्वः। यस्य शाकस्य पल्लवौघस्य परिरम्भस्य [6]विजृम्भितं प्रसरस्तेन जगत्सु [7]ख्याता प्रसिद्धा हरितो दिशो हरित इति नाम्ना स्फुरन्ति ॥३८॥

स्पर्शेन तत्र किल तत्तरुपत्रजन्मा
यन्मारुतः कमपि संमदमादधाति।
कौतूहलं तदनुभूय विधेहि भूयः
श्रद्धां पराशरपुराण कथान्तरेऽपि ॥३९॥

स्पर्शेन [इति]। तत्र द्वीपे किल इति श्रूयते तस्य तरोः पत्रजन्मा मारुतः स्पर्शेन यत्कमपि संमदम् आदधाति तत् कौतूहलम् अनुभूय भूयोऽपि पराशरमुनेः पुराणं विष्णुपुराणं तस्य कथान्तरेऽपि अन्यस्यामपि कथायां श्रद्धां विधेहि [1]मानयस्व। केचित्तु-यत्तु[2] छदानुगुण्यात् यन्मारुत इति पठित्वा यच्छब्दः संमदविशेषणं तच्छब्दस्य[3] च कौतूहलस्य लिङ्गं गृहीतमिति व्याचक्षते ॥३९॥

क्षीरार्णवस्तव कटाक्षरुचिच्छटाना-
मन्वेतु तत्र विकटायितमायताक्षि !।
वेलावनीवनततिप्रतिबिम्बचुम्ब[1]-
किर्मीरितोर्मिचयचारिमचापलाभ्याम् ॥४०॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[2]क्षीरार्णव इति। हे [3]आयताक्षि! हे भैमि! तत्र क्षीरार्णवस्तव कटाक्षरुचीनां [4]छटाः प्रसरास्तासां विकटायितं विलसितम् अन्वेतु। काभ्याम्?। वेलायाम् अवनीषु या वनानां[5] ततिस्तस्याः प्रतिबिम्बचुम्बेन किर्मीरिताः। प्रतिबिम्बचुम्बीति पाठे प्रतिबिम्बचुम्बिना एव किर्मीरिता मिश्रिता ये ऊर्मीणां चयास्तेषां यश्चारिमा चापलं[6] च ताभ्याम् अन्वेतु अनुगच्छतु। अध्येतु इति पाठान्तरम्। उद्गात्रादिपाठात्, प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ् (पा° V. i. 129) अन्यत्र[8] तु ब्राह्मणादिपाठात् [9]ष्यणपि ॥४०॥

बालातपैः कृतकगैरिकतां कृतां द्वि-
स्तत्रोदयाचलशिलाः परिशीलयन्तु।
त्वद्विभ्रमभ्रमणज श्रमवारिधारि-
पादाङ्गुलीगलितया नखलाक्षयाऽपि ॥४१॥

[1]बालातपैरिति। तत्रोदयाचलस्य शिला द्विर्द्विर्वारं कृतकां गैरिकतां[2] धातुत्वं परिशीलयन्तु अनुभवन्तु। एकां बालातपैः कृत्वा द्वितीयां नखानां लाक्षयाऽपि अलक्तकेन च कृताम्। किं भूतया?। तव विभ्रमेण लीलया यद्भ्रमणं तस्माज्जातं श्रमवारि धारयन्ति[3] याः पादाङ्गुल्यस्ताभ्यो गलितया च्युतया ॥४१॥

नृणां करम्बित मुदामुदयन्मृगाङ्क-
शङ्कां सृजत्वनघजङ्घि परिभ्रमन्त्याः।
तत्रोदयाद्रिशिखरे तव दृश्यमास्यं
कश्मीरसंभवसमारचनाभिरामम् ॥४२॥

[1]नृणां करम्बितेति। हे अनघजङ्घि[2]! तत्रोदयाद्रिशिखरे परिभ्रमन्त्याः तव दृश्यम् आस्यं नृणाम् उदयतो मृगाङ्कस्य शङ्कां सृजतु। किं भूतम्?। कश्मीरसम्भवं कुङ्कुमं तस्य [3]समारचनया अभिरामं रक्तम्। किं भूतानां नृणाम्?। [4]करम्बिता तारकादित्वादितच् (पा° V. ii. 36)। अङ्कुरादिक्रमेण करम्बिता अङ्कुरादिभूता पुनर्मुत्[5] हर्षो येषां तेषां तथा ॥४२॥

एतेन ते विरहपावकमेत्य तावत्
कामं स्वनाम कलितान्वयमन्वभावि।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

अङ्गीकरोषि यदि तं तव नन्दनाद्यै-
लब्धान्वयं स्वमपि नन्वयमातनोतु ।।४३।।

एतेन[1] ते इति। एतेन राज्ञा ते तव विरहपावकमेत्य प्राप्य तावत्कामं निश्चितं स्वं हव्य इति नाम कलितो [2]वृतोऽन्वयोऽर्थो यस्य तत्तथा सार्थकमन्वभावि अनुभूतम्। हूयते इति हव्यः। यदि तं विरहातुरं प्रक्रान्तं त्वम् अङ्गीकरोषि, ननु तदा[3] अयं स्वमपि स्वमात्मानमपि तव नन्दनाद्यैः पुत्रपौत्रादिभिर्लब्धोऽन्वयो येन तं तथाविधम् आतनोतु[5] वंशवृद्धिर्भवतु। एतेन इति [6]तमिति अयमिति समीपतर-[7]प्रक्रान्तप्रत्ययवाचिभिर्नवीकृतत्वं दर्शितम्। पूर्वत्र यदीति वचनात् तर्हीति [8]त्वपेक्षितम्। यदि तदिति पाठे तु निराकाङ्क्षैव प्रतीतिः ।।४३।।

लक्ष्मीलतासमवलम्बभुजद्रुमेऽपि[1]
वाग्देवतायतनमञ्जुमुखाम्बुजेऽपि।
साऽमुत्र दूषणमजीगणदेकमेव
नार्थी बभूव मघवा यदमुष्य देवः ।।४४।।

[2]लक्ष्मीलतेति। [3]सा अमुत्र राजनि एकमेव दूषणम् अजीगणत् यत्[4] अमुष्य मघवा देवः इन्द्रो न अर्थी बभूव[5]। नलस्यैव किलेन्द्रोऽर्थी अभूत्। किं विशिष्टे[6] अस्मिन् ?। लक्ष्मीरेव लता तस्या समवलम्बभूतौ भुजावेव द्रुमौ यस्य तस्मिंस्तथा। अवलम्ब्येति पाठे अवलम्ब्यौ अवलम्बनीयौ भुजौ यस्येति व्याख्या। [1]वाग्देवताया आयतनं मञ्जु मुखाम्बुजं यस्य तत्र तथाविधेऽपि ।।४४।।

लक्ष्मीविलासवसतेः सुमनःसु मुख्या-
दस्माद्विकृष्य भुवि लब्धगुणप्रसिद्धिम्।
स्थानान्तरं तदनु निन्युरिमां विमान-
वाहाः पुनः सुरभितामिव गन्धवाहाः ।।४५।।

[1]लक्ष्मीविलासेति। विमानवाहाः इमाम् अस्मात् राज्ञो विकृष्य[2] तदनु पुनरपि स्थानान्तरं[3] निन्युः। किं भूतात् ?। लक्ष्मीविलासानां वसतिरूपात् लक्ष्म्याः क्रीडागृहाद्वा। तथा सुमनःसु विद्वत्सु मध्ये मुख्यात्। किं भूताम् ?। भुवि लब्धा गुणानां [4]सौन्दर्यादीनां

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

प्रसिद्धिर्यया तां तथा। यथा गन्धवाहा वायवः[5] सुरभितां स्थानान्तरं नयन्ति। कुतः ?। सुमनःसु पुष्पेषु मुख्यात् कामात्[6] सकाशात्। तथा यत्र सौरभ्यं तत्र लक्ष्मीर्वसति। [7]लक्ष्मीर्वसतेः [8]सुमनःसु मुख्यात् पद्मादिति वा। सुरभिताऽपि गुणेषु मध्ये [9]लब्धप्रसिद्धिः। तथा च गुणा [10]रूपरसगन्धस्पर्शे(I. 6)त्यादि [11]वैशेषिकसूत्रम्। *गुणप्रसिद्धेरित्यपि पाठः ॥४५॥

भूयस्ततो निखिलवाङ्मयदेवता सा
हेमोपमेयतनुभासमभाषतैनाम्।
एनं स्वबाहुबहुवारनिवारितारि
चित्ते कुरुष्व कुरुविन्दसकान्तिदन्ति ॥४६॥

[1]भूयस्तत इति ततः सा निखिलवाङ्मयदेवता एनां भूयोऽभाषत। किं भूताम् ?। हेम्ना उपमेया तनोर्भा यस्यास्तां तथा। हे कुरुविन्देन पद्मरागमणिना समानकान्तयो दन्ता यस्यास्तस्याः[2] सम्बोधनम्। केचित् तु कुरुविन्दं हिङ्गुलं[3] पद्मं वा एतत्समानदन्ति! एनं राजानं स्वबाहुभ्यां बहून् वारान् निवारिता अरयो येन तं तथाविधं चित्ते कुरुष्व ॥४६॥

द्वीपस्य पश्य दयितं द्युतिमन्तमेनं
क्रौञ्चस्य चञ्चलदृगञ्चलविभ्रमेण।
यन्मण्डले सकलमण्डलसन्निवेशः
पाण्डुश्चकास्ति दधिमण्डपयोधिपूरः ॥४७॥

[1]द्वीपस्य पश्येति। हे भैमि! [2]त्वमेनं क्रौञ्चस्य द्वीपस्य अधिपतिं दयितं प्रियं द्युतिमन्तं [3]नाम पश्य। क्रौञ्चस्येति स्वस्वामिभावसम्बन्धे षष्ठी। केन ?। चञ्चलो यो दृशोरञ्चलस्तस्य विभ्रमेण। यस्य मण्डले [4]दध्नो [5]मण्डस्य यः पयोधिस्तस्य पूरश्चकास्ति। पाण्डुस्तथा सकलो मण्डलो वर्तुलाकारः सन्निवेशो यस्य स तथा। दधिसमुद्रवेष्टितः। स किल इत्यपि क्वचित्पाठः ॥४७॥

तत्राऽद्रिरस्ति भवर्बाङ्घ्रिविहारयाची
क्रौञ्चः स्फुरिष्यति गुणानिव यस्त्वदीयान्।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

हंसावलीकलकलप्रतिनादवाग्भिः
स्कन्देषुवृन्दविवरैर्विवरीतुकामः ।।४८।।

तत्राद्रिरिति [1]तत्रा। तत्र [2]द्वीपे क्रौञ्चो नामाऽद्रिरस्ति। किं भूतः[3]?। भवत्या अङ्घ्रिविहारं याचते इत्येवंशीलः। न्धारीति पाठे धारयिष्यतीति। यस्त्वदीयान् गुणान् स्कन्दस्य कार्तिकेयस्य इषुवृन्दानां विवरैश्छिद्रैर्विवरीतुकाम[4] इव स्फुरिष्यति[5] वदिष्यतीव। किं भूतैः?। हंसावलीनां कलकलस्य प्रतिनाद [6]एव वचो येषु तैस्तथा। हंसास्तत्र छिद्रेषु[7] सञ्चरन्तः शब्दायन्ते। ततश्च किल त्वद्गुणान् रन्ध्राणि गृणन्ति ।।४८।।

वैदर्भि ! दर्भदलपूजनयाऽपि यस्य
गर्भे जनः पुनरुदेति न जातु मातुः।
तस्याऽर्चनां रचय तत्र मृगाङ्कमौले-
स्तन्मात्रदैवतजनाभिजनः स देशः ।।४९।।

[1]वैदर्भीति। हे वैदर्भि। तत्र तस्य मृगाङ्कमौलेः श्रीमहादेवस्याऽर्चनं रचय[2]। यस्य दर्भस्य दलानि तैः पूजनयाऽपि कृतया[3] जनो लोको मातुर्गर्भे पुनर्नोदेति। जातु [4]कदाचित्। यतः स देशो द्वीपो दैवतानि[5] पुंसि वे[6](अमर॰ I. i. 9) त्याम्नानेऽपि पुंस्य प्रयोगात् तन्मात्रं दैवतं यस्येति नपुंसकेन विग्रहे तन्मात्रदैवतं [7]जनस्य अभिजनो जन्मभूमिः। केचित्तु व्याचक्षते—तन्मात्रदैवतजनानाम् अभिजनं[8] गोत्रं यस्य[9] स तथा। ईश्वर एव गोत्रदेवता सर्वेषाम् इत्यर्थः। अभिजनः कुलम्। तथा चोक्तम्-कुलेऽप्यभिजनो[10] जन्मभूम्यामपि (अमर॰ III. iii. 108)। तथा-अभिजनः कुले। कुलध्वजे जन्मभूम्याम् (अने॰ सं॰ IV. 160)। तदाभिन्नाधिकरणो बहुव्रीहिः ।।४९।।

चूडाग्रचुम्बिमिहिरोदयशैलशील-
स्तेनाः स्तनंधयसुधाकरशेखरस्य।
तस्मिन् सुवर्णरसभूषणरम्यहर्म्य-
भूभृद्धय घटय हेमघटावतंसाः ।।५०।।

[1]चूडाग्रेति। त्वं तत्र द्वीपे स्तनंधयो बालः सुधाकरश्चन्द्रः शेखरो यस्य तस्य[2] श्रीमहादेवस्य [3]सुवर्णरसभूषणे रम्याणि हर्म्याण्येव भूभृतः

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

पर्वतास्तेषां घटाः श्रेणीः [4]घटय कारय प्रासादान् रचय। किं भूताः ?। हेमघटाः सौवर्णाः[5] कलशा अवतंसा मुकुटा यासां तास्तथा। [पुनः] किं भूताः ? चूडाग्रचुम्बी मिहिरः[6] श्रीसूर्यो यस्य स चासौ उदयशैलश्च[7] तस्य शीलं[8] शोभा [9]तस्य स्तेनाश्चौराः[10]। मस्तकस्थरवेरुदयाचलस्य शोभानुकारिणीव प्रासादमालाः कलशैर्भान्ति। स्तनंधयघटशब्दौ स्तनपायकरिघटवाचकौ[11] कलामात्रसमूहलक्षकौ। घटादयः षितः (776-817) इति। षिद्भिदादिभ्योऽङ् (पा॰ III. iii. 104) ।।५०।।

तस्मिन् मलिम्लुच इव स्मरकेलिजन्म
धर्मोदबिन्दुमयमौक्तिकमण्डनं ते।
जालैर्मिलन्दधिमहोदधिपूरलोल-
कल्लोलचामरमरुत्तरुणि ! छिनत्तु ।।५१।।

[1]तस्मिन्निति। हे तरुणि ! तस्मिन् द्वीपे [2]जालैर्गवाक्षविवरैर्मिलन् सन् स चासौ[3] दधिमहोदधिपूरस्य लोलाः कल्लोला एव चामराणि तेषां मरुद्वायुः ते तव स्मरकेलेर्जन्म[4] येषां[5] ते[6] एते धर्मोदबिन्दवस्तन्मयं मौक्तिकमण्डनं छिनत्तु। क इव ?। मलिम्लुच इव। यथा मलिम्लुचश्चौरो जालैर्गवाक्षविवरैः प्रविश्य मण्डनमपहरति ।।५१।।

एतद्यशो नवनवं खलु हंसवेशं
वेशन्तसन्तरणदूरगमक्रमेण।
अभ्यासमर्जयति सन्तरितुं समुद्रान्
गन्तुं च निःश्रममितः सकलान् दिगन्तान् ।।५२।।

[1]एतद्यश इति। एतस्य राज्ञो यशो [2]नवनवं खलु इति मन्ये हंसवेशं हंसवेषं कृत्वा वेशन्तस्य पल्वलस्य[3] सरस्यादेः सन्तरणात् [4]तरणयोगात् [यो] दूरगमो विदूरगमनं[5] तस्य क्रमेण [6]यथासङ्ख्यानुरोधेन। सन्तरणं च दूरगमश्चेति द्वन्द्वो वा। किल समुद्रान् [7]सन्तरितुमभ्यासमर्जयति। तथा इतः[8] स्थानात् निःश्रमं श्रमरहितं यथा भवति तथा सकलान् दिगन्तान् गन्तुं च। [9]केचित्तु [10]दूरगं सदक्रमेण समुद्रान् तरितुं दिगन्तान् गन्तुमिति व्याचक्षते। [11]विशते येन इत्येके तालव्यं शमाहुः। कर्मवेशाद्यदि (पा॰ V. i. 100) त्यत्र तथा विचारात् [12]इति क्षीरस्वामी ।।५२[13]।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

तस्मिन् गुणैरपिभृते गणनादरिद्रै-
स्तन्वी न सा हृदयबन्धमवाप भूपे ।
दैवे [1]विरुन्धति निबन्धनतां वहन्ति
हन्त प्रयासपरुषाणि न पौरुषाणि ।।५३।।

[2]तस्मिन् गुणैरिति । सा तन्वी तस्मिन् भूपे गणनादरिद्रैर्गुणैरसङ्ख्यैः भृतेऽपि[3] हृदयबन्धं न अवाप[4] । हन्त इति खेदे । दैवे विरुन्धति सति विरुद्धे सति पौरुषाणि [5]निबन्धनतां सिद्धेः[6] [7]कारणतां न वहन्ति । किं भूतानि ?। प्रयासेन[8] परुषाणि ।।५३।।

ते निन्यिरे नृपतिमन्यमिमाममुष्मा-
दंसावतंसशिबिकांशभृतः पुमांसः ।
रत्नाकरादिव तुषारमयूखलेखां
लेखानुजीविपुरुषा गिरिशोत्तमाङ्गम् ।।५४।।

ते [1]निन्यिरे इति । तेंऽसानां स्कन्धानाम् अवतंसभूतायाः[2] शिबिकाया अंशस्यैकदेशस्य भृतः पुमांसः इमाम् अन्यं नृपतिं निन्यिरे । कर्त्रभिप्रायविवक्षायामात्मनेपदम् । कुतः ?। अमुष्माद् राज्ञः । यथा लेखानां देवानाम् अनुजीविपुरुषा भृत्या रत्नाकरात् तुषारमयूखस्य[3] लेखां अलां गिरिशस्योत्तमाङ्गां निन्यिरे ।।५४।।

एकैकमद्भुतगुणं[1] धुतदूषणं च
हित्वाऽन्यमन्यमुपगम्य[2]परित्यजन्तीम् ।
एनां जगाद जगदर्चितपादपद्मा
पद्मामिवाऽच्युतभुजान्तरविच्युतां सा ।।५५।।

एकैकम् [इति] । सा जगताम् अर्चितौ पादपद्मौ यस्याः [3]सा तथा[4] एनां जगाद । मतिबुद्धी (पा° III. ii. 188) त्याद्यतीतविहितस्य[5] क्तस्य बाधकमिति केनचिद् व्याकृतम् । तत्तु नाऽऽद्रियते । अतीतेऽपि महाकविप्रयोगदर्शनात् । यथा—कौशिकाद्विदितशापया (रघु° XI. 14) ति । उत्प्रेक्ष्यते—अच्युतस्य श्रीकृष्णस्य भुजान्तराद्विच्युतां पद्मामिव । किं [6]कुर्वतीम् ?। एकैकं राजानम् अद्भुतगुणम् उद्गतगुणं[7] च [8]तथा धुतदूषणं निर्दोषं च हित्वा त्यक्त्वा अन्यम् अन्यं राजानम् उपगम्य

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy.

परित्यजन्तीम् । लक्ष्मीरपि सगुणं निर्दोषं हित्वा अन्यमन्यमुपगम्य[10] त्यजति । चपलत्वात् । अत्र[11] जगतोऽर्चिताविति[12] विग्रहेन च पूजायामिति समासप्रतिषेधात्, मतिबुद्धी (पा° III. ii. 188)त्यादि-सूत्रविहितक्तप्रयोगे, क्तस्य च वर्त्तमान (पा° II. iii. 67)इति षष्ठीविधानात् तृतीयानुपपत्तिरिति चेत्, तन्न। भूतकालसमास सामान्यविवक्षायां, निष्ठे (पा° II. ii. 36)त्यनेन क्तप्रत्यये, न लोकाव्यये(पा° II. iii. 69)ति षष्ठीप्रतिषेधात् उपपत्याऽत एव तृतीयेति। यद्यपि वर्तमाने लडि(पा° III. ii. 123)त्यधिकृत्य, मत्याद्यर्थे वर्त्तमानक्तप्रत्ययस्य उक्तत्वात्, किञ्च अपवादविषये क्वचिदुत्सर्गस्याऽपि समावेश इति मत्याद्यर्थेभ्यो भूतेऽपि निष्ठा भवत्येव। अन्यथा कथमेतदुक्तं भाष्यकारेण। तैः सूत्रविन्यासोऽपि न ज्ञात इति अलमतिप्रसङ्गेन ।।५५।।

ईशः कुशेशयसनाभिशये ! कुशेन
द्वीपस्य लाञ्छिततनोर्यदि वाञ्छितस्ते ।
ज्योतिष्मता सममनेन वनीघनासु
तत्वं विनोदय घृतोदतटीषु चेतः ।।५६।।

ईशः [इति]। हे कुशेशयं पद्मं तस्य सनाभि सदृक् शयो हस्तो यस्याः सा तथा। अयं कुशेन दर्भेण लाञ्छिततनोर्द्वीपस्य ईशो[1] यदि ते तव वाञ्छितः। मतिबुद्धिपूजार्थेभ्यश्चे (पा° III. ii. 188)ति क्तः। क्तस्य च वर्त्तमान (पा° II. iii. 67)इति षष्ठी। तदनेन [2]ज्योतिष्मताभिधेन राज्ञा समं घृतोदस्य समुद्रस्य तटीषु त्वं चेतो विनोदय। किं भूतासु ?। वनी महद्वनं[3] वनसमूहस्ताभिर्घनासु ।।५६।।

वातोर्मिदोलनचलद्दमण्डलाग्र-
भिन्नाभ्रमण्डलगलज्जलजातसेकः ।
स्तम्बः कुशस्य भविताऽम्बरचुम्बिचूड-
श्चित्राय तत्र तव नेत्रनिपीयमानः ।।५७।।

[1]वातोर्मीति। हे भैमि! तत्र कुशस्य स्तम्बो[2] मूलप्रदेशो नेत्रैर्निपीयमानः सन् तव चित्राय[4] भविता। किं [5]भूतः ?। अम्बर-चुम्बिनी चूडाऽग्रभागो यस्य स तथा। पुनः किं भूतः ?। वातस्य

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

ऊर्मीणां दोलनेन चलत् [7]यद्दलानां मण्डलं तस्याऽग्रेण भिन्नम्। अथवा चलन्ति[8] दलान्येव मण्डलाग्राणि तैर्भिन्नं [9]यदभ्रमण्डलं तस्मात् गलता जलेन जातः सेको[10] यस्य स तथा ।।५७।।

पाथोधिमाथसमयोत्थितसिन्धुपुत्री-
पत्पङ्कजार्पणपवित्रशिलासु तत्र ।
पत्या सहाऽऽवह विहारमयैर्विलासै-
रानन्दमिन्दुमुखि ! मन्दरकन्दरासु ।।५८।।

[1]पाथोधिमाथेति। हे इन्दुमुखि ! तत्र त्वं पत्या सह मन्दरकन्दरासु विहारमयैर्विलासैरानन्दमावह। तत्प्रकृतवचने मयडि (पा॰ V. iv. 21) ति मयट्। किं भूतासु ?। [2]पाथोधेः समुद्रस्य [3]माथसमये उत्थिता या सिन्धुपुत्री लक्ष्मी[:] तस्याः [4]पदावेव पङ्कजे अथवा पदब्जः पदन्यासः तदा पद एव पङ्कजानि[5] कमलानि तेषाम् अर्पणेन पवित्रा[6] शिला यासां तासु[7]। शिलातल्पास्विति पाठे पवित्राणि शिलातलानि यासां तासु तथा। राजपुत्रीत्यादिवत्षष्ठीतत्पुरुषमात्रे दुहितुर्विभाषया पुत्रट्त्वमुशन्ति ।।५८।।

आरोहणाय तव सज्ज इवाऽस्ति तत्र
सोपानशोभिवपुरश्मवलिच्छटाभिः ।
भोगीन्द्रवेष्टशतघृष्टिकृताभिरब्धि-
क्षुब्धाचलः कनककेतकगोत्रगात्रि ! ।।५९।।

[1]आरोहणायेति। हे कनककेतकस्य गोत्रगात्रं यस्याः सा तथा। [2]तत्र अब्धेः समुद्रस्य क्षुब्धो [3]मन्थाचलो मन्दरस्तव आरोहणाय सज्ज इवाऽस्ति। किं भूतः ?। अश्मनां [4]पाषाणानां या वलयस्तासां छटा उत्तरोत्तरपरिपाटीरूपास्ताभिः सोपानवत्[5] [6]शोभि वपुर्यस्य स तथा। किं भूताभिः ?। भोगीन्द्रस्य मन्थननेत्रीभूतस्य वेष्टशतस्य घृष्टिभिर्घर्षणैः कृताभिः। क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानि मन्थमनस्तमःसक्ताविस्पष्टस्वरानायासभृशेष्वि (पा॰ VII. ii. 18) तीडभावः ।।५९।।

मन्थानगः स भुजगप्रभुवेष्टघृष्टि-
लेखावलद्वलयनिर्झरवारिधारः ।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

त्वन्नेत्रयोः स्वभरयन्त्रितशीर्षशेष-
शेषाङ्गवेष्टिततनुभ्रममातनोतु ।।६०।।

[2]मन्थानग इति । स मन्थानगस्तव नेत्रयोः स्वस्याऽऽत्मनः पर्वतस्यैव भरेण यन्त्रितमाक्रान्तं शीर्षं यस्य एवंविधो य शेषनागस्तस्य [3]शेषम् अवशिष्टं [4]यदङ्गं पुच्छभागः तेन वेष्टितस्य तनोः शरीरस्य भ्रमं भ्रान्तिम् आतनोतु [6]विस्तारयतु । किंभूतः ?। भुजगप्रभोः [7]सर्पाधिराजस्य वासुकेर्मन्थननेत्रीकृतस्य [8]वेष्टनरूपस्य रज्जभूत स्य घृष्टिस्तस्या लेखासु वलन्ती [9]वलयाकारा । धवलेति पाठे धवला निर्झरस्य वारिधारा[10] यस्य स तथा ।।६०।।

एतेन ते स्तनयुगेन सुरेभकुम्भौ
पाणिद्वयेन दिविषद् द्रुमपल्लवानि ।
आस्येन स स्मरतु नीरधिमन्थनोत्थं
स्वच्छन्दमिन्दुमपि सुन्दरि ! मन्दराद्रिः ।।६१।।

एतेन [इति] । हे सुन्दरि ! [1]स [2]मन्दराद्रिरेतेन ते तव स्तनयुगेन सदृशेन दृष्टेन [3]सुरेभस्यैरावणस्य कुम्भौ यथानुभवं स्मरतु । [4]ते तव पाणिद्वयेन दिविषदां[5] द्रुमस्य कल्पवृक्षस्य पल्लवानि[6] स्मरतु । तवाऽऽस्येन [7]नीरधेर्मन्थनोत्थम् इन्दुं च स्मरतु । स्वच्छन्दं स्वैरम् ।।६१।।

वेदैर्वचोभिरखिलैः कृतकीर्तिरत्ने
हेतुं विनैव धृतनित्यपरार्थयत्ने ।
मीमांसयेव भगवत्यमृतांशुमौलौ
तस्मिन्महीभुजि तयाऽनुमतिर्न भेजे ।।६२।।

वेदैः [इति] । तया तस्मिन् महीभुजि अनुमतिरनुज्ञा न भेजे । किं भूते ?। वेदैः सत्यैरथ वा वेदैः श्रुतिभिरखिलैरपि वचोभिः कृतं कीर्त्तिरत्नं यस्य तस्मिंस्तथा । [1]ज्योतिष्मान्वेदविष्णुपुराणप्रभृतिषु च प्रसिद्धः । तथा हेतुं कारणं विना एव धृतो नित्यं परार्थं यत्नो येन तत्र तथा । कया इव ?। [2]मीमांसया इव । यथा पूर्वमीमांसया भगवति अमृतांशुमौलौ [3]ईश्वरेऽनुमतिर्न[4] भज्यते । किं भूतैः वेदैः ?।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

श्रुतिभिरखिलैरपि[5] वचोभिर्वाक्यैः। [6]कृतकीर्त्तिरत्ने तथा निष्कारण-परार्थपरायणे[7]। तथा च श्रुतिः एक एव रुद्रोऽवतस्थे[8] (निरुक्त° I. 15)। अपरा च श्रुतिः—य सर्वज्ञः सर्ववित् (मु° I. i. 9)। इत्यादिभिर्वचोभिर्वेदैः [9]श्रुतिः मीमांसा यदि ईश्वरमङ्गीकुरुते, तदा[10] वेदानामनित्यत्वं पौरुषेयत्वात् प्राप्नोति। [11]तथा चाप्रामाण्यं कालिदासादिवाक्यवत् स्यात्[12]। ततश्चेश्वरं न मनुते ॥६२॥

तस्मादिमां नरपतेरपनीय तन्वीं
राजन्यमन्यमथ जन्यजनः स निन्ये।
स्त्री भावभावितपदामविमृश्य याच्ञा-
मर्थी निवर्त्य विधनादिव वित्तवित्तम् ॥६३॥

[1]तस्मादिति। अथ [2]स जन्यजनः इमां तन्वीं तस्मान्नरपतेरपनीय अन्यं [3]राजन्यं निन्ये। [4]कर्त्रभिप्रायक्रियाफलविवक्षया आत्मनेपदम्। यथा अर्थी अविमृश्य कृतां याच्ञां [5]विधनात। निर्धनात् निर्वर्त्य [6]वित्तैर्वित्तं प्रसिद्धं पुरुषं [7]नयति। किं भूताम्?। [8]स्त्रीणां भावा रत्याद्याः स्थायिनो, निर्वेदाद्या व्यभिचारिणः, स्तम्भाद्याः सात्त्विकास्तैर्भावितं प्राप्तं पदं स्थानं यस्याः तां तथा। याच्ञा तु स्त्रियां भावे। भावितम् उत्पादितं पदं सुबन्तमभिधायकं यस्य अभिधेययोस्वां तथा। तथा च यजयाचयतविच्छप्रच्छरक्षो नङि(पा° III. iii. 90)ति। अत्र पदमञ्जर्यां हरदत्तमिश्रः—नङन्ताः सर्वेष

स्त्रीलिङ्ग इति। भावे (पा° III. iii. 18) इत्यतश्च भावेऽधिकारोऽनुवर्तते। श्रीभावेति श्रीभावेन लक्ष्मीत्वेन भावितं पदं [9]यस्याः। अथवा श्रियो लक्ष्म्या भावेन [10]भावितं सत् तया सम्भाविते पदे यस्यास्तां तथा। सश्रीकचरणां पक्षे श्रियो लक्ष्म्या भावेन सत् तया भावितं पदं यस्यास्तां तथा। यत्र श्रीस्तत्र[11] याच्ञा क्रियते एव। [12]अविमृश्येति, ऋदुपधाच्चावलृपिचृतेरि(पा° III. i. 110)ति क्यप्। ल्यबन्तं वा। संज्ञायां जन्या (पा° IV. iv. 82) इति निपातः ॥६३॥

देवी पवित्रितचतुर्भुजवामभागा
वागालपत् पुनरिमां[1] गरिमाभिरामाम्।
अस्याऽरि निष्कृपकृपाणसनाथपाणेः
पाणिग्रहावनुगृहाण गणं गुणानाम् ॥६४॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

देवी (ति) । देवी [2]भारती वाक् पुनरिमामालपत् । किं भूता ?। पवित्रित: चतुर्भुजस्य वामभागो यया सा तथा ।[3] आगमे हि सरस्वती श्रीकृष्णस्य शक्तिरूपतया पत्नीत्वेन श्रूयते । किं भूताम् ?। [4]गरिम्णा अभिरामाम् । हे भैमि ! अस्य पाणिग्रहात् गुणानां गणमनुगृहाण । किं भूतस्य ?। अरिषु [5]निष्कृपेन कृपाणेन सनाथ: पाणिर्यस्य तस्य तथा ।।६४।।

द्वीपस्य शाल्मल इति प्रथितस्य नाथ:
पाथोधिना वलयितस्य सुराम्बुनाऽयम् ।
अस्मिन् वपुष्मति न विस्मयसे गुणाब्धौ
रक्ता तिलप्रसवनासिकि: नाऽसि किं वा ।।६५।।

द्वीपस्य [इति] । अयं शाल्मल[1] इति प्रथितस्य द्वीपस्य नाथः । किं भूतस्य ?। सुराम्बुना पाथोधिना [2]वलयितस्य । [3]तिलस्य प्रसवं पुष्पं तद्वत् नासिका यस्यास्तस्या:[4] सम्बोधनम् । [5]त्वम् अस्मिन् नाम्ना [6]वपुष्मति [7]राजनि गुणस्य अब्धौ समुद्रे किं न विस्मयसे ?। किं वा रक्ता अनुरागपरा नाऽसि न [8]भवसि । [9]त्वमर्थंप्रतिरूपकर्मं असीत्यव्ययं वा ।।६५।।

विप्रे धयत्युदधिमेकतमं त्रसत्सु
यस्तेषु पञ्चसु विभाय न सीधु सिन्धुः ।
तस्मिन्ननेन च निजालिजनेन च त्वं
सार्धं विधेहि मधुरा मधुपान केली: ।।६६।।

[1]विप्रे धयतीति । तस्मिन् समुद्रे[2] त्वम् अनेन राज्ञा च निजेनाऽऽलिजनेन च सार्धं मधुरा मधुपानस्य [3]केली: विधेहि । य: [4]सीधुसिन्धु: सुराब्धिर्विप्रेऽगस्त्ये एकतममुदधिं धयति चुलुकं कृत्वा पिबति सति तेषु पञ्चसु समुद्रेषु [5]त्रसत्सु सत्सु [6]न बिभाय । [7]ब्राह्मणस्य [8]सीधुविषये, नित्यं मद्यं ब्राह्मणो वर्जयेदिति निषेधात् । क्वचित्तु [9]शीधुशब्दोऽपि । यथा—[10]पीतशीधुमदिरैर्मिथुनानामि (शिशु° X. 11) ति ।।६६।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

द्रोणः स तत्र वितरिष्यति भाग्यलभ्य-
सौभाग्यकार्मणमणीनुपदां[1] गिरिरते ।
तद्द्वीपदीप इव दीप्तिभिरौषधीनां
चूडामिलज्जलदकज्जलदर्शनीयः ।।६७।।

द्रोणः[2] स तत्रेति । तत्र स द्रोणनामा गिरिर्भाग्येन लभ्यं यत् सौभाग्यं तस्य [3]कार्मणभूतान् वशीकरणान् मणीन्[4] ते तव उपदां वितरिष्यति । उत्प्रेक्ष्यते—औषधीनां दीप्तिभिस्तस्य द्वीपस्य दीप इव । तथा चूडाग्रे मिलन्तो जलदा एव कज्जलं तेन[5] दर्शनीयः । 'कार्मणमयीमिति पाठे [6]कार्मणरूपामिति[व्याख्येयम् ।।६७।।

तद्द्वीपलक्ष्मपृथुशाल्मलितूलजालैः
क्षोणीतले मृदूनि मारुत चारुकीर्णैः ।
लीलाविहारसमये चरणार्पणानि
योग्यानि ते सरससारसकोषमृद्धिः[1] ।।६८।।

[2]तद्द्वीपलक्ष्मेति । हे सरसं[3] यत् सारसं सरसिजं तस्य कोषस्तद्वत् मृद्वि ! तत्र क्षोणीतले ते[4] तव चरणार्पणानि योग्यानि । क्व ?। लीलाविहारसमये । किं भूते[5] तले ?। तस्य द्वीपस्य[6] लक्ष्म चिह्नं यः पृथुः शाल्मली[7] वृक्षः तस्य तूलजालैर्मृदूनि । किं भूतैः ?। मारुतेन चारुकीर्णैः ।।६८।।

एतद्गुणश्रवणकालविजृम्भमाण-
तल्लोचनाञ्चलनिकोचनसूचितस्य ।
भावस्य चक्रुरुचितं शिबिकाभृतस्ते
तामेकतः क्षितिपतेरपरं नयन्तः ।।६९।।

एतत् [इति] । ते शिबिकाभृतो भावस्याऽभिप्रायस्य [1]उचितं सदृशं चक्रुः । किं भूतस्य [2]भावस्य ?। एतस्य राज्ञो गुणानां श्रवणकाले विजृम्भमाणायास्तस्या[3] यो लोचनाञ्चलस्तस्य निकोचनेन सूचितस्य । जृम्भसमये हि चक्षुःप्रान्तस्य स्वभावान्निमीलनं भवति । विजृम्भमाण' इति लोचनाञ्चलविशेषणं[4] वा । किं कुर्वन्तः[5] ?। एकस्मात् [6]क्षितिपतेः राज्ञः सकाशात् अपरं [7]राजानं तां नयन्तः[8] ।।६९।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

तां भारती पुनरभाषत नन्वमुष्मिन्
काश्मीरपङ्कमिषलग्नजनानुरागे[1] ।
श्रीखण्डलेपमयदिग्जयकीर्तिराजि-
राजद्भुजे भज महीभुजि भैमि ! भावम् ।।७०।।

तां भारती[ति] । भारती [2]देवी तां पुनरभाषत । ननु हे भैमि ! अमुष्मिन् [3]महीभुजि भावं भज । किं भूते ?। काश्मीरस्य कुङ्कुमस्य पङ्कमिषेण लग्नो जनानुरागो यत्र तस्मिंस्तथा । [4]तथा श्रीखण्डलेपमयी या [5]दिग्जयकीर्तिराजिः तया राजन्तौ भुजौ यस्य तस्मिंस्तथा ।।७०।।

द्वीपं द्विपाधिपतिमन्दपदे ! प्रशास्ति
प्लक्षोपलक्षितमयं क्षितिपस्तदस्य ।
मेधातिथेस्त्वमुरसि स्फुर सृष्टसौख्या
साक्षाद्यथैव कमला यमलार्जुनारेः ।।७१।।

द्वीपम् [इति] । हे द्विपाधिपतिवत्[1] मन्दं पदं यस्तास्तस्याः[2] सम्बोधनम् । अयं क्षितिपः प्लक्षवृक्षोपलक्षितं द्वीपं प्रशास्ति । तत्त्वम् अस्य मेधातिथिनाम्न उरसि [3]हृदये स्फुर विलस । सृष्टसौख्या[4] सती । यथा साक्षात् कमला प्रत्यक्षा[5] श्रीर्यमलार्जुनयोर्वृक्षयोररेः श्रीकृष्णस्य उरसि स्फुरति ।।७१।।

प्लक्षे महीयसि महीवलयातपत्रे
तत्रेक्षिते खलु तवाऽपि मतिर्भवित्री ।
खेलां विधातुमधिशाखविलम्बिदोला-
लोलाखिलाङ्गजनताजनितानुरागे ।।७२।।

प्लक्षे [इति] । तत्र खलु महीयसि प्लक्षे महीवलयस्याऽऽतपत्रे ईक्षिते सति तवाऽपि खेलां विधातुं मतिर्भवित्री । किं भूते ?।[1] अधिशाखं विलम्बिनीषु दोलासु आन्दोलनेषु लोलाखिलाङ्गा[2] या जनतास्तासां ताभिर्वा जनितोऽनुरागो येन[3] तत्र तथा ।।७२।।

पीत्वा तवाऽधरसुधां वसुधासुधांशु-
र्न श्रद्दधातु रसमिक्षुरसोदवाराम् ।
द्वीपस्य तस्य दधतां परिवेषवेषं
सोऽयं चमत्कृतचकोरचलाचलाक्षिः ।।७३।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

पीत्वा [इति]। हे चमत्कृतचकोरस्येव चलाचलेऽक्षिणी [1]यस्याः तस्याः सम्बोधनम्। सोऽयं राजा वसुधायाः सुधांशुश्चन्द्रः। तवाऽधरसुधां पीत्वा इक्षुरसोदस्य समुद्रस्य वाराम् उदकानां [2]रसं न श्रद्दधातु। किं भूतानाम् ?। तस्य द्वीपस्य परिवेषस्य वेषं सादृश्यं दधताम् ॥७३॥

सूरं न सौर इव नेन्दुमवीक्ष्य तस्मिन्
[1]नाऽश्नाति यस्तदितरत्रिदशानभिज्ञः।
तस्यैन्दवस्य भवदास्यनिरीक्षयैव
दर्शेऽश्नतोऽपि न भवत्यवकीर्णिभावः ॥७४॥

सूरम् [इति]। तस्मिन् द्वीपे या इन्दुमवीक्ष्य[2] [3]अदृष्ट्वा न अश्नाति। किं भूतः ?। तस्माच्चन्द्रादितरो[4] यस्त्रिदशो देवस्तत्राऽनभिज्ञः। तत्रैव भक्तः। क इव ?। सौर इव। सूर्यभक्तो यथा सूरम् [5]अवीक्ष्य न अश्नाति। तथा य इन्दुव्रती तस्यैन्दवस्य दर्शेऽमावास्यायाम् [6]अश्नतो [7]भुञ्जानस्याऽप्यवकीर्णिभावो[8] व्रतलोपो न भवतु। कया ?। भवत्या आस्यस्य निरीक्षयैव। [9]यतस्तव मुखं चन्द्र एव[10]। इन्दौ भक्तिरस्य, तत्र भक्तिरि त्यण् प्रत्ययः ॥७४॥

उत्सर्पिणी न किल तस्य तरङ्गिणी या
त्वन्नेत्रयोश्हह तत्र विपाशि जाता।
नीराजनाय नवनीरजराजिरास्ता-
मत्राऽञ्जसाऽनुरज राजनि राजमाने ॥७५॥

[1]उत्सर्पिणीति। अहह इति [2]हर्षे। तस्य द्वीपस्य या विपाट् नाम्नी तरङ्गिणी नदी [3]उत्सर्पिणी। तस्येति सम्बन्धे षष्ठी। उत्क्रम्य सर्पतीत्येवंशीला। एवंविधा न। [4]आवृत्त्या कर्मषष्ठ्यपि। तस्य द्वीपस्य नोत्सर्पिणी। ऊर्ध्वं सर्पतीत्येवंशीला नानाधिका किन्तु द्वीपवर्षसमाना स्वस्य द्वीपस्य सुखदं नाम यद्वर्षं तस्य[5] मर्यादामतिक्रम्य वर्षान्तरं न[6] गच्छति। तस्मादेव वर्षात् समुद्रगा। तथा च विष्णुपुराणोक्तालक्षद्वीपस्य [8]शान्तभयादीनि सप्तवर्षाणि अनुक्रम्योक्तम्-तेषां नद्यश्च[9] सप्तैव वर्षाणां[तु] समुद्रगाः। नामतस्ताः प्रवक्ष्यामि श्रुताः पापं हरन्ति याः ॥ II. iv. 10 ॥ अनुतप्ता [10]शिखीचैव विपाशा

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

त्रिदिवाक्रमु:[11]। अमृता सुकृता चैव सप्तैतास्तत्र निम्नगा: ।। 11 ।। [12]पुनर्विष्णुपुराणे-अपसर्पिणी न तेषां [13]च तथैवोत्सर्पिणी न[14] च ।। II. iv 13cd ।। पिबन्ति तेषां तोयानि ।। अस्याऽर्थ:—तेषु द्वीपेषु या: प्रत्यक्षं[15] नद्यो मुख्या: सन्ति तासां तोयानि द्वीपस्था जना: पिबन्ति। तथा नदीनां मध्यात् [16]काचित् अवसर्पिणी तद्द्वीपेभ्य: सकाशात् हीना न चोत्सर्पिणी, [17]नाधिका, किन्तु द्वीपेषु लोकोपयोग-योग्या [18]पुनस्तथैव[19]-ता: पिबन्ति सदा हृष्टा [20]नदीर्जनपदास्तु ते। [21]अवसर्पिणी [न]तेषां च ता एवोत्सर्पिणीर्विभु:[22] ।। II. iv. ।। इति श्रूयते।[23] तस्यां विपाशि जाता नवसरोजराजि: तव नेत्रयोर्नी-राजनाय अवतारणाय आस्ताम्। तस्यां जाता सरोजराजिस्तव[24] नेत्रयोरुपरि उत्तार्य त्यज्यताम्। अथ च तरङ्गवत्यपि त्वन्नेत्रयोर्नो-त्सर्पिणी। तरङ्गिणीति श्लिष्टम्। नेत्रे किल तरङ्गयुक्ते। नद्यपि तरङ्गवती। तथाऽपि नैवाऽधिका किन्तु हीनैव। अतएवाक्यद्वयसन्धौ त्वन्नेत्रयोरिति पदं तस्मात्त्वम् अत्र[25] राजमाने राजनि [26]अञ्जसा सत्यभावेन [27]अनुरज ।।७५।।

एतद्यशोभिरखिलेऽम्बुनि सन्तु हंसा
दुग्धीकृते तदुभयव्यतिभेदमुग्धा: ।
क्षीरे पयस्यपि पदे द्वयवाचिभूयं
नानार्थकोषविषयोऽद्य मृषोद्यमस्तु ।।७६।।

[1]एतद्यशोभिरिति। हंसा एतस्य राज्ञो यशोभिरखिलेऽम्बुनि [2]दुग्धीकृते सति तस्योभयस्य यो व्यतिभेद: परस्परं पृथग्भावस्तत्र मुग्धा: मोहं गता: सन्तु। अद्य क्षीरे पदे तथा पयसि पदेऽपि यत्[3] द्वयवाचिभूयम् अर्द्धद्वयवाचित्वं मृषोद्यम् अस्तु। किं भूतम्?। नानार्थकोषस्याऽनेकार्थाभिधानकोशस्य विषय:। क्षीरशब्दो दुग्धजल-योर्वाचक:। [4]पय:शब्दोऽपि। यशसा सर्वं धवलीकृतम्। अतस्तदपि मृषा भवतु ।।७६।।

ब्रूम: किमस्य नलमप्यलमाजुहूषो:
कीर्ति: स चैष च समादिशत: स्म कर्तुम्।
स्वद्वीपसीमसदिदीश्वरपूरपार-
[1]वेलाबलाक्रमणविक्रममक्रमेण ।।७७।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

ब्रूमः [इति]। हे देवि[2]! वयम् अस्य किं ब्रूमः?। किंभूतस्य?। नलमप्यलम् आजुहुषोः स्पर्द्धितुमिच्छोः। यतः स च नलः एष च राजा ताः स्वाः कीर्तीः [3]स्वस्य द्वीपस्य सीम्नि यः सरितामीश्वरस्तस्य समुद्रस्य पूरपारे या वेलाः [4]पारतटं तस्य बलेनाऽऽक्रमणेन[5] विक्रमं कर्तुम्। अचलेति[6] पाठे वेलाया अचलानां पर्वतानामाक्रमणेन[7] इति व्याख्येयम्। समादिशतः स्म। केन?। अक्रमेण युगपत् ॥७७॥

अम्भोजगर्भरुचिराऽथ विदर्भसुभ्रू-
स्तं गर्भरूपमपि रूपजितत्रिलोकम्।
वैराग्यरूक्षमवलोकयति स्म भूपं
दृष्टिः पुरत्रयरिपोरिव पुष्पचापम् ॥७८॥

अम्भोजे[ति]। अथ सा अम्भोजगर्भवत्[1] रुचिरा निदर्भसुभ्रूः तं भूपं वैराग्येण रूक्षं यथा भवति [2]तथाऽवलोकयति स्म। किं भूतम्?। गर्भरूपमपि। बाल्येऽपि रूपेण जितास्त्रयो लोका येन तं तथा। यथा पुरत्रयरिपोर्दृष्टिः पुष्पचापं रूक्षम् [3]अवलोकितवती। दृष्टिरपि अम्भोजगर्भरुचिरा। कामो रूपजितत्रिलोकश्च ॥७८॥

ते तां ततोऽपि चक्षुर्जगदेकदीपा-
दंसस्थलस्थितसमानविमानदण्डाः।
चण्डद्युतेरुदयिनीमिव चन्द्रलेखां
सोत्कण्ठकैरववनी सुकृतप्ररोहाः ॥७९॥

ते ताम् [इति]। ते [1]अंसस्थलेषु स्थितः समानोऽन्यूनातिरिक्तो विमानदण्डो येषां ते जन्याः तां ततोऽपि जगताम् [2]एकदीपात् राज्ञः सकाशात् चक्षुः। यथा [3]सोत्कण्ठा या कैरववनी तस्याः शकृतप्ररोहाः जगदेकदी[पात्]चण्डद्युतेः श्रीसूर्यात् [4]उदयिनीं चन्द्रलेखां कर्षति। अमावास्यायां [5]श्रीसूर्यमिलितश्चन्द्रः प्रतिपदि मण्डलाद्बहिर्निःसरति ॥७९॥

भूपेषु तेषु न मनागपि वत्तचित्ता
विस्मेरया वचनदेवतया तयाऽथ।
वाणीगुणोदयतृणीकृतपाणिवीणा-
निक्काणया पुनरभाणि मृगेक्षणा सा ॥८०॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

भूपेषु [इति]। अथ तया वचनदेवतया[1] सा मृगेक्षणा पुनरभाणि। किं भूता ?। तेषु भूपेषु मनागपि न [2]दत्तचित्ता। किं भूतया ?। विस्मेरया साश्चर्यया। [3]पुनः किं भूतया ?। वाण्या गुणोदयेन माधुर्येण तृणीकृतः पाणिवीणानिक्वाणो[4] यया[5] तया [6]तथा ॥८०॥

यन्मौलिरत्नमुदितासि स एष जम्बू-
द्वीपस्त्वदर्थमिलितैर्युवभिर्विभाति।
दोलायितेन बहुना भवभीतिकम्प्रः
कन्दर्पलोक इव खात्पतितस्त्रुटित्वा ॥८१॥

[1]यन्मौलिरत्नमिति। हे भैमि! यस्य [2]द्वीपस्य मौलिरत्नं [3]मुकुटचूडारत्नम् [4]उदितासि स एष [5]जम्बूद्वीपस्त्वदर्थं मिलितैर्युवभिर्विभाति। [6]द्वयन्तरुपसर्गेभ्योऽप ईदि(पा॰ VI. iii. 47)ति। उत्प्रेक्ष्यते—खात् आकाशात् त्रुटित्वा पतितः कन्दर्पलोक इव। केन पतितः ?। बहुना दोलायितेन चलत्वेन। किं भूतः ?। भवात् श्रीमहादेवात् या [7]भीतिस्तया कम्प्रः कम्पमानः[8] ॥८१॥

विष्वग्वृतः परिजनैरयमन्तरीपै-
स्तेषामधीश इव राजति राजपुत्रि[1]।
हेमाद्रिणा कनकदण्डमहातपत्रः
कैलासरश्मिचयचामरचक्रचिह्नः ॥८२॥

[1]विष्वगिति। हे राजपुत्रि! अयं द्वीपस्तेषां द्वीपानाम् अधीश इव राजेव राजति। किं भूतः ?। अन्तरीपैर्द्वीपैः[2] अन्यैः परिजनैरिव विष्वक् समन्तात् वृतो वेष्टितः। किं भूतः ?। हेमाद्रिणा कनकदण्डं [3]महत्पत्रं यस्य स तथा। कैलासस्य ये रश्मयस्तेषां चय एव चामराणां चक्रं तदेव चिह्नं राजलक्षणं यस्य स तथा। [4]अन्तरशब्दादप ईत् ॥८२॥

एतत्तरुस्तरुणि! राजति राजजम्बूः
स्थूलोपलानिव फलानि विमृश्य यस्याः।
सिद्धस्त्रियः प्रियमिदं निगदन्ति दन्ति-
यूथानि केन तरुमारुरुहुः पथेति ॥८३॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]एतत्तरुरिति । हे[2] तरुणि ! एतस्य द्वीपस्य तरुः राजजम्बू राजति [3]यस्याः फलानि स्थूलानुपलान् पाषाणानिव[4] विमृश्य मत्त्वा सिद्धानां स्त्रियः प्रियं भर्त्तारमिदमिदमिति[5] निगदन्ति । हे प्रिय ! एतानि दन्तियूथानि केन पथा तरुं जम्बूम् आरुरुहुः । हस्तिप्रमाणानि फलानि दृष्ट्वा तासां[6] भ्रान्तिर्जातेत्यर्थः ।।८३।।

जाम्बूनदं जगति विश्रुतिमेति मृत्स्ना
कृत्स्नाऽपि सा तव रुचा विजितश्रि यस्याः ।
तज्जाम्बवद्रवभवाऽस्य सुधाविधाम्बु-
[1]र्जम्बूसरिद्वहति सीमनि कम्बुकण्ठि ! ।।८४।।

[2]जाम्बूनदमिति । [3]कम्ब्वाकृतिस्त्रिवलया ग्रीवा यस्यास्तस्याः सम्बोधनम् । हे कम्बुकण्ठि ! रेखात्रयाङ्कितग्रीवे ! अस्य द्वीपस्य सीमनि सा जम्बू नाम्नी सरित् [4]वहति । किं भूता ?। तस्य वृक्षस्य यो जम्बूफलोद्भवो[5] द्रवो रसस्तद्भवा[6] । अन्ये—सा चासौ जाम्ब-[7]वद्भवभवा चेति व्याचक्षते । यच्छब्दानुरोधात् । केचित्तु विपर्या-सेनाऽर्द्धंद्वयं पठन्ति । तथा [8]सुधाविधम् अमृतसदृशम् अम्बु यस्याः सा तथा । यस्याः नद्याः सा कृत्स्नाऽपि मृत्स्ना मृत्तिका जगति जाम्बूनदं सुवर्णमिति[9] [10]विश्रुतिं [11]प्रसिद्धिम् एति । किं भूतम् ?। तव रुचा विजिता श्रीर्यस्य तत्तथा[12] ।।८४।।

अस्मिन् जयन्ति जगतीपतयः सहस्र-
मस्राश्रुसार्द्ररिपुतद्वनितेषु तेषु ।
रम्भोरु ! चारु कतिचित्तव चित्तबन्धि-
रूपान्निरूपय मुदाऽहमुदाहरामि ।।८५।।

अस्मिन् [इति] । अस्मिन् द्वीपे जगतीपतयः सहस्रं जयन्ति । हे रम्भोरु ! त्वं चारु यथा भवति निरूपय । तेषु मध्ये अहं कतिचित्तव [1]चित्तबन्धि रूपं येषां तांस्तथाविधान् मुदा उदाहरामि । किं भूतेषु ?। अस्रैः [2]रुधिरैरश्रुभिर्यथासङ्ख्यं सार्द्रा रिपवस्तेषां [3]रिपूणां वनिताश्च येषां तेषु तथा । रुधिरेण [4]रिपूणां सार्द्रत्वम् [5]अश्रुभिश्च रिपुकलत्राणां च । 'सान्द्रेति [6]पाठान्तरम् ।।८५।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

प्रत्यर्थियौवतवतंसतमाल मालो-
न्मीलत्तमः प्रकरतस्करशौर्यसूर्ये ।
अस्मिन्नवन्तिनृपतौ गुणसन्ततीनां
विश्रान्तिधामनि मनो दमयन्ति ! किं ते ॥८६॥

[1]प्रत्यर्थीति । हे दमयन्ति ! अस्मिन्नवन्त्या उज्जयिन्या [2]नृपतौ किं ते तव मनो वर्त्तते ?। किं भूते ?। गुणसन्ततीनां विश्रान्तिधामनि [3]विश्रमस्थानके । पुनः किं भूते ?। प्रत्यर्थिनां यौवतस्य[4] युवतिसमूहस्य वतंसरूपा[5] या [6]तमालमाला पुष्पमाला सैव उन्मीलत्तमःप्रकर[7]स्तस्य तस्करो हर्त्ता शौर्यमेव सूर्यो यस्य तस्मिंस्तथा ॥८६॥

तत्राऽनुतीखनवासितपस्विविप्रा
[1]शिप्रातवोर्मिभुजया जलकोलिकाले ।
आलिङ्गनानि ददती भविता वयस्या
हास्यानुबन्धरमणीयसरोरुहास्या ॥८७॥

[2]तत्राऽनुतीखनेति । तत्रोज्जयिन्यां शिप्रा नदी [3]तव जलकेलिकाले ऊर्मय एव भुजा तया आलिङ्गनानि ददती सती वयस्या सखी भविता भविष्यति । किं भूता ?। अनुतीरं वनेषु [4]वासिनस्तपस्विनो वानप्रस्था विप्रा यस्या सा तथा । पुनः किं भूता ?। [5]हास्यस्य विकासस्याऽनुबन्धेन रमणीयं सरोरुहमेवाऽऽस्यं यस्याः सा तथा ।[6] पक्षे, हसितम् । हास्यानुबन्धीत्यपि क्वचित्पाठः ॥८७॥

अस्याऽधिशय्य पुरमुज्जयिनीं भवानी
जागर्तिया सुभगयौवतमौलिमाला ।
पत्याऽर्धकायघटनाय मृगाक्षि ! तस्या
शिष्या भविष्यसि चिरं वरिवस्ययाऽपि ॥८८॥

[1]अस्याऽधिशय्येति । अस्य राज्ञः पुरमुज्जयिनीम् [2]अधिशय्य आश्रित्य भवानी देवी पार्वती जागर्ति । या देवी सुभगस्य [3]यौवतस्य युवतिसमूहस्य मौलिमाला मुकुटरूपा । हे मृगाक्षि ! त्वं तस्याः पार्वत्याः चिरं वरिवस्यया शिष्या भविष्यसि । किमर्थम् ?। पत्या सह अर्धकायस्य घटनाय । अपीति सम्भावने । शिष्याऽपीति । अथवा

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

घटनायाऽपीति भिन्नक्रमे वा । अथ च यथा देव्या ईश्वरेण श्रीमहाकालेन ससार्द्धं शरीरघटना[4] वरिवस्यया कृता, तथा त्वम् [5]अपि करिष्यसि । वरिवस्ययाऽपि भर्तृशुश्रूषयाऽपि छात्री भविष्यसि । यथा सा शुश्रूषां कुरुते, तथा त्वमपि कुरु । अन्तेवासी किल गुरुशीलमनुसरति । [6]अधिशीङ्स्थासां कर्मे (पा° I. iv. 46) ति कर्मभूताधारत्वम् । इन्द्र-वरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक् (पा° IV. i. 49) । नमोवरिवश्चित्रङ: क्यच् (पा° III. i. 14) ॥८८॥

निःशङ्कमङ्कुरिततां रतिवल्लभस्य
देवः स्वचन्द्रकिरणामृतसेचनेन ।
तत्राऽवलोक्य सुदृशां हृदयेषु रुद्र
स्तद्देहदाहफलमाह स किं न विद्मः ॥८९॥

[1]निःशङ्कमिति । तत्राऽवन्त्यां स देवो रुद्रः [2]स्वस्य चन्द्रकिरणा-मृतस्य सेचनेन [3]रतिवल्लभस्य [4]कामस्य निःशङ्कं सुदृशां हृदयेषु [5]अङ्कुरितताममवलोक्य तस्य कामस्य [6]देहदाहस्य फलं किमाह तद्वयं न विद्मः । यदि परमेश्वरेण कामो दग्धस्तत्कथं निजामृतेन कामिनीहृदयेषु पुनरुज्जीवितः ॥८९॥

आगःशतं विदधतोऽपि समिद्धकामा
नाऽधीयते परुषमक्षरमस्य वामाः ।
चान्द्री न तत्र हरमौलिशयालुरेका-
ऽनध्यायहेतुतिथिकेतुरपैति लेखा[1] ॥९०॥

[2]आगःशतमिति । अस्य राज्ञः आगसाम् अपराधानां शतं विदधतोऽपि [3]वामाः स्त्रियः परुषम् अक्षरं न अधीयते अप्रियं न [4]वदन्ति । यतः [5]समिद्ध[:]कामो यासां तास्तथा । यतस्तत्रैका[6] चान्द्री लेखा न अपैति अपगच्छति । किं भूता ?। हरस्य[7] मौलौ शयालुः सर्वदा स्थिता । किं भूता ?। [8]अनध्यायहेतुर्वा तिथिः शुक्लप्रतिपत् [9]शुक्लचतुर्दशी च । [10]पञ्चदशकलपक्षे कृष्णचतुर्दशी । अथवा पञ्चदशकलश्चन्द्रः केषाञ्चिन्मतम् । श्रुतिस्मृतिपुराणज्योतिः शास्त्रे, दृष्ट्वा तु षोडशकलश्चन्द्रः । तथा चाऽयमेव कविराह—यशः पादाङ्गुष्ठे (नै° VII. 107) त्यादि । अन्त्यां कलां दर्श इवे (रघु°

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

XIV. ८०)ति कालिदासः। अतोऽनध्यायहेतुतिथिरमावास्या[11] तस्यां कलामात्रशेषश्चन्द्रः। [12]परं न सा दृश्यतेऽतिक्षीणत्वात्, षोडशीकला मूलभूता तिष्ठति। तस्यां वृद्धिह्रासापेक्षया प्रतिपद्द्वितीयातृतीया-प्रभृतयस्तिथयः पञ्चदशकला वर्द्धन्ते ह्रसन्ति च। तस्मादमावास्या एव तस्याः केतुः चिह्नम्। यत्र [13]यत्र [14]तिथौ एका चन्द्रकला तत्र [15]तत्राऽनध्यायः। ततश्च श्रीमहाकालशिरसि एका चन्द्रकला सदाऽस्ति। ततस्तासां[16] भर्त्तारं प्रति कठोरवचनेनाऽनध्यायः ॥९०॥

भूपं व्यलोकत न दूरतरानुरक्तं
सा कुण्डिनावनिपुरन्दरनन्दिनी[1] तम्।
अन्यानुरागविरसेन विलोकनाद्वा
जानामि सम्यगविलोकनमेव रम्यम् ॥९१॥

भूपम् [इति]। सा कुण्डिनावनिपुरन्दरनन्दिनी[2] विदर्भेन्द्रपुत्री तं भूपं [3]दूरतरम् अतितरामनुरक्तमपि न व्यलोकत। [4]वा अथवा अन्यत्राऽनुरागवशेन यो विरसस्तेन [5]यत् विलोकनं तस्मात् सकाशात् सम्यक् यदविलोकनं तदेव रम्यं वरम् [6]इत्यहं जानामि ॥९१॥

भैमीङ्गितानि शिबिकामधरे वहन्तः
साक्षान्नयद्यपि कथञ्चन जानते स्म।
ऊहुस्तथाऽपि सविधस्थितसम्मुखीन-
भूपालभूषणमणिप्रतिबिम्बितेन ॥९२॥

[1]भैमीङ्गितानीति। अधरे इति सप्तम्येकवचनं[2] प्रथमा बहुवचनं वा। अधरेऽधोभागे स्थिताः [3]शिबिकां वहन्तो जना यद्यपि भैम्या इङ्गितानि साक्षात् प्रत्यक्षं कथञ्चन [4]न जानते स्म। तथाऽपि ते जन्याः सविधे समीपे स्थितो यः [5]सम्मुखीनो [6]भूपालस्तस्य भूषणेषु ये मणयः तेषां प्रतिबिम्बितेन[7] इङ्गितानि[8] ऊहुः वितर्कयामासुः। ऊह [9]रत्यर्थेऽपि। वहिरिति [10]कातन्त्रवृत्तिकारवचनात् धातूनामनेकार्थत्वात्। ऊह (691) वितर्के इत्यर्थे। वह (1073) प्रापणे इत्यस्य प्रयोगः। जह्रुरिति केचित्पठन्ति। जगमुरित्यन्ये ॥९२॥

भैमीमवापयत [1]जन्यगणस्तदन्यं
गङ्गामिव क्षितितलं रघुवंशदीपः।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

गाङ्गेयपीतकुचकुम्भयुगां च हार-
चूडासमागमवशेन विभूषितां च ।।६३।।

[2]भैमीमवापयतेति । जन्यगणो भैमीं तस्माद्राज्ञः सकाशात् [3]अन्यं राजानम् [4]अवापयत । यथा रघुवंशदीपो भगीरथः गङ्गां क्षितितलं निनाय । गाङ्गेयवत् अथवा गाङ्गेयेन सुवर्णेन पीतवर्णं कुचकुम्भयुगं[5] [6]यस्यास्तां तथा । [7]तथा [8]हारेण चूडया मुकुटेन च यः समागमः तद्वशेन विभूषितां[9] गङ्गामपि । [10]गाङ्गेयेन भीष्मेण पीतौ स्वादितौ[11] स्तनौ यस्यास्तथा । [12]हरस्य श्रीमहादेवस्य या चूडा मुकुटं [13]तत्समागम वशेन [14]विभूषिता गङ्गाम् । अथवा विभौ ईश्वरे उषिताम् ।।६३।।

तां मत्स्यलाञ्छनदराञ्चितचापभासा
नीराजितभ्रुवमभाषत भाषितेशा ।
व्रीडाजडे ! किमपि सूचय चेतसा चेत्
क्रीडारसं वहसि गौडबिडौजसीह ।।६४।।

ताम् [इति] । भाषितेशा भारती तामभाषत । किं भूताम् ?। मत्स्यलाञ्छनस्य कामस्य दरम् ईषदञ्चितं वक्रं यच्चापं[1] तस्य भासा नीराजिता भ्रूर्यस्याः सा तां तथा । हे व्रीडाजडे ! चेद्यदि इहाऽस्मिन् गौडानां बिडौजसि इन्द्रे चेतसा[2] क्रीडारसं वहसि[3] तत्किमपि सूचय ।।६४।।

एतद्यशोभिरमलानि कुलानि भासां
तथ्यं तुषार किरणस्य तृणीकृतानि ।
स्थाने ततो वसति तत्र सुधाम्बुसिन्धौ
रङ्कुस्तदङ्कुरवनीकवलाभिलाषात् ।।६५।।

[1]एतद्यशोभिरिति । एतत्तथ्यम् । एतस्य यशोभिः[2] तुषार किरणस्य चन्द्रस्य अमलानि भासां कुलानि तृणीकृतानि । ततः स्थाने युक्तं तत्र चन्द्रे रङ्कुमृंगः वसति । किं भूते ?। सुधा अमृतमेव अम्बु तेन [3]सिन्धौ । कस्मात् ?। तेषां कुलानां तृणानां या अङ्कुरवनी तस्याः कवलाभिलाषात् ।।६५।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

आलिङ्गितः कमलवत्करकस्त्वयाऽयं
श्यामः सुमेरुशिखयेव नवः पयोदः ।
कन्दर्पमूर्द्धरुहमण्डनचम्पकस्रग्-
दामत्वदङ्गरुचिकञ्चुकितश्चकास्तु ।।६६।।

[1]आलिङ्गित इति । अयं राजा श्यामवर्णस्त्वयाऽऽलिङ्गितः सन् चकास्तु । किं भूतः ?। [2]रेखारूपकमलसंयुक्तौ करौ यस्य स तथा । किं भूतः ?। कन्दर्पस्य मूर्द्धरुहाणां केशानां मण्डनं[3] यत् चम्पकस्रग्दाम तद्वद् या त्वदङ्गरुचिस्तया[4] कञ्चुकितो मिश्रितः । क इव ?। नवः[5] पयोद इव । यथा [6]सुमेरुशिखयाऽऽलिङ्गितो[7] नवः पयोदः शोभते । सोऽपि कमलम् उदकं तत्संयुक्ताः करका उपला यत्र । मेघोऽपि करकाभिर्वर्षति, श्यामश्च ।।६६।।

एतेन सम्मुखमिलत्करिकुम्भमुक्ताः
कौक्षेयकाभिहतिभिर्विबभुर्विमुक्ताः ।
एतद्भुजोष्मभृशनिःसहया विकीर्णाः
प्रस्वेदबिन्दव इवाऽरिनरेन्द्रलक्ष्म्या ।।६७।।

[1]एतेनेति । एतेन राज्ञा कौक्षेयकस्य खड्गस्याऽभिहतिभिः कृत्वा विमुक्ताः क्षिप्ताः सम्मुखं मिलतां करिणां कुम्भस्थलमुक्ता मौक्तिकानि विबभुः । कुलकुक्षिग्रीवाभ्यः[2] श्वास्यलङ्कारेष्विति (पा° IV. ii. 96) ति ढकञ् । आयनेयि[3](पा° VII. i. 2)इत्यादिना ढस्य एय् । उत्प्रेक्षते—अरिनरेन्द्राणां लक्ष्म्या [4]विकीर्णाः प्रस्वेदबिन्दव इव । किं भूतया ?। एतस्य राज्ञो भुजयोरूष्मा बल तत्र भृशं निःसहया[5] असमर्थया[6] ।।६७।।

आश्चर्यमस्य ककुभामवधीनवाप-
दाजानुगाद्भुजयुगादुदितः प्रतापः ।
व्यापत्सदाशयविसारितसप्ततन्तु-
जन्मा चतुर्दश जगन्ति यशः पटश्च ।।६८।।

[1]आश्चर्यमिति । एतदाश्चर्यम् । यदस्याऽऽजानुगाद् [2]भुजयुगादुदितः[3] प्रतापः ककुभां दिशाम् अवधीम् पर्यन्तानवापत्[4] । यस्य किल पिता जानुपर्यन्तगमनेऽशक्तोनाधिकं तस्य पुत्रः । [5]किं वाऽस्य दिगन्तं

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

कथं याति[6]। किञ्च अस्य यश एव पटश्चतुर्दश जगन्ति व्यापत्। किं भूत: ?। सता शोभनेनाऽऽशयेन श्रद्धया विस्तारिता ये[7] सप्ततन्तवो यज्ञा: तेभ्यो जन्म यस्य स तथा। अथ च य: सदा सर्वदा शयेन हस्तेन विसारिता[8] वितता: सप्तसङ्ख्यास्तन्तवस्तेभ्यो जात: पट: [9]कथं भुवनानि आच्छादयति ॥९८॥

औदास्यसंविदवलम्बितशून्यमुद्रा-
मस्मिन् दृशोर्निपतितामवगम्य भैम्या:।
स्वेनैव जन्यजनताऽन्यमजीगमत्तां
सुज्ञं प्रतीङ्गित विभावनमेव वाच: ॥९९॥

[1]औदास्यसंविदिति। जन्यजनता स्वेनैव आत्मनैव ताम् अन्यं [2]राजानम् अजीगमत्। किं कृत्वा ?। अस्मिन् राज्ञि विषये औदास्य संविदा [3]औदास्यविज्ञानेन[4] अवलम्बितां शून्यमुद्रां भैम्या [5]दृशोर्निपतिताम् अवगम्य। केचित्तु[6] आदस्यसंविदिति पुस्तकान्तरे पाठं[7] [8]पश्यन्तो व्याचक्षते। अमुष्मिन् राज्ञि विषये भवा आदस्या या[9] संवित् ज्ञानं तत्राऽवलम्बितां शून्यमुद्रां भैम्या दृशो: सम्बन्धिनीम् अमुष्मिन् राज्ञि निपतितामवगम्य। यदा राज्ञ: संवित् शून्या दृष्टा इति तैर्ज्ञातम्। यदियं शून्यमुद्रा भैम्या दृशोरस्मिन् राज्ञि [10]निपतिते। युक्तोऽयमर्थ:। यत: सुज्ञं विशेषज्ञं भृत्यं प्रति इङ्गितविभावनमेव वाच:। न तु वक्तव्यं किमपि ॥९९॥

एतां कुमारनिपुणां पुनरप्यभाणी-
द्वाणी सरोजमुखि ![1] निर्भरमारभस्व।
अस्मिन्नसङ्कुचितपङ्कजसख्यशिक्षा-
निष्णातदृष्टिपरिरम्भ विजृम्भणानि ॥१००॥

[2]एतामिति। वाणी एतां कुमारी [3]चासौ निपुणा च कुमारनिपुणा [4]तां पुनरपि अभाणीत्। [5]कुमारश्रमणादिभिरि(पा° II. i. 70)ति निपुणाशब्देन स्त्रीलिङ्ग: कुमारशब्द: समस्यते। तत्पुरुषश्च समास:। हे सरोजमुखि ! त्वम् अस्मिन् [6]राज्ञि असङ्कुचितस्य पङ्कजस्य सख्यं सादृश्यं तस्य शिक्षा अभ्यासस्तत्र निष्णाता कुशला या दृष्टिस्तस्या: परिरम्भस्य विजृम्भणानि निर्भरं नितराम् आरभस्व। निनदीभ्यां स्नाते: कौशले (पा° VIII. iii. 89)इति मूर्द्धन्य: ॥१००॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

प्रत्यर्थिपार्थिवपयोनिधिमाथमन्थ-
पृथ्वीधरः पृथुरयं मथुराधिनाथः ।
अश्मश्रुजातमनुयाति न शर्वरीशः
श्यामाङ्ककर्बुरवपुर्वदनाब्जमस्य ॥१०१॥

[1]प्रत्यर्थीति । अयं [2]पृथुर्नाम्ना [3]मथुराधिनाथः [4]पृथ्वीधरो राजा मधुरेति पाठः[5] । मथुरां मधुराकृतिरि(रघु° XV. 28)ति कालिदासः । केचित्तु तत्राऽपि मधुरेति [6]पठन्ति । किं भूतः ?। [7]प्रत्यर्थिनः पार्थिवा एव पयोनिधिस्तस्य माथो[8] मथनं[9] तत्र मन्थो[10] [11]वैशाखः [12]पृथ्वीधरः पर्वतो मन्दरः अस्य वदनाब्जं शर्वरीशो नानुयाति । अश्मश्रुजातं श्मश्रुणः उत्पत्तिरहितम् । चन्द्रः किं भूतः ?। श्यामाङ्केन कलङ्केन कर्बुरवपुः ॥१०१॥

बालेऽधराधरितनैकविधप्रवाले !
पाणौ जगद्विजयकार्मणमस्य पश्य ।
ज्याघातजेन रिपुराजकधूमकेतु-
तारायमाणमुपरज्य मणिं किणेन ॥१०२॥

[1]बालेऽधरेति । हे बालेऽधरेण अधरिता नैकविधा प्रवाला यया तस्याः सम्बोधनम् । त्वम् उपरज्य[2] रागं कृत्वा अस्य पाणौ मणिं पश्य । किं भूतम् ?। जगतो विजयस्य कार्मणं वशीकरणम् । पुनः किं भूतम्[3] ?। ज्याघाताज्जातेन[4] किणेन रिपुराजकस्य धूमकेतुरूपा[5] या तारा तद्वदाचरन्तम् । [6]उपराग उपद्रवरूपः[7] । गोत्रोक्षोष्ट्रोरभ्रराजे (पा° IV. ii. 39)त्यादिना वुञ् । [8]युवोरनाकावि(पा° VII. i. 1)ति अकः । धूमकेतुरपि पुच्छे कृष्णो भवति । मुखे दीप्तिमान् । किणेनो-परज्य संमृज्य । धूमकेतुतारायमाणमिति केचित् ॥१०२॥

एतद्भुजारणिसमुद्भवविक्रमाग्नि-
चिह्नं धनुर्गुणकिणः खलु धूमलेखा ।
जातं ययाऽरिपरिषन्मशकार्थयाऽश्रु-
विश्राणनाय रिपुदारदृगम्बुजेभ्यः ॥१०३॥

[1]एतद्भुजेति । खलु धनुर्गुणस्य[2] किणो धूमलेखा । किं [3]भूता ?। एतस्य राज्ञो भुजावेवाऽरणी मन्थनकाष्ठद्वयं ताभ्यां

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

समुद्भवो[4] यस्य [5]विक्रमाग्निस्तस्य चिह्नं लिङ्गम्। धूमेनैव[6] [7]वह्निरनुमीयते। यया धूमलेखया रिपुदाराणां दृगम्बुजेभ्योऽश्रु-[8]विश्राणनाय जातम्। किं भूतया ?। [9]अरीणां परिषदेव मशकास्तन्नि-वृत्त्यर्थया। अर्थशब्दो निवृत्तिवचनः। धूमेन हि मशका निवर्त्तन्ते। बाष्पश्च भवति। [10]सम्प्रदाने चतुर्थी ॥१०३॥

श्यामीकृतां मृगमदैरिव माथुरीणां
धौतैः कलिन्दतनयामधिमध्यदेशम्।
तत्राऽऽप्तकालियमहाह्लदनाभिशोभां
रोमावलीमिव विलोकयितासि भूमेः ॥१०४॥

[1]श्यामीकृतामिति। हे भैमि! त्वं तत्र [2]मथुरायां कलिन्दपर्वतस्य तनयां यमुना भूमेः पृथिव्या रोमावलीमिव विलोकयितासि। [3]लृटि परस्मैपदे मध्यमैकवचनम्। कालापके तु, श्वस्तनी (III. i. 30) तासि। उत्प्रेक्षते—माथुरीणां [4]मथुरानगर्या नारीणां मृगमदैः कस्तूरिकाभिः श्यामीकृतामिव। किं भूतैः ?। जलकेलिकाले [5]धौतैः प्रक्षालितैः। कथम् ?। मध्यदेशमधिकृत्य। हिमवद्विन्ध्ययोर्मध्यं[6] यत्प्राग्विनशनादपि। प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्तितः (मनु॰ II. 21)। किं भूताम् ?। आप्ता कालियस्य नागस्य महाह्लद एव नाभिस्तस्याः शोभा यया [7]ताम्। रोमावली हि उदरदेशे नाभिसमीपे च [8]शोभते ॥१०४॥

गोवर्द्धनाचलकलापिचयप्रचार-
निर्वासिताहिनि घने सुरभिप्रसूनैः।
तस्मिन्ननेन सह निर्विश निर्विशङ्कं
वृन्दावने वनविहारकुतूहलानि ॥१०५॥

[1]गोवर्द्धनेति। हे भैमि! त्वम् अनेन राज्ञा सह तस्मिन् प्रसिद्धे वृन्दावने [2]निर्विशङ्कं वनविहारस्य कुतूहलानि निर्विश उपभुङ्क्ष्व। किं [3]भूते ?। गोवर्द्धनाचलस्य ये कलापिनो मयूरास्तेषां चयस्य प्रचारेण निर्वासिता अहयः सर्पा यत्र तत्र तथा। [4]तथा सुरभिभिः प्रसूनैः पुष्पैर्घने गहने। मयूरैः किल सर्पा भक्ष्यन्ते। [5]सूरभिप्रसून इति पाठान्तरम् ॥१०५॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

भावी करः कररुहाङ्कुरकोरकोऽपि
तद्वल्लिपल्लवचये तव सौख्यलक्ष्यः ।
अन्तस्त्वदास्यहृतसारतुषारभानु-
शोभानुकारिकरिदन्तजकङ्कणाङ्कः ।।१०६।।

[1]भावी कर इति । [2]वृन्दावनमेव प्रक्रम्यते । हे भैमि ! तस्य वृन्दावनस्य वल्लीनां पल्लवस्य [3]चयमध्ये तव [4]करः पुष्पावचयकाले सौख्येन[5] [6]लक्ष्यः भावी भविष्यति । किं भूतः ?। कररुहाणां नखानाम् अङ्कुरा एव कोरका यत्र स तथाविधोऽपि । [7]पल्लवचयो हि कोरकयुतो भवति । अतितरां[8] पल्लवसदृशोऽपि । तर्हि कथमुपलक्षणीयः ?। अन्तर्मध्ये [9]त्वदास्येन [10]हृतसारो यस्तुषारभानुश्चन्द्रस्तस्य शोभानुकारिणि यानि करिणां दन्तेभ्यो जातानि कङ्कणानि तानि अङ्कश्चिह्नं यत्र स तथा । कङ्कणैर्लक्षित इत्यर्थः । [11]भविष्यति गम्यादयः (पा॰ III. iii. 3) ।।१०६।।

तज्जः श्रमाम्बु सुरतान्तमुदा नितान्त-
मुत्कण्टके स्तनयुगे[1] तव सञ्चरिष्णुः ।
खञ्जन्प्रभञ्जनजनः पथिकः पिपासुः
पाता कुरङ्गमदपङ्किलमप्यशङ्कम् ।।१०७।।

तज्ज[इति] । प्रभञ्जनो वायुरेव जनः पथिकस्तस्मात् वृन्दावनात् जातस्तव श्रमाम्बु श्रमजलं[2] पाता पास्यति । किं [3]भूतः ?। स्तनयुगे सञ्चरिष्णुः । किं भूते ?। सुरतान्तस्य मुदा हर्षेण नितान्तम् उत्कण्टके रोमाञ्चिते । किं कुर्वन् ?। [4]खञ्जन् गतिभङ्गं प्राप्नुवन् । मन्द इत्यर्थः । तथा पिपासुः पातुमिच्छुः । किं भूतं जलम् ?। कुरङ्गमदेन [5]कस्तूरिकया पङ्किलमपि । कथम् ?। अशङ्कम् । यः किल [6]पान्थः कण्टकविषमे सञ्चरति, स खञ्जस्तृषाक्रान्तश्च पङ्किलमप्युदकं पिबति । प्रभञ्जयति यः सर्वान् सोऽपि खञ्जः ।।१०७।।

पूजाविधौ मखभुजामुपयोगिनो ये
विद्वत्कराः कमलनिर्मलकान्तिभाजः ।
लक्ष्मीमनेन दधतेऽनुदिनं वितीर्णै-
स्ते हाटकैः स्फुटवराटकगौरवर्णाः ।।१०८।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]पूजेति । ये विदुषां करा मखभुजां देवानां पूजाविधौ यज्ञे षोडशोपचारपूजायां वा उपयोगिनः कमलवन्निर्मलकान्तिभाजस्ते[2] कराः अनेन राज्ञा अनुदिनं वितीर्णैर्हाटकैः सुवर्णैर्लक्ष्मीं दधते । किं भूताः ?। स्फुटं वराटकवत् पद्मबीजकोशवत् गौरो गर्भो येषां ते तथा । अथवा वराटकाः कपर्दकाः ते गौरगर्भाः । कमलं किल [3]देवपूजायामुपकुरुते । लक्ष्मीनिवासश्च पद्मबीजे[4] । [5]गौरगर्भे विदुषां करे [6]लोकेन कपर्दमात्रं दीयते । अयं च सुवर्णं दत्ते ।।१०८।।

वैरिश्रियः[1] प्रतिनियुद्धमनाप्नुवन्यः
किञ्चिन्न तृप्यति धरावलयैकवीरः ।
स त्वामवाप्य निपतन्मदनेषुवृन्द-
स्यन्दीनि तृप्यतु मधूनि पिबन्निवाऽयम् ।।१०९।।

[2]वैरीति । [3]सोऽयं [4]नृपस्त्वामेवावाप्य मधूनि पिबन्निव तृप्यतु । किं [5]भूतानि ?। निपतत् यन्मदनस्य इषुवृन्दं तस्मात् स्यन्दीनि स्रवन्ति । मदनस्य हि बाणवृन्दे[6] मकरन्देन भाव्यम् । [7]यो धरावलयस्य [8]एकवीरो [9]वैरिणां श्रियो लक्ष्म्याः किञ्चित् प्रतिपक्षस्य नियुद्धम् अनाप्नुवन् न तृप्यति । [10]वैरिश्रियं प्रतीति [11]पाठे वैरिलक्ष्मीं[12] प्रति किञ्चिन्न तृप्यतीति [13]व्याख्येयम् ।।१०९।।

तस्मादियं क्षितिपतिक्रमगम्यमान-
मध्वानमैक्षत नृपादवतारिताक्षी ।
तद्भावबोधबुधतां निजचेष्टयैव
व्याचक्षते स्म शिबिकानयने नियुक्ताः ।।११०।।

[1]तस्मादिति । इयं तस्मान्नृपादवतारिते व्यावर्त्तितेऽक्षिणी [2]यया एवं विधा सती क्षितिपतिक्रमेण गम्यमानमध्वानमैक्षत[3] । तथा शिबिकाया नयने नियुक्ताः पुरुषाः तस्या भावस्य चित्तस्य बोधे ज्ञाने बुधतां विद्वत्तां निजचेष्टया एव गमनेनैव व्याचक्षते स्म ।।११०।।

भूयोऽपि भूपमपरं प्रति भारती तां
त्रस्यच्चमूरुचलचक्षुषमाचचक्षे ।
एतस्य काशिनृपतेस्त्वमवेक्ष्य लक्ष्मी-
मक्ष्णोः सुखं जनय खञ्जनमञ्जुनेत्रे ।।१११।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]भूयोऽपीति। भारती[2] [3]भूयोऽपि पुनरपि अपरं भूपं प्रति तामाचचक्षे। किं भूताम्?। [4]अस्यतश्चमूरोर्मृगस्येव चले चक्षुषी यस्यास्तां तथा। हे खञ्जनवन्मञ्जुनेत्रे! त्वम् एतस्य काश्या वाराणस्या नृपतेर्लक्ष्मीमवेक्ष्याऽक्ष्णोः सुखं जनय ।।१११।।

एतस्य साऽवनिभुजः कुलराजधानी-
काशी भवोत्तरणधर्मतरिः स्मरारेः।
यामागता दुरितपूरितचेतसोऽपि
पापं निरस्य चिरजं विरजीभवन्ति ।।११२।।

[1]एतस्येति। सा [2]काशी वाराणसी एतस्य अवनिभुजः कुलराजधानी। किं भूता?। स्मरारेः श्रीमहादेवस्य भवस्य [3]संसारस्योत्तरणार्थं[4] धर्मतरिर्धर्मवेडा। यां नगरीम् आगताः[5] सन्तो दुरितेन[6] पूरितचेतसोऽपि। °विक्लवचेतस इति[7] पाठान्तरे विक्लवचेतसोऽपि [8]चिराज्जातं पापं निरस्य विरजीभवन्ति। रजोगुणरहिता भवन्ति। अभूततद्भावे च्विः (पा° V. iv. 50)। अरुमन (पा° V. iv. 51) इत्यादिना सलोपः ।।११२[9]।।

आलोक्य भाविविधिकर्तृकलोकसृष्टि-
कष्टानि रोदिति पुरा कृपयैव रुद्रः।
नामेच्छयेति मिषमात्रमधत्त यत्तां
[1]संसारतारणतरीमसृजत्पुरीं सः ।।११३।।

[2]आलोक्येति। पुरा रुद्रः कृपया एव [3]रोदिति रुदितवान्। किं कृत्वा?। [4]भाविनि विधिकर्तृकाणि दैवसम्भवानि लोकानां सृष्टिकष्टानि [5]आलोक्य नामेच्छया अरोदीत् इति श्रुतौ यद्विद्यते[6] तन्मिषमात्रमधत्त। [7]यत्तां संसारतारणार्थं [8]तरीं नावं पुरीं वाराणसीं स असृजत्। [9]तथा च श्रुतिः—सोऽरोदीत् यदरोदीत्[10] तद्रुद्रस्य रुद्रत्वम् (तै°सं° I. V. i. 1)। तथा च उषासम्भरणकाण्डे शातपथी श्रुतिः—स संवत्सरे कुमारोऽजायत[11]। सोऽरोदीत्। तं प्रजापतिरब्रवीत्। कुमार! किं रोदिषि? यच्छ्रमात्तपसोऽधिजातोऽसीति। सोऽब्रवीदनपहतपाप्मा वा अस्म्यहितनामा [12]नाम मे धेहीति। तस्मात् पुत्रस्य जातस्य नाम कुर्यात् पाप्मानमेवाऽस्य तदपहन्त्यपि द्वितीयमपि तृतीयमभि पूर्वमेवाऽस्य तत्पाप्मानमपहानी। तमब्रवीद्रुद्रोऽसीति ।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

तथा श्रीभागवते[13] तृतीये स्कन्धे द्वादशाध्याये [14]तामिस्रादिसर्गं दर्शयित्वा स्थाननाम वर्णितम् । [15]दृष्ट्वा पापीयसीं सृष्टिं [16]नात्मानं बह्वमन्यत । भगवद्ध्यानपूतेन मनसाऽन्यांस्ततोऽसृजत् ।। 3 ।। सनकं च सनन्दं च सनातनमथाऽऽत्मभूः । सनत्कुमारं च मुनीन्निष्क्रियानूर्ध्वरेतसः ।। 4 ।। सान् बभाषे स्वभूः पुत्रान् प्रजाः सृजत पुत्रकाः ! । तन्नैच्छन् मोक्षधर्माणो वासुदेवपरायणाः ।। 5 ।। सोऽवध्यातः [17]सुतैरेवं प्रत्याख्यातानुशासनैः । क्रोधं दुर्विषहं जातं नियन्तुमुपचक्रमे ।। 6 ।। धिया निगृह्यमाणोऽपि भ्रुवोर्मध्यात् प्रजापतेः । सद्योऽजायत[18] तन्मन्युः कुमारो नीललोहितः ।। 7 ।। स वै रुरोद देवानां पूर्वजो भगवान् भवः । नामानि कुरु मे धातः[19] ! स्थानानि च जगद्गुरो ! ।। 8 ।। इति तस्य वचः [20]पाद्मो भगवान् परिपालयन्[21] । अभ्याधाद् भद्रया वाचा मा रोदीस्तत्करोमि[22] ते ।। 9 ।। यदरोदीः सुरश्रेष्ठः[23] सोद्वेग इव बालकः । ततस्त्वामभिधास्यन्ति[24] नाम्ना रुद्र इति प्रजाः ।। 10 ।। [25]हृदिन्द्रियाण्यसुर्व्योम[26] वायुरग्निर्जलं मही । सूर्यश्चन्द्रस्तपश्चैव स्थानान्यग्रेऽक्षतानि[27] ते ।। 11 ।। मन्युर्मनुर्महान्[28] सोमो महाञ्छिव[29] ऋतध्वजः । [30]उग्ररेता भवः कालो वामदेवो धृतव्रतः ।। 12 ।।[31] धीवृत्तिरससोमा[32] च [33]नियुत्सर्पिरिलाम्बिका । इरावती सुधा दीक्षा रुद्राज्यो रुद्र ! ते स्त्रियः ।। 13 ।। गृहाणैतानि नामानि स्थानानि च सयोषणः । एभिः सृज प्रजा बह्वीः प्रजानामसि यत्पतिः ।। 14 ।। इत्यादिष्टः स गुरुणा भगवान्नीललोहितः ।।15ab।। आत्मेच्छयेति केचित् पठन्ति । आत्मन इच्छया [34]अरोदीदिति अत्र[35] व्याचक्षते । क्वचित्तु[36] नात्मेच्छयेति पाठे काक्वा[37] व्याख्येयम् । किं न [38]मिषमात्रम् अधत्त । अपि तु अधत्त ।।११३[39]।।

वाराणसी निविशते न वसुन्धरायां
तत्र स्थितिर्मखभुजां भुवने निवासः ।
तत्तीर्थमुक्तवपुषामत एव मुक्तिः
स्वर्गात्परं पदमुदेतु मुदे तु कीदृक् ।।११४।।

[1]वाराणसीति । वाराणसी वसुन्धरायां न [2]निविशते । किन्तु तत्र तस्यां स्थितिः मखभुजां [3]देवानां भुवने स्वर्गे निवासः । अत एव तस्यास्तीर्थेषु विशिष्टेषु मणिकर्णिकादिषु मुक्तवपुषां प्राणिनां

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

मुक्तिर्मोक्षः। तु यस्मात् स्वर्गात् परं पदं मुदे महानन्दाय कीदृगुदेतु। मोक्ष एव स्वर्गादधिकः ॥११४॥

सायुज्यमृच्छति भवस्य भवाब्धियाद-
स्तां पत्युरेत्य नगरीं नगराजपुत्र्याः।
भूताभिधानपटुमद्यतनीमवाप्य
भीमोद्भवे! भवति भावमिवाऽस्ति धातुः ॥११५॥

[1]सायुज्यमिति। हे भीमोद्भवे! [2]तां नगराजपुत्र्याः पत्युर्नगरीम् एत्य भवाब्धौ संसारे यादो जलचरः संसारी भवस्येश्वरस्य सायुज्यं मुक्तिमृच्छति। किं भूताम्?। भूतानां पिशाचादिगणानाम् अभिधानैर्नामभिः पटुं बहुलाम्। भूतपतित्वात् परमेश्वरस्य। अथवा अभिपूर्वो धाञ् (1167) धातुर्बन्धने वर्त्तते। तथा च पाणिनेर्द्वितीयाध्यायेऽपि [4]तृतीयपादे प्रथमसूत्रे अनभिहित (पा° II. iii. 1) इत्यत्र पदमञ्जरीकारेण [5]वर्णितम् अनभिहितशब्दोऽयमनेकार्थः। तथा हि अभिपूर्वस्य [6]दधातेर्हिनोतेश्चैतद्रूपं सम्भवति। अभिपूर्वश्च दधातिर्बन्धनेऽपि दृष्टः। अश्वाभिधानीमादत्त इति। उच्चारणेऽप्यभिहितः श्लोकः इति। प्रतिपादनेऽप्यभिहितोऽर्थं इति। हिनोतिरपि वृद्धौ[7] गतौ च वर्त्तते। इह तु वक्ष्यमाणानां कर्मादीनां बन्धनाद्यर्थचतुष्टयासम्भवात् प्रतिपादन[8]वचनोऽभिहितशब्दः इत्याह। अनभिहिते अनिर्दिष्टे[9] अनुक्ते इति॥ तथा च श्रुतिः—[10]इमामगृभ्यान् रशनामृतस्येत्यश्वाभिधानीमादत्ते (तै° सं° V. 12) इत्यत्राऽश्वबन्धनी रज्जुः। शाङ्खायनसूत्रे[11] महावीराभिष्टवे, अभित्वा देव सवितरित्यभिधीयमानायाम् (III. xiii. 17) इति [12]सूत्रबद्धयमानायां गवि इति [13]भाष्यकारेण व्याकृतम्। बध्यमानायामभि त्वेति ऋचमभिष्टौतीत्यर्थः। भूतानां प्राणिनाम् अभिधाने संसारबन्धने [14]अतिपटुम् अपनेत्रीम्। यथा अस्तिधातुरद्यतनीं विभक्तिमवाप्य भवतिभावं भूरादेशमृच्छति। किं भूताम्?। भूताभिधानपटुम्। अतीतकालविहितत्वात् ॥११५॥

निर्विश्य निर्विरति काशिनिवासि भोगं
निर्माय नर्म च मिथो मिथुनं यथेच्छम्।
गौरीगिरीशघटनाधिकमेकभावं
शर्मोमिकञ्चुकितमञ्चति पञ्चतायाम् ॥११६॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]निर्विश्येति । मिथुनं स्त्रीपुंसयुग्मं काश्यां वाराणस्यां [2]निवासि निवासपरं युग्मं भोगं निर्विरति अनवरतं निर्विश्य भुक्त्वा । तथा मिथो यथेच्छं नर्म परिहासक्रीडां च निर्माय पश्चादन्ते पञ्चतायां सत्याम् एकभावमञ्चति । किं भूतमैक्यम् ?। गौर्या [3]गिरीशस्य च या घटना तस्या[4] अपि सकाशात् अधिकम् । [5]यथाऽर्धनारीश्वरस्यैक्यं ततोऽप्यधिकम् । तथा शर्मणः सुखस्योर्मिभिः[6] कञ्चुकितं मुक्तिपदत्वात् । अथवा गौर्यां स्त्रियां घटना [7]पुंसि ईश्वरे [8]गिरीशे घटना तया अधिकम् उत्कृष्टम् । यस्य किल पञ्चभावस्तस्य कथमेकसङ्ख्यात्वम् इति विरोधाभासः ।।११६।।

न श्रद्दधासि यदि तन्मम मौनमस्तु
कथ्या निजाप्ततमयैव तवाऽनुभूत्या ।
न स्यात् कनीयसितरा यदि नाम काश्या
राजन्वती मुदिरमण्डनधन्वना भूः ।।११७।।

न[1] श्रद्दधासीति । हे भैमि ! यदि त्वं न श्रद्दधासि न[2] प्रत्येषि, तन्मम मौनमस्तु । तव निजेन आत्मना[3] आप्ततमया अनुभूत्या अनु[4]भवेनैव कथ्या[5] स्वयमेव ज्ञास्यसि । [6]अथवाऽऽप्ततमस्य वाक्येन प्रतीतिर्भवत्येव[7] । का प्रतीतिरित्याह—यदि [8]मुदिराणां मेघानां मण्डनं [9]धनुः इन्द्रधनुर्यस्य तेन इन्द्रेण [10]देवराजेन राजन्वती[11] [12]सौराज्यवती [13]भूर्भूमिः स्वर्गलक्षणा । [14]नाम अभ्युपगमे । काश्या वाराणस्या कनीयसितरा अत्यल्पा न स्यात् । घरूपकल्पचेलड्ब्रुवो गोत्रमतहतेषु ङ्योनेकाचो ह्रस्व (पा° VI. iii. 43) इति ह्रस्वः । तरप्तमपौ घः (पा° I. i. 22) । [15]राजन्वान् सौराज्ये (पा° VIII. ii. 14) । कथ्येति भूरित्यस्य विशेषणं वा[16] ।।११७।।

ज्ञानाधिकाऽसि सुकृतान्यधिकाशि कुर्याः
कार्यं किमन्यकथनैरपि यत्र मृत्योः ।
एकं जनाय सतताभयदानमन्य-
द्धन्ये ! वहत्यमृतसत्रमवारितार्थि ।।११८।।

[1]ज्ञानाधिकेति । त्वं ज्ञानेनाऽधिकाऽस्यधिकाशि[2] वाराणस्यां सुकृतानि कुर्याः । अन्यैः कथनैः किं कार्यं यत्र हे धन्ये ! जनाय

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[3]मृत्योरपि सकाशात् सततमभयदानम्[4] अमृतस्य सत्रं मुक्तिलक्षणम् एकं वहति। अन्यच्च अमृतस्य अन्नस्य [5]अयाचितस्य सत्रं[6] वहति। किं [7]भूतम्?। अवारिता अर्थिनो यत्र तत्तथा ॥११८॥

भूभर्तुरस्य रतिरेधि मृगाक्षि! मूर्ता
सोऽयं तवाऽस्तु कुसुमायुध एव मूर्तः।
भातं च ताविव युवां गिरिशं विराद्ध-
माराद्धुमाशु पुरि तत्र [1]कृतावतारौ ॥११९॥

[2]भूभर्तुरिति। त्वम् अस्य भूभर्तुर्मुर्ता[3] रतिरेधि भव। हे मृगाक्षि! सोऽयं राजा तव [4]मूर्तः कुसुमायुध एवाऽस्तु। तत्र पुरि गिरिशम् आराद्धुम् आशु [5]कृतावताराविव च तौ रतिकामौ यथा, तथा युवां [6]भातं भोभेताम्[7]। किं भूतम् ईश्वरम्?। पुरा[8] [9]विराद्धम् अपराद्धम्। उत्प्रेक्षा[10] वा ॥११९॥

कामानुशासनशते सुतरामधीती
सोऽयं रहो नखपदैर्महतु स्तनौ ते।
रुष्टाद्रिजाचरणकुङ्कुमपङ्कराग-
सङ्कीर्णशङ्करशशाङ्ककलाङ्ककारैः[1] ॥१२०॥

[2]कामानुशासनेति। सोऽयं राजा ते[3] तव स्तनौ रहो नखपदैर्महतु पूजयतु। किं भूतैः?। [4]रुष्टाया अद्रिजायाश्चरणकुङ्कुमपङ्कस्य रागेण प्रणामवशात् सङ्कीर्णा मिश्रिता या [5]शङ्करस्य शशाङ्ककला तस्याः [6]अङ्ककारैः सदृशैः। रुधिराक्तत्वात् नखानाम्। किं भूतोऽयम्?। कामानुशासनस्य कामशास्त्रस्य शते सुतराम् अधीती [7]अध्ययनशीलः। सप्तम्यधिकरणे चे(पा° II. iii. 36)त्यत्र, क्तस्येन्विषयस्य[8] कर्मण्युपसङ्ख्यानम् (वा° 160) ॥१२०॥

पृथ्वीश एव नुदतु त्वदनङ्गताप-
मालिङ्ग्य कीर्तिचयचामरचारुचापः।
सङ्ग्रामसङ्गतविरोधिशिरोधिदण्ड-
खण्डिक्षुरप्रशर सम्प्रसरत्प्रतापः ॥१२१॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

[1]पृथ्वीश इति। एष पृथ्वीश आलिङ्‌ग्य [2]तवाऽनङ्गतापं नुदतु। किं भूतः ?। कीर्तिचय एव चामरं तेन चारु चापं यस्य स[3] तथा। तथा सङ्ग्रामे सङ्गतानां विरोधिनां[4] शिरोधि दण्डा ग्रीवास्तेषां [5]खण्डिनः खण्डनशीला ये क्षुरप्राः[6] शरास्तैः सम्प्रसरन् प्रतापो यस्य स[7] तथा ।।१२१[8]।।

वक्षस्त्वदुग्रविरहादपि नाऽस्य दीर्णं
वज्रायते पतनकुण्ठितशत्रुशस्त्रम् ।
तत्कन्दकन्दलतया भुजयोर्न तेजो
वह्निर्नमत्यरिवधूनयनाम्बुनाऽपि ।।१२२।।

[1]वक्षस्त्वदिति। अस्य वक्षो यत्तव उग्राद्विरहादपि न दीर्णम्। [2]अतो [3]वज्रायते वज्रमिवाचरति। किं भूतम् ?। [4]पतनेन [5]कुण्ठितानि शत्रूणां शस्त्राणि यत्र तत्तथा। किञ्च भुजयोस्तेज एव वह्निः अरिवधूनां नयनाम्बुनाऽपि न नमति। कया ?। [6]तस्य वज्ररूपस्य वक्षसः यः [7]कन्दस्तस्य कन्दलतया[8] [9]अङ्कुरतया। भुजयोर्हि वक्षः-[10]कन्दादुत्पत्तिः। वज्रमभेद्यमच्छेद्यं वा ।।१२२।।

किं न द्रुमा जगति जाग्रति लक्षसङ्ख्या-
स्तुल्योपनीतपिककाकफलोपभोगाः ।
स्तुत्यस्तु कल्पविटपी[1] फलसम्प्रदानं
कुर्वन् स एष विबुधानमृतैकवृत्तीन् ।।१२३।।

किं[2] न द्रुमा इति। किं [3]जगति लक्षसङ्ख्या द्रुमा न जाग्रति ?। किं भूताः ?। [4]तुल्य उपनीतः पिकानां कोकिलानां [5]काकानां च फलोपभोगा यैस्ते तथा। तु पुनः स एष कल्पविटपी स्तुत्यः। किं कुर्वन् ?। अमृतमेकमेव वृत्तिर्येषां तान् विबुधान् फलानां सम्प्रदान-भूतान् कुर्वन्। देवाः कल्पवृक्षफलान्युपभुञ्जते। अथ च विबुधान् विदुषोऽमृतं [6]स्यादयाचितम् (मनु° IV. 4) तदेकवृत्तीन् [7]एकवृत्तिपरान् दानपात्रीकुर्वन्। अत्राऽप्रस्तुतप्रशंसायां पूर्वार्द्धे सादृश्यमात्रम्। उत्तरार्द्धे तु समासोक्तिः। तुल्ये प्रस्तुते तुल्यान्तरस्याऽऽक्षेपहेतुः। इयं वाच्ये प्रतीयमानार्थाऽनध्यारोपेण ।।१२३।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

अस्मै करं प्रवितरन्तु नृपा न कस्मा-
दस्यैव तत्र यदभूत् प्रतिभूः कृपाणः ।
दैवाद्यदा प्रवितरन्ति न ते तदैव
नेदंकृपा निजकृपाणकरग्रहाय ।।१२४।।

[1]अस्मै करमिति । अस्मै [2]राज्ञे नृपाः [3]राजानः कस्मात् करं दण्डं न [4]प्रवितरन्तु प्रयच्छन्तु । यत् तत्र करप्रदाने[5] अस्यैव कृपाणः प्रतिभूरभूत् । यदा दैवात्[6] दैववशात् ते राजानः करं [7]दण्डं न प्रवितरन्ति तदा एव[8] निजकृपाणः करग्रहाय न इदंकृपा[9] अस्य कृपा । प्रतिभुवः पार्श्वात् करो गृह्यते । अथ च निजस्य कृपाणस्य करे हस्ते ग्रहाय न कृपा । [10]परिग्रहायेति पाठान्तरम् ।।१२४।।

एतद्बलैः क्षणिकतामपि भूखुराग्र-
स्पर्शायुषां रयरसादसमापयद्भिः ।
दृक्पेयकेवलनभःक्रमणप्रवाहै-
र्वाहैरलुप्यत सहस्रदृगर्वगर्वः ।।१२५।।

[1]एतद्बलैरिति । एतस्य बलैः सैन्यैर्वाहैरश्वैः सहस्रदृशो महेन्द्रस्य [2]अर्वण उच्चैःश्रवसो बहुवचनेन वा विग्रहः, अर्वणामुच्चैःश्रवःप्रभृतीनां [3]गर्वोऽलुप्यत । छन्दसि त्रादेशः । तथा च वार्त्तिकम् अर्वणस्त[4] मघोनश्च न [5]शिष्यश्छान्दसं हि तत् । अतो भाषायां त्रादेशाभावः । [6]तथा च—कुर्वन्नर्वंखरोद्भूतैरित्यादि प्रयोगः । सौ च (पा° VI. iv. 13) । मघवानित्यत्र विजयानन्दः । छान्दसौ एतौ प्रयोगौ इति नागनायकःप्राह । अयं तु भगवान् महेश्वरतनयप्रसादान्मोहान्धकारभिदुरशब्दब्रह्मणि निष्णातो लौकिकावपीति मनुते (पा° VI. iv. 13) इति । किं भूतैः ?। दृशा दृष्ट्या पेयो दृश्यः केवलो नभःक्रमणस्याऽऽकाशस्योत्प्लवनस्य प्रवाहो नैरन्तर्यं येषां तैस्तथा । किं कुर्वद्भिः ?। रयस्य वेगस्य रसात् भुवः[7] पृथिव्याः खुराग्रैः यः[8] स्पर्शस्तस्याऽऽयुषां[9] जीवितानां क्षणिकतामपि [10]असमापयद्भिः । क्षणमपि खुराणां भूस्पर्शो न भवति ।।१२५[11]।।

तद्वर्णनासमय एव समेतलोक-
शोभावलोकनपरा तमसौ निरासे ।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

मानी तया गुणविदा यदनादृतोऽसौ
तद् भूभृतां सदसि दुर्यशसेव मम्लौ ।।१२६।।

[1]तद्वर्णनेति । असौ दमयन्ती तस्य वर्णनासमय एव समेतस्य लोकस्य शोभाया अवलोकनपरा सती तं राजानं निरासे [2]इति, निसमुपविभ्यो[3] ह्व (पा° I. iii. 30) इत्यत्र, उपसर्गादस्यत्यूह्योर्वा वचनम् (वा° 628) । असौ मानी तया गुणज्ञया यदनादृत: तत्तस्मात् भूभृतां राज्ञां सदसि[4] असौ दुर्यशसा इव[5] अकीर्त्येव[6] । दुर्यशसैव इति पाठान्तरम् । [7]मम्लौ म्लानिमाजगाम[8] । [9]मम्ले इति क्वचित्पाठे तेन [10]मम्ले इति व्याचक्षते ।।१२६[11]।।

साऽनन्तानाप्य तेज:सखनिखिलमरुत्पार्थिवान् दिष्टभाज-
श्चित्तेनाऽऽशाजुषस्तान् सममसमगुणान् मुञ्चती गूढभावा ।
पारेवाग्वर्तिरूपं पुरुषमनु चिदम्भोधिमेकं शुभाङ्गा
नि:सीमानन्दमासीदुपनिषदुपमा तत्परीभूय भूय: ।।१२७।।

[1]साऽऽनन्तानिति । सा दमयन्ती उपनिषदुपमा उपनिषत्सदृशी आसीत् । किं कृत्वा ?। एकमेव पुरुषं नलम् अनु लक्षीकृत्य भूयो वारंवारं तत्परीभूय । किं [2]भूतम् ?। पारेवाग्वर्ति वचनागोचरं [3]रूपं यस्य तं तथा । चिदम्भोधि चिद्रूपमित्यर्थ: । किं भूता ?। शुभाङ्गा । किं भूतम्[4] ?। नि:सीमा आनन्दो यत्र तं तथा । किं [5]कुर्वती ?। अनन्तान् तेज: सखान् निखिलान् मरुतो देवान् पार्थिवाँश्च तान् [6]सर्वान् [7]आप्य मुञ्चती । किं भूतान् ?। दिष्टभाजो दैवपरान् । किं भूतान् ?। चित्तेन आशाजुष: । कथम् ?। समम् [8]असमा निरुपमा गुणा: शौर्यादयो येषां तान् तथा । किं भूता ?। गूढो भावोऽभिप्रायो यस्या: सा तथा । उपनिषदपि एकमद्वितीयं पुरुषं परमात्मानं ब्रह्मानु लक्षीकृत्य [9]तत्परा भवति । किं भूतम् ?। पारेवाग्वर्तिरूपं नीरूपम् । अथवा, यतो वाचो निवर्तन्ते अप्राप्य मनसा सहे(तै° उ° II. iv. 1)ति [10]श्रुतेरतीतवाग्विषयम् । तथा चिदम्भोधिं चैतन्यधनम् । किं भूतम् ?। नि:सीम[11] भूमानम् । किं भूतम् ?। आनन्दं सुखस्वरूपम् । किं भूतम् ?। भूय: समस्तेभ्यो भूयांसं पुरुषमथवा । किं कुर्वती ?। [12]भूयो भूयस्त्पात्तत्परीभूय [13]ब्रह्मपरीभूय

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

आप्य तेज:सखान् निखिलमरुत्पार्थिवान् मुञ्चती। उदकान् तेजसा-[न]सह खेन आकाशेन [14]वर्त्तन्ते ये भावास्तान्निखिलान् [15]मरुत: वायव्यान् पार्थिवांश्च पृथिवीसम्बन्धिनो भावान् निरस्यन्ती। किं भूतान्?। सानन्तान् नाम संयुक्तान्। अनन्तं वै नाम (बृ° III. ii. 12) इति श्रुते:। किं भूतान्?। दिष्टभाज:। दिष्टशब्देन वागुच्यते। दिश्यते उपदिश्यते असाविति कृत्वा तां भजन्ते, [16]यैस्तांस्तथा। केन समम्?। चित्तेन समम्। चित्तशब्देन मन: सङ्कल्प: चैतन्यं ध्यानं विज्ञानं स्मरणं चोच्यते। किं भूतान्?। आशाजुष:। आशा शब्देन आशंसोच्यते। किं भूतान्?। [17]असमगुणान्। पृथ्वी शब्दादिपञ्च-गुणा। आपश्चतुर्गुणास्तेज स्त्रिगुणं वायुर्द्विगुणम् आकाशस्यैक एव गुण:[18] शब्द:। [19]असमगुणान् [20]च मुञ्चती। नामप्रभृतीनाम् आशापर्यन्तान् भावान् भ्रान्त्या ब्रह्मभावेन मत्वा [21]मत्वा मुञ्चती यतो गूढो भाव: परमार्थो यस्या: सा तथा। [22]पुन: किं भूता:?। शुभाङ्गा। शुभान्यङ्गानि शिक्षादीनि षट्। अथवा चत्वारि शमदमउपरतितिति-क्षाख्यानि साधनानि यस्या: सा तथा। तथा च सामोपनिषदि सप्तमप्रपाठके अधीहि भगव इति होपससाद सनत्कुमारं नारद:। तं सनत्कुमार उवाच। यत्त्वं वेत्थ तत्कथय। ततस्ते ऊर्ध्वं वक्ष्यामि। ततो नारद उवाच—ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदम् [23]आथर्वणं चतुर्थमित्यादिसर्वां विद्यामध्येमि। पारं मन्त्रविदेवाऽस्मि, नात्मवित्। श्रुतं मया [24]तरति शोकमात्मवित् [25]इति, ततो मां भगवान् शोकस्य पारं [26]तारयतु। तमुवाच सनत्कुमारो—यद्वै किञ्चैतदध्यगीष्ट नामैवैतत्॥ नाम वा ऋग्वेदो यजुर्वेद इत्यादि [27]रूपो [28]नाम ब्रह्मेत्युपास्ते, स नामगतं सर्वं विजानाति न तु परं ब्रह्मेति। [29]अथ नारद आह—अस्ति नाम्नो भूय: किञ्चित्?। आह सनत्कुमार:—वाग्वावनाम्नो भूयसी, वाग्वै ऋग्वेदादिकं सर्वं, सर्वं नाम विज्ञापयति यो [30]वाचं ब्रह्मेत्युपास्ते स वाचोक्तं[31] सर्वं विजानाति। अस्ति किञ्चिद्वाचो भूय:?। मनो [32]वाव वाचो भूय:। [33]यदा हि मनस्यति तदा वाचा नाम वदति। यो मनो ब्रह्मेत्युपास्ते, स मनसो गतं सर्वं [34]विजानाति। अस्ति किञ्चिद् भगवो भूयो यदा हि मनस्यति, तदा वाचा नाम वदति। यो मनो ब्रह्मेत्युपास्ते, स मनोगतं सर्वं वेद, न तु परं ब्रह्मेति। सङ्कल्पो वाङ्मनसो भूय[35] इति। यदा सङ्कल्पयतेऽथ

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

मनस्यति । चित्तं वाव[36] सङ्कल्पाद् भूयो, यदा चैतन्येन चेतयतेऽथ सङ्कल्पयते । ध्यानं वाव चित्तात् भूयो, विज्ञानं वाव ध्यानाद्भूयो, विज्ञानवतां शतमप्येको बळवानाकम्पते[37] । बळशब्देन वायुरुपलक्ष्यते । अन्नं वाव बलाद्भूयो, यदि दश रात्रीर्नाश्नीयात्ततोऽद्रष्टा अश्रोता अमन्ता भवति । अन्नादेव बलम् । अन्नशब्देन पृथिव्युपलक्ष्यते । आपो वाव अन्नाद्भूयः[38], यदि सुवृष्टिर्भवति तदाऽन्नं बहु । तेजो वाव अद्भ्यो भूयोऽभितापेन वैद्युतं तेजो दर्शयित्वाऽथ आपः सृजते । आकाशो वाव [39]अद्भ्य स्तेजसो भूयान् । आकाशो वै सूर्याचन्द्रमसौ । स्मरो वा आकाशाद्भूयः । [40]यदा न स्मरति तदा किमपि न जानाति । आशा वाव स्मराद्भूयसी, यदा [41]आशंसया इदं स्मरणं भवति तदा मन्त्रान् अधीते कर्म कुरुते । प्राणो वाव [42]आशाया भूयान् । यथा वा अरा नाभौ समर्पिता, एवं प्राणे[43] समर्पितं स एव भूमा यो वै भूमा तत्सुखं [44]स आनन्दः स एव विजिज्ञासितव्यः । यत्र नान्यत्पश्यति नान्यत् शृणोति नान्यद्विजानाति[45] स भूमां (छा° VII. xxiv. 1) । इत्थमियमुपनिषन्नामाद्युपक्रम्य, यद् यद्भ्य तत्तदाशापर्यन्तं परित्यजन्ती[47] स्वमहिमरूपे प्राणे भूम्नि सर्वस्याऽस्य प्रतिष्ठामाह । द्विवचनविभज्योपपदे तरबीयसुनावि (पा° V. iii. 57)ति द्वयोर्मध्यात्, यद्बहु तद्भूय [48]बहोर्भावो भूम्नि बहुशब्दादीयसप्रत्यये भूरादेशः । पृथ्वादिभ्य इमनज्वा[49] (पा° V. i. 122) इतीमन् । भूमा इति निपातः । [50]स्रग्धरा वृत्तम् ।।१२७।।[51]

[1]श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
शृङ्गारामृतशीतगावयमगादेकादशस्तन्महा-
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ।।१२८।।[2]

[3]श्रीहर्षम् इति । तस्य कवेर्महाकाव्ये । किं भूते ?। शृङ्गारामृतशीतगौ चन्द्रे एकादशः सर्गोऽगात् । [4]शार्दूलविक्रीडितं वृत्तम् ।।१२८।।

[1]श्रीमानालिगपण्डितः स्वसमयाविर्भूतसर्वाश्रम-
श्चाण्डूपण्डितसंज्ञितं प्रसुषुवे श्रीगौरिदेवी च यम् ।
काव्ये नैषधसंज्ञिते क्रमवशात्संवत्सरे यज्वना
अ(?)ग्निष्टोममखेन तेन विवृतिः सर्गे कृतैकादशे ।।१२९।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

किमपि मुकुटरत्नं नागरश्रोत्रियाणां
प्रतिनिधिरिव तेजः सद्मनः पद्मयोनेः ।
विधरुपशमसिन्धोरालिगो नाम धीमा-
निह समजनि पत्नी गौरिदेवीति चास्य ॥१॥

या ब्राह्मधर्मलयनिर्मलचित्तवृत्तिः
श्रद्धान्वितः सा(?)वपति(:?)प्रतिपात्रमर्थम् ।(?)
तस्याऽन्वयेन विनयेन धनोदयेन
कोऽप्यालिगस्य न पुमानुपमानमत्र[2] ॥२॥

तदात्मजस्ताल्हणनामधेयो विशारदः शारदचन्द्रकीर्तिः ।
महाक्रतौ ज्योतिषि कर्मकाण्डं क्रमाच्चतुःसंस्थतया प्रयोक्ता ॥३॥

सम्राट्स्थपत्यग्निचिदग्रजन्माऽ-
ग्रगण्यचाण्डूविदुषोऽनुजन्मा ।
त्रैविद्यवृद्धार्चितसर्वदेव-
बुधाग्रजन्मा महनीयजन्मा ॥४॥

श्रीवैद्यनाथाभिधसूक्तदेवी-
पदप्रसादोपचितप्रसादैः[3] ।
पदैरुदाराकृतिभिः प्रक्लृप्तां
क्वचित्क्वचित् शोधयति स्म टीकाम् ॥५॥

इति [1]धवलकवास्तव्य–दीक्षित–महापण्डित—
श्रीचाण्डू[2] विरचितायां नैषधदीपिकायां
[3]टीकायां राजकवर्णनं नाम एकादशः[4]
सर्गः समाप्तः[5] ॥११॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

टिप्पण

सर्ग–११

1 P1 add. ॐ नमः श्रीगणेशाय ।। 2 P2 om. देव्याः— ।

1 B P1 तां देवताम् । 2 B P1 अनिमेषेण 3 P1 प्रमोदो 4 P2 om. उपमा वा 5 B भक्ष्यते 6 P2 om. वसन्ततिलका ।।१।।

1 B P1 तन्नि ।। 2 P1 om. न 3 P2 add. तथा 4 B दन्तात् 5 P2 om. च 6 P2 निर्मग्नम् ।।२।।

1 B P1 द्यामं । 2 P2 om. अन्तरा°.........°माचष्टे 3 P1 om. इति— ।।३।।

1 B P1 कुर्वद्भिः । 2 P1 अव° 3 P1 समभि°— ।।४।।

1 P2 text °मय° 2 B P1 तत्र । 3 P2 तत्र here 4 P2 om. किं कृत्वा ?। 5 P2 om. चन्द्रस्य 6 P2 add. च 7 B P1 °वाहस्य 8 B P1 °मव° 9 P1 पङ्क्तिषु and repeats com. of मवैरशेषै (X. 4) up to X. 137. Now P1 from XI. 125 onw.— ।।५।।

1 B उत्तुङ्ग । 2 B मध्ये 3 P2 om. विसर्गः 4 P2 om. तासां 5 B किं भूतः ? 6 P2 om. यस्याः 7 B om. तस्या यः 8 B om. अनूद्य ।।६।।

1 P2 text संभाषणं 2 B सम्भाषणां । 3 B जगतो 4 B नम P2 om. नमस्या 5 P2 om. ग्राम°.........तल् ।।७।।

1 B अभ्यागमत् । 2 B एषां 3 P2 om. अशक्यम् 4 B wrong numberings fr. here— ।।८।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 B om. एधामिति । 2 B °क्षणे 3 P2 om. अभूत्............ °निमिषता मिलिता 4 P2 न तु— ॥९॥

1 P2 text स्फुरितः 2 B एषां । 3 P2 om. स 4 B P2 om. स 5 P2 पयोधिः 6 B फलमेन 7 B सार्चकं 8 B पुराणैः 9 B शीलै° 10 P2 add. विसर्गः 11 B add. विसर्गः 12 P2 इव ॥१०॥

1 B वक्त्रेन्दु । 2 B अधः 3 B ईक्षमाणः 4 B संकुचितं; P2 कुचत्— ॥११॥

1 P2 text °नुजग्मुः 2 B तं तत् । 3 P2 om. अधरभागस्थाः 4 B विलोक्य°, 5 P2 om. विषादगतं; 6 P2 om. अनुमानेन, 7 P2 तत्, 8 P2 om. दमयन्त्या; 9 B चिरं 10 P2 om. यद्यपि........ यड्ढकौ; 11 B यज्ञः— ॥१२॥

1 P2 text °वीक्ष्य 2 B रक्षः 3 P2 om. °द्विष°........कृतेत्यर्थं ।; 4 B om. अजनि; P2 om. जातः— ॥१३॥

1 P2 text 15. 2 B दीनेषु । 3 B ते के 4 P2 °तीर्णं 5 B om. न 6 B विरुद्ध— ॥१४॥

1 B 14; P2 text. 16. 2 B जन्या । 3 B °रागरक्तस्य 4 B तथा 5 P2 om. °कर्मा°— ॥१५॥

1 P2 text °रखिल° 2 B यस्या । 3 B वाग्देवत्याः 4 P2 om. परिणतिः 5 B P2 °विस्तारो edr. °विस्तरो 6 P2 शोमनं 7 B P2 om. समा° edr. add. समा°— ॥१६॥

1 B आश्लेषा । 2 P2 प्रथितः 3 B P2 हि aft. भवति 4 B यस्याः— ॥१७॥

1 B पाणौ । 2 B P2 om. ऐशे 3 B °स्तेन 4 B मणि° 5 B फल°— ॥१८॥

1 B धृत्वै । 2 P2 add. अयं 3 B om. सन् 4 P2 om. °अधर° 5 B भेदं विशेषं 6 P2 om. स— ॥१९॥

1 B आशीः 2 P2 °विशेषणेति 3 P2 °विशेषेण 4 B वधा— ॥२०॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 B तद्वि ।; P2 यद्वि । 2 P2 om. नृत्यान् 3 B निषेधात् 4 P2 °देर्वी° 5 B तस्याः 6 P2 om. विलोकनेन……………दर्शनात् 7 P2 वारिताः ॥२१॥

1 B om. तद्दर्शिभिरिति । 2 B निहितं 3 B मृष्टं 4 B प्रयानु°— ॥२२॥

1 P2 text °द्वितीय 2 B ह्रीसं । 3 P2 om. विसर्गः 4 B हारस्य 5 B °मिवे[ति] पाठः । 6 P2 यत्र यस्मात्— ॥२३॥

1 P2 text विगच्छति 2 B देव्या । 3 P2 भीम 4 B P2 भजत 5 B स तां 6 P2 न विगच्छति 7 P2 °मतो° ॥२४॥

1 B लोके । 2 B om. वो ॥२५॥

1 B पुष्पेषुणा । 2 P2 द्व्यणु[क]द्वयसंयोग° 3 B om. तस्याः 4 B अमून् द्वीपानां 5 B जप्तिर्यो; P2 om. यो 6 P2 om. विसर्गः 7 P2 add. विसर्गः— ॥२६॥

1 P2 text °विहार° 2 B स्वादू । 3 B भवनेन 4 B विगाह्न° 5 B om. त्वं………पतिं भज । 6 B P2 °प्रान्ते 7 B द्वीपा 8 P2 om. च— ॥२७॥

1 B सावर्ते । 2 P2 om. अद्भुतो 3 B om. स्वर्गस्य राज्यं 4 P2 om. मानसो°……………मिति कोऽन्यः but add. उपवर्तनं स्थानं नगरं देशः । 5 P2 om. तदुक्तम्…………विवर्जितः इत्यादि । 6 B °राष्ट्रम् ।— ॥२८॥

1 P2 text °कल्पं 2 B देवः । 3 B om. त्वां 4 P2 om. अनन्यकल्पाम् 5 B om. हस्ते— ॥२९॥

1 B न्यग्रोध । 2 B om. तं 3 P2 om. जातम् 4 P2 श्रीकरं 5 P2 om. दलानां 6 B °श्चन्द्रिका 7 P2 om. आत्मभर-धारमिव— ॥३०॥

1 B न श्वेत । 2 P2 om. राजा…………°धारयो वा राज° 3 B P2 om. चरतु 4 P2 अयम् 5 P2 om. सती 6 P2 om. नीरं— ॥३१॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 B शूरे । 2 B आह 3 B तथाऽरीणां 4 P2 गीतानाम्— ।।३२।।

1 P2 text °भङ्गि° 2 B अर्थं 3 P2 add. वल्ल्या 4 P2 om. भ्रुवः प्रेक्षितम् 5 B बालाना° 6 P2 वलिन° 7 B वह्नि°— ।।३३।।

1 B राजा । 2 P2 °शीलतया एव 3 B om. न 4 P2 अन्यापे° 5 B °रहितविधेः— ।।३४।।

1 B ऊचे । 2 P2 अशिवने° 3 P2 om. हे मैमि ? 4 P2 आयनेर्यानित्यादिना 5 P2 om. सति-- ।।३५।।

1 B एतत् । 2 P2 °पत्रपा 3 B °काशान्तरे 4 P2 स्थानमेव 5 P2 om. अपि 6 B om. अर्थानाम्— ।।३६।।

1 B तत्र 2 B दृष्ट 3 B विश्रुता नाम्नी 4 B om. रागि 5 P2 स्तुवन्ती° 6 P2 जातया— ।।३७।।

1 P2 text °विलम्भितेन 2 B शाकः । 3 P2 om. हे तन्वि ! 4 P1P2 पत्राणि हरितानि 5 P2 °शब्दलाकारस्य 6 B विजृम्भति 7 B रस्यतो ।।३८।।

1 P2 मोदस्व 2 P2 यत्तच्छ° 3 P2 °च्छब्देन च— ।।३९।।

1 P2 text °चुम्बि° 2 B क्षीरा । 3 P2 हे आयताक्षि ! aft. तव 4 P2 छदा 5 P2 चनानां 6 B P2 चपलत्वं 7 B P2 om. अन्वेतु 8 B अन्यवत् 9 P2 यणि ।।४०।।

1 B बाला । 2 B गौरि° 3 P2 वारयन्ति— ।।४१।।

1 B नृणां । 2 P2 °जङ्घे 3 B °खनया 4 P2 कलम्बि° 5 B om. मुत् ।।४२।।

1 B एतेन । 2 P2 om. धृतो 3 B om. तदा अयं 4 P2 om. स्वमपि 5 B आतनोति 6 P2 नमिति 7 B °प्रत्यक्ष° 8 B नित्यपे°— ।।४३।।

1 P2 °लब्ध° 2 B लक्ष्मी । 3 B मा 4 P2 न here 5 B add. इति 6 B विशष्टे 7 B देवतयोरा°— ।।४४।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 B लक्ष्मी । 2 P2 विक्षिप्य 3 P2 om. °न्तरं निन्युः………… गुणानां 4 P2 सौर्या° 5 P2 वयवः 6 P2 om. कामात् 7 P2 om. लक्ष्मी°……… पद्यादिति वा । 8 B सुमसु 9 P2 लब्धि° 10. P2 add. गुण° 11 B °विशेष°— ॥४५॥

1 B भूयः । 2 P2 om. तस्याः 3 B om. हि°; P2 पद्म हिङ्गुलं— ॥४६॥

1 B द्वीपस्य । 2 B om. त्वमेनं 3 P2 नापश्य 4 B दध्ना 5 P2 मण्डलस्य — ॥४७॥

1 B तत्रा । 2 B द्विपे 3 P2 किं भूता 4 B विवरीतुकामः 5 B repea. वृन्दानां……… स्फुरिष्यति 6 B इव 7 P2 छिद्रे— ॥४८॥

1 B वैदर्भी । 2 B रुचयो 3 B कृतं यो न 4 B कदापि 5 B देवानि 6 B देव्याम्नो; P2 °त्या म्नो 7 P2 om. जनस्य………°दैवत° 8 B अभिजातं 9 P2 यत्र 10 B °भ्यमि°— ॥४९॥

1 B चूडाग्रे । 2 P2 om. तस्य 3 B °सर° 4 B P2 om. घटय 5 P2 सुवर्णं° 6 B P2 मिहुरः 7 B °शीलश्च 8 B शोभं शैला° 9 P2 तस्याः 10 B चौरमे 11 P2 °घटा°— ॥५०॥

1 B तस्मि । 2 P2 जालै°…………मिलन् aft. वायुः 3 P2 om. स चासो 4 P2 °केलिजन्म 5 B एषां 6 P2 तव ते–– ॥५१॥

1 B एत । 2 P2 नवं नवं 3 P2 पल्वलादेः 4 P2 om. तरणयोगात् 5 P2 om. विदूरगमनं 6 P2 om. यथासङ्ख्यानुरोधेन 7 B सन्तरीतु; P2 तरितु 8 B इव 9 P2 सन्तरणं…………द्वन्द्वो वा here, too; 10 B व 11 P2 om. विशते……………क्षीरस्वामी 12 B अति 13 B om. 52.— ॥५२॥

1 P2 text निरुन्धति 2 B तस्मिन् । 3 P2 धृतेऽपि 4 B आप 5 B निन्धनतां 6 P2 om. विसर्गः 7 B कारणातां 8 B प्रायशो न— ॥५३॥

1 B तेनिन्यिरे । 2 B °भूतयो 3 P2 °मयूखलेखां— ॥५४॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P2 text °मुद्गत° 2 P2 text °गत्य 3 P2 om. विसर्गः 4 P2 एतां 5 P2 अतीतं 6 B कुर्वंती; P2 कुर्वंताम् 7 P2 om. उद्गतगुणं 8 B अथ 9 B घूत° 10 B °मवगम्या 11 P2 om. अत्र ....°प्रसङ्गेन 12 B °वित 13 P1P2 गति°— ॥५५॥

1 P2 क्रशो 2 B ज्योतिष्मताये; P2 ज्योतिष्मन् नाम्ना 3 P2 om. महद्वनं — ॥५६॥

1 B वातो । 2 B स्तम्भो 3 P2 नेत्रे 4 B चित्रादि मविती 5 B P2 भूतम्; edr. भूतः 6 B अम्बुरु 7 P2 om. यत् 8 P2 चलिति 9 B यदाभ्र°; P2 om. यत् 10 B शोको— ॥५७॥

1 B पयोधि° 2 B पयोधेः 3 B om. माथ° 4 B पदाविव; P2 om. पदावेव..................तदा 5 P2 add. चरण° 6 P2 om. पवित्रा...........पाठे 7 B P2 om. तासु; edr. add. तासु 8 B पुत्रवद्भाव°— ॥५८॥

1 B आरोह । 2 B अत्र 3 P2 मन्थाः 4 B षाणानां; P2 om. पाषाणानां 5 B P2 °वन् 6 B शोभी— ॥५९॥

1 P2 text °चलद्धवल° 2 B मन्था । 3 B शेषो 4 P2 add. उद्धृतम् 5 P2 add. स्व° 6 B om. विस्तारयतु 7 B om. सर्पाधिराजस्य 8 B om. °नरूप°.........°भूत° 9 B वलयाकरो; P2 om. वलया........पाठे 10 B °धरा— ॥६०॥

1 P2 om. स 2 B मदिरा° 3 B सुरेत° 4 B तथा 5 P2 °षद्द्रुमपल्लवानि 6 P2 add. पारिजातपल्लवानि 7 P2 नीरधि°— ॥६१॥

1 P2 ज्योतिषिमान् वेदे विष्णुपुराणे प्रभृतिषु 2 B मीमांसा 3 P2 ईश्वरेण 4 P2 अनुमतिं 5 P2 om. वचोभिः 6 P2 °कीर्तौ तथा 7 P2 °परायणो 8 P2 °वतरस्थे 9 B श्रुते 10 B तथा 11 P2 ततश्च 12 P2 om. स्यात्— ॥६२॥

1 B तस्मा । 2 B जन्यजनः स 3 B राजानं 4 P2 om. कर्त्रं° .... आत्मनेपदम् 5 B विधा° and om. निर्धनात् 6 P2 चित्तैः चित्तम् 7 B नयते 8 P2 om. स्त्रीणां....... श्रीभावेति 9 B यस्य; P2 यस्यां 10 P2 माविते 11 P2 एव here. 12 P2 विमृश्य— ॥६३॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P2 text गिरि° 2 B वाक् भारती 2 P2 आगमेषु 4 B गरिम्ना 5 P2 निः°— ॥६४॥

1 B शाल्मली 2 P2 बलप्रियस्य हे 3 B om. तिलस्य 4 P2 om. तस्याः 5 P2 om. त्वं 6 P2 वपुषाति 7 B राजनि समुद्रे; P2 राजगुणसमुद्रे 8 B P2 भवेति 9 P2 om. त्वमर्थ......कर्म— ॥६५॥

1 B विप्रे । 2 B त्वं समुद्रे 3 B om. केलीः 4 B सिन्धुः सीधु 5 B अमत्सु 6 P2 च विभावय 7 P2 om. ब्राह्मणस्य सीधुविषये 8 B P2 सिन्धु°; edr. सीधु° 9 B सिन्धु° 10 B °मदिरे°— ॥६६॥

1 P2 text °मयी° 2 B द्रोणः । 3 B कर्मणा 4 B om. मणीन् ते; P2 om. ते 5 P2 तत् 6 B om. कार्मण°; P2 मणिरूपा°— ॥६७॥

1 P2 text °कोश° 2 B तद्द्वीप । 3 B सरयत् सं 4 B P2 om. ते; edr. add. ते 5 B तदे 6 B द्विपस्य 7 P2 °लित्वं वृक्षाः— ॥६८॥

1 B P2 om. उचितं; edr. add. उचितं 2 P2 om. भावस्य 3 P2 om. तस्या 4 P2 om. °अञ्चल° 5 B कुर्वन् 6 B P2 om. क्षितिपतेः 7 P2 om. राजानं 8 B नयतः; P2 om. विसर्गः— ॥६९॥

1 P2 text °निभ° 2 B देवता 3 B मही 4 B अथ आखण्ड 5 B P1 P2 दिग्विजय°, edr. दिग्जय°— ॥७०॥

1 B °तव 2 P2 om. तस्याः 3 P2 om. हृदये 4 B स्पृष्ट° 5 P2 om. प्रत्यक्षा— ॥७१॥

1 B अधः 2 B °लाङ्गयो 3 B यत्— ॥७२॥

1 P2 om. यस्याः 2 B ररं त— ॥७३॥

1 P2 text नश्नाति 2 B इन्दुवीक्ष्य 3 P2 om. अदृष्ट्वा 4 B चन्द्रादिय° 5 P2 अदृष्ट्वा 6 B अश्नानो 7 P2 om. भुञ्जानस्य 8 P2 °भाव 9 P2 यतः aft. एव 10 P2 इव— ॥७४॥

1 B उत्स । 2 B वर्षे 3 B उत्सर्पिणा 4 P2 om. आवृत्त्या ...... तस्य 5 P2 add. वर्षस्य 6 P2 om. न 7 B °पुराणे 8 B

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

शान्तमयादिति 9 ori. तु 10 B रिखी 11 B अवक्रमु: 12 P2 या विपाट्..................द्वीपसमाना twice and तथा च 13 ori. न चैवो° 14 ori. द्विज 15 P2 प्रत्येकं 16 B नावि°; P2 add. तत् 17 P2 न चाधिका 18 P2 om. पुनः 19 P2 तथा च and add. श्लेषेण यत् तरङ्गयुक्ताऽपि किल तव नेत्रयोः न उत्सर्पिणी; and om. ताः............इति श्रूयते 20 B om. जन 21 B add. वर्षाणां न अवसर्पिणी 22 B om. विभुः 23 P2 तस्यां............आस्तां thrice aft. उत्तार्य त्यज्यताम् 24 P2 त्वत् 25 B om. अत्र 26 B P2 om. अञ्जसा; edr. add. अञ्जज 27 B om. अनु— ।।७५।।

1 B एत 2 B दुषी° 3 B om. यत् 4 P2 यशः°— ।।७६।।

1 P2 text °चला° 2 B om. °वि वयं..............स च 3 B P2 स्तस्य; edr. स्वस्य 4 P2 पर° 5 P2 °क्रमणे 6 P2 °पि 7 P2 क्रमणे — ।।७७।।

1 P2 om. °गर्भवत् रुचिरा वि° 2 B विलोक 3 P2 आलोक°— ।।७८।।

1 B अन्त° 2 B प्लक्षद्वीपात् 3 P2 °कण्ठाया। कैखवन्याः 4 B उदधिनां 5 B om. श्रीसूर्य— ।।७९।।

1 B देवया; P2 °देव्या 2 B चित्तदत्ता; P2 दत्तविद्या 3 P2 om. पुनः 4 P2 °वीणाया 5 P2 om. तया 6 B om. तथा— ।।८०।।

1 B यन्मौलि। 2 B द्विपस्य 3 P2 °भूता त्वम् 4 B उदता° 5 P2 om. विसर्गः 6 P2 om. द्वयन्त°..................इति 7 P2 भीत्या 8 B 21— ।।८१।।

1 B विष्व। 2 B om. द्वीपैः 3 B om. महत् 4 P2 om. अन्तरशब्दादप ईत् ।।८२।।

1 B एत। 2 B om. हे तरुणि 3 B यस्य 4 P2 °मिव 5 P2 om. इदमिति 6 P2 ताभ्यां सं°— ।।८३।।

1 P2 text °जंम्बूः 2 B जाम्बू। 3 B यस्याः..........यस्य तत्तथा here; P2 om. कम्बवा°..........सम्बोधनम्। 4 B वहवै 5 P2 फलमवा 6 B तद्द्रवे 7 B P2 °द्रवमवा 8 B सुधाधम्; P2 °विव 9 P2 °मपि 10 B विश्रुतं; P2 om. विश्रुतिं 11 B प्रसिद्धम् 12 B 74.— ।।८४।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 P2 चित्तं विधि° 2 P2 add. अस्त्रैः 3 B भूरिणां 4 B पूरिणां 5 P2 श्रुतिभिः 6 B पाठान्तरे ।।८५।।

1 B प्रत्य । 2 B नृपते 3 B विश्रान्त° 4 B P2 om. यौवतस्य; edr. add: यौवतस्य 5 P2 °रूपो 6 B P2 तमालाः edr. तमालमाला 7 P2 °प्रकारः— ।।८६।।

1 P2 text तटो° 2 B तत्रा । 3 P2 om. तव 4 B वासित° 5 B हासस्य 6 P2 om. पक्षे·······पाठः ।।८७।।

1 B अस्या । 2 P2 अधिराज्य 3 B P2 om. यौवतस्य; edr add. यौवतस्य 4 P2 °घटनाय 5 B om. अपि 6 P2 om. अधि° ·······क्यच् ।।८८।।

1 B निःशङ्क । 2 B तस्य 3 B रमति° 4 P2 om. कामस्य 5 P2 अङ्कुरितां 6 B °हासस्य— ।।८९।।

1 P2 text रेखा 2 B आगः । 3 B रामाः 4 P2 ददन्ति 5 B समिद्ध°; P2 समिद्धो 6 P2 °त्रैषा 7 P2 हरमौली 8 P2 add. पञ्चदशकलश्चन्द्र इति दर्शने 9 B om. शुक्लचतुर्दशी च 10 P2 om. पञ्चदश°·······चतुर्दशी 11 P2 अतिथिः 12 P2 परमा न 13 P2 om. यत्र 14 B om. तिथौ 15 P2 om. तत्र 16 P2 कठोरवचने भर्त्तारं प्रति °न ध्यायः ।।९०।।

1 P2 text °नन्दनी 2 P2 °नन्दनी 3 B दूरतरामनु° 4 B om. वा 5 B यत्र 6 B प्रत्यहं— ।।९१।।

1 B भैमी । 2 P2 °वचने 3 B शिरबिम्बां 4 B om. न 5 B सम्मुखिनो 6 P2 भूपालाः 7 P2 प्रतिबिम्ब 8 B चह्नः 9 B रित्यर्थे 10 B om. कातन्त्र······· जह्नुरिति— ।।९२।।

1 P2 text °गणास्तदा° 2 B भैमी । 3 B om. अन्यं··········· गाङ्गेयवत् 4 P2 अवापयत् 5 P2 om. °कुम्भ° 6 P2 तस्याः 7 B om. तथा 8 P2 हरेण 9 P2 °षितं 10 P2 गङ्गो° 11 P2 om. स्वादितौ 12 B हारस्य 13 B समागमन 14 P2 °षितं— ।।९३।।

1 P2 यथापं 2 P2 चेतसा aft. वहसि 3 P2 om. तत्— ।।९४।।

1 B एत । 2 B om. शोभिः·······तृणानां 3 P2 सीधौ— ।।९५।।

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 B आलि। 2 P2 om. रेखारूप° 3 P2 om. मण्डनं 4 P2 °स्तथा 5 P2 om. विसर्गः 6 P2 °शिखरया 7 P2 °लिङ्गि-तनव— ॥९६॥

1 B एते। 2 P2 °ग्रीवाभ्यो स्वा° 3 P2 °नेचित्यादिना 4 P2 °वकीर्णाः 5 P2 °सहायो 6 P2 °मर्थयोः— ॥९७॥

1 B आश्चर्यं। 2 P2 om. भुजयुगाद् 3 B उहितः 4 B °वापयत् 5 P2 om. किं वाऽस्य 6 B om. ति किञ्च अस्य 7 B om. ये········ विसारिता 8 P2 विस्तारिता 9 B ककं— ॥९८॥

1 B औदा। 2 B om. राजानं··········भैम्या 3 B P2 अस्य; edr. औदास्य° 4 P2 नज्ञानेन 5 B निपततितां 6 P2 om. तु 7 P2 पाठाः 8 B पठयन्तो 9 P2 याः 10 B om. निपतिते·············· किमपि ॥९९॥

1 P2 °निर्भरमाभरस्व 2 B om. एतामिति···········°मुखि! त्वं 3 P2 च सा 4 P2 om. तां 5 P2 °श्रवणा° 6 B राज्ञः 7 B om. अभ्यासस्तत्र निष्णाता ॥१००॥

1 B प्रत्यर्थि। 2 P2 पृथुर्नाम्ना aft. किं भूतः?। 3 B P2 मधुराः; edr. मथुरा° 4 B om. पृथ्वीधरो राजा 5 P2 add. समीचीनः 6 P2 पाठं शब्दभेददर्शनात् 7 P2 add. तथा च 8 B माघो 9 B मघनं 10 B मन्थो 11 B वैशाखे 12 P2 om. पृथ्वी°······· मन्दरः— ॥१०१॥

1 B बाले 2 P2 उपरत्या 3 P2 किं भूतः?। 4 B जात किरणेन 5 P2 °तारा 6 B [1] किरणेनो°···········दीप्तिमान्; [2] उपरागे······· °वित्यकः। 7 P2 om. °रूपः 8 B om. युवो°·······अकः ॥१०२॥

1 B एतत्। 2 P2 °गुंण° 3 P2 भूतः 4 P2 समुद्भवा 5 B °माग्ने° 6 B °नैक; P2 धूमेन किल 7 B °रून्मी° 8 B °विश्रणे 9 B अरणी 10 P2 om. सम्प्रदाने चतुर्थी ॥१०३॥

1 B श्यामी। 2 B P2 मधुरायां; edr. मथुरायां 3 B लुङि; P2 लुटि 4 P2 om. मथुरानगर्या मारीणां 5 B P2 om. घौतैः edr. add. घौतैः 6 B °मध्ये 7 B P2 om. तां edr. add. तां 8 P2 शोभति ॥१०४॥

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

1 B गोवर्द्धने । 2 P2 निर्नि° 3 B भूतः 4 B मयूरैः............ भक्ष्यन्ते here. 5 P2 om. सुरभि°........पाठान्तरम् ॥१०५॥

1 B भावी । 2 P2 om. वृन्दा°............प्रक्रम्यते 3 B च मध्ये 4 B चयः 5 P2 सौख्ये 6 B om. लक्ष्यः........कोरका 7 P2 om. पल्लव°............भवति 8 P2 om. °तरां 9 B °दस्यैव 10 B वृत° 11 P2 om. भविष्यति गम्यादयः ॥१०६॥

1 P2 text °तटे 2 B om. जलं 3 B om. किं भूतः............ °मिच्छुः 4 B P2 om. खञ्जन्; edr. add. खञ्जन् 5 B कस्तूरिकाया 6 B पन्था; P2 पाथः; edr. पान्थः— ॥१०७॥

1 B पूजा । 2 P2 om. विसर्गः 3 B देवजाया° 4 B °बीजैश्च 5 B P2 गौरमग्रे; edr. गौरगर्भे 6 B करो— ॥१०८॥

1 P2 text °श्रियं 2 B वैरि । 3 B सोऽयं............भाव्यम् aft. व्याख्येयम् 4 B °त्वसे वाप्य; P2 om. एव 5 B किं भूता 6 P2 °वृन्दः 7 P2 ये 8 B om. एक 9 B वैरीणां 10 B om. वैरि° 11 B पाठान्तरम् 12 P2 °श्रियं 13 B वा— ॥१०९॥

1 B तस्मा । 2 B यस्या 3 P2 om. अध्वानम्— ॥११०॥

1 B भूयो । 2 P2 तां here. 3 B P2 om. भूयोऽपि; edr. add. भूयोऽपि 4 B °श्चत्वरा— ॥१११॥

1 B एतस्य । 2 B कामी; P2 कासी 3 B संसारोत्त° 4 P2 °तारणा° 5 P2 अगताः 6 P2 दुरित° 7 P2 पाठे 8 P2 add. नरा 9 B 102.— ॥११२॥

1 P2 text °सागर° 2 B आलोक्य । 3 B रोदति 4 P2 भावीनि 5 P2 आलोक 6 B °धत्ते 7 P2 om. यत् 8 B P2 om. तर्हि 9 P2 तेषां 10 P2 om. यदरोदीत् 11 P2 °ऽजायते 12 P2 नाम धीहीति; 13 P2 तृतीये............वर्णितम् aft. धृतव्रतः 14 P2 om. तामिस्रादिसर्गं दर्शयित्वा 15 P2 om. दृष्ट्वा पापी°............नीललोहितः ॥7॥ 16 B °मात्मानं 17 B सुरै° 18 B °जयेत 19 B नातः; P2 om. विसर्गः 20 B पद्मो 21 P2 °पालयेत् 22 B ह्लादा° 23 B सुराः; P2 °श्रेष्ठी 24 P2 °धारयं 25 P2 इतीन्द्रियाण्यमुञ्च्येमि

CC-0. RORI. Digitized by Sri Muthulakshmi Research Academy

26 B °भ्येमि 27 B कृतानि 28 P2 असौ 29 P2 °शिरे 30 B उररेता; P2 उरु° 31 P2 add. इति; and om. धीवृत्ति°………… नीललोहितः। 32 B घतृंन्वीर° 33 B नित्यस° 34 B अरोदीति 35 B om. अत्र 36 P2 om. तु 37 P2 काका 38 P2 मिषमात्रं न 39 B 103— ॥११३॥

1 B वारा। 2 B निवसते 3 B om. देवानां— ॥११४॥

